भर्तृहरिविरचितः

वाक्यपदीय-ब्रह्मकाण्डः

म०म० पं० द्रव्येश झा प्रणीतप्रत्येकार्थप्रकाशिका

पण्डित वेदानन्द झा

विरचितानन्दासूर्यमाया

टीकात्रयसंवलितः

प्रकाशक :

मन्दाकिनी संस्कृत विद्वत्परिषद्

दिल्ली

Vākyapadīya Brahmakāṇḍa
of
Bhartṛhari
Pratyekārthprakāśika Commentary
by
MM Dravyeśa Jha

Ananda in Sanskrit & Surya Maya in Hindi
Commentaries
by
Pt. Vedanand Jha

Published
by

Mandākinī Sanskrit Vidvat
Parishad, Delhi

श्रीमते विद्वद्वराय डॉ. पण्डित ललितकुमार त्रिपाठी-
महोदयाय सादरं उपहरति -
- रामदेव झा.
५.५.2003

भर्तृहरि विरचितः

वाक्यपदीय-ब्रह्मकाण्डः

म॰म॰ पं॰ द्रव्येश झा प्रणीतप्रत्येकार्थप्रकाशिका

पण्डित वेदानन्द झा
विरचितानन्दासूर्यमाया
टीकात्रयसंवलितः

प्रकाशकः
मन्दाकिनी संस्कृत विद्वत्परिषद्
दिल्ली

प्रकाशक :

- मन्दाकिनी संस्कृत विद्वत्परिषद्
  63, विज्ञान विहार, दिल्ली-92
  दूरभाषः– 2150045

- प्रथम संस्करणम्- 2002

- © लेखकः

- मुद्रक : हिन्दुस्तान ऑफसेट प्रेस,
  A-26, नारायणा इंडस्ट्रीयल एरिया फेज–2,
  नई दिल्ली–28
  मूल्य = 250/- (पेपर बैक)
  500/- (पुस्तकालय संस्करण)

Computer Leser Typing,
Bowneesh Graphics, Ramesh Nagar,
New Delhi-110015

Vakyapadiya Brahmakanda

Ananda & Surya Maya Commentaries

by

Pt. Vedanand Jha

॥ साम्बसदाशिवार्पणमस्तु ॥

सिद्धाय सिद्धिसमुपास्यपदामृताय
योगीश्वराय निजरूपसमाहिताय ।
साक्षात्कृतामलनिरञ्जनशब्दतत्त्व-
ब्रह्माद्वयाय हरये नम इष्टदाय ॥

हृदयं ब्रह्मकाण्डस्य द्रव्येश त्वत्पदाब्जतः ।
आख्यातं त्वद्विनोदाय तुभ्यमेव समर्प्यते ॥

जयति भारती, जयति भारतम्

PREFACE

It is quite in the fitness of things that Mandākinī Sanskrit Vidvat Parishad should have thought of bringing out Bhartṛhariś *Vākyapadīya* (Brahmakāṇḍa) with *Pratyekārthaprakāśikā* Sanskrit commentary by the Late MM Dravyeśa Jha. The work had long gone out-of-print. So its reprinting will fulfil the long standing demand of scholars all the world over specially interested in Indian Linguistics. To add to this, this edition also includes two explanatory commentaries by the Late Pandita Vedananda Jha, the illustrions son of the original commentator, viz . *Ānandā* commentary in Sanskrit and *Sūryamāyā* Commentary in Hindi. Besides, a comprehensive Introduction makes this edition all the more interesting and useful.

Pratyekārthaprakāśikā, in a way, represented a pioneering effort to bring to light the hidden treasures of the philosophy of language as contained in the Vākyapadiya, at a time when no other standard commentaries thereon were available. It was, first, brought out in 1926. So Mandākinī is celebrating the Platinum Jubilee of the first appearance of this first modern sanskrit commentary by bringing it out in 2002.

I have no words to express our gratitude to Pandita Vedananda Jha who had so kindly agreed to hand over the Press copy of this work to Mandakinī while he was alive. Of course, he was the founder President of this organization. He could have himself decided to include this under the publication programme of Mandakiñi. But he preferred to keep quiet about it until we could know from other sources about this magnum Opus of his. I still remember that evening when Pt. Ram Deva Jha. General Secretary and Pt. Nagendra Jha, Jt. Secretary, Ravindra Nath Jha and myself had approached him with our proposal to bring it out under the auspices of Mandākinī and he had gladly agreed to hand over the Press copy to his own organization. We wanted to honour this Sarvatantrasvatantra Scholar of eminence by releasing this scholarly

work. But unfortunately we are now deprived of his physical presence.

'हा हन्त हन्त नलिनीं गज उज्जहार'।

Even though Pandita Ji is no more, his presence is still very much felt by us. His inspirations will never die out. He was a living embodiment of Śāstraic knowledge. Those who regularly attend Mandākinī seminars still remember the deep Śāstraic expositions on the various topics concerning Vyākaraṇa, Nyāya, Vedānta, Sāṁkhya-Yoga, Sāhitya etc. presented by Pandita Ji during his presidential addresses or special lectures from time to time. What is specially noteworthy is that every time one could get something new in his expositions.

Alas ! that torchbearer of Śāstraic knowledge, a moving encyclopaedia of Sanskrit learning, Mahakāvi, a living symbol of magnanimity and oriental wisdom is no more.

But his Triveṇī in the form of his father's *'Pratyekārthaprakāśikā'* as well as his *Ānandā* and *Sūryamāyā* is very much with us. It will continue to have an everlasting purifying effect on all of us.

Long Live Bhartṛhari !
Long Live Dravyeśa Jha !
Long Live Vedananda Jha !
Long Live Mandākinī !

जयन्ति ते सुकृतिनो
रससिद्धाः कवीश्वराः ।
नास्ति येषां यशःकाये
जरामरणजं भयम् ॥

Ram Karan Sharma
President,
International Association
of Sanskrit Studies

"श्रीर्जयति"

प्रस्तुतिः

सुविदितमेव भवेत् तत्रभवतां त्रिमुनिव्याकरणदर्शनरहस्यं गवेषयतां शब्दतत्त्वमहरहः परिशीलयतां सुरसरस्वतीजुषां विदुषां यत् 'एकः शब्दः सम्यग् ज्ञातः सुप्रयुक्तः' इत्यादिश्रुत्युपदेशदिशा ज्ञानपूर्वकसाधुशब्दप्रयोग-जपुण्यपूतान्तःकरणे स्वयंज्योतिर्ज्ञानाखण्डपरावाग्रूपशब्दब्रह्मसाक्षात्कारात्मको मोक्षः परमपुरुषार्थश्चरमं प्रयोजनं व्याकरणस्मृतेरिति। यथाहास्मिन् वाक्यपदीये प्रकरणे - "आसन्नं ब्रह्मणस्तस्य" (२२) इति, "तत्त्वावबोधः शब्दानाम्" (१३) इति, "तद्द्वारमपवर्गस्य" (१४) इति, "अत्रातीतविपर्यासः केवलामनुपश्यति" (१७) इति चोपक्रम्य "अपि प्रयोक्तुरात्मानम्" (१३२) इति, "तस्माद् यः शब्दसंस्कारः.....तद्ब्रह्मामृतमश्नुते" (१३३) इत्युपसंहारसन्दर्भग्रन्थेन ।

"अवङ् स्फोटायनस्य" इत्यत्र सूत्रकृता स्फोटायनाचार्यमतसूत्रणेन - संग्रहकारेण - महाभाष्यकारेण - तदन्यैर्वा कतिपयैः प्राचीनाचार्यैः स्वस्वग्रन्थे समुद्भावितो यो व्याकरणस्य दर्शनशास्त्रत्वप्रतिष्ठापकः शब्दब्रह्मात्मैकत्व-सिद्धान्तः, स काण्डत्रितयात्मके कारिकापूगरूपे वाक्यपदीये योगिप्रवरेण श्रीमद्भर्तृहरिणा सोपपत्ति प्रतिष्ठापितः पल्लवितश्चेति सुप्रथितम् । शब्दसाधुत्वानुशासनं द्वारीकृत्य शब्दब्रह्मात्मैकत्वज्ञानकरणत्वेन व्याकरणस्य दर्शनत्वे प्रमाणस्य वाक्यपदीयस्य सर्वशास्त्रेषु मूर्धाभिषिक्तप्रतिष्ठा सर्वतो-भावेन विभ्राजतेतराम् । श्रूयते हि-

"शब्दे ब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति" इति ।

वाक्यपदीयस्य निष्प्रतिद्वन्द्वं प्रामाण्यमेतावतैव सिध्यति यत् तस्य कारिका ह्यप्रतिहतप्रामाण्यनिकषायमाणा सर्वैरेव वैयाकरणैस्तदन्यैश्च नैयायिकै-

बौद्धैरार्हतैश्च तत्तदागमाचार्यैर्यथास्वं स्वस्वग्रन्थेषु भूषण-मञ्जूषा-तत्त्वसंग्रह-स्याद्वादरत्नाकरादिषु प्रमाणत्वेन संगृह्य सश्रद्धं व्याख्याता ।

वैक्रमाब्दसहस्रद्वयोपकण्ठकालकवलिते महति घटनाचक्रे मध्ये वैदेशिकबर्बरशासनोत्थानपतनसंघातसङ्कुले विपर्यस्ते तु भारतीयवाङ्मयेतिहासे बहूनां ग्रन्थानां कर्तुर्व्याख्यातुर्वेतिवृत्तनिर्धारणे जनश्रुतिस्तर्को वा किंवदन्ती वा प्रमाणत्वेनाश्रीयते, इति किमप्यवधारणं नातिक्रामति संशयं विपर्ययं वा ।

तत्र किं क्रियेत ? आस्तां तावत् ।

यदा तु वाक्यपदीयस्य कश्चनापि व्याख्याग्रन्थो नोपलभ्यते स्म, वृत्ते-र्वृषभपद्धतेर्वा चर्चापि नासीत्, हेलाराजीया पुण्यराजीया वा व्याख्या तु कर्णाकर्णिकया श्रूयमाणा नाममात्रावशेषा बभूव । एवं चैतस्याध्ययन-सम्प्रदायस्य गुरुपरम्पराश्रुतव्याख्यानमेवासीत् शरणम्, तदा हि वाक्यपदीयाध्य-यनाध्यापनकाठिन्यमनुभूय श्रद्धेयास्मत्पितृपादा विद्यागुरवश्च ते 'श्रीसिद्ध-सिद्धान्तपद्धति-श्रीगोरक्षसिद्धान्तसंग्रह' योगग्रन्थयोः स्वोपज्ञभाष्यकृतो महामहोपाध्याय श्री द्रव्येश झा शर्माणो व्याकरण-वेदान्त-न्यायोपाध्यायाः सर्वदर्शनसूरयः श्रीमतां भूतिकाराणां म॰म॰ रामकृष्णापरनामतात्याशास्त्रिणाम्, सर्वतन्त्रस्वतन्त्राणां श्रीबालबोधमिश्राणां च शिष्यप्रवराः शास्त्रार्थमहारथा वृन्दावने हयग्रीवरामानुज-संस्कृत-महाविद्यालये प्रधानाचार्याः १८८३ वैक्रमाब्दे (१९२६ ई॰ वर्षे) सर्वप्रथमं वाक्यपदीयब्रह्मकाण्डस्य स्वोपज्ञां प्रत्येकार्थप्रकाशिकाऽऽ-ख्यामन्वर्थां टीकामकार्षुः ।

तदिह प्रसङ्गे महाकवेर्भारवेः सूक्तिः सहसा स्मर्यते किल -

"स तु तत्र विशेषदुर्लभः सदुपन्यस्यति कृत्यवर्त्म यः" इति । स्वाध्याये समेषां क्लेशमपनेतुं वाक्यपदीयविशदाशयप्रकाशनाद् ऋते स्ववैदुष्यप्रख्यापनं वा प्रतिष्ठार्जनं वा तेषां किमप्यन्यदुद्देश्यं नासीत् । प्रत्येकार्थप्रकाशिका हि समासेन सरलभाषया सकलमविकलं भगवद्भर्तृहरेराशयं पूर्णं याथातथ्येन प्रकाशयति । तदेतत् तथ्यं स्वजन्मना अमेरिकादेशगौरवम् समस्तपाणिनीयाष्टकस्य प्रवचनाभ्यासकर्मणा भारतीयागमगौरवं च समेधयमानेन विद्वत्तल्लजेन श्री जार्जकारडोना महोदयेन - 'पेन्सिलवानिया यूनिवर्सिटी' प्रवाचकेन स्वकीये "पाणिनि - ए सर्वे ऑफ रिसर्च" नामकेऽनुसन्धानात्मके ग्रन्थे १९८० ई॰ वर्षे "मोतीलाल बनारसीदास" प्रकाशिते २९६ पृष्ठे

प्रत्येकार्थप्रकाशिकायाः सर्वप्रथमं स्थानं समुल्लिखितम् । प्रमोदास्पदं यद् ब्रह्मकाण्डप्रत्येकार्थप्रकाशिकायाः प्रकाशनात् प्रभृत्येव वाक्यपदीयव्याख्यायाः कश्चनारुणोदयप्रकाशकालः प्रावर्तत । ततस्त्रिचतुरदशकाब्दपर्यन्तं काश्यामन्यत्र वा यत्र तत्र सर्वत्र पठनपाठनप्रणाल्यां प्रत्येकार्थप्रकाशिकैवाधारशिला बभूव समेषाम् ।

श्रीपूर्णनाथ - संस्कृतमहाविद्यालये योगाश्रममायापुरे हरिद्वारे दुर्विधेर्दुर्विलासादकस्मात् १९४२ ई॰ वर्षे भ्रातृद्वितीयायां कुजे दिवंगतेषु तातपादेषु प्राचार्येषु विधिहतो दुर्विदग्धोऽयं वराकः श्रीकाशीविश्वनाथशरणं श्रितो व्याकरणन्यायादिच्छात्र आचार्येऽधीती श्रीश्यामामहाविद्यालये- 'श्रीभूपनारायण झा - श्रीमदुग्रानन्द झा - श्रीबालबोधमिश्र' गुरुचरणारविन्दचञ्चरीकतामुपेतस्तदानीन्तनकाशिकस्वाध्यायश्रवणपरम्परया शब्दविग्रहधरानुदाराशयान् श्रीरामयशस्त्रिपाठिमहाशयख्यातचरणानप्युपाश्रित्य पठन् प्रत्येकार्थप्रकाशिकामेवोपादाय पाठयतः सर्वतन्त्रस्वतन्त्रानपि तान् सर्वानद्राक्षम् । अत्र तेषामन्यतमशिष्याः शिष्टा येऽवशिष्टाः सन्ति, त एव साक्षिणः । हन्ताद्य ते गुरवो यशःशरीराः प्रातःस्मरणीया एव । प्रत्येकार्थप्रकाशिकाया वैशिष्ट्ये इतोऽन्यत् किमधिकमन्तरङ्गं प्रमाणम् ? मूलतया प्रकाश्यते साऽपि । ततः स्वयमवधारयिष्यन्ति सुधियः ।

प्रत्येकार्थप्रकाशिकायाः प्रकाशनाद् वर्षदशकोत्तरं यथोत्तरं कृतोत्साहाः पण्डितप्रवराश्चारुदेवशास्त्रिणो वा श्रीसूर्यनारायणशुक्लप्रभृतयो वा कियन्तोऽर्वाचीना व्याख्याकाराः प्रादुरभूवन्निति महानामोदः । ततोऽपि गरीयानयं हर्षप्रकर्षो यद् वाक्यपदीयवृत्तिर्वृषभदेवपद्धतिर्हेलाराजीया पुण्यराजीया वा व्याख्याः कुतोऽपि अंशतः समुपलब्धाः । तत्र प्रथमद्वितीयकाण्डयोरेव वृत्तिरुपलभ्यते न तु तृतीयकाण्डस्य, पद्धतिः प्रथमकाण्डमात्रस्य, हेलाराजस्य 'प्रकाश' व्याख्या तृतीयकाण्डमात्रस्य, 'शब्दप्रभा' तु तस्य श्रुतिमात्रविषया, पुण्यराजव्याख्या द्वितीयकाण्डमात्रस्य समुपलभ्यते, पुण्यपत्तनग्रन्थागाराद्वा काशिकसरस्वतीभवनाद्वा काष्ठमण्डपग्रन्थागाराद्वा द्वारबङ्गाद्वा कुतोऽपि कथमपि कालक्रमेण वाक्यपदीयाशयालोडनस्यैतावती खण्डसामग्री संचितेति वस्तुस्थितिः ।

अथ १९६३ ई॰ वत्सरे पण्डितवरश्रीरघुनाथशर्मणा वाक्यपदीयकाण्डत्रयस्योपलब्धभागे सवृत्तिकस्य पद्धतिमनुसृत्याम्बाकर्त्री नाम व्याख्या कृतेति नूनमर्वाचीनव्याख्यासम्प्रदायप्रवर्तनस्य प्रतिफलम् । तदर्थं यथास्वं सर्वेऽपि व्याख्याकारा हृदयेनाभिनन्दनीयाः । यथोत्तरं समेधतान्तरामेषा नवनवा वस्तुतत्त्वान्वेषणपरा सुधियां परम्परा । प्राहुश्च प्राञ्चः - "नासूया तत्र कर्तव्या यत्रानुगमः क्रियते" इति । अम्बाकर्त्र्या उपोद्घातेपि प्रत्येकार्थप्रकाशिकायाः सर्वतः प्राथम्यं यथार्थवादितया वा यथार्थमपलपितुमशक्यतया वा स्वीकृतं लेखकमहाशयैः । तथा चाहुः - "तत्र मद्दृष्टासु व्याख्यासु कालक्रमानुसारेण पण्डित - द्रव्येश झा - विरचिता टीका प्रथमं समुल्लेखमर्हति" इति । किन्तु, तत्र किमपि मात्सर्यमपि प्रकटीकृतम्, तन्नास्वाभाविकम् । "विद्वांसो वसुधातले परवचःश्लाघासु वाचंयमाः" इत्यपि सत्यम् ।

तत्र पण्डितवर - श्रीसूर्यनारायणशुक्लरचितभावप्रदीपस्यालोचनानन्तरं प्रत्येकार्थप्रकाशिकायाः समालोचने भणितं यत् - "तत्रभवतो भर्तृहरेर्मनसि किं किमर्थवैचित्र्यमासीदिति समुत्प्रेक्षणे प्रयत्न एव न कृतः" इति तैर्यथार्थस्य कदर्थनापि प्रक्षिप्ता । तन्नयने निमील्य जल्पनमात्रम् । प्रत्येकार्थप्रकाशिकां निभालयन्तु भद्रा यत् - कारिकाया व्याख्यानन्तरं सर्वत्र 'अयमाशयः, अयं भावः, इति हृदयम्, इति सारः, इति सुधीभिर्विभाव्यताम्' इत्यादिप्रघट्टकैः श्रीभर्तृहरेराशयः सम्यगालोडित एव विहाय वागाडम्बरम् । इमां कदर्थनां कार्पण्यहतां समीक्ष्यैव पिष्टपेषणाय ममैषा व्याख्याप्रवृत्तिः । बहुशोऽऽन्यथाऽख्यानचटुला भावप्रदीपव्याख्याऽपि बहुत्रारुन्तुदा प्रतिबोधयति मां प्रतिवक्तुम् । ये तु वदन्ति - तत्र भवतो भर्तृहरेर्मनसि किं किमर्थवैचित्र्यमिति, तान् प्रतिवच्मः - "यदिहास्ति तदन्यत्र, यन्नेहास्ति न तत् क्वचित्" इति प्रथितैव सूक्तिः ।

एतदालोच्यैव विदां विनोदाय विवित्सूनां सन्देहापनोदाय प्रयते कामपि विमर्शकथामातनितुम्। सर्वं तद् विप्रतिपद्यमानं स्थलं "स्वरूपव्याक्रियैव पराक्रिया" इति नयेन कारिकाव्याख्यावसरे यथास्थलं व्याकृतमेव, तन्नेहोपन्यस्यते ।

इदं त्विह चिन्त्यते - अम्बाकर्त्र्या उपोद्घातः किमिह यथाख्याताभिधानैर्विद्वदभिनन्द्यैः को०अ० सुब्रह्मण्यमय्यरमहानुभावैः स्वयं विलिखितः, किं वा अम्बाकर्त्रीकर्तृशर्ममहाशयैरिति संशयं कतिपयोपोद्घातपङ्क्तिरेव मे मनसि जनयति । वृत्तेर्वैशिष्ट्यवर्णनोत्तरम् (घ) पृष्ठे सा हि पङ्क्तिरित्थम्- "नात्र पुण्यराजहेलाराजौ अस्माकं सहायकौ" इति । नात्रेति कथनेन यदि प्रकृत उपोद्घातो गृह्यते तर्हि तत्र पुण्यराजहेलाराजव्याख्ययोः कोऽस्ति साहाय्यप्रसङ्गः? यो निषिध्यते । नैव पुरस्तान्नापि परस्तात् क्वचिदपि तयोरुपन्यासप्रसङ्गः । तस्माद् 'अस्माकम्' इति परामर्शेन श्रीमदय्यरमहोदयानामुक्तिर्न सम्भाव्यते ।

तस्मादुदाहृतेयं पङ्क्तिः स्वयमम्बाकर्त्रीकर्तुरेव सम्भाव्यते यत् सवृत्तिकवाक्यपदीयस्य व्याख्याने वृषभपद्धतेः साहाय्याश्रयणमिव तयोर्न साहाय्यम्, अनुपलब्धेरिति साधु सङ्गच्छते । सम्भवति चेदं यत् काशीसंस्कृतविश्वविद्यालयकुलपतिपदभारगौरवं वहतां तेषामवकाशाभावे स्वीकृत्या शर्ममहाशयैरुपोद्घातोऽपि तन्नाम्ना विलिखितः स्यात् । अग्रेऽपि (छ) पृष्ठे - भर्तृहरेः वृत्तिकर्तृत्वसाधनत्वेन - 'अपर आह - अपरोऽर्थः- अथवा' इत्यादिशब्दप्रयोगविमर्शप्रसङ्गे 'यथावसरमन्यत्रास्य प्रश्नस्य समाधाने यत्नः करिष्यते' इत्युक्तिरपि शर्ममहाशयस्योपोद्घातकर्तृत्वमवगमयति । आस्तां तावत् किमपि भवतु ।

तत्र त्वयमस्ति विशेषतो विमर्शविषयो यत् - वाक्यपदीयकारिकाया वृत्तेश्चाभिन्नकर्तृकत्वं भिन्नकर्तृकत्वं वेति । उपोद्घातकारैरन्यैर्वा कतिपयैर्विद्वद्भिः साभिनिवेशमभिन्नकर्तृकत्वं मन्यते । अस्माकं कियतां तु नास्ति तत्र प्रत्ययः ।

कारिकावृत्त्योर्भिन्नकर्तृकत्वम् - तयोः शैल्योः अत्यन्तवैरूप्यात्, काण्डत्रये वृत्तेर्व्याप्तिविरहात्, तयोरभिधानभेदात्, क्वचित् कारिकातः स्वतन्त्रार्थस्याप्याकलनात् ।

तथाहि - यत्र कारिका विषयगाम्भीर्याद् गभीराशयाऽपि सुप्रसिद्धपदविन्यासा प्रसादगुणोपेता, तत्र वृत्तिरप्रसिद्धपदक्रमजटिला शङ्काशङ्कुभिः सङ्कुला दुरवधारार्था ।

यद्यपि वृत्तिः संगृहीतप्रमाणैः कारिकासिद्धान्तावधारणेऽनन्यसहकारिणीति सत्यम्, सा हि व्याडिकृतसंग्रहं पातञ्जलमहाभाष्यं नैकागमवाक्यं नानाप्राचीनाचार्यमतं च संकलय्य शब्ददर्शननिदर्शनपरा नूनमुपादेयेत्यत्र नास्ति कापि संशीतिस्तथापि तयोः शैलीवैरूप्याद् भर्तृहरेरन्य एव कश्चन हरि-वृत्तेः कर्ता, यथा हि भागवृत्तेरिति तर्क्यते ।

पश्यन्तु विपश्चितः – "एकमेव यदाम्नातम्" इति द्वितीयकारिकैव विमृश्यतां तावत् –

यत् पूर्वप्रकृतं शब्दतत्त्वं ब्रह्म 'एकमेवाद्वितीयं ब्रह्म' इत्यादिश्रुतिषु एकमेव आम्नातम्, तत् शक्तिव्यपाश्रयात् = विविधशक्त्युपाधियोगात् भिन्नं भासते । तच्च ब्रह्म शक्तिभ्योऽपृथक्त्वेऽपि आरोपितपृथक्त्वेन पृथगिव भवतीति कारिकार्थः स्पष्टः ।

अत्रत्या वृत्तिस्तु सारग्राहिणी सत्यपि दुरूहशब्दप्रयोगेण शब्दावर्तचंक्रे भ्रामयति, किं तस्य तात्पर्यं ? तन्न ज्ञायते । तथाहि वृत्तिः – "यावद्विकार-विकारिविषयमेकत्वरूपं पृथक्त्वरूपं वा सर्वम्, तत् प्रकृत्येकत्वानति-क्रमेणेत्येतदाम्नातम्" इति । कोऽयं कुटिलः पदक्रमः ?

इह – यावद्विकारिविषयमेकत्वरूपम् – यावद्विकारविषयं च पृथक्त्वरूपं विवक्षितम्, तत् पाठक्रमं विहाय व्युत्क्रमेण विन्यस्तम् ।

किंच 'यावद्विकारविकारिविषयम्' इति समस्तं पदम्, तत्रान्वयि पदम्- 'एकत्वरूपं पृथक्त्वं वा' इति व्यस्तम् । एवं स्थिते व्यस्तस्य समस्तैकदेशे पदे व्युत्क्रमेणान्वये क्रियमाणे महान् क्लेशः यथासंख्यनियमविरुद्धः, 'सविशेषणानां वृत्तिर्न, वृत्तस्य विशेषणयोगो न' इति नियमविरुद्धश्च । इह यथासंख्यमन्वयः कर्तव्यो न वेति विकल्पोदयात् संशयो भ्रामयति जिज्ञासुकोमलमतिम् – यथासंख्यमन्वये तु विवक्षितार्थविरोधः, अनन्वये च शास्त्रनियमविरोधः । एवं च श्रवणमात्रेण यस्यार्थः स्फुटः, एतस्य व्याख्यायामन्तर्निमज्यापि भावो हृदयङ्गमो न भवति, तर्हि सा व्याख्या छलनैवापद्यते । अस्तु नाम सूक्ष्ममतिरूहापोहाभ्यां सम्यगर्थमवधारयेत्, तावता न व्याख्याया उद्देश्यपूर्तिः । अस्तु वा कथंचित् ।

नैषा वक्रशैली निश्छलकोमलहृदयस्य परमकारुणिकस्य लोककल्याणैषिण आचार्यभर्तृहरेः स्वसरलप्रकृतिं विहायाकस्माद् भवेदिति – सुधीभिरनु-सन्धीयताम् । तस्माद् भिन्नकर्तृकत्वमेव कारिकावृत्त्योरित्या स्थीयताम् ।

अत एव सवृत्तिकस्यैव वाक्यपदीयत्वमित्यपि चिन्त्यम्, व्यतिरेकनियमासिद्धेः, वृत्तेरभावेऽपि वाक्यपदीयत्वस्वीकारात् । अन्यथा सवृत्तिकस्यैव वाक्यपदीयत्वे ब्रह्मकाण्डे "यथार्थजातयः सर्वाः" इत्यत आरभ्य सप्तश्लोक्यां, तृतीयकाण्डे च सम्पूर्णे, यत्र क्वापि वा वृत्तेर्व्यतिरेके कथं वाक्यपदीयत्वमिति चिन्त्यताम् ।

किं च तयोरभिन्नकर्तृकत्वे यद्युभयोर्युगपदेव रचना स्यात्तदोदाहृतस्थलेषु वृत्तेरनुपलम्भे बीजं विचिन्त्यताम् । पूर्वपश्चाद्भावेनायुगपद्रचना चेत्तदा तु प्रथमं कारिकांशो मुख्यो भागो हि विरचितो भवेत्तदनन्तरं वृत्तिरिति पौर्वापर्यक्रमोऽवश्यमभ्युपेयः । तदा पुरा कारिकांशग्रन्थस्य किमप्यभिधानमपि कृतं भवेत्, तत् किमन्यत् स्यात् वाक्यपदीयात् ? वाक्यं पदं चाधिकृत्य कृतमिदं वाक्यपदीयमित्यन्वर्थं नाम । तत्पश्चादेवेयं वृत्त्याख्या व्याख्या विरचिता केनापीति सवृत्तिकस्यैव वाक्यपदीयत्वं कुतः ? यथा व्याकरणसूत्रस्य वार्तिकस्य वा व्याख्याभाष्यादिकमपि व्याकरणमेवोच्यते, तथा वाक्यपदीयव्याख्या वृत्तिरपि वाक्यपदीयमित्यन्यदेतत् । तदापि यथा नहि सूत्रवार्तिकव्याख्यानं सूत्रं वार्तिकं वोच्यते, तथा वृत्तेर्वाक्यपदीयप्रकरणान्तर्गतत्वेऽपि वाक्यपदीयं नाम वक्तुमशक्यम् ।

किं च सवृत्तिकमेव यदि चेद् वाक्यपदीयं स्यात्तर्हि वृत्तिरिति भिन्नमभिधानमपार्थकमेव भवेत्, वाक्यपदीयेति नाम्नैव गतार्थत्वात् । अथ वृत्तिरिति व्याख्याया नाम तदा कारिकात्मकं मूलमेव वाक्यपदीयमिति सुस्पष्टम् । त्रिमुनिव्याकरणस्य 'सूत्र-वार्तिक-भाष्येति' भिन्नाभिधानवत् वृत्तिरिति भिन्नाभिधानमपि तयोर्भिन्नकर्तृकत्वं सूचयति । नो चेत कारिकारचनानन्तरं पुनस्तेनैव वृत्तिरचनायां प्रारब्धायां तत्र किमपि बीजमपि नूनमभिधानीयं स्यात्, यथा हि तत्र भवताऽऽचार्यविश्वनाथेन प्राक् कारिकावलीं निर्माय पुनर्न्यायसिद्धान्तमुक्तावलीनिर्माणोपक्रमे "विशदीकरवाणि कौतुकान्नु राजीवदयावशंवदः" इति बीजमभिहितम्, तथेहापि तेनैव पुनर्निर्माणे पुनरुक्तिदोषस्य पिष्टपेषणापत्तेर्वा वारणाय कोऽपि हेतुर्वक्तव्यः स्यात् ।

अपि च कारिकातो वृत्तेः स्वतन्त्रार्थाकलनमपि बहुशो दृश्यमानं तयोर्भिन्नकर्तृकत्वमवद्योतयति । तद् यथा -

"अनादिमप्यवच्छिन्नां श्रुतिमाहुरकर्तृकाम् ।"

इति सन्दर्भेण श्रुतिस्मृत्योरुभयोरपि प्रवाहाविच्छेदेन नित्यत्वाद् धर्माधर्मादिव्यवस्थायां तयोः समानप्रामाण्ये संस्थापिते सति श्रुतिवत् स्मृतेरपि स्वतन्त्रप्रामाण्यप्रसङ्गनिरासाय कारिकामाह –

"अविघाताद् विवृत्तानामभिख्या स्वप्नवत् श्रुतौ" इति ।

स्वप्ने दृष्टार्थस्य जाग्रति प्रबोधेऽभिज्ञाय परं प्रति आख्यान (कथन)-वत् श्रुतौ दृष्टार्थस्य स्मरणेनाख्यानं हि स्मृतिर्नत्वपूर्वा, इति स्वप्नदृष्टान्तेन स्मृतेः श्रुत्यधीनमेव प्रामाण्यं न तु स्वतन्त्रमिति प्रकृतकारिकायाः सरलं प्राञ्जलमखण्डमर्थं विहायाव्यवहितपूर्वकारिकाप्रतिपादितार्थस्यैव पिष्टपेषणमिव विदधती वृत्तिरत्र तद्विपरीतं स्वतन्त्रमर्थमाकलयति यत् – 'अविभागात् = शब्दब्रह्मणो विवृत्तानाम् ऋषीणां श्रुतौ स्वप्नवत् करणनिरपेक्षम् अभिख्या= मानसं ज्ञानम्, स्मृतिस्तु भावानां तत्त्वम् = स्वभावमुपलभ्य आम्नायेषु लिङ्गानि दृष्ट्वा ऋषिभिर्विहिता' इति ।

अयं तु कारिकाकार- 'भर्तृहरि' सिद्धान्तात् स्वतन्त्रो विपरीतश्चार्थः । विमृश्यतां तावत्- स्वप्नो हि जाग्रत्संस्कारजं निद्रादोषजं मिथ्याज्ञानम्, श्रुतिस्तु महर्षीणां योगजमलौकिकं प्रत्यक्षं प्रातिभं यथार्थज्ञानम्, इति तयोः साम्यं कल्पयितुमप्यशक्यम् ।

अथ करणनिरपेक्षत्वमात्रं साम्यमिह विवक्षितं, न तु सर्वांशे, तथाहि – अविभक्तात् शब्दब्रह्मणो विवृत्ता ऋषयः स्वप्ने इव करणनिरपेक्षमश्रोत्रगम्यं शब्दं प्रज्ञयैव = शुद्धेन मनसा पश्यन्ति, न तु गुरुमुखात् श्रवणेनेति करणनिरपेक्षत्वमात्रं स्वप्नसादृश्यं श्रुतौ विवक्षितं न त्वन्यत् किमपीति चेत्तदपि न युज्यते, वस्तुतो नहि स्वप्नेऽपि करणनिरपेक्षं ज्ञानं भवति ।

तत्र हि यथा दृश्यमाना रथाश्वादयो विषया जाग्रत्संस्कारनिद्रादोषजाः प्रतिभासमात्रशरीरास्तथा विषयज्ञानकरणानीन्द्रियाण्यपि प्रातिभासिकान्येव जायन्ते, इति वेदान्तसिद्धान्तः । स्वाप्नैरिन्द्रियैरेव ते ते स्वाप्ना विषया गृह्यन्ते, न तु करणं विना । तदाह बृहदारण्यकश्रुतिः– "न तत्र रथा न रथयोगा न पन्थानो भवन्त्यथ रथान् रथयोगान् पथः सृजते" (४ अ० ३ ब्रा० १० सू०) इति ।

तस्मात् 'श्रुतौ स्वप्नवत् अभिख्या' इत्यन्वयेन वृत्तौ व्याख्यानं स्वतन्त्रं कारिकास्वारस्यविपरीतं च ।

एतस्मादपि हेतोर्वृत्तेर्भिन्नकर्तृकत्वं गम्यते । अभिन्नकर्तृकत्वे स्वीक्रियमाणे तु पूर्वापरविरोधोऽपसिद्धान्तापत्तिश्चापद्येत ।

तस्मादिह स्वप्नदृष्टार्थस्य जाग्रति कथनमिव श्रुतिदृष्टार्थस्य लिङ्गेभ्यः स्मृतौ कथनमित्येक एवार्थः श्रुत्यधीनस्मृतेः प्रामाण्यबीधनाय विवक्षितो ज्ञेयः ।

एवं च कारिकातो वृत्तौ स्वारस्यविपर्ययदर्शनादपि तयोर्भिन्नकर्तृकत्वं गम्यते ।

किं च 'उभयेषामविच्छेदाद्'' इति चरमकारिकापीह समीक्ष्यताम् । तथाहि- 'उभयेषाम्' इत्यनेनोपसंहारे साध्वसाध्वोरुभयोः शब्दयोः समानमेव साक्षाद् वाचकत्वमिहोच्यते, न तु साध्वनुमानेनासाधोर्बोधकत्वम्, तस्य 'पारम्पर्यादपभ्रंशा' इत्यनेन प्राग् निरस्तत्वात् । तयोरविशेषेण साक्षाद् वाचकत्वे च साधकयुक्तिरिहोच्यते यत् - 'यथा अन्यशब्दविवक्षया यदि केनापि प्रमादादज्ञानाद्वा अन्योऽवाचकः शब्दः प्रयुज्यते, तदा स शब्दो बालप्रलापवत् विवक्षितार्थस्य बोधको न भवति, तथा केनापि यदि असाधुशब्दः प्रयुज्यते तर्हि तस्मादन्योऽनुमीयमानः साधुशब्दो विवक्षितार्थबोधको नैव भवितुमर्हतीत्यतः साधुशब्दे इव असाधावपि स्वतन्त्रा शक्तिः स्वीक्रियते, इत्ययं सरलः कारिकार्थः सुस्पष्टः ।

अस्या वृत्तिस्तु महति संशयावर्ते भ्रामयतीत्यवेक्षताम् । तथा चेह वृत्तिः- ''तत्रान्यशब्दविवक्षया बालप्रलापवदर्थेषु प्रयुज्यमानो यः शब्दो रूढो यश्च न रूढः, तावुभावपि अर्थस्य वाचकौ न भवतः'' इत्येतावत्तु स्पष्टम् ।

तदग्रे - ''तत्र तु साधुव्यवहिता वा भवत्यर्थप्रतिपत्तिरभ्यासाद्वा प्रमत्तानामक्षिनिकोचादिवत् संप्रत्ययमात्रं जायते'' इति किमिदं विकल्पजालमास्तृतम् ? पूर्वं सिद्धान्ते साधोरिवासाधोरपि वाचकत्वं निर्णीतम्, तर्हि तद्विपरीतं किमिदं विकल्पकवलितं पुनरुच्यते- 'साधुव्यवहिता वा... अभ्यासाद्वा' इति । इयं विकल्पोक्तिः सूचयति यत् - नास्ति वृत्तेः कुत्राप्याश्वासः । असाधूनामवाचकत्वं परमतं निरस्तं तर्हि 'साधुव्यवहिता वा' इति विकल्पोक्तिः केवलं विभ्रमजालमेव वितनुते - 'असाधुः साक्षाद् वाचको न वा' इति ।

किं च - ''अनित्यवादिनां त्वस्मिन् वादे बुद्धिविपर्ययः ।''

इत्यत्रत्या वृत्तिरपि पर्यालोच्यताम् - ''प्रकृतौ भवं प्राकृतम्'' इति व्युत्पत्त्या असाधुसंस्कारेण साधूनामसाधुविकारत्वं संस्कृतत्वम् - असाधूनां च साधुप्रकृतित्वमाह वृत्तिः । एवं चासाधोः साधुप्रकृतित्वे साक्षाद् वाचकत्वमेव पर्यवस्यति, तच्चानित्यवादिमतविरुद्धमेव । नेदमनित्यवादिमतं सम्भवति - प्रकृतौ भवं प्राकृतम् - प्रकृतेरसाधोर्विकारः संस्कृतमिति । तर्हि अस्यानित्यवादिमतकथनं कथं संगच्छते, इति कोऽयं वृत्तौ विपर्ययः ?

वस्तुतः कारिकार्थस्तु स्पष्ट एव यत् - नित्यशब्दवादेऽसाधूनां साक्षाद वाचकत्वं यदुक्तम्, अस्मिन् वादे अनित्यवादिनां बुद्धेर्विपर्ययः, अर्थात् अनित्यवादिनोऽसाधूनां साक्षाद् वाचकत्वं न मन्यन्ते, ते नित्यवादिमतविपरीतं मन्यन्ते ।

एतावता कारिकावृत्त्योर्महद् वैषम्यमिति सुस्पष्टम्, तच्चैककर्तृकत्वे कथं सम्भवति ? अतस्तयोर्भिन्नकर्तृकत्वं मन्यताम् ।

एवं च - 'हर्युपज्ञैव वृत्तिः - सवृत्तिकमेव वाक्यपदीयम्' इत्यभिनिवेशमात्सर्यं विहाय कारिकावृत्त्योरेककर्तृकत्वं भिन्नकर्तृकत्वं वेति निष्पक्षपातया धियाऽद्याप्यनुसन्धीयतां सूक्ष्मेक्षिकया वर्तमानैः प्रवर्तिष्यमाणैश्च समीक्षणचणैर्विचक्षणैः । मया तु तयोरभिन्नकर्तृकत्वे सवृत्तिकस्यैव वाक्यपदीयत्वे चात्मनोऽप्रत्ययो हेतुभिः प्रकटीकृतः । ये केचनात्र पक्षविपक्षपाठादिभेदास्ते सर्वे स्थले स्थले तत्र तत्र व्याख्यावसरे विवेचिता एव यथामति, कियदत्र पुनर्निर्दिश्य विविच्यताम् ? प्राक् संकीर्तितान् गुरून् परगुरून् परापरगुरून् स्मारं स्मारं मम प्रयासस्यास्य मुख्यमुद्देश्यं यत् षष्टिवर्षाधिककालादवरुद्धप्रकाशनायाः प्रत्येकार्थप्रकाशिकायाः पुनः प्रकाशनम् भवेत् । अतः परीक्षार्थिभिर्विद्वद्भिश्च समासेन वाक्यपदीयब्रह्मकाण्डस्यानुगत-रहस्यबोधाय प्रत्येकार्थप्रकाशिकैव स्वाध्यायप्रवचनाभ्यामालोडनीया । तस्या एव विततो भाव आनन्दा - सूर्यमायाभ्यां विभावनीयः । महान् विस्मयो यद् वृत्तेरनुपलम्भयुगेऽपि तस्याः सारः प्रत्येकार्थप्रकाशिकायां दृश्यते, इत्यस्य का कथा ? कतिपये शब्दा अपि अविशेषेणोभयत्र समाना यत्र तत्र बहुशो दरीदृश्यन्ते, तेऽन्विष्यावधार्यन्तां प्रेक्षकैः । विस्तरभयान्नेहोदाह्रियन्ते । स्वयमेव सम्मेल्याकलयन्तु सहृदयाः ।

इदं त्ववधेयम् - विमर्शे विवेचितं पाठान्तरं व्याख्यान्तरं च प्रायो भावप्रदीपेऽम्बाकर्त्र्यां वा निर्दिष्टमिति तत्तत्र द्रष्टव्यम् ।

अथ यत्प्रसादाद् व्यतानिषं विमर्शम्, सेष्टोपासनाबीजमन्त्रदात्री गङ्गोत्रीव पुण्यप्रदा "आनन्दा" नाम पितामही, यदाशीर्बलादन्तर्गताशयं राष्ट्र-भाषयाऽशिश्रियम् सा मे जीवनकमलप्रबोधिनी 'सूर्यमाया' नाम जननी च । यथायथं तयोश्चरणयोः समर्प्यतेऽयं व्याख्यानसुमनोद्वयग्रन्थिबन्ध-स्तदृणबन्धान्मुक्तये ।

सत्यपि विविधान्तरायनैरन्तर्ये येषाममोघशुभाशीराशिसातत्यादयमुपक्रमः पूर्णतामगात्, ते सन्ति परमाराध्याः शाब्दिकप्रवरा व्याख्यानवाचस्पतयः पितृव्यपादाः श्रीबदरीनाथझाशर्माणो व्याकरणसाहित्याचार्या नैकमहाविद्यालय-निवृत्तप्राचार्याः, पूज्याश्च भ्रातृवर्या व्याकरणनिष्णाताः काशीहिन्दूविश्व-विद्यालयस्नातका भिषग्धौरेया निवृत्तप्रधानचिकित्सका इदानीं श्रीमद्भागवत-पारायणप्रवणाः श्रीसदानन्दझाशर्माणो धन्वन्तरिमूर्तयः ।

अस्मिन् प्रसङ्गे सापि स्मरणीया, या हि ममेष्टोपासनाऽध्ययनाध्याप-नाधारशक्तिः पञ्चपञ्चाशद्वर्षं जीवनसहचारिणी सर्वसहेव सर्वसहा मिथिलादर्शधरा 'ललिता' भिधाना स्वधर्मपत्नी ।

प्रारब्धचक्रपारवश्यात् सहसा प्रबलामयैर्मासाष्टकमाक्रान्तायास्तस्याः सन्निधाने 'आनन्दा सूर्यमाया' चोभे व्याख्ये हठेन कथमपि लिखिते इष्टदेवता-प्रसादात् पूर्णतां गते प्रकाशनाय दत्ते । चिन्तनीयां दशामास्थितायामेव तस्यां २५-६-२००० ई० दिनाङ्के मन्दाकिनीपरिषदः कार्यकारिण्याः समितेरुपवेशनप्रसङ्गात् समागतेन महासचिवेन ज्यौतिषाचार्येणायुष्मता श्रीरामदेवझाशर्मणा तत्रोपस्थातुमागृहीतो निगृह्य नीतश्चाहं परिषद उपवेशने ग्रन्थप्रकाशनादिप्रस्तावे पारिते मयापि किमप्युपदानं तत्र कर्तव्यमिति धिया पारितप्रस्तावस्य सद्यः क्रियाऽन्वयनाय मयि संकल्पे समुत्पन्ने ममेङ्गितमुत्प्रेक्ष्य महासचिवमहोदयेन परिषदे प्रकाशनभारं प्रदातुं प्रेरितः प्राच्यावाच्यज्ञान-विज्ञानसरस्वत्सङ्गमावगाहनकर्मणां श्रीरामकरण- शर्मणां मन्दाकिनीसंस्थापकानां परिवृढवृषस्कन्धयोः प्रकाशनभारं तैरुररीकृतं सादरं समर्प्य भारापगमे लघुः संवृत्तः ।

परं को जानीते कदा किं घटते ? प्रत्येकार्थप्रकाशिकाऽऽनन्दासूर्यमाया-व्याख्यात्रिवेण्याः प्रथमप्रकाशनप्रारूप (प्रूफ) संशोधनकार्यमध्ये एवाकस्मात्-

आषाढ - कृष्णैकादश्यां द्वादश्याः संक्रमे बुधे (२८-६-२००० ई० वर्षे) मध्याह्नैकवादनान्तिकं महाकालकपोले सौभाग्यसिन्दूरारुणभाला शान्ता सा 'ललितादेवी' स्वजीवनलीलां देहल्यां समाप्य हरिद्वारकनखल गङ्गाशरणमध्युषितवती ।

"कः कं शक्तो रक्षितुं प्राप्तकाले" इति प्रतिपदं चिन्तयताऽपि प्रतिजनप्रतिनिधेः कण्वमहर्षेः - "कण्ठः स्तम्भितवाष्पवृत्तिकलुषः" इति शाकुन्तलोक्तिदिशा शोकसन्तप्तेन तदानृण्याय संस्मरणे प्रस्तुतिरियं सपर्यारूपेण प्रस्तूयते शब्दतत्त्वगवेषकाणां स्वान्तनिकषग्राव्णि समुपहृता सारासारसमीक्षणाय । अतः परं त एव प्रमाणम् - किं सत् किमसदिति ? अनिर्वचनीयं हि जगज्जालम्, निर्वचनीयस्तु स एक एव सच्चिदानन्दः परं ब्रह्म । यस्य निर्वचनं योगाचार्यो भर्तृहरिराह - "अनादिनिधनं ब्रह्म" इति ।

जीवने येषां कार्तज्ञं बिभृमस्तेषु सन्ति राष्ट्राय समर्पितात्मानः स्वतन्त्रतासेनानीयोगिप्रवराः विमुक्ताः श्रीरामनाथशास्त्रिणः, ते हि श्रद्धया सततं संस्मरणीयाः । तेषामेवाभिलाषां पूरयन्नस्मि यथेष्टमेतादृशशास्त्रव्याख्यानिर्माणक्रियाकलापेन ।

अवसाने चास्य सम्पादने सोत्साहं विहितश्रमो ज्यायानात्मजश्चिरजीवी डा० श्रीरवीन्द्रनाथ झा शुभोदयो व्याकरणवेदान्ताचार्यः, एम०ए०, प्रकाशनसंशोधने च कृतपरिश्रमश्चिरजीवी डा० श्रीभोला झा शुभोदयो व्याकरणवेदान्ताचार्यः, एम०ए०, शिष्येषु योग्यतमावुभौ भूयसीभिराशीर्भिः शास्त्रसम्प्रदायानुवर्तनाय सम्भाजनीयौ ।

तदेतद् विविच्य सफलयन्तु मे श्रमं निर्मत्सराः सूरयः । सनकादीनां योगिनां परमर्षीणां भारतभूरियं भूरि प्रभवतु सनातनमङ्गलायेति शम् ।

म०म० श्रीराष्ट्रपतिसम्मानितः
कविकिङ्करः
वेदानन्द झाः
व्या०न्या०वे०सा०सां०यो० आचार्यः
(एम०ए०, हि०सा०रत्न)
शिवनाथयोगाश्रमः, रमेशनगरम्,
नव देहली

वाक्यपदीय-ब्रह्मकाण्डः

अनादि-निधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥ १ ॥

प्रत्येकार्थप्रकाशिका

तण्डुलेनैव सन्तुष्याददादिष्टं मुदा हि यः ।
व्रजेशं राधिकेशं तं नत्या तोषयितुं यते ॥ १ ॥
परीक्षार्थ्युपकाराय प्रत्येकार्थप्रकाशिका ।
टीका वाक्यपदीयस्य ब्रह्मकाण्डे वितन्यते ॥ २ ॥

आनन्दा

सरस्वतीं परां विद्यां शुद्धां गीर्वाणवन्दिताम् ।
वन्दे बिन्दुस्वरूपां तां स्वराञ्जनसमञ्जिताम् ॥ १ ॥
श्रीभूपनारायण - बालबोध-द्रव्येशशर्माङ्घ्रिसरोरुहेभ्यः ।
प्रबुद्धरागैरनुरञ्जितेभ्यो नमोऽस्तु हंसैरुपसेवितेभ्यः ॥ २ ॥
हृदयं ब्रह्मकाण्डस्य प्रत्येकार्थप्रकाशिका ।
समासेनाह यत्सर्वं तद्वितत्य विभाव्यते ॥ ३ ॥

सूर्यमाया

चितवहुँ हरिमुख चन्द्रमा मिसरी माखन सेत ।
हरत जगत् के ताप को हर्षित गोरस हेत ॥

ब्रह्म की प्राप्ति मोक्ष है । चार पुरुषार्थों में वह मुख्य है । उससे अन्य कोई पुरुष-प्रयत्नों का श्रेष्ठ प्रयोजन न होने से वह निःश्रेयस कहा जाता है । उसका उपाय वेद है, तथा वेद का मुख्य अङ्ग व्याकरण है । वाक्य और पद के विभाग

अथ 'प्रयोजनमनुद्दिश्य मन्दोऽपि न प्रवर्तते' इत्यतः प्रथमं व्याकरणाध्ययने प्रवृत्तिप्रयोजकं प्रयोजनं वक्तव्यम्, तच्च अर्थ-धर्मकाममोक्षाख्यं चतुर्विधम् । तेषु इतरेषाम् अनित्यत्वेन मोक्ष एव परमपुरुषार्थः, तस्य नित्यत्वात् । स च (मोक्षः) 'तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यते अयनाय', 'ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्' इत्यादिश्रुतिस्मृतिप्रामाण्याद

'अधिकारि-सम्बन्धाभिधेय-प्रयोजने' त्यनुबन्धचतुष्टयं प्रेक्षापूर्वकारिप्रवृत्तिप्रयोजकम्, तदादौ प्रतिपादनीयम् । तत्र "नित्याः शब्दार्थसम्बन्धाः" इति, "अपोद्धारपदार्था ये" इति च कारिकाभ्यां वक्ष्यमाणं पदार्थाष्टकप्रविभक्तं शब्दतत्त्वं व्याकरणप्रकरणान्तर्गतत्वादस्य ग्रन्थस्याभिधेयम्, "स्मृत्यर्थमनुगम्यन्ते" इति "तद्द्वारमपवर्गस्य" इति च वक्ष्यमाणकारिकादिशा व्याकरणप्रतिपाद्य-'पदार्थाष्टक'स्मरणपूर्वक-वेदरक्षोहाद्यवान्तरव्यापारक-'शब्दब्रह्म' प्राप्तिरूपो मोक्षः परमं प्रयोजनम्, सम्बन्धस्तु-व्याकरण-तदभिधेययोः प्रतिपाद्यप्रतिपादकभावो व्याकरणतत्प्रयोजनयोश्च हेतुहेतुमद्भावः, अधिकारी चेह शब्दतत्त्वजिज्ञासुरित्यनुबन्धचतुष्टयमूहनीयम् ।

से शब्द के स्वरूप का प्रतिपादक यह वाक्यपदीय ग्रन्थ व्याकरण प्रकरण के अन्तर्गत है, अतः ग्रन्थ के आरम्भ में सर्वप्रथम प्राप्य ब्रह्म का स्वरूप बताया जाता है -

"अनादिनिधनं ब्रह्म" इत्यादि ।

अर्थ : - जो ब्रह्म आदि = जन्म, और निधन = विनाश इन दोनों से रहित है-नित्य है, तथा अक्षर है = व्यापक है, वह श्रुतियों में प्रसिद्ध ब्रह्म शब्दस्वरूप है, जिससे कि वाच्य- अर्थरूप से सभी जगत् की जन्म स्थिति लय विकारों की असत्य व्यवहार-प्रक्रिया विवृत्त होती है ।

आशय : - "प्रज्ञानं ब्रह्म" "अहं ब्रह्मास्मि" "तत्त्वमसि" "अयमात्मा ब्रह्म" क्रमशः "ऋक्-यजुः-साम-अथर्व" श्रुतियों के इन वेदान्तवाक्यों में समस्त देहधारियों के अन्तःकरणदेश में अवस्थित प्रत्यक्चैतन्य को ब्रह्म कहा गया है ।

ब्रह्मतत्त्वज्ञानाद् भवति । ब्रह्मतत्त्वञ्च शब्दतत्त्वादभिन्नम्, ब्रह्म-शब्दयोरैक्यात् । तथा च ब्रह्मात्मकशब्दतत्त्वनिर्णयद्वारा परमपुरुषार्थ- 'मोक्षात्मकफलं' व्याकरणाध्ययनस्येति सिद्धान्तयिष्यता आचार्यपादेन ब्रह्मकाण्डोऽयमारभ्यते । एतेन व्याकरणाध्ययनस्यार्थधर्मकामाख्यं लौकिकमेव फलं यदि भवेत्तदोक्तलौकिकफलानां कृष्यादिना सुलभोपायेनाऽपि

इदं तु ज्ञेयम् - व्याकरणस्मृतेः साक्षात्प्रयोजनम् - तत्प्रतिपाद्यपदार्थाष्टकपरिज्ञानम्, शब्दतत्त्वाभिन्नब्रह्मसाक्षात्कारेण ब्रह्मप्राप्तिरूपो मोक्षश्च तद्द्वारकं परमं प्रयोजनम् । ग्रन्थादौ ब्रह्मसंकीर्तनं मङ्गलार्थमित्यपि ध्येयम् । प्राप्यं तद् ब्रह्म किंस्वरूपमिति जिज्ञासायां तत्रभवान् भर्तृहरिः – 'अनादिनिधनं ब्रह्म' इति प्रतिज्ञाय ब्रह्मणः स्वरूपमाह - 'शब्दतत्त्वम्' इति ।

तत्र 'अनादिनिधनम् - अक्षरम्' इति ब्रह्मणः स्वरूपलक्षणम्, 'विवर्ततेऽर्थभावेन' इति च तटस्थलक्षणं निरूपयन्, उद्देश्यविधेयभावेन श्रुतिप्रसिद्धस्य ब्रह्मणः शब्दतत्त्वाभिन्नत्वं प्रतिजानीते- 'अनादिनिधनं ब्रह्म - शब्दतत्त्वम्' इति ।

वह ब्रह्म एक है - अद्वितीय है तथा सत्य-ज्ञान-स्वरूप है, देश काल और वस्तु परिच्छेदों से रहित-अनन्त है, अर्थात् नित्य और व्यापक है, यह "एकमेवाद्वितीयं ब्रह्म" "सत्यं ज्ञानमनन्तं ब्रह्म" इत्यादि वेदान्तवाक्यों में उपदिष्ट है ।

उसका विवर्त- अर्थात् मिथ्या अन्यथाभावरूप कार्य सारा जगत् प्रपञ्च है, दूसरे शब्दों में - जगत् का विवर्तोपादान कारण ब्रह्म है, यह "यतो वा इमानि भूतानि जायन्ते" इत्यादि छान्दोग्यश्रुति में कहा गया है । उक्त वेदान्तवाक्यों में उपदिष्ट - प्रत्यक्चैतन्य से अभिन्न ज्ञानस्वरूप नित्य व्यापक जो ब्रह्म है, वह शब्दात्मक है - शब्दस्वभाव है, उसका रज्जुसर्प वा स्वप्नविषय के समान अज्ञानमूलक 'विवर्तकार्य' - वाच्यवाचक भेदरूप से प्रतिभासित घट-पट आदि अर्थरूप - जन्म आदि विकारवाला यह सारा जगत् है । श्रुतियों में जो ब्रह्म जगत् की उत्पत्ति-स्थिति तथा लय का उपादान कारण कहा गया है, वह शब्दस्वरूप से समनुगत - शब्दात्मक है, यह यहाँ उद्देश्य-विधेयभाव से विशेषरूप में कहा जा रहा है ।

सुसाध्यतया दुर्ग्राहविचारसाध्यैतदध्ययनोपाये प्रवृत्तेरनावश्यकत्वं स्यात्, किञ्च मुमुक्षूणां प्रवृत्तिसम्भवलेशोऽपि न स्यात्, इति विवदमानाः परास्ताः । तत्र प्रथमं ब्रह्मपदार्थस्योपस्थितत्वात् तत्कीर्तनस्य ग्रन्थादौ मङ्गलरूपत्वाच्च तल्लक्षणं विधाय- 'शब्द एव ब्रह्मे' ति प्रतिज्ञां कुर्वन् - अर्थात्मकसृष्टिव्यवहारमुपपादयति- 'अनादिनिधने' त्यादि ।

अन्वयः - यद् अनादिनिधनम् - अक्षरम् ब्रह्म, यतः जगतः प्रक्रिया अर्थभावेन विवर्तते तत् - शब्दतत्त्वम् । तत् इत्याक्षेपलभ्यम्, यत्तदोर्नित्यसंबन्धात् ।

व्याख्या - अनादिनिधनम् = आदिः - उत्पत्तिः, निधनम् - ध्वंसश्च न स्तो यस्य तद् = उत्पत्तिध्वंसरहितम्, प्रागभावध्वंसयोरप्रतियोगि कालपरिच्छेदातीतम् - अवयवविभागशून्यम् - नित्यम्, अक्षरम् = व्यापकम्, अन्योन्याभावात्यन्ताभावयोरप्रतियोगि - वस्तुदेशपरिच्छेदातीतम् - 'अश्नोतेर्वा सरोक्षरम्' इति भाष्योक्तव्युत्पत्तेः । यद्वा अक्षराणि = वर्णा अकार - ककारादयः, तेषामभिव्यक्तेर्निमित्तमक्षरम् - बुद्धिस्थं प्रत्यक्चैतन्याभिन्नं ब्रह्मेति प्रोच्यमानम् (यस्य बहिः परबोधनार्था बुद्धिवृत्तेरनुग्रहेण स्थानकरणेभ्यो विवृत्ता स्थूलवर्णसंघातरूपाऽभिव्यक्तिर्निष्पद्यते) यतः = यस्माद् - उपादानकारणात् "यतो वा इमानि भूतानि जायन्ते" इत्यादिश्रुतिनिर्दिष्टात्-

---

यहाँ यह ध्येय है कि शब्द का द्विविध स्वरूप है - सूक्ष्म और स्थूल । प्रत्येक देहधारी के अन्तःकरण में स्थित जो ज्ञानरूप शब्द है, वह सूक्ष्म है, अत एव वह उस रूप से अन्यव्यक्ति के बोध का विषय नहीं होता है, किन्तु जब वह विवक्षा प्रयत्न से समीरित प्राण के व्यापार से स्थूल रूप में वर्णों का आकार ग्रहण कर वर्णसंघात-शब्द के रूप में व्यक्त रूप धारण करता है, तब वह दूसरों को बोध का विषय होता है । यह शब्द का कल्पित स्थूल स्वरूप है । इसके विपरीत जब अन्तःकरण में स्थित प्रत्यक्चैतन्य से अभिन्न 'ज्ञानरूप शब्द' क्रम-भेदरहित अव्याकृत रहता है, उस अवस्था में 'शब्द - अर्थ और उसका शक्ति

यद् इत्युद्देश्यबोधकम्, न आदिनिधने यस्य तद्-अनादिनिधनम् = उत्पत्तिमरणरहितं नित्यमिति यावत्, सावयवं हि परिच्छिन्नं च वस्तु अवयवादेः संयोगवियोगाभ्याम् उत्पद्यमानं विनश्यच्च लोके दृष्टम्, ब्रह्मणस्तु निरवयवत्वाद् - अपरिच्छिन्न-त्वाच्च उत्पत्तिविनाशयोः स्वप्नेऽप्यसम्भवात्, अक्षरम्= व्यापकमित्यर्थः- अश्नोतीति विग्रहे 'अशू व्याप्तौ' इति धातो-

---

ब्रह्मणो जगतः = कार्यमात्रस्य प्रक्रिया = जन्मस्थितिभङ्गरूपावस्थाभेदः, अर्थभावेन = 'घटपटादि' तत्तद्वाच्यार्थस्वभावतया, विवर्तते = शुक्तिरजतवत् स्वप्नविषयवद्वा मिथ्याभिन्नरूपोपग्रहेण प्रथते, तद् ब्रह्म - अविभक्तस्वरूपं वाच्यार्थभेदकल्पनामूलं, शब्दतत्त्वम् = शब्दाभिन्नम्, शब्दस्वरूपान्वयित्वाद् शब्दात्मकम् । मृत्स्वरूपानुगता घटशरावादयो यथा मृदुपादानास्तथा शब्दस्वरूपानुगता घटपटादयोऽर्थाः शब्दोपादानाः । एतावता व्यङ्ग्यं - व्यञ्जकम्, सूक्ष्मं - स्थूलम्, आन्तरं - बाह्यं चेति द्विविधं शब्दस्वरूपं सूचितम्, तद् - 'द्वावुपादानशब्देषु' इत्यत्र वक्ष्यते ।

विमर्शः - शब्दस्य हि द्विविधं स्वरूपम् । प्रथमं तावत् - 'प्रज्ञानं ब्रह्म' इतिश्रुतेः शब्दतदर्थ - सम्बन्धादिभेदविकल्पातिक्रान्तमप्रविभक्त-स्वरूपमन्तःसन्निविष्टं प्रत्यक्चैतन्याभिन्नं यदेकं नित्यं व्यापकं च शब्दस्वरूपं तत्सूक्ष्मम् । तदा हि - शब्दोऽर्थः सम्बन्धश्च शक्त्याख्यो बुद्धेरव्यतिरिक्तोऽ-

---

रूप सम्बन्ध' सभी भेद प्रत्यक्चैतन्य में समाविष्ट प्रसुप्त सा रहते हैं। इस अवस्था में वाच्य वाचक आदि कोई भेद नहीं है । यह शब्द का शाश्वत नित्य स्वरूप है । इसका विवर्त है - स्थूल वर्ण-पद-वाक्य-भेद, व तत्तद् अर्थ भेदों का आविर्भाव तिरोभाव प्रक्रिया प्रपञ्च । परमार्थ रूप में तो वह शब्दब्रह्म एक है । सजातीय - विजातीय - स्वगत कोई भेद नहीं है । असत्य-'वर्ण-पद-तदर्थ' विभागों का ग्रहण होने पर भी अपने वास्तविक स्वरूप से वह कभी विचलित नहीं होता है। अपने स्वरूप से कभी विचलित न होकर भिन्न रूप से भासित होना ही इसका जगत् के जन्म आदि प्रक्रिया का विवर्तोपादानत्व है ।

रौणादिक - सरन् - प्रत्ययेन साधितत्वात्, अत एव अनादिनिधनपदेनाविनाशित्वार्थस्योक्तत्वेऽपि व्यापकताया अनुक्ते-र्न पुनरुक्तिदोषः । ब्रह्मेति = बृंहयति पालयतीति स्वचैतन्य-सम्पादनद्वारा जगद्व्यवहारस्थितिनियामकमित्यर्थः, एतेन - आकाशादेश्चैतन्यशून्यस्य व्यावृत्तिः । तदित्यध्याहारः - यत्तदोर्नित्यसम्बन्धात्, शब्दतत्त्वमिति विधेयम्, तस्य भावः - तत्त्वम्, याथार्थ्यमिति यावत् । शब्द एव तत्त्वम्, सकलशब्द-ग्राह्यमपि तदेव, सकलशब्दस्वरूपमपि तदेव, शब्दार्थयो-

---

भिन्नाकारः । सर्वे वर्णा व्यपगतभेदा बौद्धाः । किन्तु तेन रूपेण तेषां बहिः परेषां सम्बोधो न भवतीति बुद्धिस्थास्ते बुद्ध्या प्राणे समर्पिताः सूक्ष्मवर्णाः प्राणव्यापारानुगृहीताः स्थानकरणेभ्यो विवृत्ताः स्थूलवर्णाकारोपग्रहेण व्यक्ताः क्रमभेदवन्तो वाच्यवाचक- तत्सम्बन्धभेदमापन्ना भिन्नतया प्रतिभासन्ते । तदिदं शब्दस्य स्थूलं व्यक्तं स्वरूपम् । तदाह -

सूक्ष्मामर्थेनाप्रविभक्ततत्त्वामेकां वाचमभिष्यन्दमानाम् ।
उतान्ये विदुरन्यामिव च एनां नानारूपामात्मनि संनिविष्टाम् ।। इति ।

ज्ञानस्वरूप शब्दब्रह्म - वाच्य वाचक आदि सभी भेदकल्पनाओं का अधिष्ठान है । वह स्थूल 'शब्द-तदर्थ' रूप में विवृत्त हो अथवा अविवृत्त, सभी अवस्थाओं में जन्म आदि विकार भेदों से रहित - ध्रुव - कूटस्थ - नित्य एक अद्वितीय स्वरूप ही रहता है । वस्तुस्थिति में उसका न आदि है, न अन्त है । नित्य होने से उसका न कालपरिच्छेद है, व्यापक होने से न देशपरिच्छेद है, सर्वात्मा - सर्वस्वरूप होने से न वस्तुपरिच्छेद है, तीनों प्रकार का अन्त (परिच्छेद) न होने से वह अनन्त है ।

एक वृक्ष का दूसरे वृक्ष से अन्योन्याभावरूप भेद वस्तुपरिच्छेद होता है, क्योंकि वृक्ष सर्वात्मक - सर्वस्वरूप नहीं है । एक देश में स्थित वृक्ष का अन्यदेश में अत्यन्ताभाव होना देशपरिच्छेद होता है, क्योंकि वृक्ष व्यापक वस्तु

स्तादात्म्यात् । अत एव भगवता- 'ओमित्येकाक्षरं ब्रह्मे' ति गीतायामुक्तम् । अर्थात् शब्दरूपब्रह्मण एवायं धर्मः - यत् नानाशब्दरूपेण नानार्थरूपेण प्रतीयते, इति सिद्धान्तयिष्यति । तथा चायं निर्गलितोऽर्थः - नित्यं व्यापकं चेतनतया सकलव्यवहारस्थितिनियामकं च यत्, तत् शब्दतत्त्वम् ।

ननु शब्द एव ब्रह्म तदा ततोऽर्थात्मकसृष्टिः कथमित्यत आह- 'विवर्तते' इति । यतः = ब्रह्मणः जगतः = नामरूपाभ्यां व्याकृतदृश्यमानसंसारस्य प्रक्रिया = व्यवहारः अर्थरूपेण = घटपटादिव्यक्तिरूपेण विवर्तते = विवर्तरूपोत्पत्तिर्भवति ।

अन्तःकरणे संनिविष्टं कूटस्थं चैतन्यं स्वस्वरूपादप्रच्युतं सत् तत्त्वान्यत्वाभ्यामनिर्वाच्यया स्वाविद्याशक्त्या मिथ्यास्थूलवर्णक्रमविभागवद् 'घटपटादि' नानावाचकशब्दरूपेण नानावाच्यार्थरूपेण च बहिरवभासते । सोऽयं प्रत्यक्चैतन्याभिन्नशब्दस्य संहृतक्रमस्य स्वरूपादप्रच्युतस्यैकस्या-सत्यान्यरूपोपग्रहेण भिन्नाकारतयाऽवभासो विवर्तः । इत्थं च नामरूपादि-सकलभेदकल्पनाधिष्ठानादव्याकृताद् यस्माद् ब्रह्मणो वाचकस्यागमादेर्वाच्यस्य च घटादेरर्थस्य जगद्विकारप्रपञ्चस्य जन्मस्थित्याद्यन्यान्यावस्था विपरिणामरूपा

नहीं है । किसी वृक्ष का जन्म से पहले प्रागभाव तथा विनाश के पश्चात् ध्वंसाभाव होना कालपरिच्छेद होता है, क्योंकि वृक्ष उत्पादविनाश वाला है - अनित्य है । ये तीनों प्रकार के परिच्छेद (अन्त) कार्य व अनित्य वस्तु के होते हैं । प्रत्यक्चैतन्याभिन्न ज्ञानरूप - शब्दब्रह्म नित्य है, सबका उपादानकारण सर्वात्मक है, व्यापक है - अक्षर है । अतः ब्रह्म त्रिविध अन्त से रहित - अनन्त है, अनादिनिधन है, निरञ्जन है ।

यद्यपि वह कूटस्थ होने से अपने स्वरूप से कभी विचलित नहीं होता है, तथापि वह अनिर्वचनीय अविद्या शक्ति के उपधान से नाना वर्णों, पदों व अर्थों के रूप में मिथ्या विभाग का उपग्राही होता है, जैसे कि स्फटिक - दर्पण आदि अपने वास्तविक स्वरूप में सदा सर्वथा स्वच्छ रहता हुआ भी 'लाल-पीले' नाना वर्णों वाले पुष्पों के उपराग से असत्य-कल्पित लाल पीले वर्णों का प्रतिविम्बग्राही

उत्पत्तिर्द्विधा - परिणामो विवर्तश्च । तात्त्विकान्यथाभाव आद्यः, यथा दुग्धस्य दधि परिणामः । अयथार्थाऽन्यथाभावः- अन्त्यः, यथा रज्ज्वा विवर्त्तः सर्पः, शुक्तिकायाश्च रजतम् ।

अयम्भावः - यथा रज्जौ रज्जुत्वेतिविशेषधर्माज्ञानात् - 'सर्पोऽयम्, दण्डोऽयम्, उदकधारेयम्, भूछिद्रमिदम्' इत्याद्याकारकनानारूपप्रतीतिर्जायते, तत्र सर्पादिप्रतीतेः किं मूलमिति गवेषणायां रज्जोरभावे सर्पादिप्रतीतेरप्यसंभवाद् रज्जुरेव मूलमिति निश्चीयते, परञ्च सर्पादिप्रतीतेः रज्जुसाक्षात्कारानन्तरं निवृत्तिदर्शनाद् रज्जुतत्त्वमेव सत्यं सर्पादितत्त्वमसत्यम्, तस्य

प्रक्रिया विपरिवर्तते, तद् ब्रह्म नित्यं व्यापकं शब्दाख्यम् । निखिलस्य विकारजातस्य शब्दात्मना समन्वयाद् - मृदन्वितविकारस्य घटादेर्मृदुपादानत्वमिव शब्दोपादानत्वमध्यवस्यते । तच्च शब्दब्रह्म जगद्विकारस्य विवर्तोपादानम्, न तु परिणाम्युपादानम्, नित्यत्वादिहान्यापत्तेः ।

''शब्दस्य परिणामोऽयम्' इतिवक्ष्यमाणकारिकायां परिणामपदं तु तात्त्विकांशं विहाय 'अन्यथाभाव' मात्रपरम्, ननु तात्त्विकान्यथाभावपरम्,

---

होता है । ब्रह्म में भासमान सभी भेद अविद्याकल्पित मिथ्या हैं । वस्तुस्थिति में तो ब्रह्म सभी भेदविकल्पों से अतीत है ।

ब्रह्म में भासमान भेदों का बीज अविद्या शक्ति है, वह ब्रह्म से न तो भिन्न है, न अभिन्न है । सत् - ब्रह्म से भिन्न होने की स्थिति में वह असत् मानी जाय तो भेद प्रतीति का वह बीज नहीं हो सकेगी, क्योंकि असत् शशशृङ्ग कभी किसी का न कारण होता, न कभी उसकी प्रतीति होती है ।

यदि, ब्रह्म से अभिन्न मानी जाय तो वह सत् - सिद्ध होने पर बाध्य नहीं होगी, जबकि उसका ज्ञान से बाध होना सर्वसम्मत है । परिणामतः वह अविद्या शक्ति सत् अथवा असत् कुछ भी निश्चित रूप से निर्वचन योग्य न होने से दोनों से विलक्षण - अनिर्वचनीय - मिथ्या ही सिद्ध होती है ।

बाधदर्शनेन - अबाध्यत्वं सत्यत्वमिति सत्यत्वलक्षणस्य तत्रासंघटनात्, तथैव प्रकृते नानारूपात्मकसकलदृश्यमान - पदार्थस्य नानारूपस्य संसारस्य ज्ञानं शब्दतत्त्वात्मकब्रह्म-स्वरूपाज्ञानप्रयुक्तम् । तथा च यदि सत्यं ब्रह्म न स्यात् तदा तत्स्वरूपाज्ञानप्रयुक्तं नानारूपम् असत्यं जगन्न प्रतीयेत, अतः संसारभ्रमस्याधिष्ठानं ब्रह्म-जगद्विवर्तोपादानकारणम्, किन्तु अधिष्ठानसाक्षात्कारस्य भ्रमनिवर्तकत्वेन यदा शब्दात्मक-ब्रह्मस्वरूपाधिष्ठानसाक्षात्कारो भवति, तदा अज्ञानजन्य-

---

''विवर्त्ततेऽर्थभावेन'' इति प्रकृतकारिकामुपक्रम्य 'छन्दोभ्य एव प्रथममेतद्विश्वं व्यवर्तत' इत्युपसंहारेण मध्ये च बहुशः- 'तद्धर्मेण समाविष्टस्तेजसैव विवर्तते' 'विवर्तमाना स्थानेषु सैषा भेदं प्रपद्यते' इत्यभ्यासेनोक्तेश्च विवर्तवाद एव हरिसम्मतः पक्षो न परिणामवादः । एतेन न्यायमञ्जर्यां शब्दविवर्तवादस्य शब्दपरिणामवादस्य च खण्डनदर्शनादुभयमपि वैयाकरणानामभिमतमिति केषांचिदुक्तिश्चिन्तनीया । ''ब्रह्मेदं शब्दनिर्माणं शब्दशक्तिनिबन्धनम्, विवृत्तं शब्दमात्राभ्य'' इत्याद्याकरविरोधात् ।

यहाँ यह प्रश्न उपस्थित होता है कि - ब्रह्म यदि वस्तुतः एक ही है, उससे अन्य कोई वस्तु नहीं है, तो ब्रह्म अन्य का आकार व रूप ग्रहण कैसे कर लेता है? इस प्रश्न का उत्तर यह है कि - ब्रह्म से अन्य वस्तु प्रतीति का विषय तो है, किन्तु वह मिथ्या है परमार्थ सत् नहीं है । इस अनादि जगत् में देश और काल के भेद का जो अनुभव होता आ रहा है, उसके संस्कारों के परिपाक से उपाधिमूलक अनादि भेद व्यवहार होता है, किन्तु वह असत्य है, प्रतीतिमात्र से कल्पित है । वस्तुस्थिति रूप में भासमान सभी भेद स्वाधिष्ठान शब्द ब्रह्म से अभिन्न हैं, उससे भिन्न स्वतन्त्र कोई वस्तुभेद नहीं है ।

सारांश में - नाना अर्थ व नाम विभाग वाला यह सारा जगत् शब्दतत्त्व स्वभाव ब्रह्म का विवर्त रूप कार्य है । वह अपने शब्द स्वरूप से समन्वित सभी विकार भेदों का उपादान कारण है ।

संसारज्ञानस्य निवृत्तिर्भवति । तथा च संसारनिवृत्तिरूपमोक्षः सिध्यतीर्ति मोक्षरूपप्रयोजनं व्याकरणस्य सिद्धमिति ।

ननु शब्द एव ब्रह्म इत्यत्र किं मूलमिति चेत् श्रुतिस्मृती गृहाण -

''सूक्ष्मामर्थेनाप्रविभक्ततत्त्वामेकां वाचमभिष्यन्दमानाम् ।
उतान्ये विदुरन्यामिव च एनां नानारूपात्मनि सन्निविष्टाम् ॥ इति ॥

अनेन सर्वेषामन्तःकरणे संनिविष्टं चैतन्यं शब्दः, तस्यैव शक्तिः परबोधनाय निस्सृत्य शब्दरूपेणार्थरूपेण च नानारूपेण

''एको रसः करुण एव निमित्तभेदाद्भिन्नः पृथक् पृथगिवाश्रयते विवर्तान् ।'' इति भवभूतिश्लोके - 'आवर्तबुद्बुदतरङ्गमयप्रभेद' निदर्शनेन विवर्तशब्दस्य परिणामवाचकत्वे प्रमाणत्वोपन्यासोऽपि तेषां दुराग्रहगृहीत एव । 'भिन्नः पृथक् पृथगिव' इत्यत्र 'इव'पदोपादानेन एकस्य स्वरूपादप्रच्युतस्य निमित्तभेदाद् भेदप्रतिभासस्यौपाधिकत्वोक्त्या एकस्य = अभिन्नस्य सतो भेदानुकारेणासत्यान्यरूपोपग्राहिताकथनात् परिभाषितस्य मुख्यस्य विवर्तस्यैव तत्रेष्यमाणत्वात् । सहृदयहृदयद्रवीभवात्मकस्यैकस्य चिन्मयस्य करुणरसस्यैव सर्वरसेषु व्यापकतया वस्तुतोऽवस्थिते-र्विभावादिरत्यादिभावाद्युपाधिकभेदप्रतिभासस्य शृङ्गारादिरसभेदे बीजतया

यह समस्त जगत् किसी न किसी वाचक शब्द से समन्वित व्यवहार का विषय होने से शब्दकारणक है, जैसे कि मृत्तिका से समन्वित - घट शराव आदि मृत्कारणक होते हैं । कहा भी है -

''ब्रह्मेदं शब्दनिर्माणं शब्दशक्तिनिबन्धनम्'' ।

शब्द की शक्ति से उद्भावित यह सब विकार समूह शब्द का कार्य है । वह शब्द– 'सूक्ष्म और स्थूल' द्विविध है । सूक्ष्म शब्द - बुद्धि का विषय चैतन्य-स्वभाव श्रुति प्रसिद्ध ब्रह्म है । स्थूलशब्द प्राण के व्यापार से अभिव्यक्त - वर्ण पद क्रम भेदवाला कल्पित है, शब्दब्रह्म का विवर्त है - अतात्त्विक अन्यथा -

भासते इति सिद्धम्, किन्तु 'ओमित्यात्मानं युञ्जीत, ओमिति ब्रह्म, ओंकार एवेदं सर्वम्, वाचारम्भणो विकारो नामधेयं, तदस्येदं वाचा तान्त्या नामभि र्दामभिः सर्वं सितम् सर्वं हीदं नामनि',

''ब्रह्मेदं शब्दनिर्माणं शब्दशक्तिनिबन्धनम् ।

विवृत्तं शब्दमात्राभ्यस्तास्वेव प्रविलीयते'' इत्यादि आकरतो द्रष्टव्यम् ॥ १ ॥

कथनमेव तत्र भवभूतेर्हृदयम् । तस्मान्नेदमुदाहरणं विवर्तपदस्य परिणामपरत्वे प्रमाणम् ।

वाक्यं पदं चाधिकृत्य कृतस्य वाक्यपदीयाख्यास्यास्य ग्रन्थस्य 'ब्रह्म-वाक्य-पदाभिधानेषु' त्रिषु काण्डेषु शब्दस्य ब्रह्मस्वरूपत्वप्रतिपादकोऽयं प्रथमो ब्रह्मकाण्डः ॥ १ ॥

भावरूप कार्य है । जैसा कि कहा है- 'सूक्ष्मामर्थेनाप्रविभक्ततत्त्वाम्' इत्यादि । इस मन्त्र का अर्थ है कि -

घट - पट आदि वाच्य अर्थों से अभिन्न स्वरूप अनभिव्यक्त - अव्याकृत अन्तःकरण में संनिविष्ट प्रत्यक्चैतन्यरूप एक अद्वितीय सूक्ष्म परावाणी को स्थूलप्रज्ञ भेददृष्टि वाले अज्ञानी जन भिन्न भिन्न वर्ण-पद-वाक्यों के रूप में भेद रूप में जानते हैं । किन्तु परमार्थ रूप में ज्ञानियों की दृष्टि में - वह सूक्ष्म परावाक् - शब्दब्रह्म एक है, भेदरहित है ॥ १ ॥

एकमेव यदाम्नातं भिन्नं शक्तिव्यपाश्रयात् ।
अपृथक्त्वेऽपि शक्तिभ्यः पृथक्त्वेनेव वर्तते ॥ २ ॥

प्रत्येकार्थप्रकाशिका

ननु एकमेव शब्दतत्त्वं ब्रह्म तदा नानारूपेण कथं ज्ञायते? इत्यत आह- 'एकमेवेति । यत् एकमेव = शब्दतत्त्वम् - ब्रह्म आम्नातम् ''एकमेवाद्वितीयं ब्रह्म'' ''प्रणव एवैकस्त्रिधाऽभि-

---

आनन्दा

द्वैतिनां भेददर्शनं निराकुर्वन् शब्दस्वभावस्य ब्रह्मणः स्वाभाविकमेकत्व-मौपाधिकं नानात्वं शक्तिभ्योऽपृथक्त्वं च व्यवस्थापयति- ''एकमेव यदाम्नातम्'' इति ।

अन्वयः - यद् एकमेव आम्नातम्, (तत्) शक्तिव्यपाश्रयात् भिन्नम्, शक्तिभ्यः अपृथक्त्वे अपि पृथक्त्वेन इव वर्तते ।

व्याख्या - यत् = पूर्वप्रकृतम् शब्दतत्त्वम् - ब्रह्म, एकमेव = सजातीय-विजातीयादिसकलभेदरहितम् - अभिन्नम्, आम्नातम् = 'एकमेवाद्वितीयं ब्रह्म नेह नानाऽस्ति किंचन' 'प्रणव एवैकस्त्रिधा' इत्यादिश्रुतिभिरुपदिष्टम्,

---

सूर्यमाया

आचार्य भर्तृहरि अपने अद्वैत सिद्धान्त के अनुसार प्रकृत शब्दब्रह्म का स्वाभाविक एकत्व तथा आरोपित भेद (नानात्व) बताते हुए भेदहेतु-शक्ति की ब्रह्म से अभिन्नता बताते हैं - 'एकमेव यदाम्नातम्' इत्यादि ।

अर्थ : - जो प्रकृत शब्द ब्रह्म, 'एकमेवाद्वितीयं ब्रह्म' आदि श्रुतियों में - एक अद्वितीय भेदरहित ही कहा गया है, वह शक्तियों के आश्रय व्याज से भिन्न अर्थात् नाना व्यवहृत होता है । वस्तुतः वह ब्रह्म शक्तियों से पृथक् न रहने पर भी पृथक् जैसा रहता है ।

आशय : - ''सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं ब्रह्म'' (हे सोम्य! यह सारा जगत् पृथिवी आदि सृष्टि से पहले एक अद्वितीय = भेदरहित सत् ब्रह्म ही

व्यज्यते'' इत्यादिश्रुतिभिः कथितमित्यर्थः, तदित्याक्षेपः, शक्तिव्यपाश्रयात्= नानाशक्त्याश्रयात् - शक्तेर्भेदादिति यावत्, भिन्नम् = बहुधा प्रतिभाति, शक्तेर्नानात्वात् तदाश्रयब्रह्मणोऽपि नानात्वमारोप्यते इति यावत् ।

तदित्याक्षेपाल्लभ्यते, शक्तिव्यपाश्रयात् = वाच्यवाचकभावापरपर्याय - योग्यतारूपविचित्रशक्तीनां भेदकल्पनाबीजानामुपधानाद् भिन्नम् = नाना प्रतिभासते, न तु वस्तुतो भिन्नं तत् । भिन्नत्वे बीजमाह - ''शक्तिव्यपाश्रयात्'' इति । अत्र 'वि' इत्युपसर्गः शक्तेर्वैचित्र्यं द्योतयति, 'अप' इत्युपसर्गश्च ब्रह्मणि भिन्नत्वव्यवहारप्रयोजकशक्तेरुपाधित्वं सूचयति । एतावता ब्रह्मणि नानात्वमारोपितं न तु वास्तवमित्यायातम् ।

यथा यावद्विकाराणां घटशरावादीनामुपादानकारणं मृत्सुवर्णादिकं स्वरूपतोऽभिन्नमपि घटत्वेन शरावत्वेन विलक्षणतत्तत्कार्यशक्तियोगाद् भिन्नं प्रतीयते, यद्वा एकमेव ज्ञानं ग्राह्य-घट-पट-वृक्षादिविषयाकारपरिग्रहाद् भिन्नं भासते, यद्वा एक एव प्रकाशः प्रकाश्यनानावस्त्वाकारपरिग्रहात्तेन तेन रूपेण भिन्नोऽवभासते, न तावता मृदादेः ज्ञानस्य प्रकाशस्य वा स्वरूपत एकत्वं विरुध्यते, तथैकस्मिन्नद्वितीये शब्दब्रह्मणि विलक्षणशक्ति-

---

था ।) ''प्रणव एवैकस्त्रिधाऽभिव्यज्यते'' (एक प्रणव ही अर्थात् शब्दब्रह्म ही ऋक् - यजुः- साम इन तीनों प्रकार से अभिव्यक्त होता है) इत्यादि श्रुतियों में- परमार्थसत् ब्रह्म सकल भेदों से रहित एक अद्वितीय बताया गया है । उसका विवर्त - नामरूपात्मक यह सारा परिदृश्यमान जगत् विकार है, जिसकी बीजशक्ति ब्रह्म में अभिन्न रूप से संनिहित है । वह ब्रह्म अपने स्वरूप से अविचाली - ध्रुव कूटस्थ - वस्तु स्थिति में सदा सर्वदा भले ही एक है - भेद रहित है, किन्तु विविध कार्यों की योग्यता रूप अपनी विलक्षण शक्तियों के उपधान से भिन्न भिन्न व्यवहार का विषय हो जाता है, जैसे - रक्त-पीत पुष्पों के उपधान से दर्पण स्फटिक आदि भिन्न प्रतीत होता है, अथवा जैसे प्रकाश्य

ननु शक्तिर्भिन्ना तदाश्रयो ब्रह्म भिन्नम्, एवञ्च कथमेकमेवेति प्रतिज्ञातमित्यत आह-'अपृथक्त्वेऽपि' इति । शक्तिभ्यः = ब्रह्मण इत्याक्षेपः, अपृथक्त्वेऽपि = अभिन्नत्वेऽपि पृथक्त्वेनेव = पृथगिव नतु वास्तविकभिन्नता इत्याकूतः, पृथक्त्वमारोप्यते इति यावत्, वर्तते = विद्यते इत्यर्थः ।

योगान्नानावाच्यार्थाकारपरिग्रहाद् भासमानं भिन्नत्वं तदीयवास्तवैकत्वेन न विरुध्यते ।

ननु विलक्षणास्ताः शक्तयो यदि ब्रह्मणो व्यतिरिक्तास्तर्हि तासामाश्रयो ब्रह्म कथमेकमिति चेदत्रोच्यते - 'अपृथक्त्वेऽपि' इति । शक्तिभ्यो ब्रह्मणः शब्दतत्त्वस्य अपृथक्त्वेऽपि = वस्तुतोऽभिन्नत्वेऽपि पृथक्त्वेन इव = आरोपितपार्थक्येन ब्रह्म पृथक्तत्त्वमिव वर्तते - अविदुषाम् ।
विमर्शः - ताः शक्तयो न खलु ब्रह्मणो व्यतिरेकिण्यः, ब्रह्मणोऽन्यत्र स्वातन्त्र्येण तासां सत्ताया असिद्धेः । यस्माद् अपृथग्भूताः शक्तयस्तस्माद् ब्रह्मण आत्मभूताः ।

एवं च ब्रह्म शक्तिभ्यः पृथक् नास्ति, किन्तु अविवेकिभिः पृथगिव मन्यते । पृथक्त्वं द्वितीयवस्तुसत्त्वसापेक्षम्, न च ब्रह्मणोऽन्यत् किमप्यस्ति वस्तु सत्, यस्मात् पृथग् ब्रह्म व्यपदिश्येत । यथा सांख्यनये बुद्धेः सत्त्वं

घट-पट आदि के भेद से प्रकाश का भेद तथा विषय के भेद से ज्ञान का भेद व्यवहृत होता है ।

रक्त पीत पुष्पों के उपराग से स्फटिक अविवेकी की दृष्टि में भले ही रक्त व पीत व्यवहृत हो, किन्तु स्फटिक अपने रूप में सदा स्वच्छ एक ही रहता है । प्रकाश्य - रक्त पीत - पत्र पुष्पों का आकार भेद प्रकाश में भले ही लक्षित हो, किन्तु प्रकाश का स्वरूपतः भेद कभी नहीं होता है, घट-पट आदि विषयों का आकार भेद ज्ञान में भले ही गृहीत हो, किन्तु ज्ञान-स्वरूपतः सदा अभिन्न-एकरस ही रहता है । स्फटिक में प्रकाश में अथवा ज्ञान में भासमान भेद जैसे आरोपित हैं, वास्तविक नहीं, वैसे ही शक्ति के भेद से ब्रह्म में प्रतीयमान भेद आरोपित है, वास्तविक नहीं ।

अयमाशयः - घटत्वेन शरावत्वेन च घटशरावादयो भिन्ना अपि मृत्तिकारूपेणाभिन्ना एव, एवं विकारो विकारी यावद्वस्तु परस्परं भिन्नमपि सर्वस्योपादानकारणं ब्रह्म एकमेव, अतस्तेन रूपेण सर्वम् - एकमेव ।

प्रकाश एक एव नानाविषयाकारेण परिणममानः स्वपरिणामाख्यवृत्तिभ्यः सत्यपि तादात्म्ये पृथगिवाविवेकिभिरवसीयते, तथा ब्रह्मणोऽपि योग्यतारूपाः कार्यानुकूलाः शक्तयोऽपृथक्सत्त्वा आत्मभूता अपि समारोपितपार्थक्या अविवेकिभिः पृथग्भूता अभिमन्यन्ते ।

इदं तु बोध्यम् - 'शक्तिभ्यः' इत्यत्र पृथग्योगे पञ्चमी ज्ञेया । पृथक्त्वस्य निरूपकांशे नित्यसाकाङ्क्षतया 'शक्तिभ्य' इति साक्षाच्छ्रुतेनाव्यहितेनान्वयबोधे जाते निराकाङ्क्षतया 'आश्रित्य' इत्यश्रुतेनान्वयमुत्प्रेक्ष्य ल्यब्लोपे पञ्चम्याः कल्पनं केषांचिच्चिन्तनीयम् । तथात्वे चेह प्रतिपिपादयिषितः शक्तिभेदप्रतिषेधोऽप्रतिपादित एव स्यादिति न किञ्चिदेतत् । 'अभिन्नत्वेऽपि ब्रह्मशक्तीराश्रित्य भिन्नमिवावभासते' इति केषांचिद् व्याख्याने

यहाँ यह शङ्का होना स्वाभाविक है कि - जब ब्रह्म की शक्ति नाना हैं तो उनका आश्रय ब्रह्म भी स्वरूपतः नाना ही होना चाहिए, एक कैसे ? परस्पर विरुद्ध नाना शक्तियों का आश्रय एक नहीं हो सकता, जैसे कि प्रकाशन शक्ति का आश्रय प्रकाश है, तो उससे अत्यन्त विरुद्ध - आवरणशक्ति का आश्रय- अन्धकार प्रकाश से अत्यन्त भिन्न वस्तु है, एक नहीं ।

इस शङ्का का उत्तर यह है कि - विलक्षण कार्य को देख कर कारण शक्ति भी भले ही विलक्षण मान ली जाय, किन्तु उनका आश्रय उपादान कारण भिन्न ही हो, यह नियम नहीं है, जन्म - स्थिति और लय, ये तीनों कार्य परस्पर विलक्षण हैं, इन कार्यों की कारणनिष्ठ शक्ति भी विलक्षण मान ली जाय, किन्तु उनका आश्रय - उपादान कारण 'यतो वा इमानि भूतानि' इत्यादि श्रुति से निर्दिष्ट ब्रह्म एक ही है । घटत्वेन - शरावत्वेन 'घट-शराव' आदि कार्य और उनकी

ननु एकञ्चेत् भिन्नं कथम्? एकस्मिन् भेदस्य बाधाद्, इति चेन्न; एकस्मिन्नपि ब्रह्मणि नानाशक्तिसमावेशात् शक्तिगत-भेदस्य ब्रह्मणि आरोपेऽपि स्वकीयैकत्वस्य वास्तविकस्याबाधेन एकत्व - भिन्नत्वोभयव्यवहारस्योपपत्तेः, यथा एकस्मिन् ज्ञाने 'घटः पट' इत्याद्यनेकविषयस्य भानेऽपि विषयगतनानात्वेन

ब्रह्मणि भेदस्य निरासेऽपि शक्तीनां ब्रह्मणः पृथक्त्वमपृथक्त्वं वा नोक्तं भवति, अस्तु ब्रह्म स्वगत-सजातीय-भेदशून्यम्, विजातीयभेदस्तु न तावता निराकृतो भवति, चन्द्रे प्रतिभासमानस्य चाञ्चल्यादेस्तरङ्गौपाधिकत्वकथनेन तस्य मिथ्यात्वलाभेऽपि जलतरङ्गादेः सत्ता तु नापाकृता भवति, तथा ब्रह्मणि भेदस्य शक्तिभेदकृतत्वेन तस्य वास्तविकत्वनिरासेऽपि शक्तिभेदस्य वस्तुत्वं तु न निराकृतं स्यात् । तथा सति शक्तिभ्यो ब्रह्मणो भेदे प्रतिष्ठापिते - "अपृथक्त्वेऽपि शक्तिभ्य" इत्युक्तिरेव व्याहता स्यात् ।

कार्यशक्ति विलक्षण रहें, किन्तु उनका उपादान कारण - मृत्तिका स्वरूपतः एक है, भिन्न नहीं । इसी प्रकार विकारभूत जगत् के जितने भी पदार्थ हैं, वे परस्पर भिन्न रहें, किन्तु उन सबका उपादान कारण एक ब्रह्म है, इसमें कोई अनुपपत्ति नहीं ।

यहाँ यह अवश्य ध्यान रहे कि - यावत् पदार्थ ब्रह्म का विवर्त कार्य है परिणाम नहीं तथा ब्रह्म विवर्तोपादान है परिणामी नहीं । वस्तुतः प्रकृत में शब्द ब्रह्म की शक्तियाँ ब्रह्म से पृथक् नहीं हैं अपितु अपृथक् हैं - अभिन्न हैं । शक्ति से पृथक् न तो ब्रह्म है, न ही ब्रह्म से पृथक् शक्ति है, ब्रह्म और शक्ति का तादात्म्य ही अभिमत है । उनका आश्रयाश्रयिभाव कार्यवैलक्षण्य से प्रतिभासमान-शक्तिभेद से कल्पित है । इसी अभिप्राय से यहाँ इस कारिका में एक अद्वितीय ब्रह्म में भेदव्यवहार के बीजरूप में 'वि' और 'अप' इन दो उपसर्गों के साथ 'व्यपाश्रय' शब्द का पञ्चमी विभक्त्यन्त प्रयोग किया है, जो कि क्रमशः शक्ति

ज्ञानगतैकत्वस्य न बाधः । इदमत्रावधेयम्- ताः शक्तयोऽपि नहि ब्रह्मणः पृथक्, तासां तत्रैवोपलब्धेः अन्यत्रानुपलब्धेश्च शक्तिशक्तिमतोरभेदात्, किन्तु अविवेकिनां पृथगिव लभ्यते, इति ॥ २ ॥

"भिन्नशक्ति" इति समस्तपाठोऽपि तेषां निर्युक्तिक एव । एकस्य ब्रह्मणो भिन्नत्वेन भाने 'शक्तिव्यपाश्रयात्' इति पञ्चम्या हेतुत्वमिह विवक्षितम्, तत्तु समस्तपाठेन न लभ्येत, प्रत्युत शक्तेर्भिन्नत्वं प्रकरणविरुद्धमेव कथितं स्यात्, पूर्वापराभ्यामनन्वितमपार्थकं च तद्वचनं स्यात् । तस्माद् "भिन्नं शक्तिव्यपाश्रयात्" इत्यसमस्त पाठ एव साधीयान् ॥ २ ॥

का वैलक्षण्य तथा कल्पित आश्रय का द्योतन करता है । ब्रह्म की यह शक्ति शाब्दिक मत में नित्य है, तत्त्व वा अन्यत्वरूप से अनिर्वचनीय है । तभी तो ब्रह्म और शक्ति का तादात्म्य संमत है । सूर्य और उसकी प्रकाशन शक्ति-प्रभा, चन्द्र और चन्द्रिका, अग्नि और ज्वाला का वस्तुतः परस्पर कोई पार्थक्य नहीं है अपितु तादात्म्य है, जैसा कि शैवागम का यह निर्देश है -

न शिवः शक्तिरहितो न शक्तिर्व्यतिरेकिणी ।
न हिमस्य पृथक् शैत्यं नाग्नेरौष्ण्यं पृथग् भवेत् ॥

सकल विकारों का लयाधिष्ठान शिव शक्ति से रहित नहीं है, ना ही शक्ति कभी शिव से पृथक् होती है, जैसे कि हिम का शैत्य तथा अग्नि का उष्णत्व कभी पृथक् नहीं रहता है ॥ २ ॥

अव्याहताः कला यस्य कालशक्तिमुपाश्रिताः ।
जन्मादयो विकाराः षड् भावभेदस्य योनयः ॥ ३ ॥

प्रत्येकार्थप्रकाशिका

ननु ब्रह्म एकं तदा तद्गतशक्तयः कथं नाना, इत्यत आह- 'अव्याहतेति' । यस्य = ब्रह्मणः अव्याहताः = न व्याहताः स्वरूपेणाविनष्टा इत्यर्थः, नित्या इति यावत्, कलाः= शक्तयः कालशक्तिम् = समयशक्तिम्, उपाश्रिताः = प्राप्ताः

आनन्दा

ब्रह्म एकम्, तस्य शक्तिश्च तस्मादपृथगेव न पृथक्, इत्युक्तम् । एवं स्थिते शक्तिर्यदि नाना तदा तत्तादात्म्यापन्नं ब्रह्मापि नानैव भवितुमर्हति नैकम्, अथ ब्रह्म चेदेकम् तदा तदभिन्ना शक्तिर्नाना न भवितुमर्हति, इति शङ्कां समादधानो व्याप्यजन्मादिशक्तिभेदेन ब्रह्मणो व्यापिकायाः कालाख्यशक्ते-र्नानात्वमुपपादयति - 'अव्याहता' इति ।

अन्वयः - यस्य अव्याहताः कलाः कालशक्तिमुपाश्रिताः भावभेदस्य योनयः जन्मादयः षड् विकाराः भवन्ति, 'तस्य प्राप्त्युपायो वेद' इति वक्ष्यमाणेनान्वयः ।

सूर्यमाया

भेदव्यवहार का कारण ब्रह्म की दो शक्ति हैं - कालशक्ति और जन्मादि-शक्ति । उसका निरूपण करते हैं - 'अव्याहता' इत्यादि -

अर्थ : - जिस ब्रह्म की कालशक्ति के आश्रित जन्मादिशक्ति हैं, जिनसे पदार्थभेद का कारण - जन्म आदि छह विकार होते हैं, (उसकी प्राप्ति का उपाय वेद है, यह अग्रिम से अन्वय है ।)

आशय : - यद्यपि प्रकृत शब्दब्रह्म एक कहा गया है, तथा उसकी नित्य व अभिन्न उपादानशक्तिरूप - जन्मादियोग्यताशक्ति और कर्तृत्वशक्तिरूप - कालशक्ति वस्तुतः एक है, तथापि उससे होने वाले जन्म आदि विकार भेद - छह हैं, वे

भावभेदस्य = पदार्थभेदस्य योनयः = कारणानि जन्मादयः षट् = जन्म-स्थिति-मरण-वृद्धि-ह्रास-परिणामाख्या इत्यर्थः, भवन्तीति क्रियाध्याहारः ।

अयं भावः - ब्रह्मणि कालाख्यशक्तिः - व्यापिका महती, तदधीना एव जन्मादिशक्तयः, तासां कालमपेक्ष्यैव व्यवहारसम्भवात् । कार्यमात्रं प्रति कालस्य कारणत्वात् सा

व्याख्या - यस्य = प्रकृतस्य शब्दब्रह्मणः, अव्याहताः कलाः = अविच्छिन्ना अपृथक्तया अनादिकालात् - प्रवर्तमाना जन्मादिकर्तृशक्तयः, कालशक्तिम्= व्यापिकां स्वतन्त्रां सहकारिणीं कालाख्यशक्तिम्, उपाश्रिताः = समनुगतास्तस्या अधीनाः परतन्त्राः सत्यः, भावभेदस्य योनयः = अतीतानागत-वर्तमानकालपौर्वापर्यक्रमभेदेन - प्रतिपदार्थं भिन्नतायाः कारणानि, जन्मादिषड्विकाराः = जन्म-स्थिति-वृद्धि-परिणाम-ह्रास-नाशरूपा भवन्ति, तस्य ब्रह्मणः - प्राप्त्युपायो वेद इति वक्ष्यमाणेन सम्बन्धः ।

विमर्शः - ब्रह्मणि तादात्म्येन स्थिता अपृथग्वर्तमाना अत एव नित्या जन्मादिशक्तयः सहकारिणीं स्वतन्त्रां कालाख्यशक्तिमुपाश्रित्य स्थिताः परतन्त्राः कालशक्त्या प्रतिबद्धा अनुगृहीता वा तिष्ठन्ति । कालशक्तिर्यदि जन्मादिशक्तिं प्रतिबध्नाति तर्हि जन्मादयो न जायन्ते, अथ यदा कालशक्तिर्जन्मादि-शक्तिमभ्यनुजानाति तदा जन्मादयो जायन्ते । कालशक्तेः प्रतिबन्धानुज्ञावशादेव

भेद अपने कारण जन्मादियोग्यता शक्ति में आरोपित हो जाते हैं, अतः जन्मादि-शक्ति भी षड्विध भेद से नाना कही जाती है । जन्मादि शक्ति का भी कारण कालशक्ति अर्थात् कर्तृशक्ति है, जन्मादिशक्ति कालशक्तिरूप - कर्तृशक्ति के आश्रित व अधीन है तथा कालशक्ति जन्मादिशक्ति में व्यापक रूप से समनुगत है, अतः जन्मादिशक्ति का भेद भी अपने उपाश्रय कालशक्ति में आरोपित हो जाता है, अतः अखण्ड एक कालशक्ति भी नाना कही जाती है । एवं कालशक्ति का भेद सबका अधिष्ठान ब्रह्म में आरोपित होने से ब्रह्म भी नाना व्यवहृत होता है ।

कालशक्तिर्यदा जन्मशक्तिमाज्ञापयति तदा पट उत्पद्यते, यदा प्रतिबध्नाति तदा नश्यति, यदा उभयं न करोति तदा तिष्ठति । एवं च - उत्पद्यमानपटात् तिष्ठन् पटो भिन्नः, एवं तिष्ठतः पटाद् विनश्यंश्च पटो भिन्न इत्यादिरीत्या सर्वेषां विकाराणां

तत्तत्पदार्थवैचित्र्यमुपजायते । यावत् कालशक्तिर्बीजं जन्मशक्तिं प्रतिबध्नाति तावदङ्कुरो नोत्पद्यते, यदा तु जन्मशक्तिमनुजानाति तदा अङ्कुर उत्पद्यते, एवं यावदङ्कुरं प्रतिबध्नाति तावदङ्कुर एव तिष्ठति किसलयो नोत्पद्यते, यदा तु पुनरङ्कुरमनुजानाति तदा किसलयः समुत्पद्यते, एवं यदा किसलयमनुजानाति तदा पल्लवः, यदा पल्लवमनुजानाति तदा पुष्पम् - फलम्, एवं क्रमेणोपचयापचयैरेकस्मिन्नेव वृक्षे जन्मादिषड्भावविकाराः पदार्थवैचित्र्यं जनयन्ति । एवं च जन्मादिभावविकारगतो भेदो जन्मादिशक्तौ समारोपितो भवति, येन जन्मादिशक्तयो भिन्ना व्यपदिश्यन्ते, जन्मादिशक्तिभेदाश्च कालशक्तौ समारोप्यन्ते, तेन कालशक्तिभेद उपचर्यते, 'पटोऽभूद् भविष्यति भवति' इत्यादिभेदव्यवहारः सर्वः कालशक्तेः प्रतिबन्धाभ्यनुज्ञाकृतजन्मादिशक्तिभेदकृत एव ।

इत्थं च जन्मादिशक्तिभेदकृतकालशक्तिभेदाश्च ब्रह्मण्यध्यारोपिता ब्रह्मण्यपि भेदव्यवहारं प्रवर्तयन्ति । तस्मान्नानुपपन्नम् - 'एकमेव यदाम्नातं भिन्नं शक्तिव्यपाश्रयात्' इति ।

यहाँ यह अवधेय है कि - अद्वैत सिद्धान्त में एक अद्वितीय ब्रह्म ही सकल भेद प्रपञ्च का निमित्त और उपादान कारण है । अर्थात् ब्रह्म की दो शक्तियाँ हैं- पहली कर्तृत्वशक्ति जो कि यहाँ कालशक्ति कही गई है, दूसरी उपादानशक्ति जो कि जन्मादिशक्ति कही गई है । जन्मादिशक्ति जन्म-स्थिति आदि कार्य की योग्यता रूप है ।

जन्मादिशक्ति का नियामक कालशक्ति है । जन्मादिशक्ति कालशक्ति के अधीन जन्म-स्थिति आदि कार्य करती है। जब कालशक्ति जन्म - स्थिति लय आदि शक्तियों में अन्यतम किसी शक्ति का-प्रतिबन्ध करती है, तब जन्मादिशक्ति

भेदः पौर्वापर्यक्रमश्च । तथा च विकारगतभेदानां जन्मशक्त्यवच्छेदेन स्थित्यवच्छेदेन चाश्रयतया एकोऽपि पौर्वापर्यक्रमहीनोऽपि कालः - भिन्नः पौर्वापर्यक्रमवांश्च भवति, अत एव तमेव भेदं क्रमं चादाय - 'भवति - अभूत् - भविष्यतीत्यादि' व्यवहारः, एवमेव 'वर्धते' इत्यादयोऽपि ।

इदमत्र ध्येयम् - ब्रह्मणः कालशक्तिर्व्यापिका स्वतन्त्रा, तदधीनाः खलु व्याप्याः परतन्त्रा जन्मादिशक्तयः । जन्मादिशक्तयः कालशक्तिं नातिक्रामन्ति व्याप्यत्वात् । ब्रह्मणोऽभिन्ननिमित्तोपादानत्वसिद्धान्ते कर्तृशक्तिरुपादानशक्तिश्च द्वयमपि ब्रह्मण्येव । उपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वरूपा कर्तृशक्तिरिह कालशक्तिरभिमता, उपादानशक्तिश्च जन्मादिशक्तिः । 'तदैच्छत् - एकोऽहं बहु स्याम् प्रजायेय', 'अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि' इत्यादिश्रुतयो ब्रह्मणो निमित्तत्वमुपादानत्वं चाहुः । यदा ब्रह्मणि कालाख्या कर्तृशक्तिराविर्भवति तदा तस्मिन् उपादानशक्तिरूपा जन्मादिशक्तयो जन्मादिषड्विध-भावविकारान् कर्तुं प्रभवन्ति नान्यदा । सर्वप्राधान्येन विभ्राजमानाया राजमहिष्या इव कालशक्तेर्निमेषाभ्यनुज्ञावशवर्तिन्यो दास्यः किल सन्ति जन्मादिशक्तयः । 'तदैक्षत' इति श्रुत्या चेतनस्य सत एकस्य जगज्जन्मादिकर्तृत्वमभिहितम् । तस्यैव कर्तृशक्तिमतो 'बहु स्यां प्रजायेय' इति बहुभवनसंकल्पपूर्वकम् 'तत्तेजोऽसृजत' इति तेजोऽबन्नात्मकतया मृदादिदृष्टान्तैर्बहुभवनप्रयोजनमुपदिश्य 'तत् सृष्ट्वा तदेवानुप्राविशत्', 'सेयं

प्रतिबद्ध रहने से जन्म आदि कार्य नहीं करती है, अर्थात् तब तक किसी वस्तु का जन्म, स्थिति वा लय नहीं होता है । जब कालशक्ति आज्ञा करती है तब उसके सहयोग से जन्मादिशक्ति प्रतिबन्ध से मुक्त होकर किसी वस्तु का जन्म-स्थिति आदि कार्य करती है, अर्थात् तब किसी वस्तु का क्रमशः जन्म - स्थिति वा लय होता है । कालशक्ति का प्रतिबन्ध या अनुज्ञा से जब जन्म होता है तो स्थिति प्रतिबद्ध रहती है, स्थिति नहीं होती, स्थिति की अनुज्ञा होने पर स्थिति

यथा - एकमेव तुलासूत्रम् (तौलने का काँटा), तस्मिन् ऊर्ध्वदेशे एको दण्डः, तत्रानेकलेखाः भवन्ति, तस्याधःप्रदेशे द्रव्यान्तरं स्थाप्यते, तस्य द्रव्यस्य गुरुत्वं यदा प्रतिबध्यते -

---

देवता तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरोत्', 'रूपं रूपं प्रतिरूपो बभूव' इत्यादिवैश्वरूप्यं प्रतिपादयन्त्यः श्रुतयो ब्रह्मण एवोपादानशक्तिमत्त्वमामनन्ति । वक्ष्यते च - एकस्य सर्वबीजस्य ब्रह्मण एव भोक्तृभोक्तव्यरूपेण भोगरूपेण च नानाकारतयाऽवस्थितिः । तस्मान्नेह कारणान्तरशक्तयः कैश्चित् कल्पिता विवक्षिताः, ब्रह्मण एवा - भिन्ननिमित्तोपादानत्वमभिप्रेत्य शक्तिद्वयमभिधीयते । यथा अविद्यायाः शक्तिद्वयम् - आवरणशक्ति र्विक्षेपशक्तिश्च । आवरणशक्तिरपि द्विधा-सत्तावरिका - यया सदपि वस्तु नास्तीत्युच्यते, स्वरूपावरिका च यया आवृतस्वरूपं न भाति, तथा ब्रह्मणोऽप्यस्ति शक्तिद्वयम् - कालाख्यकर्तृशक्तिः, विवर्तकार्योपादानशक्त्यपरपर्याया - जन्मादिशक्तिश्च । तदाह वृत्तौ - "कालाख्येन हि स्वातन्त्र्येण सर्वाः परतन्त्रा जन्मवत्यः शक्तयः समाविष्टाः कालशक्तिवृत्तिमनुपतन्ति" इति । तथा च - 'जन्म अस्ति अस्या' इति षष्ठ्यर्थे मतुपि जन्मवत्यः परिणामिन्योऽनित्या उपादानान्तरशक्तय इति केषांचिद् व्याख्यानमिह चिन्तनीयम् ।

अयं हि वृत्तेराशयः - कालशक्तेः परतन्त्रा जन्मादिशक्तयो व्याप्या व्यापिकां कालशक्तिमनतिक्रम्य वर्तमाना कालशक्तेर्वृत्तिम् = प्रतिबन्धानुज्ञान्यतरं व्यापारं यथाक्रममनुगच्छन्ति । यावत्पर्यन्तं कालशक्तिः प्रतिबध्नाति तावत् जन्मादिशक्तयः प्रतिबद्धाः सत्यो जन्मादिभावविकारान् न प्रसुवते, यदा तु तत्तत्प्राण्युपभोगादृष्टादिकारणान्तरसमवधानवशात् कालशक्तिरभ्यनुजानाति तदा

होती है, तो लय प्रतिबद्ध रहता है । अतः एक ही वस्तु का 'जन्म-स्थिति-लय' इस अवस्था भेद से भेद होता है, जिससे प्रतिपदार्थ का भेद- 'विश्व की नानारूपता' व्यवहृत होती है । एक ही जल का अवस्था भेद- 'बुद्बुद - तरङ्ग- आवर्त - हिम - प्रालेय - तुषार' आदि अनेक होते हैं । ये अवस्था भेद कालशक्ति के प्रतिबन्ध और अनुज्ञा के अधीन ही होते हैं । एक ही ब्रह्म की

तदोर्ध्वस्थितलेखानां मध्ये यस्यां लेखायां संयुक्तं सत् तिष्ठति, तत्परिमाणम् - एकसेटकं, द्विसेटकं खारीत्यादि व्यवहारो भवति । तत्र वस्तुत एकस्मिन्नेव तुलासूत्रे - 'एक एव दण्डः' -

---

प्रारब्धादिकारणसमवहिता जन्मादिशक्तयः सर्वान् जन्मादिविकारान् यथाक्रमं प्रसुवते । ततश्च - क्रमवद्भि र्विकारैः प्रविभज्यमानाभि र्जन्मादिशक्तिभिः कालशक्तिरपि विभज्यमाना - क्षण-होरा-यामाहोरात्र-पक्ष-मासायन - वत्सरयुगकल्पभेदम्, अतीतानागतवर्तमानभेदं चाधिगता नानात्वं भजमाना स्वतोऽक्रमाऽपि जन्मादिशक्त्यवच्छिन्ना क्रमवतीव प्रतिभासमाना स्वाधिष्ठाने ब्रह्मणि भेदमारोपयति, येनैकमपि ब्रह्म भिन्नं व्यवह्रियते । यथा - तुलास्थापित-परिमेयद्रव्यगुरुत्वप्रतिबन्धकाले परिमेयद्रव्यपरिमाणभेदस्तुलादण्डस्थ-तत्तल्लेखाऽवच्छेदेनाध्यारोपितः तुलादण्डेऽपि समारोपितः - परिमेयद्रव्य-परिमाणभेदव्यवहारं - 'सेटक - प्रसेटक - द्रोणे' त्यादिरूपं जनयति तथा जन्मादिविकारभेदो जन्मादिशक्त्यवच्छेदेनाध्यारोप्यमाणः कालशक्तौ व्यापिकायामखण्डायामपि समारोप्यमाणो ब्रह्मणि नानात्वव्यवहारं जनयतीति न किमप्यनुपपन्नम् ।

ब्रह्मणः शक्तीनां नित्यत्वे सर्वदा सर्वकार्यप्रसङ्गस्तु न शङ्कनीयः, कार्यस्य कारणकूटप्रयोज्यत्वेन प्रारब्धाद्यन्यतमकारणविरहे तत्सम्भवाभावात् ।

अत्र 'अध्याहितकलाम्' इति पाठान्तरम् - 'अध्याहिता = अध्यारोपिताः कलाः = भेदा यस्यास्ताम् - अध्याहितकलाम् = आरोपितभेदां कालशक्तिम्, इत्यर्थलाभाय । तद् दुरर्थकम्, 'उपाश्रिताः' इत्युक्त्या तल्लाभात्, जन्मादिशक्तेश्च तदलाभात् । यथैकस्य चन्द्रस्य कलावतः कलाः = अंशाः षोडश, तथेह कालशक्तेरेकस्याः कलाः = जन्मादिषड्विकारभेदेन भिन्ना जन्मादिशक्तयः

निमित्तरूप में कर्तृशक्ति-कालशक्ति है, जिसके अधीन जन्मादियोग्यतारूप उपादानशक्ति - जन्मादिशक्ति है । उपादानशक्ति सदा कालशक्ति - 'कर्तृत्वशक्ति' से समन्वित रहकर ही कार्यक्षम होती है । उपादानशक्ति तब तक जन्म आदि कार्य करने में असमर्थ रहती है जब तक कि कालशक्ति का योग नहीं होता । ब्रह्म की ये दोनों शक्तियाँ कभी नष्ट न होने वाली - नित्य हैं, किन्तु ये प्राणियों के

द्रव्यगतभेदानां तत्तल्लेखाऽवच्छेदेनाश्रयतया भिन्नः, तथैव प्रकृते जन्मादिनानाशक्तिसमनुगतकालशक्तिरेकाऽपि नानात्वेन एकस्मिन् ब्रह्मणि व्यवह्रियते, इत्युपपत्तिरनुभूयतां सुधीभिरिति दिक् ॥ ३ ॥

कला अभिमताः । यथा कलानामुपचयापचयाद् चन्द्रे भेद उपचर्यते, तथा कालशक्तावेकस्यां जन्मादिशक्तीनां कलानां भेदः, जन्मादिशक्तौ च विकारभेद उपचर्यमाण इह विवक्षितः, स तु 'अध्याहितकलाम्' इति पाठे दूरपराहतः ।

किंच कलानाम् = जन्मादिशक्तीनाम् उपाश्रितत्वोक्त्या उपाधित्वे प्रतिपादिते कालशक्तौ भेदप्रतिभानस्यौपाधिकत्वेनारोप्यमाणत्वलाभात् तदर्थं पुनरध्याहितत्वकथनं पुनरुक्तमेवापद्यते । स्फटिकमुपाश्रिता जपाकुसुमादयो यथा स्फटिके स्ववृत्तिलौहित्यादिकमध्यारोपयन्ति तथा जन्मादिविकारभेदै-र्जन्मादिशक्तयोऽपि भेदवत्यः कालशक्तिमुपाश्रिताः स्वगतभेदं कालशक्तौ समारोपयन्ति, इति स्वरसतो लभ्यते ।

अपि च कलाशब्दो न भेदमात्रपरः, अपितु व्याप्यव्यापकभावेन अंशांशितया तदधीनसत्ताकतया अंश (भाग) परः, 'एते - अंशकलाः प्रोक्ताः कृष्णस्तु भगवान् स्वयम्', 'अंशस्तु नानाव्यपदेशात्' इत्युक्तेः, 'कला तु षोडशो भागः', 'षोडशकलः पुरुषः' इत्युक्तेश्च । तस्मादारोप्यमाण-भेदस्य - 'भावभेदस्य योनयः' इत्यनेनैवार्थाल्लाभे कलाशब्द इह तादात्म्यगर्भ-'शक्ति' पर इति सुधियो विभावयन्तु ॥ ३ ॥

प्रारब्ध आदि - सहकारी कारण के समवधान में ही कार्यजनक होती है अन्यथा नहीं । अत एव शक्ति नित्य होने पर भी सर्वदा कार्यप्रसङ्ग दोष नहीं होता ।

सारांश में - कालशक्ति स्वतः भेदरहित अखण्ड है, किन्तु जन्म आदि भावविकारों का भेद आरोपित होकर जन्मादिशक्ति के भेद द्वारा कालशक्ति का भी भेद होता है, शक्ति के भेद से ब्रह्म भी भिन्न व्यवहृत होता है ॥ ३ ॥

एकस्य सर्वबीजस्य यस्य चेयमनेकधा ।
भोक्तृभोक्तव्यरूपेण भोगरूपेण च स्थितिः ॥ ४ ॥

प्रत्येकार्थप्रकाशिका

सा कालशक्ति र्ब्रह्मभिन्ना उत तत्स्वरूपा, इति बोधयितुमाह- 'एकस्येति' । सर्वबीजस्य = सर्वेषां बीजं - कारणं तस्येत्यर्थः, एकस्य = सजातीय-द्वितीय-रहितस्य यस्य= ब्रह्मणः अनेकधा= अनेकरूपा भोक्तृभोक्तव्यरूपेण = भोक्ता च भोक्तव्यं च तयो रूपं तेन, 'रूपेण' इति द्वन्द्वान्ते श्रूयमाणतया

आनन्दा

ब्रह्मणः स्वत एकत्वं, शक्तिभेदकृतं नानात्वं, शक्तेश्च द्विविधरूपत्वमुपवर्णितम्, अथ तस्यैव ब्रह्मणो भिन्नत्वाभिन्नत्वाभ्यामनिर्वाच्यशक्त्युपधानेन भिन्नरूपपरिग्रहेण - अनेकधा लोकव्यवहारस्थितिमाह - "एकस्य सर्वबीजस्य" इति ।

अन्वयः - सर्वबीजस्य एकस्य यस्य च इयम् अनेकधा - भोक्तृभोक्तव्यरूपेण भोगरूपेण च स्थितिः ।

व्याख्या - सर्वबीजस्य = सर्वेषामर्थानामुपादानकारणस्य एकस्य = सजातीयविजातीयस्वगतभेदरहितस्य यस्य च = पूर्वप्रकृतब्रह्मणः इयम्= लोके परिदृश्यमाना अनेकधा = नानारूपा - परस्परविलक्षणा, भोक्तृभोक्तव्यरूपेण=

सूर्यमाया

'जन्म-स्थिति' आदि कार्यों की भिन्नरूपता से उसके हेतुभूत - 'शक्ति' की भिन्नरूपता का साधन कर ब्रह्म से भिन्न वा अभिन्न किसी रूप से निर्वचन के योग्य न होने से शक्ति की अनिर्वचनीयता व तत्प्रयुक्त एक ही ब्रह्म की अनेकरूपता का निरूपण करते हैं - 'एकस्य सर्वबीजस्य' ।

अर्थ : - सबका मूलकारण जिस एक अद्वितीय ब्रह्म की भोगकर्ता - जीव रूप से, भोगकर्म - विषय रूप से और उपभोग - क्रिया रूप से अनेकों प्रकार की परस्परविलक्षण व्यवहार की स्थिति है, (उस ब्रह्म की प्राप्ति का उपाय वेद है ।)

प्रत्येकमन्वयः, तथा च भोक्तृरूपेण = अहं ममेत्यभिमानलक्षण-जीवरूपेण भोक्तव्यरूपेण = अन्नपानादिविषयरूपेण चेति पर्यवसानम्, भोगरूपेण च = भोजनपानशयनादि- क्रिया-रूपेणेत्यर्थः, लोकव्यवहारार्थं स्थितिः प्रवर्तते इत्यध्याहारः ।

अयम्भावः - वेदान्ते अविद्या इति, सांख्ये सत्त्वरजस्तम-स्साम्यावस्था प्रकृतिरिति च या कथ्यते सैवेह कालशक्ति-शब्देन बोध्यते, इयमेव लोके यावद्व्यवहाराणां प्रवर्तिका,

---

अहंकारेण भोगकर्तृत्वाभिमानिजीवरूपेण, भोगकर्मविषयरूपेण - प्रमातृप्रमेयरूपेणेति यावत्, भोगरूपेण = भोगाख्यक्रियारूपेण - विषयानुभव-तज्जन्यसुखदुःखान्यतर- साक्षात्काररूपेण, स्थितिः = अयं भोक्तैव - अयं भोग्यविषय एव - अयं च तदुभयव्यहारप्रयोजकमध्यघटकसाध्यक्रियैव न सिद्धः, इत्येवं भिन्नरूपा लोकव्यवहारमर्यादा असत्या प्रवर्तते, तस्य ब्रह्मणः प्राप्त्युपायो वेद इति वक्ष्यमाणेनान्वयः ।

विमर्शः - यथा विज्ञानमेकमेव स्वप्ने निद्रादोषेण गज-रथ-तुरगाद्यनेक-दृश्याकारोपग्रहणेन तत्तद्रूपेण विवर्तते तथा ब्रह्मैकमेवानिर्वाच्याऽविद्याशक्त्या भोक्तृभोक्तव्यादिनानारूपोपग्रहेण विवर्तमानं व्यवतिष्ठते ।

आशय : - जन्म आदि भाव विकारों के भेद से उनका कारण - ब्रह्मशक्ति भी परस्पर विलक्षण - भिन्न मान्य है, क्योंकि विलक्षण कारण ही विलक्षण कार्य का जनक होते हैं, यह पूर्व में प्रतिपादित है । इन शक्तियों के उपधान से ब्रह्म का कल्पित 'रूपभेद' उपग्राह्य होने से एक ही ब्रह्म - 'भोक्ता-भोग्य-भोगक्रिया' आदि नाना रूप से परस्पर विलक्षण भेदव्यवहार का विषय होता है, जैसे कि वेदान्त सिद्धान्त में एक ही विज्ञान रूप चैतन्य निद्रादोष से स्वप्न में - 'रथ-घोड़ा - सारथी - हाथी' आदि नाना दृश्य विषयों के रूप में परिणत होता है ।

भिन्न अथवा अभिन्न रूप में निर्वचन के योग्य न होने से अनिर्वचनीय कालाख्यशक्ति व जन्मादिशक्ति के उपधान से एक अद्वितीय ब्रह्म प्राणियों के अदृष्टवश 'अहम्-मम' इत्यादिरूप अहंकारवाला - 'भोक्ता' चेतन जीव के रूप से तथा तत्तद् इन्द्रियजन्य ज्ञान का विषय - भोग्य शब्द स्पर्शादि के रूप में

ब्रह्म च निर्विकारं चिदानन्दरूपम्, सदा एकरूपं कदापि कुत्रापि न व्यभिचरति, यथा रज्जुत्वाज्ञानमेव रज्जुस्थले - सर्पः, दण्डः, जलधारा इत्यादिज्ञानप्रवर्तकम्, रज्जुस्तु सदा स्वरूपेणैव तिष्ठति कदापि वस्तुतः सर्पो न भवति ।

इदमत्र विचारणीयम् - रज्जुसत्ता न स्यात् चेत्तदा तु सर्पादिसत्ता न भवेत्, सर्पादिसत्ता न रज्जुसत्तातः पृथक्, अतः रज्जुभेदो न वक्तुं शक्यः, किञ्च वस्तुतः रज्ज्वभिन्नोऽपि

एकमेव ब्रह्म, शक्तिस्तु नाना भिन्नकार्यप्रसवित्वात् । ताः सर्वाः शक्तय एकस्मिन्नेव ब्रह्मणि अविरोधेन वर्तमाना ब्रह्मणो भोक्तृरूपं भोक्तव्यरूपं भोगक्रियारूपं च असत्यं रूपभेदमुपकल्पयन्ति, तेन एकस्यैव ब्रह्मणो भिन्नरूपोपग्रहेण लोके भेदव्यवहारः प्रवर्तते । यथा - एक एव रज्जुरर्थः स्वरूपतोऽभिन्नः सन्नपि भिन्नरूपाज्ञानेन 'सर्पः - दण्डः - जलधारा' इत्यादिभिन्नरूपः प्रतिभासते तथा शक्तिभेदेन प्रकृतं ब्रह्म - भोक्ता भोग्यः भोगइत्यनेकरूपं लोके व्यपदिश्यते । सा च ब्रह्मणः कालाख्यशक्तिर्न ब्रह्मणो भिन्ना पृथक्सत्त्वानुपलब्धेः, तत्रैवोपलब्धेश्च । नाप्यभिन्ना, दृश्यत्वाद् जडत्वात् परिच्छिन्नत्वात् । तस्माद् भिन्नत्वाभिन्नत्वाभ्यां सत्त्वासत्त्वाभ्या-

---

अथवा इन्द्रिय और विषय का संयोग रूप भोगक्रिया के रूप में परिणत हो उक्त तत्तद्रूप का उपग्राही - परस्पर विलक्षण भेदव्यवहार का विषय होता है । यह भेद परस्पर व्यभिचारी होने से कल्पित व असत्य है, किन्तु भेद के प्रतिभास काल में भी ब्रह्म अपने सत्त्व व प्रकाश रूप से अव्यभिचारी - एकरूप एकरस होने से सत्य है अकल्पित है । जैसे रज्जु के अज्ञान से भासमान सर्प - दण्ड-जलधारा आदि भिन्न रूप व्यभिचारी होने से मिथ्या कल्पित हैं, किन्तु अपने स्वरूप से कभी विचाली न होने से तथा अधिष्ठान 'सत्' रूप से सदा सब में समनुगत रहने से रज्जु सत्य है, वैसे ही ब्रह्म का भोक्ता भोग्य आदि भेदरूप कल्पित - असत्य है, किन्तु ब्रह्म अपने स्वरूप से सदा अव्यभिचारी - अविचाली- निर्विकार परमार्थ सत् है । ब्रह्म की यह विलक्षण शक्ति है, जिससे वह नाना रूप में भासित होने से भेदव्यवहार का विषय होता है ।

ब्रह्म की यह शक्ति ब्रह्म से भिन्न नहीं है, क्योंकि ब्रह्म की सत्ता से पृथक् शक्ति की सत्ता नहीं है, ब्रह्म की सत्ता ही शक्ति की सत्ता है । यह शक्ति ब्रह्म

न सर्पः - रज्जुजनितकार्यस्य सर्पेणाजननेन वास्तविकस्य रज्ज्वभेदस्य बाधात् । तस्माद्भेदरूपेणाभेदरूपेण चावाच्यत्वात् सर्पोऽनिर्वाच्यः रज्जुस्तु निर्वाच्यः सत्यः, तथैव प्रकृतेऽपि ब्रह्म सत्यं निर्वाच्यम्, माया तु अनिर्वाच्या असत्या, सैव शक्तिः अनिर्वाच्यं विचित्रं संसारं प्रसूते । ननु संसारस्य मायारूपत्वमेवासिद्धमिति चेन्न, अन्तवत्त्वात् दृश्यत्वाच्च स्वप्नवत् , इत्यादिहेतुदृष्टान्तादिभिः संसारस्य मायारूपत्वम् अन्यत्र साधितम् । विस्तरेण तत एवावगन्तव्यम्, इति वेदान्तप्रक्रिया । अत्र ब्रह्मपदेन शब्दरूपं ब्रह्मेति कुत्रापि न विस्मरणीयमिति दिक् ॥ ४ ॥

मनिर्वाच्या सा शक्तिः । अन्यानन्यत्वाभ्यामनिर्वाच्यया तया शक्त्या कल्पितभेदरूपोपग्रहेण ब्रह्म - 'प्रमातृ-प्रमेय-प्रमाणरूपेण' नाना व्यपदिश्यते, न तु वास्तविकं नानात्वम् । अनिर्वचनीयशक्तिकार्यस्य भेदप्रपञ्चस्यानिर्वचनीयत्वेनासत्यत्वात् । तदाह श्रुतिः - ''पराऽस्य शक्तिर्विविधैव श्रूयते'', ''इन्द्रो मायाभिः पुरुरूप ईयते'', ''मायां तु प्रकृतिं विद्यात् मायिनं तु महेश्वरम्'' इति ।

अत्र 'धान्येन धनवान्' इत्यादाविव भोक्तृभोक्तव्यरूपेण भोगरूपेणेति तृतीयार्थोऽभेदः । तथा च ब्रह्मण इयमनेकधा भोक्तृभोक्तव्यरूपा भोगरूपा च स्थितिः = व्यवहारव्यवस्था, कल्पिता न तु सत्या, इत्यर्थः ।

तस्यैकस्य ब्रह्मणो नटवत् स्वशक्त्या गृहीतभोक्त्राद्येकरूपपरित्यागेन पुनर्गृहीतभोक्तव्यादिरूपान्तरं प्रतिपद्यमानस्य शक्तिनिबन्धना इयमनेकरूपा मृषारूपभेदविभागव्यवस्थेति नाद्वैतहानिरिति निष्कृष्टोऽर्थः ॥ ४ ॥

से अभिन्न भी नहीं है, क्योंकि स्वप्न में दृश्य-रथ अश्व गज आदि की तरह यह सान्त परिच्छिन्न है । अतः ब्रह्म से भिन्न तथा अभिन्न रूप में निर्वचन के योग्य न होने से यह शक्ति अनिर्वाच्य है मायारूप है, अनिर्वाच्य भेदरूप का प्रवर्तक है । ''पराऽस्य शक्ति र्विविधैव श्रूयते'', ''इन्द्रो मायाभिः पुरुरूप ईयते'' इत्यादि श्रुतियों में ब्रह्म की शक्ति का मायारूपत्व उपदिष्ट है ॥ ४ ॥

प्राप्त्युपायोऽनुकारश्च तस्य वेदो महर्षिभिः ।
एकोऽप्यनेकवर्त्मेव समाम्नातः पृथक् पृथक् ॥ ५ ॥

प्रत्येकार्थप्रकाशिका

ननु अस्तूक्तलक्षणं ब्रह्म, तत्प्राप्तिस्तु ज्ञानादेव भवेद् तदा किं व्याकरणेनेति शङ्कापरिहाराय परम्परया व्याकरणस्य तत्प्राप्त्युपायतां प्रदर्शयति - 'प्राप्त्युपेति' । तस्य = ब्रह्मणः प्राप्त्युपायः = प्राप्तेरुपायो मार्ग इत्यर्थः, अनुकारः = अनुकरणम्, वेदः, स च एकोऽपि महर्षिभिः - याज्ञवल्कादिभिः अनेकवर्त्मेव=

आनन्दा

उक्तस्वरूपस्य ब्रह्मणः प्राप्तेः सोपपत्तिमुपायमाह - 'प्राप्त्युपायोऽनुकारश्च' इति ।

अन्वयः - तस्य प्राप्त्युपायः अनुकारश्च वेदः एकः अपि महर्षिभिः अनेकवर्त्मा इव पृथक् पृथक् समाम्नातः ।

व्याख्या - तस्य = शब्दब्रह्मणः प्राप्त्युपायो वेदः, तत्र हेतुमाह - 'अनुकारश्च' इति । चो हेतौ । यतस्तस्य ब्रह्मणोऽनुकारः = प्रतीको वेदः, अतस्तस्य स प्राप्त्युपायः । अनुकरणं हि अनुकार्यं गमयति, प्रतिबिम्बं हि बिम्बं बोधयति, चित्रं हि चित्रणीयं देशविशेषं पुरुषविशेषं वा निरूपयति, प्रतिरूपं हि तत् । अनुकार्यानुकरणयो र्बिम्बप्रतिबिम्बयोरभेदेनाध्यवसानाद् ब्रह्मणः

सूर्यमाया

ब्रह्म का स्वरूप बताकर ब्रह्म की प्राप्ति का सोपपत्ति उपाय बताते हैं - 'प्राप्त्युपायोऽनुकारश्च' इत्यादि ।

अर्थ : - उस ब्रह्म की प्राप्ति का उपाय वेद है, क्योंकि वेद ब्रह्म का अनुकरणात्मक प्रतीक है । वह वेद यद्यपि वस्तुतः एक है, तथापि महर्षियों ने [ऋक् - यजुः - साम आदि नामभेद व शाकल - वाकल - कौथुम आदि शाखाभेद से] अनेक मार्गभेदवाला जैसा पृथक् पृथक् उपदेश (शिष्य सम्प्रदाय के लाघवार्थ) किया है ।

अनेकशाखात्मकः पृथक् पृथक् = भिन्नः भिन्नः समाम्नातः= प्रणीतः, व्यवस्थापित इति यावत् ।

अयमाशयः - यथा वृन्दावनं दृष्टवान् पुरुषः तत्र जिगमिषुमन्यम्प्रति तत्प्राप्त्यर्थं प्रतिपादयति - एतादृशो मार्गोऽस्ति, मार्गे च अमुकम् अमुकं नगरं विद्यते, तेन गन्तव्यं, यत्र यमुना पतितपाविनी, विशालातिविशालमन्दिरो, मन्दिरे मन्दिरे गेहे

प्रतिकृति र्हि वेदो ब्रह्मराशिः । सोऽयं ब्रह्मराशि र्वेदो ब्रह्मणः प्राप्तेरुपायः, दीपराशिः = दीपज्वाला यथा दीपस्य ।

यथा वेदो ब्रह्मप्राप्त्युपायस्तथा व्याकरणमपि 'मुखं व्याकरणं स्मृतम्' इति स्मृतेर्वेदस्य मुख्याङ्गत्वात्, अक्षरसमाम्नायमुपजीव्य प्रवर्तमानत्वाच्च । अक्षरसमाम्नायो ब्रह्मराशिर्वेद एव । तदाह भाष्यम् -

"सोऽयमक्षरसमाम्नायः पुष्पितः फलितश्चन्द्रतारकवत् प्रतिमण्डितो ब्रह्मराशिः ।" इति ।

सोऽयं शब्दब्रह्मज्ञापकोऽक्षरराशिः समाम्नायपदवाच्यो वेदरूप एव ।

स च ब्रह्मणोऽनुकारत्वाद् ब्रह्मप्राप्त्युपाय इत्यपि सूचितम् ।

यहाँ यह अवधेय है कि - पूर्व की तीसरी और चौथी कारिका में 'यस्य' पद का इस पाँचवीं कारिका में 'तस्य' पद से सम्बन्ध (विवक्षित) है । अतः पूर्व में 'यत्' पद से यादृश ब्रह्म वर्णित है, तादृश ब्रह्म ही यहाँ 'तत्' शब्द से ग्राह्य है ।

आशय : - यहाँ वेद को ब्रह्म का अनुकार कहा है । अनुकार का अर्थ है - प्रतीक व प्रतिकृति । जैसे कि प्रणव ब्रह्म का प्रतीक माना गया है, अथवा विष्णु-शिव आदि देव का प्रतीक 'प्रतिमाविग्रह' होता है ।

जाग्रत् व स्वप्न के वृत्तान्त का जो प्रत्यक्षदर्शी होता है, वह अपने प्रत्यक्ष अनुभव को दूसरों को - अर्थात् जो प्रत्यक्षदर्शी नहीं हैं, ऐसे किसी अन्य व्यक्ति को जब बताना चाहता है, तो उसको किसी प्रतीक भाषा में कहता है । कोई भी भाषा किसी के आन्तर भाव की अभिव्यक्ति का प्रतीक ही तो होती है, जैसे कि लिपि अक्षरों की । श्रोत्र से ग्राह्य वा आन्तर जो वास्तविक अक्षर होते हैं

गेहे च अनुपमाभरणभूषितश्रीराधाकृष्णविग्रहाः, श्रीराधेश्यामेति-शब्दैर्गुञ्जायमानगगनम्, इत्यादिदृश्यं तज् ज्ञातव्यम् - इदमेव श्रीवृन्दावनधाम इति, तथैव महर्षयः तपस्याविशुद्धान्तःकरणेन समाहितचेतस्का नित्यां वाचं शब्दरूपब्रह्म साक्षात्कृतवन्तः मन्त्रदृशः अज्ञेभ्यः परेभ्यो बोधनद्वारा तत्प्राप्त्यै वाक्यात्मक-

---

यज्ञतपोऽनुष्ठानादि यथाऽभ्युदयस्योपायस्तथा वेदो ब्रह्मणोऽनुकारः ब्रह्मप्राप्तेरुपायः । स च वेदो वस्तुतः स्वरूपत एकोऽपि सन् स्वाभिव्यञ्जक-ध्वनिभेदाल्लब्धक्रमो वर्ण-पद-वाक्य-विभागवान् संहिता-पदक्रम-विभागवान् महर्षिभिरध्येतॄणामध्ययननिमित्तम् - ऋग्यजुःसामाद्याख्याभेदं शाकल-वाकल-कौथुमादिशाखाभेदं व्यवस्थापयद्भिः एकस्योपेयस्यानेके उपाया इव अनेकवर्त्मा=प्रविभक्तमार्ग इव पृथक् पृथक् सम्प्रदायभेद उपदिष्टः ।

विमर्शः - यथा जागरिते स्वप्ने वा साक्षाद्दृष्टाः श्रुता वा ये वृत्तान्तास्तेषाम-भिज्ञानाय परान् निवेदयितुं स प्रमाता प्रतीकभूतैरनुकरणशब्दैस्तान् सर्वान् वृत्तान्तान् निवेदयति, तथा साक्षात्कृतधर्माणः परावरज्ञा मन्त्रद्रष्टारो महर्षय-स्तपस्याविशुद्धान्तःकरणे समाहिते चेतसि यां सूक्ष्मां नित्यां वाचं शब्दब्रह्मरूपां साक्षात्कृतवन्तः, तामसाक्षात्कृतवतोऽनभिज्ञान् परान् बोधयितुं तस्याः प्रतीकभूतैरनुकृतिरूपैः शब्दैस्तामुपदिदिशुः । स एव शब्दब्रह्मणोऽनुकृति-रूपः शब्दो वेदः ।

उनका प्रतीक ही तो ब्राह्मी - देवनागरी आदि लिपि हैं । लिपि वास्तविक अक्षर का तथा भाषा किसी के अनुभव का प्रतीक होकर उनका द्योतक व उनके स्वरूप के परिचय की प्राप्ति का साधन है, इसी प्रकार वेद ब्रह्म का प्रतीक होने से ब्रह्म की प्राप्ति का अर्थात् ब्रह्म के स्वरूप के साक्षात्कार का साधन है, स्वयं शब्दब्रह्मस्वरूप है ।

मन्त्रद्रष्टा महर्षियों ने समाहित अवस्था में तपस्या से विशुद्ध अन्तःकरण में प्रस्फुटित प्रातिभज्ञान से जिस सूक्ष्म नित्यसिद्ध स्वयंप्रकाश शब्दब्रह्म का साक्षात्कार किया, उसी का प्रतीक मन्त्रात्मक वेद है, जिसका उपदेश - जो प्रत्यक्षदर्शी नहीं हैं, उन शिष्यपरम्परा के लिए किया है । फलतः ब्रह्म के प्रतीक वेद से उनको ब्रह्म की प्राप्ति होती है ।

शब्दसमूहरूपेण अनुकरणं प्रादर्शयन्, स एव वेदः, स च स्वरूपेण भेदाभावादेक एव - अध्ययनाध्यापननिबन्धन-शाखाभेदेन लोके श्रूयमाणवाक्यात्मकशब्दभेदोपदेशभेद-

---

यतो हि ब्रह्मणोऽनुकारो वेदस्तस्मादेव हेतोः स तस्य प्राप्त्युपाय इति निष्कर्षः । इह ब्रह्मप्राप्तिश्च ब्रह्मसाक्षात्काररूपो मोक्षः, स च 'अहम्-मम' इत्यहङ्कारग्रन्थेः समुच्छेदात् । बुद्धिचिदात्मनो र्विवेकाग्रहेण तादात्म्याध्यासे सति 'अहम्' इति प्रत्ययो भवति, ततश्च 'मम' इति संसर्गाध्यासस्तन्निबन्धनश्च लोकव्यवहारः प्रवर्तते । बुद्धिचिदात्मनोस्तादात्म्याभिमान-मूलकाहङ्कारग्रन्थेरनादिवासनायाः समुच्छेदे सति ब्रह्मसाक्षात्कार एव ब्रह्मणः प्राप्तिर्मोक्षः, स प्राप्तस्यैव प्राप्ति ग्रैवेयकवत्, न त्वप्राप्तस्य प्राप्तिः, नित्यसिद्धस्वरूपत्वात् । तदाह - "ममाहमित्यहङ्कारसमतिक्रममात्रं ब्रह्मणः प्राप्तिः ।" इति ।

इदं तु बोध्यम् - 'दृग्दृश्य - बुद्धिचिदात्म' तादात्म्याध्यासविलसितः पूर्वपूर्वानाद्यध्यासतद्वासनाबीजो 'देहेन्द्रियमनोबुद्धि - कार्यकरण' - संघातग्रथितो लब्धभोगशक्तिः - 'कर्तृ-भोक्तृ' व्यपदेशभागहङ्कारास्पदं जीवः । तस्य हि भोग्यजातेन गन्धस्पर्शादिविषयेण - भोगायतनेन देहादिना भोगकरणेन तत्तदिन्द्रियेण च 'मम' इति संसर्गाभिमानः प्रवृत्त्याद्यभिमानश्च बन्धभूतो

निष्कर्ष में - ऋषियों के समाहित अन्तःकरण में उद्भूत प्रातिभज्ञान से प्रत्यक्षदृष्ट मन्त्रविग्रह शब्दब्रह्म का प्रतिबिम्बरूप यह वेद है, जो कि ऋषियों के उपदेश से प्राप्त है, वह अखण्ड विज्ञानरूप से वस्तुतः एक होने पर भी पूर्णरूपेण उसके ग्रहणसामर्थ्य का क्रमशः ह्रास होने से अध्येताओं के सम्प्रदाय भेद से अध्ययन निमित्त संहिता - शाखा और चरण के भेद से विभागकर सम्प्रदाय भेद के रूप में महर्षियों ने उसका पृथक् पृथक् उपदेश किया है । वह भेद-प्राप्य एक स्थान का प्राप्तिसाधन अनेक मार्ग के समान हैं । इस प्रकार संहिता व शाखा

प्रयुक्तस्मृतिपुराणेतिहासभेदेन च पृथक् पृथगिव महर्षिभिः कृतः । एवञ्च ब्रह्मानुकरणवेदज्ञानात् ब्रह्मज्ञानं स्यात्, ततो मोक्षः, इति वेदः ब्रह्मप्राप्त्युपाय इति सिद्धम् ॥ ५ ॥

ग्रन्थिः, स च दृग्दृश्याविवेककृतः । दृग्दृश्यविवेकेन समूलग्रन्थिसमुच्छेदे स्वरूपसाक्षात्कारे नित्यसिद्धस्वरूपस्य ब्रह्मणः प्राप्तस्यैव प्राप्तिर्मोक्ष उपपद्यते । स च व्याकरणज्ञानजन्यवेदविज्ञानादिति व्याकरणं ब्रह्मप्राप्त्युपाय इति फलितोऽर्थः । तेनेह प्रकृतस्य व्याकरणस्य ब्रह्मप्राप्त्युपायतां विहाय वेदस्याप्रकृतस्य ब्रह्मप्राप्त्युपायत्वनिरूपणे प्रकृतहानिरप्रकृतप्रसङ्गश्च दोषौ नापद्येते, इति सुधियो विभावयन्तु ॥ ५ ॥

भेद से वेद ब्रह्म की प्राप्ति का उपाय है । वेद का सम्यक् ज्ञान व्याकरण से ही होता है, व्याकरण के विना नहीं । अतः व्याकरण भी वेद के ज्ञान द्वारा ब्रह्म की प्राप्ति का उपाय है ।

यहाँ ब्रह्म की प्राप्ति का अर्थ है - 'अहं मम' इस अहंकार वासनारूप ग्रन्थि बन्धन के उच्छेद से ब्रह्मस्वरूप आत्मा का साक्षात्काररूप मोक्ष।

बुद्धि और प्रत्यक्चैतन्य आत्मा का अज्ञानमूलक विवेकाग्रह से तादात्म्य का अध्यास होने से कर्तृत्व - भोक्तृत्व का अभिमानी जीव का 'अहम्' यह अभिमान और 'मम' यह सम्बन्धाभिमान अहंकारग्रन्थि है, जो कि संसार बन्धन है, इसका ब्रह्मज्ञान से उच्छेद ही मोक्ष है ॥ ५ ॥

भेदानां बहुमार्गत्वं कर्मण्येकत्र चाङ्गता ।
शब्दानां यतशक्तित्वं तस्य शाखासु दृश्यते ॥ ६ ॥

प्रत्येकार्थप्रकाशिका

ननु महर्षिकल्पितशाखानां परस्परं भिन्नत्वेन विरोधाद् एककर्मणि समावेशो न स्यात्, तथा च शाखाभेदेन कर्मापि भिन्नं स्याद्, इति शङ्कापरिहाराय आह - 'भेदानामिति' । ''शतमध्वर्युशाखाः, सहस्रं साम्नः, एकविंशतिधा बह्वृचाम्,

---

आनन्दा

उक्तरीत्या वेदस्य शाखाभेदे स्वीकृते शाखाभेदेन कर्मणोऽपि भेदः प्रसज्येत, तथा सति एकशाखोक्तकर्मणि तदन्यशाखास्थमन्त्राणामङ्गता न स्याद् विरोधादिति शङ्कां समादधानः शाखाभेदे बीजमाह - 'भेदानाम्' इति ।
अन्वयः - भेदानाम् बहुमार्गत्वम् एकत्र कर्मणि च अङ्गता, तस्य शाखासु शब्दानाम् यतशक्तित्वम् दृश्यते ।
व्याख्या - भेदानाम् = शाखाभेदानाम् बहुमार्गत्वम् = बहवो मार्गास्तस्य भावः बहुमार्गत्वम् नानोपायत्वम् । शाखाभेदा एकस्मिन् साध्ये नानोपाया इति भावः, 'उपेयप्रतिपत्त्यर्था उपाया अव्यवस्थिता' इति स्मरणात् । एकत्र

सूर्यमाया

उक्त प्रकार से वेद के शाखाभेद को पृथक् पृथक् मानने पर शाखाभेद से कर्म भी पृथक् पृथक् माना जायगा, तब अन्यशाखा के कर्म में उससे भिन्न शाखा के मन्त्र को अङ्ग जो माना जाता है, वह न हो सकेगा? इस शङ्का के समाधान के साथ शाखाभेद में मूल हेतु बताते हैं - 'भेदानाम्' इत्यादि ।
अर्थ : - वेद के शाखा भेद किसी कर्म विशेष के साधन में नाना उपाय मात्र हैं, अतः उनका किसी अन्यशाखा के साध्यकर्म में भी अङ्ग होना इष्ट है । ऐसा

नवधाऽथर्वणो वेदः" इत्यादिशाखाभेदानाम् बहुमार्गत्वम् = नानामार्गाः, शाखाभेदा एकस्मिन् साधनीये अनेके उपायास्ते इति यावत्, कर्मणि एकत्र = एकस्मिन् कर्मणि अङ्गता= अन्यशाखाप्रतिपादितकर्मण्यपि इतरशाखामन्त्राणां विनियोग इति ।

कर्मणि च अङ्गता । अत्र चकारो हेत्वर्थः समुच्चयार्थश्च । यतः शाखाभेदानां नानोपायत्वम् अतस्तेषाम् एकत्र = एकस्मिन् कर्मणि = साध्ये कर्मविशेषे अङ्गता = विनियोग इष्यते ।

यद्यन्यशाखास्थमन्त्राणां तदन्यशाखोक्तकर्मण्यप्यङ्गतेष्यते तर्हि शाखाभेदः किमर्थ इति प्रश्ने शाखाभेदे बीजमाह - 'शब्दानां यतशक्तित्वम्' इति ।

तस्य = वेदस्य शाखासु = काठकादिषु, शब्दानाम् = देवसुम्नप्रभृतीनाम्-यजुषि कठशाखायां क्यचि प्रत्यये परे कृतात्वानाम् देवायन्तो यजमानाः, सुम्नायन्तो हवामहे' इत्यादौ दृष्टानां, यतशक्तित्वम् = नियतसामर्थ्यम् - अर्थबोधजनकत्वरूपं पुण्यादृष्टविशेषजनकत्वरूपं वा दृश्यते, नान्यत्र कठभिन्नशाखायाम्, 'देवसुम्नयोर्यजुषि काठके' इति विधानात् । बह्वृचानां

होने पर भी जो शाखा भेद हैं, वह उनके शब्दों की पृथक् पृथक् नियत शक्ति के कारण व्यवस्थित हैं ।

आशय : - जैसे एक ही गन्तव्य स्थान पर पहुँचने के अनेकों उपाय इच्छा विकल्प से व परिस्थिति भेद से होते हैं - कोई देहली वा प्रयाग रेलगाड़ी से जाता है तो कोई वायुयान आदि से, पूर्वदेशवासी पश्चिम मार्ग से पहुँचता है तो पश्चिम देशवासी पूर्वमार्ग से । अथवा जैसे एक स्वास्थ्य लाभ कर्म के नाना उपाय व अङ्गभूत आयुर्वेद के आठ शाखाभेद हैं - शल्य, शालाक्य, काम, भूत, कौमारभृत्य, अगदतन्त्र, वाजीकरणतन्त्र, रसायनतन्त्र । इन सभी का स्वास्थ्यलाभ होना एक उद्देश्य है । वैसे ही किसी कर्मविशेष के साधन के लिए वेद के शाखा

नन्वेवं सर्वेषाम् एकस्मिन् समावेशाद् विरोधाभावेन तत्तच्छाखानां किम्प्रयुक्तो भेद इति मनसि निधायाह - शब्दानामित्यादि ।

तस्य = वेदस्य शाखासु = पूर्वोक्तशाखासु शब्दानाम् = पदात्मकादिप्रयोगाणां यतशक्तित्वम् = यता नियताः शक्तयः अर्थबोधकतासामर्थ्यानि येषां तेषां भाव इत्यर्थः, दृश्यते इति कर्मप्रत्ययान्तपदबोध्यकर्मेदम् ।

तु 'देवाञ्जिगाति सुम्नयुः' इत्यादौ क्यजन्तस्य 'सुम्नयुः' इत्यस्यात्वरहितस्यैव पुण्यजनकत्वरूपसाधुत्वं नियतार्थबोधजनकत्वं च दृश्यते । इत्येवं शब्दानामुदात्तादिस्वरभेद - लोपागमवर्णविकारभेदव्यवस्थाकृत - पुण्यजनकत्व-तत्तदर्थबोधजनकत्वशक्तिभेदनियम एव शाखाभेदे हेतुः ।

विमर्शः - यथैकस्मिन्नेव गन्तव्ये देशे कश्चन पदातिर्गच्छति, कश्चन वाजिना, कश्चन गजेन, कश्चन रथेन गच्छति, यद्वा प्राग्देशवासी -

---

भेद हैं, जो कि नाना उपाय स्वरूप हैं । उनका कोई विरोध नहीं है । अत एव शाखाभेद से कर्मभेद की आपत्ति नहीं । फलतः अन्यशाखा में विहित कर्म विशेष में उससे अन्यशाखा में उपदिष्ट मन्त्र का विनियोग होता है । जिस शाखा में कर्म विहित है, यदि उस शाखा में उसके अङ्ग मन्त्र का उपदेश नहीं है, तो उस स्थिति में कर्मविशेष अन्यशाखा के मन्त्र से किया जाना विहित है । वेद के शाखाभेदों का साध्य है - कर्मविशेष, जिसका एकमात्र साध्यफल है - स्वर्गापूर्व । तत्तत् शाखा के अनुगामी वही कर्म विशेष अपनी अपनी शाखा भेद के नियमानुसार करके स्वर्गापूर्व प्राप्त करते हैं, भिन्न शाखा नियमानुसार नहीं । किन्तु जो एक शाखा में उपदिष्ट मन्त्र है, उसका अन्य शाखोक्त कर्म में विनियोग अर्थात् अङ्गत्व इष्ट है । अत एव शाखाभेद से कर्म का भेदप्रसङ्ग दोष नहीं है । 'सर्वशाखाप्रत्ययमेकं

इदमत्र फलितम् - एकस्मिन् कर्मणि सर्वेषां समावेश-सम्भवेऽपि एतदर्थबोधनेच्छया अयं शब्दः अस्यामेव शाखायाम् उदात्तादिगुणविशिष्टः प्रयुक्तः सन् पुण्यजनको भवति, नान्यस्यां

अवाच्येन पथा, अवाग्देशवासी प्राच्येन पथा, औत्तराहो दक्षिणेन पथा, दाक्षिणात्यश्चोत्तरेण पथा तमेवैकं प्रयागमुपैति, यथा च - एकस्मिन्नेव चिकित्सासाध्ये स्वास्थ्यलाभे कर्मणि आयुर्वेदस्यांष्टाङ्गानां प्रकारभेदेनोपायत्वम्, तथैकशाखाप्रतिपादितकर्मणि तच्छाखानुक्तानामन्यशाखोपदिष्टानां मन्त्राणां विनियोग इष्यते, इति नास्ति कोऽपि विरोधगन्धः ।

इदं तु बोध्यम् - क्वचित् तृणारणिमणिन्यायेन निरपेक्षतया क्वचित्तु दण्डचक्रचीवरन्यायेन सापेक्षतया मन्त्राणां कर्माङ्गत्वमित्युभयमुपपद्यते ।

कर्म' इस मीमांसा सिद्धान्त के अनुसार सकल शाखाओं का साध्य एक कर्म विधिसंगत है ।

यदि भिन्न शाखा के कर्म का अन्यशाखा के मन्त्र भी अङ्ग हो सकते हैं तो शाखा भेद क्यों है? इस प्रश्न का उत्तर है कि - तत्तत् शाखाओं के शब्द की अपनी अपनी पृथक् शक्ति नियत है, जो कि शाखा भेद का हेतु है। सारांश में- उदात्त आदि नियतस्वरों और लोप - आगम - आदेश आदि वर्ण विकारों के भेद नियम से शब्दों का साधुत्व प्रयुक्त पुण्यजनकत्व व अर्थबोधकत्व सामर्थ्य की व्यवस्था ही शाखाभेद में हेतु है ।

जैसे कि - "सिमस्याथर्वणेऽन्त उदात्तः" इस पाणिनीय अनुशासन से आथर्वण मन्त्र में ही 'सिम' शब्द का अन्त 'अकार' उदात्तस्वर होने से - शेष आदि अनुदात्त "सिम" शब्द का प्रयोग साधु व पुण्यजनक होता है, अन्यत्र नहीं ।

इसी प्रकार यजुर्वेद के 'देवायन्तो यजमानाः, सुम्नायन्तो हवामहे' इस कठशाखा के मन्त्र में क्यच् प्रत्यय पर रहने पर देव और सुम्न शब्द के अकार

शाखायाम्, इति नियमः पृथक् पृथक् तत्तच्छाखायां दृश्यते, इति तत्तन्नियमभेदप्रयुक्त एव शाखाभेद इति बोध्यम् । अत एव भगवन्तः श्रीपाणिनिपादा "देवसुम्नयोर्यजुषि" "सिमस्याथर्वणेऽन्त उदात्त" इत्यादि निर्म्ममुः, इति दिक् ॥ ६ ॥

शाखाभेदानामेकस्मिन् कर्मणि अविरोधेनाङ्गत्ववर्णनेन 'सर्वशाखाप्रत्ययमेकं कर्म' इति मीमांसाराद्धान्तोऽपि रक्षितः ।

तस्य वेदस्य भेदानां चतुर्णाम् - ऋग्यजुःसामाथर्वणां प्रत्येकमनेकशाखाभेदाद् बहुमार्गत्वम्, इति केषांचन व्याख्यानं तु न हृद्यम्, भेदानामृगादीनां चतुर्णामेकस्मिन् कर्मण्यङ्गत्वप्रतिपादने 'सर्वशाखाप्रत्ययमेकं कर्म' इतिराद्धान्तो विरुध्येत । तस्माद् 'भेदानाम्' इत्यस्य शाखाभेदानामित्येव व्याख्यानं युज्यते । अत एव शाखाभेदानां 'बहुमार्गत्वं कर्मण्येकत्राङ्गता' इत्युभयं बोधयितुं हेतुगर्भ-समुच्चयार्थश्चकार उपात्त इति सुधीभिर्विभाव्यताम् ।। ६ ।।

के स्थान में 'देवसुम्नयोर्यजुषि काठके" इस पाणिनीय सूत्र से आकार आदेश के विधान से सिद्ध - देवाय और सुम्नाय' यह प्रयोग यजुर्वेद की कठशाखा में ही साधु तथा पुण्यजनक होता है, अन्यशाखा में नहीं ।

सारांश में - स्वरभेद तथा वर्णविकार भेद आदि के कारण शब्दों का साधुत्व प्रयुक्त जो पुण्यजनकत्व एवम् अर्थबोधजनकत्वरूप शक्ति है, तन्मूलक ही शाखाओं का भेद है, कर्मभेद मूलक नहीं । अत एव किसी शाखा के विहित कर्म में किसी अन्य शाखा के मन्त्र की अङ्गता मानने में कोई अनुपपत्ति वा विरोध नहीं है ।। ६ ।।

स्मृतयो बहुरूपाश्च दृष्टादृष्टप्रयोजनाः ।
तमेवाश्रित्य लिङ्गेभ्यो वेदविद्भिः प्रकाशिताः ॥ ७ ॥

प्रत्येकार्थप्रकाशिका

नन्वेवं वेदस्यैव प्रमाणत्वे स्मृतीनामप्रामाण्यं स्यादत आह 'स्मृतय' इति । वेदविद्भिः = वेदज्ञैः - कर्तृपदमिदम्, तमेव = वेदम् आश्रित्य = मूलमादाय लिङ्गेभ्यः= हेतुभ्यः, श्रुत्यनुगुण-हेतुभ्यः, न तु शुष्कतर्केभ्य इति यावत्, दृष्टादृष्टप्रयोजनाः= दृष्टं चादृष्टं च ते प्रयोजने यासां ताः, दृष्टफलं चिकित्सादि-

---

आनन्दा

स्मृतीनां वेदमूलकत्वात् प्रामाण्यं निरूपयति - 'स्मृतयो बहुरूपाश्च' इति ।

अन्वयः - वेदविद्भिः तम् एव आश्रित्य लिङ्गेभ्यः दृष्टादृष्टप्रयोजनाः बहुरूपाः स्मृतयः प्रकाशिताः ।

व्याख्या - वेदविद्भिः = वेदरहस्यज्ञै र्वेदप्रमाणकैर्मनुयाज्ञवल्कादिभिः तम्= उपदर्शितस्वरूपं वेदम् एव आश्रित्य = मूलप्रमाणमधिष्ठाय लिङ्गेभ्यः= श्रौतवाक्य - प्रकरणादिज्ञापकहेतुभ्य ऊहिताः दृष्टादृष्टप्रयोजनाः = दृष्ट-फला आयुर्वेदादयः चिकित्साविषयाः, अदृष्टफलाश्च भक्ष्याभक्ष्य- गम्यागम्य-

---

सूर्यमाया

वेदमूलक होने से स्मृतियों का प्रामाण्य बताते हैं - 'स्मृतयो बहुरूपाश्च' इत्यादि ।

अर्थ : - वेद के वेत्ता ऋषियों ने वेद को ही प्रमाण रूप में मूल आधार अपनाकर वाक्य प्रकरण आदि ज्ञापकलिङ्गों से ऊहापोह कर दृष्टफल - ऐहिकसुख और अदृष्टफल - पारलौकिकसुख की प्राप्ति के साधन नाना प्रकार की स्मृतियों का प्रकाशन किया है ।

बोधनद्वारा रोगापनयनम्, अदृष्टफलं भक्ष्याभक्ष्यादिबोधनद्वारा पुण्यपापरूपमिति फलितोऽर्थः, बहुरूपाश्च = नानारूपाश्च स्मृतयः = आयुर्वेदादिशास्त्राणि - मन्वादिधर्मशास्त्रादीनि च प्रकाशिताः = मन्दधियामुपकाराय प्रकटीकृताः ।

विधिनिषेधपरा अभ्युदयनिःश्रेयसफला बहुरूपा = नानाप्रकाराः प्रत्यक्षवेदमूलाः शिष्टाचारानुमितवेदमूलाश्च स्मृतयः = चरक - सुश्रुतादयो मनुस्मृत्यादयश्च प्रकाशिताः = वेदे प्रमितानर्थाननूद्य प्रकाशं नीता न तु स्वस्वकपोल-कल्पिताः ।

विमर्शः - उपलब्धवेदमूलं वा शिष्टाचारानुमितवेदमूलं वा प्रमाणमुपादाय तत्सिद्धार्थानुवादरूपेण महर्षिभिः स्मृतयः = स्मारिकाः प्रकाशिता अतस्तासां वेदमूलत्वात् प्रामाण्यमक्षुण्णम् । ताश्च साक्षाच् श्रुतिमूलाः शिष्टाचारानुमित-

---

आशय : - स्मृतियाँ जो कि वेदार्थ का अनुवादक व प्रतिपादक हैं, दो प्रकार की हैं । प्रथम वे हैं जिनका आधारभूत - मूल वेदवचन उपलब्ध रहे हैं । द्वितीय वे हैं जिनका आधारभूत मूल वेदवचन स्पष्ट रूप में उपलब्ध नहीं रहे हैं, किन्तु शिष्टों की अविच्छिन्न आचार - व्यवहार परम्परा से अनुमित हैं । दोनों ही प्रत्यक्ष व अप्रत्यक्ष रूप में वेदमूलक होने से प्रमाण हैं ।

उनमें आयुर्वेद - शुक्रनीति - कामसूत्र आदि स्मृतियों का - प्रत्यक्ष ऐहिकसुख का आधारभूत - 'चिकित्साद्वारा स्वास्थ्यलाभ, समाजमर्यादा, पारिवारिक व्यवस्था, अभ्युदय, सुतसम्पत्ति', आदि दृष्ट प्रयोजन हैं, तथा श्रौतसूत्र - गृह्यसूत्र धर्मसूत्र आदि स्मृतियों का - 'नित्य-नैमित्तिक - काम्यकर्मों के प्रतिपादन से अन्तःकरण की शुद्धि व पुण्य फल द्वारा पारलौकिक सुख - 'अपवर्ग वा मोक्ष' आदि अदृष्ट प्रयोजन हैं, एवं श्रुत्यर्थ के प्रकाशक लिङ्गों से अनुमित मन्वादि स्मृतियों का - 'दृष्ट - अदृष्ट, ऐहिक- आमुष्मिक', दोनों प्रयोजन हैं । अर्थात् 'भक्ष्य - अभक्ष्य, गम्य - अगम्य, कृत्य-अकृत्य' आदि कर्मों के विधि - निषेध द्वारा प्रवृत्ति - निवृत्तिपरक मन्वादि स्मृतियों का ऐहिक अभ्युदय तथा आमुष्मिक निःश्रेयस की सिद्धि उभय प्रयोजन हैं ।

अयम्भावः - वेदोक्त एवार्थः श्रुतिवाक्येभ्यो निश्चेतुम-शक्तानां सुखबोधाय स्मृतिषु विस्तरेण प्रकाशितो महर्षिभिरिति स्मृतीनामपि वेदमूलकत्वात् प्रामाण्यमिति दिक् ॥ ७ ॥

श्रुतिमूला वा नानारूपा अपरोक्षसुखहेतु - नैरुज्यादिफलाश्चिकित्साविषया आयुर्वेदादयः, परोक्षस्वर्गादिहेतु-पुण्यपापरूपफलाश्च भक्ष्याभक्ष्य-गम्यागम्यविषयाः 'पञ्च पञ्चनखा भक्ष्याः, ऋतौ भार्यामुपेयात्' इत्यादि-विधिरूपाः 'न कलञ्जं भक्षयेत् - परदारान् नोपगच्छेत्' इत्यादिनिषेधरूपाः सर्वाः स्मृतयो वेदप्रतिपादितार्थप्रकाशिकाः, न त्वपूर्वाः नास्तिकागमवत् कल्पिताः । एतावता 'प्रकल्पिताः' इति केषांचित् पाठो निरस्तो वेदितव्यः प्रकृतसन्दर्भविरुद्धत्वात् । तस्मात् 'प्रकाशिताः' इति पाठः समीचीन इति सुधीभिर्विभाव्यताम् ॥ ७ ॥

दृष्ट प्रयोजन वा अदृष्ट प्रयोजन की प्राप्ति के साधन जो कि मूलतः वेद में उपदिष्ट हैं, उनका स्मृतियों में प्रकाशन व संकलन ऋषियों ने किया है, वे केवल निजी कल्पना पर आधारित शुष्कतर्कमात्र नहीं हैं । अत एव वेदमूलक होने से स्मृतियाँ प्रमाण हैं, शुष्कतर्क पर आश्रित नास्तिकों के आगम के समान अप्रमाण नहीं हैं । यह तारतम्य अवश्य है कि - शब्दब्रह्मरूप अपरोक्ष श्रुति - 'वेद' अन्य प्रमाणों का निरपेक्ष - स्वतः सिद्ध प्रमाण है, किन्तु स्मृति श्रुति प्रमाण का सापेक्ष लिङ्गरूप ज्ञापक प्रमाण है ॥ ७ ॥

तस्यार्थवादरूपाणि निश्चित्य स्वविकल्पजाः ।
एकत्विनां द्वैतिनां च प्रवादा बहुधा मताः ॥ ८ ॥

प्रत्येकार्थप्रकाशिका

ननु स्मृतीनां वेदमूलकत्वे वेदस्य चैकरूपत्वात् स्मृतिषु मतभेदोऽप्रामाणिकः स्यादत आह 'तस्यार्थेति'। तस्य = वेदस्य

आनन्दा

सर्वासां स्मृतीनां वेदमूलकत्वे समाने सति स्मृतिषु द्वैतवादाद्वैत-वादादिमतभेदे किं बीजं - तदाह - 'तस्यार्थवादरूपाणि' इति ।

अन्वयः - तस्य अर्थवादरूपाणि निश्चित्य एकत्विनाम् द्वैतिनाम् च स्वविकल्पजाः प्रवादाः बहुधा मताः ।

व्याख्या - तस्य = वेदस्य अर्थवादरूपाणि = स्तुतिनिन्दान्यतरपराणि वाक्यानि निश्चित्य = स्वस्वमत्या तत्तद्वादपराण्यवधार्य एकत्विनाम् = "एकमेवाद्वितीयं ब्रह्म" इति वादिनामद्वैतिनाम्, द्वैतिनाम् = "द्वा सुपर्णा सयुजा सखाया", "ऋतं पिबन्तौ सुकृतस्य लोके" इतीश्वरजीवभेदवादिनां नैयायिकानां प्रकृतिपुरुषवादिनां सांख्यादीनां च स्वविकल्पजाः = स्वस्वप्रतिभाविशेषेण कल्पिताः, प्रवादाः = प्रख्यातिं गतास्ते ते सिद्धान्तविशेषा बहुधा = नानाप्रकारा अद्वैतरूपा द्वैतरूपा वा मताः = इष्टाः, स्वस्वमन्तव्यतया स्वीकृताः ।

विमर्शः - अर्थवादो रूपम् = स्वरूपं प्रकारो वा येषां तानि - अर्थवादरूपाणि वाक्यानि स्तुतिनिन्दान्यतरपराणि, अर्थवादात्मकवाक्यानि अर्थवादसदृशानि

सूर्यमाया

पूर्वकारिका के अनुसार यदि सभी स्मृतियाँ समान रूप में वेदमूलक ही हैं, तो उनमें जो अद्वैतवादी व द्वैतवादी आदि का दर्शनभेद पाया जाता है, वह सर्वथा निर्मूल होने से अप्रमाण सिद्ध हो जायगा? इस आशङ्का का परिहार करते हैं - 'तस्यार्थवादरूपाणि'।

अर्थवादरूपाणि = अर्थवादात्मकवाक्यानि निश्चित्य= निर्णीय, ऋषिभिरिति कर्तृपदम् अध्याहार्यम्, अत एव मता इत्येतदपेक्षया

च वाक्यानि, इतिं संकलितोऽर्थः । द्विविधा ह्यर्थवादाः - 'विधिशेषा निषेधशेषाश्च' ।

तत्र "वायव्यं श्वेतपशुमालभेत" इत्यादिविधिशेषाणाम् - "वायुर्वै क्षेपिष्ठा देवता" इत्यादीनामर्थवादवाक्यानां विधेयार्थस्तावकत्वेन लक्षणया श्वेतपश्वालम्भनविधेः प्राशस्त्यपरत्वम्, "बर्हिषि रजतं न देयम्" इत्यादि-निषेधस्य शेषाणां च 'सोऽरोदीत्' इत्यादीनामर्थवादानां निषेध्यस्य बर्हिषि रजतदानस्य निन्दकत्वेन लक्षणया निन्दापरत्वम् ।

एवं चार्थवादपदमहिम्नैव स्तुतिनिन्दापरयोरुभयोरपि संग्रहः, रूपशब्दश्चेह 'स्वरूप- प्रकारयो' रुभयोरर्थयोरुपलक्षकः । इत्थं चेहोक्तार्थद्वयलाभाय - 'अर्थवादांश्च - अर्थवादरूपाणि च' इति, 'अर्थवादांश्च अनर्थवादरूपाणि च' इति च विगृह्य एकशेषेण - अर्थवादरूपाणि इत्येतत्साधनम्, तत्र प्रमाणत्वेन - "गुणो यङ्लुकोः" इति सूत्रे 'यङ्यङ्लुको' रेकशेषं मत्वा यङ्लुक्पदस्य दृष्टान्तत्वोपस्थापनमित्यादि केषांचित्क्लेशोऽनावश्यक एवेति प्रतीमः । वस्तुतस्तु दृष्टान्ते दार्ष्टान्तिके चैकशेषो दुरुपपाद एव ।

तथाहि तत्र सारूप्याभावात् "सरूपाणाम्" इत्येकशेषस्य, समानार्थत्वाभावाद् "विरूपाणाम्" इत्येकशेषस्य वा न प्रसङ्गः । अन्येषामप्येकशेषशास्त्राणाम्-

---

अर्थ : - वेद के अर्थवादरूप अथवा अर्थवाद के सदृश वाक्यों को अपने अपने मन्तव्य वाद परक निश्चित कर अपनी कल्पनाओं की विविधता से उत्पन्न हुए- 'एकत्ववादी अथवा द्वैतवादी आदि दार्शनिकों के' मतभेद के कारण अद्वैत वा द्वैत आदि विविध दर्शनभेद व सिद्धान्तभेद लोक में प्रख्यात होकर भिन्न भिन्न मार्ग के रूप में 'प्रवाद' माने गये हैं, जबकि सबका लक्ष्य एक ही है ।

आशय : - कपिल, गौतम, कणाद, जैमिनि, व्यास प्रभृति महर्षियों ने अपनी अपनी दृष्टिशक्ति व विलक्षण प्रतिभा बल से वेद के अर्थवाद व अर्थवाद सदृश वाक्यों का द्वैत वा अद्वैत परक व्याख्यान कर साधकों की स्थितिभेद से यथेष्ट मन्तव्य-

अस्य समानकर्तृकत्वात् 'समानकर्तृकयो'रिति 'क्त्वा' । स्वविकल्पजाः = स्वस्वानुभवानुसारेण एकत्विनाम्=

''नपुंसकमनपुंसकेन'' इत्यादीनां केषांचिदिह प्रसक्तेः प्रत्याशा न कर्तव्या तुल्यप्रवृत्तिनिमित्तकत्वाभावात् ।

किंचानेकेषां सहप्रयोगप्रसङ्गे एकशेषविधाने पूर्वस्य शेषः परस्य लोप इत्यौत्सर्गिकः । अत एव त्यदादीनां येन क्रमेण गणे संनिवेशस्तेनैव क्रमेण सहप्रयोगप्रसङ्गे सहविवक्षायाम् ''त्यदादीनि'' इति सूत्रेणोत्सर्गतः पूर्वस्यैव शेषे परस्य शेषाप्राप्तौ ''त्यदादीनां मिथः सहोक्तौ यत्परं तच्छिष्यते'' इति वार्तिकारम्भः सफलः । 'पूर्वस्य खल्वपि शेषो दृश्यते' इति भाष्यकारेष्ट्या तत्प्रत्याख्यानमिति त्वन्यत् ।

इत्थं च पूर्वं यङो विधानम्, ततस्तस्य लुग्विधानमिति क्रमोऽभ्युपेतव्य एव । तयोश्च सहविवक्षायां ''यङ् च यङ्लुक् च'' इत्यत्र यदि कथं-चिदेकशेषः कथ्येतापि चेत्तर्हि परस्य शेषे वचनाभावेन पूर्वस्य यङ एव शेष उत्सर्गतो भविष्यतीति 'यङ्लुको' रितिसूत्रनिर्देशासिद्धिरिति विपरीतमापतति । तस्मादिह सूत्रे - 'यङ् च लुक् च' इति द्वन्द्वात् सप्तमी बोध्या । लुक् च प्रकरणाद् यङ एव ग्रहीष्यते, यथाहि ''रुग्रिकौ च लुकि'' इति सूत्रे 'लुकि' इत्यनेन प्रकरणाद् यङो लुकि रुक्-रिक्-रीको विधीयन्ते । स्पष्टमेतत् सिद्धान्तकौमुदीबालमनोरमायाम् । यथा च ''सिद्धे शब्दार्थसम्बन्धे'' इति भाष्यवार्तिके - 'शब्दश्च अर्थश्च सम्बन्धश्चे' ति समाहारद्वन्द्वात् सप्तमी, सम्बन्धश्च प्रत्यासत्त्या शब्दार्थयोरेव गृह्यते, इति

द्वैत वा अद्वैतवाद' स्थापित किया है, जिससे - सांख्य, न्याय, वैशेषिक, मीमांसा आदि द्वैत दर्शन, तथा अद्वैत वेदान्त आदि तत्तद् दर्शनों का प्राकट्य हुआ है ।

यह ठीक है कि - सभी दर्शनों का उद्गमस्थल-तत्तत् स्मृतियों का आधारभूत प्रमाण समानरूप में वेद ही है, अत एव स्मृतियों में मतभेद नहीं होना चाहिए, किन्तु व्याख्याताओं की अपनी पृथक् दृष्टिशक्ति है, जो कि विलक्षण

वेदान्तादीनाम् द्वैतिनाञ्च = न्यायादीनाञ्च प्रवादाः = सिद्धान्ताः बहुधा = बहुरूपाः मताः = स्वीकृताः ।

स्पष्टमुद्योते, तथेहापि स्यात्, अनर्थकं दुष्करं च - 'यङ् च यङ्लुक् च' इत्येकशेषाश्रयणम् । एवं च दृष्टान्तानुपपत्त्या दार्ष्टान्तिके - 'अर्थवादरूपाणि' इत्यत्रैकशेषसाधने बीजं न पश्यामः । यच्च 'अर्थवादानर्थवादौ रूपं येषां तानि - अर्थवादरूपाणि' इति बहुव्रीहिविग्रहवाक्यं दर्शयता शाक-पार्थिवादित्वादुत्तरपदलोप इत्युक्तं तदपि चिन्त्यम्, "समानाधिकरणाधिकारे शाकपार्थिवादीनामुपसंख्यानमुत्तरपदलोपश्च" इति भाष्यवार्तिकदिशा 'शाकभोजी पार्थिवः - शाकपार्थिव' इत्यादौ समानाधिकरणे तत्पुरुषे तस्योपसंख्यानात् ।

अत्र 'निश्चिताः, निश्रिताः, निश्चित्य' इति त्रिविधपाठमध्ये प्रथमोऽनन्वितार्थकत्वेनाप्रामाणिक एव । शिष्टयोर्मध्ये 'निश्चित्य' इत्येव पाठो युक्ततरः ।

'निश्रिताः' इतिपाठकल्पे - 'सर्वे वादा वेदवाक्यानि नितरामाश्रिता' इत्यर्थः क्रियते । तथा च सर्वे वादा यदि शब्दतोऽर्थतश्च वेदवाक्यानि नितरामाश्रितास्तर्हि ते कथं स्वविकल्पजत्वेन प्रवादा अभिधातुं शक्याः ।

'निश्चित्य' इति पाठे तु सर्ववादानामापाततो वेदमूलकत्वाविशेषेऽपि यथामति यथारुचि स्वस्वबुद्धिविकल्पेन वेदवाक्यानि तत्तदर्थपराणि निश्चित्य= अभिप्रेत्य कल्पितास्ते ते वादाः पुरुषबुद्धिविकल्पनाप्रसूता लोके प्रसिद्धिमधिगताः । अत एव ते 'प्रवाद'पदव्यपदेश्याः । तेष्वेकत्ववाद एव

प्रतिभामूलक है, इस दृष्टिभेद के कारण उनके व्याख्यानभेद से दर्शनों तथा सिद्धान्तों का भेद हो जाना भी स्वाभाविक है। एक ही वस्तु विवेचकों की दृष्टि भेद से तथा साधकों की स्थितिभेद से नानारूप में परिलक्षित व वर्णित होता है । जैसा कि कहा है -

"तमेकं सद्विप्रा बहुधा वदन्ति
अग्निं यमं मातरिश्वानमाहुः ।"

अयमाशयः - अर्थवादप्रकरणेषु क्वचित् कर्मकाण्डस्तुतिः, एवं रुद्रस्तुतिः, सूर्यस्तुतिः, इत्यादयो वर्तन्ते, तत्र स्वस्वरुच्या

सद्वादः, शून्यवाद - द्वैतवादादयस्तु प्रवादाः । तथाहि "असद्वा इदमग्र आसीत्" (तैत्तिरीय- ७ अनु०), "तद्धैक आहुरसदेवेदमग्र आसीदेकमेवाद्वितीयम्, असतः सज्जायत" (छान्दोग्य - २ खण्डः) "नैवेह किञ्चनाग्र आसीन्मृत्युनैवेदमावृतमासीत्" (बृहदारण्यक- २ ब्रा०) "तद्धेदं तर्ह्यव्याकृतमासीत्" (बृहदारण्यक -४ ब्रा०) "आत्मैवेदमग्र आसीत्पुरुषविधः" (बृह०- २ ब्रा०) "ब्रह्म वा इदमग्र आसीदेकमेवाद्वितीयम्" (बृह०- ४ ब्रा २२) "सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्" (छान्दोग्य -२ खण्डः) इत्यादिवेदान्तवाक्यान्युपादाय यथामति तत्तदर्थपरत्वेन निश्चित्य - 'असद्वाद, शून्यवाद, अव्यक्त - प्रकृतिवाद, आत्मपुरुष (ईश्वर) वाद, सद्वाद, ब्रह्मैकत्ववादादयो'यथायथं लोके ख्यातिमुपगता नैके वादाः प्रवादाः परस्परविरुद्धाः प्रवृत्ताः, सोपानपरम्परान्यायेन वस्तुतत्त्वस्य सिद्धेरुपायभूता इति हृदयम् ।

अयमत्र सारः- एकत्विनो द्वैतिन आस्तिका नास्तिकाश्च स्वस्वधारणया वेदवाक्यानि तत्परत्वेन व्याख्याय दर्शनभेदानुपन्यास्थन् ।

तद् यथा - "असद्वा इदमग्र आसीत्" इत्यग्निचयनस्थानस्य स्तुतिपरकोऽर्थवादः अग्निचयनात् प्राक् चयनस्थानमसंस्कृतमासीत्, तच्चयनानन्तरं संस्कृतमजायतेति तत्प्रकरणार्थः, किन्तु शून्यवादिनो नैरात्म्याभिनिवेशात् तस्य शून्यार्थतां कल्पयित्वा सर्वासत्त्वं व्याचक्षाणा शून्यवादं प्रतिपेदिरे । एवमेव - "नासदासीन्नो सदासीत् तम एव खल्विदमग्र आसीत्" इत्यपि चयनस्तुत्यर्थोऽर्थवादः । चयनात् प्राक् चयनस्थानमिदं न असदासीत्,

---

वह एक सद् वस्तु ब्रह्म विचित्र शक्ति के योग से नाना रूप में भासित हो प्रमाताओं की विलक्षण बुद्धि व प्रतिभा से नाना रूप में प्रतिपाद्य होता है। इसी के फलस्वरूप विभिन्न दर्शनों व विभिन्न प्रवादों का प्रादुर्भाव हुआ है ।

निष्कर्ष में - सभी दर्शन मनीषियों की दृष्टिभेद से एक सत्य वस्तु की प्राप्ति व साक्षात्कार के सोपान रूप में प्रमाणभूत उपाय हैं, जिनसे साक्षात् अथवा

एकं प्रधानीकृत्य तत्तत्परिपुष्ट्यै तत्तद्दर्शनं निरमायि । अतः सर्वासां वेदमूलकत्वात् प्रामाण्यमिति ॥ ८ ॥

असतः संस्कारायोगात्, न सदासीत्,चयनस्थानत्वेन व्यपदेशायोगात्, किन्तु अज्ञातत्वेन तम एवासीत्, इति तस्य तात्पर्यभूतोऽर्थः । अत्र सांख्यास्तस्यान्यार्थं मत्वा प्रकृतिवादमुररीकृत्य प्राहुः –

इदं फेनो न कश्चिद्वा बुद्बुदो वा न कश्चन ।
मायेयं बत दुष्पारा विपश्चिददिति पश्यति ॥ इति ।

अपि च – "आपो वा इदमग्र आसीत्" इति दर्शपूर्णमासयाग-विषयोऽर्थवादः, पृथिव्यादेर्जलसृष्टिपूर्वकत्वेन जलप्राशस्त्यप्रतिपादनद्वारा जलसाध्यदर्शपूर्णमासयागस्य प्राशस्त्यपरत्वात् । अत्र हि जलं सर्वकारणत्वेन निर्दिश्यते । एतस्मादयं प्रवादो विनिर्गतः – यथा जलमेकं पृथिव्यादि-सर्वप्रभेदरूपेणावतिष्ठते, तथा एकमेव प्रज्ञानं ब्रह्म घटपटादिभिन्नाकारेण सन्तिष्ठते ।

एवम् – "द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते" इत्याद्यर्थवादप्रकारान् मन्त्राननन्यार्थपरत्वेन निश्चित्य द्वैतिनां द्वैतप्रवादोऽपि विनिर्गतः । अत्र द्वैतिभि जीवपरमात्मानौ द्वौ सखायौ विनिश्चित्य द्वैतवादः प्रवर्तितः 'द्वा सुपर्णा' इति हि नार्थवादवाक्यम्, किन्तु अर्थवादसदृशम् ॥ ८ ॥

परम्परया परलक्ष्य – 'एक सत्य वस्तु' का दर्शन होता है, अत एव दर्शनभेद को पाकर स्मृतियों में अप्रामाण्य की शङ्का अयुक्त है । वेदमूलक सभी स्मृतियाँ व्याख्यान के कल्पभेद से प्रमाण हैं । वेदार्थ का स्मारक एवं प्रकाशक स्मृति है, वह स्मृति ही नहीं, जो वेदमूलक नहीं ॥ ८ ॥

सत्या विशुद्धिस्तत्रोक्ता विद्यैवैकपदागमा ।
युक्ता प्रणवरूपेण सर्ववादाविरोधिनी ॥ ९ ॥

प्रत्येकार्थप्रकाशिका

नन्वेवं खलु प्रवादेषु किं सत्यं तत्राह– "सत्येति" । तत्र = उक्तप्रवादेषु एकपदागमा = एकपदरूपा श्रुतिः विशुद्धिः= सर्वकल्पनादोषरहिता सर्ववादाविरोधिनी = सर्ववादेषु -

---

आनन्दा

पुरुषाणां बुद्धिविकल्पजाः सर्वे वादा इति प्रतिपादितं प्राक्, अथ तेषु वादेषु कस्य परमार्थसत्यत्वं तदाह - 'सत्या विशुद्धि' रिति ।

अन्वयः - तत्र एकपदागमा विशुद्धिः सर्ववादाविरोधिनी प्रणवरूपेण युक्ता विद्या एव सत्या उक्ता ।

व्याख्या - तत्र = एकत्विनां द्वैतिनां च प्रवादेषु मध्ये एकपदागमा = 'ओम्' इत्येकं पदम् आगमोऽस्ति स्वरूपं यस्याः सा, एकपदात्मिका या श्रुतिस्तद्गम्या, विशुद्धिः = शुद्धा–विविधकल्पनाविषयापि स्वतो निर्विकल्पा, सर्ववादाविरोधिनी = प्रकृतिरूपेण सर्ववादेष्वनुगता सर्ववादानुकूला, प्रणवरूपेण

सूर्यमाया

वेद के अर्थवादवाक्यों का आचार्यों के मतभेद से व्याख्यान में भेद होना एकत्व अथवा द्वैत आदि वादों का बीज है, यह पूर्वकारिका में कहा है । अब उन वादों में वस्तुतः कौन सत्य है, इस जिज्ञासा में प्रथम निर्दिष्ट एकत्ववादियों की ब्रह्मविद्या सत्य है, यह युक्तिपूर्वक सिद्ध करते हैं -

'सत्या विशुद्धिः' ।

अर्थ : - उक्त प्रवादों में एकपद - 'ओंकार' श्रुति रूप प्रमाण से गम्य तथा पुरुषों की विकल्पना का विषय न होने से दोष रहित 'विशुद्ध' एवं सभीवादों के परस्पर विरोध से रहित - सर्वसम्मत और प्रणव का वाच्य होने से प्रणवरूप से अन्वित 'अद्वैतब्रह्म विद्या' ही परमार्थतः सत्य कही गई है ।

अविरोधिनी कस्मिन्नपि सिद्धान्ते अस्या विरोधो नास्तीति यावत्, प्रणवरूपेण युक्ता = प्रणवरूपा 'ओं' इति वाक्, विद्या = सर्वार्थप्रकाशिनी एव सत्या = यथार्था उक्ता = कथिता ।

युक्ता = प्रणवस्वभावा, विद्या = वाच्यवाचकभावेन सकलार्थप्रकाशन-शक्तिमती ब्रह्मविद्या एव, सत्या = परमार्थसती, उक्ता = अभिहिता, सर्वकल्पनाधिष्ठानत्वेन केनापि विरोधाभावात् सर्ववादसंवादित्वाद् वेदतात्पर्यविषयत्वाच्च । इतरे तु प्रवादा विकल्परूपाः परस्परविरुद्धा न परमार्थतः सत्याः ।

विमर्श : - यथा परस्परं विरुद्धानपि घटपटादीनर्थान् तदादि सर्वनामपदमभिधत्ते, अन्योन्यविरुद्धा अपि घटपटादयोऽर्थास्तदादि-सर्वनामपदवाच्यभूता अभिन्ना भान्ति, तथा ब्रह्मवाचक एक एव प्रणवो विरुद्ध - 'प्रधान-परमाण्वादि' कारणत्ववादिदर्शनानामनुग्राहकः सर्वप्रकृतिभूतो विभिन्नदर्शनपरिकल्पनाधिष्ठानं सर्वान् दर्शनभेदाननुजानाति, सर्वान् वादान् समनुगच्छाति । प्रणवश्च ब्रह्म एव, वाच्यवाचकयोरभेदात् । स एव सर्वार्थप्रकाशनशक्तिमत्तया विद्या, प्रभाप्रभाकरयोश्चन्द्रचन्द्रिकयोरिव शक्तिशक्तिमतोरभेदात् ।

प्रणवरूपा ब्रह्मविद्यैव सर्ववादपरिकल्पनाधिष्ठानतया सर्ववादाविरोधिनी सर्ववादैरबाधिता सत्या । सा तु कदापि कुतश्चिदपि स्वतो न भिद्यते, परतश्च न बाध्यते, परिकल्पितानां भेदानामवास्तवत्वात् । यथा हि मृद्विकाराणां घटशरावादीनां स्वरूपतः परस्परतो विरोधेऽपि कारणतत्त्वमृदात्मना विरोधो

आशय : - एकत्व (अद्वैत) तथा द्वैत, आदि नानावाद शास्त्रों में प्रवर्तित हैं, किन्तु उनमें अद्वैतवाद - 'ब्रह्म-विद्या' ही पारमार्थिक सत्य है, क्योंकि यह पुरुषबुद्धि की कल्पनामात्र न होने से स्वतः सिद्ध - विशुद्ध यथार्थ वस्तु है । द्वैत आदि अन्य वाद तो सापेक्ष सत्य होने पर भी परमार्थतः निरपेक्ष सत्य नहीं हैं, वे द्रष्टाओं की स्व-स्व-बुद्धि की विकल्पनाओं से प्रसूत हैं - जो सत्यवस्तु

अयमाशयः - "एकमेवाहं द्वितीयो नास्ति, सत्यं विज्ञानमानन्दं ब्रह्मे" त्यादि प्रतिपाद्यमेकमेव ब्रह्म सत्यं तस्य च साक्षाद् बोधकः प्रणवः । अतः तयोरभिधानाभिधेययोरैक्यात्

नास्ति, अतः सर्वरूपा मृदेव सत्या, यथा वा रज्जौ रज्जुत्वाज्ञानात् कल्पितानां सर्प-दण्डोदकधाराभूछिद्रादीनां परस्परं स्वरूपतो विरोधे जाग्रत्यपि सर्वरूप-रज्ज्वधिष्ठानात्मना सर्वाविरोधि सर्वत्र समनुगतं रज्जुतत्त्वमेव सत्यम्, तथा प्रणवरूपब्रह्मणः सर्वपरिकल्पनाधिष्ठानत्वेन ब्रह्मणि परिकल्पितानां सर्वेषां वादभेदानां स्वरूपतो विरोधेऽपि सर्वाधिष्ठानप्रणवात्मकब्रह्मरूपतो भेदाभावेनै-कत्वाद् विरोधकथापि नास्ति । तस्मात् सर्वाधिष्ठानत्वेन सर्वत्र समनुगतं सर्वात्मकमेकं प्रणवरूपं ब्रह्मैव सत्यम् । अधिष्ठानव्यतिरेकेण कल्पितानाम-सिद्धेर्मृषात्वपर्यवसानात् निरस्तसमस्तविशेषमेकमद्वितीयं विशुद्धं ब्रह्मैव सत्यं परिशिष्यति ।

अद्वैतब्रह्मणि परिकल्पिता द्वैतवादाः परस्परं विरुद्धाः प्रतिभासमाना अपि स्वाधिष्ठानाद्ब्रह्मरूपतो न विरुद्धाः, सर्वेषां स्वाधिष्ठानब्रह्मणोऽनन्यत्वात् ।

अतो विशुद्धा सर्ववादाविरोधिनी प्रणवरूपा ब्रह्मविद्यैव सत्येति निष्कर्षः ।

अत्र 'सर्ववादाविरोधिना' इति तृतीयान्तपाठोऽपि दृश्यते । एतत्कल्पे

के सोपानभूत - प्रामाणिक प्रक्रिया के रूप में नाना उपाय हैं । अत एव वे सत्य वस्तु का साधक प्रमाण होने पर भी नितान्त सत्य नहीं है । अद्वैतवाद इसलिए भी सत्य है कि उसका मूलरूप में किसी वाद से वस्तुतः विरोध नहीं है, क्योंकि सभी वाद उसी के कल्पित रूपान्तर हैं । प्रणवरूप ब्रह्म में ही अन्य सभी वाद प्रतिष्ठित हैं । प्रणव ही समान रूप में सभी वादों का प्रमाणभूत आधार है ।

जबकि प्रणवरूप अद्वैत ब्रह्मविद्या ही दर्शनभेद से बहुविध वादों की आधारभित्ति है, तो उसका उन वादों से मूलतः विरोध क्यों होगा, वह तो सबका साधक है, विरोधी नहीं ।

प्रणवरूपं ब्रह्म सत्यमिति फलितम् । संसारस्य च सर्ववस्तुनः तत्रैव कल्पितत्वम्, कल्पनायाश्च मिथ्याज्ञानमूलत्वेन मिथ्यात्वात् तत्कृतविरोधलेशोऽपि ब्रह्मणि नास्ति, यथा गगने तलमलिनत्वादेः बालैः कल्पितत्वेऽपि तत्कृतदोषस्य आकाशे असत्त्वमेव । तथा

'प्रणवरूपेण' इत्यनेन समानविभक्त्यन्तेन तदन्वयः । तथा च सर्वेषां वादानां प्रणवरूपश्रुतिमूलकत्वेन प्रणवस्य सर्ववादाविरोधित्वमिति तदर्थः, ततश्च प्रणवरूपब्रह्मविद्याया अपि सर्ववादाविरोधित्वमिति यदि तत्तात्पर्यं तर्हि नार्थभेदः, किन्तु सर्वेषु प्रवादेषु - एकपदागमाया ब्रह्मविद्यायाः सत्यत्वनिरूपणे प्रकृते तस्याः सत्यत्वे बीजतया तस्या एव साक्षात् सर्ववादाविरोधित्वकथनं वरम् ।

''प्रणवः सर्वाभ्यनुज्ञाविषयः'' इति वृत्तिस्तु न तृतीयान्तपाठाभिप्रायेण तद्व्याख्यानपरा, किन्तु तैस्तै र्वादिभिः स्वस्ववादः प्रणवप्रमाणक इत्यभिमानेन स्वीकृत इति प्रणवः सर्वाभ्यनुज्ञाविषयः - इति तदर्थः । वस्तुतोऽद्वैतब्रह्मविद्यैव प्रणवरूपा सत्या, अन्ये तु वादाः कल्पनामूला एव न यथार्थप्रणवपराः, इति तत्तात्पर्यम् ।

तस्माद् एकत्विनामद्वैतब्रह्मविद्यायाः सत्यत्वमुपपादयितुं साक्षात् तस्या एव सर्ववादपरिकल्पनाधिष्ठानत्वेन सर्ववादाविरोधित्वाभिधानं परमं हृद्यम् ॥

जैसे न्यायमत में नाना घट व्यक्ति का स्वरूपतः परस्पर विरोध प्रतीत होने पर भी सब में अनुगत तथा सकल व्यक्ति का संग्राहकरूप में अविरोधी 'घटत्व रूप' सामान्य तत्त्व सत्य माना गया है, वैसे ही द्वैत आदि सभी वादों में समनुगत तथा सबका साधक प्रमाण रूप में अविरोधी - 'प्रणव रूप अद्वैत ब्रह्मविद्या' परमार्थतः सत्य है । अथवा सर्वमत में जैसे रज्जु में कल्पित 'सर्प - जलधारा-दण्ड' आदि का स्वरूपतः परस्पर विरोध होने पर भी सबका अधिष्ठानभूत रज्जु

च प्रणवरूपमेव ब्रह्म नानाशब्दकल्पनायाः नानार्थकल्पना-याश्चाधिष्ठानम् । अतः कल्पनायाः स्वस्वबुद्ध्यनुसारित्वाद् विरोधेऽपि अधिष्ठानस्य निर्विकल्पस्य ब्रह्मणः कुत्रापि विरोधो नास्तीति वेदान्तसिद्धान्तरीत्याऽयं ग्रन्थ इति ध्येयम् ॥ ९ ॥

अपि च एकत्विनां द्वैतिनां च प्रवादानां यथार्थतः प्रणवश्रुत्युपजीवित्वे विवादाभावेन प्रणवस्य सर्ववादाविरोधित्वं सुस्पष्टमेव, न तत् कथनीयम्, अद्वैतब्रह्मविद्यायास्तु द्वैतिभिरनङ्गीकाराद् विप्रतिपत्तिविषयत्वेन तस्याः सत्यत्वसाधनाय सर्ववादाविरोधित्वाभिधानं सप्रयोजनम् ।

तथा चात्रानुमानप्रयोगः - ''ब्रह्मविद्या सत्या सर्ववादाविरोधित्वात् प्रणववत्, यन्नैवं तन्नैवं यथा प्रकृति-परमाण्वादिः'' ।

ब्रह्मविद्यायाः सर्ववादाविरोधित्वे चानुमानप्रयोगः -

''ब्रह्मविद्या सर्ववादाविरोधिनी सर्ववादपरिकल्पनाधिष्ठानत्वात् प्रणववत्'' इत्यलम् ॥ ९ ॥

का मूलतः किसी से विरोध नहीं होता है । फलतः सब में अनुगत तथा सबका साधक होने से अविरोधी रज्जु तत्त्व सत्य ठहरता है, वैसे ही प्रणव रूप ब्रह्म में कल्पित नाना वादों का स्वरूपतः परस्पर विरोध होने पर भी सभी वादों में अनुगत तथा सबका साधक प्रमाण होने से अविरोधी अधिष्ठान भूत- 'प्रणवरूप अद्वैत ब्रह्मविद्या' अकल्पित - स्वतः सिद्ध वस्तु ही पारमार्थिक सत्य है ॥ 9 ॥

विधातुस्तस्य लोकानामङ्गोपाङ्गनिबन्धनाः ।
विद्याभेदाः प्रतायन्ते ज्ञानसंस्कारहेतवः ॥ १० ॥

प्रत्येकार्थप्रकाशिका

ननु प्रणव एक एव कथं सर्वरूप इत्यत आह - 'विधातु'-रिति । लोकानाम् = सकलजगतां विधातुः = प्रकृतेः, प्रामाण्यं

आनन्दा

सर्वजगदुपादानत्वेन प्रणवस्य सर्वरूपत्वमुपपादयन् एकस्यापि तस्य विद्याभेदहेतुत्वे बीजमाह - "विधातुस्तस्य" इति ।

अन्वयः - लोकानाम् विधातुः तस्य अङ्गोपाङ्गनिबन्धनाः विद्याभेदाः ज्ञानसंस्कारहेतवः प्रतायन्ते ।

व्याख्या - लोकानाम् = लोक्यते कर्मफलं भुज्यते येषु तेषाम्, शब्दतदर्थ-स्वरूपाणां त्रयाणां जगतां चतुर्दशभुवनानां वा विधातुः = अधिष्ठातुः तस्य= प्रणवस्य-एकपदात्मकश्रुतिरूपब्रह्मणः, अङ्गोपाङ्गनिबन्धनाः = अङ्गानि - 'विधि-मन्त्रा-र्थवादोपनिषदादीनि' उपाङ्गानि - 'मन्वादिस्मृतयः पुराणानि च' तन्निमित्तका विद्याभेदाः = चतुर्दशविद्याविशेषाः, ज्ञानसंस्कारहेतवः= यथाक्रमं ज्ञानस्य - वाग्बुद्धिशुद्धिपूर्वकब्रह्मात्मैक्यज्ञानरूपस्य सम्यग्ज्ञानस्य, संस्कारस्य - 'कायमलसंस्कारस्य पुण्यापूर्वजननद्वाराऽन्तःकरणसंस्कारात्मक-पुरुषसंस्कारस्य' च हेतवः प्रतायन्तें = प्रकर्षेण विस्तृतिं गच्छन्ति ।

सूर्यमाया

सबका उपादानकारण होने से प्रणव को सकललोकस्वरूप तथा विद्यास्वरूप बताते हुए एक प्रणव से उद्गत विद्याओं के भेद का कारण बताते हैं - 'विधातुः' इत्यादि ।

अर्थ : - 'भू' आदि सभी लोकों का उपादानकारण - उस प्रणवब्रह्मरूप वेद के अङ्ग और उपाङ्गरूप निमित्त के भेद से तथा ज्ञान और संस्कार रूप फल के भेद से विद्याओं के भेद हुए हैं ।

चात्र- "स हि शब्दार्थप्रकृति" रिति श्रुतिः, प्रकृतिपदेनात्र विवर्तोपादानकारणं गृह्यते, इति पूर्वमेव प्रपञ्चितम्, तस्य =

विमर्श : - शब्दार्थशरीरजगद्विवर्तोपादानस्य - सर्वप्रकृतेः प्रणवरूपशब्दब्रह्मणो वेदस्याङ्गेभ्यो मन्त्रब्राह्मणेभ्यो विधिनिषेधार्थवादवाक्येभ्यो व्याकरणादयः षडङ्गानि वाग्बुद्धिसंस्कारद्वारकसम्यग्ज्ञानस्य हेतवः प्रभवन्ति । तदाह -

छन्दः पादौ तु विज्ञेयौ हस्तौ कल्पोऽथ पठ्यते ।
ज्योतिषामयनं चक्षु निरुक्तं श्रोत्रमुच्यते ।।
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् ।
तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते ।।

'ब्रह्मलोके महीयते' इत्युक्त्या सम्यग्ज्ञानहेतुत्वमङ्गानामुक्तम् । वेदस्योपाङ्गेभ्यस्तर्कात्मकमन्वादिस्मृतिभ्यः, इतिवृत्ताख्यानेभ्यः पुराणेभ्यश्च - चिकित्साशास्त्राण्यायुर्वेदादयः, धर्मविचारशास्त्राणि मीमांसादयः, पदार्थ-विचारशास्त्राणि न्यायवैशेषिकादयः, बुद्धिशुद्ध्युपायसांख्ययोगशास्त्राणि च कायसंस्कारहेतवः पुरुषसंस्कारहेतवश्च ते ते विद्याविशेषाः प्रतता इति फलितोऽर्थः ।

आशय : - चौदह लोक, तीनों भुवन तथा समस्तलोक की व्यवहारव्यवस्थाएँ स्वप्रकाशज्ञानस्वरूप - शब्दब्रह्म वेद का नाना नामरूपात्मक विवर्त है । एक प्रणव ब्रह्म से ही सकल लोक तथा उनकी व्यवहारप्रक्रियाएँ प्रवर्तित हैं । जैसा कि भगवान् मनु ने कहा है -

सर्वेषां स तु नामानि कर्माणि च पृथक् पृथक् ।
वेदशब्देभ्य एवादौ पृथक्संस्थाश्च निर्ममे ।।

सृष्टि के आरम्भ में वेद के मन्त्रात्मक शब्दों से ही सब के नाम और सभी ब्राह्मणादि वर्णों व ब्रह्मचर्य आदि आश्रमों के अनुरूप कर्मों की पृथक्-पृथक् व्यवस्थाएँ प्रणवरूप हिरण्यगर्भ - ब्रह्म ने की है ।

इससे स्पष्ट है कि - शब्दब्रह्म प्रणवरूप वेद ही शब्द और अर्थ स्वरूप सकलजगत् का उपादान कारण है - तथा सकल व्यवहार का व्यवस्थापक व विधाता है । अत एव वह सर्वात्मक है, किसी से भिन्न नहीं है । मनु ने कहा है-

प्रणवस्य अङ्गोपाङ्गनिबन्धनाः = अङ्गञ्चोपाङ्गञ्च ते निबन्धने= प्रयोजके येषां ते, विद्याभेदाः = व्याकरणादयः -

---

अयमत्र सारः - "मन्त्रब्राह्मणात्मको वेदः" इति निरुक्ते र्मन्त्रभागो ब्राह्मणभागश्चेत्यङ्गद्वयं वेदस्य प्रथितम् । तस्यान्तिमो भाग उपनिषद् । श्रुत्यर्थप्रकाशिन्यस्तर्कात्मिकाः स्मृतय उपाङ्गानि, मन्त्रब्राह्मणात्मकाङ्गसमीपवर्तित्वात् । तदुक्तम् -

"विधि र्विधेयस्तर्कश्च वेदः" इति ।

विधि र्विनियोजको ब्राह्मणभागः, विधेयो विनियोज्यो मन्त्रभागः, तर्को मीमांसा ।

प्रणवप्रमाणाः प्रणव श्रुतिमूलाः सर्वे विद्याभेदाः प्रणवरूपाः । प्रणव एव शब्दार्थमयस्य सकलस्य जगतः प्रकृतिः किमुत विद्याभेदानाम्, अतः प्रणवः सर्वरूपः, सर्वासां विद्यानां शब्दात्मकत्वात् प्रणवरूपत्वमसन्दिग्धम् । तदुक्तम् -

"सर्वा वाचो वेदमनुप्रविष्टाः" इति ।

"ओमित्येतदक्षरमिदं सर्वम्" इति च ।

प्रणवरूपाद्वैतं ब्रह्मैव सर्वार्थप्रकाशनशक्तिमत्वाद् 'विद्या' इत्युच्यते,

---

"सर्वज्ञानमयो हि सः" । जगत् में परिदृश्यमान नामभेद रूपभेद तथा ज्ञानभेद और ज्ञान हेतु विद्याभेद उसी का व्यावहारिक रूपान्तर है, वस्तुतः वह सबसे अभिन्न है । प्रणवरूप शब्दब्रह्म यद्यपि एक है, तथापि शब्दब्रह्म - वेद के अङ्गों व उपाङ्गों के भेद से तथा ज्ञान और संस्कार रूप फल के भेद से विद्याओं का भेद प्रवर्तित हुआ है । जैसे एक ही हिमालय के स्थान भेद से उद्भूत - गङ्गा, यमुना, नर्मदा, गोदावरी, कावेरी आदि नदियों का भेद है तथा स्नान में पुण्यफल का भेद है, वैसे ही एक ही वेद के अङ्ग, उपाङ्गों के भेद से विद्याओं का भेद है तथा फल का भेद है । वस्तुतः जैसे सभी नदियों का एकायन साक्षात् अथवा परम्परया समुद्र है, वैसे साक्षात् अथवा परम्परया सभी विद्याओं का पर्यन्ततः फल सम्यग्ज्ञान ही है, जो कि अन्तःकरण की शुद्धि से होता है ।

यहाँ ज्ञातव्य है कि - कुछ विद्याएँ ज्ञान और संस्कार दोनों के हेतु हैं, तो कुछ विद्याएँ केवल ज्ञान के हेतु हैं, और कुछ केवल संस्कार के हेतु हैं । जैसा

चिकित्सादयश्च, ब्रह्मणः - अङ्गेभ्यो व्याकरणादयः, उपाङ्गेभ्यश्चिकित्सादय इति फलितम् । ज्ञानसंस्कारहेतवः =

सैव सकलजगत्प्रकृतिः । तदाह - "स हि शब्दार्थप्रकृतिः" इति । अत्र सर्वत्र ब्रह्मपदेन शब्दब्रह्म गृह्यते, इत्यवधेयम् । शब्दब्रह्म च - 'वेदः' । तस्यैव व्याकृतिः - सर्वा विद्याः । अद्वैतब्रह्मविद्याया एव विवर्ताश्चतुर्दश विद्याः । तत एव विद्यायाश्चतुर्दशत्वं स्मृतिषु प्रसंख्यायते । तदाह -

अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः ।
पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश ।। इति ।।
अपि च - षडङ्गमिश्रिता वेदा धर्मशास्त्रं पुराणकम् ।
मीमांसा तर्कमपि च, एता विद्याश्चतुर्दश ।। इति च ।

अत्र ज्ञानमेव पुरुषसंस्कारस्तस्य हेतवो विद्याभेदाः प्रभवन्ति इति केचन व्याचक्षते, तन्न हृद्यम्, 'विदन्त्यनया' इति करणसाधने "संज्ञायां समज-निषद-निपत-मन-विद" इत्यनेन क्यपा व्युत्पादितस्य 'विद्या' पदस्य

कि - व्याकरण - निरुक्त आदि वाणी संस्कार और सम्यक् ज्ञान, उभय के हेतु हैं, सांख्ययोग प्रभृति बुद्धि संस्कार तथा सम्यक् ज्ञान - 'विवेकख्याति' उभय के हेतु हैं, वेदान्त साक्षात् सम्यक्ज्ञान अर्थात् आत्मा के यथार्थ ज्ञान का हेतु है, धर्मशास्त्र - कर्मकाण्ड प्रभृति विधि - निषेध वचन से इष्ट हेतु याग व चान्द्रायण व्रतादि के विधान से शरीर और अन्तःकरण के संस्कार से पुण्य का हेतु है, किन्तु अष्टाङ्ग चिकित्साशास्त्र - आयुर्वेद तो केवल शरीर संस्कार का हेतु है ।

शिल्पशास्त्र - शरीर और बुद्धि से बाह्य केवल भौतिक - कलाओं के ज्ञान का हेतु है, शरीर अथवा बुद्धि के संस्कार द्वारा आत्मज्ञान का हेतु नहीं है । यह ज्ञान विज्ञानरूप है, सम्यक् ज्ञान नहीं ।

कहना न होगा कि सभी विद्याएँ सामान्यतः किसी न किसी ज्ञान का हेतु हैं - किन्तु सभी सम्यक् ज्ञान का हेतु नहीं है, सम्यक् ज्ञान वही है जिससे आत्मा का साक्षात्कार हो ।

लौकिक दृष्टि से विज्ञान के हेतु - शिल्पशास्त्र को भी विद्या कहें तो बाधा नहीं, वस्तुतः आत्मज्ञान ही यथार्थ ज्ञान है, उसका साधन ही विद्या है, जिसका प्रयोजन परम पुरुषार्थ - 'मोक्ष' है । इस दृष्टि से शिल्पविज्ञान विद्या नहीं है,

ज्ञानपदेन सम्यग् ज्ञानं संस्कारपदेन पुरुषसंस्कारः, तयोर्हेतवः= कारणनि प्रतायन्ते = प्रभवन्तीति यावत्, एवञ्च सर्वेषां

योगबलादेव ज्ञानहेतुत्वलाभाद् विद्याया ज्ञानरूपसंस्कारहेतुत्वप्रतिपादनस्य फलविशेषाभावेनानर्थक्यप्रसङ्गात् ।

अतो 'ज्ञानं च संस्कारश्च तयोर्हेतव' इति द्वन्द्वगर्भ-षष्ठीतत्पुरुष एवात्र ज्यायान् । तथा सति विद्याभेदानां प्रयोजनपार्थक्यं निरुक्तं भवति । इह ज्ञानं तु न सर्वसाधारणम् किन्तु सम्यग्ज्ञानं - ब्रह्मात्मैक्यज्ञानम्, संस्कारश्च कायवाग्बुद्धीनाम् । तदुभयसंग्रहाय - 'ज्ञान-संस्कारे' त्युभयपदोपादानं सार्थकम् ।

किंच नहि सर्वे विद्याभेदा अविशेषेण ज्ञानरूपसंस्कारस्य हेतवः, लशुनपलाण्डुमद्यादिसेवनविधिपराणां चिकित्साशास्त्राणां वातपित्तकफादि-

---

विद्या तो आत्मज्ञान का हेतु - 'चार वेद, उसके छह अङ्ग, और पुराण, न्याय, मीमांसा, धर्मशास्त्र' ये चौदह हैं । कहा भी है - 'सा विद्या या विमुक्तये' ।

निष्कर्ष में सभी विद्याओं का उद्गमस्थल वेद है । सभी विद्याएँ प्रणवरूप वेद में समनुगत व अनुप्रविष्ट हैं । जैसा कि कहा है - "सर्वा वाचो वेदमनुप्रविष्टाः" । प्रणवरूप ब्रह्मविद्या सबका मूलाधार होने से सबका अविरोधी सर्वमान्य सत्य हैं । अन्तर इतना है कि अन्य विद्याएँ संस्कार के द्वारा परम्परया आत्मज्ञान के हेतु हैं, अद्वैत विद्या साक्षात् आत्मज्ञान का हेतु है । अत एव वह सर्वथा सत्य है, उपेय है, उपाय नहीं ।

यहाँ 'ज्ञानसंस्कारहेतवः' इसकी यह व्याख्या भी की जाती है कि - ज्ञान रूप संस्कार का हेतु विद्याभेद हैं । यहाँ यह विचारणीय है कि वेद के अङ्गों व उपाङ्गों के भेद से होने वाले विद्याभेदों का प्रयोजन भी विलक्षण होना उचित है, सर्वसामान्य नहीं । यह प्रयोजनभेद तभी स्पष्ट होगा, जबकि यहाँ ज्ञान और संस्कार पद का द्वन्द्व समास किया जाय, कर्मधारय नहीं ।

ज्ञान और संस्कार को पृथक् पृथक् प्रयोजन मानने पर तन्मूलक ही विद्याओं का भेद सर्वथा उचित प्रतीत होता है । यदि सबका समानरूप में - 'ज्ञान रूप संस्कार' यह एक प्रयोजन ही विवक्षित हो तो, वह संस्कार पद के कथन के

प्रणवप्रभवत्वात् प्रणवरूपत्वेन ऐक्यमेवेति भावः ॥ १० ॥

दोषनिवृत्त्या कायसंस्कारहेतुत्वेऽपि बुद्धिसंस्कारहेतुत्वाभावात्, तत्सेवनस्य तमोवर्धकत्वेन ज्ञानप्रतिबन्धकत्वाच्च ।

तस्मादिह - 'ज्ञानं च संस्कारश्च' इति द्वन्द्वपरिग्रहे एव विवक्षितार्थस्य लाभः । तथाहि-केचन विद्याविशेषा वेदान्ताः सम्यग्ज्ञानस्य हेतवः, केचन वाक्संस्कारस्य तद्द्वारा बुद्धिसंस्कारस्य सम्यग्ज्ञानस्य चोभयोर्हेतवः, यथा-व्याकरणानि, केचन विद्याविशेषाः - सांख्ययोगादयः देहेन्द्रियमनोबुद्धि-संस्कारद्वारा सम्यग्ज्ञानस्य 'विवेकख्याते' र्हेतवः, मीमांसाकर्मकाण्डप्रभृतयस्तु केचनान्तःकरणसंस्कार - पुण्यापूर्वद्वारा ज्ञानस्य हेतवः, आयुर्वेदादयस्तु केवलकायसंस्कारस्य हेतवो नात्मज्ञानस्य । तस्माद् 'ज्ञानसंस्कारहेतव' इत्यत्र 'ज्ञान-संस्कारो' भयपदोपादानस्वारस्याद् द्वन्द्वगर्भषष्ठीतत्पुरुषाश्रयणे एव सकलेप्सितार्थसिद्धिरिति सुधीभिरूहनीयम् ॥ १० ॥

विना ही केवल ज्ञान पद से ही कहा जा सकता है, क्योंकि शास्त्र का प्रयोजन जो ज्ञान है वह संस्कार रूप ही होगा, न कि पशु साधारण - आहार विहार अन्नपान का ज्ञान । ऐसी स्थिति में यहाँ संस्कार पद का कथन ही अनर्थक हो जायगा । इतना ही नहीं, यहाँ ज्ञान हेतु पद का कथन भी अनर्थक सिद्ध हो जायगा, क्योंकि विद्या पद की व्युत्पत्ति के सामर्थ्य से ही विद्याओं का ज्ञानहेतुत्व स्पष्ट है । अतः अङ्ग और उपाङ्ग आदि निमित्त के भेद से तथा ज्ञान और संस्कार रूप प्रयोजन के भेद से विद्याओं का भेद विवक्षित अर्थ होने से ज्ञान रूप संस्कार यह व्याख्या न करके 'ज्ञान और संस्कार' उभय प्रयोजन के लाभ के लिए द्वन्द्वसमासात्मक व्याख्या ही युक्त है ॥ १० ॥

आसन्नं ब्रह्मणस्तस्य तपसामुत्तमं तपः ।
प्रथमं छन्दसामङ्गं प्राहुर्व्याकरणं बुधाः ॥ ११ ॥

प्रत्येकार्थप्रकाशिका

तेषु विद्याभेदेषु व्याकरणं ब्रह्मणः प्रत्यासन्नमित्याह - 'आसन्नम्' इति । बुधाः = महर्षयः तस्य = वेदस्य ब्रह्मणः आसन्नम् = समीपम् - साधुत्वबोधनद्वारा स्वरूपसंस्कारकस्य

आनन्दा

उक्तेषु विद्याभेदेषु शब्दविग्रहस्य वेदस्य ब्रह्मणः साधुस्वरूपबोधकत्वाद् व्याकरणं सन्निहिततमं मुख्यतमं चाङ्गमित्याह - 'आसन्नम्' इति ।

अन्वयः - बुधाः तस्य ब्रह्मणः आसन्नम्, तपसाम् उत्तमम् तपः, छन्दसाम् प्रथमम् अङ्गम्, व्याकरणं प्राहुः ।

व्याख्या - बुधाः = वेदज्ञा ऋषयः तस्य = शब्दात्मकस्य ब्रह्मणः = वेदस्य आसन्नम् = पदवाक्यापोद्धारेण प्रकृतिप्रत्ययान्वाख्यानेन लिङ्गवचन-विपरिणामादेरूहादिना च साधुत्वबोधनद्वारा असन्दिग्धार्थशब्दस्वरूपबोधनेन साक्षादुपकारकत्वादत्यन्तं संनिहितम्, तपसाम् = अदृष्टफलानां प्रायश्चित्ताना-

---

सूर्यमाया

अन्य सभी विद्याओं में व्याकरण शब्दब्रह्म-वेद का निकटतम और प्रधान अङ्ग है, यह बताते हैं - 'आसन्नम्' ।

अर्थ : - वेदज्ञ ऋषियों ने व्याकरण को शब्दात्मक - वेदरूप उस ब्रह्म का निकटतम - साक्षात् उपकारक, एवं सभी तपों में श्रेष्ठतम तप कहा है, तथा अपौरुषेय वेदों का मुखरूप प्रधान अङ्ग कहा है ।

आशय : - वेद मन्त्ररूप शब्दात्मक ब्रह्म है । वाक्य से पदविभाग और पद से प्रकृति-प्रत्यय-विभाग के द्वारा वेद के साधु शब्दस्वरूप का बोधक तथा उसके असन्दिग्ध अर्थ का प्रकाशक होने से व्याकरण वेद का निकटतम अर्थात् साक्षात

व्याकरणस्य साक्षादुपकारकत्वादासत्तिर्बोध्या, तपसाम् = चान्द्रायणादीनां स्वाध्यायादीनां च मध्ये उत्तमम् = अधिकमिदम्-

---

मुपवासचान्द्रायणादीनां व्रतानाम् - पवित्रतमानां च ब्रह्मचर्याधःशयन-स्वाध्यायादीनां मध्ये, उत्तमम् = अनन्यसाधारणमुत्कृष्टतमं तपः = शुद्धिकरम्, पदपदार्थज्ञानरूपदृष्टफलत्वात् साधुशब्दज्ञानपूर्वकप्रयोगजन्यपुण्यादृष्ट-फलत्वाच्च केवलादृष्टफलेभ्य इतरतपोभ्य इदमधिकं श्रेष्ठम्, ''एकः शब्दः सम्यग् ज्ञातः सुष्ठु प्रयुक्तः स्वर्गे लोके च कामधुग् भवति'' इति स्मृतेः ।

छन्दसाम् = कर्तृपारतन्त्र्यशून्यानाम् अपौरुषेयाणां वेदानाम् प्रथमम् = मुख्यत्वेन प्रधानम् अङ्गम् = मुखम् व्याकरणम् = शब्दानुशासनं नाम शास्त्रं प्राहुः = निगदन्ति - 'मुखं व्याकरणं स्मृतम्'' इति ।

विमर्श : - ब्रह्मणो वेदस्य शब्दमयस्य साधुस्वरूपबोधकत्वेन शब्दशास्त्रं व्याकरणं शिक्षाद्यपेक्षया साक्षादुपकारकत्वादन्तरङ्गम्, शिक्षादीनि तु तस्य

उपकारक है । अत एव व्याकरण वेद का प्रधान अङ्ग है । कहा भी है - 'मुखं व्याकरणं स्मृतम्' ।

इसमें यह बीज है कि - वाक्यों में पदविभाग, पदों में प्रकृति और प्रत्यय के विभाग का निर्धारण तथा उदात्त आदि स्वरों के अनुसार - शब्दविशेष का किसी अर्थविशेष में साधुत्व का निर्णय एवं वेद के यथार्थ अर्थ का ज्ञान व्याकरण से ही होता है ।

इसके अतिरिक्त - यज्ञों में यथास्थल अङ्गभूत - द्रव्यों और देवताओं के अनुरूप मन्त्रविशेष का ऊहापोह किया जाता है, क्योंकि प्रधान - 'प्रकृति' याग के अङ्ग - 'विकृति' याग होते हैं, प्रकृति याग में जो मन्त्र विहित हैं, उनका ही विकृति याग में भी ऊह (तर्क) किया जाता है, विकृति याग में पृथक् मन्त्र नहीं होता है । विकृति याग तो तत्तद्देवता के उद्देश्य से विहित अङ्ग याग है, जो कि- 'प्रकृतिवद्विकृतिः कर्तव्या' इस अतिदेशवाक्य के अनुसार प्रकृतियाग के विधिक्रम से किया जाता है ।

तपः, अस्य दृष्टादृष्टोभयफलहेतुत्वात्, अत एव अक्षरसमाम्नायस्य ज्ञानमात्रेण सर्वपुण्यफलप्राप्तिबोधकस्मृतिः संगच्छते, छन्दसाम् = वेदानां प्रथमम् = प्रधानम् अङ्गं व्याकरणं प्राहुः =

स्वाध्यायानुष्ठानादिप्रकारबोधकत्वेन परम्परयोपकारकाणि बहिरङ्गाणि । किंच केवलादृष्टफलकेभ्यः स्वाध्यायाधःशयन-ब्रह्मचर्यादिभ्यश्चान्द्रायणव्रतोपवासादिभ्यश्च तपोभ्यो 'विविक्तसाधुशब्दस्वरूप-तदर्थ'यथार्थज्ञानरूपदृष्टफलकं पुण्यादृष्टफलकं च व्याकरणमुभयफलकत्वेनाधिकफलं श्रेष्ठतमं तपो दुरितापहम् । ज्ञानपूर्वकसाधुशब्दप्रयोगस्येहामुत्र फलवत्त्वोक्तेः । अत एव शब्दतत्त्वज्ञा वेदानां प्रधानमङ्गं मुखं व्याकरणं प्राहुः, चतुर्दशसूत्रीव्याकरणस्याक्षरसमाम्नायस्य वेदरूपत्वात् ।

याग द्विविध है - प्रकृति और विकृति । जिसमें सम्पूर्ण अङ्ग विहित हैं - वह प्रकृति याग होता है । उसका अङ्गभूत - अवान्तर याग - विकृति याग है, जिसमें सम्पूर्ण अङ्ग विहित नहीं होते हैं । जो अङ्ग नहीं कहा हो, वह प्रकृति याग से ऊह करके पूरा किया जाता है ।

प्रकृति याग में विकृति याग के अङ्ग-द्रव्य और देवता के अनुकूल यथावत् मन्त्र का उपदेश नहीं होता । प्रकृति याग के मन्त्र में विकृति याग के अनुरूप-लिङ्ग विभक्ति और वचन नहीं होते, अतः उनका परिवर्तन करके विकृति याग के अङ्ग - द्रव्य और देवता के अनुरूप - 'लिङ्ग विभक्ति और वचन' का ऊह करके मन्त्र की कल्पना की जाती है, जो कि व्याकरण के ज्ञान से ही सम्भव है । इस प्रकार यथास्थल यज्ञों में प्रयोग योग्य मन्त्रों के यथावत् स्वरूप का दिशादर्शक होने से व्याकरण वेद का अभिन्नतम प्रधान अङ्ग है ।

इसके साथ ही व्याकरण की यह विशेषता है कि - कायिक वाचिक मानसिक सभी दुरितमलों का विनाशक - ब्रह्मचर्य स्वाध्याय चान्द्रायणव्रत आदि सभी तपों में व्याकरण श्रेष्ठ तप है, क्योंकि चान्द्रायण आदि तप केवल अदृष्ट 'पुण्य' फल के साधक हैं, व्याकरण तो दृष्ट-अदृष्ट, प्रत्यक्ष-अप्रत्यक्ष अर्थात् ऐहिक - आमुष्मिक उभयविध फलों का साधक है । कहा भी है - "एकः शब्दः

कथयन्ति । अत एव महाभाष्ये - 'प्रधानञ्च षडङ्गेषु व्याकरणम्, प्रधाने च कृतो यत्नः फलवान् भवति' इति प्रतिपादितम् ॥ ११ ॥

स्मर्यते च - "इदमक्षरच्छन्दो वर्णशः समनुक्रान्तं पुष्पितः फलितश्चन्द्रतारकवत् प्रतिमण्डितो ब्रह्मराशिः" इति । अत एवाक्षर-समाम्नायस्य ज्ञानमात्रेण सर्ववेदपुण्यफलावाप्तिः । अत एवाह भगवान् भाष्यकारः -

'प्रधानं च षडङ्गेषु व्याकरणम्" इति ॥ ११ ॥

सम्यग् ज्ञातः सुप्रयुक्तः स्वर्गे लोके च कामधुग् भवति" । साधुशब्द का भली भाँति ज्ञानपूर्वक प्रयोग प्रत्यक्ष इस लोक में तथा परोक्ष स्वर्ग लोक में यथेष्टफलदायक होता है । साधुशब्द का सम्यग्ज्ञान व प्रयोग व्याकरण के ज्ञान से ही सम्भव है ।

शिक्षा - कल्प आदि वेदाङ्ग वेद के स्वाध्याय का प्रकार व मन्त्रों का कर्म में विनियोग विधि का बोधक हैं, अतः वे वेद का परम्परया उपकारक हैं, साक्षात् नहीं । व्याकरण तो वाणी के संस्कार द्वारा वेद के साधु शब्द और अर्थ-स्वरूप का प्रकाशक होने से साक्षात् उपकारक है । अत एव शिक्षा आदि षडङ्गों में व्याकरण प्रधान है । भगवान् भाष्यकार ने कहा भी है - "प्रधानं च षडङ्गेषु व्याकरणम्" । व्याकरण वेद का मुख जो ठहरा ॥ ११ ॥

प्राप्तरूपविभागाया यो वाचः परमो रसः ।
यत्तत्पुण्यतमं ज्योतिस्तस्य मार्गोऽयमाञ्जसः ॥ १२ ॥

प्रत्येकार्थप्रकाशिका

ननु कया युक्त्या प्राधान्यमित्यत आह - 'प्राप्तरूपे' ति । प्राप्तरूपविभागायाः = प्राप्ताः रूपविभागाः - वर्णरूपविभागः, पदरूपविभागः, वाक्यरूपविभागश्च यस्यास्तस्या

आनन्दा

व्याकरणस्य प्राधान्ये बीजमाह - 'प्राप्तरूपविभागाया' इति ।

अन्वयः - प्राप्तरूपविभागायाः वाचः यः परमः रसः यत् ज्योतिः - तत् पुण्यतमम्, तस्य अयं मार्ग आञ्जसः ।

व्याख्या - क्रमशून्यादखण्डाद् ज्ञानरूपात् शब्दब्रह्मणः सक्रमाया वाचो घटपटादिनानार्थस्य च विवर्तरूपा सृष्टिरिति प्रतिपादितं प्राक् ।

तथा च - अक्रमा या परा वाक् ततः प्राप्तरूपविभागायाः = कालशक्त्या लब्धवर्णपदादिक्रमरूपभेदायाः साध्वसाधु-संस्कृतासंस्कृतसाधारणाया द्विविधरूपाया वाचो यः = साधुशब्दसमूहः परमो रसः = बोधकत्वाविशेषेऽपि मोक्षहेतुपुण्यजनकत्वेन विशिष्टः = उत्तमः सारः, अत एव यत् = साधुशब्दस्वरूपम् ज्योतिः - यथार्थपदार्थप्रकाशरूपम् तत् पुण्यतमम् =

सूर्यमाया

साधुशब्द के ज्ञान का सरलतम मार्ग होने से व्याकरण की प्रधानता स्पष्ट करते हैं - 'प्राप्तरूपविभागायाः' ।

अर्थ : - वर्ण-पद-' और वाक्य के रूप में क्रमविभाग को प्राप्त - 'साधु असाधु' उभयसाधारण - 'सक्रम' शब्दसमुदाय का सार होने से जो साधुशब्दराशि उत्तम रस रूप है तथा 'स्व-पर' सबका प्रकाशक होने से स्वयं ज्योति स्वरूप है, और पुण्य का जनक एवं स्वयं भी अतिशय पुण्यरूप है, उस साधुशब्दसमुदाय का यह व्याकरण स्वाभाविक व सरलतम ज्ञानमार्ग है ।

वाचः = गिरः यः परमो रसः = गोत्वविशिष्टव्यक्तिनिष्ठकर्मत्व-बोधने 'गाम्' इति शब्दः अभ्युदयहेतुः – एवंरीत्या नियमित-साधुभावः शब्दसमुदायः, एतेन भाषाया अर्थबोधनियतत्वेऽपि पुण्यहेतुत्वाभावाद् व्यावृत्तिः, यत् ज्योतिः = शब्दः, अग्निर्यथा

स्वतः सर्वोत्तमपुण्यरूपं सत् पुण्यजनकं च, तस्य = साधुशब्दसमूहस्य अयं मार्गः = व्याकरणं ज्ञानोपाय आञ्जसः = सरलः । प्रतिपदपाठेन साधुशब्दसमुदायज्ञानं तु वर्षसहस्रेणापि दुष्करमिति स वक्रो मार्गः । साधु-शब्दज्ञानस्य सामान्यविशेषलक्षणात्मकं व्याकरणं लघुरुपायः प्रतिपद-पाठोऽतिगुरुः । तदाह महाभाष्ये – 'बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं शब्दपारायणं प्रोवाच नान्तं जगाम' इति, 'लघ्वर्थं च व्याकरणम्' इति च । एतावता व्याकरणस्य प्राधान्यं सिद्धम् ।

विमर्शः – अक्रममखण्डं शब्दतत्त्वं ब्रह्म कालशक्त्या विवक्षावशात् वर्ण-पद-वाक्यरूपेण क्रमविभागं लभते । लब्धक्रमविभागः स हि शब्दराशिः साध्वसाधूभयसमुदायः । अर्थबोधकत्वं साधावसाधौ च तुल्यं वर्तते, किन्तु पुण्यजनकत्वं साधावेव वर्तते नासाधौ । तदाह भूषणे – ''बोधकत्वाविशेषेऽपि नियमः पुण्यपापयोः'' इति । साधुशब्दराशेर्ज्ञानपूर्वकप्रयोगेण पुण्यं भवति,

---

आशय : – वस्तुतः ज्ञानरूप आन्तर शब्दतत्त्व स्वतः वर्णरूप – पदरूप – वाक्यरूप विभागों से रहित है, किन्तु वह विवक्षाप्रयत्नों तथा स्थानों के भेद से उत्पन्न व्यञ्जक ध्वनि के धर्म – 'वर्णविभाग – पद विभाग तथा वाक्य विभाग' को प्राप्त कर लेता है ।

यद्यपि व्याकरण सिद्धान्त में हृदय देश में स्थित मध्यमानादरूप – स्फोट ही अर्थ का वाचक माना गया है जो कि क्रम रूप विभागों से रहित अखण्ड है, तथापि लोक में श्रोत्रग्राह्य – ध्वनिरूप वैखरी वाक् अर्थ का बोधक शब्द माना गया है । जैसा कि महाभाष्य में परमत के रूप में कहा है – ''प्रतीतपदार्थको लोके ध्वनिः शब्दः''। वस्तुतः वर्ण-पद-वाक्यरूपविभाग तो बाह्य वैखरी वाक् का ही है, आन्तर स्फोट रूप शब्द का नहीं । स्फोट तो अक्रम अखण्ड है । उसका अभिव्यञ्जक ध्वनिरूप वैखरी वाक् है । वर्ण-पद आदि रूप विभाग

स्वप्रकाशेन घटपटादिं बोधयति, तथैव शब्दोऽपि अर्थप्रकाशकः, अतो ज्योतिरित्युक्तम् तत् । पुण्यतमम् = प्रयोक्तुः पुण्यजनकत्वात् पुण्यतममिदम्, स्वयं पवित्रमेवान्यं पवित्रयति यथा गङ्गाजलम्,

---

तच्च पुण्यं मोक्षहेतुः । अत एव साधुशब्दराशिः सक्रमस्य साध्वसाधु-संस्कृतासंस्कृतोभयविधशब्दसमुदायस्य मध्ये पुण्यजनकत्वात् मोक्षहेतुत्वाच्च सारतमः परमो रसः । असाधुर्भाषाशब्दस्तु परमपुरुषार्थमोक्षहेतु-पुण्यजनकत्वाभावान्न रसः, यथा निष्पीडितेक्षुदण्डः । निष्पीडितेक्षुदण्डो निःसारो = गृहबन्धनेन्धनादिकार्यसाधकत्वेऽपि पिपासाशान्तितृप्तिजनकत्वा-भावान्न रसः, किन्तु वल्कल एव सः, तथाऽसंस्कृतोऽसाधुर्भाषाशब्दसमूहो न सारभूतो रसः, किन्तु वल्कलवन्निःसार एव सः । तदाह - ''ऋजीषमेतद्वाचो यः संस्कारहीनः शब्दः'' इति । ऋजीषम् = निष्पीडितेक्षुदण्डवल्कलः ।

व्यवस्थितसाधुभावः शब्दसमुदायस्तु लोकेऽर्थबोधजनकः सन्नभ्युदय-जनकोऽपि भवतीति स लब्धक्रमसंनिवेशाया वाचः समुदायस्य मध्ये सारतमः - परमतृप्तिप्रदो रसः । अत एव स साधुशब्दराशिः स्वयं ज्योतिः= स्वयं प्रकाशते अन्यांश्च प्रकाशयति । तच्च ज्योतिः पुण्यतमम् = स्वयं

वैखरी का है । वह रूपविभाग व्यङ्ग्य-स्फोटाख्य शब्दतत्त्व में आरोपित होता है, जैसे कि जपाकुसुम का लौहित्य स्फटिक-दर्पण आदि में आरोपित होता है । अर्थात् शब्दतत्त्व रूपविभाग के आरोप का अधिष्ठान होकर रूपविभाग का उपादान कारण होता है । फलतः वर्ण-पद-विभागवाली वैखरी वाक् आन्तर शब्दतत्त्व का विवर्तरूप है ।

रूपविभागवाली वह वैखरी वाक् - साधु-असाधु, संस्कृत असंस्कृत, उभय-साधारण है । उनमें साधुशब्द ही सारभूत 'रस' रूप है । जैसे पेरे गये इक्षु का रस पिपासाताप की शान्ति व तृप्ति का जनक होता है । उसका नीरस छिलका भाग तो इन्धन के काम में आने पर भी आस्वादयोग्य न होने से हेय है, वैसे ही 'अर्थबोध और मोक्षहेतुपुण्य' उभयफल का साधक होने से साधुशब्द ही हिततम रसरूप है, इससे भिन्न असाधु - 'अपभ्रंशरूप' भाषाशब्द अर्थबोध्र के योग्य होने पर भी मोक्षहेतु - 'पुण्य' का जनक न होने से हेय है । कहा है - ''नापभाषितवै

तस्य = साधुशब्दसमुदायस्य - किञ्चित्सामान्यलक्षणम् - ''आद् गुण'' इति, किञ्चिच्च विशेषलक्षणं ''वृद्धिरेचि'' इति, एवंस्वरूपक-व्याकरणरूपः मार्गः = उपायः आञ्जसः = स्वाभाविकः, ऋजुरिति यावत् ।

अयं भावः - पौर्वापर्यक्रमहीनमेकमेवाखण्डरूपं शब्दतत्त्वं ब्रह्म । एतस्य् साधुत्वबोधनं व्याकरणेन न सम्भवति, किन्तु एतस्माद् यदा वर्णपदवाक्यात्मक - नानाशब्दानां घट-

---

विशुद्धं पवित्रं सदन्यांश्च पवित्रयति यथाऽग्निः । तथाहि - त्रीणि ज्योतींषि-त्रयः प्रकाशा लोके, योऽयमादित्योऽग्निर्वा स बाह्यः प्रकाशः, पुरुषेष्वान्तरो ज्ञानरूपः प्रकाशः । योऽयं शब्दाख्यः प्रकाशः स बाह्य आन्तरश्च सर्वस्य प्रकाशकः, सर्वो हि स्थावरजङ्गमात्मको लोकः शब्दे प्रकाशे वाच्यार्थरूपेण निबद्धः । तदाह बृहदारण्यके- ''वाचैवायं ज्योतिषा स्ते'' इति । प्राप्तरूपविभागायाः सक्रमाया वाचो यः परमो रसः साधुशब्दसमुदाय-स्तस्यायं विवेकेन ज्ञानोपायो व्याकरणम् । प्राप्तक्रमरूपविभागा सा हि वाक् साध्वसाधुशब्दसंकीर्णा, तत्र असाधुशब्देभ्यो विविच्य साधुशब्दा व्याक्रियन्ते = व्युत्पाद्यन्ते अनेन तद् व्याकरणम्, इति करणसाधनबलात् स्पष्टमिदं यद् व्याकरणं साधुशब्द-विवेकज्ञानस्य साधनम् । तदाह - 'तस्य मार्गोऽयमाञ्जसः' इति ।

अत्र - 'प्राप्ता रूपविभागा यस्यास्तस्या' इति षष्ठ्यर्थे तद्गुणसंविज्ञानबहुव्रीहिर्बोध्यः ।

न म्लेच्छितवै'' । अपभाषा का प्रयोग नहीं करना चाहिए, क्योंकि वह असंस्कृत होने से म्लेछरूप है । साधु शब्द संस्कृत होने से पुण्य का जनक गङ्गाजल के समान स्वयं भी पवित्रतम - पुण्य स्वरूप है । साथ ही इष्ट अर्थ का प्रकाशक होने से वह प्रदीप के समान 'स्व-पर' सबका प्रकाशक स्वयं ज्योतिस्वरूप है ।

त्रिविध ज्योति हैं । आदित्य - अग्नि आदि बाह्य ज्योति है, ज्ञान आन्तर ज्योति है, शब्द आन्तर और बाह्य ज्योति है । उस साधुशब्द की प्रतिपत्ति व

पटादिनानार्थानाञ्च सृष्टिर्भवति, तदा भाषादीनामपि शब्दत्वेन लोके अर्थबोधकत्वेऽपि वेदे संस्कृतस्यैव प्रयोगात् संस्कृतशब्दानां व्याकरणेन - 'घटकर्मकानयनबोधने - घटमानयेति शब्दः साधुरिति रीत्या' साधुत्वबोधनाद् वेदस्य साक्षात् स्वरूपबोधकं व्याकरणम् - व्याकरणेन वेदस्वरूपज्ञानम्, ततश्च तन्मूलभूतप्रणवस्वरूपज्ञानम्, ततश्च ब्रह्मज्ञानमपि जातमेव - 'ओमित्येकाक्षरं ब्रह्मे' ति गीताप्रामाण्यात् तयोस्तादात्म्यात्, ततश्च मोक्षः सिद्ध इति दिक् ॥ १२ ॥

यत्तु - 'प्राप्तः रूपविभागः यया सा, तस्याः सक्रमाया वाचः' इति केषांचिद् व्याख्यानम्, तच्चिन्त्यम् । 'प्राप्त' इत्यत्र कर्मणि क्तप्रत्यये 'यया' इति कर्तरि तृतीया बोध्या । तथा च - रूपविभागकर्मकप्राप्तिकर्त्री वागिति तदर्थः । रूपविभागकर्मकप्राप्तिकर्त्री सा च वाक् अक्रमा भवितुमर्हति न तु सक्रमा । तस्मात् 'सक्रमाया' इत्यर्थलाभाय षष्ठ्यर्थबहुव्रीहिरेव शरणम् ।

अथ 'प्राप्ता रूपविभागा यस्याः (यतः), इति पञ्चम्यर्थे - अतद्गुणसंविज्ञानबहुव्रीहिराश्रीयते, तदा संहृतक्रमायाः सूक्ष्माया वाच इति तदर्थः । सूक्ष्मा वागेव वर्णपदादिक्रमरूपविभागं भजते ।

सा हि साध्वसाधुशब्दानां तत्तदर्थानां च विवर्तोपादानम् । अत्र कल्पे सूक्ष्माया वाचः परमो रसः साधुशब्दसमुदायः इत्यर्थो ज्ञेयः ॥ १२ ॥

ज्ञान का नैसर्गिक तथा सरलतम एक मात्र मार्ग यह व्याकरण है, प्रतिपदपाठ आदि नहीं । प्रतिपदपाठ से साधुशब्दराशि का ज्ञान सहस्रों वर्षों में भी सम्भव नहीं है । हो भी तो वह गुरु उपाय है, व्याकरण लघु उपाय है । सामान्य और विशेष लक्षण से सकल साधु शब्द का ज्ञान लघु रूप में हो जाता है । इससे विद्याओं में व्याकरण की प्रधानता व मुख्यता स्पष्ट सिद्ध है ॥ १२ ॥

अर्थप्रवृत्तितत्त्वानां शब्दा एव निबन्धनम् ।
तत्त्वावबोधः शब्दानां नास्ति व्यकरणादृते ॥ १३ ॥

प्रत्येकार्थप्रकाशिका

एतदेव प्रपञ्चयति द्वाविंशति - (२२) श्लोकपर्यन्तम् - 'अर्थे'ति । अर्थानाम् = घटपटादिव्यक्तीनां प्रवृत्तयः = व्यवहार-विषयताः तासां तत्त्वानि- तेषां निबन्धनम् = ज्ञापकम् शब्दा एव । निबन्धनेति - विशेषणे एकवचनम् उद्देश्यताऽवच्छेदक-'शब्दत्व'व्यापकतया विधेयान्वयबोधनाय विशेष्यगत -

---

आनन्दा

सकललोकव्यवहारस्य शब्दतन्त्रतया शब्दस्य प्राधान्यम्, तस्य च साधुस्वरूपबोधकतया शब्दशास्त्रस्य प्राधान्यं यदुपपादितम्, तदेवेत आरभ्य 'यदेकं प्रक्रियाभेदै' रिति (२२) कारिकापर्यन्तं साधकयुक्तिभिर्द्रढयति- 'अर्थप्रवृत्ति' इति ।

अन्वय : - अर्थप्रवृत्तितत्त्वानाम् निबन्धनम् शब्दा एव, शब्दानाम् तत्त्वावबोधः व्याकरणाद् ऋते नास्ति ।

व्याख्या - अर्थप्रवृत्तितत्त्वानाम् = अर्थानां गवादिव्यक्तीनां याः प्रवृत्तयः- आनयन - बन्धनादि 'प्रवृत्ति - निवृत्तिलक्षण' व्यवहारस्य विषयता - स्तासां निमित्तभूतानि तत्त्वानि गोत्वाश्वत्व - महिषीत्वादिसामान्यानि, तन्निमित्तकं च यद् गवादिव्यक्तीनाम् - 'गौः - अश्व' इत्याद्याकारकं

सूर्यमाया

समस्त लोक व्यवहार का प्रवर्तक होने से शब्द का प्राधान्य तथा शब्दों के साधुस्वरूप का बोधक होने से व्याकरणशास्त्र का प्राधान्य उपपादक युक्तियों द्वारा पुष्ट करते हैं - "अर्थप्रवृत्ति" ।

अर्थ : - वस्तुओं के व्यवहार का आधारभूत जो मूल तत्त्व है, उनके ज्ञान का शब्द ही योग्य कारण है । ऐसे महत्वपूर्ण शब्दों के यथार्थ स्वरूप का सम्यक् ज्ञान व्याकरण को छोड़ अन्य किसी उपाय से नहीं होता, केवल व्याकरण से ही होता है ।

बहुत्वसंख्याया विशेषणेनाऽविवक्षया 'वेदाः प्रमाण' मितिवत् जातिगतैकत्वमादाय बोध्यम् ।

तत्त्वपदेनात्र विवक्षाया ग्रहणमिति केचित्, विवक्षावशादेव हि लोकाः तत्तदर्थबोधनयोग्यं तत्तच् शब्दं प्रयुञ्जते । यथा - रूपग्रहणयोग्येन चक्षुरिन्द्रियेणैव रूपोपलब्धिः, न तु श्रवणेन,

---

ज्ञानरूपमनुगतव्यवहारस्वरूपं तत्तदर्थविवक्षया च 'गौः - अश्वः' इत्यादिशब्द-प्रयोगरूपव्यवहारस्वरूपम्, यच्च गवाश्वादेरर्थस्य जन्मादिक्रियाया आख्यातपदवाच्यतया कारकाकाङ्क्षत्वरूपं साध्यत्वस्वरूपं तत्त्वम्, तेषां सर्वेषां बोधकतया तत्तदर्थाभिधानसमर्थाः शब्दा एव निबन्धनम् = निमित्तम् । तथा च सर्वं व्यवहारस्वरूपं शब्दाधीनमित्यायातं शब्दस्य प्राधान्यम् ।

शब्दानाम् = तत्तदर्थप्रतिनियतसाधुभावानां शब्दराशीनाम् तत्त्वावबोधः= तत्त्वस्य पुण्यजननसमर्थस्य साधुत्वस्य - अवबोधः = सम्यग्ज्ञानम् व्याकरणाद्=अनुगतरूपाद् अव्यभिचरितात् सामान्यविशेषलक्षणाद् ऋते = विना नास्ति = गुरुभूताद् दुःसाध्यात् प्रतिपदपाठाद् न सम्भवति । इत्थं च शब्दशास्त्रस्य - व्याकरणस्यापि प्राधान्यमिति निर्गलितोऽर्थः ।

विमर्शः - गवादयो घटादयश्चार्थाः प्रतिव्यक्ति यदि भिन्ना भिन्नास्तर्हि तेषां प्रतिव्यक्ति भिन्नमेवाभिधानं - भिन्नमेव च ज्ञानं भवितुमर्हति, नाभिन्नम् । दृश्यते तु भिन्नानामपि 'गवादि-घटादि' व्यक्तीनाम् - 'गौर्गौः' 'घटः -घट' इत्यभिन्नमभिधानम् - अभिन्नं च ज्ञानम् । एवं च 'गौर्गौ'

आशय : - वाचक शब्द का ज्ञान रहने पर ही किसी वस्तु विशेष का ज्ञान तथा प्रवृत्ति - निवृत्ति रूप व्यवहार हो पाता है, अन्यथा नहीं । सामने पड़ा - प्रत्यक्ष दृश्यमान भी वनस्पति आदि वस्तु विशेष तब तक अज्ञात ही रहता है, जब तक कि उसका वाचक- 'नाम विशेष' न जान लिया जाय, फलतः उसका तब तक लेन देन आदि व्यवहार भी नहीं होता है ।

वस्तु का नाम न जानने वाले व्यक्ति को उस वस्तु के विषय में पूछा जाय कि यह क्या है, तो उसको देखता हुआ भी वह कहता है कि मैं इस वस्तु को नहीं जानता । वहीं जब उसको यह कह दिया जाय कि इस वनस्पति का नाम

प्रयोगश्च शब्दाधीनः, अतः शब्दमन्तरा विवक्षाया असम्भवाद विवक्षानिबन्धनम् - शब्दाः ।

अपरे - तत्त्वपदेन घटत्व-पटत्वादि-सामान्यङ्गृह्यते, तेषां निबन्धनं बोधकः शब्द इत्याहुः । परे तु - प्रवृत्तिपदेन आख्यातार्थजन्मादिक्रिया बोध्यते, तस्यास्तत्त्वं साध्यत्वं

रित्येकाकारस्य अनुवृत्तव्यावृत्तज्ञानरूपस्य तथाविधाभिन्नशब्दप्रयोगरूपस्य च व्यवहारस्य किमप्येकं निमित्तमेषणीयम् । तद्धि जात्यपरपर्यायं सामान्यं तत्त्वम् । तदाह सरूपसूत्रे महाभाष्ये - 'भिन्नेष्वभिन्नाभिधानप्रत्ययनिमित्तं जाति'रिति । चरकेऽप्याह पतञ्जलिः -• 'सामान्यमेकत्वकरं विशेषस्तु पृथक्त्वकृत्' इति ।

सत्यपि व्यक्तिभेदे यदनेकासु व्यक्तिषु 'अयं गौः, अयं गौः' इत्येवमाद्येकाकारबोधोऽभिन्नशब्दप्रयोगश्च विना सामान्यमभ्रान्तो नैव भवितुमर्हति, इति तदालम्बनं किमप्येकं सामान्यं तत्त्वमेष्टव्यं भवति । महिष्यादिव्यावृत्तस्य सकलगोव्यक्तिष्वनुवृत्तस्य प्रत्ययस्य निमित्तं यत्तत्

'पुनर्नवा' है, इसका नाम 'लक्ष्मणा' है, तब उसका चिकित्सा के लिए लेन देन प्रवृत्तिनिवृत्ति रूप व्यवहार वह करने लगता है । इससे यह सिद्ध होता है कि वस्तु के स्वरूपज्ञान का तथा उसके व्यवहार का अपरिहार्य कारण शब्द ही हैं, वाचक शब्द का ज्ञान रहने पर ही - यह गो है, यह अश्व है, यह घट है, यह पट है, इत्यादि वस्तुस्वरूप का विवेकज्ञानरूप व्यवहार तथा उसके बोध के लिए शब्द-प्रयोग रूप व्यवहार होते हैं । वाचक शब्द के ज्ञान के अधीन ही प्रयोजक वृद्ध का 'गामानय - गां बधान, अश्वमानय - अश्वं बधान' इत्यादि वाक्यप्रयोगरूप व्यवहार तथा प्रयोज्यवृद्ध का आनयन - बन्धन आदि प्रवृत्ति - निवृत्तिरूप व्यवहार होता है । अतः सकल व्यवहार शब्दाधीन होने से शब्द का प्राधान्य स्पष्ट है ।

यहाँ - अर्थप्रवृत्तितत्त्व का एक अर्थ है - 'प्रवृत्तिनिमित्त' । वह है 'घटत्व-पटत्व-गोत्व-अश्वत्व' आदि सामान्य धर्म । यह सामान्य धर्म ही - 'घट पट गो अश्व' आदि व्यक्ति के व्यवहार का निमित्त है । जहाँ घटत्व है उसका 'घट' व्यवहार होता है, जहाँ गोत्व है उसका 'गो' व्यवहार होता है । अर्थात् घट पट

साधनाकाङ्क्षरूपम् । सर्वत्र हि प्रथमं नाम बुद्धौ कृत्वैवार्थं साधयति, यथा कुम्भकारः पूर्वं बुद्धौ घटं वा शरावं वा करिष्यामीति विनिश्चित्यैव तदनुसारेण घटं शरावञ्च रचयति, इत्यतः साध्यत्वनिबन्धनं शब्दा इति कथयन्ति ।

जातिरित्युच्यते । इत्थं च भिन्नासु गवादिव्यक्तिष्वभिन्नस्य अनुवृत्तव्यावृत्त-प्रत्ययरूपस्य शब्दप्रयोगरूपस्य च व्यवहारस्य निमित्तं यत् सामान्यरूपं तत्त्वम् - तस्य वाचकतया योग्याः शब्दा एव बोधनिबन्धनम् ।

किं च अर्थानां प्रवृत्तेः = व्यवहारस्य यत् तत्त्वम् = विवक्षा, तस्या निबन्धनं शब्दाः । यथा रूपादिग्रहणेच्छया जना रूपग्रहणे योग्यं चक्षुरादिकमिन्द्रियं युञ्जते नायोग्यमिन्द्रियम्, तथा तत्तदर्थविवक्षया तत्तदर्थबोधनयोग्यशब्दप्रयोगरूपं व्यवहारं कुर्वन्ति, इति तत्तदर्थविवक्षाया निबन्धनं शब्दा एव ।

अपि च - 'नामरूपे व्याकरवाणि' इति श्रुत्युपदिष्टदिशा सर्वो हि कुलालादिः पूर्वं बुद्धौ नामरूपे कृत्वा पश्चाद् बाह्यं घटादिकमर्थं निष्पादयति । उक्तं च - 'बुद्धौ कृत्वा सर्वा वाचः कर्ता धीरस्तन्वन्तीति' इति । एवं च

आदि शब्द प्रथमतः घटत्व पटत्व आदि सामान्य धर्म का बोधक होता है, तदनन्तर ही 'घट - पट' आदि व्यक्तिरूप अर्थ का व्यवहार होता है । अत एव सामान्य धर्म को प्रवृत्तिनिमित्त कहा जाता है, उस 'घटत्व' आदि प्रवृत्तिनिमित्त का भी ज्ञापकरूप से निमित्त शब्द ही है ।

'अर्थप्रवृत्तितत्त्व' का दूसरा अर्थ है - अर्थ के व्यवहार का निमित्त तत्त्व, वह है - विवक्षा । उस विवक्षा तत्त्व का निमित्त है - योग्य शब्द । जब प्रयोक्ता को अर्थ की विवक्षा होती है, अर्थात् दूसरों को अर्थ का बोध कराने के लिए कहने की इच्छा होती है, तब वह अर्थ का बोध कराने में समर्थ - 'योग्य' शब्द का प्रयोगरूप व्यवहार करता है । इस दृष्टि से अर्थ की विवक्षा का निमित्त भी योग्य शब्द ही है, अयोग्य नहीं । जैसे 'रूप रस' आदि विषयों को जानने का इच्छुक व्यक्ति रूप के ग्रहण में योग्य चक्षुरिन्द्रिय अथवा रस के ग्रहण में योग्य रसनेन्द्रिय का ही रूप रस आदि विषयों से सम्प्रयोग करता है, अयोग्य श्रोत्र आदि इन्द्रिय का नहीं, वैसे ही अर्थ विशेष की विवक्षा से योग्यशब्द का ही प्रयोग

शब्दानां तत्त्वम् = साधुत्वं तस्यावबोधः = ज्ञानम् व्याकरणाद् ऋते = शब्दशास्त्रं विना नास्ति = न भवतीत्यर्थः ॥ १३ ॥

घटादेरर्थस्य जन्मादिक्रियाया आख्यातार्थसाध्यत्वस्य निबन्धनमपि योग्याः शब्दा एव । एतावता सर्वविधव्यवहारः शब्दनिबन्धन - इति शब्दस्य प्राधान्यं सुस्पष्टम् ।

सर्वव्यवहारप्रवर्तकस्य तस्य शब्दस्य यदपगतासाधुत्वमलं शुद्धं संस्कृतं स्वरूपं - साधुत्वं, तस्य व्युत्पत्तिप्रक्रियया लाघवेन सम्यग् ज्ञानं सामान्यविशेष-लक्षणाद् व्याकरणादेव भवति, नान्यस्मादिति व्याकरणस्य सर्वविद्यासु प्राधान्यं स्फुटम् ॥ १३ ॥

किया जाता है । जैसे कि 'स्व से भिन्न' अर्थ की विवक्षा का हेतु - योग्य शब्द है - दन्त्यसकारविशिष्ट - 'अस्व' शब्द । अतः 'स्वभिन्न' अर्थ की विवक्षा में 'अस्व' शब्द का ही प्रयोग होता है, अयोग्य तालव्य-'शकार'विशिष्ट- 'अश्व' शब्द का प्रयोग नहीं, वह एकशफ (खुर) वाले प्राणी 'घोड़ा' अर्थ में साधु होने पर भी 'स्वभिन्न' अर्थ में असाधु है । अत एव अर्थविशेष की विवक्षा का हेतु भी योग्य शब्द ही है ।

इतना ही नहीं, 'घट-पट' आदि पदार्थों की जन्म आदि क्रियाओं का जो साध्यत्व स्वरूप है, उसका भी शब्द ही निबन्धन है । क्योंकि घट पट आदि पदार्थों का निर्माणकर्ता कुम्भकार - तन्तुवाय आदि भी निर्माण से पूर्व अपनी बुद्धि में वाचक शब्द (नाम) और रूप की संकल्पना करके ही 'घट-पट' आदि अभिधेय अर्थों की रचना करता है ।

इस प्रकार सकलव्यवहार का निबन्धन जो शब्द तत्त्व है, उसके साधुस्वरूप का व्युत्पादक व ज्ञापक होने से विद्याओं में व्याकरण शास्त्र का सर्वाधिक महत्त्व एवं प्राधान्य स्पष्ट सिद्ध होता है ॥ १३ ॥

तद् द्वारमपवर्गस्य वाङ्मलानां चिकित्सितम् ।
पवित्रं सर्वविद्यानामधिविद्यं प्रकाशते ॥ १४ ॥

प्रत्येकार्थप्रकाशिका

तद्द्वारेति - अपवर्गस्य = मोक्षस्य द्वारम् = व्यापारः तद्= व्याकरणम् । अयमाशयः - व्याकरणेन साधुशब्दानां ज्ञानात् प्रयोगाच्च संजातधर्मविशेषेण विशुद्धेऽन्तःकरणे वर्णपद-

---

आनन्दा

प्रकरणागतं प्राधान्यमेवोपपादयितुं व्याकरणस्य मोक्षहेतुत्वमाह - तद्द्वारमिति ।

अन्वयः - तद् - अपवर्गस्य द्वारम्, वाङ्मलानां चिकित्सितम्, सर्वविद्यानां पवित्रम्, अधिविद्यं प्रकाशते ।

व्याख्या - तद् = व्याकरणम् अपवर्गस्य = अज्ञानबन्धदुःखान्मोक्षस्य - ब्रह्मसाक्षात्काररूपस्य द्वारम् = साधनम्, तद्धि वाङ्मलानाम् = वाचो मलानाम् - अपभ्रंशरूपाणां दोषाणाम् चिकित्सितम् = अपनयसाधनम् । आयुर्वेदशास्त्रं यथा शारीरदोषाणां वातपित्तकफानां तत्प्रभवाणां च ज्वरादिरोगाणामपनयसाधनम्, तथा व्याकरणं वाग्दोषाणामपभ्रंशानामपनयसाधनम् । किंच तत् सर्वविद्यानाम् = सर्वासु विद्यासु मध्ये पवित्रम् = पावकम्,

---

सूर्यमाया

प्रकरणागत व्याकरण के प्राधान्य की उपपत्ति के लिए व्याकरण को मोक्ष का हेतु बताते हैं - 'तद् द्वारमपवर्गस्य' इत्यादि ।

अर्थ : - वह व्याकरण मोक्ष का द्वार है, मोक्षफल का साधक पुण्यरूप - अपूर्व व्यापार है, क्योंकि वह वाणी के अपभ्रंशरूप मलों का निवारण व प्रक्षालन कर वाणी का संस्कार करता है - वाणी को शुद्ध करता है । अत एव वह सभी विद्याओं के शब्दविग्रह को शुद्ध व पवित्र करने वाला स्वयं पवित्र है तथा वह

वाक्यात्मकध्वन्यतिरिक्ता एकाऽखण्डरूपा मध्यमा वाक् प्रत्यगन्तःकरणसन्निविष्टा एवार्थबोधिका, स एव स्फोट इति साक्षात्कारो भवति । ततोऽपि दृढतराभ्यासाद् मध्यमावाक्प्रकृति-

---

'यतश्च निर्धारणम्' इति षष्ठी बोध्या । व्याकरणं सर्वा विद्याः पुनातीत्यर्थः । व्याकरणसंस्कृतशब्दविग्रहा हि सर्वा विद्याः । अतः सर्वासां विद्यानां व्याकरणाधीनं पवित्रत्वम् ।

अत एव तद् व्याकरणम् अधिविद्यम् = विद्यासु प्रकाशते = विद्यानां व्याकरणलक्षणानुगते साधुशब्दशरीरे राजते । सर्वे शास्त्रकाराः स्वस्वशास्त्रे व्याकरणलक्षणमनुगच्छन्ति, लक्षणविरुद्धं चापभ्रंशं परित्यजन्ति । अतो व्याकरणं सर्वासु विद्यासु संस्कृतशब्दविग्रहतया विद्योतते । व्याकरणस्य वाङ्मलापनयनकरत्वं च ऋङ्मन्त्रोऽप्याह - 'सक्तुमिव तितउना पुनन्तः'' इति ।

विमर्शः - व्याकरणं मोक्षस्य हेतुरित्यतोऽपि विद्यासु व्याकरणस्य प्राधान्यम् । तथाहि-व्याकरणेन साधुशब्दज्ञानपूर्वकप्रयोगादभिव्यक्तधर्मविशेषेण शुद्धान्तःकरणो वैयाकरणो यथोत्तरमभ्यासपरिपाकात् प्रथमं व्यञ्जकध्वनिधर्म-वर्ण-पद-वाक्यातिरिक्तां हृदिस्थां मध्यमां वाचं स्फोटाख्यामखण्डां साक्षात्करोति,

---

शब्दमय सभी विद्याओं में संस्कार रूप में विराजमान रहता है । अर्थात् सभी विद्याएँ व्याकरणलक्षणों के अनुसार साधुशब्दों में निबद्ध हैं, अतः वह विद्याविग्रह- साधुशब्दों के संस्कारक रूप में नियमतः विद्याओं के अन्दर प्रकाशमान रहता है ।

आशय : - मोक्ष है - अज्ञानबन्धन से मुक्ति, जो कि ब्रह्म और स्वात्मा के अभेदज्ञान से प्राप्त होता है । ब्रह्मात्मैक्य दर्शन से भेदज्ञान का विलय हो जाता है, फलतः ब्रह्मस्वरूप में स्वात्मा का प्रवेश हो जाता है - ब्रह्मस्वरूपता की प्राप्ति हो जाती है । अर्थात् आत्मा का ब्रह्मस्वरूप में प्रवेश ही मोक्ष है । जैसा कि - भगवद्गीता में कहा है - ''ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्'' । व्याकरण इस ब्रह्मस्वरूप में प्रवेश का द्वार है । व्याकरण का ही यह व्यापार है कि -

भूतां नाभिस्थां पश्यन्तीं वाचं पश्यन्ति, ततोऽप्यूर्ध्वमननाद मूलाधारस्थां ब्रह्मरूपिणीं परानाम्नीं पश्यन्ति, ततश्च ब्रह्मज्ञानान्मोक्षः - इति मोक्षमार्गे प्रथमस्थानं व्याकरणम्, इति योगविद्वेद्यम् ।

ततस्तस्याः प्रकृतिं नाभिदेशस्थां पश्यन्तीं (प्रतिभारूपां) संहृतक्रमरूपां वाचं साक्षात्करोति, ततश्च भावनाभ्यासदृढतरसंस्कारबलात् प्रत्यस्तमित-'वर्णादि'क्रमोल्लेखां मूलचक्रस्थां परां वाचं पश्यन्त्याः प्रकृतिं ज्ञानरूपशब्दब्रह्मरूपां साक्षात्करोति । एवं च सूक्ष्म-सूक्ष्मतर-सूक्ष्मतमक्रमेण वैयाकरणः वर्णादिक्रमोपसंहारेण ज्ञानरूपशब्दब्रह्मणः स्वात्मना सहाभेदज्ञानवान् शब्दपूर्वं योगं लभते । ततश्च ब्रह्मात्म्यैक्यज्ञानान्मोक्षः । तदाह -

"शब्दपूर्वेण ज्ञानेन लभते ज्ञानमीदृशम्" इति स्मृतिः । तदेवं व्याकरणं हि मोक्षपदे प्रवेशद्वारम् । वैयाकरणः साधुशब्दराशेर्ज्ञानपूर्वकप्रयोगेण शुद्धान्तःकरणो व्याकरणेन द्वारेण मोक्षपदे सुखं प्रविशति । तदाह गीतास्मृतिः- "ततोऽसौ तत्त्वतो ज्ञात्वा विशते तदनन्तरम्" इति ।

साधुशब्द के विवेक ज्ञान से - 'अनादिनिधन - निरञ्जन अक्रम - अखण्ड शब्द तत्त्वरूप - 'ब्रह्म' का दर्शन कराता है ।

अज्ञानकृत भेदबुद्धि का उच्छेद कर अभेदज्ञान से ब्रह्मस्वरूपता की प्राप्ति कराता है ।

व्याकरण से मोक्ष की प्राप्ति में यह प्रक्रियाक्रम ध्यातव्य है कि - वैयाकरण व्याकरणशास्त्रद्वारा शब्दव्युत्पत्ति के प्रक्रियाज्ञान से साधु-असाधु शब्द का विवेक ज्ञान पाकर पुण्यजनक साधुशब्द का ही प्रयोग करता है, प्रत्यवायजनक असाधुशब्द का नहीं । साधुशब्द के ज्ञान तथा प्रयोग जन्य पुण्य से शुद्ध स्वान्तःकरण में वर्ण-पद आदि क्रम से विशिष्ट ध्वनिरूप वैखरीवाक् से भिन्न हृदयदेश में स्थित 'मध्यमावाक्' रूप स्फोट नामक अखण्ड शब्द का दर्शन करता है, वह स्फोट ही अर्थ का वाचक होता है, वैखरी नहीं । यद्यपि व्यञ्जक वर्णादिरूप ध्वनि के क्रमरूप से रूषित (प्रतिबिम्बित) ही व्यङ्ग्य स्फोट का

वाङ्मलानाम् = वाग्दोषाणां चिकित्सितम् = भावक्तान्ता-दर्शाद्यच्, तथा च - चिकित्साविशिष्टमिति फलितम्, यथा आयुर्वेदे शारीरिकचिकित्सा । सर्वविद्यानाम् = सर्वासु विद्यासु

व्याकरणस्य मोक्षहेतुत्वे बीजमाह - 'वाङ्मलानां चिकित्सितम्' इति । यतो हि व्याकरणं वाङ्मलानां प्रक्षालनेन वाचः शुद्धस्वरूपस्य व्युत्पादकम्, अत एव शुद्धस्याखण्डस्य शब्दब्रह्मणः साक्षात्कारहेतुतया व्याकरणस्य मोक्षहेतुत्वं निगदव्याख्यातम् ।

किंच व्याकरणं यत एव वाचो मलापनयनेन शब्दसंस्कारकम्, तत एव हेतोर्व्याकरणं सर्वासां विद्यानां विग्रहस्य शब्दार्थमयस्य संस्कारेण शुद्धतमस्वरूपसाधकत्वेन स्वयमपि पुण्यजननसमर्थं गङ्गोदकवत् पुण्यतमम् ।

भान होता है तथा अर्थ का बोधक होता है, अत एव लोग वैखरी को वाचकशब्द समझते हैं, किन्तु वस्तुतः क्षणनश्वर ध्वनिरूप - वैखरी से भिन्न- नित्य अखण्ड स्फोट ही वाचक शब्द है । उसका विवेकज्ञान व्याकरण से होता है ।

यह अवश्य है कि ध्वनिधर्म-वर्ण आदि के क्रम रूप से प्रतिबिम्बित स्फोट सक्रम भासित होता है, किन्तु वह अविवेक मूलक है । वस्तुतः स्फोट अक्रम है । उस स्फोट के मनन व अभ्यास के परिपाक से वैयाकरण सकल शब्द और अर्थ की प्रकृति - वर्ण-पद-विभाग से रहित - 'संहृतक्रम' नाभिदेश में स्थित प्रतिभारूप पश्यन्तीवाक् का दर्शन करता है । तदनन्तर शब्दार्थमय सकल जगत् विकार से उपलक्षित - पश्यन्तीवाक् के भावनाभ्यास की उत्कृष्टता से पश्यन्ती सहित सबकी मूल प्रकृति मूलाधार देश में स्थित स्वयं ज्योति ज्ञानस्वरूप - 'परा' वाक् जो कि ब्रह्मरूपिणी है, उसका दर्शन कर तद्रूपता को प्राप्त कर लेता है, जिसके बाद कर्मफलभोग का अधिकार समाप्त हो जाता है । फलतः आत्मा और ब्रह्म के अभेद ज्ञान से अज्ञानमूलक भेदबुद्धि का समूल नाश हो जाता है । अपगतभेद स्वात्मा का ब्रह्मस्वरूप में प्रवेश अर्थात् ब्रह्मस्वरूपता की प्राप्ति ही-मोक्ष है, जिसका साधन व्याकरण है । क्योंकि व्याकरण वाणी के दोषों का

इदं पवित्रम् = पुण्यम्, सकलविद्यास्थशब्दसंस्कारकत्वाद्, अधिविद्यम् = विद्यासु, विभक्त्यर्थेऽव्ययीभावः, प्रकाशते = द्योतते इति ॥ १४ ॥

अत एव च सकलविद्यानां साधुशब्दशरीरस्य व्याकरणलक्षणानुगामित्वात् सर्वत्र व्याकरणं विद्यास्वविनाभावितया राजशासनवद्राजते व्याकरणं हि शब्दानुशासनं नाम । सर्वो राजानमिव व्याकरणमनुसरति, तद्विरोधे स्यात् प्रत्यवायोऽनर्थकरः ।

इत्थं च प्रत्यवायहरत्वात् सकलार्थसाधकत्वाच्च व्याकरणस्य प्राशस्त्यं सिद्धम् ॥ १४ ॥

निवारण करता है । जैसे आयुर्वेद शरीर के कफ आदि दोष - तज्जन्य ज्वर आदि रोगों का निवारण करता है । वैसे ही व्याकरण अपभ्रंश दोषों को दूर कर वाणी को शुद्ध पवित्र करता है । अत एव यह व्याकरण साधुशब्द में निबद्ध सभी विद्याओं को पवित्र करनेवाला स्वयं पवित्र है ।

यह सभी विद्याओं के शब्दकलेवर में साधुत्वप्रक्रिया के लक्षणों के रूप में विराजमान रहता है । सभी शास्त्रकार अपनी अपनी विद्याओं के शब्दकलेवर के गठन में व्याकरण के लक्षणों का नियमतः अनुसरण करते हैं । साधुशब्द में निबद्ध विद्या ही इष्ट अर्थ का प्रकाशक होती है ॥ १४ ॥

यथाऽर्थजातयः सर्वाः शब्दाकृतिनिबन्धनाः ।
तथैव लोके विद्यानामेषा विद्या परायणम् ॥ १५ ॥

प्रत्येकार्थप्रकाशिका

यथार्थेति - यथा अर्थजातयः = घटत्व - पटत्वादयः सर्वाः = सकलाः शब्दाकृतयः = घटशब्दत्व - पटशब्दत्वादयः,

---

आनन्दा

सर्वविद्यानां ज्ञानस्य परस्थानत्वेन व्याकरणस्य प्रकृतं प्राधान्यमुपपादयति - 'यथाऽर्थजातयः' इति ।

अन्वयः - यथा अर्थजातयः सर्वाः शब्दाकृतिनिबन्धनाः तथैव लोके एषा विद्या विद्यानाम् परायणम् ।

व्याख्या - यथा अर्थजातयः - घट-पटादि-पदार्थवृत्तिजातयो घटत्वादिकाः कम्बुग्रीवादिमत्त्वादिरूपाः सर्वाः शब्दाकृतिनिबन्धनाः = शब्दानाम् आकृतयो

सूर्यमाया

दृष्टान्त द्वारा व्याकरण को विद्याओं के विषयवस्तु प्रतिपादन का एकमात्र सर्वश्रेष्ठ आधार बताते हैं - ''यथार्थजातयः' ।

अर्थ : - जैसे 'घट - पट आदि' अर्थों की 'घटत्व - पटत्व आदि' जातियाँ घट आदि शब्दों में 'घटशब्दत्व - पटशब्दत्वरूप' जाति के ज्ञान से जानी जाती हैं, क्योंकि शब्दनिष्ठ जाति ही वाचक है तथा अर्थनिष्ठ जाति ही वाच्य है, वैसे ही यह व्याकरण सभी विद्याओं के विषयवस्तु प्रतिपादन का सर्वोत्कृष्ट आधारभूत स्थान है । दूसरे शब्दों में जैसे अर्थ की जाति के ज्ञान में वाचक शब्द की जाति का ज्ञान कारण है, वैसे ही सभी विद्याओं के प्रतिपाद्य विषयवस्तु के ज्ञान में व्याकरण का ज्ञान कारण है ।

निबन्धनानि = वाचकानि यासां ताः । अयं भावः - अर्थगतजातिर्वाच्या, शब्दगतजातिर्वाचिका, तथा च शब्दज्ञाना-

---

निबन्धनानि यासां ताः - घकाराकारटकारादि-वर्णानुपूर्वीरूपानुगतसंस्थान-व्यङ्ग्या घटशब्दत्वादिज्ञाप्याः, वाच्यत्वं वाचकत्वं च जातेरेव, न व्यक्तेरानन्त्यव्यभिचारदोषप्रसक्तेः, तथैव लोके = लोकव्यवहारे एषा विद्या= व्याकरणम् विद्यानां सर्वासां परायणम् = परमं केन्द्रस्थानं ज्ञानस्य ।

विमर्श : - घटशब्द-पटशब्दादीनां प्रतिस्वं समानानुपूर्वीकत्वेऽपि बालयुववृद्ध-पुंस्त्रीसमुदीरितानां काकलीभेदेन भिन्नानां घटशब्दव्यक्तीनां व्यभिचारानन्त्यदोष-प्रसङ्गान्न वाचकत्वं, नापि नीललोहितपीत-कम्बुग्रीवादिमद्व्यक्तीनामनन्तानां वाच्यत्वम्, किन्तु घटशब्दत्वपटशब्दत्वादिरूप-शब्दत्वजातेरेव वाचकत्वम्, वाच्यत्वं च कम्बुग्रीवादिमत्त्वरूप-घटत्वादेरर्थनिष्ठजातेरेव । एवं चार्थज्ञानस्य

आशय : - नाना घटव्यक्ति - पटव्यक्ति में समवेत घटत्व - पटत्व आदि जाति ही वाच्य है तथा 'घकार अकार टकार अकार' आदि वर्णों की आनुपूर्वी (क्रम)-विशिष्ट एवं उच्चारणभेद से नाना घट शब्द व्यक्ति में समवेत - 'घटशब्दत्व' जाति ही वाचक है । क्योंकि नाना व्यक्ति को वाच्य तथा वाचक मानने में व्यभिचार - आनन्त्य और अननुगमदोष होते हैं । अतः सब में अनुगत घटत्व आदि अर्थनिष्ठ जाति वाच्य तथा घट आदि शब्दनिष्ठ शब्दत्व जाति को वाचक मानना युक्तिसंगत है ।

इस प्रकार जाति के वाच्यत्व और वाचकत्व पक्ष में अर्थनिष्ठ जाति के ज्ञान का निमित्त है - 'शब्दाकृति से ग्राह्य शब्दत्व जाति' ।

अर्थात् - कम्बुग्रीवादिमान् व्यक्तिरूप अर्थ में रहने वाली - 'घटत्व' जाति ज्ञाप्य वस्तु है, तथा वर्णक्रमविशिष्ट 'घट' आदि शब्द में रहने वाली घट शब्दत्व आदि जाति अर्थजाति का ज्ञापक है ।

धीनमर्थज्ञानम्, अतः शब्दानां प्राधान्यम् । तथैव लोके - विद्यानां मध्ये एषा विद्या परायणम् = श्रेष्ठा प्रधानशब्दसंस्कारकत्वात्, इति ॥ १५ ॥

शब्दज्ञानाधीनत्वेन सकलार्थव्यवहारे शब्दस्य यथा प्राधान्यं तथा सर्वासां विद्यानां प्रतिपाद्यार्थज्ञानस्य व्याकरणाधीनत्वाद् व्याकरणस्य प्राधान्यम् । उक्तं च - ''काणादं पाणिनीयं च सर्वशास्त्रोपकारकम्'' इति ॥ १५ ॥

फलतः - वाचक शब्द के ज्ञान के अधीन ही वाच्य अर्थ का ज्ञान होने से व्यवहार में जैसे शब्द का प्राधान्य है, वैसे साधु शब्दों में निबद्ध विद्याओं के प्रतिपाद्य अर्थ का ज्ञान साधुशब्द का प्रतिपादक व्याकरण के अधीन होने से व्याकरण का प्राधान्य है । अत एव यह व्याकरणविद्या अन्य सभी विद्याओं का आधारभूत परम पद है ॥ १५ ॥

इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम् ।
इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः ॥ १६ ॥

प्रत्येकार्थप्रकाशिका

इदमिति - सिद्धेः = मोक्षस्य सोपानम् = आरोहमार्गः, तस्य पर्वाणि = ग्रन्थयः, तेषां मध्ये आद्यम् = प्रथमं पदस्थानम्=

आनन्दा

मोक्षप्राप्तेः सोपानस्य विद्याश्रेण्याः प्रथमपदन्यासभूमिं सरलराजमार्गं च व्याकरणं निरूपयति- 'इदमाद्यम्' इति ।

अन्वयः - सिद्धिसोपानपर्वणाम् आद्यं पदस्थानम् इदम्, मोक्षमाणानाम् सा इयम् अजिह्मा राजपद्धतिः ।

व्याख्या - सिद्धिसोपानपर्वणाम् = सिद्धेः सोपानम् तस्य पर्वाणि तेषाम्-मोक्षारोहणपद्धतेरवान्तरविभागानाम् - चतुर्दशविद्यारूपाणाम् आद्यम्= प्रथमं मूलभूतं पदस्थानम् = पादन्यासभूमिः, इदम् = शब्दानुशासनं नाम व्याकरणम्, किंच मोक्षमाणानाम् = मुमुक्षूणां सा इयम् = पूर्वप्रकृता

सूर्यमाया

व्याकरण को मोक्ष 'प्रासाद' की सीढी की पहली पैड़ी (पौड़ी) तथा परम-पुरुषार्थ का सरल राजमार्ग बताते है - 'इदमाद्यम्' ।

अर्थः - यह व्याकरणविद्या-मोक्षसिद्धि के सोपान जो चतुर्दश विद्याएँ हैं, उनमें मूलभूत पहली पैड़ी है, तथा वही पूर्ववर्णित यह व्याकरण मुमुक्षुओं का मोक्ष पद का सरलतम सुदृढ राजमार्ग है ।

आशय : - परमपद - मोक्षप्रासाद पर आरोहण के मार्ग - विद्यारूप सोपान के चौदह पर्वविभागों अर्थात् पैड़ियों में मूलभूत सबसे पहली पैड़ी यह व्याकरण विद्या है, जिससे सर्वप्रथम साधुशब्दों तथा उनके अर्थों का भली भाँति अवगम

चरणनिक्षेपस्थलम्, इदं व्याकरणम् । मोक्षमाणानाम् = मुक्तिकामानां सा इयम् अजिह्मा = अकुटिला, सुखेन गम्या इत्यर्थः, राजपद्धतिः = राजमार्गः, अस्तीतिक्रियाऽक्षेपः ।

प्रसिद्धा व्याकरणाख्यशब्दविद्या अजिह्मा = सरला लघुभूता च राजपद्धतिः= सुदृढोऽविच्छिन्नोऽभ्रान्तोऽकण्टकः सुगमो राजमार्गः ।

विमर्श : - मोक्षमारुरुक्षो र्मुने र्मोक्षस्य सोपानपरम्पराया विद्याश्रेण्या यानि पर्वाणि चतुर्दश विद्याविभागाः सन्ति, तेषु मूलभूतं प्रथमं पदन्यासस्थानमिदं व्याकरणप्रस्थानम् - सर्वासां विद्यानां साधुशब्दोपगृहीतत्वात् । शब्दशास्त्रं गृहीत्वैव शब्दविग्रहाणामुत्तरोत्तरविद्याशृङ्खलानां सुखेन ज्ञानप्राप्तेः सुकरत्वात् । किंच इयं हि शब्दविद्या मुमुक्षूणां कृतेऽविनाभूतोऽकण्टकः सुगमः सरलो

होने पर ही मोक्ष सोपान के पर्वविभाग रूप अन्य सभी विद्याओं का विषयवस्तु अधिगत होता है । जैसे किसी भवन के ऊर्ध्वकक्ष पर चढ़ने के लिए सीढ़ी की पहली पैड़ी के द्वारा ही उत्तरोत्तर अन्य पैड़ियों से भवन पर चढ़ा जाता है, ऐसे ही मोक्षार्थी व्यक्ति मोक्ष सोपान की पहली सीढ़ी व्याकरण विद्या से ही उत्तरोत्तर वेदान्त आदि अन्यविद्याओं के अधिगम द्वारा परमपद मोक्ष का अधिगम कर सकता है । अतः यह सिद्ध होता है कि मोक्ष सोपान के जो चतुर्दश विद्याविभाग रूप पर्व हैं, उनमें यह व्याकरणविद्या सबसे पहला मूलभूत पर्व है - पहली पैड़ी है । व्याकरण के अधिगम से ही अन्य विद्याप्रस्थानों के अधिगम द्वारा परमोच्च पद - 'मोक्ष' की प्राप्ति होती है । अत एव यह व्याकरणशास्त्र मुमुक्षुओं का अपरिहार्य निष्कण्टक सरलतम राजमार्ग है, जिससे विना किसी क्लेश के मोक्ष के साधन अन्यविद्या प्रस्थानों की तथा मोक्ष की प्राप्ति होती है । कहा भी है- 'शब्दे ब्रह्मणि निष्णातः......'' । शब्दब्रह्म में परिनिष्ठित ही परब्रह्म को पाता है ।

इयमिति स्त्रीलिङ्गनिर्देश ''उद्देश्यविधेययोरैक्यमापादयत् सर्वनामपर्य्यायेण तत्तल्लिङ्गभाग् भवतीति'' न्यायेन विधेयगत-स्त्रीत्वविवक्षया ॥ १६ ॥

राजमार्गः सर्वासु विद्यासु राजमानो मोक्षस्यान्यानपेक्षं साक्षात् साधनम् । तदाह -

"शब्दे ब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति'' इति ।

एतावता व्याकरणस्य पूर्ववर्णितं प्राधान्यमुपपन्नम् ।। १६।।

व्याकरण के विना अध्यात्मशास्त्रों के तात्पर्यार्थ का अवगम ही दुर्लभ है, तो मोक्ष की प्राप्ति की संभावना ही क्या की जा सकती है ? एतावता विद्याओं में व्याकरण का प्राधान्य स्पष्ट है ।। १६ ।।

अत्रातीतविपर्य्यासः केवलामनुपश्यति ।
छन्दस्यश्छन्दसां योनिमात्मा छन्दोमयीं तनुम् ॥ १७ ॥

प्रत्येकार्थप्रकाशिका

अत्रेति - अत्र = व्याकरणे अतीतविपर्यासः = अपगतभ्रमः- सम्यग्ज्ञानवान् इति यावत्, छन्दस्यः = शुद्धः, आत्मा =

आनन्दा

वर्णादिविभागरहितायाः शुद्धाया मध्यमादिसूक्ष्मवाचो ज्ञानकारणत्वेनापि व्याकरणस्य प्राधान्यमुपपादयति - 'अत्रातीत' इति ।
अन्वयः - अत्र अतीतविपर्यासः छन्दस्यः आत्मा छन्दसाम् योनिम् छन्दोमयीम् तनुम् केवलाम् अनुपश्यति ।
व्याख्या - अत्र = अस्मिन् व्याकरणे अतीतविपर्यासः = अतीतो विपर्यासो येन स - संशयविपर्ययभ्रमातीतः, अत एव व्यपगतसंशयादिमलत्वाद् छन्दस्यः = छन्दसि - छन्दोऽध्ययने साधुः -परिशुद्धः, आत्मा = चित्तम् छन्दसाम् = श्रुतीनामनादिगुर्वध्ययनपरम्परातः श्रवणगोचराणां वैखरीवाग्रूपाणां सक्रमाणाम् योनिम् = अधिष्ठानत्वेन प्रकृतिं छन्दोमयीम् = अकर्तृकत्वेन स्वच्छन्दां छन्दःस्वरूपां तनुम् = सूक्ष्मां केवलाम् = संहृतक्रमामखण्डामेकां मध्यमादिवाचम् अनुपश्यति = व्यञ्जकवैखरीक्रमरूपरूषितामपि वस्तुतः

सूर्यमाया

शब्दार्थशरीर - वेद की योनि अर्थात् मूलकारण - 'मध्यमा' आदि सूक्ष्मवाक् के दर्शन का साधन होने से प्रकारान्तर से व्याकरण का पूर्वोक्त प्राधान्य स्पष्ट करते हैं - 'अत्रातीत' इत्यादि ।
अर्थ : - पूर्व प्रकृत इस व्याकरणविद्या में - संशय विपर्यय भ्रम से रहित अत एव छन्दस्य - अर्थात् स्वर वर्णों के सम्यक् उच्चारणपूर्वक वेद के स्वाध्याय के योग्य व शुद्ध अन्तरात्मा - (वर्ण - पद आदि नियतक्रम वाले श्रवणग्राह्य वैखरीवाणीरूप) वेदों की योनि - अधिष्ठान रूप में मूलकारण जो मध्यमा आदि सूक्ष्मवाणी है, जो कि स्वतः सिद्ध होने से शाश्वत शुद्ध क्रमरहित केवल ज्ञान रूप है, स्वतन्त्र है, स्वयं छन्दस् स्वरूप है, उसको देखता है, अर्थात् शब्दब्रह्मरूप परावाक् को धारणा तथा ध्यान योग से क्रमशः प्रत्यक्षदर्शन करता है ।

अन्तःकरणम् छन्दसां योनिम् = कारणम् छन्दोमयीम् = छन्दोरूपां

स्वतो निष्क्रमां शुद्धामभिजानाति । तदिदमुक्तं प्राक् - सूक्ष्मामर्थेनाप्रविभक्त-तत्त्वामेकां वाचमित्यादि ।

विमर्शः - व्याकरणस्यासन्दिग्धाविपर्यस्तयथार्थज्ञानवान् साधुशब्दज्ञानपूर्वकेण प्रयोगेण पुण्येन विशुद्धात्मा व्यञ्जकवैखरीभेदैर्व्यक्तवर्णपदवाक्यभिदां गायत्र्यनुष्टुप्त्रिष्टुब्-बृहती-पङ्क्त्यादिछन्दोनिबद्धानाम् ऋक्सामादीनां गुरुशिष्यसम्प्रदायपरम्परातः श्रुतिगोचरत्वात् प्रत्यक्षरूपाणां श्रुत्याख्यानां छन्दसां प्रकृतित्वेन योनिं स्वतश्चापौरुषेयत्वेन कर्तृपारतन्त्र्यरहितां छन्दोरूपां सूक्ष्मां मध्यमादिवाचं परतः सक्रमामपि वस्तुतः स्वतोऽक्रमामखण्डां शब्दपूर्वेण योगेन जानातीति निष्कृष्टोऽर्थः । एतावताऽपि व्याकरणस्य प्राधान्यमाख्यातम् ।

अत्र कैश्चित् स्वटीकायां 'केवलाम्' इत्यस्योद्धरणमकृत्वैव 'अपभ्रंशवि-विक्ताम्' इति वृषभदेवपद्धतीयं व्याख्यानमुपाश्रित्य 'वेदानां योनिं

आशय : - व्याकरण की शब्दव्युत्पत्ति प्रक्रिया में जिसको कहीं कोई भ्रम संशय नहीं है, तथा जो सकल साधुशब्द का सम्यक् ज्ञानपूर्वक प्रयोग करता है, उसका अन्तःकरण शुद्ध व पुण्यतम हो जाता है, यह पहले भी कहा जा चुका है । वह शुद्धात्मा वैयाकरण वेदों के स्वर - वर्णों के शुद्ध उच्चारणपूर्वक स्वाध्याय में समर्थ 'छन्दस्य' हो जाता है । वह शुद्धात्मा छन्दस्य व्याकरण का विद्वान् नियत-क्रमवाली गुरुपरम्परा से श्रुति का विषय वैखरीवाणी रूप - वेदों की योनि - सूक्ष्म तथा क्रमभेद रहित शुद्ध केवला परा वाणी को मध्यमा व पश्यन्ती के दर्शनक्रम से प्रत्यक्ष देखता है ।

यहाँ यह अवधेय है कि - मीमांसाशास्त्र की दृष्टि में वाचकशब्दरूप में श्रवणगोचर नित्य वैखरी वाणी रूप वेद है, वह अनादि अविच्छिन्न गुरुशिष्य-सम्प्रदाय के स्वाध्यायपरम्परा से श्रुत है । किसी से रचित नहीं है, अत एव वह प्रत्यक्ष शब्दरूप श्रुतिनाम से प्रसिद्ध है । इसके साथ ही वह गायत्री बृहती पङ्क्ति आदि छन्दों में निबद्ध छन्दस् नाम से भी ख्यात है, तथा किसी से रचित न होने से कर्ता पुरुष की इच्छा के अधीन नहीं है, स्वतन्त्र है, स्वतः सिद्ध स्वच्छन्द है, उसके वर्ण पद वाक्यों की क्रमानुपूर्वी कर्तृपरतन्त्र नहीं है, शाश्वत है, यथापूर्व है, इसलिए भी उसका 'छन्दस्' नाम प्रसिद्ध है ।

किन्तु व्याकरण शास्त्र का अभिमत सिद्धान्त यह है कि - श्रुतिग्राह्य वैखरी वाङ्मय उस वेद का वर्ण पद वाक्यरूप क्रमभेद से रहित जो मूलभूत स्वरूप

तनुम् = सूक्ष्मां केवलाम् = मध्यमाद्याख्यां वाचम् अनुपश्यति= जानाति ॥ १७ ॥

साधुशब्दरूपाम्' इति तत्तात्पर्यवर्णनं कृतं तच्चिन्तनीयम् । शब्दार्थशरीराणां वेदादीनां शरीरातिरिक्तस्यैव कस्यचन सूक्ष्मस्य - 'श्रोत्रग्राह्यस्थूलवैखरीभिन्नस्य' वस्तुनो 'योनि' शब्देन मूलकारणस्य निर्देशः, 'केवला' शब्देन च - निष्क्रमाया अखण्डायाः सूक्ष्माया एव वाचो निर्देश उचित इति विवेचकैर्विभावनीयम् ॥ १७ ॥

है, वह आन्तर शब्दतत्त्व है, जो कि व्यञ्जक वैखरी के वर्ण पद आदि क्रमरूप से भासमान - व्यङ्ग्य मध्यमा वाक् है, तथा उपसंहृतक्रम प्रतिभारूप पश्यन्ती वाक् है, एवं प्रत्यस्तमितक्रमरूप स्वप्रकाश शुद्धज्ञानस्वरूप शाश्वत अखण्ड केवला परावाक् है, जिसके दर्शन से कैवल्यमुक्ति होती है । जैसा कि कहा है-

"स्वरूपज्योतिरेवान्तः परावागनपायिनी ।
अस्यां दृष्टस्वरूपायामधिकारो निवर्तते ॥"

अर्थात् स्वप्रकाश नित्य परावाक् का स्वरूप साक्षात्कृत होने पर भोगाधिकार निवृत्त होने से कैवल्य - मोक्ष होता है ।

किसी का यहाँ यह व्याख्यान है कि - व्याकरण में भ्रमरहित अत एव वेद की रक्षा में समर्थ व्यक्ति वेदों की योनि - साधुशब्दरूप वाणी को जानने के अनन्तर छन्दोमयी तनु - परम वेदरूप को देखता है।

किन्तु व्याकरण के ज्ञान से साधुशब्द के ज्ञान द्वारा वेद का ज्ञान रूप प्रयोजन तो कोई विलक्षण नवीन वस्तु नहीं, पिष्टपेषण मात्र है, सर्वजनप्रसिद्ध यह भी प्रयोजन हो, तो कोई आपत्ति नहीं है, किन्तु यहाँ 'केवलामनुपश्यति' यह कथन तो वेदज्ञान के भी फलीभूत किसी विलक्षण परम प्रयोजन का दिग्दर्शन कराता है, अतः इस कथन का स्वारस्य तो वेदज्ञान के भी परम लक्ष्यभूत कैवल्य मोक्ष की प्राप्ति के योग्य 'परावाक्' केवला के दर्शन में है ।

इसके अतिरिक्त यहाँ वेद आदि विद्याओं का शरीर जो साधुशब्द है, उससे भिन्न ही वस्तु 'योनि' का विवक्षित अर्थ ग्राह्य होना चाहिए, वह क्रमभेदरहित सूक्ष्मशब्द है, सक्रम साधुशब्द नहीं । साधुशब्द वेदों का स्थूल शरीर है, मूल कारण- योनि नहीं ॥ १७ ॥

प्रत्यस्तमितरूपाया यद् वाचो रूपमुत्तमम् ।
यदग्निनेव तमसि ज्योतिः शुद्धं प्रवर्तते ॥ १८ ॥

प्रत्येकार्थप्रकाशिका

प्रत्यस्तमितेति - प्रत्यस्तमितानि = आच्छादितानि, अज्ञातानीति यावत्, रूपाणि = घट इति प्रथमैकवचन-विभक्त्यन्तत्वम्, भवतीति प्रथमपुरुषैकवचनविभक्त्यन्तत्वम्-

---

आनन्दा

वाचः शुद्धरूपस्याखण्डत्वादेः प्रकाशकत्वेन व्याकरणस्य प्राशस्त्यं वर्णयति - 'प्रत्यस्तमितरूपाया' इति ।

अन्वयः - प्रत्यस्तमितरूपायाः वाचः यद् उत्तमं रूपम्, तमसि अग्निना इव यत् ज्योतिः शुद्धं प्रवर्तते ।

व्याख्या - प्रत्यस्तमितरूपायाः = प्रत्यस्तमितं रूपं यस्यास्तस्याः - व्याकरणाज्ञानाद् अज्ञाताखण्डत्वादिस्वरूपाया वाचः = वाचकत्वेन स्वीकृताया मध्यमाया वाचो यद् उत्तमम् = क्रमभेदरहितमखण्डं रूपम् = स्वरूपम्, तमसि = अन्धकारे अग्निना = वह्निना घटाद्यर्थप्रकाश इव अज्ञानावृतेऽन्तःकरणे व्याकरणेन यद् ज्योतिः = साधुपदादिस्वरूपज्ञानं मध्यमादिस्वरूपज्ञानं वा शुद्धम् = अपभ्रंशविविक्तम् - वैखरीविविक्तं च प्रवर्तते = प्रस्फुटं भवति । एतावता व्याकरणस्य प्राशस्त्यं सिद्धम् ।

सूर्यमाया

अग्नि दृष्टान्त से व्याकरण को शब्द का साधु रूप तथा अखण्डत्व आदि शुद्ध रूप का प्रकाशक बताते हैं - 'प्रत्यस्तमित' इत्यादि ।

अर्थ : - अज्ञान से आवृत होने से जनसाधारण को अज्ञात जो वाचक शब्द का साधुत्व तथा अखण्डत्व आदि उत्तम स्वरूप है, वह अन्धकार में अग्नि के द्वारा वस्तु स्वरूप के प्रकाश के समान व्याकरण के द्वारा शुद्ध प्रकाशित होता है । अर्थात् अन्धकार से आवृत घट आदि वस्तुओं का स्वरूप जैसे अग्नि से प्रकाशित होता है, वैसे ही वैखरी से भिन्न वाचक शब्द का अखण्डत्व-साधुत्व आदि उत्तम स्वरूप व्याकरणरूप ज्योति से शुद्ध प्रकाशित होता है ।

इत्याद्याकारकाणि यस्यास्तस्याः, वाचः = घटो भवतीत्यादेः, यद् उत्तमं रूपम् - घट इति रूपं भवतीति च रूपम्, इत्यर्थं केचिद् वदन्ति ।

विमर्शः - अवैयाकरणाः श्रोत्रेण श्रूयमाणां वर्णादिविभागवतीं सक्रमां वैखरीमेव शब्दं मन्यन्ते, न तु तदतिरिक्तां सूक्ष्मामविभागामक्रमां शुद्धां मध्यमादिवाचम् । अतस्तेषां कृते अज्ञातस्वरूपाया मध्यमादिवाचो यदुत्तमं नित्यं निरञ्जनं शुद्धमखण्डं स्वरूपं तदज्ञानतमसि पिहितं वर्तते । तमसि घटादेरावृतमज्ञातं च स्वरूपं यथा प्रदीपाग्निना प्रकाश्यते, तथा शब्दस्य सूक्ष्मं निष्क्रमं यदुत्तमं साधु स्वरूपं तद् व्याकरणेन प्रकाशेन प्रकाश्यते । अर्थात् शब्दस्य यत् साधु पदादिस्वरूपं, यच्च मध्यमादीनां शुद्धं ध्वनिधर्मवर्णादिलेपरहितं निर्मलं स्वरूपं, तद् व्याकरणं बोधयतीति व्याकरणस्य प्राशस्त्यं सर्वासु विद्यासु प्रख्यातम् ।

अत्र - 'तदस्मिन्नेव....विवर्तते' इति पाठकल्पे 'अस्मिन्नेव' इत्यस्य वैकृतध्वनिरूपे, इति व्याख्यानम्, 'विवर्तते' इत्यस्य च - आच्छादितं वर्तते, इति व्याख्यानमविचारितरमणीयम् ।

अग्रे वैकृतध्वनेश्चर्चायाः करिष्यमाणत्वेऽपि पूर्वप्रकृतत्वाभावेन तस्येदमा परामर्शासम्भवात् । पूर्वप्रकृतस्य संनिकृष्टस्यैव परामर्शक इदंशब्दो, नहि वक्ष्यमाणस्य । तदाह - 'इदमस्तु संनिकृष्टे' इति ।

आशय : - जनसाधारण तथा कतिपय शास्त्रकार भी श्रोत्र से ग्राह्य ध्वनिरूप वैखरी को ही शब्द जानते हैं व मानते हैं, उससे भिन्न किसी आन्तर वस्तु को नहीं । फलतः शब्द का जो वास्तविक साधुत्व व अखण्डत्व आदि उत्तम स्वरूप है, वह उनको अमान्य वा अज्ञात होने से अज्ञानरूप अन्धकार के आवरण से आच्छादित ही रहता है । यह अज्ञानावरण व्याकरणरूप प्रदीपज्योति से दूर होता है । व्याकरण के ज्ञान से ही हृदय आदि देश में स्थित - स्वयंज्योति ज्ञानस्वरूप-मध्यमा आदि शब्द का अखण्डत्व आदि शुद्ध स्वरूप प्रकाशित व प्रस्फुट होता है, जैसे कि प्रदीप आदि ज्योति से अन्धकारावरण दूर होकर घट आदि वस्तु का शुद्ध स्वरूप स्पष्ट प्रकाशित होता है । इससे व्याकरण का प्राशस्त्य स्पष्ट सिद्ध होता है ।

परे तु - व्याकरणानभिज्ञा लोकाः 'घटो भवती' त्यादिस्थले श्रावणप्रत्यक्षविषयवर्णादिषु एव शब्दत्वं मन्यन्ते, न तु तदभिव्यङ्ग्यस्तदतिरिक्तः- अखण्डस्फोटः शब्द इति जानन्ति,

---

किंच वर्ण-पदादिरूपरूषितस्फोटभानस्य प्रयोजकत्वेन प्राकृतध्वनेरालोकत्वारोपस्तर्हि स्फोटानभिव्यञ्जकत्वेऽपि द्रुतमध्यादिवृत्तिभेदोपलक्षितस्फोटस्थित्युपलब्धिप्रयोजकत्वेन वैकृतध्वनेरप्यालोकत्वारोपः किं न स्यात् । शब्दाभिव्यक्त्युत्तरकालिक-द्रुतमध्यादिभेदप्रतिभासप्रयोजकत्वेन वैकृतध्वनेर्यदि तमःस्वरूपत्वारोपस्तर्हि वर्णादिभेदप्रतिभासेन स्फोटस्याखण्डस्वरूपस्याच्छादकत्वेन प्राकृतध्वनेरपि तमःस्वरूपत्वारोपः किं न स्यात् । अथ दग्धृत्वाश्रयवह्नितादात्म्याध्यासाद् - 'अयो दहति' इति व्यवहारवत् प्राकृतध्वनेर्भेदाग्रहेण स्फोटज्योतिषस्तादात्म्याध्यासादालोकत्वारोपस्तर्हि केन विप्रतारितं यद् वैकृतध्वनेर्नास्ति भेदाग्रहो येन तस्य नास्ति तादात्म्याध्यासेनालोकत्वारोपः । अज्ञानं हि पुरुषतन्त्रं नहि वस्तुतन्त्रम्, येन प्राकृते एवाज्ञानकृतो भेदाग्रहो न वैकृते । प्रकृतिपुरुषोरिव बुद्ध्यहंकार - देहेन्द्रियादीनामुत्तरोत्तरविकाराणामप्यस्त्येवाविवेककृतात्मतादात्म्याध्यासः, कः प्रतिबन्धः?

यहाँ - 'प्रत्यस्तमितभेदायाः' 'यदस्मिन्नेव' तथा 'विवर्तते' ये पाठ भेद भी हैं, जो कारिका के आशयस्पर्शी नहीं हैं । क्रमभेद रहित जब स्वयं वाक् है, तो उसका उत्तम रूप अन्य क्या होगा, जो भेदगर्भ सबन्ध अर्थ में षष्ठी विभक्ति होगी । यदि 'राहोः शिरः' इस वाक्य के समान यहाँ कल्पित अवस्थाभेद से अभेद में षष्ठी मानी जाय, तो यह उचित नहीं । यदि दूसरी कोई गति न हो तो अगतिकगति का कथंचित् आश्रय किया जाता है । यहाँ वह स्थिति नहीं है, क्योंकि शब्द को अनित्य मानने वाले भी हैं - नित्य मानने वाले भी हैं । प्रथम मत में अर्थवाचक शब्द - अनित्य वैखरी है, मीमांसक मत में वर्णक्रम-भेदवाला वाचक नित्यशब्द है, वैयाकरण मत में वर्णो से व्यङ्ग्य वर्णभेदरहित नित्य शब्द वाचक हैं । इन सभी शब्द के स्वरूपों में वाणी का उत्तमरूप व्याकरणमत में उभयविध है, मीमांसकानुसारी कौण्डभट्ट के मत में अष्टविध - 'वर्ण-पद-वाक्य-

अतः प्रत्यस्तमितं रूपम् - अखण्डत्वादि । एतस्मिन् कल्पे - उत्तमपदस्य, अग्रे शुद्धपदस्य च स्वारस्यं स्वरसत उपपद्यते इत्याहुः ।

एवं च - 'अस्मिन्नेव तमसि' इत्यस्य वैकृतध्वनिरूपे तमसि - इति व्याख्यानमसङ्गतमप्रासङ्गिकं चेति सुधियो विभावयन्तु ।

यत्तु - 'यदस्मिन्नेव' इति पाठं पुरस्कृत्य तदनुसारि व्याख्यानं च कुर्वाणास्तत्र तु मनःप्रत्ययमलभमानाः कारिकायामनुद्धृतमपि टीकायाम् - 'अग्निनेव' इति प्रतीकमुपादाय - "अग्निना तुल्यमित्यर्थः, अत्रेवशब्दस्तुल्यार्थेऽतस्तृतीया, न तु सादृश्यार्थे, अतो न प्रथमा" इति च व्याचक्षते, तदा तत्रासत्पक्षपाते तेषां किं बीजम्, तन्न पश्यामः । किमिति कारिकायाम् 'अग्निना' इति पाठ एव नोल्लिख्यते । तस्माद् व्याकरणेन वाचः शुद्धस्वरूपप्रकाशे "अग्निनेव" इति दृष्टान्तोल्लेख एव युक्तः । अत्र - 'विवर्तते' इति पाठोऽपि प्रक्षिप्त एव, व्याकरणस्य प्राशस्त्यवर्णनप्रसङ्गे विवर्तवादस्याप्रासङ्गिकत्वात् । 'विवर्तते' इत्यस्य - 'आच्छादितं वर्तते'

भेदयुक्त' नित्य स्फोट है, जिनका उत्तमरूप - 'साधुत्व' अभिमत है, नागेश के मत में वर्णाभिव्यङ्ग्य - क्रमभेदरहित अखण्ड स्फोट वाचक शब्द है, जो कि मध्यमा वाक् स्वरूप है, जिसमें वर्णों का क्रमभेद पदभेद प्रतिबिम्बरूप में कल्पित है, उसका भी साधुत्व उत्तम रूप है, तथा इसके अतिरिक्त सर्वथा क्रमभेद के उपराग से भी शून्य - अक्रम पश्यन्ती तथा परावाक् है । यहाँ भासमान क्रमभेद तथा सर्वथा अक्रम उभयविध वाक् का उत्तमरूप - साधुत्व तथा अखण्डत्व, उभय रूप विवक्षित है, इस आशय से 'प्रत्यस्तमितरूपायाः' यह पाठ ही युक्त है । वैयाकरण को उभयविध वाक् का उभयविध उत्तम रूप विवक्षित है - वर्णादि प्रविभाग वाले का साधुत्व रूप ही उत्तम है, अविभाग-'वाक्' का साधुत्व और अखण्डत्व वे दोनों उत्तम रूप हैं ।

इसके अतिरिक्त - 'यदस्मिन्' और 'विवर्तते' ये पाठ भी कारिका के इङ्गित अभिप्राय का स्पर्श नहीं करने से सन्तोषप्रद नहीं हैं ।

तमसि = अन्धकारे - अज्ञान्तःकरणे च यत् ज्योतिः = पदादिप्रकाशः - अग्निना इव व्याकरणेन शुद्धम् = स्वच्छं प्रवर्तते= सम्पद्यते, इति दिक् ॥ १८ ॥

इति व्याख्यानमपि केषांचनासद्ग्रह एव । अत्र 'प्रत्यस्तमितभेदाया' इति पाठकल्पे व्यपगतभेदा सा यदि परावाक्, तदा तस्या उत्तमं रूपमखण्डत्वादि ग्राह्यम्, तद् व्याकरणेन ज्ञायते, इति विवक्षितोऽर्थः ।

वस्तुतः 'प्रत्यस्तमितरूपाया' इति पाठः शोभनः । व्याकरणाज्ञानेन-अज्ञातविशेषस्वरूपायाः साध्वसाधु - स्थूलसूक्ष्म - सक्रमनिष्क्रमोभय-साधारणाया निर्विशेषाया वाचो यत् - साधुत्वाखण्डत्वादिविविक्तमुत्तमं विशिष्टं रूपं, यच्च शुद्धं, तद् व्याकरणेन प्रकाश्यते, इति पर्यवसितोऽर्थो ग्राह्यः ।। १८ ।।

व्याकरण से शब्द के उत्तम व शुद्ध स्वरूप के प्रकाशन में अग्नि का दृष्टान्त जैसा तलस्पर्शी है, वैसा 'अस्मिन्' पाठ नहीं । इसके किये गये व्याख्यान के अनुसार यह सर्वथा अप्रासङ्गिक हो जाता है । साथ ही यहाँ 'अस्मिन् - तमसि' का वैकृतध्वनिरूप अन्धकार अर्थ किया गया है, जो कि सर्वथा अयुक्त है, पूर्व में कहीं वैकृतध्वनि का प्रसङ्ग नहीं है, जिसका कि संनिकृष्ट वस्तु विशेष का वाचक 'इदम्' शब्द से ग्रहण किया जा सके। 'विवर्तते' यह भी प्रक्षिप्त पाठ है, क्योंकि प्रकृत - व्याकरण के प्राशस्त्य प्रतिपादन में विवर्तवाद की कोई प्रसङ्गसङ्गति नहीं, सर्वथा अप्रासङ्गिक ही है ।। १८ ।।

वैकृतं समतिक्रान्ता मूर्तिव्यापारदर्शनम् ।
व्यतीत्यालोकतमसी प्रकाशं यमुपासते ॥ १९ ॥

प्रत्येकार्थप्रकाशिका

वैकृतमिति - वैकृतम् = तदाख्यं नादम्, समतिक्रान्ताः = अतीत्य वर्तमाना मध्यमादिवाचः, आलोकतमसी व्यतीत्य = त्यक्त्वा, मूर्तिः = स्वकीयाखण्डत्वादिः, व्यापारः =

आनन्दा

मध्यमादिवाचां वैकृतध्वनिधर्म 'द्रुतादिवृत्तिभेद' रहितशुद्धस्वरूपस्य बोधकत्वव्यापारस्य च प्रकाशकत्वेन प्रकारान्तरेण व्याकरणस्य तदेव प्राशस्त्यमाह - 'वैकृतमिति' ।

अन्वयः - वैकृतं समतिक्रान्ताः आलोकतमसी व्यतीत्य मूर्तिव्यापारदर्शनम् यम् प्रकाशम् उपासते ।

व्याख्या - वैकृतम् = वैकृतध्वनिकृतं द्रुतादिवृत्तिभेदम् समतिक्रान्ताः = अतीताः, यद्वा अनभिव्यञ्जकत्वेन वैकृतध्वनिमतिक्रम्य स्थिताः, मध्यमादयो वाचः, आलोकतमसी = आलोकश्च तमश्च उभे, व्यतीत्य = अनपेक्ष्य मूर्तिव्यापारदर्शनम् = मूर्तिश्च व्यापारश्च तयोर्दर्शनम् = दर्शनकारणम्, यं प्रकाशम् = व्याकरणरूपम् उपासते = अपेक्षन्ते, तद् व्याकरणमिति वक्ष्यमाणेनान्वयः कर्तव्यः । दर्शनमिति करणे ल्युट् - न भावे, व्याकरण-स्तुतिप्रकरणबलात् ।

सूर्यमाया

पूर्वोक्त अग्निदृष्टान्त की उपपत्ति के रूप में [वैकृतध्वनि का अविषय - 'मध्यमा' आदि वाक् के स्वरूप व क्रिया का बोधक] - व्याकरण को आलोक से विलक्षण प्रकाश रूप सिद्ध करते हैं - ''वैकृतम्' इत्यादि ।

अर्थ : - वैकृतध्वनि को अतिक्रमण करके स्थित अर्थात् वैकृतध्वनि का अविषय जो 'मध्यमा' आदि सूक्ष्म शब्द हैं, वे स्वरूप और अर्थवाचकत्व - व्यापार को प्रकाशित करनेवाले, आलोक व अन्धकार से विलक्षण - जिस प्रकाश की अपेक्षा करते हैं, वह प्रकाश - व्याकरण है ।

घटाभिव्यङ्ग्येन घटत्वावच्छिन्नबोधनम् - पटाभिव्यङ्ग्येन पटत्वावच्छिन्नबोधनञ्चेत्यादि, तयोर्दर्शनम् = ज्ञापकं यं प्रकाशम् = व्याकरणाख्यम् उपासते = समाश्रयन्ते ।

विमर्शः - घटादयः स्वरूपप्रकाशाय - आदित्यादेरालोकमपेक्षन्ते, मण्यादयो नक्षत्रादयश्च स्वप्रकाशाय गुहायां निशायां वा तिमिरमपेक्षन्ते, मध्यमादयो वाचस्तु तदुभयं व्यतिरिच्य स्वस्वरूपाखण्डत्वादेः स्वक्रियाया वाचकत्वादेश्च प्रकाशाय विलक्षणं प्रकाशं व्याकरणमपेक्षन्ते-इत्यतो व्याकरणस्य प्राशस्त्यं प्रसङ्गसङ्गतं संघटते ।

अत्र वैकृतपदं वाक्प्रसङ्गाद् वैकृतध्वनिपरम् । 'मूर्तिव्यापारदर्शनम्' इत्येतद्घटकीभूतं मूर्तिपदं वाचः प्रसङ्गादेव शब्दस्वरूपपरम्, व्यापारपदमपि शब्दव्यापार-वाचकत्वादिपरम्, दर्शनपदं च करणसाधनत्वात्तयोर्ज्ञानसाधनपरम्, तच्च व्याकरणम् - तस्य प्राशस्त्यवर्णनप्रसङ्गादिति ध्येयम् ।

अयमर्थः - यथा जपाकुसुमाद्युपाधेरुपरागवशात् स्फटिकादौ लौहित्यादे-र्भानेऽपि स्वत उपाधितो विलक्षणं शुक्लत्वम्, तथा व्यञ्जकप्राकृतादिध्वनेरुप-

---

आशय : - मध्यमावाक् अपने वर्ण आदि क्रमरूप की अभिव्यक्ति के लिए प्राकृतध्वनि का विषय हो भी, किन्तु वैकृतध्वनि का विषय नहीं है । क्योंकि स्फोटरूप मध्यमा वाक् की अभिव्यक्ति प्राकृत से होती है, वैकृत से नहीं । यह अवश्य है कि प्राकृत से स्फोट की अभिव्यक्ति के अनन्तर उसकी चिर-अचिर काल तक स्थिति रूप द्रुत - विलम्बित आदि वृत्ति का कारण वैकृत है । वास्तविकता में तो मध्यमा वाक् - 'प्राकृत और वैकृत' दोनों का विषय नहीं है, ये दोनों मध्यमा के बाह्य उपाधि हैं । जैसे जपापुष्प के उपराग से स्फटिक में लौहित्य का भान होने पर भी वस्तुस्थिति में स्फटिक अपने स्वभाव से सदा स्वच्छ ही रहता है, वैसे ही प्राकृतध्वनि के उपराग से स्फोटात्मक मध्यमा में वर्ण-पद आदि क्रमरूप का भान भले ही होवे, किन्तु वह अपने स्वभाव से वस्तुतः सदा शुद्ध-निष्क्रम ही रहता है । तथापि वाच्यवाचकभाव की उपपत्ति के लिए वह व्यङ्ग्य के रूप में प्राकृत का विषय है, किन्तु स्फोट रूप की अभिव्यक्ति के लिए वैकृत का विषय नहीं है ।

क्रमभान से सर्वदा शून्य - 'परा - पश्यन्ती' वाक् तो दोनों ध्वनियों के विषयक्षेत्र से बहिर्भूत अत्यन्त ही दूर हैं ।

अयम्भावः - घटादिरूपम् आलोके, मण्यादिप्रकाशश्च अन्धकारे प्रस्फुरति, मध्यमावाचस्तु मूर्तिव्यापारौ उक्तोभया-

---

रागवशाद् व्यङ्ग्ये स्फोटे प्राकृतादिध्वनिधर्म - वर्णादिक्रमभेदभानेऽपि स्वतस्तस्या-खण्डत्वम्, व्यङ्ग्यरूपेण च वाचकत्वमविरुद्धम् । तदिदं मध्यमाया वाच उपाधिनिर्मुक्तायाः स्वरूपतोऽखण्डत्वम् - अभिव्यञ्जकसन्निधाने चाभि-व्यङ्ग्यत्वेन वाचकत्वं बोधकत्वं वा । तदित्थं स्वरूप-पररूपाभ्यां मध्यमाया वाचोऽखण्डत्वं स्वरूपं मूर्तिरित्युच्यते, वाचकत्वं च व्यापार उच्यते । तयोर्ज्ञापकं व्याकरणमिति विवक्षितोऽर्थः ।

इत आरभ्य द्वाविंशकारिकान्तं चतसृणां कारिकाणां सर्वासां ब्रह्मपरत्वेन व्याख्यानं तु नातीव हृद्यम् । 'तद् व्याकरणमागम्य' इति वक्ष्यमाणे वाक्यांशे तदितिपदस्य अव्यवहितेन 'व्याकरणम्' इति पदेन समानाधि-करणान्वयं विहाय तस्य व्यवहितेन 'परं ब्रह्म' इतिपदेनान्वये बीजं न विद्मः । तस्मात् परत्र वक्ष्यमाणस्य तदित्यस्याव्यवहितेन - 'व्याकरणम्'

आन्तर सूक्ष्मवाक् की इन सभी विधाओं का गमक तथा प्रकाशक यह व्याकरण ही है, अन्य कोई नहीं । यह व्याकरण की निजी विशेषता है । व्याकरण ही ऐसा विलक्षण प्रकाश है, जो शब्द की सभी विधाओं के यथावत् स्वरूप को तथा उसके कार्यव्यापार को प्रकाशित करता है । घट आदि वस्तुओं के रूप का प्रकाश आदित्य आदि आलोक से होता है, मणियों का प्रकाश अन्धकार में प्रस्फुट होता है, किन्तु शब्द के स्वरूप व व्यापार का प्रकाश उक्त दोनों से भिन्न व्याकरण रूप विलक्षण प्रकाश से होता है । यह व्याकरण की ही विशेषता है ।

यह ध्यान रहे कि यहाँ 'प्रकाशं यमुपासते' इस वाक्य में 'यम्' पद व्याकरण का परामर्शक है तथा 'मूर्तिव्यापारदर्शनम्' यह समस्त पद भी व्याकरण का ही समानाधिकरण विशेषण है, क्योंकि 'दर्शन' शब्द करण में ल्युट् प्रत्ययान्त है । इसमें यह उपपादक युक्ति है कि -

आगामी - 'तद् व्याकरणमागम्य' इस कारिका में 'तत्' पद का अव्यहित व्याकरण पद से अन्वय है, व्यवहित ब्रह्म पद से नहीं । शाब्दबोध में आसत्ति कारण है, अत एव - 'गिरि अग्निमान् है, देवदत्त ने भोजन किया' इस अर्थ में 'गिरिर्भुक्तम् अग्निमान् देवदत्तेन' यह वाक्य असाधु माना गया है, जबकि व्यवहित पद के साथ अन्वय करके भी अर्थबोध किया जा सकता है । अत एव

तिरिक्ते व्याकरणे ज्ञायेते, इति व्याकरणस्य प्राशस्त्यम्, इति दिक् ॥ १९ ॥

इत्यनेन साक्षादन्वय एव विवक्षितो बोध्यः । इत्थं च परत्र तदितिपदस्य व्याकरणपरामर्शकत्वे 'वैकृतम्' इत्याद्यासु पूर्वासु सर्वासु कारिकासु यत्पदमपि व्याकरणस्य परामर्शकं न ब्रह्मणः, यत्तदोर्नित्यसम्बन्धात् । एवं च प्राक्तन्यः सर्वाः कारिकाः साक्षाद् व्याकरणस्य प्राशस्त्यपराः । तथाविधस्यैवंभूतस्य प्रशस्ततमस्य व्याकरणस्य पार्यन्तिकं चरमं परमं फलं ब्रह्माधिगतिरिति तु सत्यम् । तथा च ब्रह्माधिगतिसाधनत्वेनापि व्याकरणस्य प्राशस्त्यं प्रसिध्यतीति विवक्षितसकलेष्टसिद्धिर्न नः प्रतिकूलम् । तदेतद् वक्ष्यते - "तद् व्याकरण-मागम्य" इत्यादिना ॥ १९ ॥

अव्यवहित व्याकरण पद के साथ साक्षात् अन्वय छोड़कर व्यवहित ब्रह्म पद के साथ अन्वय करना प्रमाणसंगत नहीं है । साथ ही प्रकरण भी व्याकरण का प्राशस्त्य वर्णन है, अत एव यहाँ 'तत्' यह पद व्याकरण का परामर्शक है । फलतः प्रकृत १९ से २२ तक की कारिकाओं में 'यत्' पद व्याकरणपरक ही है, यत्-तद् का नित्य सम्बन्ध होता है, यत् पद से जो गृहीत होता है, वही तत् पद से गृहीत होता है । अत एव ये चारों कारिकाएँ व्याकरण का प्राशस्त्यपरक हैं ।

यहाँ एक अन्य अर्थ भी किया गया है कि - "वैकृत अर्थात् माया के परिणाम में होनेवाला परिच्छिन्न जगत्रूप व्यापार के अनुभव को अतिक्रान्त व अभेद दर्शन में व्यवस्थित योगी जन आलोक रूप विद्या तथा तमःस्वरूप अविद्या का अविषय जिस परब्रह्म की उपासना तथा साक्षात्कार करते हैं ।" किन्तु यह अर्थ उपर्युक्त हेतुओं से व्याकरण के प्राशस्त्य वर्णन प्रसङ्ग में प्रकरण के अनुरूप नहीं है, क्लिष्ट कल्पना ही है । भले ही आगामी 'तद् व्याकरणमागम्य' इस कथन के अनुसार व्याकरण ब्रह्म की प्राप्ति का साधन है, इसका भी परमलक्ष्य ब्रह्मप्राप्ति ही है, किन्तु यहाँ समस्त सन्दर्भ व्याकरण का प्राशस्त्य बोधक है, मुख्यतः ब्रह्मपरक नहीं है । आगामी कथन से भी ब्रह्म की प्राप्ति का हेतु होने से भी व्याकरण का प्राशस्त्य ही सिद्ध होता है ॥ १९ ॥

यत्र वाचो निमित्तानि चिह्नानीवाक्षरस्मृतेः ।
शब्दपूर्वेण योगेन भासन्ते प्रतिबिम्बवत् ॥ २० ॥

प्रत्येकार्थप्रकाशिका

यत्रेति - यत्र = व्याकरणे वाचः = मध्यमावाचः निमित्तानि= वर्णपदवाक्य-प्रकृति-प्रत्ययादीनि, अक्षरस्मृतेः = वास्तविकाकाशवृत्त्यक्षराणां स्मरणस्य चिह्नानीव = लिपय इव शब्दपूर्वेण

आनन्दा

मध्यमाया वाचोऽखण्डत्वमुपपादयितुं व्याकरणव्युत्पाद्यप्रकृतिप्रत्ययादेर्बिम्बप्रतिबिम्बभावेन कल्पितत्वं निरूपयति - 'यत्र' इति ।

अन्वयः - यत्र वाचः निमित्तानि अक्षरस्मृतेः चिह्नानि इव शब्दपूर्वेण योगेन प्रतिबिम्बवत् भासन्ते ।

व्याख्या - यत्र = यस्मिन् व्याकरणे प्रतिपाद्यानि वाचः = मध्यमायाः निमित्तानि = ज्ञानकारणानि प्रकृतिप्रत्ययादियोगरूपाणि अक्षरस्मृतेः = वास्तविकाक्षरस्वरूपज्ञानस्य चिह्नानि = संकेतरूपाणि लिपय इव सन्ति, तानि च शब्दपूर्वेण योगेन = प्रकृतिप्रत्ययव्युत्पादनेन प्रतिबिम्बवत् = दर्पणादौ प्रतिरूपवत् भासन्ते = प्रतिभान्ति, 'तद् व्याकरणम्' इति वक्ष्यमाणमिहापकृष्य अन्वयः कर्तव्यः ।

सूर्यमाया

शब्द के अखण्डत्व की उपपत्ति के रूप में प्रकृति-प्रत्यय योग को लिपि व प्रतिबिम्ब की भाँति शब्दज्ञान का कल्पित साधन बताते हैं - 'यत्र' इत्यादि ।

अर्थ : - जिस व्याकरण में मध्यमा वाक् के ज्ञान के निमित्त 'प्रकृति - प्रत्यय' आदि प्रक्रिया अक्षरों के बोध के चिह्नरूप - 'लिपि' की भाँति कल्पित हैं तथा जो अवयव विभाग मध्यमा वाक् में 'पूर्व प्रकृति और उत्तर प्रत्ययों के योग से' प्रतिबिम्ब के सदृश भासित होते हैं, वह यह व्याकरण है ।

योगेन = प्रकृतिप्रत्ययादिव्युत्पादनेन प्रतिबिम्बवत् = प्रतिच्छाया इव भासन्ते = ज्ञायन्ते ।

विमर्शः - लिपयो यथा रेखागवयन्यायेन वास्तविकाक्षराणां 'क च ट त पादि' वर्णानां स्वरूपस्य परिचायकानि संकेतरूपाणि सन्ति न त्वक्षराणि, तथा प्रकृतयो धातु-प्रातिपदिकानि, प्रत्ययाश्च तिङ्सुपः कृत्तद्धितादयश्च मध्यमाया अखण्डपदवाक्यात्मिकाया वाचः - परिचायकानि - उपलक्षणानि सन्ति, न तु स्वरूपलक्षणानि । तानि हि - वर्ण-पद-वाक्य-प्रकृति-प्रत्ययाद्यवयवविभागकल्पनया पदे प्रकृतिप्रत्यययोगेन वाक्यस्फोटे - 'मध्यमानादे' प्रतिबिम्बवत् व्यञ्जकोपाधिकल्पितानि भान्ति । यथा हि दर्पणे जले वा सूर्यचन्द्रादिप्रतिबिम्बं बिम्बप्रतिरूपं बिम्बपरिचायकं भवदपि

आशय : - जैसे देवनागरी, ब्राह्मी आदि लिपियाँ वस्तुतः अक्षर नहीं हैं, किन्तु वे वास्तविक अक्षरों के ज्ञापक हैं, वास्तविक अक्षर वे हैं जो उच्चारण से हृदयाकाश में अभिव्यक्त होते हैं, तथापि लिपियाँ वास्तविक अक्षरों का संज्ञापक (पहचान कराने वाला) एक संकेत रूप चिह्न हैं । अतः जनव्यवहार में प्रतीक रूप में उनका भी अक्षरव्यवहार होता है, वैसे ही व्याकरण में कल्पित मूलभूत शब्द- 'प्रकृति' और प्रत्ययों के पूर्वापर योग से किया गया पदों का व्युत्पादन तथा पदों के पूर्वापर प्रयोग से वाक्यों का व्युत्पादन मध्यमावाक् - 'स्फोट' का ज्ञापक एक संकेत रूप चिह्न है, जोकि मध्यमा वाक् में प्रतिबिम्बरूप में भासित होते हैं, क्योंकि व्यञ्जक ध्वनि के वर्ण आदि रूप से प्रतिबिम्बित ही व्यङ्ग्य स्फोट का भान होता है । जैसे गवय का कल्पित काष्ठपट्ट में रेखामय चित्र वास्तविक गवय का ज्ञान करा देता है, वैसे प्रकृति प्रत्यय के योग द्वारा कल्पित पद आदि भी अखण्ड पद और वाक्य रूप वास्तविक शब्द का ज्ञान करा देता है । व्याकरण से प्रकृति प्रत्यय की प्रक्रिया ज्ञान द्वारा जो निर्विभाग वास्तविक शब्द का ज्ञान कराया जाता है, उससे शब्द के वास्तविक 'अखण्डत्व' स्वरूप की हानि नहीं होती है; क्योंकि शब्द की व्युत्पत्ति प्रक्रिया कल्पित है ।

अयमाशयः - व्याकरणे प्रकृतिप्रत्ययादिव्युत्पादनं मध्यमावाचः स्मरणार्थं चिह्नम्, न तु वास्तविकमिति तस्या अखण्डत्वात् अक्षरस्य लिपिरिवेति ॥ २० ॥

न विम्बरूपम्, तथा वर्ण-पद-प्रकृति-प्रत्ययादिविभागा व्यञ्जकोपाधिकल्पिता व्यङ्ग्ये स्फोटे भासमाना व्यङ्ग्यस्य स्फोटस्य प्रत्यायका भवन्तोऽपि वस्तुतो न तत्स्वरूपा इति मध्यमाया वाचः स्फोटस्य नाखण्डत्वहानिरिति पर्य्यवसितोऽर्थः ।

एवं हि कल्पितावयवयोगेन पदवाक्यव्युत्पत्त्या पदे वाक्ये च भासमानानि तानि प्रकृतिप्रत्ययादीनि व्याकरणशास्त्रैकज्ञाप्यानि, इति व्याकरणस्य प्राशस्त्य-मपि प्रस्फुटम् ॥ २० ॥

इस कारिका में 'यत्' पद से ब्रह्म का ग्रहण कर ब्रह्मपरक व्याख्यान करना प्रकरण के अनुरूप नहीं है । प्रकृत सभी कारिकाओं में 'यत्' पद व्याकरण का परामर्शक है, क्योंकि आगामी 'तद् व्याकरणमागम्य' इस कारिका में 'तत्' पद अपने अव्यवहित व्याकरण पद से अन्वित होकर व्याकरण का परामर्शक है । अत एव पूर्व में 'यत्' पद भी व्याकरण का ही बोधक है । यह पहले कहा जा चुका है । फलतः इससे भी व्याकरण का प्राशस्त्य सिद्ध होता है ॥ २० ॥

अथर्वणामङ्गिरसां साम्नामृग्यजुषस्य च ।
यस्मिन्नुच्चावचा वर्णाः पृथक् स्थितपरिग्रहाः ॥ २१ ॥

प्रत्येकार्थप्रकाशिका

अथर्वणामिति - ऋक् च यजुश्चेति द्वन्द्वे "द्वन्द्वाच्चुदषहान्ते" ति टचि - ऋग्यजुषः, तस्य, अन्यत् सर्वं सुगमम्, सर्वासां

आनन्दा

वेदभेदेन शाखाभेदेन च स्वरवर्णादिप्रयोगभेदव्यवस्थाया याथातथ्येन बोधकतयाऽपि व्याकरणस्य प्राशस्त्यं वर्णयति - अथर्वणामिति ।

अन्वयः - अङ्गिरसाम् अथर्वणाम् साम्नाम् ऋग्यजुषस्य च उच्चावचाः वर्णाः यस्मिन् पृथक्स्थितपरिग्रहाः ।

व्याख्या - अङ्गिरसाम् = तदाख्यऋषिसम्बन्धिनाम् अथर्वणाम् = अथर्ववेदमन्त्राणाम्, साम्नाम् = सामवेदमन्त्राणाम्, ऋग्यजुषस्य = ऋक् च यजुश्च तयोः समाहारस्तस्य, समाहारे एकत्वम्, ऋग्वेदमन्त्राणां यजुर्वेदमन्त्राणां च उच्चावचाः = उदात्तानुदात्तादिस्वरभेदविशिष्टा लोपागमादिविकारभेदविशिष्टाः

सूर्यमाया

अलग अलग वेदों तथा शाखाओं में विविध प्रकार - वर्ण-पद आदि के व्यवस्थित स्वरूप का प्रतिपादक होने से व्याकरण का प्राशस्त्य स्पष्ट करते हैं- 'अथर्वणाम्' ।

अर्थ : - अङ्गिरा ऋषि के अथर्ववेदमन्त्रों तथा सामवेद, ऋग्वेद और यजुर्वेद मन्त्रों के एक दूसरे से भिन्न - विविध प्रकार - वर्ण व पद जिस शास्त्र में पृथक् व्यवस्थित स्वरूप प्रतिपादित हैं, वह व्याकरण है ।

आशय : - जिस वेद में जिस शाखा में मन्त्रों के जो वर्ण तथा पद जिस स्वर और 'लोप-आगम-आदेश रूप' विकार से युक्त उपदिष्ट हैं, तो भिन्न वेद और शाखा आदि में उससे भिन्नरूप वर्ण-पद-स्वर आदि उपदिष्ट पाये जाते हैं, अर्थात् चारों वेदों के कतिपय वर्णों और पदों के स्वरूप सम्प्रदायभेद से एक दूसरे से विलक्षण भी होते हैं, जो सम्प्रदायभेद से सब साधु हैं । जिस वेद व शाखा

श्रुतिस्मृतीनामिति यावत्, उच्चावचाः = स एव क्वचित् उदात्तः क्वचित् अनुदात्तः, क्वचित् 'आत्मना' अन्यत्र 'त्मना',

---

वर्णाः यस्मिन् = 'प्रथमं छन्दसामङ्गं प्राहुर्व्याकरणं बुधाः'' इत्यत आरभ्य वर्ण्यमाने पूर्वप्रकृते व्याकरणे पृथक्स्थितपरिग्रहाः = 'वेदभेद-शाखाभेदहेतुक'-विविक्तस्वरूपाः प्रक्रियाभिर्व्युत्पादिताः सन्ति । तदिदमग्रे वक्ष्यते - 'यदेकं प्रक्रियाभेदै' - रिति ।

विमर्शः - यस्मिन् वेदे यस्यां शाखायां ये मन्त्रवर्णा यादृशस्वरविशिष्टा यादृशवर्ण-विकारविशिष्टाः सम्प्रदायभेदेन समाम्नातास्ते तथाभूता व्याकरणे पृथक् पृथक् विविच्य सांकर्यरहिताः प्रक्रियाभिर्व्यवस्थापिताः । तथाहि - यजुषि कठशाखायां दृष्टे 'देवायन्तो यजमानाः', 'सुम्नायन्तो हवामहे' इति मन्त्रे देवशब्दात् सुम्नशब्दाच्च क्यचि प्रत्यये कृते ''देवसुम्नयोर्यजुषि काठके'' इति सूत्रेणानयोः शब्दयोरात्वविधानेन 'देवायन्तः सुम्नायन्त' इति रूपे सिध्यतः, किन्तु सामवेदमन्त्रे 'देवाञ्जिगाति सुम्नयुः' इत्यत्र 'सुम्नयुः' इत्यत्र प्रयोगे सुम्नशब्दात् क्यचि नात्त्वं विधीयते । किंच 'गामस्य तदहः सभायां दीव्येयुः' इति ब्राह्मणविषये प्रयोगे द्यूतार्थस्य दिवो योगे ''द्वितीया ब्राह्मणे' इति सूत्रेण कर्मणि गोशब्दात् द्वितीयाविधानेन 'गाम्' प्रयोगः

सम्प्रदाय में जो स्वर - वर्ण विकार विहित है, वह उसी में साधु माना गया है, उससे भिन्न में वह असाधु है ।

जैसे कि 'सुम्नायन्तो यजामहे' इस मन्त्र में सुम्न शब्द से क्यच् प्रत्यय परे सुम्न के अन्त वर्ण - 'अकार' का आकार आदेश यजुर्वेद की कठशाखा में ही विहित होने से 'सुम्नायन्तः' यह प्रयोग साधु है, उससे भिन्न सामवेद में नहीं । सामवेद में तो 'देवाञ्जिगाति सुम्नयुः' इस मन्त्र में आकार आदेश से रहित 'सुम्नयुः' ऐसा ह्रस्व अकार प्रयोग ही साधु है ।

इसी प्रकार 'अग्निर्मूर्धा दिवः ककुत्पतिः' इत्यादि मन्त्र में केवल यज्ञकर्म में एकश्रुति स्वर (उदात्त आदि स्वरभेदरहित) विहित है, किन्तु जप व स्वाध्याय आदिकाल में यथास्थल तीनों स्वरों का प्रयोग ही साधु होता है । ऐसे ही 'आ तू न इन्द्रः' इत्यादि ऋग्वेद के मन्त्र में ही 'तु' के उकार का दीर्घ विधान होने से 'तू' दीर्घविशिष्ट प्रयोग साधु है, अन्य में नहीं । इसी प्रकार केवल मन्त्रभाग

इत्यादिरूपा वर्णाः यस्मिन् = व्याकरणे पृथक्स्थितपरिग्रहाः= असंकीर्णाः, यथावत् प्रतिपादिता इत्यर्थः ॥ २१ ॥

~✡~

साध्यते, अन्यत्र तु ''दिवस्तदर्थस्य' इत्यनेन 'शतस्य दीव्यति' इत्यादौ कर्मणि षष्ठी विधीयते ।

तथा 'अग्निर्मूर्धा दिवः ककुत्पतिः' इति यजुर्मन्त्रे यज्ञक्रियायामेकश्रुतिः ''यज्ञकर्मण्यजपन्यूङ्खसामसु' इत्यनेन विधीयते, तेन त्रैस्वर्यं न भवति । जपादिषु स्वाध्यायकाले च त्रैस्वर्यमेव भवति ।

एवमेव सुब्रह्मण्याख्ये निगदे - 'सुब्रह्मण्यो३म्' इत्यत्र ''यज्ञकर्मणि'' इति प्राप्ता एकश्रुतिः ''न सुब्रह्मण्यायाम्'' इत्यादिसूत्रेण निषिध्यते, स्वरितस्य तूदात्तस्वरो विधीयते, तत्रैव 'देवा ब्रह्माण आगच्छत' इत्यत्र तु ''देव-ब्रह्मणोरनुदात्तः'' इत्यनेन स्वरितस्यानुदात्तो विधीयते । इत्येवं वेदविभागेन शाखाविभागेन च स्वराणां वर्णविकाराणां विभक्त्यादीनां च यथेष्टं याथातथ्येन व्यवस्था व्याकरणेन क्रियते, इत्युपपन्नं व्याकरणस्य प्राशस्त्यम् ॥ २१ ॥

~✡~

में 'आत्मन्' शब्द से तृतीया विभक्ति के एकवचन में शब्द के आकार का लोप विधान से 'त्मना' यह प्रयोग साधु है, अन्यत्र तो 'आत्मना' प्रयोग ही साधु होता है ।

इन उदाहरणों से यह स्पष्ट है कि वेदों में सम्प्रदायभेद से उदात्त आदि स्वरों का यथास्थल प्रयोग व्यवस्थित व नियत है । एक ही वर्ण किसी शाखा में उदात्त होता है तो उससे भिन्न शाखा में अनुदात्त होता है ।

इस प्रकार मन्त्रों के वर्णों व पदों का जैसा जो व्यवस्थित स्वरूप है, उसका असंकीर्ण - स्पष्ट - विश्लेषण तथा निरूपण व्याकरणशास्त्र से ही होता है । इससे व्याकरणशास्त्र का प्राशस्त्य स्पष्ट सिद्ध होता है ॥ २१ ॥

~✡~

यदेकं प्रक्रियाभेदैर्बहुधा प्रविभज्यते ।
तद् व्याकरणमागम्य परं ब्रह्माधिगम्यते ॥ २२ ॥

प्रत्येकार्थप्रकाशिका

यदिति - यद् एकं = व्याकरणम् - 'भवती'त्यादौ पदे

आनन्दा

भाष्यकृदुक्त-'रक्षोहादि'प्रयोजननिरूपणमुखेन व्याकरणस्य प्राशस्त्यमुपपाद्योपसंहारे ब्रह्माधिगमहेतुत्वेनापि तस्य प्राशस्त्यमाह - 'यदेकम्' इति ।

अन्वयः - यद् एकम् प्रक्रियाभेदैः बहुधा प्रविभज्यते, तद् व्याकरणम् आगम्य परं ब्रह्म अधिगम्यते ।

व्याख्या - यत् = 'प्रथमं छन्दसामङ्गम्' इत्यत आरभ्य पूर्ववर्णितं यद् व्याकरणम् तद् यद्यपि वस्तुत एकम्, तथापि प्रक्रियाभेदैः = शब्दव्युत्पत्तिसाधनिकायाः प्रकारभेदैः बहुधा = वैदिकलौकिकादिरूपेणा नैकधा प्रविभज्यते= शाकटायनैन्द्रचान्द्रादि - तत्तन्नामभिः प्रविभक्तं भवति, तत् = उक्तस्वरूपं व्याकरणम् आगम्य = आ समन्तात् साकल्येन ज्ञात्वा परम्= अपास्तसमस्तविशेषं निरतिशयं ब्रह्म = शब्दाख्यम् अधिगम्यते = प्रतिपद्यते ।

विमर्शः - असाधुभ्यो विविच्य साधुशब्दा ज्ञायन्तेऽनेन तद् व्याकरणं शब्दानुशासनं नाम शास्त्रं सामान्यतो यद्यप्येकम्, किन्तु शब्दव्युत्पत्तिसाधनिकायाः प्रकारभेदैस्तद् बहुधा विभक्तं भवति । स च प्रकारभेदः प्रथमः - आद्यप्रवक्तु र्बृहस्पतेः शब्दपारायणस्य धातुपाठगणपाठादिवद्रूपसादृश्यमूलकः प्रतिपदपाठरूपः । यथाऽह भाष्ये - ''बृहस्पतिरिन्द्राय.....

सूर्यमाया

भाष्यकार से निर्दिष्ट - 'रक्षा-ऊह-असन्देह' आदि प्रयोजनों के निरूपण द्वारा व्याकरण का प्राशस्त्य सिद्ध कर अब मोक्ष के हेतुरूप से भी व्याकरण के प्राशस्त्यवर्णन का उपसंहार करते हैं - 'यदेकम्' ।

अर्थ : - जो व्याकरण वस्तुतः एक होने पर भी शब्द के रूपसाधन की प्रक्रियाओं के भेद से नाना नाम से विभक्त हो जाता है, उस व्याकरण का सम्यक् ज्ञान पाकर परब्रह्म का ज्ञान प्राप्त करता है, अर्थात् मोक्ष की प्राप्ति करता है ।

प्रक्रियाभेदैः = क्वचित् - लट् तस्य स्थाने तिप्, क्वचित्तिपः

शब्दपारायणं प्रोवाच'' इति । ततश्च इन्द्रस्य वाचः प्रकृति-प्रत्यय विभागरूपः प्रकारः, यथाह तैत्तिरीयसंहिता - ''वाग्वै पराच्यव्याकृताऽवदत् तामिन्द्रो मध्यतोऽवक्रम्य व्याकरोत्'' (६-४-७) इति । एतच्च व्याचख्यौ सायण ऋग्भाष्ये - ''तामखण्डां वाचं मध्ये विच्छिद्य प्रकृतिप्रत्यय - विभागं सर्वत्राकरोत्'' इति । तदेतद् ऐन्द्रं व्याकरणं बृहस्पतेः प्रतिपदपाठस्यैव परिष्कृतः प्रकारः । प्रतिपदपाठे दुरूहतां समीक्ष्य प्रकृतिप्रत्ययविभागेन शब्दव्युत्पत्त्या पदसाधुत्वनियमरूपः प्रकारः । तत्रापि प्रातिशाख्यादि छान्दसं व्याकरणं बाहुलकबलेन बहुशः पदपाठेन सन्धिविच्छेदविधिना व्युत्पादयति शब्दान्, किन्तु पाणिनीयादिकं तु व्याकरणम् उत्सर्गापवादन्यायेन सामान्यविशेषलक्षणैरव्यभिचरितैर्विधिभिः शब्दान् व्युत्पादयति । तत्रापि स्थान्यादेशविनिमयेन शब्दव्युत्पत्तिप्रक्रियापि लक्ष्यते । क्वचित् तिपो लट् संज्ञा, पाणिनीये तु लटः स्थाने तिबादेशः । तिपो लट्संज्ञायां तु लिडादिषु दोषः, लडादीनां दशविधलकाराणां तिबाद्यादेशे तु क्वापि दोषो न, लाघवं च । तदित्थं व्याकरणमेकमपि सिद्धशब्दानां साधनावस्थाप्रक्रियाभेदै र्विभज्यते । तत्र उत्सर्गापवादभूतैः सामान्यविशेषरूपै र्लक्षणैः शब्दव्युत्पत्तेः साधनं तदिदं पाणिनीयमव्यभिचारि सर्वसंग्राहकमव्याप्त्यादिदोषत्रयशून्यमत एव लक्षणात्मकं सूत्रं ''संज्ञा च परिभाषा च'' इत्युक्तिदिशा षड्विधं, तन्मूलकं कात्यायन-वार्तिकं भाष्यं चेति त्रिमुनि व्याकरणं प्रशस्ततमं राजते । यद्यपि पञ्चाशदधिका व्याकरणप्रवर्तका आचार्याः श्रूयन्ते, किन्तु समासेनाष्टधा विभक्तं हि

आशय : - व्याकरण वस्तुतः एक है, क्योंकि सबका उद्देश्य एक है - शब्दानुशासन । अर्थात् शब्द के साधु स्वरूप का व्युत्पादन । किन्तु तत्तद् आचार्यों की शब्दव्युत्पत्ति की प्रक्रिया परस्पर भिन्न होने से प्रवर्तक आचार्यों के नाम पर आधारित- 'व्याकरण' नाम भेद तथा प्रक्रिया भेद से विभक्त हो जाता है ।

प्रथमतः शब्द द्विविध है - वैदिक और लौकिक । जैसा कि भाष्य में प्रश्न कर उत्तर वाक्य से कहा है - 'केषां शब्दानाम्? लौकिकानां वैदिकानां च'' । अतः शब्द के भेद से व्याकरण भी द्विविध हो जाता है - लौकिक और वैदिक । इनमें वैदिक व्याकरण के प्रवक्ता आचार्य हैं - इन्द्र, चन्द्र, शाकल्य, शाकटायन प्रभृति ।

लट्संज्ञा, इत्याद्युपायभैदैः, बहुधा विभज्यते = विभक्तं भवति,

व्याकरणम्, तथाह वोपदेवः -

इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायनः ।
पाणिन्यमरजैनेन्द्रा जयन्त्यष्टादिशाब्दिकाः ।। इति ।

तत्र शाकटायनस्य ऋक्तन्त्रम् शाकल्यादेश्च प्रातिशाख्यं केवलं छान्दसम्, काशकृत्स्नस्य व्याकरणं केवलं लौकिकम्, पाणिनीयं तु लौकिकं वैदिकं चोभयात्मकं व्यापकम्, अतोऽपि तत् सर्वतः प्रशस्ततमम् ।

इदमत्रावधातव्यम् - अत्र व्याकरणे प्रक्रियाशब्दः शब्दानां साधनाऽवस्थायां मूलावस्थातो रूपसिद्धिपर्यन्तं क्रियमाणविधिपरम्पराया बोधकः । इदं तु न विस्मर्तव्यं यदिदं व्याकरणप्रकरणम् ।

''प्रथमं छन्दसामङ्गं प्राहुर्व्याकरणं बुधाः'' इत्युपक्रम्य -

''तत्त्वावबोधः शब्दानां नास्ति व्याकरणादृते'' इति, ''तद् द्वारमपवर्गस्य'' इति, ''एषा विद्या परायणम्'' इति ''इदमाद्यं पदस्थानम्'' इति च पुनः पुनरभ्यासेनोक्त्या ''तद् व्याकरणमागम्य'' इत्युपसंहारेण च सर्वमिदं व्याकरण-प्रकरणमिति निर्विवादम् ।

तस्मादत्र प्रक्रियाशब्दः शब्दव्युत्पत्तेः साधनाय विधिप्रणालीपरः, न तु बन्धमोक्षव्यवस्थापरः । द्विविधं हि सिद्धं साधु पदम् - सुबन्तं तिङन्तं च । तत्र प्रथमे प्रकृतिः प्रातिपदिकं नामाख्यम्, प्रत्ययः सुब्विभक्तिः ।

इनमें शाकल्य ऋक् प्रातिशाख्य के प्रवक्ता हैं, शाकटायन ऋक्तन्त्र के प्रवक्ता हैं, अन्य आचार्य तत्तद् नाम से ख्यात ऐन्द्र, चान्द्र आदि व्याकरण के प्रवक्ता हैं ।

वैदिक वैयाकरणों में इन्द्र, चन्द्र, शौनक प्रभृति बृहस्पति के प्रतिपद पाठ के अनुसारी हैं, किन्तु इनकी प्रक्रिया - पद पाठ द्वारा प्रकृति प्रत्यय के विभाग से शब्द की व्युत्पत्ति है ।

काशकृत्स्न प्रभृति लौकिक व्याकरण के प्रवक्ता हैं, आपिशल तथा पाणिनि प्रभृति लौकिक और वैदिक दोनों व्याकरण के प्रवक्ता हैं । जिनमें पाणिनीय व्याकरण उत्सर्ग और अपवाद रूप - 'सामान्य - विशेष' सूत्रों से प्रकृति प्रत्यय के योग द्वारा शब्द की व्युत्पत्ति का साधक है । इसमें 'संज्ञा-परिभाषा - विधि' आदि षड्विध सूत्र हैं, जिनके द्वारा 'धातु और प्रातिपदिक' द्विविध प्रकृति से प्रत्यय-आगम और आदेश का विधान कर अव्यभिचरित नियम प्रक्रिया से शब्द का व्युत्पादन किया है । इस प्रकार शब्द का द्विविध-भेद, प्रवर्तक आचार्यों का

तद् व्याकरणम् आगम्य = ज्ञात्वा मध्यमावागादिज्ञानद्वारा परं

द्वितीयस्मिन् - प्रकृति र्धातुः प्रत्ययश्च तिङ्विभक्तिः । पदस्यावयवविभाग-कल्पनया विभक्तयोस्तयोः प्रकृतिप्रत्यययो र्योगे सिद्धावस्थासम्पत्तिपर्यन्तं मध्ये याः साध्यावस्थास्तासु 'परनित्यान्तरङ्गापवादानाम्' इति परिभाषानियमेन पौर्वापर्य्येण जायमाना कार्यविधिप्रणाल्येवात्र व्याकरणे प्रक्रियाशब्देन व्यपदिश्यते, यया प्रणाल्या सिद्धाः शब्दाः साधवो भवन्ति । तथाहि 'रामः', 'भवति' इति साधुरूपसिद्धेः यः प्रकारविशेषः सा प्रक्रिया । सा च यथा - 'राम स्' इति मूलावस्थात आरभ्य 'रामः' इति रूपनिष्पत्तिपर्यन्तं मध्ये पदसंज्ञा-रेफादेश-विसर्गविधयः, 'भवति' इत्यत्र तु भू - लट्, तिप्, शप्, गुणः, अव्, इत्येते विधयः तत्तदवस्थासु क्रमशः क्रियन्ते । विधीनामियं क्रमप्रणाली शब्दसिद्धेः प्रक्रिया प्रोच्यते । प्रक्रियाज्ञानपुरःसरसाधुशब्दप्रयोगे हि धर्मः, ततश्च परब्रह्मावगतिरिति हृदयम् ।

नेदं योगशास्त्रम् - येनात्र योगस्याष्टाङ्गप्रक्रिया गृह्येत, नापि वेदान्तशास्त्रम्-येनात्र बन्धमोक्षव्यवस्थारूपा प्रक्रिया नीयेत ।

वस्तुतो बन्धमोक्षव्यवस्था नैव प्रक्रिया साधनावस्थारूपा । बन्धः कार्यमज्ञानस्य, तत्र प्रक्रिया हि - अनित्याशुचिदुःखानात्मसु नित्यशुचि-सुखात्मख्यातिरज्ञानस्य कार्यावस्थापरम्परा । मोक्षोऽपि फलं ज्ञानस्य । स च निवृत्तावरणब्रह्मरूपः । ब्रह्मविज्ञानादज्ञानावरणभङ्गे सिद्धब्रह्मस्वरूप - ताप्राप्तिः बन्धनिवृत्तिर्मोक्षः । तत्र हि प्रक्रिया - नित्यानित्यवस्तुविवेकः,

---

नामभेद, तथा प्रक्रियाभेद से व्याकरण का बहुविध भेद होने पर भी मुख्यतया व्याकरण - 'ऐन्द्र, चान्द्र आदि भेद से' अष्टविध वा नवविध है । व्याकरण के भेद में कारण वस्तुतः प्रवर्तक आचार्यों का नामभेद नहीं है, प्रक्रियाभेद ही मुख्य कारण है । इसलिए इस कारिका में 'प्रक्रियाभेदैः' यह कहा है ।

भिन्न भिन्न व्याकरण में शब्द के रूपसाधन की पृथक् पृथक् प्रणाली है, किसी में धातु से तिप् आदि प्रत्यय का विधान कर उसकी लट् संज्ञा की जाती है, तो अन्य किसी में धातु से लट् का विधान कर उसका तिप् आदि आदेश किया जाता है । किसी में 'इन्द्राणी' शब्द के साधन में 'इन्द्रम्-आनयति = जीवयति' ऐसा विग्रह करके ण्यन्त 'अन् प्राणने' धातु से कर्म में 'अण्' प्रत्यय और ङीप् प्रत्यय के विधान की प्रक्रिया है, तो उससे भिन्न में इन्द्र शब्द से 'ङीप्' प्रत्यय और 'आनुक्' आगम के विधान की प्रक्रिया है । ऐसे ही 'गिरिश'

ब्रह्म अधिगम्यते = प्राप्नोतीति दिक् ॥ २२ ॥

इहामुत्रार्थफलभोगविरागः, शमदमोपरतितितिक्षाश्रद्धासमाधानेतिसाधनषट्कसम्पत्ति र्मुमुक्षुत्वम्, ततो ब्रह्मजिज्ञासा - वेदान्तवाक्यमीमांसेत्यादयः । तथाहि - अज्ञानाद् बन्धः, ज्ञानान्मोक्ष इत्यस्तु बन्धमोक्षयो र्व्यवस्था, तत्र प्रक्रिया तु तत्साधनपरम्परा, नहि सैवेह प्रक्रिया विवक्षिता इति ध्येयम्, आस्तां तावत् । प्रकृते - उपक्रमोपसंहाराभ्यासैस्तात्पर्यनिर्णायकैः समस्तमिदं प्रकरणं व्याकरणपरम् । पूर्वत्र यत्पदं परत्र 'तद् व्याकरणमागम्य' इति तत्पदं च व्याकरणपरमेव नहि ब्रह्मपरम् । उपसंहारे "परं ब्रह्माधिगम्यते" इत्युक्त्या व्याकरणस्य मोक्षहेतुत्वमिति तु निर्विवादम् । परं तयापि मोक्षहेतुत्वोक्त्या व्याकरणस्य प्राशस्त्यमेव पर्यवस्यति ।

व्याकरणस्य मोक्षहेतुत्वं तु शब्दसिद्धिप्रक्रियाज्ञानपूर्वकसाधुशब्दप्रयोगजन्यपुण्येन वैखरीव्यतिरिक्त-सूक्ष्ममध्यमादिवाक्त्रितयपरिज्ञानसोपानप्रक्रिययेत्यलं पल्लवितेन ॥ २२ ॥

शब्द की व्युत्पत्ति में कहीं 'गिरौ शेते' यह विग्रह कर गिरि उपपद - 'शीङ्' धातु से औणादिक 'ड' प्रत्यय किया जाता है, तो अन्य किसी में गिरि शब्द से 'श' प्रत्यय किया जाता है ।

इसी तरह क्षत्रिय शब्द के साधन में किसी में क्षत्रशब्द से 'इय' प्रत्यय माना है, तो अन्य किसी में क्षत्र शब्द से 'घ' प्रत्यय तथा उसका 'इय' आदेश किया जाता है ।

अत एव विभिन्न आचार्यों का प्रक्रियाभेद ही व्याकरण के विभाग का मुख्य कारण है, परमार्थतः व्याकरण एक है ।

निष्कर्ष में शब्द की व्युत्पत्ति प्रक्रिया के ज्ञान का एक मात्र साधन व्याकरण है, अत एव व्याकरण के सम्यक् ज्ञान से सूक्ष्म 'मध्यमा' आदि त्रिविध आन्तरवाक् के ज्ञान द्वारा वैयाकरण क्रमशः शब्दब्रह्म से अभेद ज्ञान प्राप्त कर परब्रह्मस्वरूप मोक्षफल को प्राप्त कर लेता है, यह व्याकरण का प्राशस्त्य वर्णन है ॥ २२ ॥

नित्याः शब्दार्थसम्बन्धाः समाम्नाता महर्षिभिः ।
सूत्राणां सानुतन्त्राणां भाष्याणाञ्च प्रणेतृभिः ॥ २३॥

प्रत्येकार्थप्रकाशिका

ननु अनित्याः शब्दाश्चेद् तदा लोकाः प्रतिक्षणं नवं नवमुत्पादयिष्यन्ति, ततः शब्दानां व्याकरणेन अनुगन्तुमशक्यत्वात् किं व्याकरणेन, इत्यत आह 'नित्या' इति । अस्य व्याख्या स्पष्टैव । सूत्रकार - वार्तिककार - भाष्यकाराणां त्रयाणां मते शब्दः - अर्थः - सम्बन्धश्चेति त्रयोऽपि नित्या इति तात्पर्यम् । यदि शब्दा अनित्याः स्युस्तदा प्रतिक्षणम् उत्पत्तिमतां शब्दानाम्

आनन्दा

एतावता परिकरेण व्याकरणस्य प्रयोजनाभिधानमुखेन प्राशस्त्यमुपवर्ण्य व्याकरणेन शब्दस्य व्युत्पाद्यत्वेऽनित्यत्वापत्तिशङ्काभिया शब्दार्थसम्बन्धानां नित्यत्वमाह - 'नित्याः शब्दार्थसम्बन्धाः' इति ।

अन्वयः - सानुतन्त्राणां सूत्राणां भाष्याणां च प्रणेतृभिः महर्षिभिः शब्दार्थसम्बन्धाः नित्याः समाम्नाताः ।

व्याख्या - सानुतन्त्राणाम् = अनुतन्त्रैः - वार्तिकैः सहितानाम् सूत्राणां भाष्याणां च प्रणेतृभिः = रचयितृभिः महर्षिभिः = महामुनिभिः

सूर्यमाया

व्याकरण की प्रक्रिया द्वारा शब्द को व्युत्पन्न मानने पर प्रतिक्षण नव नव उत्पन्न अनित्य-अनन्त शब्दों का अनुगम दुष्कर होने से व्याकरण अनर्थक हो जायगा, इस आशङ्का के समाधान रूप में शब्द अर्थ और उनके सम्बन्ध को नित्य बताते हैं - 'नित्याः' इत्यादि ।

अर्थ : - सूत्र, वार्तिक और भाष्य के प्रणेता क्रमशः पाणिनि, कात्यायन और पतञ्जलि महर्षियों ने शब्द - अर्थ - और उनके शक्तिरूप सम्बन्ध को नित्य कहा है ।

असंख्यातत्वेन अनुगमासम्भवात् श्रीपाणिनेः सूत्रप्रणयनमेव व्यर्थं स्यात्, यदि नित्याः तदा तेषां व्यवस्थिततया अनुगमाय सूत्रप्रणयनं सार्थकम् । यद्वा "तदशिष्यं संज्ञाप्रमाणत्वात्" इति सूत्रमेव प्रमाणम्, "सिद्धे शब्दार्थसम्बन्धे" इति वदन् वार्तिककारोऽपि प्रमाणम्, "नित्येषु शब्देषु कूटस्थैरविचालिभि"-रित्यादि भाष्यकारोक्तमपि नित्यत्वेऽनुकूलम्, इत्याद्यूह्यम् ।

अत्रत्यविचारो वादिविजयाय वितन्यते - केचित्तु शब्द-पदेन शब्दत्वव्याप्य-कलशशब्दत्वजातिः, अर्थपदेन अर्थगत-घटत्वादिजातिर्बोध्यते । जातिरेव वाचिका, जातिरेव वाच्या, ते उभे नित्ये ।

पाणिनि-कात्यायन-पतञ्जलिभिः शब्दार्थसम्बन्धाः = शब्दा अर्थाः सम्बन्धाश्च नित्याः = अकृतकाः सिद्धाः समाम्नाताः = सिद्धान्तिताः ।

यद्वा - महर्षिभिः = मन्त्रद्रष्टृभिः 'वाचा विरूपनित्यया वृष्णे चोदस्व सुष्टुतिम्' (तैत्तिरीयसंहिता २-६-११) इत्यादिवचनेन, सूत्रकारेण - "तदशिष्यं संज्ञाप्रमाणत्वात्" इति सूत्रवचनेन, वार्तिककारेण - "सिद्धे शब्दार्थसम्बन्धे" इति वचनेन, भाष्यकारेण च - 'नित्येषु शब्देषु कूटस्थैरविचालिभिरनपायोपजन-विकारिभिर्भवितव्यम्' इति वचनेन शब्दार्थसम्बन्धाः नित्याः समाम्नाताः = श्रुतिषूपदिष्टाः पाणिन्यादिस्मृतिषु च स्मृता इत्यर्थः ।

आशय : - व्याकरण के प्रवर्तक तीनों मुनियों ने शब्द को, अर्थ को उनके अनादियोग्यतारूप शक्तिनामक सम्बन्ध को नित्य माना है ।

जैसे चक्षु, घ्राण आदि इन्द्रियों का अपने विषय - 'रूप, गन्ध आदि' के साथ 'ग्राह्य-ग्राहक, प्रकाश्य-प्रकाशकभाव' योग्यता रूप स्वाभाविक अनादि सम्बन्ध है, जो कि नियत है, नित्य है, वैसे घट-पट आदि शब्दों का अर्थों के साथ वाच्य- वाचकभाव व बोध्यबोधकभावरूप अनादियोग्यता सम्बन्ध नियत है, किसी की विवक्षा के अधीन- 'कृतक' नहीं है ।

ननु जाते र्वाचकत्वे तस्या नित्यत्वेन सदा विद्यमानतया सर्वदैव कथं नार्थबोध इति चेन्न; तस्या विद्यमानत्वेऽपि अभिव्यक्तेरभावात् । तथाहि-कलशशब्दत्वाश्रय-कलश-शब्दस्योच्चारणानन्तरं श्रावणज्ञानं यदि भवति, तदा तद्‌गतजातिरभिव्यज्यते, अनुच्चारणदशायां तदभिव्यञ्जक-शब्दव्यक्ते र्ज्ञानाभावेन जातेरपि ज्ञानाभावः ।

न च कम्बुग्रीवादिमद्व्यक्ते र्यावतामवयवानां युगपद विद्यमानतया तदारब्धोऽवयवी कम्बुग्रीवादिमान्, तस्मिन् घटत्वजातेः पर्य्याप्तत्वेन अवयविज्ञानेन तद्‌गतजातिरभिव्यज्यते

विमर्शः - शब्दार्थसम्बन्धानां नित्यत्वे व्याकरणे प्रथमं तावत् "तदशिष्यं संज्ञाप्रमाणत्वात्" इति सूत्रं प्रमाणम् । तथाहि-पञ्चालानां क्षत्रियाणां निवासो जनपद इत्यर्थे 'तस्य निवास' इति चातुरर्थिकप्रत्ययस्य - अणः "जनपदे लुप्" इत्यनेन लुपि "लुपि युक्तवद्" इति प्रकृतिवल्लिङ्गसंख्याविधानेन 'पञ्चाला' इति प्रयोगसिद्ध्यर्थं हि तत् सूत्रम् । 'तत् = सूत्रम् - अशिष्यम् - न कर्तव्यम्, संज्ञानां प्रमाणत्वात्' इति तदर्थः । अयमभिप्रायः- 'आपः, दाराः' इत्यादयः शब्दा यथा स्वाभिधानमात्रेण स्वभावादेव लिङ्गसंख्यादिकं बोधयन्ति न योगबलात्, तथा संज्ञाशब्दा योगं विनैवार्थं बोधयन्ति योगानवगमात्, योगस्य = अवयवार्थस्याप्रतीतेः । सम्प्रति विनापि क्षत्रिययोगं जनपदे पञ्चालशब्दव्यवहारदर्शनात्, तस्माद् युक्तवद्वचनं न कर्तव्यम् ।

शब्द का, अर्थ का तथा उनके सम्बन्ध का जो व्यवस्थित स्वरूप है, उसको सूत्र रूप में - सामान्य विशेष लक्षणों के द्वारा व्याकरणशास्त्र कल्पित 'प्रकृति प्रत्यय रूप' अवयव के योग से व्युत्पादन कर उसके व्यवस्थित साधुस्वरूप का अनुगम मात्र करता है, रचना नहीं'।

भिन्न भिन्न व्याकरणों में प्रक्रिया का भेद भले ही होवे, किन्तु सब समान रूप में नियत शब्दार्थ-सम्बन्ध का गमक मात्र होते हैं । जबकि शब्द, अर्थ और

इति समुचितम्, कलशशब्दस्य तु प्रत्येकवर्णानामुच्चरित-प्रध्वंसित्वेन ककारादिवर्णात्मकावयवानां यावतां युगपत्साहित्यावस्थानासम्भवेन अवयविनमारब्धुमशक्यतया अवयविनि कलशशब्दत्वजातेः पर्याप्तत्वाभावेन कथं सा जातिरभिव्यज्यते? प्रत्येकं पर्य्याप्तत्वे तु द्वितीयादिवर्णोच्चारणस्य वैयर्थ्यापत्तिश्चेति वाच्यम्, यथा न्यायनयेऽपि भ्रमणत्वं जातिः, भ्रमण-व्यवहार्यता अनेकेष्वेव व्यापारेषु, न तु एकस्मिन् व्यापारे । तथा च क्रियायाः तृतीयक्षणे ध्वंसात् प्रथमव्यापारस्य द्वितीयव्यापारोत्पत्तिसमये नाशः, तस्यापि तदुत्तरव्यापारकाले नाशः, एवं रीत्या क्रमेण उत्पद्यमानानां विनश्यताञ्च यावतां व्यापाराणाम् एकस्मिन् काले साहित्यासम्भवेऽपि अपेक्षाधिया यावतां संकलनया तावद्व्यापारात्मकावयवारब्धावयविरूपं

यथा पञ्चालशब्दः क्षत्रियाणां संज्ञा तथा जनपदस्यापि संज्ञा, अतो योगं विनैव जनपदबोधको भविष्यति । सति हि तद्धितप्रत्यये लुब्वचनं लुपि युक्तवद्वचनं च पूर्वाचार्यानुरोधेन सूत्रकृता कृतम् । यदि हि संज्ञायाः स्वभावादेव पञ्चालशब्दो जनपदबोधको भविष्यति, तर्हि युक्तवद्वचनं न कर्तव्यम्, लुबपि न कर्तव्यः, तद्धितप्रत्ययोऽपि न विधेयः, प्रकृति-प्रत्ययरूपावयवयोगं विनैवेष्टार्थबोधसिद्धेः । स्पष्टमिदं "तदशिष्यम्" इति भाष्ये प्रदीपे उद्योते च । एतावता शब्दस्य स्वाभाविकं नित्यत्वमायातम्,

---

सम्बन्ध सभी नित्य हैं, व्याकरण से उनका केवल अनुगम होता है, अतः व्याकरण सार्थक होता है । इसी दृष्टि से पाणिनि, कात्यायन, पतञ्जलि तीनों महर्षियों ने - 'शब्द-अर्थ-सम्बन्ध' तीनों को नित्य माना है ।

इनमें सर्वप्रथम शब्दार्थ-सम्बन्ध के नित्यत्व में प्रमाण है– सूत्रकार का "तदशिष्यं संज्ञाप्रमाणत्वात्" यह सूत्र ।

इसका अर्थ है कि - प्रकृतिवत् लिङ्ग और संख्या का विधायक "लुपि युक्तवत्" यह सूत्र नहीं करना चाहिए, क्योंकि संज्ञाशब्द ही स्वयं लिङ्ग और

भ्रमणाख्यक्रियाविशेषं बुध्यते, ततश्च तद्गतजातिरपि बुध्यते, एवं प्रकृते क्रमेण उत्पद्यमानानां विनश्यताञ्चापि वर्णानां स्मरणद्वारा एककाले साहित्यसम्भवेन अवयविज्ञानेन तद्गत-जात्यभिव्यक्ते र्बाधकाभावात्, प्रत्येकमपर्य्याप्तत्वेन द्वितीयादि-वर्णोच्चारणवैयर्थ्याभावाच्च ।

वस्तुतस्तु वैयाकरणमते वर्णानामुच्चरितप्रध्वंसित्वेन साहित्यासम्भवात् पूर्वपूर्ववर्णानुभव जनितसंस्कार सहकृतान्त्य-वर्णानुभवोद्बुद्धसंस्कारेण युगपद् यावद्वर्णानां स्मरणेन साहित्यसम्भवेऽपि नष्टविद्यमानयोरधिकरणतायाः "नष्टे घटे जलम्" इत्यादिवत् व्यवहारविरुद्धतया शक्त्याश्रयताया

तेन च जात्याकृतिरूपस्य तदर्थस्य, तयोः शक्तिरूपस्यानादियोग्यता-सम्बन्धस्य च नित्यत्वं सिद्धम् । नहि अनादिसिद्धस्य शब्दस्य संकेतरूपः सम्बन्धः केनाप्याधुनिकेनासर्वज्ञेन कर्तुं शक्यः । तस्माद् शब्दार्थयोः स्वाभाविकः सम्बन्धः स्वीकर्तव्यः । तदाह मीमांसासूत्रम्- "औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धः" (१-१-५) इति । औत्पत्तिकः = स्वाभाविकः, नित्य इति यावत् । तत्र बीजमाह - 'प्रख्याभावाच्च योगस्य' (१-१-२२) इति ।

अतो नित्यः शब्दः । अत्र 'वाचा विरूपनित्यया' (ऋ० ८-७५-९) इति ऋग्वचनं तैत्तिरीयवचनं च लिङ्गम् । अन्यदिहत्यं सकलं हरिहृदयं प्रत्येकार्थप्रकाशिकातोऽवसेयम् ।

संख्या का बोध कराने में समर्थ प्रमाण है । इसका तात्पर्य यह है कि - जैसे 'अप्-दार-अपत्य' आदि शब्द अवयवार्थ के ज्ञान के विना ही रूढि संज्ञा होने से लिङ्ग-संख्या-कारक युक्त वस्तु का ज्ञान कराते हैं, क्योंकि उनका अर्थ से स्वाभाविक - नित्य सम्बन्ध है, शब्द भी नित्य है, क्योंकि उसमें किसी अवयव के योग का ज्ञान नहीं होता, ऐसे ही प्रकृति प्रत्यय अवयव के ज्ञान विना ही पञ्चाल आदि शब्द भी संज्ञा होने से ही जनपद का ज्ञान करा सकते हैं ।

असम्भवाच्च कलशेत्याद्यतिरिक्तः तदभिव्यङ्ग्यः स्फोट एव वाचकः, स एव जातिरूपः नित्यश्च । स च पूर्वपूर्ववर्णानुभवजनितसंस्कारसंस्कृते अन्तःकरणे अन्त्यवर्णविज्ञानतोऽभिव्यज्यते, यथा मण्यादिपरिचयो वारं वारं दृष्टे सति तत्तत्संस्कारसंस्कृतेन मनसा क्रियते । अत एव न पूर्वपूर्ववर्णानामानर्थक्यम् ।

तथा च यथा प्रदीपादौ अभिव्यञ्जके घटाद्यधिकरणताया असत्त्वेऽपि तत्सम्बन्धेन अभिव्यज्यते, तथैव कलशेत्याद्यानुपूर्वीषु जात्यधिकरणताया असत्त्वस्वीकारेऽपि तत्तद्वर्णै जातिरभिव्यक्तिः । अधिकरणञ्चास्या मध्यमावागाख्यस्फोटरूपतया 'हृदिस्था मध्यमा ज्ञेया' इति प्रामाण्याद् हृदयदेशः । एवञ्च न दोषलेश इति बोध्यम् । अपरे – जातिमस्वीकुर्वाणा अनेकवर्णाभिव्यङ्ग्यां नित्यां शब्दव्यक्तिं मन्यन्ते । तत्रापि केचन एकस्यामपि 'शब्द' व्यक्तौ नानावर्णा इति संगिरन्ति । परे तु प्रतिपदं प्रतिवाक्यं चैक एव शब्दोऽवास्तविकक्रमोत्पन्नावयव-

---

कैश्चिदिह 'तत्राम्नाता' इति पाठमभ्युपेत्य 'तत्र व्याकरणे समाम्नाताः अभ्यस्ता बहुत्र कथिता' इत्यादि व्याख्यायते । तत्रेदं विचारणीयं यदिह– 'तत्र' इति पाठस्तर्हि तस्य व्याख्याने 'समाम्नाता' इति समुपसृष्टः पाठः कुतः? अथ 'समाम्नाता' इति पाठः सम्मतस्तदा 'तत्र' इति कुत उड्डीय समापतितः?

वस्तुतः सभी शब्द संज्ञा रूप हैं, 'प्रकृति – प्रत्यय' अवयव योग वस्तुतः कहीं नहीं है । कथन मात्र से सभी शब्द लिङ्ग-संख्या-कारक-विशिष्ट किसी द्रव्य का बोधक होते हैं, अतः ''लुपि युक्तवत्'' इन वचनों की आवश्यकता नहीं है । प्रकृति-प्रत्यय-अवयव-विभाग कल्पित हैं । एतावता यह सिद्ध होता है कि- शब्द, अर्थ, सम्बन्ध सभी नित्य हैं ।

प्रत्यवभासतया प्रकाशते, इत्याहुः । अपरे-व्यवहारानादित्वेनैषां नित्यत्वं स्वतोऽनित्यत्वञ्चेति स्वीकुर्वन्ति । अर्थानामपि आकृतिनित्यत्वात् व्यक्तिप्रवाहनित्यत्वाद्वा नित्यत्वं मन्यन्ते ।

सम्बन्धमन्तरा अर्थोपदेशस्याशक्यकर्तव्यत्वात् सम्बन्धोऽपि औत्पत्तिकः स्वभावसिद्धोऽनादिः प्राप्ताविच्छेद इति नित्य इति सिद्धम् । स च शब्दार्थयोः सङ्केतग्राह्या तादात्म्यरूपा योग्यता, यथेन्द्रियविषययोः प्रकाश्यप्रकाशकभावः ।

केचिच्च - शब्दैरर्थानां बुद्धौ कल्पनाद् - अर्थबुद्ध्या च तत्प्रतिपादनाय शब्दकल्पनात् कार्यकारणभावः सम्बन्ध इत्याहुः ॥ २३ ॥

तस्मात् शब्दार्थसम्बन्धनित्यत्वस्य मुनित्रयप्रमाणकत्वेन साकम् 'विरूप-नित्यया वाचा' इत्यादि वेदप्रमाणकत्वमपि द्योतयितुमिह - 'समाम्नाता' इत्येव पाठो व्रियताम्, विकल्पद्वैविध्यं हीयताम्, आस्तां तावत् । अनादिसिद्धानां शब्दानां नित्यत्वेन व्यवस्थितत्वात् प्रकृतिप्रत्ययावयवयोगस्य च कल्पितत्वात्तदनुगमाय व्याकरणं सप्रयोजनमिति हृदयम् ॥ २३ ॥

''सिद्धे शब्दार्थसम्बन्धे'' यह वार्तिक तथा इसका भाष्य स्पष्ट ही इनके नित्यत्व में प्रमाण हैं ।

इसके अतिरिक्त 'वाचा विरूपनित्यया' यह ऋग्वेदमन्त्र (८-७५-६) तथा तैत्तिरीय मन्त्र (२-६-११) भी शब्द के नित्यत्व में प्रमाण हैं । इसी अभिप्राय से इस कारिका में 'समाम्नाताः महर्षिभिः' यह पद पठित है । यह पद उक्त वेदोपदेश का बोधक है । ॥ २३ ॥

अपोद्धारपदार्था ये ये चार्थाः स्थितलक्षणाः ।
अन्वाख्येयाश्च ये शब्दा ये चापि प्रतिपादकाः ॥ २४ ॥

प्रत्येकार्थप्रकाशिका

ननु वाक्यस्यैव प्रयोगाद् वाक्यवाक्यार्थयोः सम्बन्धस्यैव च नित्यत्वात्, इति प्रकृतिप्रत्ययादिकल्पनं विफलमित्यत आह - 'अपोद्धार' इति । अपोद्ध्रियन्ते यानि तानि - अपोद्धाराणि, कर्मणि घञ्, तानि च पदानि, तेषामर्थाः । अयमर्थः - लोके वाक्यस्यैव प्रयोगाद् अखण्डवाक्यार्थ एव वास्तविकः, अत एव 'वृक्ष' इत्युक्ते क्रियापदं विना अर्थानिरूपणात् क्रियाविशेषाक्षेप इति नियमः, अतः सर्वत्र 'अस्ति-भवती' त्यादीनामाक्षेप इति वैयाकरणसमयः ।

आनन्दा

उक्तरीत्या शब्दार्थसम्बन्धानां नित्यत्वे वाक्यवाक्यार्थयोश्चाखण्डत्वे व्याकरणेन प्रकृतिप्रत्ययादिविभागेन शब्दव्युत्पत्तेरसङ्गतिं परिहरन् कारिकात्रयेण व्याकरणस्याष्टविधं प्रतिपाद्यमाह - 'अपोद्धार' इत्यादि ।

अन्वयः - ये अपोद्धारपदार्थाः, ये च स्थितलक्षणा अर्थाः, ये च अन्वाख्येयाः शब्दाः, ये च अपि प्रतिपादकाः शब्दाः, 'ते अस्मिन् शास्त्रे स्मृत्यर्थम् अनुगम्यन्ते' इति वक्ष्यमाणेनान्वयः ।

सूर्यमाया

शब्द के नित्यत्व सिद्धान्त में वाक्य और वाक्यार्थ अखण्ड होने से व्याकरण की 'शब्द का प्रकृति प्रत्यय विभाग तथा अर्थविभागरूप' प्रक्रिया की अनुपपत्ति का परिहार करते हुए आगे की तीन कारिकाओं में व्याकरण के आठ प्रतिपाद्य वस्तु का निरूपण करते हैं - 'अपोद्धारपदार्था ये' ।

अर्थ : - वाक्यों से विभक्त करके पदों तथा पदों से विभक्त करके प्रकृति प्रत्ययों के जो कल्पित अर्थ हैं, और कल्पित न होने से जो व्यवस्थित व नियतस्वरूप वाक्यों के अर्थ हैं, एवं जो पद की सिद्धि के लिए कल्पित -

परञ्च तेषामानन्त्यात् प्रतिपदपाठेन उपदेशं कर्तुमशक्यतया लघुनोपायेन साधुशब्दबोधनाय शास्त्रे पदानि प्रविभज्य तेषामर्था अपि कल्पिताः, ते एव अर्थाः - अपोद्धारपदार्थाः कथ्यन्ते ।

व्याख्या - ये अपोद्धारपदार्थाः = वाक्याद् अपोद्धृतानाम् - पृथक् प्रविभज्य कल्पितानाम् पदानाम्, पदेषु च प्रकृतिप्रत्ययानाम् अस्थितस्वरूपाः कल्पिता अर्था अपोद्धारपदार्थाः - पदार्थरूपाः प्रकृत्यर्थरूपाः प्रत्ययार्थरूपाश्च,

ये च स्थितलक्षणाः = स्थितम् - व्यवस्थितम् अकल्पितं लक्षणम् = स्वरूपं येषां ते - वाक्यार्थरूपाः, ये च अन्वाख्येयाः = उद्देश्यविधेयभावेन-अनुवचनीयाः प्रकृतिप्रत्ययरूपाः शब्दाः, ये चापि प्रतिपादकाः = अर्थ - प्रतिपत्तिहेतवः = वाक्यरूपाः पदरूपाश्च शब्दाः, ते अस्मिन् शास्त्रे स्मृत्यर्थमनुगम्यन्ते ।

विमर्श : - अत्रेदमवधीयताम् - अपोद्ध्रियन्ते यानीति कर्मव्युत्पत्त्या तानि पदानि 'सुप्तिङन्तेति' पदसंज्ञकानि ग्राह्याणि । तेषामपोद्धृतपदानामर्थाः प्रकृते पदार्था बोध्याः । किन्तु यथा पदानि अखण्डवाक्यात् शास्त्रकृत्कल्पनया प्रविभज्य विविच्यन्ते, तथा पदात् प्रविभज्य प्रकृतयः प्रत्यया अपि विविच्यन्ते, इति प्रसङ्गात्तुल्यन्यायेनेह अपोद्धारशब्द उपलक्षणभावेन प्रकृति-प्रत्ययानामपि बोधकः । तथा च तेषां प्रकृतिप्रत्ययानामर्थाः प्रकृत्यर्थाः प्रत्ययार्था अपि प्रकरणाद् अपोद्धारपदार्थतया संग्राह्याः ।

अयं तु विशेषः - पदानामर्थाः शास्त्रकृत्कल्पिताः शास्त्रीयव्यहारविषयाः सन्तो लौकिकव्यवहारविषया अपि प्रथन्ते, प्रकृतिप्रत्ययानामर्थास्तु केवलं शास्त्रकृत्कल्पिताः शास्त्रीयव्यवहारविषया एव, न जातु लौकिकव्यवहार-विषयाः ।

'प्रकृति प्रत्यय रूप' अन्वाख्येय शब्द हैं, और जो लोक में अर्थ का बोधक - 'पद वाक्य रूप' प्रतिपादक शब्द हैं, वे सब इस शास्त्र में सूत्रों से अनुगतरूप में बताये जाते हैं ।

आशय : - अर्थ द्विविध है - कल्पित और अकल्पित । वाक्यों के अन्तर्गत पदों का व पदों के अन्तर्गत - प्रकृति प्रत्ययों का अर्थ कल्पित है, वह अपोद्धार पदार्थ है । वाक्यों का अर्थ अकल्पित है, वह स्थितलक्षण है ।

एवं शास्त्रव्यवहारं दृष्ट्वा लोका अपि 'अस्य पदस्य अयमर्थः' इत्यादि व्यवहरन्ति । अत एवापोद्धृतपदस्यैवार्थवत्त्वं मत्वा – "कृत्तद्धितान्तञ्चैवार्थवन्न केवलाः कृतस्तद्धिता वे" ति भाष्ये उक्तम् । एवमेव ऋषिभिः स्वस्वभावनानुसारेण – प्रकृतिः प्रत्ययः, तत्तदर्थश्च धात्वर्थः प्रातिपदिकार्थ इत्यादिः

अयमत्र सारः – अपोद्धारपदेन – अखण्डवाक्येभ्यः पदानाम् – पदेभ्यश्च प्रकृतिप्रत्ययादीनाम्, अखण्डवाक्यार्थेभ्यश्च पदार्थानाम् – पदार्थेभ्यश्च प्रकृत्यर्थप्रत्ययार्थानां कल्पितत्वमस्थितत्वं चेह बोध्यते, अग्रे हि विविच्य वाक्यार्थानां स्थितलक्षणत्वोक्तेः । वाक्येषु यथा पदानि कल्पितानि तथा पदेषु प्रकृतिप्रत्ययाः कल्पिताः । यथा – वाक्यप्रतिपत्तौ पदानि तिरोहितानि भवन्ति, तथा पदप्रतिपत्तौ प्रकृतिप्रत्ययास्तिरोहिता भवन्ति । एवमेव वाक्यार्थेषु पदार्थाः पदार्थेषु च प्रकृत्यर्थप्रत्ययार्थाः कल्पिताः, यथा वाक्यार्थप्रतिपत्तौ पदार्थास्तिरोहिता भवन्ति, तथा पदार्थप्रतिपत्तौ प्रकृत्यर्थप्रत्ययार्थास्तिरोहितास्तिष्ठन्ति । एवं च अपोद्धारपदार्थाः कल्पिता अस्थिता इति स्थितम् ।

वाक्यार्थास्तु स्थितलक्षणा अकल्पिता नियतस्वरूपा भवन्ति । वाक्यप्रतिपत्तौ पदानाम्, वाक्यार्थप्रतिपत्तौ च पदार्थानामुपायतया अस्थितस्वरूपत्वम्,

---

शब्द भी द्विविध हैं – असिद्ध और सिद्ध । प्रक्रिया काल में प्रकृति प्रत्यय जब तक कार्य दशा में हैं, तब तक असिद्ध हैं – अपरिनिष्ठित हैं, क्योंकि उसमें विधिसूत्रों से कोई कार्य करना शेष ही रहता है, अतः वह अन्वाख्येय शब्द है ।

दूसरा सिद्ध शब्द है – जो समस्त प्रक्रियाओं से सम्पन्न पूर्णरूप को प्राप्त कर परिनिष्ठित होता है, जो किसी विधिशास्त्र की प्रवृत्ति का विषय नहीं होता है । वह व्युत्पन्न साधु पद – प्रतिपादक शब्द है, क्योंकि एक पद दूसरे पदों के योग से वाक्य रूप का सम्पादक होता है, तथा लोक में अर्थ का बोधक भी होता है । इसके अतिरिक्त वाक्य भी प्रतिपादक शब्द माना गया है, क्योंकि वाक्य ही लोक में परिपूर्ण अर्थ का प्रतिपादक होता है ।

कल्पितः । अत एव "अर्थवत्" - सूत्रे - अप्रत्ययपर्य्युदासः, अधातुपर्य्युदासश्चरितार्थः, इति तत्सूत्रे भाष्ये स्पष्टम् ।

ये च स्थितलक्षणाः = वाक्यार्थरूपाः, अन्वाख्येयाश्चेति= प्रकृतिप्रत्ययादयः, प्रतिपादका इति = भूतिर्भूपतिरित्यादिपदानि वाक्यानि च । तत्र केषांचित्पदावधिकमन्वाख्यानं केषांचि-

---

अखण्डवाक्यस्याखण्डवाक्यार्थस्य तु अकल्पितत्वेन सर्वजनसिद्धं व्यवस्थितरूपत्वम् । यत्र क्वचिद् वाक्यस्यार्थे पदस्य प्रयोगः, यथा - मुण्डं करोतीत्यर्थे - 'मुण्डयति' इति प्रयोगः - नमस्करोतीत्यर्थे 'नमस्यति' इति प्रयोगस्तत्र पदार्थोऽपि भवतु स्थितलक्षणः, स तु क्वाचित्कः, किन्तु वाक्यार्थ एव नियमेन स्थितलक्षणः । एवं च अर्था द्विविधा उक्ताः - पदार्था अस्थितलक्षणाः वाक्यार्थाः स्थितलक्षणाश्च । शब्दा अपि द्विविधाः- अन्वाख्येयाः प्रतिपादकाश्च ।

तत्र अन्वाख्येयाः शब्दाः - प्रकृतयो धातवः प्रातिपदिकानि च, प्रत्ययाश्च - तिङ् - सुबादयोऽणादयश्च कृत्तद्धितरूपाः । प्रतिपादकाश्च शब्दाः- पदानि 'भूतिः, भूपतिः, भवति' इत्यादीनि, वाक्यानि च - 'कानि सन्ति, कौ स्तः' इत्यादीनि ।

निष्कर्ष में - यह अवधेय है कि - वाक्य और वाक्यार्थ वस्तुतः अखण्ड हैं । लोक में वाक्य का ही व्यवहार होता है । यदि कभी सम्बोधन आदि में एक पद- 'राम' का प्रयोग हो भी तो वहाँ किसी योग्य क्रिया पद - 'आगच्छ - गच्छ' का अध्याहार करके अर्थ का बोध तथा प्रवृत्ति निवृत्ति रूप व्यवहार होता है । यह एक वास्तविकता है । किन्तु शास्त्र से जहाँ उनका अनुगत ज्ञान करना है, वह पद-पदार्थ के ज्ञान के विना सरलता से सम्भव नहीं है । प्रतिपदपाठ व शब्दपारायण के द्वारा अनन्त शब्दराशि का ज्ञान सुलभ नहीं है । अतः शब्दतत्त्वज्ञ ऋषियों ने अखण्ड वाक्य से विभाग की कल्पना कर पद व पदार्थों का व्याकरण के सामान्य विशेष लक्षणों की प्रक्रिया द्वारा अनुगम किया है । अखण्डवाक्य से अपोद्धार करके पदों का तथा पदों में प्रकृति प्रत्ययों का कल्पनामूलक जो अर्थ

द्वाक्यावधिकमन्वाख्यानम् । तत्र पूर्वपक्षे विशेषणपदानि सामान्यार्थबोधकतया 'सामान्ये नपुंसकमि'ति बलेन नपुंसकैकवचने लब्धसंस्काराणि विशेष्यपदान्तरसम्बन्धे सत्यपि अन्तरङ्गत्वाज्जातसंस्कारस्य बाधायोगेन नपुंसकलिङ्ग एव प्रयोगो

तत्र पदावधिकमन्वाख्यानम् - इत्येकः पक्षः, वाक्यावधिकमन्वाख्यानम्- इति द्वितीयः पक्षः । पक्षद्वयमपि सूत्रभाष्यकृत्सम्मतम् ।

तत्र पदावधिकेऽन्वाख्याने - 'भू', 'भू-ति', 'भू अ ति', इत्यादि- प्रक्रियादशामापन्नाः प्रकृतिप्रत्ययरूपाः साध्याः शब्दाः - 'भवति' इति सिद्धपदप्रतिपत्तिहेतवोऽन्वाख्येयाः ।

वाक्यस्य चान्वाख्याने - 'भवति, भूपति, भूति' इत्यादिपदरूपाः पदसमुदायवाक्यप्रतिपत्तिहेतवः, वाक्यरूपाश्च 'घटो भवति' - 'रघुर्भूपतिर्बभूव' इत्यादयो लोके अर्थप्रतिपत्तिहेतवः - सिद्धाः शब्दाः प्रतिपादका भवन्ति । इत्थं च शब्दा द्विविधाः - अन्वाख्येयाः प्रतिपादकाश्चेति स्थितम् ।

तत्र 'आहर पात्रम् - पात्रमाहर' इति पूर्वापरप्रयोगभेदेन वाक्याना- मानन्त्यात्तेषामन्वाख्यानस्याशक्यत्वेन पदावधिकान्वाख्यानमिति पद- संस्कारवादिनां मतम् । पदानामनन्तत्वेऽपि प्रकृतिप्रत्ययविभागकल्पनया पदान्वाख्यानवत् पदान्वाख्यानेन वाक्यान्वाख्यानस्यापि सुकरत्वमिति वाक्य- संस्कारवादिनामभिमतम् ।

तत्र पदसंस्कारपक्षे ''विशेषणं विशेष्येण बहुलम्'' इत्यनुशासनं मानम् । वाक्यसंस्कारपक्षे हि 'नीलो घट' इत्यादेर्विशिष्टैकार्थवाचकत्वेनाभेदान्वये विशेषणविशेष्यविभागस्यासम्भवेन समानाधिकरणसमासानुशासनं दुर्वचं

अनुगत किया है, वह यहाँ अपोद्धार पदार्थ कहा गया है । यद्यपि यह अपोद्धारपदार्थ शास्त्रीय प्रक्रिया के निर्वाह के लिए शास्त्रकारों से कल्पित है, केवल शास्त्रीय व्यवहार का विषय है, तथापि शास्त्रों के परम्परागत व्यवहार के अनुसार लोक में भी पद पदार्थ का ज्ञान व व्यवहार होता है । किन्तु प्रकृति प्रत्ययों की अवधारणा व प्रक्रिया केवल शास्त्रीय है, लौकिक व्यवहार का विषय

भवेत्, तदर्थं - "विशेषणानां चाजाते" रिति भाविबहिरङ्ग-सम्बन्धापेक्षसंस्कारबोधकम् ।

द्वितीयपक्षे तु पदानां सामान्यार्थवत्त्वमेव नास्ति । एवं द्वन्द्वे द्वन्द्वपदानां प्रत्यवयवं संस्कारे "द्वन्द्वेऽबहुषु लुग्वचन" मुपन्यस्तम्,

---

स्यात् । पदसंस्कारे तु 'नील' इति गुणशब्दो विशेषणम्, 'घट' इति द्रव्यशब्दो विशेष्य इति-भवति विवेकः । वाक्यसंस्कारपक्षे "न पदान्ते-" ति पदचरमावयवविधौ स्थानिवत्त्वनिषेधवचनं प्रमाणम्, "कर्तुरीप्सिततमम्" "तथायुक्तं चानीप्सितम्" इत्यादिकर्मसंज्ञाविधायकानि, "नमः स्वस्ति-" इत्याद्युपपदविभक्ति-विधायकानि सूत्राणि च प्रमाणम् । वाक्यसंस्कारपक्षे विवक्षितस्य 'कानि सन्ति' इति वाक्यस्यैकदैव संस्कारः, तदा 'किम् जस् अस् झि' इति समुदाये पूर्वं पूर्वमन्तरङ्गमितिन्यायेन प्रक्रियया पूर्वं 'कानि' इति सिद्धे ततः 'कानि - अस् झि' इति दशायाम् - अस्तेरल्लोपे स्थानिभूतादचः पूर्वत्वेन दृष्टस्येकारस्य यणि कर्तव्ये प्राप्तस्थानिवत्त्वस्य "न पदान्तेति" निषेधः सार्थकः । पदसंस्कारपक्षे तु 'कानि' इत्यस्य पृथक् सिद्धिः, 'सन्ति' इत्यस्य च पृथक्, तदा स्थानिभूतादचः पूर्वत्वाभावात् स्थानिवत्त्वस्य प्रसङ्ग एव न भवति । पदावधिकेऽन्वाख्याने - "विशेषणानां चाजाते" रिति सूत्रमपि मानम् । तथाहि-तत्पक्षे विशेषणानां सामान्यार्थवत्त्वेन नपुंसकैकवचने कृतसंस्काराणां पश्चाद् विशेष्यान्वयेऽपि जातसंस्काराणां निवृत्तेरयोगेन 'पञ्चाला' इति लुबर्थस्य विशेषणानां प्रकृतिवल्लिङ्गवचनार्थमिदं सूत्रम् । वाक्यावधिकान्वाख्याने तु विशेषणानां विशेष्यनिघ्नत्वे सामान्यार्थवत्त्वमेव नास्ति, इति विशेष्यलिङ्गवचनादीनां स्वत एव सिद्धत्वे

नहीं है, यह पदार्थ और प्रकृति-प्रत्ययार्थ में अन्तर अवश्य है । पर अपोद्धार पदार्थ तो समान रूप में पदार्थ और प्रकृति-प्रत्ययार्थ दोनों है । ये शास्त्रकार के कल्पित होने से अस्थितस्वरूप हैं । इनका अपना स्वतन्त्र अस्तित्व नहीं है । पद-पदार्थ तो वाक्य-वाक्यार्थ में अन्तर्हित रहते हैं । साथ ही विभिन्न शास्त्रकारों ने अपनी अपनी प्रक्रिया भेद से प्रकृति प्रत्ययों व उनके अर्थों का विभिन्न रूप माना है । इसलिए भी अपोद्धृत पदार्थ अस्थितस्वरूप हैं ।

वाक्यसंस्कारमादाय - 'न वा सर्वेषां द्वन्द्वे बह्वर्थत्वा' दित्युक्त-मित्यलम्, अस्य अग्रिमतृतीयश्लोकेनाकाङ्क्षापूर्तिः ॥ २४ ॥

सूत्रमेतन्नावश्यकम् । एवम् पदावधिके द्वन्द्वघटकपदानां पूर्वमेकवचनान्तानां संस्कारे ततो द्वन्द्वे बहुत्वे गोत्रप्रत्ययलुग्विधायकस्य - "तिककितवादिभ्यो द्वन्द्वे" इत्यस्यैकवचनान्तेऽप्रवृत्त्या तत्र लुगर्थं "द्वन्द्वेऽबहुषु लुक्" इति वार्तिकं कृतम् । वाक्यावधिकेऽन्वाख्याने तु 'युगपदधिकरणवचनता' न्यायेन बहुवचनान्तानामेव पदानां द्वन्द्वे 'तैकायनयश्च कैतवायनयश्च' इत्यत्र "तिकादिभ्यः फिञ्" इति गोत्रफिञः "तिककितवादिभ्य" इति लुकि 'तिककितवा' इतीष्टं रूपं सिध्यति, इति वार्तिकमिदं नावश्यकम् । तदुक्तम्- 'न वा सर्वेषां द्वन्द्वे बह्वर्थत्वात्' इति । इत्थं च पदसंस्कारपक्षो भवतु, वाक्यसंस्कारपक्षो वा । उभयथापि विवक्षितस्य पदस्य कल्पितावयवविभागेन 'किम् जस्' इति 'अस् झि' इति प्रकृतिप्रत्ययानुपूर्व्याः या प्रक्रियादशा तस्यामुद्देश्यविधेयतया स्थिताः 'प्रकृतयः प्रत्ययाश्च' साध्यावस्थापन्नाः शब्दा भवन्त्यन्वाख्येयाः ।

सिद्धावस्थापन्नाः साधवः शब्दाः - 'पदरूपाः, पदान्तरयोगे पदसमुदायवाक्यरूपाश्च' लोकेऽर्थप्रत्ययहेतवो भवन्ति प्रतिपादकाः ॥ २४ ॥

वाक्यार्थ सर्वसंमत एक रूप होने से तथा कल्पना पर आधारित न होने से नियत व व्यवस्थित स्वरूप होता है । जैसे अर्थ कल्पित और अकल्पित भेद से द्विविध हैं, ऐसे ही शब्द भी कल्पित और अकल्पित भेद से द्विविध हैं । अन्वाख्येयशब्द - 'पद और प्रकृति प्रत्यय शास्त्रीय प्रक्रिया के निर्वाह के लिए शास्त्रकार द्वारा कल्पित हैं; असिद्ध रूप हैं । अखण्डवाक्य अकल्पित सिद्धस्वरूप है, जो कि प्रतिपादक है ।

दूसरे शब्दों में शब्द द्विविध होने से अर्थ भी द्विविध है ।

सारांश में - कल्पित और अकल्पित भेद से शब्द और अर्थ दोनों द्विविध होने से यहाँ प्रथमतः व्याकरण का मुख्य प्रतिपाद्य विषय चतुर्विध बताया गया है ॥ २४ ॥

कार्य्यकारणभावेन योग्यभावेन च स्थिताः ।
धर्मे ये प्रत्यये चाङ्गं सम्बन्धाः साध्वसाधुषु ॥ २५ ॥

प्रत्येकार्थप्रकाशिका

शब्दश्च अर्थबोधं जनयति, ज्ञानञ्च अर्थेषु प्रत्यस्तमितरूपं सत् - अर्थत्वेनाध्यवस्यति, तथैव अर्थं बुद्ध्वा तत्प्रतिपादनाय शब्दप्रयोगः, अतः शब्दार्थयोः परस्परं 'कार्यकारणभाव'-सम्बन्धस्तेन, 'योग्यभावेन' च -

---

आनन्दा

व्याकरणप्रतिपाद्याष्टकमध्ये पूर्वत्र द्विविधमर्थं शब्दं च निरूप्य - अथेदानीं द्विविधं तत्सम्बन्धं सम्बन्धफलं च निरूपयति - 'कार्यकारणभावेन' इति ।

अन्वयः - कार्यकारणभावेन योग्यभावेन च स्थिताः साध्वसाधुषु ये सम्बन्धाः धर्मे प्रत्यये च अङ्गम्, 'ते शास्त्रेऽस्मिन् अनुगम्यन्ते' इति वक्ष्यमाणेनान्वयः ।

व्याख्या - कार्यकारणभावेन = परस्परं निमित्तिनिमित्तभावात्मना योग्यभावेन= वाच्यत्व-वाचकत्वरूप-योग्यतात्मना च स्थिताः = सिद्धाः नित्याः, साध्वसाधुषु=

सूर्यमाया

पहले व्याकरण का मुख्य प्रतिपाद्य - 'द्विविध अर्थ और द्विविध शब्द' का निरूपण कर अब उनका 'द्विविध सम्बन्ध और द्विविध फल' का निरूपण करते हैं - 'कार्य्यकारणभावेन' ।

अर्थ : - साधुशब्दों तथा असाधुशब्दों में कार्यकारणभावरूप और योग्यतारूप द्विविध सम्बन्ध व्यवस्थित एवं सिद्ध हैं, जो कि धर्म और अर्थबोध में कारण हैं, वे इस शास्त्र में अनुगत रूप से बताये जाते हैं ।

आशय : - प्रथमतः शब्द और अर्थ का परस्पर कार्यकारणभाव सम्बन्ध है, क्योंकि शब्द अर्थ का कारण है तथा अर्थ शब्द का कारण है । यह इसलिए कि शब्द अर्थ के ज्ञान कारण है, अर्थ का ज्ञान विवक्षावश शब्दप्रयोग का कारण है ।

अयमर्थ : - कार्य्यकारणयोरभेदाध्यवसायात् - 'योऽयं शब्दः सोऽयमर्थो योऽयमर्थः सोऽयं शब्दः' इति प्रतीत्या, 'ओमित्येकाक्षरं ब्रह्मे' त्यादिप्रामाण्याच्च तादात्म्यमेव शब्दार्थयोः सम्बन्धः ।

साधुषु = व्याकरणलक्षणानुगतेषु - असाधुषु = व्याकरणलक्षणहीनेषु भाषाशब्देषु च वर्तमाना ये = पूर्वनिर्दिष्टाः सम्बन्धाः धर्मे = अपूर्वाख्येऽदृष्टफले प्रत्यये = अर्थज्ञानरूपे प्रत्यक्षफले च अङ्गम् = साधनम्, ते अस्मिन् शास्त्रे अनुगम्यन्ते ।

द्विविधो हि शब्दार्थयोः सम्बन्धः - कार्यकारणभावो योग्यता च । सम्बन्धस्य फलमपि द्विविधम् - धर्मः, अर्थप्रत्ययश्च । स च सम्बन्धः साधुषु असाधुषु च उभयसाधारणतया वर्तते । एतावांस्तु विशेषो यत् साधुषु विद्यमानः सम्बन्धः पुण्यजनकः साक्षादर्थबोधकश्च, असाधुषु विद्यमानस्तु केवलमर्थबोधक एव न पुण्यजनकः । एवं पुण्यजनकताऽवच्छेदको धर्मः साधुत्वमिति फलितम् ।

विमर्शः - प्रथमस्तावत् शब्दार्थयोः कार्यकारणभावसम्बन्धः । तथाहि - शब्दो ज्ञातोऽर्थबोधे कारणम्, अर्थबोधश्च विवक्षावशाद् शब्दोच्चारणे कारणम्, इत्यतः शब्दो बोध्यस्यार्थस्य, अर्थश्च बोधकशब्दस्य कारणम् । तेन शब्दार्थयोः परस्परकार्यकारणभावः सम्बन्धः पर्यवस्यति ।

नन्वस्तु 'वक्त्रा प्रयुक्तः श्रोत्रा श्रुतः' शब्दोऽर्थबोधस्य कारणं तावता किमायातम्? बोधस्य कारणं भवतु शब्दः, किन्तु बोधविषस्यार्थस्य तु कारणं कथं भवितुमर्हति, एवमेव अर्थबोधो भवतु शब्दप्रयोगे कारणम्,

---

यह कार्यकारणभाव शब्द-अर्थ का तादात्म्यमूलक है । शब्द-अर्थ और ज्ञान, इन तीनों का एकरूप व्यवहार होता है । क्या शब्द है, क्या अर्थ है, क्या ज्ञान है, इन प्रश्नों का एक ही उत्तर है - घट । अर्थात् घट शब्द है, घट अर्थ है, घट ज्ञान है । शब्द-अर्थ और ज्ञान का इस एकाकार व्यवहार से इनका तादात्म्य सिद्ध होता है । शब्द-अर्थ और इनके ज्ञान की जो प्रक्रिया है, उससे भी इनका तादात्म्य सिद्ध होता है । प्रथमतः वक्ता के हृदय देश में शब्दार्थमय ज्ञान रहता है, वह विवक्षा होने पर शब्द रूप में बाहर प्रयोग से प्रकट होता है । अर्थात्

तदुक्तं संग्रहे -

शब्दार्थयोरसम्भेदे व्यवहारे पृथक् क्रिया ।
यतः शब्दार्थयोस्तत्त्वमेकं यत् समवस्थितम् ॥
सम्बन्धस्य न कर्तास्ति शब्दानां लोकवेदयोः ।
शब्दैरेव हि शब्दानां सम्बन्धः स्यात् कृतः कथम् ॥ इति ।

तावता अर्थः कथं शब्दस्य कारणं भवितुमर्हति, शब्दज्ञानार्थज्ञानयोः - अर्थज्ञानशब्दप्रयोगयोः कार्यकारणभावे सम्भवत्यपि शब्दार्थयोः कार्यकारणभावो नानेन सिध्यति, इति चेदत्रोच्यते -

शब्दो हि अर्थबोधं जनयति, स बोधो नहि अर्थात् पृथग्भूतः, किन्तु अर्थे प्रत्यस्तमितरूपः - अभेदेनार्थत्वेनाध्यवसितोऽर्थाकारः । एवम् अर्थबोधोऽप्यर्थाकारोऽर्थस्वरूप आन्तरं शब्दं स्फोटाख्यमभिव्यज्य श्रुतिगोचरबाह्यशब्दरूपेण विवर्तते, इति अर्थाभिन्नो बोधः शब्दस्य कारणम् । एतावता अर्थोऽपि बोधस्वरूपः शब्दस्य शब्दाभिव्यक्तेर्वा कारणं भवत्येवेति शब्दार्थयोः परस्परकार्यकारणभावः पर्यवस्यति ।

इदं तु ध्येयम् - कः शब्दः? कोऽर्थ? इति प्रश्ने - घट इति शब्दः, घट इत्यर्थ-इत्येकाकारोत्तरदर्शनाद् शब्दार्थयोरभेदः सिध्यति, घट इति ज्ञानम्, इति व्यवहाराच्च शब्दज्ञानयोरपि अभेदः सिध्यति । वस्तुगत्या शब्दोऽपि बौद्धः, अर्थोऽपि बौद्धः । शब्दार्थप्रत्ययानाम् 'सोऽयम्' इति समानाधिकरण-प्रयोगात् तादात्म्यमभ्युपगम्यते, इति तेषामभेदमूलकः कार्यकारणभावः ।

अर्थाभिन्नस्य - अर्थप्रत्ययस्य कारणं यदि शब्दस्तर्हि सोऽर्थस्यापि कारणम् । यथा शब्दोऽर्थस्य कारणम् अर्थप्रत्यययोरभेदात्, तथाऽर्थोऽपि शब्दस्य कारणम् - अर्थाकारप्रत्ययस्यार्थाभिन्नस्य शब्दप्रयोगजनकत्वात् ।

अर्थाकार ज्ञान ही विवक्षा प्रयत्न से बाहर शब्द रूप में प्रकाशित हो श्रवण का विषय होता है, इस प्रक्रिया से अर्थाकार ज्ञान, अर्थात् ज्ञानरूप अर्थ ही शब्द प्रयोग का (उच्चारण विषय शब्द का) कारण बनता है ।

इसी प्रकार प्रयोग से जब श्रोता को शब्द का ज्ञान होता है, तब अर्थ का ज्ञान होता है । वह ज्ञान अर्थाकार होने से अर्थ स्वरूप है, उसका कारण ज्ञानविषय शब्द है । इस प्रक्रिया से शब्द अर्थ का परस्पर कार्यकारणभाव फलित होता है ।

सम्बन्धस्यैवार्थबोधने योग्यता । तद्ग्रहश्च इन्द्रियविषय-योरिव प्रकाश्यप्रकाशकभावेन । अत एव यस्य शब्दस्य येनार्थेन तादात्म्यम्, स शब्दस्तस्यैवार्थस्य बोधने कारणम्, अतो 'योग्यभावेने' त्युक्तम् ।

स्थिता इति - सिद्धा इत्यर्थः, साध्वसाधुषु = अपभ्रंशेषु संस्कृतेषु च ये सम्बन्धाः धर्मे = पुण्ये, प्रत्यये = अर्थबोधने, अङ्गम् = कारणम् ।

द्वितीयश्च शब्दार्थयोः सम्बन्धः - योग्यभावो नाम योग्यतारूपः । इन्द्रियविषययोरिव शब्दार्थयोः प्रकाश्यप्रकाशकभावरूपयोग्यता सम्बन्धः । यथा चक्षुषि रूपग्रहणयोग्यतैव न रसादिग्रहणयोग्यता, रूपे च चक्षुर्ग्राह्यत्वयोग्यतैव न रसनादिग्राह्यत्वयोग्यता, तथा शब्दे अर्थग्रहणयोग्यता, अर्थे च शब्दग्राह्यत्वयोग्यता । सा च योग्यता - स्वाभाविकी अनादिसिद्धा, न केनापि कृता । इन्द्रियविषययोः प्रकाश्यप्रकाशकभाव इव शब्दार्थयोर्वाच्यवाचकभावो बोध्यबोधकभावो वा योग्यताऽख्यः सम्बन्धो वस्तुतन्त्रो,

---

सारांश में शब्द से अभिन्न अर्थ, तथा शब्द-अर्थ दोनों से अभिन्न उभयस्वरूप जो आन्तर ज्ञान है, वही विवक्षावशात् बाह्य वैखरीशब्द रूप में प्रकाशित होकर श्रोता के अर्थज्ञान का जनक होता है, जिसके फलस्वरूप शब्द अर्थ का कार्यकारणभाव सिद्ध होता है ।

दूसरा सम्बन्ध - शब्द और अर्थ का योग्यता रूप है ।

जैसे चक्षु आदि इन्द्रियों का रूप आदि अपने विषयों के साथ प्रकाश्यप्रकाशकभावरूप - योग्यता सम्बन्ध है, ऐसे ही शब्द का अर्थ के साथ वाच्यवाचकभावरूप - योग्यता सम्बन्ध है । चक्षु में रूपग्रहण की अनादि योग्यता है, साथ ही रूप में चक्षुर्ग्राह्यत्व अनादि योग्यता है, फलतः इन्द्रिय और विषय का परस्पर सम्बन्ध एक योग्यतासामान्य है । एवमेव शब्द में अर्थबोधकत्व योग्यता है, तथा अर्थ में शब्दजन्य-बोधविषयत्व योग्यता है, फलतः शब्द - अर्थ का परस्पर सम्बन्ध सामान्यरूप में एक योग्यता है, यह योग्यता अनादि है, स्वाभाविक है, कृतक नहीं है ।

अयमाशयः - यथा संस्कृतशब्दानां तत्तदर्थैः सह सम्बन्धाः बोधदर्शनाद् ज्ञायन्ते तथैव भाषाशब्देभ्योऽपि अर्थबोधदर्शनात् तत्तदर्थैः सह सम्बन्धाः सिध्यन्ति । परञ्चायं विशेषः - संस्कृतशब्देभ्योऽर्थबोधः पुण्यञ्चोभे भवतः, भाषाशब्देभ्यश्च पुनः केवलार्थबोध एव । अस्यापि सम्बन्धोऽग्रिमश्लोकेनेति दिक् ॥ २५ ॥

न पुरुषतन्त्र इत्युक्तं प्राक् । संग्रहेऽप्याह - 'सम्बन्धस्य न कर्तास्ति शब्दानाम्' इति । जाते पुत्रादौ पित्रादिभिः केनचित् शब्देनैव सार्थकेन नाम्नः संकेतसम्बन्धः क्रियते । शब्दार्थयोरनादियोग्यतासम्बन्धस्य ग्राहकं च 'आयुर्घृतम्' इतिवत् कार्यकारणयोरभेदाध्यवसायमूलकं शब्दार्थयोस्तादात्म्यम्, अत एव 'घट इति शब्दः, घट इति अर्थ' इत्यादिप्रतीतिः । एवं च शब्दार्थयोस्तादात्म्यं सम्बन्ध इति फलितम् । अत एव यस्य शब्दस्य येनार्थेन सह तादात्म्यम्, स शब्दस्तस्यैवार्थस्य बोधने योग्यो नान्यस्य । इत्थं च शब्दार्थयोस्तादात्म्यमेव योग्यता सम्बन्ध इत्याकूतम् ॥ २५ ॥

उक्त दोनों ही सम्बन्ध साधु और असाधु दोनों शब्दों में समान रूप से रहते हैं, इतना अन्तर अवश्य है कि साधु शब्दों में जो अर्थ सम्बन्ध हैं, वे धर्म और अर्थबोध उभय फल के जनक हैं, किन्तु असाधु - 'भाषा' शब्दों में जो अर्थ सम्बन्ध हैं, वे केवल अर्थबोध का जनक हैं, धर्म का जनक नहीं ।

अत एव धर्मजनकत्व - साधुत्व माना गया है ।

निष्कर्ष में - 'शब्द अर्थ और सम्बन्ध' तीनों नित्य रहने पर भी अखण्डशब्द और अर्थ के अपोद्धार द्वारा कल्पित प्रकृति-प्रत्ययों के विवेक से शब्द के साधुत्व की स्मृति के लिए व्याकरण शास्त्र सार्थक है ॥ २५ ॥

ते लिङ्गैश्च स्वशब्दैश्च शास्त्रेऽस्मिन्नुपदर्शिताः ।
स्मृत्यर्थमनुगम्यन्ते केचिदेव यथागमम् ॥ २६ ॥

प्रत्येकार्थप्रकाशिका

ते लिङ्गैरिति - ते = पूर्वश्लोकद्वये उक्ताः लिङ्गैः = सूत्रकारादिभिः 'तिप् - तस्-झी' त्यादिरूपेण, स्वशब्दैश्च =

आनन्दा

अष्टविधेषु व्याकरणप्रतिपाद्येषु कियतांचिदेव व्याकरणेनानुगम्यत्वमुपसंहारेणाह - 'ते लिङ्गैश्च' इति ।

अन्वयः - ते अस्मिन् शास्त्रे लिङ्गैश्च स्वशब्दैश्च उपदर्शिताः स्मृत्यर्थम् यथागमम् केचिदेव अनुगम्यन्ते ।

व्याख्या - ते = अनन्तरोक्ताः शब्दार्थसम्बन्धफलानां द्वैविध्येनाष्टविधाः प्रतिपाद्याः, अस्मिन् शास्त्रे = व्याकरणे लिङ्गैः = प्रमापकैः प्रत्ययादेशादिविधिभिः स्वशब्दैः = साक्षाद् बोधकशब्दैः - प्रतिपदपाठरूपै गणपाठ-धातुपाठादिभिः स्थानिलडादिविधिभिश्च उपदर्शिताः = साक्षात् परम्परया वा व्यवस्थापिताः

सूर्यमाया

पूर्वोक्त व्याकरण के प्रतिपाद्य अष्टविध पदार्थों में मुख्यतया अपोद्धारपदार्थ तथा अन्वाख्येय शब्द का व्याकरण से अनुगम किया जाना बताते हैं - 'ते लिङ्गैश्च' ।

अर्थ : - पूर्व कहे गये व्याकरण के वे प्रतिपाद्य पदार्थ इस शास्त्र में ज्ञापक लिङ्गों से और अपने शब्दों से जो प्रतिपादित किये गये हैं, उनमें कुछ ही पदार्थ साधुत्व के ज्ञान के लिए तथा (मन्वादि) स्मृति के निबन्धन के लिए आगमानुसार अनुगत रूप में बताये जाते हैं ।

आशय : - जनसाधारण व्यवहार में अखण्ड वाक्य का प्रयोग तथा उससे अखण्ड वाक्यार्थ का ज्ञान होता है, कुछ को शास्त्रज्ञों के व्यवहार से पद पदार्थ का ज्ञान भी होना देखा जाता है । अस्तु । किन्तु लौकिक वाक्यों में पदों के क्रम

प्रतिपदपाठरूपेण अस्मिन् = व्याकरणे उपदर्शिताः =

पदार्थाः स्मृत्यर्थम् = साधुपदतदर्थस्मरणार्थं मन्वादिस्मृतिनिबन्धार्थं वा यथागमम् = प्रातिशाख्यादिकाशकृत्स्नादिपूर्वपूर्वव्याकरण - श्रुतिस्मृत्यनुसारम् केचिदेव = अपोद्धारपदार्थरूपा अन्वाख्येयशब्दरूपाश्च अनुगम्यन्ते = स्थालीपुलाकन्यायेनानुगमविषयीक्रियन्ते, न सर्वे स्थितलक्षणा अर्थाः, प्रतिपादकाः वाक्यरूपाः शब्दा वा, इति न तेषामसंग्रहापत्तिरिह शङ्कनीया । अपोद्धारपदार्थादि- विनिगमेनान्येषामपि स्वरूपानुगमस्य सुग्रहत्वात् ।

विमर्शः - वस्तुगत्या अखण्डानि वाक्यानि, अखण्डाश्च प्रतिभारूपा वाक्यार्थाः । किन्तु तद्व्युत्पादनं दुःशकमिति हेतोर्लाघवेन तद्-व्युत्पादनार्थमपोद्धारः क्रियते । पदसमुदायाद् वाक्यात् पदानाम्, प्रकृतिप्रत्यय-समुदायात् पदाच्च प्रकृतिप्रत्ययानां तत्तदर्थानां चापोद्धारेण प्रकृतिप्रत्यय - तत्तदर्थनिरूपणद्वारा पद-पदार्थव्युत्पादनं तत्तदर्थसम्बन्धतत्फलानुगमनं च व्याकरणस्य कृत्यम् ।

का नियम न होने से पदों के यथेच्छ आगे पीछे प्रयोगभेद से वाक्य भिन्न भिन्न रूप में प्रयुक्त होते हैं, जबकि सबका मिला जुला एक ही अर्थ होता है । अतः वाक्य अनन्त होते हैं, उनका निरूपण पद पदार्थ के निरूपण के विना कठिन है । अतः व्याकरण के द्वारा पद पदार्थ का निरूपण तथा पदों में भी प्रकृति प्रत्ययों और उनके अर्थों के निरूपण द्वारा वाक्य और वाक्यार्थों का निरूपण किया जाना सुगम तथा सरल उपाय है, यह पहले भी कहा जा चुका है । अतः पदसमुदायरूप वाक्य से पद पदार्थों के अपोद्धार की व्यवस्था शास्त्रीय प्रक्रिया के निर्वाह के लिए की गई है । जिसके फलस्वरूप - व्याकरण के अष्टविध प्रतिपाद्य पदार्थ हैं - द्विविध अर्थ, द्विविध शब्द, उनका द्विविध सम्बन्ध, और उनका द्विविध फल । यह वस्तुस्थिति है । परन्तु इस व्याकरण शास्त्र में 'उक्त आठों पदार्थों में 'अपोद्धारपदार्थ तथा अन्वाख्येय शब्द' ये दो यहाँ मुख्य अनुगम के विषय हैं, सब नहीं । प्रकृति प्रत्यय के निरूपण द्वारा पद का निरूपण ही व्याकरण का प्रमुख उद्देश्य है । इसीलिए व्याकरण पदशास्त्र कहा जाता है ।

व्यवस्थापिताः स्मृत्यर्थम् = स्मृतिप्रणयनाय लोकैरपि कैश्चित्,

---

लौकिकवाक्यप्रयोगे वक्तृस्वातन्त्र्यान्नास्ति तत्र कश्चन क्रमनियम इति तेषामानन्त्यादनुगमो दुष्करः । पदेषु तु प्रकृतिप्रत्ययानां व्यवस्थितः क्रम इति तन्निर्वचनं सुकरमिति पदपदार्थनिरूपणपरमिदं व्याकरणं पदशास्त्रमिति गीयते । तत्र प्रकृति-प्रत्यय-तत्समुदाय-पदानामर्था अपोद्धारपदार्थाः, प्रकृतयः प्रत्ययाः तत्समुदायपदानि च अन्वाख्येयाः शब्दाः परिभाष्यन्ते । तत्र पदावयवतया कल्प्यमानाः प्रकृतयः प्रत्ययाश्च मूलभूता अनादिष्टाः स्थानितया ये राजन्ते, तेषामर्थाः शास्त्रकृद्भिः साक्षात् स्वशब्दैरुच्यमानाः प्रतिपदोक्ततया व्यपदिश्यन्ते, ये तु आदेशादयस्तेषामर्थास्तु – 'स्थान्यर्थाभिधानसमर्थस्यैवादेशता'

प्रकृति प्रत्यय के निरूपण से पद का निरूपण तथा प्रकृत्यर्थ और प्रत्ययार्थ के निरूपण से पदार्थ का निरूपण सुगम उपाय है । इनका निरूपण यहाँ प्रत्यक्ष अपने शब्दों से तथा अप्रत्यक्षरूप में – ज्ञापक लिङ्गों से किया गया है । शास्त्रकारों के मतभेद से यहाँ यह पक्षभेद उपस्थित होता है ।

सुबन्त और तिङन्त द्विविध पद हैं । जिनमें प्रथम-सुबन्त पद का अपोद्धार किये जाने पर प्रातिपदिक प्रकृति, सुप् प्रत्यय का विभाग कर उनके अर्थ का विभाग किया जाता है । जो प्रातिपदिक के – 'जाति व्यक्ति लिङ्ग संख्या कारक' ये पाँच अर्थ मानते हैं, उनके मत में द्वितीया आदि सुप् विभक्तियाँ कर्म आदि कारक तथा द्वित्व बहुत्व आदि संख्या का वाचक न होकर द्योतक हैं । अत एव इस मत में सुप् विभक्तियाँ अप्रत्यक्ष लिङ्ग के रूप में कर्म आदि कारक व संख्या का ज्ञापक हैं, साक्षात् वाचक नहीं । जो संख्या और कारक को प्रातिपदिकार्थ नहीं मानते, उनके मत में "द्व्येकयोः-बहुषु" इत्यादि संख्या-विधायक सूत्र की एकवाक्यता से विभक्ति का विधायक "कर्मणि द्वितीया" इत्यादि सूत्रों के अनुसार द्वितीया आदि विभक्तियाँ प्रत्यक्ष रूप में स्वयं ही संख्या और कर्म आदि कारक का वाचक होती हैं । इसी प्रकार तिङन्त पद के अपोद्धार में व्यवस्था है । वहाँ तिङ् प्रत्यय व लकार की प्रकृति 'धातु' को जो क्रिया के साथ संख्या कारक का भी वाचक मानते हैं, उनके मत में लकार तथा तिङ्

इत्याक्षेपः, यथागमम् = श्रुत्यनुकूलम् केचिदेव अनुगम्यन्ते,

इति लिङ्गैरेव प्रमीयन्ते, न तु प्रत्यक्षमाख्यायन्ते । तथाहि-सुबन्तेऽपोद्धारे क्रियमाणे 'इमम्' इत्यादौ द्वितीयादिविभक्तीनां वाचकत्वे कर्मत्वादिरर्थः "कर्मणि द्वितीया" इत्याद्यनुशासनेन स्वशब्दैरेवोच्यते, तदादेशस्य - अमि पूर्वरूपादेस्तु "स्थानिवदादेश-" इत्यतिदेशवाक्यैर्लिङ्गैः परोक्षतया गम्यते । 'पञ्चकं प्रातिपदिकार्थ' इति मते विभक्तीनां द्योतकत्वे तूभयथा लिङ्गैरेव तदर्थो ज्ञायते न विभक्तिशब्दैः । एवं तिङन्तेऽपि पदेऽपोद्धारे क्रियमाणे 'भवति' इत्यादौ लडादिप्रत्ययानां वर्तमानादिकालार्थत्वं "वर्तमाने लट्" इत्याद्यनुशासनेन साक्षात् स्वशब्दैरेव व्यवस्थाप्यते, कालस्य क्रियोपाधित्वमिति

प्रत्यय-कर्ता आदि कारक, वर्तमान आदि काल, और एकत्व द्वित्व आदि संख्या का साक्षात् वाचक शब्द न होकर द्योतकमात्र होने से उनका ज्ञापक लिङ्ग होता है, लिङ्गरूप में कारक और संख्या का ज्ञान कराता है । जो धातु को "भूवादयो धातवः" इस संज्ञासूत्र के अनुसार क्रियामात्र का वाचक मानते हैं, उनके मत में- "लः कर्मणि, वर्तमाने लट्" इस अनुशासन के अनुसार लकार स्वयं ही कर्ता कारक और वर्तमान काल का साक्षात् वाचक होता है, तथा उसका आदेश तिङ् प्रत्यय "शेषात् कर्तरि" "द्व्येकयोः" "शेषे प्रथमः" इन सूत्रों की एकवाक्यता से आदेशविधायक सूत्र "तिप्तस्झि" के अनुसार साक्षात् स्वशब्दों से कर्ता कारक, संख्या और पुरुष का वाचक होता है, लिङ्गरूप में ज्ञापक नहीं । साथ ही 'धातु' संज्ञाशब्द होने से स्वयं क्रिया का वाचक होता है ।

यहाँ यह भी ज्ञातव्य है कि स्थानी और आदेश में स्थानी शब्द - 'भिस्, ङे' आदि विभक्ति अथवा 'लकार' आदि प्रत्यय स्वयं ही साक्षात् अर्थ का वाचक होते हैं, किन्तु उनका आदेश 'ऐस् - य' आदि स्थानी के द्वारा स्थानी के स्मारक लिङ्ग के रूप में अर्थ का ज्ञापक होते हैं, साक्षात् वाचक नहीं ।

इसके अतिरिक्त 'गर्गादि-बिदादिगण' प्रतिपदपाठ के रूप में साक्षात् स्वशब्द से अपने अर्थ का बोध कराते है, तथा धातुपाठ भी प्रतिपादपाठ के रूप में स्वयं साध्य क्रिया का वाचक होते है, लिङ्गरूप में ज्ञापक नहीं । आदेश शब्द स्थानी का ज्ञापक होने से लिङ्ग ही होते हैं, किन्तु लादेश 'तिङ्' मतभेद से

स्पष्टोऽस्य भावः ॥ २६ ॥

त्वन्यत्, धातोर्वाच्यत्वं मास्तु, लकारार्थत्वे किं बाधकम्? लादेशतिबादेस्तु वर्तमानार्थत्वं स्थान्यर्थाभिधानमुखेन, तत्रापि तिबादेरेकत्वादिसंख्यार्थकत्वं कर्त्रादिकारकार्थकत्वं च "लः कर्मणि च" इति, "द्व्येकयोः" इति, "शेषात् कर्तरि" इत्येषां "तिप्तस्झि" इत्यादिनैकवाक्यतया स्वशब्देन व्यवस्थाप्यते। तत्रापि तिङां द्योतकत्वे धातूनां च क्रियाकारकसंख्यावाचकत्वे धातुना क्रियादेरभिधानं "भूवादयो धातव" इत्यनुशासनेन स्वशब्देनैव, तिङा तु आदेशत्वेन लिङ्गेन गम्यते। एवं 'भावयति' इत्यादौ णिजन्ते अपोद्ध्रियमाणो णिजर्थः प्रयोजकव्यापारः "हेतुमति च" इतिसूत्रविहितेन णिचा प्रोच्यते। प्रत्ययस्य द्योतकत्वे तु णिचा लिङ्गेन गम्यते, धातुनैव प्रयोज्यव्यापारः प्रयोजकव्यापारश्चोच्यते। तदेतत् सर्वमभिप्रेत्याह - 'ते लिङ्गैश्च स्वशब्दैश्च' इति ॥ २६ ॥

'काल-कारक-पुरुष' का स्वशब्द से वाचक भी होते हैं। "स्त्रियाम्" अधिकार में विहित टाप्, ङीप् आदि प्रत्यय और "हेतुमति च" आदि सूत्रों से विहित णिच्- सन् आदि प्रत्यय तो वाचकत्व और द्योतकत्व पक्षभेद से 'स्वशब्द तथा लिङ्ग' उभय रूप से बोधक होते हैं।

पक्षभेद से की गई यह व्यवस्था केवल अपोद्धार पदार्थ और अन्वाख्येय शब्द के विषय में ही है, स्थितलक्षण अर्थ और प्रतिपादक के विषय में नहीं है। इन सब अभिप्रायों से यहाँ - 'ते लिङ्गैश्च स्वशब्दैश्च' तथा 'केचिदेव' यह कहा है ॥ २६ ॥

शिष्टेभ्य आगमात् सिद्धाः साधवो धर्मसाधनम् ।
अर्थप्रत्यायनाभेदे विपरीतास्त्वसाधवः ॥ २७ ॥

प्रत्येकार्थप्रकाशिका

ननु चैषा साध्वसाधुव्यवस्था अप्रामाणिकी, इत्यत आह- शिष्टेभ्य इति । अस्यान्वयः स्पष्ट एव । अयमाशयः -

---

आनन्दा

'सम्बन्धाः साध्वसाधुषु' इत्युक्त्या साधूनामसाधूनां च बोधकत्वाविशेषे प्रतिपादिते 'धर्मे ये प्रत्यये चाङ्गम्' इत्युक्तेरप्यविशेषेण धर्मप्रत्ययोभयजनकत्वपरत्वसम्भवे साधूनामेव धर्मजनकत्वोक्तिवैषम्ये किं बीजमिति प्रश्ने तत्र आगमप्रमाणसिद्धत्वासिद्धत्वरूपं वैषम्ये बीजमाह - 'शिष्टेभ्य' इति । सामान्यतः साधोर्धर्माङ्गत्वं तु पूर्वमुक्तमेव पुनस्तदभिधाने किमिह वैचित्र्यं स्यात् ?

अन्वयः - अर्थप्रत्यायनाभेदे शिष्टेभ्यः आगमात् सिद्धाः साधवः धर्मसाधनम्, विपरीताः तु असाधवः ।

व्याख्या - अर्थप्रत्यायनाभेदे = अर्थप्रत्यायनस्य - अर्थबोधकत्वस्य साधूनामसाधूनां च अभेदे = विशेषाभावे 'समाने' सत्यपि, शिष्टेभ्यः = आप्तेभ्य आगताद् आगमात् = अनाद्यविच्छिन्नाचारपरम्परास्मृतिरूपाद् ये सिद्धाः ते साधवः, अत एव ते धर्मसाधनम्, विपरीताः = ये आगमाद् न सिद्धाः, ते असाधवः, अतश्च ते न धर्मसाधनम्, इति फलितोऽर्थः ।

सूर्यमाया

'सम्बन्धाः साध्वसाधुषु' इस कथन से साधु असाधु दोनों में समानरूप से अर्थ का सम्बन्ध माने जाने पर 'धर्मे ये प्रत्यये चाङ्गम्' यह कथन भी सन्दिग्ध हो जाता है कि - 'साधु-असाधु' दोनों समान रूप से ज्ञान के साथ धर्म के भी अङ्ग हैं क्या? यदि हैं, तो उस स्थिति में 'साधु-असाधु' यह विषम विभाग व्यवस्था ही असंगत हो जायगी । इस आशङ्का के समाधानरूप में यहाँ साधु-असाधु व्यवस्था का बीजभूत प्रमाण निरूपण करते हैं - 'शिष्टेभ्यः' ।

साध्वपभ्रंशयोरुभयोरर्थबोधकतायास्तुल्यत्वेऽपि संस्कृतशब्द-प्रयोगे धर्मो भवति, अपभ्रंशप्रयोगे नेति व्यवस्था शिष्टानां

स्मरन्ति हि शिष्टाः - 'एकः शब्द सम्यग् ज्ञातः सुष्ठु प्रयुक्तः स्वर्गे लोके च कामधुग् भवति' इति ।

विमर्शः - अर्थबोधान्यथाऽनुपपत्त्या शब्देषु कल्प्यमाना या शक्तिः सा शिष्टप्रयुक्तेषु संस्कृतेष्वेव 'गो'शब्दादिषु कल्प्यते, न तु गावी-गोणीत्यादिष्वपभ्रंशेषु, तस्मादपभ्रंशा न साक्षाद् वाचकाः, किन्तु साधुशब्दानुमानेन परम्परया बोधका इतीह - 'अर्थप्रत्यायनाभेदे' इति वचनमसमञ्जसम्, इति चेदत्रोच्यते - न्यायमतेऽपभ्रंशानां वाचकत्वाभावेऽपि स्वमते साधुस्मरणेनार्थ-प्रत्यायकत्वस्यासत्त्वान्नास्ति साध्वपभ्रंशयोरर्थप्रत्यायने कश्चन भेदः । व्याकरणमते विनिगमनाविरहाद् साधुष्विवापभ्रंशेष्वपि शक्तिरस्त्येवेति न काप्यनुपपत्तिः । अत एवोक्तं प्राक् - 'सम्बन्धाः साध्वसाधुषु' इति ।

अर्थ : - यद्यपि साधु और असाधु दोनों शब्द समानरूप में अर्थ का बोध कराते हैं, इसमें कोई अन्तर नहीं है, तथापि जो शब्द शिष्टों की आचारपरम्परा से आगत-आगम से सिद्ध हैं, वे साधु हैं, तथा आगम विहित होने से धर्म का साधन भी होते हैं, किन्तु जो शब्द इसके विपरीत हैं - अर्थात् आगम से सिद्ध नहीं हैं, वे आगमविरुद्ध होने से असाधु हैं, धर्म का साधन नहीं होते ।

आशय : - भूख प्यास की शान्ति ताजे अन्न जल से जैसे होती है, वैसे बासी (पर्युषित) अन्न जल से भी एक समान होती है, किन्तु ताजा अन्न जल का भक्षण-पान शास्त्रविहित होने से धर्म का साधन साधुकर्म माना गया है, और बासी अन्न जल का भक्षण-पान शास्त्रविरुद्ध होने से धर्म का साधन साधुकर्म नहीं माना गया है ।

हविष्यान्न - निरामिष आहार - धर्म का साधन साधु कर्म है, आमिष आहार अधर्म का साधन - असाधु कर्म है । साधु-असाधु, धर्म-अधर्म की व्यवस्था का मूल है - शास्त्र प्रमाण । शिष्टों की अनादि - निरवच्छिन्न आचारपरम्परा का उपदेश है - मन्वादिस्मृतिरूप आगम । आगम से विहित ही साधु तथा धर्म का साधन होता है, जैसे कि - अहिंसा, सत्य, अस्तेय, ब्रह्मचर्य और अपरिग्रह, ये पाँचों विश्वजनीन महान् धर्म हैं । आगम से प्रतिषिद्ध - असाधु तथा अधर्म

परम्पराव्यवहारदर्शनेन तद्बोधकस्मृतिः श्रुतिमूलिकैव मन्वादि-स्मृतिवत् ॥ २७ ॥

एवं च 'शब्दयति = अर्थं प्रकाशयति' इति व्युत्पत्तियोगात् स्वभावात् शब्दानां साधूनामसाधूनां चार्थबोधकत्वे समानेऽपि तुल्यन्यायेनार्थबोधकत्वमात्रेण नहि समेषां साधुत्वमसाधुत्वं वेति निर्वचनस्वातन्त्र्यम् । शब्दानां साधुत्वा-साधुत्वव्यवस्थाया अनाद्यविच्छिन्नशिष्टाचारस्मृतिप्रमाणसिद्धत्वासिद्धत्व-तन्त्रत्वात्, तन्मूलक-धर्मसाधनत्वासाधनत्ववैशेष्याच्च । तस्मादागममूलत्वात् साध्वसाधुव्यवस्थाया अप्रामाणिकत्वं न शङ्कनीयम् । इत्थं च - आगमसिद्धत्वेन धर्मसाधनत्वं साधुत्वम्, आगमविरुद्धत्वेन धर्मासाधनत्वमसाधुत्वमिति पर्य्यवसितोऽर्थः । तदाह भगवान् पतञ्जलिः- 'समानायामर्थावगतौ शब्देन चापशब्देन च तत्र धर्मनियमः क्रियते' इति ॥ २७ ॥

होता है, जैसे अहिंसा आदि पाँचों के विपरीत-हिंसा-असत्य आदि पाँच । इनके अन्तर्गत ही हैं अवान्तर धर्म-अधर्म । निष्कर्ष में साधु-असाधु धर्म-अधर्म की व्यवस्था में बीज है - शास्त्र का विधि निषेध, ईप्सित कामना की पूर्ति नहीं । प्रकृत में भी शब्द की साधु-असाधु, धर्म-अधर्म की व्यवस्था का बीज है - आगम सिद्धत्व तथा आगमविपरीतत्व, अर्थ-बोधकत्व नहीं ।

निष्कर्ष में - व्याकरणशास्त्र से व्युत्पन्न शब्द ही साधु होता है, इससे विपरीत असाधु होता है । साधु शब्द के प्रयोग से धर्म होता है, असाधु के प्रयोग से नहीं, इस व्यवस्था में प्रमाण है - 'एकः शब्दः सम्यग् ज्ञातः सुष्ठु प्रयुक्तः स्वर्गे लोके च कामधुग् भवति' यह शिष्टोक्त स्मृति ॥ २७ ॥

नित्यत्वे कृतकत्वे वा तेषामादिर्न विद्यते ।
प्राणिनामिव सा चैषा व्यवस्थानित्यतोच्यते ॥ २८ ॥

प्रत्येकार्थप्रकाशिका

नन्वस्तु शब्दनित्यतावादे शिष्टोक्तशब्दानामेव व्याकरणे-नानुगमात् श्रुतिमूलकत्वम्, अनित्याश्च शब्दा व्याकरणेन

आनन्दा

वैयाकरणानां नित्यत्वनये शब्दानां साधुत्वव्यवस्थाया अनादिशिष्टाचारानु-मितश्रुतिमूलकत्वेन प्रामाणिकत्वस्य संगतावपि नैयायिकानां कृतकत्वनये नवनवोत्पद्यमानानां शब्दानां साधुत्वव्यवस्थाया अनादिशिष्टाचारमूलकत्वेन प्रामाणिकत्वोपपादनं न युज्यते, इत्याशङ्कां प्रवाहनित्यतया समाधत्ते - 'नित्यत्वे' इति ।

अन्वयः - तेषाम् नित्यत्वे कृतकत्वे वा आदिः न विद्यते,
प्राणिनाम् इव सा च एषा व्यवस्थानित्यता उच्यते ।

व्याख्या - तेषाम् = शब्दानाम् नित्यत्वे = अविकारित्वेन कूटस्थनित्यत्वनये, कृतकत्वे = उत्पत्तिमत्त्वेनानित्यत्वनये वा, आदिः = यस्मात् पूर्वो नास्ति, न बभूव कश्चनेति तथाभूतम् - ऐदम्प्राथम्यं न विद्यते, पूर्वपूर्वेषामपि

सूर्यमाया

शब्द के नित्यत्व मत में अनादि शब्दों की साधु-असाधु व्यवस्था शिष्टों की अनादि परम्परा से प्राप्त आगममूलक होने से भले ही प्रमाण मानी जाय, किन्तु कृतकत्व मत में व्याकरण से व्युत्पन्न नव नव शब्दों की साधु-असाधु व्यवस्था को अनादिपरम्पराप्राप्त आगममूलक कहना युक्तिसंगत नहीं है, इस आशङ्का का कृतकत्व मत में भी शब्द का - 'अनादि व्यवहार का अविच्छेद रूप' प्रवाहनित्यत्व सिद्ध कर समाधान करते हैं - 'नित्यत्वे' ।

निष्पाद्यन्ते इति तार्किकादिमते कथमागममूलकत्वमत आह – 'नित्यत्वे' इति ।

सद्भावश्रुतेः – 'यो वै वेदान् प्रहिणोति तस्मै' इति, 'अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा' इति च ।

प्राणिनाम् = स्थूलसूक्ष्मशरीरवतां मनुष्यादीनाम् इव सा च = प्रसिद्धा एषा = दृश्यमाना अनाद्यविच्छिन्नतारूपा व्यवस्थानित्यता = प्रतिक्षण-मन्यत्वेऽप्येकाकारावस्थितिरूपा प्रवाहनित्यता व्यवहारनित्यता वा उच्यते संसारानादित्ववादिमीमांसकप्रभृतिभिः ।

विमर्शः – प्राणिनो जीवाः पाञ्चभौतिकं स्थूलशरीरं विहाय प्राणादिसप्तदशाङ्गं सूक्ष्मशरीरं प्रतिपद्य पारलौकिकं फलमुपभुज्य पुनरिह लोकेऽन्यामन्यां योनिमापद्यन्ते, 'रमणीयचरणा रमणीयां योनिमापद्यरेन् कपूयचरणाः कपूयां योनिम्' इत्याह यथा छान्दोग्ये । एवं च शरीरिणां शरीरस्योत्पादविनाशित्वेऽपि कर्तृत्वेन कर्मफलभोक्तृत्वेन च जीवो नित्य आस्थीयते ।

अर्थ : – नित्यत्व अथवा अनित्यत्व, उभय पक्ष में शब्दों का आदि नहीं है, यह शब्द सर्वप्रथम है, इससे पहले कभी नहीं था, यह नहीं कहा जा सकता, अर्थात् शब्द अनादि है । मनुष्य-पशु आदि प्राणियों की अनादि एकाकार व्यवहार स्थिति के समान शब्दों की अनादिकाल से व्यवहार व्यवस्था चली आ रही है, वही यह निरन्तर व्यवहारपरम्परा शब्दों की व्यवस्थानित्यता कही जाती है ।

आशय : – शब्द नित्य हो वा अनित्य हो, दोनों पक्षों में शब्द अनादि है । 'घट पट' आदि किसी भी शब्द के विषय में यह नहीं कहा जा सकता कि – इस शब्द का पहले पहल आज ही प्रयोग हुआ है, आज से पहले कभी प्रयोग नहीं हुआ है, साथ ही यह भी कहना कठिन है कि इस शब्द का यह अन्तिम प्रयोग है, इसके पश्चात् इसका कभी प्रयोग नहीं होगा । इससे यह सिद्ध होता है कि शब्द अनादि अनन्त है । नदी के प्रवाह के समान शब्दों का अनादिकाल से

तेषाम् = शब्दानां नित्यत्वे, कृतकत्वे = अनित्यत्वे वा आदिर्न विद्यते = अनादित्वं वर्तते, इति यावत् । प्राणिनामिव= संसारिणामिव सा एषा व्यवस्थानित्यता = व्यवहारनित्यता उच्यते । यथा संसारिणाम् उत्पत्तिविनाशयोर्दृष्टत्वेऽपि अनादित्वेन

यद्वा अनादौ संसारे 'अनुपश्य यथा पूर्वे प्रतिपश्य तथाऽपरे' इति कठोक्तदिशा पूर्वे पूर्वे पितृ-पितामह-प्रपितामहादयो यथा बभूवुः, तथा परे परे जायमाना जनिष्यमाणाश्चानन्ताः पुरुषाः, नान्तो न चादिः । शरीराणामुत्पत्ति-विनाशवत्त्वेऽप्ययमेव पुरुष आदिरिति वक्तुं न शक्यते, अयमेव चान्त इत्यपि वक्तुं न शक्यते, इति मनुष्यादिप्राणिनामनाद्यनन्तत्वेन व्यवहारनित्यता प्रवाहनित्यता वा स्वीक्रियते । नदीप्रवाहः प्रतिपलमन्योऽन्यः प्रवर्तते,

---

अविच्छिन्न व्यवहार होता आ रहा है तथा अनन्तकाल तक व्यवहार होता रहेगा । एतावता यह मानना होगा कि - शब्दों की व्यवहारव्यवस्था नित्य है, व्यवहार का कभी विच्छेद न होने से शब्द की प्रवाहनित्यता है । जैसे गङ्गा आदि नदी का प्रवाह प्रतिपल परिवर्तनशील रहने पर भी - वही यह गङ्गा का प्रवाह है, जो कि बाल्य काल में देखा था, ऐसा अव्याहत एकाकार सदा व्यवहार होता है, वैसे ही 'घट पट' आदि शब्द भी पूर्व पूर्व परम्परा से एकाकार प्रयुक्त व प्रतीत होता आ रहा है, यह शब्द की व्यवस्थानित्यता तथा प्रवाहनित्यता है ।

इस प्रकार की व्यवस्थानित्यता नश्वर शरीर वाले मनुष्य पशु पक्षी आदि प्रत्येक प्राणियों में भी समान पाई जाती है ।

सूक्ष्मशरीरधारी जीव प्रारब्ध कर्मों के अनुसार मनुष्य - पशु -पक्षी आदि प्रत्येक प्राणी रात दिन जन्म लेते हैं तथा चले जाते हैं । भले ही वह प्राणी इस संसार में न रहे, किन्तु यह नहीं कहा जा सकता कि - अमुक प्राणी ही सबसे पहला है, उससे पहले कोई नहीं हुआ था तथा भविष्य में न होगा । अतः यह मानना होगा कि व्यक्ति विशेष रहे वा न रहे, किन्तु मनुष्य वा पशु-पक्षी समाज

प्रवाहनित्यत्वम्, तथा उक्तव्यवस्थायाः शिष्टव्यवहारानुमित-श्रुतिमूलकत्वम्, इति भावः ॥ २८ ॥

किन्तु अनादिकालात् 'सोऽयं प्रवाह' इति प्रवर्तते व्यवहारः, तस्मात् प्रवाहोऽविच्छिन्नः प्रवर्तमानो 'नित्य' इति व्यपदिश्यते, तथा शब्दानां कृतकत्ववादेऽपि 'अयमेव घटशब्दः प्रथम' इति दुर्वचत्वाद् अनादौ शब्दपूर्वे-जगद्व्यवहारे शब्दानामनादित्वस्य स्फुटत्वेन प्रवाहनित्यता तेषां कृतकत्वेऽपि व्यवस्थितेति सैव शब्दानां व्यवस्थानित्यतोच्यते ॥ २८ ॥

पहले भी था, आगे भी होगा । किसी को सबसे पहला-व्यक्ति, अथवा सबसे अन्तिम व्यक्ति नहीं कहा जा सकता, फलतः प्रत्येक प्राणिसमाज अनादि और अनन्त है, उसका लोकव्यवहार नित्य है । इसी तरह किसी शब्द को न आदिम कहा जा सकता है, न अन्तिम ही कहा जा सकता है । प्रत्येक शब्द पूर्व पूर्व परम्परा से आगत है, तथा आगे भी उसका व्यवहार होता रहेगा । फलतः शब्द को कृतक मानने के पक्ष में भी आदि अन्त न होने से शब्द अविच्छिन्न प्रवाह रूप में व्यवहारतः नित्य है । अतः उसकी साधु असाधु व्यवस्था भी पूर्व पूर्व शिष्ट परम्परा से सिद्ध अनादि है ॥ २८ ॥

नानर्थिकामिमां कश्चिद् व्यवस्थां कर्तुमर्हति ।
तस्मान्निबध्यते नित्या साधुत्वविषया स्मृतिः ॥ २९ ॥

प्रत्येकार्थप्रकाशिका

ननु लोकत एव साध्वसाधुव्यवस्था ज्ञास्यते किं व्याकरणेनेत्यत आह - 'नानर्थिकाम्' इति । अन्वयः सुगमः । अयमाशयः-

---

आनन्दा

'शिष्टेभ्य आगमात्' इत्यनेन साध्वसाधुव्यवस्थायाः शिष्टप्रयोगपरम्परामूलकत्वोक्त्या लोकत एव सा व्यवस्था सिध्यतीति व्याकरणस्यानर्थक्यप्रसङ्ग इति शङ्कां परिहरन् तस्य सार्थक्यमुपपादयति - 'नानर्थिकाम्' इति ।

अन्वयः - कश्चित् इमां व्यवस्थाम् अनर्थिकां कर्तुं न अर्हति, तस्माद् नित्या साधुत्वविषया स्मृतिः निबध्यते ।

व्याख्या - कश्चित् = कोऽपि शिष्टः, का कथा मुनेः, इमाम् = धर्माधर्मसाधनतया प्रोक्ताम् व्यवस्थाम् = 'अयं साधुरयमसाधु'रिति

सूर्यमाया

'शिष्टेभ्य आगमात्' इस पूर्वोक्त कथन से शब्दों की - साधु असाधु व्यवस्था अनादि शिष्टप्रयोग परम्परा मूलक होने से उक्त व्यवस्था शिष्ट जनों के लोकव्यवहार से ही यदि सम्भव है, तो व्याकरण की क्या आवश्यकता है? इस शङ्का का निवारण कर व्याकरण की सार्थकता सिद्ध करते हैं - 'नानर्थिकाम्' ।

अर्थ : - कोई भी शिष्ट जन इस साधु-असाधु व्यवस्था को प्रयोजन के विना नहीं कर सकता है, फलतः इस व्यवस्था का दृष्ट या अदृष्ट कोई प्रयोजन अवश्य है । इसलिए अनादि परम्परा से सिद्ध अत एव प्रवाहरूप में नित्य - यह साधुत्वविषयक व्याकरणस्मृति आवश्यक तथा सार्थक होने से शब्दतत्त्वज्ञ ऋषियों के द्वारा निबद्ध की जाती है ।

'अयं साधुरयमसाधुः' इति नियमः - धर्माधर्मनिबन्धकतया अर्थवत्त्वेन कर्तव्यत्वाद्, इदानीन्तनेभ्यः कैश्चिदपि अनन्तानन्त-

---

निर्धारणरूपाम् अनर्थिकाम् = निष्प्रयोजनाम् कर्तुं न अर्हति, अपितु सप्रयोजनामेव कर्तुमर्हति, अतोऽवश्यं प्रयोजनेन भाव्यम्, अतो व्याकरणानर्थक्यं न शङ्कनीयमित्यर्थः । तस्माद् = धर्माधर्मसाधनत्वेन साध्वसाधुव्यवस्थायाः सार्थकत्वाद् नित्या = पूर्वपूर्वगुरुपरम्पराक्रमागता प्रवाहनित्या साधुत्वविषया= स्वरसंस्कारादिप्रक्रियाभि लौकिकवैदिकशब्दसाधुत्वव्यवस्थापिका स्मृतिः= सामान्यविशेषलक्षणोपदेशरूपा व्याकरणाभिधाना निबध्यते = अविच्छेदेन विद्यमानाऽपि विस्मृत्या मध्ये तिरोहिता संस्कृतान्तःकरणैर्मुनिभिः पुनः स्मृत्वा विरच्यते ।

विमर्शः - शिष्टप्रयोगानादिपरम्परामूला साध्वसाधुव्यवस्थेति सत्यम्, नैतावता व्याकरणस्मृतेरानर्थक्यं शङ्कनीयम्, लौकिकवैदिकानन्तानन्तसाधुशब्दानां दुर्विज्ञेयस्वरसंस्कारनियम इदानीन्तनेभ्यो जिज्ञासुभ्योऽत्रिकालज्ञेन केनचिद-

---

आशय : - शिष्ट जन कभी कोई अनर्थक कार्य नहीं करते । शिष्ट जनों की प्रत्येक व्यवस्था सार्थक होती है, निरर्थक नहीं । अत एव शब्दतत्त्वज्ञ शिष्टों का यह जो लौकिक - वैदिक शब्दों का स्वर - संस्कार विषयक नियम है, तथा साधु-असाधु विषयक व्यवस्था है, वह कथमपि अनर्थक नहीं हो सकता है । यह अवश्य है कि जहाँ कोई दृष्ट प्रयोजन लक्षित न हो, वहाँ अदृष्ट प्रयोजन - धर्म वा पुण्य अवश्य होगा । अतः साधु शब्द धर्म का साधन माना गया है ।

यह व्यवस्था कोई लौकिक साधारण जन नहीं कर सकता है, क्योंकि वह अल्पज्ञ है । लौकिक वैदिक अनन्त शब्दों के दुर्विज्ञेय स्वर-संस्कार नियम को तथा धर्म-अधर्म के साधन रूप में साधु-असाधु नियम व्यवस्था को साधारण कोई शिष्ट व्यक्ति न जान सकता है, ना ही कर सकता है । इसलिए पूर्व पूर्व गुरुओं की परम्परा से उपदिष्ट शब्दों के स्वर-संस्कार विषयक नियमों व

प्रयोगविषयकनियमं कर्तुमशक्यत्वाच्च नित्यैव व्याकरणस्मृतिर्गुरुपरम्परया निबध्यते, इति ॥ २९ ॥

सर्वज्ञेन व्याकरणं विना दुर्वचः । क्वाचित्क-कादाचित्क-कतिपयशिष्टप्रयोगस्य केनचिद् लोकतो ज्ञातुं शक्यत्वेऽपि सार्वत्रिक-सार्वकालिकानन्तशिष्टप्रयोगस्य व्याकरणं विना दुरवधारत्वेन ततः साध्वसाधुव्यवस्थायाः तेषां धर्माधर्मसाधनत्वस्य च नितरां दुर्ज्ञेयत्वेन तदनुगमाय तपःसंस्कृतान्तःकरणैः सकलशिष्टप्रयोगाणां ज्ञाने निर्वचने च समर्थैर्मुनिभिर्निबध्यमानं व्याकरणं सर्वथा सार्थकम् ॥ २९ ॥

साधु-असाधु व्यवस्था को स्मरण कर धर्मफलक साधु शब्दों की सिद्धि के लिए आधुनिक जिज्ञासुओं के कल्याण हेतु प्रतिभासम्पन्न सर्वदर्शी ऋषियों ने अनादिकाल से अविच्छिन्न प्रवाहरूप में प्रवर्तित - नित्य इस व्याकरण स्मृति का निबन्धन तथा ग्रन्थन किया है । अतः व्याकरणस्मृति अनन्यथासिद्ध सर्वथा सार्थक है ॥ २९ ॥

न चागमादृते धर्मस्तर्केण व्यवतिष्ठते ।
ऋषीणामपि यज्ज्ञानं तदप्यागमहेतुकम् ॥ ३० ॥

प्रत्येकार्थप्रकाशिका

ननु अनन्तप्रयोगविषयाऽपीयं व्यवस्था प्रबलतर्केण साध्या चेत् किं व्याकरणेनेत्यत आह - 'न चे' ति । आगमादृते = वेदं विना तर्केण = अनुमानेन धर्मः न च व्यवतिष्ठते = न तु व्यवस्थितो भवतीत्यर्थः, सूक्ष्मादियावत्पदार्थानां पुरुषैर्ज्ञातुम-

---

आनन्दा

'शिष्टेभ्य आगमात् सिद्धाः साधवो धर्मसाधनम्' इत्युक्त्या साधूनां धर्मसाधनत्वेऽन्वयमुखेनागमस्य प्रमाणतामभिधाय तत्र व्यतिरेकमुखे-नाप्यागमस्य प्रमाणत्वमुपपादयन् धर्मव्यवस्थायां तर्कस्य शङ्कितप्रमाणतां निरस्यति - 'न चागमादृते' इति ।

अन्वयः - आगमाद् ऋते तर्केण धर्मः न च व्यवतिष्ठते,
ऋषीणाम् अपि यद् ज्ञानं तद् अपि आगमहेतुकम् ।

व्याख्या - आगमाद् ऋते = श्रुतिं स्मृतिं च विना तर्केण = आगमप्रमाण-शून्येनानुमानेन धर्मः = विहितकर्मजन्यः पुण्याख्यो धर्मविशेषः न च व्यवतिष्ठते = न तु प्रमितो भवति । ऋषीणाम् = अतीन्द्रियवस्तुदर्शिनां

सूर्यमाया

साधु-असाधु के प्रयोगविषयक धर्म - अधर्म के निर्णय में आगम ही प्रमाण है, आगम निरपेक्ष केवल तर्क नहीं, यह बताते हैं - 'न चागमादृते' ।

अर्थ : - आगम प्रमाण के विना केवल तर्क के द्वारा धर्म का निर्णय नहीं हो सकता है । ऋषियों का भी सूक्ष्म 'धर्म' आदि विषयक जो ज्ञान है, वह भी आगमप्रमाणमूलक है ।

आशय : - धर्म - अधर्म आदि अतीन्द्रिय वस्तु के निर्णय में मूल प्रमाण आगम है, तर्क नहीं हो सकता । हाँ, आगम से उपदिष्ट वस्तु के संशय विपर्यय को

शक्यत्वात् । ननु ऋषयः अतीन्द्रियप्रत्यक्षकर्तारः अनुमास्यन्ति, इत्यत आह - ऋषीणामपि यद् ज्ञानम् = सूक्ष्मादिप्रत्यक्षं, तदपि आगमहेतुकम् = वेदोक्तकर्मानुष्ठानजनितमित्यर्थः ।

अयम्भावः - काशीस्थपुरुषस्य प्रयागगमनेऽपि स्वभावो न व्यतिक्रमते, कर्म्मणां तु देशकालमन्त्रादिभेदेन सामान्यनगरे

मुनीनां मन्त्रज्ञानाम् अपि यद् ज्ञानम् = धर्माधर्मादिसूक्ष्मज्ञानम्, तद् = प्रातिभज्ञानम् अपि आगमहेतुकम् = श्रुतिस्मृतिविहितकर्मानुष्ठा-नातिशयप्रयोज्यम् ।

विमर्शः - नन्वस्तु लौकिकवैदिकानामनन्तशब्दानां या साधुत्वप्रक्रिया सा व्याकरणं विहाय केनाप्यन्येनोपायेन साधयितुं न शक्येति सत्यम्, किन्तु साधुशब्दानां प्रयोगविषया या धर्मसाधनत्वव्यवस्था सा तु तर्केण साधयितुं शक्यते । तथाहि अनुमानम् - 'साधुशब्दा धर्मसाधनम् शिष्टप्रयुक्तत्वात्' इति ।

दूरकर निर्णय में तर्क सहायक व पोषक अवश्य होता है । अत: वेदमूलक तर्क भी प्रमाण है, वेदनिरपेक्ष स्वतन्त्र नहीं । सम्पूर्ण मीमांसाशास्त्र ही तर्क है, जिसके विना वेदार्थ का निर्णय नहीं होता । 'श्रुति-लिङ्ग - वाक्य - प्रकरण - स्थान - समाख्या' इन षड्विध प्रमाणों से तथा 'उपक्रम-उपसंहार - अभ्यास - अपूर्वता-अर्थवाद-उपपत्ति' इन तात्पर्यनिर्णायक लिङ्गों से वेदवाक्यों का याग आदि धर्म में तात्पर्य निर्णय किया जाता है । आगमविरुद्ध केवल तर्क पुरुष की उत्प्रेक्षारूप कल्पना मात्र है, उससे वस्तु की सिद्धि नहीं होती है । मान लें - कवि की उत्प्रेक्षा है कि 'यह नील गगनमण्डल सागर है, ताराएँ उसके फेन हैं, चन्द्रमा कुण्डलित शेषनाग है, उसमें श्याम वर्ण नारायण हैं' । इस कल्पना से ये कल्पित वस्तु क्या सिद्ध हो जायेंगें? अनुमान का आधार है - व्याप्तिज्ञान, जो कि नियत साहचर्य के दर्शन से होता है । साहचर्य नियम के दो आधार हैं - कार्यकारणभाव, अथवा स्वभाव । कार्यकारणभाव - प्रत्यक्ष वस्तु का तो सहज में ज्ञात होता है, किन्तु अदृष्ट - अतीन्द्रिय वस्तु का कार्यकारणभाव आगम के विना दुर्ज्ञेय है। स्वभाव किसी वस्तु का यदि नियत हो, तो व्याप्तिज्ञान के बल से अतीन्द्रिय

गोदानेन यत्फलं ततोऽधिकं काश्यादिक्षेत्रे, तत्रापि ग्रहणे अधिकतरम्, तत्रापि मन्त्रादिपूर्वकेणाधिकतममित्यादिफलजनन-स्वभावस्य भिन्नत्वात् स्वभावस्य नैयत्याभावात् साहचर्य्यादिद्वारा व्याप्तिग्रहाभावेन धर्मव्यवस्था तर्केण नानुमातुं शक्या । अत आगमबलादेव अदृष्टधर्माधर्मव्यवस्था । तथा च साध्वसाधु-

---

अत्रोच्यते - वस्तूनां स्वभावनियमाभावाद् व्याप्तिग्रहासम्भवेन आगमनिरपेक्षेण केवलेन तर्केण धर्माधर्मव्यवस्था साधयितुं न शक्यते, तत्तन्मातृभाषाणां शिष्टप्रयुक्तत्वेऽपि धर्मसाधनत्वस्यानभ्युपगमेन शङ्कितव्यभिचारात् । तस्माद् आगमबलादेव नित्यनैमित्तिककाम्यकर्मणां धर्मसाधनत्ववत् साधुशब्दानामपि धर्मसाधनत्वव्यवस्था न्याय्या, न केवलादागमनिरपेक्षात्तर्कात् । तदाह मनुर्द्वादशेऽध्याये -

आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना ।
यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः ।। इति ।

सूक्ष्म वस्तु भी अनुमान प्रमाण का विषय हो सकता है, किन्तु वस्तु का स्वभाव यदि नियत न हो तो अनुमान कैसे सम्भव है ? साधारणतः लौकिक कर्म हो वा वैदिक कर्म हो, उनका स्वभाव देश, काल, अधिकारी, पात्र आदि के भेद से परिवर्तनशील है, निश्चित एकरूप नहीं है । भूख-प्यास की शान्ति वा प्राणरक्षा के लिए भोजन जलपान किया जाता है, एतावता वह सर्वथा धर्म ही होगा यह नहीं कहा जा सकता । वह धर्म भी हो सकता है। अधर्म भी हो सकता है । धर्म-अधर्म के निर्णय का आधारभूत प्रमाण तो शास्त्र है । जो शास्त्रविहित है वह धर्म है, जो शास्त्र से निषिद्ध है वह अधर्म है । शास्त्रविहित जो अन्न-जल भक्ष्य व पेय है, वह बुभुक्षा शान्ति के साथ धर्म का साधन होता है, शास्त्र से निषिद्ध-मांस-मदिरा आदि का भोजन-पान अधर्म का साधन अनर्थकारी होता है । इससे स्पष्ट है कि भोजन-पान क्रिया का स्वभाव सामर्थ्य स्थिति भेद से एक नियत नहीं है । स्त्री- पुरुष प्रसङ्ग लोक में साधारण एक कर्म है, वह अभ्युदयकारी भी है - अनर्थकारी भी है । शास्त्रविहित पति-पत्नी का प्रसङ्ग कल्याणकारी है, शास्त्रवर्जित परपुरुष - स्त्री का प्रसङ्ग अनर्थकारी होता है, लोकदृष्टि में - कामशान्ति वा वंशवृद्धि उसका समान प्रयोजन होने पर भी वह तर्कमात्र से धर्म

प्रयोगविषया धर्माधर्मव्यवस्था व्याकरणं विना न तर्कसाध्या, इति फलति । यद्यपि ऋषयः योगजधर्मबलाद् अतीन्द्रिय-पदार्थानपि साक्षात्कृतवन्तः, तथापि तेषामपि सिद्धावस्थातः पूर्वम् आगमोक्तयोगानुष्ठानाद् आगमेनैव धर्म्मनिर्णयः, न तु शुष्कतर्केणेति सिद्धम् ॥ ३० ॥

धर्माधर्मव्यवस्थायां वेदाविरोधितर्कस्य प्रतिष्ठासत्त्वेऽपि वेदामूलके तर्के नास्ति काचनास्था । तदाह ब्रह्मसूत्रम् - 'तर्काप्रतिष्ठानात्' इति ।

येषामपि कपिलादीनामृषीणां सूक्ष्मातीन्द्रियप्रकृतिपुरुषगुणत्रयविषयकं लोकोत्तरं प्रातिभं ज्ञानं श्रूयते, तदपि आगमोपदिष्टतपोऽनुष्ठानजंन्यपुण्या-तिशयबलादेव, न त्वागमानपेक्षम् ॥ ३० ॥

अधर्म के निर्णय में हेतु नहीं हो सकता । क्योंकि उसका लोकदृष्टि तथा परलोकमर्यादा में स्वभाव एकरूप नहीं है । लोक में इन सब कर्मों का प्रत्यक्ष फल भले ही समान हो, किन्तु उनका अदृष्ट फल स्वभाव भिन्न हैं ।

लौकिक आहार-विहार कर्मों का जो प्रत्यक्ष फलस्वभाव है, उससे विलक्षण ही अप्रत्यक्ष-धर्म-अधर्म फलस्वभाव है, अतः प्रत्यक्ष - दृष्ट हेतुमूलक अनुमान प्रमाण से अतीन्द्रिय धर्म-अधर्म का निर्णय सम्भव नहीं है । जबकि लौकिक कर्मों की यह स्थिति है, तो वैदिक - 'याग-अभिचार' आदि कर्मों के अदृष्टफल 'पुण्य-पाप' का तर्क से निर्णय की चर्चा ही दूर निरस्त है । अत एव प्रकृत में साधुशब्द के प्रयोगविषयक धर्म के निर्णय में व्याकरण आगम ही प्रमाण है, शुष्कतर्क नहीं । कपिल आदि ऋषियों का जो प्रकृति-पुरुष गुणत्रय आदि सूक्ष्मतत्त्वविषयक ज्ञान है, वह भी आगममूलक योग तप के अनुष्ठान से पुण्यातिशयजनित ही है ॥ ३० ॥

**धर्मस्य चाव्यवच्छिन्नाः पन्थानो ये व्यवस्थिताः ।
न ताँल्लोकप्रसिद्धत्वात् कश्चित्तर्केण बाधते ॥ ३१ ॥**

प्रत्येकार्थप्रकाशिका

नन्वस्तु यत्र तर्कानवसरः तत्रागमस्य प्रामाण्यम्, यत्र तु सम्भवति तर्कः, तत्र तेनागमो बाध्यतामित्यत आह - 'धर्मस्ये' ति । धर्मस्य अव्यवच्छिन्नाः = अभ्रष्टाः, सदा विद्यमाना इति

आनन्दा

'न चागमादृते' इत्यनेन आगमामूलकतर्कस्य धर्मेऽप्रमाणत्वोक्त्या तद्विषये आगमस्य प्रबलत्वं तर्कस्य च दुर्बलत्वं सूचितम्, तदेव विशदयन् आगमस्य तर्काबाध्यत्वमाह - 'धर्मस्य' इति ।

अन्वयः - धर्मस्य अव्यवच्छिन्नाः व्यवस्थिताः च ये पन्थानः, तान् कश्चित् लोकप्रसिद्धत्वात् तर्केण न बाधते ।

व्याख्या - धर्मस्य = वर्णाश्रमाचारस्य अव्यवच्छिन्नाः = प्रवाहवद् विच्छेदरहिताः सातत्येन प्रवर्तमानाः, न तु वार्षशतिक-वार्षसहस्रकादिदीर्घसत्रवद् विच्छिन्नाः, व्यवस्थिताः = वादिप्रतिवादिभ्यां निर्णीताश्च ये पन्थानः =

सूर्यमाया

आगमोक्त धर्ममार्ग को तर्क से अबाध्य बताते हैं - 'धर्मस्य' ।

अर्थ : - धर्म के अटूट - सदा प्रवर्तमान और व्यवस्थित जो मार्ग हैं, उनको कोई भी शिष्टजन लोकप्रसिद्धि के कारण तर्क के द्वारा नहीं बाधित करता है ।

आशय : - अनादिकाल से अविच्छिन्न प्रवाहरूप में सदा आ रहे एवं व्यवस्थित धर्ममार्ग का कोई शिष्ट व्यक्ति लोकप्रसिद्धि के अनुसार कोरे तर्क के द्वारा विरोध व उल्लङ्घन नहीं करता, क्योंकि अदृष्ट वस्तु 'धर्म-अधर्म' आगम प्रमाण का विषय है, वह दृष्ट हेतु पर निर्भर केवल तर्क का विषय नहीं है । प्रत्यक्ष और अनुमान से स्वतन्त्र एवं निरपेक्ष आगम प्रबल प्रमाण है, धर्म-अधर्म के विषय में तर्क आगम के अधीन सापेक्ष प्रमाण है । तर्क आगम का सहायक व पोषक हो

यावत्, व्यवस्थिताः = नियताः ये पन्थानः = मार्गाः - 'तरति ब्रह्महत्यां योऽश्वमेधेन यजेते' त्यादयः, तान् = मार्गान् कश्चित्= शिष्टजनः, लोकप्रसिद्धत्वात् = लौकिकव्यवहारानुसारात् तर्केण = स्वयुक्त्या न बाधते = न विरुणद्धीत्यर्थः ।

कर्मानुष्ठानमार्गाः, अश्वमेधादयः पश्वालम्भनादयश्च तान् = आगमोक्तमार्गान् अश्वमेधादीन् कश्चित् = कोऽपि शिष्टः लोकप्रसिद्धत्वात् = सामान्यतो हिंसात्वेन निन्दनीयतया लोके प्रसिद्धत्वाद्धेतोः तर्केण = स्वकीयकल्पनाबलेन हेतुवादेन न बाधते = न विहन्तुमर्हति, तेषां प्रबलागमप्रमाणविहित-त्वात् ॥ ३१ ॥

विमर्शः - आगमानां तपःप्रभूतप्रातिभज्ञानरूपत्वेन परिशुद्धिमूलत्वाद् बलवत्त्वम्, तर्काणां च हेतुवादानां पुरुषोत्प्रेक्षितत्वेन पुरुषसुलभरागादि-दोषापरिशुद्धिमूलकत्वाद् बाध्यत्वम्, इति विविच्यताम् । तर्काणां दृष्टहेतुमूलकत्वेन दृष्टेऽर्थे प्रवृत्तिसम्भवेऽपि धर्माधर्मादावदृष्टेऽर्थे शङ्कित-व्यभिचारतया नास्ति प्रवृत्तिप्रसरः । व्रतिनां वर्णिनां श्रमणानां वा ताम्बूलभक्षणं दिवाशयनं रहस्यङ्गनासंलपनं निषिद्धमिति कृत्वा तदधिकारिणां गृहिणामपि नहि तन्निषिद्धम्, गृहिणां यदि तद् विहितमिति वर्णिनामपि तन्नहि विहितम् । कश्चित् कस्यचिद् यो धर्मः, स एव तदन्यस्याधर्मः । नहि कश्चन कस्यचित् धर्मः स्वरूपतः सर्वस्य भवति धर्मः । वर्णाश्रम-वयोदेशकाल-वेदशाखादिभेदैर्धर्माधर्मव्यवस्थायाः प्रविभक्तत्वात् । 'उदिते

सकता है, स्वतन्त्र नहीं । अतः तर्क आगम का बाधक नहीं हो सकता । तर्क से विरोध की स्थिति में आगम ही तर्क का बाधक होता है ।

अभक्ष्य - मांस आदि का भक्षण, अपेय मदिरा आदि का पान, परस्त्री संगम भले ही प्रत्यक्ष में सुखजनक प्रतीत होवें, किन्तु वे आगम से निषिद्ध अनर्थ के जनक अधर्म मार्ग हैं । माघ मास में प्रयाग सङ्गम में प्रातः सूर्योदय से पूर्व स्नान-ध्यान आदि प्रत्यक्ष में भले ही कष्टकारक हों, किन्तु वे शास्त्र से - 'विहितकर्म' जन्म जन्मान्तरीय पापनाशक पुण्यतम धर्म हैं । प्रत्यक्षमूलक कोरे तर्क के आधार पर

अयमाशयः - लोके हिंसाया विरुद्धत्वेऽपि 'वायव्यं श्वेत-पशुमालभेते' ति श्रुतिबलात् यज्ञीयपशुवधस्य धर्मसाधकत्वं मन्यन्ते शिष्टाः, अत आगमो न तर्कबाध्य इति ॥ ३१ ॥

जुहोति, अनुदिते जुहोति, अध्युषिते जुहोति' इति श्रुतेरेकस्यैवाग्निहोत्रकर्मणः शाखाभेदेन कालविभागेन हवनस्य विधानात् । तदाह भगवान् मनुः -

उदितेऽनुदिते चैव समयाध्युषिते तथा ।
सर्वथा वर्तते यज्ञ इतीयं वैदिकी श्रुतिः ॥ २-१५ ॥

तस्माद् धर्माधर्मस्वरूपनिर्णये श्रुतिरेव प्रमाणं न तर्कः । विरोधे आगमेन तर्को बाध्यते, न तर्केणागमः । तदाह मनुस्मृतिः - 'धर्मं जिज्ञासमानानां प्रमाणं परमं श्रुतिः' इति । महाभाष्यकारोऽप्याह - 'भक्ष्यं च नाम क्षुत्प्रतिघातार्थमुपादीयते, शक्यं चानेन श्वमांसादिभिरपि क्षुत् प्रतिहन्तुम् । तत्र नियमः क्रियते - इदं भक्ष्यमिदमभक्ष्यमिति । तथा खेदात् स्त्रीषु प्रवृत्तिर्भवति, समानश्च खेदविगमो गम्यायां चागम्यायां च, तत्र नियमः क्रियते - इयं गम्या, इयमगम्येति' ॥ ३१ ॥

यदि व्यवस्था मानी जाय तो यह सब विपरीत व्यवस्था हो जायगी, जो धर्म है वह अधर्म, जो अधर्म है वह धर्म सिद्ध हो जायगा । अतः यह मानना होगा कि - अदृष्ट - 'धर्म-अधर्म' मार्ग की व्यवस्था का मूल प्रमाण आगम ही है । आगम से उपदिष्ट धर्ममार्ग तर्क से अकाट्य है ॥ ३१ ॥

अवस्थादेशकालानां भेदाद् भिन्नासु शक्तिषु ।
भावानामनुमानेन प्रसिद्धिरतिदुर्लभा ॥ ३२ ॥

प्रत्येकार्थप्रकाशिका

किञ्चानुमानादीनां व्यभिचारोऽप्यस्तीत्याह - 'अवस्थे'ति । यादृशो युवावस्थायां बलः, तादृशो न वार्धके - इत्यवस्थाभेदात्, हिमालये शीततरस्पर्शवज्जलम् - वलाहकाग्निकुण्डादिषु तूष्णम्-

---

आनन्दा

भावानामनियतस्वभावत्वेन व्यभिचारसंभवाद् दृष्टसाहचर्येणादृष्टार्थ-निर्णयेऽनुमानस्यासामर्थ्यमपि निरूपयति - 'अवस्था' इति ।

अन्वयः - अवस्थादेशकालानां भेदाद् भिन्नासु शक्तिषु अनुमानेन भावानां प्रसिद्धिः अतिदुर्लभा ।

व्याख्या - अवस्थादेशकालानाम् = अवस्थाया-बाल्ययौवन-स्थाविरादि - स्वरूपायाः, देशस्य - हिमालय-तप्तकुण्डमेघादेः, कालस्य - हेमन्त-वसन्त-ग्रीष्मादेश्च भेदाद् भावानाम् = वस्तूनाम् शक्तिषु = गुणक्रियादिसामर्थ्यरूपासु भिन्नासु = विलक्षणासु समुपलभ्यमानासु अनुमानेन = दृष्टेन हेतुना भावानाम् = अदृष्टार्थानाम् प्रसिद्धिः = स्वभावनिश्चयः, अतिदुर्लभा = कर्तुं न शक्यते ।

सूर्यमाया

अनियत स्वभाव के कारण वस्तुओं की सिद्धि में अनुमान को असमर्थ बताते हैं - 'अवस्था' ।

अर्थ : - अवस्था, देश और काल के भेद से वस्तुओं का स्वभाव बदलते रहने से अनुमान के द्वारा वस्तुओं की सिद्धि अत्यन्त दुर्लभ है ।

आशय : - अवस्थाभेद से, देशभेद से तथा कालभेद से एक ही वस्तु का स्वभाव व सामर्थ्य भिन्न हो जाता है । कुमार, यौवन और जरा अवस्था के भेद से व्यक्ति का बल वृद्धि, परिणाम और ह्रास को प्राप्त करता है । धान, गेहूँ आदि का सुरक्षित नवीन बीज अच्छा अङ्कुर व फसल को उत्पन्न करता है, वही अतिजीर्ण पुराना होने पर सुन्दर फसल नहीं देता । इसका अवस्थाभेद कारण है ।

इति देशभेदात्, ग्रीष्मे सूर्य्यस्य यादृशप्रचण्डांशवः, न तादृशो हेमन्ते - इति कालभेदात्, भिन्नासु शक्तिषु सतीषु भावानाम्= वस्तूनां प्रसिद्धिः = साहचर्य्यादिस्वभावः अनुमानेन = युक्त्या

विमर्शः - कार्यकारणभावमूलकं स्वभावमूलकं चाविनाभावनियमं दृष्ट्वा अनुमानस्य प्रवृत्तिर्भवति । वह्निधूमयोः कार्यकारणभावमूलकं महानसादौ वह्निविशेषस्य साहचर्यनियमं दृष्ट्वा पर्वतादौ दृष्टेन धूमेन लिङ्गेन वह्नेरनुमानम्, वृक्षत्वशिंशपात्वयोः स्वभावमूलकं साहर्चनियमं दृष्ट्वा शिंशपात्वेन दृष्टेन हेतुना वृक्षत्वस्यानुमानं दृष्टविषयकं भवति, नादृष्टलिङ्गविषयकम् । यदपि रूपादिज्ञानस्य क्रियात्वेनेन्द्रियकरणकत्वानुमानम्, तदपि चक्षुरादेरिन्द्रिय-विशेषस्यातीन्द्रियत्वेन साहचर्यादर्शनेऽपि छिदादौ वास्यादेरिव क्रियात्वेन सामान्यतः करणवत्त्वस्य दृष्टत्वेन सामान्यतोदृष्टविषयकमेवानुमानं प्रवर्तते । सामान्यतोदृष्टानुमानस्य परिशेषानुमानस्य चाप्यविषये सर्वथैवादृष्टे स्वर्गापूर्वादौ धर्मादौ तु आगम एव प्रमाणम्, नानुमानम् ।

वस्तुतोऽदृष्टार्थे बहुत्र च दृष्टार्थेऽपि नानुमानं व्यभिचारशङ्कामतिक्रामति । तथाहि - कुतो ह्ययं निर्णयो यद् धूमो वह्नेरेव जायते, नान्यस्मादिति । यथा वह्नि र्मणिमरणिं च विहाय तृणादपि जायते, तथा धूमोऽपि वह्निं विहाय अन्यतोऽपि कुतश्चिद् भवितुमर्हति, इति शङ्का केन वार्यते । अवश्यं चेयं व्यभिचारशङ्का निवारणीया । नो चेद् धूमाद् वह्नेरिव वह्निलिङ्गाद् वह्निकारणतृणविशेषादेरपि सदनुमानत्वप्रसङ्गः स्यात् । तृणाद् वह्निमसकृदु-

---

हिमालय प्रदेश का जलवायु अतिशीतल होता है, वहीं समुद्र प्रदेश का समशीतोष्ण होता है । ग्रीष्मकाल में कूपजल शीतल होता है तो वही शीतकाल में उष्ण होता है । इस प्रकार अवस्था, देश और काल के भेद से जबकि वस्तु का स्वभाव भिन्न भिन्न पाया जाता है, तो ऐसी स्थिति में वस्तु स्वभाव का नियम न होने के कारण उनका साहचर्यनियमरूप व्याप्ति का ज्ञान भी न हो सकने से अनुमान प्रमाण से वस्तु स्वभाव का नियमतः साधन कठिन है । व्यभिचारदोष की आशङ्का से ग्रस्त अनुमान जबकि बाह्य प्रत्यक्षवस्तु का साधन करने में पङ्गु है, तो अत्यन्त परोक्ष अतीन्द्रिय - यागादि कर्म का अपूर्व - धर्म, तथा निषिद्ध कर्म का अपूर्व-अधर्म आदि तथा उसका फल स्वर्ग या नरक का साधन अनुमान कैसे कर सकता है ? कथमपि नहीं । अन्ततः एक आगम प्रमाण

अतिदुर्लभा = दुष्प्रापा, इत्यागमबलादेव धर्मो निर्णेतव्य इति फलितम् ॥ ३२ ॥

पलभ्य व्याप्तिग्रहवतोऽजाविपालकस्य - 'अयं देशस्तृणवान् वह्निमत्त्वाद्' इत्याद्यनुमानस्याप्यनाभासत्वं स्यात् । तस्मादुक्तव्यभिचारशङ्काऽपाकरणीया, किन्तु सा नापाकर्तुं शक्या-अवस्थादेशकालानां भेदाद् भावानां स्वभावस्य नैयत्याभावात् ।

न च धूमस्य वह्निव्यतिरिक्तकारणकत्वे धूमत्वसामान्यैकजातीयत्वं न स्यादिति वाच्यम्, नानातृणारणिमणिकारणकत्वेऽपि वह्नित्वावच्छिन्नस्य वह्नेरेकजातीयत्ववद् - 'इन्द्रिय-लिङ्ग-शब्दादि'विभिन्नकारणकत्वेऽपि प्रमात्वावच्छिन्नप्रमाज्ञानस्यैकजातीयत्ववत् वह्न्यतिरिक्तकारणकत्वेऽपि धूमत्वावच्छिन्नस्य धूमस्यैकजातीयत्वे बाधकाभावात् ।

यदि तत्र वह्निविशेषे एव तृणादेः पृथक् कारणत्वं न वह्निसामान्ये, प्रत्यक्षादिप्रमाविशेषे एवेन्द्रियलिङ्गादेः कारणत्वमुच्यते, तर्हि धूमविशेषे एव वह्नेरपि कारणत्वं स्याद्, न तु धूमसामान्ये । एवं तर्हि धूमसामान्येन वह्निसामान्यस्य नैव कार्यकारणभावो न वा व्याप्तिग्रहः सम्भवतीति कथं धूमेन वह्नेरनुमितिप्रत्याशा कर्तुं शक्या ?

यथा कुसूलसुरक्षितस्य धान्यबीजस्याङ्कुरजननसामर्थ्यं, न मूषकाघ्रातस्येत्यवस्थाभेदात्; हिमालये जलस्य शीततमस्पर्शो न सागरे, इति देशभेदात्, ग्रीष्मे सवितुः प्रचण्डरश्मिर्हेमन्ते तु सुखस्पर्शः, इति कालभेदात्, तत्तद्दृष्टपदार्थानामपि स्वभावनियमाभावादनुमानाविषयत्वं तदाऽदृष्टार्थानां स्वर्गापूर्वसाधनानां धर्माचाराणां तु का कथाऽनुमानविषयतायाः ? तदर्थमागमः श्रद्धया सेव्यताम् ॥ ३२ ॥

ही ऐसा है, जोकि दृष्ट अदृष्ट सकल वस्तु का यथार्थ स्वरूप बताता है । अतः प्रकृत में साधु असाधु शब्द के स्वरूप को तथा उसके प्रयोग में धर्म अधर्म फल को एक मात्र व्याकरण आगम ही प्रमित करता है, अनुमान नहीं ॥ ३२ ॥

निर्ज्ञातशक्ते र्द्रव्यस्य तान्तामर्थक्रियां प्रति ।
विशिष्टद्रव्यसम्बन्धे सा शक्तिः प्रतिबध्यते ॥ ३३ ॥

प्रत्येकार्थप्रकाशिका

किञ्च प्रतिबन्धकवशात् सतोऽपि स्वभावस्य विनाश इत्याह- 'निर्ज्ञाते' ति । ताम् ताम् - अर्थक्रियाम् = दहनादिं प्रति, निर्ज्ञाता = दृष्टा शक्तिः = दाहकता यस्य तस्य =

आनन्दा

अवस्थादिभेदेन वस्तुस्वभावस्य परिवर्तमानत्वेनानैकान्तिकत्वाद् अनुमानासम्भवमुक्त्वा तस्य प्रतिबध्यमानत्वादप्यनुमानासाध्यत्वमाह - 'निर्ज्ञातशक्ते' रिति ।

अन्वयः - ताम् ताम् अर्थक्रियाम् प्रति निर्ज्ञातशक्तेः द्रव्यस्य विशिष्टद्रव्यसम्बन्धे सा शक्तिः प्रतिबध्यते ।

व्याख्या - ताम् ताम् = विभिन्नरूपाम् अर्थक्रियाम् = अर्थस्य - वस्तुनः तृणकाष्ठादे र्घटपटादे र्मनुष्यपशुपक्ष्यादेर्वा दाह - प्रकाशना - कर्षणादिक्रियां प्रति निर्ज्ञातशक्तेः = दृष्टसामर्थ्यस्य द्रव्यस्य = तेजसोऽग्निविद्युदादेः विशिष्टद्रव्यसम्बन्धे = विशिष्टद्रव्यस्य - प्रतिबन्धकस्य चन्द्रकान्तमण्यादे-र्यद्वा - द्रव्यान्तरस्य जलदपटलादेः सम्बन्धे = समवधाने सति सा = पूर्वदृष्टा शक्तिः = दाहकता - प्रकाशकताऽऽकर्षकतादिसामर्थ्यम् प्रतिबध्यते = प्रतिरुध्यते ।

सूर्यमाया

प्रतिबन्धकवश कारण में कार्यशक्ति का प्रतिबन्ध हो जाने से भी वह अनुमानसाध्य नहीं हो सकता, यह बताते हैं - 'निर्ज्ञातशक्तेः' ।

अर्थ : - दाह व प्रकाश आदि तत् तत् कार्यों में जिसकी शक्ति सम्यक् ज्ञात है, ऐसे अग्नि आदि द्रव्य की वह प्रसिद्ध दाहकता आदि शक्ति चन्द्रकान्तमणि आदि प्रतिबन्धक द्रव्यविशेष के समवधान में अवरुद्ध व नष्ट हो जाती है । अर्थात् द्रव्य की शक्ति स्थिर व नियत न होने से अग्निदर्शनमात्र से उसकी दाहकता शक्ति का वा उससे दाहकार्य का अनुमान नहीं हो सकता ।

द्रव्यस्य अग्नेः-विशिष्टद्रव्यसम्बन्धे = प्रतिबन्धकमणिसमवधाने सा शक्तिः = दाहकता प्रतिबध्यते = विनश्यतीत्यर्थः, अतः स्वभावानुगमो दुर्घट इति भावः ॥ ३३ ॥

विमर्शः - भौम-दिव्यौदर्याकरजभेदात् चतुर्विधं तेजः । तेषु भौमस्य वह्ने-स्तृणकाष्ठादेर्दाहकार्यं प्रति घटपटादेश्च प्रकाशकार्यं प्रति, विद्युदादेश्च मनुष्यादेराकर्षणादिकार्यं प्रति या शक्तिः सा सर्वजनविदिता, किन्तु प्रतिबन्धक-द्रव्यविशेषस्य चन्द्रकान्तमणेः संयोगे सति वह्निना दाहो न जन्यते, तेन ज्ञायते यत् सा वह्नौ दाहकताशक्ति नश्यति, एवमेव तस्य या घटपटादिवस्तु-प्रकाशकता शक्तिः साऽपि नेपथ्याक्षेपे प्रतिरुध्यते, विद्युतश्च या मनुष्यादेराकर्षकता शक्तिः सापि मध्ये काष्ठादिनिक्षेपे निरुध्यते । किंच तेजस उष्णस्पर्शवत्त्वं स्वभावः, सोऽपि विशिष्टद्रव्यस्य सोमरसस्य समवाये दिव्ये तेजसि चन्द्रमसि प्रतिहन्यते, हिमांशुरिति गीयते । जलदपटले विद्युद् विद्योतते, परं च न दहति । खद्योतगतं तेजो न प्रकाशयति न च दहति, केवलं भोगसाधनशरीरतया मन्दमस्फुटं द्योतते एव । औदर्यो जठराग्नि-र्भुक्तं पीतं च पचत्येव, न दहति, न प्रकाशयति, न प्रकाशते, अन्तर्हितस्तिष्ठति । आकरजं तु सुवर्णादितेज आप्य-पार्थिवादि-द्रव्या-वष्टम्भान्नैव दहति, नापि प्रकाशयति, न च प्रकाशते ।

तदित्थं द्रव्यविशेषसमवधाने द्रव्यशक्तेः प्रतिबन्धादपि स्वभावनियमा-भावात्तद्विषये नानुमानस्य प्रसरः ॥ ३३ ॥

आशय : - जब कि लोकविदित अग्नि आदि द्रव्य के सुविदित दाहकता स्वभाव का नियम न रहने से अनुमान से निश्चय करना सम्भव नहीं है, तो लोक में सर्वथा अविदित 'याग' आदि अलौकिक वस्तुओं के अदृष्ट - 'धर्म' आदि स्वभाव का निश्चय आगम को छोड़ केवल अनुमान से करना तो नितान्त ही सम्भव नहीं है । अत एव मानना होगा कि दृष्ट अथवा अदृष्ट वस्तुओं के स्वभाव व सामर्थ्य का सम्यक् निर्णय एकमात्र आगम से ही होता है । यह अवश्य है कि - आगम से सिद्ध वस्तुस्वभाव का आगमानुसारी अनुमान भी साधक व पोषक प्रमाण होता है, आगम विरोधी नहीं ॥ ३३ ॥

यत्नेनानुमितोऽप्यर्थः कुशलैरनुमातृभिः ।
अभियुक्ततरैरन्यैरन्यथैवोपपाद्यते ॥ ३४ ॥

प्रत्येकार्थप्रकाशिका

किञ्चैकेनानुमितस्यार्थस्य परेण खण्डनात् तर्केषु न कस्यचिद् विश्वास इत्याह - 'यत्नेने' ति । अन्वयः सुगमः । उदाहरणम् - यथा केनचित् ''शब्दः द्रव्यम् अव्यवहित -

---

आनन्दा

कुशल-कुशलतम-पुरुषबुद्धितारतम्येन परस्परविरुद्धमतसाधक-तर्काणामनवस्थानादनाश्वासमाह - 'यत्नेनानुमितोऽप्यर्थः' इति ।

अन्वयः - कुशलैः अनुमातृभिः यत्नेन अनुमितः अपि अर्थः अन्यैः अभियुक्ततरैः अन्यथा एव उपपाद्यते ।

व्याख्या - कुशलैः = तर्कनिपुणैः अनुमातृभिः = अनुमानकर्तृभिर्वादिभिः यत्नेन = निर्दुष्टहेतुप्रयोगप्रयासेन अनुमितः = साधितः अपि अर्थः = दर्शनसिद्धान्तविशेषः अन्यैः = परैः अभियुक्ततरैः = अभियोगे प्रतिवादे च दक्षतमैः - प्रतिवादिभिः अन्यथा = तद्विपरीत एव स्वसिद्धान्तविशेषः उपपाद्यते = हेत्वन्तरप्रयोगेण साध्यते, इत्यनवस्थानाद् नास्ति कश्चन तर्केष्वाश्वास इति हृदयम् ।

सूर्यमाया

पक्ष और प्रतिपक्ष दोनों का साधक - परस्पर विरुद्ध अनुमान पाये जाने से किसका विश्वास किया जाय किसका नहीं, इस अनवस्था के कारण केवल हेतु पर आश्रित अनुमान में अनास्था प्रकट करते हैं - 'यत्नेन' ।

अर्थ : - कुशल अनुमानकर्ताओं ने पूरे यत्न से जिस वस्तु को निर्दुष्ट हेतु से अनुमान द्वारा सिद्ध किया है, उनसे अधिक कुशल दूसरे प्रतिवादियों ने उससे विपरीत ही वस्तु को किसी भिन्न हेतु से अनुमान द्वारा सिद्ध किया है । अतः इस अनवस्था के कारण अनुमान की कोई आस्था नहीं है ।

सम्बन्धग्राह्यत्वाद् घटवत्'' इत्यनुमानेन शब्दे द्रव्यत्वे साधिते, परेण ''शब्दो न द्रव्यं बहिरिन्द्रियव्यवस्थाहेतुत्वाद् रूपादिवत्''

विमर्शः - 'गुणाश्रयो द्रव्यम्' इति लक्षयद्भिर्नैयायिकै र्गुणस्य विशेषणत्वाद् द्रव्यस्य च विशेष्यत्वात् तयो र्गुणगुणिभावतया पार्थक्यं साध्यते । तथाहि तेषामनुमानप्रयोगः - ''गुणद्रव्ये अन्योन्यं भिन्ने तयोर्विशेषणविशेष्यभावात्, राज्ञो राष्ट्रम् - चन्दनस्य गन्ध इत्यादिवत्'' इति, 'गुणसमूहो द्रव्यम्' इति वदद्भिः परैः सांख्यै र्भाट्टैस्तु 'शिंशपावनम्, चन्दनवनम्, सुरभिचन्दनम्' इत्यादौ अभिन्नेऽपि विशेषणविशेष्यभावदर्शनाद् निरुक्तहेतोरनैकान्तिकत्वेन तेन गुणद्रव्ययो र्भिन्नत्वस्य साधयितुमशक्यत्वेन गुणद्रव्ययोरभिन्नत्वमेव स्थाप्यते, इति गुणद्रव्यतादात्म्यवादिनां सामान्यानुमानम् ।

अत्र विशेषानुमानमपि । तद् यथा - शब्दस्य द्रव्यत्ववादिनो भाट्टाः शाब्दिकाश्च शब्दस्य द्रव्यत्वं साधयन्ति - ''शब्दो द्रव्यम् इन्द्रियसाक्षात्सम्बन्ध-ग्राह्यत्वाद् घटवत्'' इति । यथाहि घटः चक्षुषः साक्षात् संयोगेन सम्बन्धेन ग्राह्यो द्रव्यं भवति, तथा शब्दोऽपि साक्षात् श्रोत्राकाशतादात्म्यसम्बन्धेन ग्राह्यो द्रव्यं भवितुमर्हति, न गुणः ।

आशय : - गुण और द्रव्य का गुण-गुणिभाव मानने वाले भेदवादी कुछ तार्किक 'राजा का राज्य है', 'चन्दन का गन्ध है', इत्यादि स्थलों में राजा और राज्य का चन्दन और गन्ध का भेद रहने पर ही विशेषण-विशेष्यभाव देखे जाने से इस दृष्टान्त के आधार पर गुण द्रव्य का विशेषण-विशेष्यभाव हेतु से अनुमान द्वारा भेद सिद्ध करते हैं, तो वहीं गुण द्रव्य का अभेदवादी मीमांसक प्रभृति 'चन्दन वन, सुरभिचन्दन' इत्यादि स्थलों में अभेद में भी विशेषण-विशेष्यभाव पाये जाने से व्यभिचारी होने से उक्त हेतु को भेद का साधक नहीं मानते हैं । वन वृक्ष से भिन्न नहीं है, वृक्षसमूह रूप है, सुरभि जो द्रव्य है वह चन्दन है, सुरभिद्रव्य से भिन्न चन्दन नहीं है । अतः गुणसमूह को द्रव्य मानने वाले सांख्य और भाट्ट

इत्यनुमित्या शब्दे द्रव्यत्वाभावः साध्यते । अतः केवलतर्के विश्वासो न कार्यः । अत एव भगवन्तो जैमिनि-व्यासादयः

शब्दस्य नित्यद्रव्यत्वसाधकमपरमप्यनुमानं प्रयुञ्जते भाट्टानुयायिनः । तद्यथा - ''श्रोत्रं नित्यद्रव्यग्राहकं निरवयवेन्द्रियत्वाद् मनोवत्'' इति । अनेन शब्दस्य नित्यद्रव्यत्वं सिध्यति । यथा निरवयवेन्द्रियं मनो नित्यात्मनो द्रव्यस्य ग्राहकं तथा निरवयवेन्द्रियं श्रोत्रमपि नित्यद्रव्यस्य ग्राहकं भवितुमर्हति ।

इत्थं यत्र शब्दे भाट्टप्रभृतयो द्रव्यत्वं साधयन्ति, तत्रैव शब्दे कृतकत्व-वादिनस्तार्किकाः द्रव्यभिन्नं गुणत्वं साधयन्ति । तेषामनुमानं यथा - ''शब्दो गुणः - न द्रव्यम् चक्षुर्ग्रहणायोग्यबहिरिन्द्रियग्राह्यजातिमत्त्वाद् रूपादिवत्'' इति ।

मीमांसक आदि दूसरे वादी गुण द्रव्य का अभेद ही सिद्ध करते हैं । इस प्रकार अनुमान परस्पर विरोधी होने से अनवस्था दोष से ग्रस्त है । अतः वस्तु विशेष की सिद्धि में आगमप्रमाण से रहित केवल तर्क की कोई प्रतिष्ठा तथा आस्था नहीं है । जैसा कि मीमांसादर्शन (१-३-३) में कहा है कि आगम के विरोध में अनुमान अपेक्षणीय नहीं है, आगम विरोध न रहने पर अनुमान अपेक्षणीय है । ब्रह्मसूत्र (२-१-११) में तर्क की अनास्था स्पष्ट कही गई है । विशेषतः अदृष्ट धर्म आदि की व्यवस्था में तो आगम से स्वतन्त्र हेतुवाद पर निर्भर केवल तर्क प्रमाण नहीं हो सकता । क्योंकि कोई वादी किसी हेतु को निर्दुष्ट मानकर अनुमान वाक्य में उसका प्रयोग करते हैं, तो दूसरे कुशलतम प्रतिद्वन्द्वी वादी उस हेतु में व्यभिचार आदि दोष का उद्घाटन करते हैं । जैसा कि गुण द्रव्य के भेद साधन में पूर्वोक्त विशेषण-विशेष्य-भाव हेतु में ही अभेद स्थल में व्यभिचार कहा गया है ।

यदि कथंचित् हेतु सर्वथा निर्दुष्ट भी हो, तथापि एक वादी किसी हेतु से जो कुछ सिद्ध करता है, तो दूसरे उसके प्रतिद्वन्द्वी वादी किसी अन्य हेतु से उसके विपरीत ही वस्तु की सिद्धि करते हैं । जैसे शब्द को नित्य द्रव्य मानने

''विरोधे त्वनपेक्ष्यं स्यात्, असति ह्यनुमानम्'' (मी.द. १-३-३) ''तर्काप्रतिष्ठानात्'' (ब्र.सू. २-१-११) इति सूत्रयांचक्रुरिति ॥ ३४ ॥

एवमेव नित्यत्ववादिनः - ''शब्दो नित्यः श्रावणत्वाद् शब्दत्ववत्'' इत्यनुमानेन शब्दे नित्यत्वं साधयन्ति, तत्रैव कृतकत्ववादिनः - ''शब्दोऽनित्यः सामान्यवत्त्वे सत्यस्मदादिबाह्येन्द्रियप्रत्यक्षत्वाद् घटवत्'' इत्यनुमानेन अनित्यत्वं साधयन्ति, इत्येवं हेतुवादानामनवस्थानादागमानुपजीवितर्के नास्त्यास्था क्वचिदप्यागमप्रमाणकानाम् ॥ ३४ ॥

वाले भाट्टमीमांसक आदि साक्षात् चक्षु के संयोग सम्बन्ध से ग्राह्य-'घट' द्रव्य के दृष्टान्त से कर्णशष्कुलीगत आकाशरूपश्रोत्र के साक्षात् तादात्म्य सम्बन्ध से ग्राह्य होने से शब्द को द्रव्य सिद्ध करते हैं, तो वहीं उनके प्रतिद्वन्द्वी नैयायिक आदि बहिरिन्द्रिय होने से श्रोत्र को भूत के विशेष गुण का ग्राहक चक्षु दृष्टान्त से सिद्ध करते हैं, तथा प्रकारान्तर से रूप-स्पर्श आदि गुण के दृष्टान्त से बहिरिन्द्रिय से ग्राह्य जातिमान् होने से शब्द को द्रव्य से भिन्न गुण सिद्ध करते हैं । इस प्रकार अनुमान में विसंवाद तथा अनवस्था पाये जाने से आगम प्रमाण से शून्य अनुमान का प्रामाण्य विश्वसनीय नहीं है ॥ ३४ ॥

परेषामसमाख्येयमभ्यासादेव जायते ।
मणिरूप्यादिविज्ञानं तद्विदां नानुमानिकम् ॥ ३५ ॥

प्रत्येकार्थप्रकाशिका

नन्वेवम् ऋषीणां सूक्ष्मासूक्ष्म - व्यवहिताव्यवहितविषयकं यद् ज्ञानं, तदपि आनुमानिकम्, तथा च तत्रापि विश्वासो न स्यादत आह- 'परेषा' मिति । परेषाम् = अन्यान् जनान् प्रति असमाख्येयम् = अवाच्यम् मणिरूप्यादिविज्ञानम् = अयं

आनन्दा

मण्यादिपरीक्षकाणां दर्शनाभ्यासजन्यमण्यादिस्वरूपविषयकप्रत्यक्षानुभव-दृष्टान्तेन ऋषीणां योगाभ्यासजन्यसूक्ष्मातीन्द्रिय - धर्मादिविषयकज्ञानस्य प्रत्यक्षानुभवरूपत्वमुपपादयन् तस्यानुमानिकत्वं निराकरोति - 'परेषाम्' इति ।

अन्वयः - परेषाम् असमाख्येयम् मणिरूप्यादिविज्ञानम् तद्विदाम् अभ्यासाद एव जायते, न आनुमानिकम् ।

व्याख्या - परेषाम् = अन्येभ्यः असमाख्येयम् = वचसा बोधयितुमनर्हम्-स्वसंवेद्यम्, मणिरूप्यादिविज्ञानम् = रत्नरजतादिवास्तविकस्वरूपविषयकं विशिष्टं ज्ञानम् तद्विदाम् = रत्नादितत्त्वज्ञानाम् अभ्यासाद् = पुनः पुनर्दर्शनाद एव जायते, न आनुमानिकम् = नानुमानेन जनितम्, अपितु प्रत्यक्षानुभवरूपमेवेत्यर्थः ।

सूर्यमाया

पूर्व कथन से यदि अनुमान में कोई विश्वास नहीं, तो ऋषियों का अतीन्द्रिय विषयक ज्ञान भी आनुमानिक होने से विश्वास योग्य न होगा? इस आशङ्का के समाधान के साथ मणिविशेषज्ञों के दृष्टान्त द्वारा ऋषियों के ज्ञान को अपरोक्ष अनुभवरूप बताते हुए उसके आनुमानिकत्व का निराकरण करते हैं - 'परेषाम्' ।

मणिर्वास्तविकः - अयं न, इदं रूप्यकं सत्यम् - इदमसत्यमित्यादिबोधः तद्विदाम् = मण्यादिपरीक्षकाणाम् अभ्यासादेव = वारं वारं स्वयमभ्यासादेव जायते = उत्पद्यते, नानुमानिकम् = नानुमानकृतमित्यर्थः ।

विमर्शः - यथा धूमादौ वह्न्यादेर्व्याप्तिर्भूयो भूयः सहचारदर्शनेन गृह्यते, न तु सकृत् सहचारदर्शनेन । तथा सति महानसादौ सकृत् सहचारदर्शनेन धूमस्यापि वह्नौ व्याप्तिर्गृह्येत, न च तदिष्यते, अयोगोलके सहचाराभावात् ।

यथा वा तत्त्वमस्यादिवेदान्तवाक्यानामेकाद्वितीयात्मपरत्वं न सकृत श्रवणमात्रेण निश्चीयते, किन्तु मृदादिदृष्टान्तै र्नवकृत्वोऽभ्यासोक्तेः । सकृदुक्तिमात्रेण तत्परत्वे तु तैत्तिरीयके - अन्नमय - प्राणमयादीनाममुख्यात्मपरत्वेऽपि 'तस्माद्वा एतस्माद्विज्ञानमयादन्योऽन्तर आत्माऽऽनन्दमयः' (तै॰ २-५) इत्य'न्योऽन्तर आत्मेति' वचनेनैव मुख्यात्मपरत्वे सिद्धे 'आनन्दमयोऽभ्यासात्' (ब्र.सू. १-१-१२) इत्यत्र आनन्दमयस्य परब्रह्मपरत्वे अभ्यासस्य हेतुत्वोपपादनमनावश्यकं स्यात् ।

यथा वा वर्णमालां शिक्षमाणानां बालानां वर्णमालाया ज्ञानं न सकृत पठनेन भवति, किन्तु पुनः पुनः पठनाभ्यासाद् यथोत्तरं स्फुटतरं दृढं विज्ञानं

अर्थ : - मणि, रजत आदि के पारखी (जौहरी) लोगों का जो मणि, रजत, सोने आदि को परखने का अपना एक विशेष ज्ञान है, जो कि दूसरों को शब्दमात्र से नहीं समझाया जा सकता, उनका वह निजी प्रत्यक्ष अनुभव बार बार मणि आदि को देखने परखने तथा निरन्तर व्यवहार करते रहने के अभ्यास से ही होता है, वह आनुमानिक एक अटकल मात्र नहीं है । इसी प्रकार प्रकृत में ऋषियों का ज्ञान भी योग तप के अभ्यास से उत्पन्न अलौकिक प्रत्यक्ष ही है, आनुमानिक नहीं ।

आशय : - सोनार व जौहरियों को सोना, चाँदी, हीरा, मोती आदि खनिज वस्तुओं को परखने का जो अपना अपना निजी अनुभव विशेष रहता है, जिससे

अयम्भावः - यथा लोका मण्यादिपरिचये अनेकशोऽभ्या-सान्मणिपरीक्षका भवन्ति, यथा वा षड्जादिस्वरभेदं शास्त्रतो ज्ञात्वाऽपि स्वयमभ्यासादेव गाथका भवन्ति, तथैव ऋषयोऽपि

जायते । अभ्यासो नाम पौनःपुन्येनानुष्ठानम्, क्रियाया अभ्यावृत्तिः । तथा मण्यादिपरीक्षकाणां यद् मण्यादे र्विशुद्धस्वरूपविषयकं सूक्ष्मं विशिष्टं ज्ञानं तद् मण्यादे र्बहुकृत्वो दर्शनाभ्यासाद् भवति, नहि सकृदेव दर्शनात् ।

अर्थात् प्रथमदर्शने मणेः सामान्यं स्थूलं ज्ञानं भवति, तावता तस्य शुद्धत्वाशुद्धत्वोत्तमत्वानुत्तमत्वविशेषविषयकं सूक्ष्मं ज्ञानं न भवति। अथ मणेः पुनः पुन र्बहुकृत्वो दर्शनं परिशीलनं यदा क्रियते, तदा दर्शनाभ्यासात् सूक्ष्मं विशेषविषयकं ज्ञानं प्रादुर्भवति । तत् सूक्ष्मं विशेषविषयकं निर्दुष्टं ज्ञानं मणिज्ञानां स्वसंवेद्यं भवति, न तु तत् परेभ्यः समाख्यातव्यं भवति, तद्विशेषस्वरूपख्यापकस्य शब्दविशेषस्याप्रसिद्धेः। यथाहि मधुद्राक्षासितादीनां भुज्यमानानां माधुर्यविशेषास्वादः प्रत्यक्षमनुभूयमानोऽपि परेभ्यः केनापि शब्देन निर्वचनीयो न भवति, विशेषास्वादतारतम्याभिलापकशब्दस्यानुपलम्भात् ।

वे देखते ही अच्छा या खरा खोटा पहचान जाते हैं, उनका वह निजी अनुभव परम्परा से देखने - परखने, कारोबार - व्यवहार करते रहने के निरन्तर अभ्यास से उत्तरोत्तर दृढ हो जाता है । अभ्यास से परिपक्व वह प्रत्यक्ष अनुभव है, ज्ञानान्तर नहीं ।

ऐसे ही संगीतज्ञों को निषाद, ऋषभ, गान्धार आदि सात स्वरों के परस्पर भेदों का जो विशेष अनुभव रहता है, जिससे कि वे सुनते ही उन स्वरों को तथा उच्चारण में उनकी शुद्धि अशुद्धि को परख लेते हैं, उनका भी वह स्वरों का विशेष अनुभव गुरुमुख से सप्तस्वरों के स्वरूप भेद के शिक्षण तथा स्वयं कण्ठ से तद्रूप उच्चारण के पुनः पुनः आवृत्तिरूप अभ्यास से ही प्रस्फुट होता है । जिन्होंने स्वरों का अभ्यास नहीं किया है, वे संगीतगोष्ठी में संगीतज्ञों का गान सुनकर भी स्वरों को कुछ भी नहीं जान पाते, क्योंकि स्वरभेद अभ्यास से ही संवेद्य है, अभ्यास के विना समाख्येय नहीं है । संगीतज्ञ भी चाहें तो एक बार

योगादौ अभ्यासाद् योगजधर्मबलेन अतीन्द्रियद्रष्टारो भवन्ति नानुमानेन, अतो न ऋषिज्ञानेऽविश्वास इति ॥ ३५ ॥

अपि च गाथकानां यो निषादर्षभ-गान्धार-षड्जादिसप्तस्वराणां भेदानुभवः, सोऽपि गुरुमुखात् श्रवणस्य स्वयं च कण्ठत उच्चारणस्य पुनः पुनरनुसन्धानरूपादभ्यासाज्जायमानः परेभ्योऽसमाख्येयः स्वसंवेद्यो भवति । तत्र मण्यादीनां दर्शनस्य - निषादादिस्वराणां श्रवणोच्चारणादेश्च क्रियाया असकृदावृत्तिरूपो योऽभ्यासः, स तत्तद्वस्तुस्वरूपप्रत्यक्षानुभवस्य स्फुटत्वे दृढत्वे च भवतु कारणम्, किन्तु सोऽभ्यासो न किमपि प्रमाणान्तरम्, तत्र प्रत्यक्षातिरिक्तप्रमित्यन्तरस्याभावात्, प्रत्यक्षमेव तत् । अत एव च तन्मण्यादितत्त्वविदां विज्ञानं नानुमानिकमपि, तस्य लिङ्गजत्वासिद्धेः । एवमेव ऋषीणामपि सूक्ष्मातीन्द्रियधर्मादिविषयकं यद् आर्षं प्रातिभं ज्ञानम्, तदपि तपोयोगानुष्ठाननैरन्तर्यदृढतराभ्यासाज्जायमानमलौकिकं प्रत्यक्षमेव, नान्यत् । तदेतदग्रे वक्ष्यते - 'प्रत्यक्षान्न विशिष्यते' इति । आत्मसाक्षात्कार-साधनत्वेन श्रुतस्य श्रवणादेरभ्यासस्य सहकारित्वमेव स्मर्यते - 'उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम्' इत्यादिस्मृतेः । तस्मादभ्यासस्य वृथा मानान्तरत्वनिरूपणप्रयत्नः ॥ ३५ ॥

कह देने मात्र से स्वरों के भेद का परिचय नहीं करा सकते । संगीतज्ञसभा में सुनते सब हैं, किन्तु स्वरों के भेद का प्रत्यक्ष अनुभव उन्हीं को होता है, जिन्होंने अभ्यास किया है, दूसरों को नहीं ।

इन दृष्टान्तों के अनुरूप ऋषियों का जो अतीन्द्रिय धर्म आदि सूक्ष्म वस्तु-विषयक प्रातिभ ज्ञान है, वह भी यज्ञ, तप, योग के अभ्यास से उत्पन्न अलौकिक प्रत्यक्षरूप ही है, अनुमानकल्पित नहीं है । अत एव ऋषियों का आर्ष प्रत्यक्षज्ञान सर्वथा व्यवस्थित व श्रद्धेय है ॥ ३५ ॥

प्रत्यक्षमनुमानञ्च व्यतिक्रम्य व्यवस्थिताः ।
रक्षःपितृपिशाचानां कर्म्मान्ता एव सिद्धयः ॥ ३६ ॥

प्रत्येकार्थप्रकाशिका

अन्यामपि युक्तिमाह - 'प्रत्यक्षे' ति । रक्षांसि च पितरश्च पिशाचाश्च तेषां कर्म्मान्ता एव = कर्मपरिपाकाः, अनुष्ठानजन्यादृष्टनिमित्ता इति यावत् सिद्धयः =

आनन्दा

रक्षःपित्रादिदृष्टान्तेन ऋषीणां ज्ञानस्य विलक्षणकर्मादृष्टशक्तिजन्यत्वेनाप्यलौकिकप्रत्यक्षरूपतया व्यवस्थिततत्वेन प्रागुक्तं श्रद्धास्पदत्वमेव द्रढयन्नाह - 'प्रत्यक्षम्' इति ।

अन्वयः - रक्षःपितृपिशाचानाम् कर्मान्ताः एव सिद्धयः प्रत्यक्षम् अनुमानम् च व्यतिक्रम्य व्यवस्थिताः ।

व्याख्या - रक्षःपितृपिशाचानाम् = रक्षसां मायाविनाम् पितृणां स्वर्गवासिनाम्, पिशाचानां मांसाशिभूतविशेषाणां कर्मान्ताः = पुण्यपापकर्मादृष्टपरिणामा एव नाकस्मिकाः सिद्धयः = सूक्ष्मातीन्द्रियदूरव्यवहितदर्शनरूपाः प्रत्यक्षम् = इन्द्रियसंयोगादिसंनिकर्षजन्यम् लौकिकप्रत्यक्षम्, अनुमानम् = अनुमितिम्, च व्यतिक्रम्य = व्यतिरिच्य व्यवस्थिताः सन्ति ।

सूर्यमाया

मायावी राक्षस, पिशाच प्रभृति तथा स्वर्गलोकवासी पितरों के सूक्ष्म दूर व्यवहित विषयों को देखने की अदृष्ट सिद्धि के दृष्टान्त से ऋषियों के भी सूक्ष्म, व्यवहित आदि विषय के ज्ञान को अदृष्ट सिद्धि बल से प्रत्यक्षरूप बताते हुए उसकी विश्वसनीयता को प्रकारान्तर से पुनः प्रतिष्ठित करते हैं - 'प्रत्यक्षम्' ।

अर्थ : - मायावी राक्षस व पिशाच तथा दिवंगत आत्मा पितृप्रभृतियों की सूक्ष्म, दूर - व्यवहित वस्तुओं को देख लेने की जो कर्म के परिणाम स्वरूप अदृष्ट सिद्धियाँ हैं, वे लौकिक प्रत्यक्ष और अनुमान को अतिक्रमण करके उन दोनों से अत्यन्त भिन्न अलौकिक प्रत्यक्षरूप ही व्यवस्थित हैं ।

व्यवहिताव्यवहितसूक्ष्मासूक्ष्मादिदर्शनरूपाः प्रत्यक्षम् = लौकिकसामग्रीजन्यम् अनुमानम् = लिङ्गज्ञानजज्ञानम् च व्यतिक्रम्य = हित्वा व्यवस्थिताः = प्रवृत्ताः ।

अयमाशयः - सत्यपि कुड्यादिव्यवधाने अन्तर्गृहस्थितवस्तूनि राक्षसादयः पश्यन्ति, तत्र को हेतुः? तत्तत्कर्मसम्पादितादृष्टशक्तिरेव । तथैव ऋषयोऽपि तपःसम्पादितादृष्टशक्तिबलादेव

विमर्शः - यथा रक्षःपितृप्रभृतीनां सूक्ष्म - दर्शनरूपाः सिद्धयो दृष्टसामग्रीजन्य-'प्रत्यक्षानुमिति'प्रमितिद्वयभिन्ना अदृष्टशक्तिजन्या अलौकिकप्रत्यक्षरूपाः स्वीकृताः, एवमेव ऋषीणामपि सूक्ष्मव्यवहितविप्रकृष्टदर्शनं लौकिक-सामग्रीव्यतिरिक्तपुण्यादृष्टशक्तिजम्, योगानुष्ठानजं वा । तच्च दर्शनं साक्षात्कारात्मकमेव न प्रमित्यन्तरम् । यथाह पातञ्जले योगदर्शने विभूतिपादे धारणाध्यानसमाधित्रयस्य मिलितस्य एकध्येयालम्बनस्थितिरूपस्य संयमस्य तत्तत् फलम् - ''परिणामत्रयसंयमादतीतानागतज्ञानम्'' (पा॰ ३ सू॰ १६) ''शब्दार्थप्रत्ययानामितरेतराध्यासात्संकरस्तत्प्रविभागसंयमात् सर्वभूतरुतज्ञानम्'' (३-१७) ''प्रत्ययस्य परचित्तज्ञानम्'' (३-१९) ''प्रवृत्त्यालोकन्यासात् सूक्ष्मव्यवहितविप्रकृष्टज्ञानम्'' (३-२५) इति ।

योगवार्तिकं सूत्रमिदमित्थं व्याचष्टे - ज्योतिष्मती बुद्धिपुरुषान्यता साक्षात्काररूपिणी मनसः प्रवृत्तिः, तस्या य आलोकः = तत्कालीनो यः प्रकाशस्तं योगी सूक्ष्माद्यर्थेषु विन्यस्य च साक्षात्करोतीत्यर्थः । अनेन

आशय : - राक्षस, यक्ष आदि मायावी तथा पितृलोक में निवासी पितृ प्रभृति पर्दे व घर के अन्दर जो व्यवहित वस्तु हैं तथा योजनों दूर जो वस्तु हैं, उनको भी देख लेते हैं, तभी तो दक्षिणसमुद्र लङ्काप्रदेशवासी सुबाहु और मारीच ये दोनों भाई महर्षि विश्वामित्र के यज्ञ को देखकर विध्वंस करने सुदूर पूर्वोत्तर मिथिला पहुँच गये । उनकी ये जो अदृष्ट सिद्धियाँ हैं, वे उनके अपने कर्मों के अन्तिम परिणाम फलस्वरूप ही प्राप्त हैं, स्वाभाविक अथवा आकस्मिक नहीं हैं, इन अदृष्ट शक्तियों के बल से ही उनको व्यवहित, विप्रकृष्ट, सूक्ष्म वस्तुओं का इन्द्रिय सन्निकर्ष के विना भी प्रत्यक्ष होता है, जो कि अलौकिक है । एवमेव

पश्यन्ति, न तु लौकिकप्रत्यक्षेणानुमानेन वा, येनासम्भवात् तत्र लोकानामविश्वासो भवेत्। अत ऋषिज्ञानं विश्वसनीयमेवेति निर्गलितोऽर्थ इति दिक् ॥ ३६ ॥

संयमफलस्य - अतीतानागतज्ञानस्य, सर्वभूतरुतज्ञानस्य, परचित्तज्ञानस्य, सूक्ष्मव्यवहितविप्रकृष्टज्ञानस्य च सर्वस्य साक्षात्कारत्वं स्पष्टमेवोक्तम् । सत्त्वप्रकर्षे निरावरणमनसो य आत्मप्रकाशस्तस्य सर्वव्यापित्वेन सूक्ष्म-व्यवहितादिविषयेषु विन्यासे साक्षात्कारो जायते, यथेन्द्रियविन्यासे घटादे: साक्षात्कार: । इत्थं च रक्ष:पितृपिशाचादीनां सूक्ष्मव्यवहितदूरविषयदर्शनस्य, ऋषीणां च प्रातिभज्ञानस्य कर्मविपाकादृष्टशक्तिजत्वेन दृष्टव्यतिरिक्त-सामग्रीजन्यत्वेऽप्यलौकिकप्रत्यक्षरूपत्वोपपत्तौ किमिति तस्य प्रमित्यन्तरत्वम्, किमिति चालौकिकसामग्र्या अदृष्टादे: प्रमाणान्तरत्वोपन्यासायास: । विषयभेदेन सविकल्पक-निर्विकल्पकभेदवत् लौकिकालौकिकसामग्रीभेदेन प्रत्यक्षस्य द्वैविध्यमुररीकृत्य तेषां ज्ञानं प्रत्यक्षप्रमैवास्तां, तदेव वरम् । तदेतदनन्तरमेवोत्तरत्र वक्ष्यते - ''आविर्भूतप्रकाशानाम्'' इत्यारभ्य ''प्रत्यक्षान्न विशिष्यते'' इत्यन्तेन ।। ३६ ।।

ऋषिगण भी धर्म, अधर्म आदि अतीन्द्रिय सूक्ष्म वस्तुओं को जानते हैं, उनका वह ज्ञान वेदोपदिष्ट यज्ञ, तपश्चर्या, योग के अनुष्ठान से प्राप्त अतिशयविशेषरूप अदृष्टशक्ति से साध्य है, जो कि इन्द्रियसन्निकर्षजन्य लौकिक प्रत्यक्ष तथा हेतुदर्शनजन्य अनुमिति से अतिरिक्त ही अलौकिक प्रत्यक्ष रूप है । यह पातञ्जल योगदर्शन के विभूतिपाद में - 'धारणा, ध्यान, समाधि' इन तीनों के मिलित रूप 'संयम' की सिद्धि के फलस्वरूप - अतीत, अनागत का ज्ञान, परचित्तज्ञान, सूक्ष्म, व्यवहित, विप्रकृष्ट का ज्ञान, इत्यादि वर्णित है, यह ज्ञान साक्षात्कारात्मक प्रत्यक्ष है । यह योगवार्तिक के व्याख्यान में स्पष्ट है, तथा अग्रिम कारिका में भी 'प्रत्यक्षान्न विशिष्यते' इस वचन से स्पष्ट है । अत एव यहाँ अदृष्टशक्ति को एक भिन्न प्रमाण मानना एवं तज्जन्य ज्ञान को भिन्न प्रमिति मानना अनावश्यक है ।। ३६ ।।

आविर्भूतप्रकाशानामनुपद्रुतचेतसाम् ।
अतीतानागतज्ञानं प्रत्यक्षान्न विशिष्यते ॥ ३७ ॥

प्रत्येकार्थप्रकाशिका

ननु महर्षिज्ञानं यदि नानुमितिरूपम्, लौकिकसन्निकर्षाभावान्न प्रत्यक्षरूपं वा, तदा किमात्मकमित्याशङ्क्य योगजधर्मरूपालौकिकसन्निकर्षजन्यत्वादलौकिकप्रत्यक्षरूपतां

आनन्दा

अव्यवहितपूर्वकारिकाद्वयेन प्रत्यक्षानुमितिव्यतिरिक्तालौकिकप्रत्यक्षे मणिपरीक्षकाणामभ्यासजन्यमणिरूप्यादिविज्ञानं रक्षःपितृप्रभृतीनां कर्मपरिपाकजन्यसूक्ष्मविप्रकृष्टादिविज्ञानं च दृष्टान्तमभिधाय दार्ष्टान्तिकं महर्षीणां विज्ञानमलौकिकप्रत्यक्षरूपं सबीजमुपपादयन्नाह - 'आविर्भूतप्रकाशानाम्' इति ।

अन्वयः - आविर्भूतप्रकाशानाम् अनुपद्रुतचेतसाम् अतीतानागतज्ञानम् प्रत्यक्षाद् न विशिष्यते ।

व्याख्या - आविर्भूतप्रकाशानाम् = तपश्चरणाद् उद्रिक्तसत्त्वालोकप्रकर्षाणाम् अत एव अनुपद्रुतचेतसाम् = अज्ञाननाशाद् अपगतरागादिदोषावरणानां शुद्धान्तःकरणानां महर्षीणाम् अतीतानागतज्ञानम् = भूतभविष्यत्सूक्ष्मातीन्द्रिय-

---

सूर्यमाया

पूर्व की दो कारिकाओं में दृष्टान्तरूप में - मणिपरीक्षकों के अभ्यासजन्य मणिज्ञान को तथा राक्षस - पितृ प्रभृति के अदृष्टजन्य दूर सूक्ष्म वस्तु के ज्ञान को एक विलक्षण प्रत्यक्ष अनुभवरूप बताकर दार्ष्टान्तिक रूप में अब ऋषियों के ज्ञान को अलौकिक प्रत्यक्ष रूप सिद्ध करते हैं - 'आविर्भूत' इत्यादि ।

अर्थ : - तपस्या से उद्भूत सत्त्वप्रकाशवाले अत एव राग आदि दोषों के आवरण व लेप से रहित - शुद्धचित्त महर्षियों का भूत-भविष्यत् - अतीन्द्रिय वस्तुओं का ज्ञान प्रत्यक्ष से भिन्न नहीं होता है, अपितु प्रत्यक्ष ही होता है । किन्तु अलौकिक होता है, लौकिक नहीं, इतना अन्तर है ।

दर्शयितुमाह - 'आविर्भूते' ति । आविर्भूताः = उद्बुद्धाः प्रकाशाः= सत्त्वगुणा येषां तेषाम्, अनुपद्रुतचेतसाम् = नास्ति उपद्रुतम् - उपद्रवः विषयवासनाजनितमालिन्यदोषो येषु तानि - अनुपद्रुतानि चेतांसि येषां तेषां महर्षीणामित्यध्याहारः, अतीतम्=

विप्रकृष्टादेरनुभवः प्रत्यक्षाद् = अपरोक्षानुभवाद् न विशिष्यते = न भिद्यते, प्रत्यक्षमेव तत्, किन्तु अलौकिकम्, न तु लौकिकमिति विशेषः ।

विमर्श : - योगेन तपसा च रजस्तमसी विधूय विशुद्धसत्त्वाः प्रादुर्भूतचिदात्मप्रकाशा अत एव व्यपगताविद्याऽस्मितारागद्वेषाभिनिवेशक्लेशावरणाः स्फटिकवद् विशुद्धान्तःकरणाः प्रसंख्यानवन्तो महर्षयोऽलौकिकेन योगजधर्मबलेन देशकृतं कालकृतं वस्तुकृतं च त्रिविधमपि परिच्छेदमतिक्रम्य समस्तवस्तुव्यापनशीलविज्ञानाः सन्तः पुण्यापुण्यकर्मफलपरिपाकम् - अतीतजन्मसु भुक्तं, भवान्तरेषु च भोक्ष्यमाणं सूक्ष्ममतीन्द्रियं सर्वं साक्षात्कुर्वन्ति । तत्तत्कर्मणां सूक्ष्मां तत्तत्फलजनकताशक्तिं कारणेषु कार्यजनकताशक्तिं च सम्पश्यमानाः (अभीक्ष्णे चानश्), प्रवृत्तिनिवृत्त्युपदेशपरमागमं स्मरन्ति । यास्कोप्याह- 'साक्षात्कृतधर्माण ऋषयो बभूवुः । तेऽवरेभ्योऽसाक्षात्कृतधर्मभ्य

आशय : - ऋषियों को भूत, भविष्यत्, सूक्ष्म वस्तुओं का जो ज्ञान होता है, वह अनुमान प्रमाण से जन्य नहीं है, क्योंकि प्रत्यक्ष के सर्वथा अविषयवस्तु में किसी ज्ञापक हेतुविशेष का सहचारदर्शन न होने से अनुमान की प्रवृत्ति सम्भव नहीं है । यदि कहा जाय कि सुख दुःख आदि कार्य के ज्ञान से उसके हेतु-पुण्य पाप कर्मों की सूक्ष्म शक्ति का ज्ञान अनुमान से किया जा सकता है, तो यह कथन उचित नहीं है । असत् कार्यवाद में - जन्म से पूर्व अत्यन्त असत् कार्य का कर्म आदि किसी कारण से कोई सम्बन्ध नितान्त असम्भव है । सत्कार्यवाद में भी जन्म से पूर्व कार्य अपने कारण में सूक्ष्म-अव्यक्त अवस्था में रहता है, इस स्थिति में वह कार्य व्यवहार में है ही नहीं, तो उससे कारण की अदृष्टशक्ति का अनुमान किस प्रकार हो सकेगा? कार्यजन्म से पूर्व यदि कारणशक्ति का निश्चय नहीं होगा, तो कार्यार्थी की कारणविशेष के उपादान में प्रवृत्ति भी नहीं हो सकेगी, तब तो प्रवृत्ति निवृत्ति रूप सकल लोकव्यवहार का विलोपप्रसङ्ग हो जायगा । अत एव यह मानना होगा कि सर्वप्रथम सत्त्वगुण के उद्रेक से सतत निरावरण

भूतम् अनागतम् = भविष्यत् तदुभयविषयकज्ञानम्, इदमुपलक्षणम् सूक्ष्मासूक्ष्मव्यवहिताव्यवहितादीनाम्, प्रत्यक्षाद् न विशिष्यते = न विलक्षणं भवति, किन्तु प्रत्यक्षरूपमेव भवति ।

योगजधर्म्मेणालौकिकसन्निकर्षेण जन्यत्वाद् अलौकिक-प्रत्यक्षरूपमिति फलितम् । यथाहि लोके स्वमुखमपश्यमानोऽपि शुद्धदर्पणादिद्वारा प्रतिबिम्बरूपेण पश्यति, तथैव महर्षीणां तपसा विशुद्धेऽन्तःकरणे यावतां वस्तूनां दर्शनं भवतीति सारांश इति विभाव्यतां सुधीभिः ॥ ३७ ॥

उपदेशेन मन्त्रान्त्सम्प्रादुः ।'' इति, ''ऋषिर्दर्शनात्'' इति च । अत एवात्राह-'अतीतानागतज्ञानं प्रत्यक्षान्न विशिष्यते' इति ।

ऋषीणाम् अतीतानागतादिवस्तुज्ञानं प्रत्यक्षाद् = प्रत्यक्षत्वजात्यवच्छिन्नाद् ज्ञानाद् न विशिष्यते, प्रत्यक्षत्वावच्छिन्नं सकलं ज्ञानं प्रत्यक्षमेव न विलक्षणम्, परन्तु लौकिकत्वावान्तरजात्या विलक्षणं भवत्येवेत्यन्यदेतत् । एवं च ऋषीणां ज्ञानं प्रत्यक्षत्वेन रूपेण लौकिकप्रत्यक्षेण सदृशम्, अलौकिकत्वेन रूपेण लौकिकप्रत्यक्षाद् भिन्नमिति विवेकः ॥ ३७ ॥

आत्मज्ञान के प्रकाशवाले ऋषिगण को योग-तप के अनुष्ठान से उत्पन्न अतिशयविशेषरूप योगज धर्म से अपने शुद्धान्तःकरण में निर्मल दर्पण में प्रतिबिम्ब की तरह कारण में सूक्ष्म कार्यशक्ति का प्रत्यक्ष ज्ञान है, तत्पश्चात् उनके उपदेश तथा व्यवहार सम्प्रदाय से अन्य लोगों को तत्तत् कार्यों के नियतकारणविशेषों का ज्ञान हुआ है ।

ऋषियों का वह ज्ञान लौकिकसन्निकर्ष से जन्य न होने से लौकिकप्रत्यक्षरूप भले ही न होवे, किन्तु 'योगज' सन्निकर्षजन्य होने से अलौकिक प्रत्यक्षरूप अवश्य मान्य है । अतः ऋषिज्ञान के प्रामाण्य में कोई संशयलेश नहीं है ॥ ३७ ॥

अतीन्द्रियानसंवेद्यान् पश्यन्त्यार्षेण चक्षुषा ।
ये भावान् वचनं तेषां नानुमानेन बाध्यते ॥ ३८ ॥

प्रत्येकार्थप्रकाशिका

ननु लोके इन्द्रियसम्बद्धस्यैव प्रत्यक्षाद् इन्द्रियासम्बद्धस्य प्रत्यक्षम् तेषामनुमितिविरुद्धमित्यत आह – 'अतीन्द्रिये'ति ।

आनन्दा

पूर्वत्र इन्द्रियासम्बद्धविषयातीतानागतादिज्ञानस्य प्रत्यक्षत्वोक्तेरसङ्गतिं परिहर्तुं अतीन्द्रियाणामार्षं प्रत्यक्षमुपपादयन् तन्मूलकत्वेन प्रबलत्वाद् आगमरूपस्य ऋषिवचनस्यानुमानाबाध्यत्वमाह – 'अतीन्द्रियान्' इति ।

अन्वयः – ये अतीन्द्रियान् असंवेद्यान् भावान् आर्षेण चक्षुषा पश्यन्ति तेषाम् वचनम् अनुमानेन न बाध्यते ।

व्याख्या – ये = महर्षयः अतीन्द्रियान् = इन्द्रियागोचरान् असंवेद्यान् = मनसाऽपि दुर्विज्ञेयान् भावान् = धर्माधर्मादीन् पदार्थान् आर्षेण = दिव्येन योगजधर्मजनितेन चक्षुषा = संस्कृतलोचनेन पश्यन्ति = साक्षात्कुर्वन्ति, तेषाम् = महर्षीणां वचनम् = उपदेशवाक्यम्- 'आगमः' अनुमानेन = अनवस्थितेन तर्केण न बाध्यते = न विहन्यते ।

विमर्शः – रूपादयो ह्यर्थाः सन्ति बाह्येन्द्रियगोचराः, सुखादयश्चार्था अन्तरिन्द्रियमनोगोचराः स्वात्मसंवेद्याः सन्ति, सत्यम् । परं च सन्त्येतादृशा

सूर्यमाया

इन्द्रिय से असम्बद्ध 'अतीत' आदि के ज्ञान को प्रत्यक्ष कहने की असंगति के परिहार के रूप में आर्षप्रत्यक्ष सिद्ध करते हुए अलौकिक प्रत्यक्षमूलक ऋषिवचन को अनुमान से अबाध्य बताते हैं – 'अतीन्द्रियान्' ।

अर्थ : – जो ऋषि महर्षिगण बाह्य इन्द्रिय से अग्राह्य तथा अन्तरिन्द्रिय से अनुभव के अविषय पदार्थों को योगतप के बल से प्राप्त आर्षचक्षु से – अर्थात दिव्यशक्तिसम्पन्न अन्तर्नेत्र से देखते हैं, उनका (आर्षप्रत्यक्षमूलक प्रमाणभूत) वचन अनुमान से बाधित नहीं होता है ।

ये= महर्षयः अतीन्द्रियान् = इन्द्रियाण्यतिक्रान्तान् असंवेद्यान्= अन्यैर्दुर्ज्ञेयान् भावान् = पदार्थान् आर्षेण = तपःसम्पादितेन चक्षुषा = अन्तर्नयनेन पश्यन्ति = प्रत्यक्षीकुर्वन्ति, तेषां वचनम्=

अपि पदार्था ये न सन्ति बहिरिन्द्रियगोचराः, नापि अन्तरिन्द्रियगोचराः, न चापि स्वात्मसंवेद्याः । तथाहि - अस्ति कश्चनेश्वरः सर्वान्तर्यामी-सर्वात्मा यश्चरीकर्ति बरीभर्ति जरीहर्ति जगत् । अस्ति च सत्त्वरजस्तमसां समानावस्थितिस्वरूपा प्रकृतिः । मन्यन्ते च सततपरिणमनशीलाः सत्त्व-रजस्तमांसि गुणाः, उन्नीयते च न्यायनये पार्थिवादिचतुर्विधपरमाणुकलापः । आकल्यते च जन्मादिविकारयोनिः कालाख्यशक्तिः । कीर्त्यते च तस्या अधिष्ठानं निखिलार्थविवर्तोपादानं शब्दाख्यं ब्रह्म । याज्ञिकाश्च यजन्ति यागादौ हविरुद्देश्यदेवताः, स्वीकुर्वन्ति च क्षणप्रध्वंसिनां कर्मणां फलप्रदं संस्काराख्यमपूर्वं स्थिरं व्यापारम् ।

आशय : - रूपवान् - घट, पट आदि द्रव्य तथा रूप, रस आदि गुण ऐसे पदार्थ हैं, जिनको चक्षु आदि बाह्य इन्द्रियों से सभी लोग प्रत्यक्ष जानते हैं, सुख दुःख आदि ऐसे विषय हैं, जिनको लोग अन्तरिन्द्रिय मन से प्रत्यक्ष अनुभव करते हैं, जो कि स्वसंवेद्य है, परसंवेद्य नहीं ।

किन्तु दोनों प्रकार के वस्तु से भिन्न ऐसे भी वस्तु शास्त्रसम्मत हैं, जो कि न तो बहिरिन्द्रिय से ग्राह्य होते हैं, ना ही अन्तरिन्द्रिय से संवेद्य होते हैं । जैसे कि- जल, स्थल, सूर्य, चन्द्र सब में रहने वाला सबका अन्तर्यामी तथा सबको अपनी अपनी क्रियाओं में प्रेरित करने वाला सबका नियामक सबका अन्तरात्मा ईश्वर तथा उसकी अनादि अचिन्त्य शक्ति माया । ये वेदान्तों में प्रसिद्ध हैं, अतीन्द्रिय व असंवेद्य हैं ।

ऐसे ही न्यायशास्त्र में पृथिवी आदि चारों स्थूलभूतों का समवायिकारण चतुर्विध परमाणुवर्ग भी अतीन्द्रिय असंवेद्य है । मीमांसाशास्त्र में यज्ञों में हविष्य का उद्देश्यभूत इन्द्र आदि देवगण हैं, जिनका मन्त्र ही शरीर है तथा याग आदि क्षणिक कर्मों का स्वर्ग आदि फल का साधन अपूर्वनामक अदृष्ट पुण्यव्यापार है, एवं प्रोक्षण व अभिघात से व्रीहि आदि अङ्गद्रव्यों का अपूर्व संस्कार है, लोकान्तर में जानेवाला जीव का आतिवाहिक शरीर है, आदि आदि कितने ही अतीन्द्रिय-असंवेद्य वस्तु शास्त्रों में प्रसिद्ध हैं ।

उपदेशः अनुमानेन = निरवधितर्कमात्रेण न बाध्यते = न विरुध्यते । अतो महर्षीणां प्रत्यक्षं तदनुसारि वचनञ्च न केनचन प्रमाणान्तरेण बाध्यमिति फलितम् ॥ ३८ ॥

तानेतानिन्द्रियागोचरान् स्वेन परैश्चाज्ञेयान् मनसोप्यविषयानसंवेद्यान् पदार्थान् ते ते शिष्टमुनयोऽलौकिकेन तपःसमुद्भूतातिशयविशेषविशिष्टेनान्तर्नयनेन पश्यन्ति । तेषामतीतानागतातीन्द्रियार्थविषयकमार्षं प्रत्यक्षं तन्मूलकं च वचनमर्वाग्दृशां शङ्कितव्यभिचारेणानुमानेन कालत्रयेऽपि स्वप्नेऽपि बाधितुं न शक्यम् ॥ ३८ ॥

उनका योग, तप तथा वैदिक याग आदि कर्मों के अनुष्ठान से इन्द्रियों में अतिशय विशेष रूप - अदृष्ट शक्ति के आधान से ऋषिगण ही प्रत्यक्ष दर्शन करते हैं, मन्त्र आदि अतीन्द्रिय वस्तु के दर्शन के कारण ही ऋषि कहे जाते हैं, जैसा कि यास्क ऋषि ने निरुक्त में कहा है - 'ऋषिर्दर्शनात्' 'प्रत्यक्षधर्माण ऋषयो बभूवुः' । वे ऋषि अपनी दिव्यदृष्टि से जो जैसा देखते हैं, वैसा ही यथार्थवस्तु का लोकहित के लिए उपदेश करते हैं । अत एव प्रत्यक्षद्रष्टा ऋषियों का आर्षप्रत्यक्षमूलक जो प्रमाण रूप उपदेश वचन हैं, उनका व्यभिचारशङ्का से ग्रस्त तथा अनवस्थित अनुमान से बाध कथमपि सम्भव नहीं है । शास्त्रों तथा शास्त्रसंमत योग-याग आदि कर्मों की उपासना से जो दिव्यदृष्टि प्राप्त होती है, वह उपासकों का ही अनुभवगम्य है, केवल अन्धश्रद्धा का विषय नहीं । उपासना करके तो देखें । केवल तार्किक अनुपासक नास्तिक क्या जानें ! अतः आर्षवचन सर्वथा श्रद्धा से उपास्य है ॥ ३८ ॥

यो यस्य स्वमिव ज्ञानं दर्शनं नाभिशङ्कते ।
स्थितं प्रत्यक्षपक्षे तं कथमन्यो निवर्तयेत् ॥ ३९ ॥

प्रत्येकार्थप्रकाशिका

तेषां प्रत्यक्षे न केनापि विप्रतिपत्ति र्विधेयेत्यत्र लौकिक-प्रत्यक्षमेव दृष्टान्तमुपन्यस्याध्यवसाययति - 'यो यस्ये' ति । यः = घटं प्रत्यक्षीकृतवान् जनः यस्य = इतरजनस्य दर्शनं=

आनन्दा

लौकिकप्रत्यक्षदृष्टान्तेनाप्यनुभवसिद्धस्य तर्कैरबाध्यतया ऋषीणां प्रत्यक्षस्य तेषां वचनस्य च निःशङ्कश्रद्धास्पदत्वं व्यवस्थापयति - 'यो यस्य' इति ।

अन्वयः - यः यस्य दर्शनं स्वं ज्ञानम् इव न अभिशङ्कते, प्रत्यक्षपक्षे स्थितं तम् अन्यः कथं निवर्तयेत् ।

व्याख्या - यः = प्रत्यक्षेण स्वयं घटं दृष्टवान् जनः यस्य = परस्य दर्शनम् = घटप्रत्यक्षम् स्वं ज्ञानम् = स्वकीयघटदर्शनम् इव न अभिशङ्कते= सत्यमसत्यं वेति न सन्दिग्धे, अपितु स्वज्ञानमिव परज्ञानमपि सत्यमेव निश्चिनुते । प्रत्यक्षपक्षे = प्रत्यक्षानुभवस्य सत्यत्वविषये स्थितम् = निश्चयवन्तं तम् = जनम् अन्यः = प्रत्यक्षसत्यत्वानुभवशून्यः शुष्कतार्किकः कथं निवर्तयेत् = प्रत्यक्षसत्यत्वनिश्चयपक्षात् कथं निवारयेत्, अपितु कथमपि नहि तं स्वपक्षनिश्चयाद् तर्केण वारयितुं प्रभवेत् ।

सूर्यमाया

लोक में प्रत्यक्ष अनुभव की अकाट्यता दृष्टान्त से ऋषियों के प्रत्यक्ष अनुभव को तर्क से अकाट्य सिद्ध कर उनके वचन को निःसन्देह श्रद्धायोग्य बताते हैं - 'यो यस्य' ।

अर्थ : - जो स्वयं द्रष्टा अपने प्रत्यक्षज्ञान की सत्यता के समान ही दूसरे किसी द्रष्टा के भी प्रत्यक्ष ज्ञान की सत्यता में कोई सन्देह नहीं करता है, अर्थात् सत्य ही मानता है, प्रत्यक्ष की सत्यता में विश्वासी - उस व्यक्ति को कोई अन्य व्यक्ति कोरे तर्क से उसके अपने निश्चय से कैसे हटा सकता है? कथमपि नहीं ।

सत्यं घटविषयकं स्वमिव = स्वकीयज्ञानमिव नाभिशङ्कते = सत्यमेव मनुते, यथा मदीयघटदर्शनं सत्यं तथैवान्यस्यापि भवेदिति निश्चिनुते, तं प्रत्यक्षपक्षे स्थितम् = स्वयं प्रत्यक्षीकृतवन्तं पुरुषम् अन्यः = स्वयं साक्षात्कारशून्यः केवलतार्किकः कथं

विमर्श : - राजतं घटं दृष्टवान् जनो घटं लब्ध्वा सफलप्रवृत्ति र्यथा स्वकीयं घटप्रत्यक्षं सत्यं निश्चिनुते, तथा स इतरस्याप्तपुरुषस्य वचनात्तस्यापि प्रत्यक्षं सत्यमेव निश्चिनोति, नैव शङ्कते सत्यमसत्यं वेति । इत्थं च प्रत्यक्षस्य सत्यत्वे दृढनिश्चयं तं पुरुषं घटमदृष्टवान् कश्चन तार्किको यदि कम्बुग्रीवादिमत्त्वेन हेतुना श्रुतमात्रेणातथाभूतं शङ्खमेव घटं साधयति, तर्हि तेन तर्केण स तं स्वघटप्रत्यक्षसत्यत्वे निश्चयवन्तं पुरुषं तस्य स्वप्रत्यक्षसत्यत्वनिश्चयपक्षाद् निवर्तयितुं न शक्नोति ।

एवं योगतपोबलेनार्षेण चक्षुषा पुण्यापुण्यकर्मणामिष्टानिष्टफलं दृष्टवताम् ऋषीणामदृष्टफलविषयकप्रत्यक्षस्य सत्यत्वे दृढनिश्चयं तद्वचने प्रत्यक्षोपदेशे च श्रद्धावन्तमाप्तं जनं कश्चनार्षचक्षुःशून्यस्तार्किको जनः क्षणविनाशित्वेन हेतुना पुण्यापुण्यकर्मणामिष्टानिष्ट-लोकान्तरीय-फलसाधनासामर्थ्येन तर्केण स्वपक्षनिश्चयात् निवर्तयितुं न शक्नोति, हेतूनां शङ्कितव्यभिचारित्वात्,

---

आशय : - कोई आप्तजन घट आदि किसी वस्तु को देखने पर उसको यथावत् ठीक पाकर वह जैसे अपने घट प्रत्यक्ष को सत्य मानता है, वैसे ही वह किसी अन्य आप्तजन के घट आदि वस्तु के प्रत्यक्ष को भी उसके कथन अनुसार सत्य ही मानता है, असत्य होने का सन्देह नहीं करता । मान लें कि जिसने मधु के माधुर्य का स्वयं रसना से आस्वाद किया है, वह अपने अनुभव के समान ही किसी अन्य व्यक्ति के भी कथनानुसार मधु के माधुर्य स्वाद को वैसा ही सत्य मानता है, किञ्चित् भी सन्देह नहीं करता है । उसको यदि कोई मधु के माधुर्य का अनुभवहीन तार्किक अपने कोरे तर्क से गुड़ अथवा चीनी का माधुर्य जैसा सिद्ध करे, तो उस तर्क से मधु के विलक्षण माधुर्य के प्रत्यक्ष निश्चय को टाला नहीं जा सकता । प्रत्यक्ष अनुभव से तर्क का बाध होता है, किन्तु तर्क से

निवर्तयेत् = अप्रामाण्यमापादयेत्, अपितु नेति काकुः। अयम्भावः- शर्क्करा- माधुर्यमनुभूतवान् जनः इतरजनेन शर्करा मधुरेति कथिते न शङ्कते, यस्तु तदनभिज्ञः - 'मधुरा न

प्रत्यक्षप्रमाणां च सत्यविषयत्वात् । विनाशिनामपि धान्यादिबीजानां यथार्थ-'सस्य'फलवत्त्वदर्शनवत् कर्मणामदृष्टातिशयविशेषाधानेन फलवत्त्वसिद्धौ तार्किकहेतूनां संशायकत्वेन तर्कस्यानवस्थिततत्वसिद्धेः । अतस्तर्केणाबाध्यं हि ऋषीणां प्रत्यक्षम्, तेषामुपदेशवचनं च । अनभिशङ्कनीयं हि ऋषीणां दर्शनं वचनं च । तदास्तिकैरविचार्य्यैव श्रद्धेयमनुपालनीयं च । तथाहि परस्परविरुद्धतया प्रतिभासमानानि - 'उदिते जुहोति', 'अनुदिते जुहोति', 'अतिरात्रे षोडशिनं गृह्णाति', 'नातिरात्रे षोडशिनं गृह्णाति' इत्यादीनि वचनानि शाखाभेदेनाविरोधेन व्यवस्थितानि स्वस्वशाखानुसारं तत्तच्छाखिभिः श्रद्धयाऽनुष्ठीयन्ते एव निःशङ्कम्, न तत्र तर्कावसरः । स्मृतमेव प्राक्

प्रत्यक्ष का बाध नहीं हो सकता है । हाँ, आगम प्रमाण प्रत्यक्ष का भी बाधक होता है । जैसे प्रत्यक्ष से सूर्य, चन्द्र गेन्द के समान अल्प परिमाण दीखता है, किन्तु ज्योतिष आदि आगमों से वह पृथ्वी से कतिपय गुना बड़ा सिद्ध है । यहाँ ध्यान रहे कि आगम लौकिक प्रत्यक्ष का ही बाधक होता है, आर्षप्रत्यक्ष का नहीं । आर्षप्रत्यक्ष और आगम का परस्पर उपजीव्य उपजीवक सम्बन्ध है । ऋषियों का प्रत्यक्ष अनुभव तथा तन्मूलक उनका 'आगमरूप' उपदेशवचन तर्क से अबाध्य होने से अशङ्कनीय एवं सर्वथा अनुपालनीय प्रमाण है । तर्क के आधार पर भले ही वेद के परस्परविरोधी जैसे कुछ वचन सम्प्रदायज्ञान के विना अप्रमाण प्रतीत होवें, किन्तु शाखाओं के सम्प्रदायभेद से सभी अविरोधी व्यवस्थित हैं, क्योंकि तत् तत् शाखाओं के उपदेष्टा ऋषि आप्त हैं, जो कि उन सम्प्रदायों के प्रवर्तक हैं । शाखा-सम्प्रदाय के भेद से - 'उदिते जुहोति' तथा 'अनुदिते जुहोति' दोनों ही वचन प्रमाण हैं । तत् तत् शाखा के अनुगामी अपने अपने सम्प्रदाय के अनुसार- कोई सूर्योदय से पूर्व अरुणोदय (आकाश की लालिमा) काल में हवन करते हैं, तो दूसरे सूर्य बिम्ब का दर्शन होने पर हवन करते हैं । परस्पर अविरोधी

वे'ति शङ्कते, तस्य शङ्कया न माधुर्यस्य बाधः, एवमेव अतीतानागतविषयकार्षप्रत्यक्षस्य न तर्केण बाधः । तपः कृत्वा स्वयमेवानुभूयताम्, इति ॥ ३९ ॥

'धर्मस्य चाव्यवच्छिन्नाः' (का॰ ३१) इति व्याख्याप्रसङ्गे - 'उदितेऽनुदिते चैव' इति मनुवचनम् । इदं तु ध्येयम् - सूर्यचन्द्रादे र्ह्रस्वपरिमाणबोधक-प्रत्यक्षस्यापि तद्बृहत्परिमाणबोधक आगमो बाधको भवति यः, स लौकिकस्यैव, तस्य दूरत्वादिदोषजन्यत्वात् । आर्षप्रत्यक्षस्य तु आगमोऽपि बाधको नैव भवति, तयोरुपजीव्योपजीवकभावात् ॥ ३९ ॥

दोनों ही आचार हैं । श्रद्धापूर्वक अनुष्ठान किये जाते हैं । ऋषिवचनों की तो चर्चा ही क्या, जो ऋषियों के सम्प्रदायवर्ती अनुगामी आप्तपुरुष हैं, उनका भी वचन तथा आचार श्रद्धापूर्वक लोग मानते आ रहे हैं । शास्त्र पढ़े विना भी सभ्यसमाज आप्त बड़ों के वचनों तथा आचारपरम्परा से अहिंसा, सत्य आदि को स्वर्ग, अपवर्ग, कल्याण का साधन मानते हैं, तथा हिंसा, झूठ और चोरी आदि को नरक, दुःख का साधन साधारणजन भी मानता आ रहा है । कोई तर्क इसका बाधक नहीं होता ॥ ३९ ॥

इदं पुण्यमिदं पापमित्येतस्मिन् पदद्वये ।
आचण्डालं मनुष्याणां समं शास्त्रप्रयोजनम् ॥ ४० ॥

प्रत्येकार्थप्रकाशिका

एतावता आर्षप्रत्यक्षे प्रामाण्यं व्यवस्थाप्य तद्वचनेनैव धर्म्माधर्मौ निर्णेतव्यौ न त्वनुमानेनेत्याह - 'इद' मिति । चण्डालम्

आनन्दा

आर्षे प्रत्यक्षे वचने च प्रामाण्यं व्यवस्थाप्य धर्माधर्मनिर्णयस्यानुमानासाध्यत्वेन शास्त्राधीनत्वमाह - 'इदं पुण्यम्' इति ।

अन्वयः - इदं पुण्यम् इदं पापम्, इति एतस्मिन् पदद्वये आचण्डालम् मनुष्याणाम् शास्त्रप्रयोजनम् समम्, अस्तीत्याक्षेपाल्लभ्यते ।

व्याख्या - इदं पुण्यम् = अयं धर्मः, इदं पापम् = अयमधर्मः, इति एतस्मिन् = प्रसिद्धे पदद्वये = वस्तुद्वये, 'पदं व्यवसितत्राण-स्थान-लक्ष्माङ्घ्रिवस्तुषु' इति कोषात् पदेतिपदं बोधविषयं वस्तु परम्, आचण्डालम्= द्विजादन्त्यजपर्यन्तम् मनुष्याणाम् = मानवानां सर्वेषां शास्त्रप्रयोजनम् = शास्त्राणाम् - आर्षोपदेशवचनानां मन्वादिस्मृतीनाम् आवश्यकत्वं समम् = तुल्यम् अस्ति । यतोहि शास्त्रमेव पुण्यपापयोर्व्यवस्थापकं नानुमानम् । 'आचण्डालम्' इत्याङोऽभिविध्यर्थेऽव्ययीभावः ।

सूर्यमाया

धर्म - अधर्म के ज्ञान में द्विज से चण्डाल तक को एक समान शास्त्र की आवश्यकता बताते हैं - 'इदम्' इत्यादि ।

अर्थ : - यह पुण्य है - यह पाप है, इन दो वस्तुओं के ज्ञान में चण्डाल तक सभी मनुष्यों को एक समान शास्त्र की आवश्यकता है ।

आशय : - 'अहिंसा - सत्य - यज्ञ - दान - तप' आदि शास्त्रविहित - पवित्र कर्म धर्म है तथा 'हिंसा - असत्य - चोरी - व्यभिचार' आदि शास्त्रनिषिद्ध अपवित्रकर्म अधर्म है, इनके निर्णय में शास्त्र ही मूल प्रमाण है । जिसकी आवश्यकता त्रैवर्णिक - द्विज से अन्त्यज - चण्डाल तक मनुष्यमात्र को एक

अभिव्याप्य मनुष्याणाम् 'अयं धर्म्मः - अयमधर्म्मः' इति पदद्वये=

विमर्शः - अहिंसादिकं धर्मः - हिंसादिकम् अधर्म इति वस्तुद्वये बोधनीये सर्वेषां मनुष्याणां त्रैवर्णिकात् प्रभृति चाण्डालपर्यन्तानां शास्त्रं समानमावश्यकं मानम् । धर्माधर्मविषये नहि कस्यचित् कामचारो यद् धर्मम् अधर्मं बोधयेत् अधर्मं च धर्मम् । शास्त्रमेव तत्र प्रमाणम् ।

तदाह भगवान् -

''यः शास्त्रविधिमुत्सृज्य वर्तते कामचारतः ।

न स सिद्धिमवाप्नोति जन्मकोटिशतैरपि ॥'' (गी॰ १७-२३)। इति ।

''तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ ।'' (गी॰ १७-२४) । इति च ॥

इयांस्तु विशेषः - ये तु त्रैवर्णिकाः स्वाध्यायेऽधिकृताः शास्त्राण्यधीत्य धर्माधर्मावशेषतो विशेषतश्च विदन्ति । ये तु शास्त्रेऽधिकृता अपि दुर्भाग्यात् शास्त्रं नाधीतवन्तः, यद्वा ये शास्त्राध्ययनेऽनधिकृताः शूद्रप्रभृतयस्तेऽपि आप्तपुरुषोपदेशाद् शिष्टाचारपारम्पर्याद्वा धर्माधर्मौ सामान्यतो यत्किञ्चित् स्वापेक्षितमेव जानन्ति, नाशेषतो विशेषतश्च ।

'ऋतौ भार्यामुपेयात्', 'परदारान्नोपगच्छेत्', 'मा हिंस्यात् सर्वा भूतानि' इत्यादिशास्त्राणामध्ययनं विना चण्डालादयोऽपि शिष्टाचारपारम्पर्यतो जानन्ति यद् 'परकीयाः स्त्रियो भगिन्यादयोऽगम्याः, पाणिगृहीती गम्या' इति ।

समान है । यह अन्तर अवश्य है कि वेदाध्ययन के अधिकारी द्विजवर्ग वेद के अध्ययन से साक्षात् वेद द्वारा सबके धर्म - अधर्म को विशेष रूप से जानते हैं, किन्तु जो वेदाध्ययन के अधिकारी नहीं हैं, वे चण्डाल आदि शिष्ट वृद्ध जनों के उपदेश वचन तथा आचार व्यवहार से अपने धर्म अधर्म को तथा सामान्य धर्मों को जानते हैं । परंच उसके आचार का भी मूलप्रमाण शास्त्र ही है । अत एव शास्त्र प्रमाण की मूलरूप में आवश्यकता मनुष्य जातिमात्र को एक समान है । जो लोग शिष्ट जनों के आचार व्यवहार से स्वधर्म व कर्तव्याकर्तव्य को जानते हैं, इसका यह माने नहीं है कि उनको शास्त्र की अपेक्षा नहीं हैं, क्योंकि जिन शिष्टजनों के वचन व व्यवहार से साधारण अज्ञजन धर्म अधर्म को जानते हैं, उन

बोधनद्वये समम् = एकरूपं शास्त्राणाम् = ऋषिप्रणीतवचनानाम्

आप्तोपदेशाद्वा शिष्टाचाराद्वा ते ते स्वस्वकुलक्रमागतं धर्मं जानन्ति, तत्र शास्त्रमेव मूलम् । इमे शिष्टा आप्ता वा शास्त्रं जानन्ति, एषां वचनमाचारो वा यथाशास्त्रमेव भवेदिति श्रद्धयैव तेऽपि तथा समाचरन्ति ।

लोका धर्मशास्त्रमधीत्य जानन्तु, न वा जानन्तु, पालयन्तु, मदान्न वा पालयन्तु, तावता किम् ? इहामुत्र कल्याणायानर्थहानाय च धर्मशास्त्रं मनुष्यमात्रमधिकरोति, मनुष्यमात्रमधिकृत्य प्रवृत्तं शास्त्रं शूद्रं चण्डालं चाप्यधिकरोत्येव । नहि शूद्रश्चण्डालो वा शास्त्रशासनमुल्लङ्घ्य यथेच्छं प्रवर्तितुं शक्नोति । तत्र 'शूद्रो यज्ञेऽनवक्लृप्त:' (तै॰सं॰ ७-१-१-६) इति पर्युदासाद्, 'उपनयीत, तमध्यापयीत' इति च शास्त्राद् श्रौते यागादौ कर्मणि शूद्रादेरनधिकारेऽपि 'श्रावयेच्चतुरो वर्णान्' इति स्मृतेरितिहासपुराणादिश्रवणे स्मार्ते च नैमित्तिके ग्रहणस्नानदानादिकर्मणि चातुर्वर्ण्यस्याधिकारो भगवता शङ्करेण ब्रह्मसूत्रभाष्ये 'श्रवणाध्ययनार्थप्रतिषेधात् स्मृतेश्च' (१-३-३८) इति सूत्रे सिद्धान्तित: । तत्रैव रत्नप्रभाख्यव्याख्याकार: स्पष्टमाह- 'दानं नित्यं निषिध्यते शूद्रस्य, नैमित्तिकं दानमस्त्येव' इति । अन्यथा शूद्राणां सर्वथा शास्त्रैरनधिकृतत्वे नैमित्तिकं स्नानदानादिकं कथं पुण्याय प्रभवेत्,

---

शिष्टजनों को शास्त्र से ही धर्म-अधर्म का ज्ञान प्राप्त है, किसी अन्य प्रमाण से नहीं । आर्षवचन रूप शास्त्र ही सूक्ष्म धर्म, अधर्म का निर्णय कर सकता है । अत: साक्षात् अथवा परम्परया धर्म, अधर्म के ज्ञान में शास्त्र की आवश्यकता समान रूप में सबको है, द्विज हो वा द्विजेतर । साधारण जन तो आप्त पुरुष के वचन को शास्त्रोक्त समझ कर ही चलते हैं । मनुष्यमात्र के कल्याण के लिए कर्तव्य-अकर्तव्य के उपदेशार्थ शास्त्र हैं, अत: मनुष्यमात्र शास्त्र के अधिकार क्षेत्र में है । यह अवश्य है कि वर्ण - आश्रम के अनुसार स्थितिभेद से सबका कर्म विभाजित है । कोई किसी कर्म का अधिकारी है, तो कोई उससे भिन्न कर्म का अधिकारी होता है, सब एक ही समान कर्म के अधिकारी नहीं होते । ब्राह्मण अध्ययन अध्यापन, यजन, याजन, दान, प्रतिग्रह, इन छह कर्मों के अधिकारी हैं, तो क्षत्रिय, वैश्य-'अध्ययन, यजन, दान' तीन कर्मों के अधिकारी हैं, तो इनसे

प्रयोजनम्-आवश्यकम् । अतोऽनुमित्या धर्म्माधर्म्मयोरनिर्णयात्

कथं चागम्यागमनादिकं पापाय वा स्यात् ? शास्त्रमात्रे शूद्राणामात्यन्तिकेऽनधिकारे कथं न पशुतिर्यगादिभिरविशेषत्वमापद्येत?

तस्मात् 'धर्माधर्मादि-कार्याकार्य'व्यवस्थितौ शास्त्रेण मनुष्यमात्रमधिक्रियते स्वस्ववर्णाश्रमानुसारम् । तदिदमभिप्रेत्याह - 'आचण्डालं मनुष्याणां समं शास्त्रप्रयोजनम्' इति । अत एवेह 'आचण्डालम्' इत्यभिविध्यर्थकस्याङः स्वारस्यमाञ्जस्येन समुपपद्यते । तथाहि ब्राह्मणात् प्रभृति चण्डालपर्यन्तानां मनुष्याणां 'पुण्य-पापेति' वस्तुद्वयनिर्णये शास्त्राणां समानमेवास्ति प्रयोजनम् । तदुक्तं प्राक्- 'न चागमादृते धर्मः' इति । एवं चेह 'समम्' इति पदं व्यतिक्रम्य तत्स्थाने 'अल्पम्' इति प्रक्षिप्य - 'आचण्डालं मनुष्याणां शास्त्रस्य प्रयोजनं नास्तीत्यर्थ' इति केचन व्याचक्षते, तत्र बीजं न पश्यामः । अल्पपदस्य न्यूनार्थकत्वं प्रसिद्धम्, नाभावार्थकत्वम् । अथ चण्डालमात्रस्य चेत् शास्त्रप्रयोजनाभावो विवक्षितस्तर्हि अवध्यंशे नित्यसाकाङ्क्षस्य 'आङः' प्रयोगोऽनर्थक एव स्यात् । अवधित्वेन ब्राह्मणस्य त्रैवर्णिकस्य वा ग्रहणे तु त्रैवर्णिकात् प्रभृति चाण्डालपर्यन्तस्य सर्वस्य शास्त्रप्रयोजनाभावे कथिते सर्वथा विरुद्धं शास्त्रानर्थक्यमेवापद्येतेति महाननर्थः ।

इतर शूद्र नैमित्तिक स्नान, दान, सेवा तथा स्मृति, पुराण, इतिहास श्रवण के अधिकारी होते हैं । इस प्रकार सबका कर्म पृथक् पृथक् है । किन्तु शास्त्र के अनुशासन में समस्त मनुष्य समाज है । जो शास्त्र के अनुशासन का पालन करते हैं, वे कल्याण के भागी होते हैं, जो नहीं पालन करते, वे अनर्थ के भागी होते हैं । किन्तु शास्त्र मनुष्यमात्र को हित अहित के साधन-धर्म-अधर्म का उपदेश करता है । शास्त्र के विधि-निषेध वचन के अन्तर्गत चण्डाल तक सभी मनुष्य समाज है । यद्यपि चाण्डाल आदि त्रैवर्णिकों के दर्शपूर्णमास - सोम आदि श्रौत यागविशेष कर्मों के अधिकारी नहीं हैं, तथापि अहिंसा - अस्तेय आदि सामान्य धर्म के अधिकारक्षेत्र के अन्तर्गत हैं ही । अन्यथा उनको स्नान, दान आदि शुभ कर्म से पुण्य तथा हिंसा, चोरी, अगम्यागमन आदि दुष्कर्म से पाप भी नहीं होगा । तब तो पशु पक्षी की श्रेणी में पहुँच जाने से उनकी मनुष्य योनि व्यर्थ हो जायगी ।

तन्निर्णयाय आर्षोपदेशात्मकशास्त्राणाम् आवश्यकतेति

अथ च मर्यादार्थकः 'आङ्' इह गृह्यते नाभिविध्यर्थकस्तर्हि चाण्डालात् प्रभृति कोऽन्योऽपकृष्टतमो यत्पर्यन्तं शास्त्रप्रयोजनाभाव उच्येत, न कोऽप्युच्यते । तस्यानुक्ते वैयर्थ्यमेवाङः स्यात् ।

किं च अल्पपदेन शास्त्रप्रयोजनाभाव एव यदि विवक्षितस्तर्हि स्पष्टमेव 'नास्ति शास्त्रप्रयोजनम्' इत्येव हरिणा कथितं भवेत्, अभावार्थे नितान्तमप्रसिद्धम् 'अल्प'पदं न युज्यते प्रयोक्तुम् ।

अथ आप्तोपदेशादेव पुण्यपापयो र्निर्णये नास्त्यधिकं किमपि शास्त्रस्यान्यथासिद्धिशून्यं प्रयोजनमित्यल्पपदेन विवक्ष्यते, तर्हि तदपि न युज्यते, धर्माधर्मनिर्णये सकलाप्तपरिगृहीतत्वेनागमस्य प्रबलप्रमाणत्वव्यवस्थापनप्रसङ्गे तद्विपर्ययेण आप्तोपदेशस्य प्रबलप्रमाणत्वेन शास्त्रस्यान्यथासिद्धत्वनिरूपणं प्रकरणविरुद्धमुपपत्तिविरुद्धं चापद्यते ।

अपि च के चेह ते आप्ता जिघृक्षिताः, येषामुपदेशात् धर्माधर्मयोर्निर्णयः ? यदि ते यथाश्रुत-यथाप्रमितार्थवादिनोऽविच्छिन्नश्रुतिस्मृतिसमाम्नातविधिनिषेधार्थस्मर्तारस्तर्हि समायातमेव आगमप्रमाणोपजीविनां तेषां शास्त्रज्ञत्वेनाप्तत्वे शास्त्रश्रद्धामूलकमेव श्रद्धास्पदत्वम् । चण्डालादयोऽपि शास्त्रेषु श्रद्धावन्त एव सन्तः शास्त्रज्ञानाप्तान् मत्वा तेषां वचनं श्रद्दधते ।

अथ चेत् तदतिरिक्ताः शास्त्रानभिज्ञाः श्रुतिस्मृत्यप्रमाणका युक्तियुक्तार्थमात्रवादिनस्तार्किका लोके सभ्यतया गणिताश्चारुवाचश्चार्वाकादयः प्रत्यक्षमात्रप्रमाणका आप्तास्तर्हि तेषां पुण्यपापविषयेऽप्रामाणिकमेवाप्तत्वम् । कुतस्तेषां वचनेष्वास्था ? अन्यथा भूतप्रेतवेतालोपासकाः कापालिका अपि कथं न भवेयुराप्तास्तेषु तेषु कल्पनामात्रप्रसूतेष्वागमाभासेषु

मनुष्य योनि तो कर्मक्षेत्र है, केवल भोगक्षेत्र नहीं । अतः वे भी शास्त्रविहित शुभ कर्म के अनुष्ठान से बन्धदुःख से मुक्ति के अधिकारी हैं, अत एव यह मानना होगा कि शास्त्र सबको हित अहित का उपदेश करता है । अपने अपने अधिकार के अनुसार द्विज से चण्डाल तक सभी शास्त्रविहित शुभ कर्म के अनष्ठान से

फलितम् ॥ ४० ॥

तदनुगामिभिराप्तत्वेन गणिताः । तेषां वचनात् कथं न श्रद्दधते निगमप्रमाणकाः शङ्खादिदृष्टान्तैर्नरशिरःकपालादेः शुचिमत्त्वम् । तस्मादिह निगमागमोपजीविन एव प्रसिद्धा आप्ताः पर्येष्टव्याः, न श्रुतिस्मृतिविनिन्दकाः । एवं स्थिते - स्थितेऽपि यथाभिमतवक्तृत्वाविशेषे पुण्यपापविषये निगमागमोपजीविन एवाप्ताः कथितास्तर्हि तेषामुपदेशात् यथाधिकारं प्रवर्तमानानां चण्डालादीनामपि कृते शास्त्रं ब्राह्मणादिभिस्त्रैवर्णिकैस्तुल्यमेव सप्रयोजनमिति प्रख्यातमेव, न निगूहितम् । इयांस्तु विशेषो यत् त्रैवर्णिकानां - श्रौते स्मार्ते च कर्मणि सर्वत्राधिकारः, इतरेषां तु निषादस्थपतिन्यायेन स्वकृत्यांशे स्मार्ते एव, न श्रौते सर्वत्र इत्यलं प्रपञ्चेन ॥ ४० ॥

दुःख-मुक्ति और सुखप्राप्ति के पात्र हैं । प्रथम तो शास्त्र श्रद्धा का पात्र है, अत एव शास्त्र के ज्ञाता शिष्ट जन भी श्रद्धा के पात्र हैं । शास्त्रों के स्वाध्याय से धर्म-अधर्म का ज्ञान होवे, अथवा शास्त्रज्ञ शिष्टों के उपदेश से होवे । उभयथा शास्त्र की आवश्यकता मानवमात्र को है । क्योंकि आचार-विचार सबका मूल शास्त्र ही है । अत एव यहाँ यह कथन युक्तियुक्त है - "आचण्डालं मनुष्याणां समं शास्त्रप्रयोजनम्" ॥ ४० ॥

चैतन्यमिव यश्चायमविच्छेदेन वर्तते ।
आगमस्तमुपासीनो हेतुवादैर्न बाध्यते ॥ ४१ ॥

प्रत्येकार्थप्रकाशिका

शास्त्राणां सर्वतः प्राबल्यं प्रदर्शयति - 'चैतन्य' मिति । चैतन्यमिव = यथा 'अहं ममे'तिव्यवहारकारकं प्रत्यक्सिद्धं ज्ञानम्, न केनचिदपि तस्य बाधः क्रियते, तथा योऽयम् =

आनन्दा

लोकसिद्धात्मानुभवदृष्टान्तेनागमस्य सम्प्रदायाविच्छेदं तर्कादिभिरबाध्यत्वं च व्यवस्थापयन् आगमोपासकानामागममार्गश्रद्धाया अप्यबाध्यत्वं तेनैव दृष्टान्तेनाह - 'चैतन्यम्' ।

अन्वयः - यश्च अयम् आगमः चैतन्यम् इव अविच्छेदेन वर्तते, तम् उपासीनः हेतुवादैः न बाध्यते ।

व्याख्या - यश्च अयम् = प्रसिद्धो मनुष्यमात्रं प्रति प्रवृत्तः सकलाप्तैः परिगृहीतः आगमः = कृत्याकृत्य-विधिनिषेधबोधकश्रुतिस्मृतिस्वरूपः चैतन्यम्= 'अहं मम' इत्याद्यनुभवविषयत्वेन प्रसिद्धः प्रमातृत्वाद्यभिमानी प्रत्यगात्मा इव अविच्छेदेन = सातत्येन वर्तते, न कदापि विच्छिद्यते तम् = आगमम् उपासीनः = उपासितवान् जनः हेतुवादैः = विरोधितर्कैः न बाध्यते = आगमप्रामाण्यप्रत्ययान्न निवर्त्यते ।

सूर्यमाया

इससे पूर्व पुण्य - पाप की व्यवस्था के लिए शास्त्र की आवश्यकता बताकर अब उपसंहार के रूप में शास्त्र तथा शास्त्र के प्रति श्रद्धा का तर्क से बाध नहीं किया जा सकता, यह बताते हैं - 'चैतन्यमिव' इत्यादि ।

अर्थ : - 'अहम् - मम' इत्यादि पद के व्यवहार में जैसे अहम् स्वरूप आत्मा तथा पुत्र - मित्र - देह - आदि का सम्बन्धी - आत्मा का अनुभव विना किसी बाधा के होता आ रहा है, वैसे ही पूर्वपरम्परा से विना बाधा के अविच्छिन्न रूप

सर्वत्र प्रसिद्धः आगमः = विधि-निषेध-तदङ्ग-तत्स्तुत्यादि-बोधक-वाक्यात्मक-श्रुतिस्मृतिरूपः, अविच्छेदेन = विध्वंसराहित्येन वर्तते = विद्यते, तम् = आगमम् उपासीनः = शास्त्रानुसारेण प्रवर्तमानः पुरुषः हेतुवादैः = युक्तिवादैः -

---

विमर्शः - यद्यपि 'सत्यं ज्ञानमनन्तं ब्रह्म' इत्यादिश्रुत्या देशकृतकालकृत-वस्तुकृतपरिच्छेदातीतः समस्तोपाध्यनवच्छिन्नानन्तानन्दैकरसो नित्यो निर्धर्मको व्यापकोऽद्वितीयोऽभिन्न आत्मा समाम्नायते, तथापि लोके 'अहम्' इत्यहङ्कारास्पदतया कर्तृत्वभोक्तृत्वप्रमातृत्वादिधर्मवान् 'अहमिहैवास्मि सदने जानानः' इति प्रदेशवृत्तितया निर्बाधं दृढमनुभूयमानः 'मम' इति च मित्रपुत्रकलत्रदेहादिसम्बन्धी प्रत्यगात्मा अनादिपरम्परातस्तथा निरूढिं गतो यद् यथोक्तश्रुत्या शिष्टवृद्धेन वा - 'नासि त्वं कर्ता, भोक्ता, प्रमाता वा, न चासि मित्रपुत्रकलत्रदेहादिसम्बन्धवान्' इत्यसकृदुक्तेऽपि न तस्य विच्छिद्यते रूढः सोऽनुभवः, प्रत्युत विरुद्धोक्तिरेवेयं प्रतीयते । का कथाऽन्येषाम्, विदुषां जीवन्मुक्तानां च व्यवहारकाले सोऽनुगतः प्रत्ययोऽविच्छेदेन प्रवर्तते यथा, तथा अनादिपरम्परातः शिष्टैरनुगम्यमान आर्षप्रत्यक्षानुभवमूलो 'भक्ष्याभक्ष्य-गम्यागम्यादि'कार्याकार्यविधिनिषेधविषयश्रुतिस्मृतिरूपोऽयमागमो वृद्धैरासेवितस्तथाविधदृढश्रद्धास्पदतां निरूढिं च प्रतिगतो, येन स सम्प्रदायाविच्छेदेन सातत्येन प्रवर्तते, न केनापि कुतर्केण बाध्यते, प्रत्युत तर्क एवागमेन बाध्यते । पूर्वपूर्वैः शिष्टैः परिगृहीतं तमित्थंभूतमागमं

में चला आ रहा यह जो प्रसिद्ध आगम है, उसकी जिसने सम्यक् उपासना की है, अर्थात् आगम से उपदिष्ट - धर्ममार्ग का जो श्रद्धापूर्वक अनुष्ठान करता आ रहा है, उसको कोई तार्किक कोरे तर्क के द्वारा आगम के धर्ममार्ग से या विश्वास से विचलित नहीं कर सकता है ।

आशय : - श्रुतियों के अनुसार आत्मा अहंकार से भिन्न है, तथा वह वस्तुतः कर्ता, भोक्ता, प्रमाता नहीं है, नित्य है, व्यापक है, किन्तु लोक में 'अहम्' पद

वेदेऽविश्वासिभिः पण्डितम्मन्यैः, न बाध्यते = न विचाल्यते, इति शास्त्रमेवानुसर्त्तव्यम् इति भावः ॥ ४१ ॥

श्रद्धयोपासितवान् य आस्तिको जनः, स आगमविरुद्धै र्नास्तिकानां कपोलकल्पितैः प्रवादैः स्वसिद्धान्तादागमोपदिष्टधर्माधर्ममार्गात् कथमपि निवर्तयितुं न शक्यते, नैव विचाल्यते ।

आगमस्य का कथा, आगमोपासकोऽपि भवति हि श्रद्धया वन्दनीयः । तस्माद् आगमः सर्वथा परिपालनीयः ॥ ४१ ॥

आत्मा अर्थ में प्रसिद्ध है । 'अहम्' कहने से सबको कर्ता, भोक्ता आत्मा का बोध होता है । आत्मा का 'अहं' रूप लोक में इतना अधिक रूढ है कि विद्वान् भी व्यवहार काल में 'अहम्' पद से कर्ता, भोक्ता आत्मा का तथा 'मम' पद से पुत्र-मित्र-देह आदि के सम्बन्धी आत्मा का बोध करते हैं । श्रुतियों के उपदेश अनुसार यहाँ कभी किसी को बाधज्ञान नहीं होता कि - आत्मा अहंरूप नहीं है, तथा उसका सम्बन्धी कोई दूसरा आत्मा से भिन्न नहीं है । लोक में तो अनादिपरम्परा से आत्मा का अहमाकार अनुभव निर्बाध होता आ रहा है । इस अनुभव का कभी किसी तर्क से बाध नहीं होता है ।

ठीक इसी प्रकार - 'कर्तव्य-अकर्तव्य, भक्ष्य - अभक्ष्य' आदि का विधि-निषेध - बोधक ऋषियों का आर्षप्रत्यक्षमूलक तथा आप्तोपदेश परम्परा से प्राप्त श्रुति और स्मृति रूप आगम भी अविच्छिन्न सम्प्रदाय रूप में अनादि काल से परिगृहीत इतना अधिक निरूढ हो चुका है, जिसका किसी तर्क से बाध नहीं हो सकता है । फलतः इसके उपासक को भी किसी तर्क से आगमोक्त धर्ममार्ग से कोई डिगा नहीं सकता है । आगम की तो कथा ही क्या है, लोक में आगमोपासक भी श्रद्धेय है ॥ ४१ ॥

हस्तस्पर्शादिबाधेन विषमेऽप्यभिधावता ।
अनुमानप्रधानेन विनिपातो न दुर्लभः ॥ ४२ ॥

प्रत्येकार्थप्रकाशिका

सर्वत्रानुमानेनैव व्यवहरणे अनर्थकारितां दृष्टान्त-दार्ष्टान्तिकयोः रूपकेणाह - 'हस्ते' ति । अनुमानमेव प्रधानं यस्य तेन = एकत्र चक्षुःशून्येन परत्रागमशून्येनेति फलितम् विषमे = एकत्र गिरि-वनादिदुर्गमार्गे, अन्यत्र दुर्ग्रहधर्मादिमार्गे

आनन्दा

तर्काबाध्यत्वेनागमस्य प्रबलप्रमाणत्वं निरूपितम् । अथ आगमनेत्रं विनाऽनुमानेन प्रवर्तमानस्यानुमानमात्रप्रमाणकस्यान्धस्येवानर्थगर्ते विनिपातमाह- 'हस्तस्पर्शादि' इति ।

अन्वयः - अनुमानप्रधानेन विषमे अपि अभिधावता हस्तस्पर्शादिबाधेन विनिपातः न दुर्लभः ।

व्याख्या - अनुमानप्रधानेन = अनुमानमात्रप्रमाणकेन - आगमचक्षुःशून्येन अन्धेन विषमे अपि = समस्थले इवोच्चावचेऽसमाने स्थलेऽपि, समुच्चयार्थकापिशब्दबलात् 'समे'त्यस्येह लाभः, अभिधावता = पूर्वत्रेवाग्रेऽप्यनुमानेन समस्थलमत्या द्रुतं गच्छता प्रवर्तमानेन वा, हस्तस्पर्शादि-बाधेन = हस्तस्पर्शस्य, आदिपदमहिम्ना - नेतुः पुरुषान्तरकरग्रहणस्य वा समविषमस्थलज्ञापकस्य हेतोः बाधेन = सहसा विच्छेदेन विनिपातः = अनर्थगर्ते निपतनम्, न दुर्लभः = न दुष्प्रापः, ध्रुवो विनिपातः ।

सूर्यमाया

पूर्व में आगम को प्रबल तथा अनुमान को दुर्बल प्रमाण सिद्ध कर अब यहाँ आगमनिरपेक्ष केवल अनुमान को इष्टसाधन के विपरीत अनिष्टसाधन बताते हैं - 'हस्तस्पर्शादि' ।

अर्थ : - ऊँच नीच-ऊबड़खाबड़ स्थान का सूचक हाथ के स्पर्श आदि को छोड़कर केवल अनुमान के बल से ऊँच नीच विषम स्थान में भी दौड़कर चलने

अभिधावता = एकत्र शीघ्रं गच्छता, अपरत्र अनुतिष्ठता अन्धेनेति दृष्टान्तस्थानीयस्य, धार्म्मिकम्मन्येनेति दार्ष्टान्तिकस्थानीयस्य चोभयोराक्षेपः, कर्तृवाचकमिदम्, हस्तस्पर्शादिः उपलक्षणमिदं

विमर्श : - यथा हि अन्धो नगरे समतलप्रदेशे प्राकारादेः करस्पर्शेन - नेतुः पुरुषस्य वा करग्रहेण गच्छन् तेन हेतुना अग्रे गन्तव्यशेषं सर्वं प्रदेशं समतलमनुमानेन मत्वा विषमेऽपि वनपर्वतादिप्रदेशे समविषमज्ञापकं करस्पर्शादिकं लिङ्गं विहाय पूर्ववदेव अग्रे समतलमभिसन्धाय यदि धावति, तर्हि तस्य उच्चावचे देशे स्खलनेन क्वापि गर्ते भवति ध्रुवं विनिपातः । तथैव आगममुपेक्ष्यानुमानप्रमाणक आगमचक्षुर्विहीनस्तर्कमदान्धोऽतीन्द्रिय-धर्माधर्मबोधकमागमं विहाय केवलेन परिशेषानुमानेन सामान्यविशेषरूपे विषमे धर्माधर्ममार्गे सर्वत्रैकरूप्येणैव यदि प्रवर्तते, तर्हि तस्य निरवधि-निरयानर्थगर्तेऽपरिहार्यो भवति विनिपातः ।

तस्मादागमनिरपेक्षमनुमानमनर्थकारि, कुतस्तस्येष्टार्थसाधकत्वप्रत्याशा? कुतश्च तस्य दोषशतशङ्कासङ्कुलस्यार्षानुभवमूलप्रबलागमबाधकत्वसम्भावना स्वप्नेऽपि कर्तुं शक्या? अत आगमचक्षुषा धर्माधर्मयोः सूक्ष्मः पन्थाः समीक्ष्यताम् ।

इदं त्ववधेयम् - इह 'अनुमानप्रधानेन' इति रूपकेण विनैवान्धपदं दृष्टान्तस्यान्धस्य दार्ष्टान्तिकस्य चागमनिरपेक्षबौद्धादितार्किकस्योभयोः संग्रहः ।

वाले अन्धे के समान विषम धर्म-अधर्म के मार्ग में आगम की अपेक्षा के विना केवल अनुमान से सहसा चलनेवाले व्यक्ति का पतन दुर्लभ नहीं है, अपितु निश्चित है ।

आशय : - ''सर्वस्य लोचनं शास्त्रं यस्य नास्त्यन्ध एव सः ।' इस सूक्ति के अनुसार सबका मार्गदर्शक शास्त्र ही लोचन है, जिसको शास्त्र रूप लोचन नहीं है, वह अन्धा है, वह कर्तव्य अकर्तव्य को नहीं देखता है । शास्त्र रूप लोचन के विना जो केवल अपने अनुमान बल से धर्म अधर्म मार्ग का निर्णय कर चलता है, वह नरकगर्त में गिरता है । जैसे अपने अनुमान को ठीक मानकर चलनेवाला अन्धा हाथ व दण्डे के स्पर्श का सहारा अथवा हाथ पकड़कर ले चलनेवाले

हेतोः, तस्य बाधेन = हस्तेन स्पृष्ट्वा स्पृष्ट्वा गच्छतोऽन्धस्य शून्यदेशे स्पर्शबाधेन, बन्धेतिपाठपक्षे - हस्तस्पर्शादिर्हेतु र्बन्धः= अवलम्बो यस्य तेनेति कर्तृविशेषणम्, तर्क्केण धर्म्मं निर्णयतश्च

तदर्थम् 'अन्धपदम्' अनावश्यकम् । कैश्चित् 'हस्तस्पर्शादिवान्धेन' इति पाठान्तरमभ्युपेयते, किंचाग्रे 'अपि' इत्यस्य स्थाने 'पथि' इति प्रक्षिप्य 'विषमे पथि धावता' इत्यपि पठ्यते, हस्तस्पर्शाद् विषमे पथि धावता अन्धेन इव अनुमानप्रधानेन विनिपातो न दुर्लभ इति तैर्व्याख्यायते, तच्चिन्त्यम् । तथाहि - पथि समे विषमे वा सर्वत्राबाधिताद् हस्तस्पर्शाद् ज्ञापकलिङ्गात् समं विषमं वा देशविशेषमनुमानेन जानन्नेवान्धो विषमेऽपि याति, तदा तस्य विनिपातः कथं सम्भवति? मार्गविशेषज्ञापकलिङ्गस्य हस्तस्पर्शादेर्बाधे तु विषममार्गापरिज्ञाने भवति विनिपातः । अथ हस्तस्पर्शादेर्बाधाभावेऽपि तस्य निपतने धावनं हेतुस्तर्हि तत्र धावनस्य दोषो नानुमानस्य । एवं तर्हि विवक्षितार्थो न लभ्यते । तथा च प्रकृतहानिरप्रकृतप्रसङ्गः ।

तस्माद् 'हस्तस्पर्शादिबाधेन' इति युक्ततमः पाठः । किं च तदग्रे 'विषमे धावता' इत्युक्त्यैव धावनकर्तुराधारस्य विषमविशेष्यस्य पथो लाभसम्भवे तदुक्तिरपि स्थवीयसी । तत्स्थाने समुच्चयबोधकम् 'अपि' पदं समविषमोभयदेशसंग्रहार्थं नितरामावश्यकम्, तेन विना विवक्षितार्था-

---

व्यक्ति का सहारा छोड़कर केवल अपने तर्क के सहारे वन, पर्वत आदि के ऊँच-नीच मार्ग पर दौड़ लगाकर चलता है, तो कहीं ठोकर खा कर खाई में जा गिरता है, ऐसे ही आगमलोचन से विहीन कोई नास्तिक अपने तर्क को प्रधान मानकर धर्म-अधर्म मार्ग का निर्णय कर चलता है, तो वह अपने तर्क से अधर्म को भी धर्म मान सकता है । जिसको 'ऋतौ भार्यामुपेयात्' इस विधिशास्त्र की अपेक्षा नहीं है, वह तो केवल कामपीड़ा की शान्ति तथा क्षणिक सुख के लिए ही भार्यासङ्गम को धर्म मानेगा, तब तो वह ऋतुकाल से भिन्न काल में कभी भी भार्या-सङ्गम को धर्म मानेगा। ऐसी स्थिति में वह 'व्रतानि तस्य नश्यन्ति दिवास्वापाच्च मैथुनात्', 'परदारान् नोपगच्छेत्' इत्यादि किसी निषेधशास्त्र को क्यों मानेगा? ग्रहणकाल में भी स्त्री-संगम को, परस्त्रीसङ्गम को - परसम्पत्ति-

अदृष्टकर्मणि स्वभावनियमाभावाद् लिङ्गबाधेन, हेतौ तृतीया, विनिपातः = एकस्य गिरिगर्त्ते, अपरस्य नरकगर्त्ते च अधोगतिः न दुर्लभः = अवश्यमेव लभ्यते, इति नञ्द्वयं प्रकृतार्थं द्रढयति। अतो धर्म्मनिर्णये आगमचक्षुष्मानेव समर्थ इति भावः ॥ ४२ ॥

सिद्धेः। सति हि तस्मिन् 'विषमेऽपि' इत्युक्तिस्वारस्यात् 'समेऽपि' इति समुच्चीयते। एवं हि विवक्षितार्थः सिध्यति। तथाहि- 'अपि'शब्दोक्तौ विषमदेशेन सह समदेशस्य संग्रहे प्राक् समतले गन्तव्यैकदेशे त्वरया गच्छन्नन्धो हस्तस्पर्शादिना लिङ्गेन समतलं मार्गमवधार्य तत्सामान्याद् गन्तव्यशेषं सर्वं तदुत्तरमपि मार्गं समतलमेवानुमानेन प्रकल्प्य हस्तस्पर्शादेरनावश्यकतां वितर्क्य त्वरया वा हानेन विषमदेशापरिज्ञाने सति यदि विषमे गिरिवनादिदेशे धावति, तदा तस्य तदूर्ध्वदेशेन पाषाणखण्डेन वा चरणाघाते स्खलनेन क्वापि गर्तादौ पतनं ध्रुवमेवेति चक्षुःशून्यस्य सर्वत्रानुमानेन प्रवर्तमानस्य क्वचिद् हेतुबाधेनानुमानदुष्टत्वस्य जागरूकत्वाद् अनर्थकारित्वमनुमानस्य स्पष्टम् ॥ ४२ ॥

हरण को - हिंसा - अत्याचार को सुखसाधन के तर्कबल से धर्म घोषित कर अनाप सनाप सब कुछ कर अनर्थकारी हो जायगा। जैसा कि बौद्धों के हीनयान मार्ग में हुआ। इसीलिए तो आज प्रायः छलकपट की राजनीति में सर्वत्र अनाचार- अनर्थ फैल रहा है। अत एव कहना न होगा कि - आर्ष आगमरूप लोचन से ही धर्म-अधर्म मार्ग को देखकर चलने से लोककल्याण होगा, केवल तर्कवाद से नहीं। हाँ, आगम के तात्पर्य का निश्चय करने में तर्क अवश्य सहायक होता है, अत एव आगमानुसारी तर्क भी प्रमाणरूप में मान्य है ॥ ४२ ॥

तस्मादकृतकं शास्त्रं स्मृतिं च सनिबन्धनाम् ।
आश्रित्यारभ्यते शिष्टैः शब्दानामनुशासनम् ॥ ४३ ॥

प्रत्येकार्थप्रकाशिका

एवञ्च साध्वसाधुप्रयोगेण धर्माधर्मौ व्याकरणेनैव निर्णेयौ, इत्यतो व्याकरणनिबन्धनमिति प्रकृते निगमयति - 'तस्माद्'

आनन्दा

'न चागमादृते' इत्यत आरभ्य 'हस्तस्पर्शादि' इत्येतदन्तं तर्कादिभिरबाध्यत्वेन धर्माधर्मविषये शास्त्रस्य प्रबलप्रमाणत्वं व्यवस्थाप्य 'शास्त्रेण धर्मनियमः' इति भाष्यमुपजीव्य साध्वसाधुशब्दप्रयोग-विषयधर्माधर्मव्यवस्थाया व्याकरणनियम्यत्वं निगमयन् व्याकरणस्याधुनिकोत्प्रेक्षितत्वनिरासाय श्रुतिस्मृतिमूलकत्वं च निरूपयन् 'अथ शब्दानुशासनम्' इति च भाष्यमुपक्रम्य व्याकरणस्य शब्दानुशासनरूपप्रयोजननिर्देशमुखेन व्याकरणशास्त्रारम्भमाह - 'तस्मादकृतकम्' इति ।

अन्वयः - तस्मात् अकृतकं शास्त्रं सनिबन्धनां स्मृतिं च आश्रित्य शिष्टैः शब्दानाम् अनुशासनम् आरभ्यते ।

सूर्यमाया

धर्म तथा अधर्म के निर्णय में आगम के प्रामाण्य का उपसंहार करते हुए व्याकरण से साधु-शब्द के अनुशासन को श्रुति और स्मृति प्रमाणमूलक बताते हैं - 'तस्माद्' इत्यादि ।

अर्थ : - उक्त प्रकार - साधु के ज्ञान व प्रयोग से धर्म नियम व्याकरणसाध्य होने से किसी से न बनाया गया अतः अपौरुषेय - वेद को तथा साङ्ग स्मृति को मूल प्रमाणभूत आधार मानकर शिष्ट आचार्यों ने व्याकरण से शब्दों का अनुशासन अर्थात् उनके साधुत्व का व्युत्पादन किया है, न कि नये शब्दों की रचना की है ।

इति । तस्मात् = पूर्वोक्तहेतोः, अकृतकम् = अनादिपरम्परया-आगतम्, शास्त्रम् = शास्यतेऽनेनेति व्युत्पत्त्या पुरुषहितो-

---

व्याख्या - तस्मात् = साध्वसाधुशब्दप्रयोगविषयधर्माधर्मनियमस्य व्याकरणशास्त्रमात्रसाध्यत्वाद् अकृतकम् = अनाद्यविच्छिन्नपरम्परातः सम्प्राप्तं नित्यमपौरुषेयम् शास्त्रम् = पुरुषार्थचतुष्टयोपदेशकरणं वेदम्, सनिबन्धनाम्= व्याख्यानरूपैर्भाष्यवृत्त्यादिभिरङ्गैरुपाङ्गैश्च निबन्धनैः सहितां वेदमूलां स्मृतिं च = अनादिशिष्टाचरितसाधुशब्दसमुदायकलेवराम् यद्वा 'शाकटायन - स्फोटायन - शाकल्यादि' पूर्वर्षीणां व्याकरणस्मृतिं च आश्रित्य = अर्थभेदेन रूपभेदेन शब्दसाधुत्वे प्रमाणतया पुरस्कृत्य शिष्टैः = पाणिन्यादिमुनिभिः शब्दानाम्= वैदिकानां लौकिकानाम् अनुशासनम् = साधुत्वान्वाख्यानम् आरभ्यते = प्रक्रियते, अयं साधुरयमसाधुरिति विविच्य प्रतिपाद्यते, न तु अप्रयुक्ता नवनवाः शब्दा विरच्यन्ते, "सिद्धे शब्दार्थसम्बन्धे" इति भाष्योक्तेः शब्दानां नित्यसिद्धत्वात् ।

विमर्शः - "पृषोदरादीनि यथोपदिष्टम्" इत्यनेन बोध्यते यत् - पृषोदरादयः शब्दा यथाभूताः शिष्टैः प्रयुक्तास्ते तथाभूता एव साधवो मन्तव्याः । अर्थात्

आशय : - प्रातिशाख्यकार कात्यायन, निरुक्तकार यास्क आदि वैदिक व्याकरण के प्रवक्ता तथा शाकटायन और सूत्रकार पाणिनि, वार्तिककार कात्यायन आदि लौकिक व्याकरण के कर्ता ऋषियों को अपौरुषेय वेदों में एवं वेदमूलक स्मृतियों में जैसा जो शब्दराशि प्राप्त हुआ, अनादि अविच्छिन्न परम्परा से प्राप्त नित्यसिद्ध उन्हीं शब्दों को साधुरूप में अपना प्रमाणभूत आधार मानकर तदनुसार ही वेद में उपदिष्ट शब्दों के अथवा स्मृतियों में शिष्टों से प्रयुक्त लौकिक शब्दों के साधुस्वरूप का निश्चय कर प्रकृति-प्रत्यय आदि की कल्पित विभागप्रक्रिया द्वारा व्याकरण से अनुगम व निरूपण किया है, कोई नवीन शब्द नहीं बनाया है । उक्तरीति से शब्द वेदों व स्मृतियों में ऋषिप्रयुक्त अनादिपरम्परा से प्राप्त नित्य सिद्ध हैं, कृतक नहीं हैं । उनका जो यथाभूत स्वरूप है, वह साधु है, तथाभूत ही सिद्ध साधुस्वरूप के अनुगम के लिए शब्दानुशासन किया जाता है ।

पदेशकरणम्-आम्नायम्, सनिबन्धनाम् = साङ्गोपाङ्गां स्मृतिम्= अनादिपरम्परया शिष्टाचरितसाधुशब्दप्रयोगपुञ्जाम्, आश्रित्य=

पृषोदरप्रभृतीनां शब्दानां यादृशं रूपमनादिशिष्टाचारादुपलभ्यते तादृशमेव रूपं साधु मन्तव्यम्, तथाभूतमेव रूपं विनैव लक्षणविशेषं 'वर्णागम - वर्णविकारवर्णलोपादि' प्रक्रियाकल्पनया साधनीयम् । अनेन शब्दानां साधुत्वमनादिशिष्टाचाराद् गम्यते इति फलितम् । पूर्वपूर्वपरम्परयोत्तरोत्तरं पुरुषैरुच्चार्यमाणेषु नियतक्रमेष्वकृतकेष्वपौरुषेयेषु - वेदशास्त्रेषु आर्षस्मृतिषु चानादिसिद्धा महर्षिभिर्दृष्टाः शिष्टैश्चाविच्छिन्नपरम्पराभि र्यादृशरूपा ये शब्दा उपदिष्टास्ते वैदिका लौकिकाश्च शब्दास्तादृशस्वरूपा एव साधवः प्रमिता इति बोद्धव्यम् । साधुशब्दराशिविग्रहा हि श्रुतयः स्मृतयो व्याकरणस्य लक्ष्य 'साधुशब्द'निधिरूपाः स्वतःप्रमाणभूता ऐदम्प्राथम्येन लक्ष्यशब्दसाधुत्वस्य विनिगमे निदर्शनभूमयः ।

अत एव पुरा प्रतिपदपाठपारायणेन साधुशब्दोपदेशसम्प्रदायः प्रावर्तत । किन्तु तत्र गौरवमनन्तत्वाद् दुःशकत्वं च समीक्ष्य प्रकृतिप्रत्ययादि-विभागकल्पनया लाघवेन शब्दसाधुत्वाख्यानाय व्याकरणप्रवर्तकमहर्षिभिः साधुशब्दनिदर्शनभूतां तां श्रुतिं स्मृतिं च मूलप्रमाणत्वेनोपाश्रित्येदं शब्दानुशासनं

जहाँ एक ही अर्थ के बोधक शब्द का रूपभेद पाया जाता है, वहाँ ऋषियों के सम्प्रदायभेद से रूपभेद को प्रामाणिक मानकर विधिसूत्र के अथवा निषेधसूत्र के विकल्पविधान से उभयविध रूप सिद्ध किया गया है । सम्प्रदायभेद न होने की स्थिति में सामान्यसूत्र का अपवादस्वरूप - विशेषसूत्र के भिन्न विधि से रूपभेद सिद्ध किया गया है । इस प्रकार निष्कर्ष में - शिष्टों से प्रयुक्त जो पूर्वसिद्ध साधु शब्द हैं, उनके केवल साधुस्वरूप क। व्याकरण से अनुगम किया गया है, जिससे प्रकृति - प्रत्यय के ज्ञान से अनन्त शब्दराशि का लाघव में ज्ञान हो जाय । इन सबके अतिरिक्त यहाँ 'शब्दानामनुशासनम्' इस प्रतिज्ञावाक्य से व्याकरण का प्रतिपाद्य विषयवस्तु कहा गया है कि - अर्थवाचक लौकिक और

प्रमाणीकृत्य शब्दानाम् - अनुशासनम् = बोधनोपायः शिष्टैः= महर्षिभिः आरभ्यते = अनुगम्यते, न तु नवीनशब्दप्रयोगः स्वयं कल्प्यते, सर्वेषामनादिसिद्धत्वादिति भावः ॥ ४३ ॥

नाम व्याकरणशास्त्रं प्रारभ्यते । तदेतत् सर्वमभिसन्धाय भगवान् भाष्यकारः प्राह - 'अथ शब्दानुशासनम्' इति । तस्यैव व्याख्यानमिदम् - 'तस्माद-कृतकं शास्त्रम्' इति । एतावता व्याकरणस्य साक्षात् प्रयोजनं शब्दानुशासनमिति सुस्पष्टम् । तत्र प्रातिशाख्यं निरुक्तं च वैदिकशब्दमात्रविषयम्, शाकटायनादिकं च लौकिकमात्रविषयम्, इदं पाणिनीयं शब्दानुशासनं तु 'सामान्य विशेष - नित्य-विकल्प - विधि-निषेध' लक्षणात्मकं पूर्वपूर्वसकलव्याकरण-स्मृतिसंग्रहपूर्वकं लौकिकवैदिकसकललक्ष्यसंग्राहकं व्यापकं विलक्षणमित्यपि व्याख्यातम् ॥ ४३ ॥

वैदिक - द्विविध साधु शब्दों का ही अनुशासन किया जाता है । एतावता अर्थ का वाचक होने पर भी अपभ्रंश शब्द का एवं निरर्थक-नदी, मेघ आदि के घोष का, अथवा वेणु-वीणा-पशु-पक्षी आदि के 'ध्वनि' रूप शब्द का अनुशासन व्याकरण का विषय नहीं है, यह स्पष्ट हो जाता है । 'शब्द' पद भले ही श्रोत्र से ग्रहणयोग्य सार्थक साधु असाधु का तथा निरर्थक ध्वनि का भी बोधक है, किन्तु उन सभी का अनुशासन व्याकरण का विषयवस्तु नहीं है, केवल श्रुतियों और स्मृतियों में सिद्ध साधु शब्द ही अनुशासन का विषय है ॥ ४३ ॥

द्वावुपादानशब्देषु शब्दौ शब्दविदो विदुः ।
एको निमित्तं शब्दानामपरोऽर्थे प्रयुज्यते ॥ ४४ ॥

प्रत्येकार्थप्रकाशिका

अव्यवहितश्लोके - 'शब्दानुशासन' मिति प्रस्तुते प्रथमं शब्दः क? इति निर्णयस्यावश्यकतया शब्दस्वरूपं बोधयितुमाह- 'द्वावुपे' ति । उपादीयते - विवृत्यते अर्थो येनेति करणसाधनम् उपादानशब्दः । अस्मन्मते शब्द एवार्थरूपेण विवर्त्तते,

---

आनन्दा

अव्यवहितपूर्वम् 'शब्दानामनुशासनम्' इति प्रतिज्ञातम् । तत्र शब्दार्थयोरन्योन्याध्यासमूलकतादात्म्येन भाष्यरीत्या 'गौः' इति विज्ञानेऽभेदेन प्रतिभासमानेषु शब्दाकृति - जाति - द्रव्य - गुणक्रियादिषु शब्दस्वरूपाविवेकात् 'कः शब्दः?' यस्यानुशासनमुपक्रान्तम्, इति प्रश्ने 'येनोच्चारितेन....सम्प्रत्ययो भवति' इति, 'अथवा प्रतीतदार्थकः' इति च भाष्यमुपक्रम्य व्यञ्जकं व्यङ्ग्यं च द्विविधं शब्दस्वरूपमाह - 'द्वावुपादान' इति ।

अन्वयः - शब्दविदः उपादानशब्देषु द्वौ शब्दौ विदुः, एकः शब्दानाम् निमित्तम्, अपरः अर्थे प्रयुज्यते ।

सूर्यमाया

'येनोच्चारितेन.....' तथा 'प्रतीतपदार्थको लोके' इस भाष्य के निर्देश अनुसार अर्थवाचक शब्द का द्विविध स्वरूप बताते हैं - 'द्वावुपादान' इत्यादि ।

अर्थ : - शब्द के विशेषज्ञ वैयाकरण अर्थ के बोध के कारण शब्द के विषय में दो प्रकार के शब्द मानते हैं । प्रथम है - व्यञ्जक शब्द, जो स्फोटनामक आन्तरिक शब्द की अभिव्यक्ति का कारण है, वह वैखरीध्वनि रूप है । दूसरा व्यङ्ग्यशब्द स्फोट है, जो वैखरी से अभिव्यक्त होकर अर्थ का बोध कराने में समर्थ होता है ।

इत्यादावेवोक्तम् । यथा रज्जुरेव सर्परूपेण विवर्त्तते, अतः सर्पविवर्त्तोपादानं रज्जु; तथैव अर्थोपादानं शब्दः ।

ननु यत्र विषमकार्यापत्तिः, तत्र विवर्तः, यथा शुक्तिकाया रजतम् । तथा च 'गामुच्चारये' त्यत्र वाच्यवाचकयोरुभयोः

व्याख्या - शब्दविदः = शब्दज्ञा वैयाकरणा उपादानशब्देषु = अर्थग्रहण-कारणेषु वाचकशब्देषु विषयभूतेषु द्वौ = द्विविधौ स्थूलसूक्ष्मौ शब्दौ = अर्थवाचकौ विदुः = मन्यन्ते । एकः = तयोः प्रथमो लोके न्यायदर्शने वा प्रसिद्धः श्रोत्रग्राह्यः वैखरीनामकः शब्दानाम् = श्रोत्राग्राह्याणां सूक्ष्माणां स्फोटरूपाणाम् निमित्तम् = अभिव्यक्तेः कारणम्-अभिव्यञ्जकम् इत्यर्थः । अपरः = द्वितीयः श्रोत्राग्राह्यो हृदयदेशस्थः सूक्ष्ममध्यमावाग्रूपः स्फोटः अर्थे = अर्थबोधने योग्यः प्रयुज्यते = वैखरीवागुच्चारणेन व्यज्यते, व्यङ्ग्य इति निष्कर्षः । **विमर्शः** - उपादीयते = गृह्यतेऽर्थोऽनेनेति करणसाधने - उपादानं वाचकशब्दः । स द्विविधः - बाह्य आन्तरश्च । श्रोत्रग्राह्यो लोके दर्शनान्तरे च शब्दत्वेन प्रसिद्धो वैखरीरूपः प्रथमः । स वैयाकरणनये स्फोटस्य व्यञ्जक इष्यते । द्वितीयश्च श्रवणागोचरो मनोमात्रगोचरो ध्वनिव्यतिरिक्तो व्यङ्ग्यः स्फोटाख्यः । स एव साक्षादर्थस्य वाचकः, वैखरीवाक् तु ध्वनिरूपः शब्दः स्फोटव्यञ्जनेन परम्परया वाचकः ।

आशय : - निर्दिष्ट भाष्य के अनुसार अर्थ का वाचक शब्द दो प्रकार का है । जिनमें एक श्रोत्र का विषय - 'वैखरीवाणी' बाह्य ध्वनिरूप है, जो कि 'कण्ठ-तालु' आदि स्थानों में वक्ता के प्रयत्नजन्य वायु के अभिघात से उत्पन्न 'क ख' आदि वर्णों के - 'पूर्व पर' क्रम से पद वाक्य के रूप में प्रयुक्त होता है, लोक में जिसको शब्द रूप में सभी जानते हैं और मानते हैं । न्याय दर्शन में भी श्रोत्र से ग्राह्य ही शब्द माना गया है । व्याकरण मत में वह स्फोट का व्यञ्जक माना गया है । स्फोट के अभिव्यञ्जन व प्रकाशन से वह भी परम्परया अर्थ का वाचक होता है ।

स्वरूपतया एकरूपत्वात् कथं विवर्तोपादानमिति चेत्; उपादीयते= श्रोत्रादिना ज्ञायते यदिति कर्मसाधनमेव शब्दार्थकस्थले गृहाण ।

वस्तुतस्तु - उपादीयते = ज्ञायते अर्थो येनेति व्युत्पत्त्या वाचकत्वेनैकरूपेणोभयोः संग्रहात्तदर्थं न करणरूपविवर्तो-

---

उपादानशब्दस्य वैखरीपरत्वे - उपादीयते = श्रोत्रेण गृह्यते यः स उपादानशब्द इतीह कर्मसाधनमपि ज्ञेयम्, बाहुलकात् ल्युट् । किन्तु करणसाधनेनैव व्यङ्ग्यव्यञ्जकयोरुभयोरपि संग्रहे बाहुलकबलेन ल्युटः कल्पनं क्लिष्टम् ।

एतावता - अर्थवाचकत्वं शब्दत्वमिह फलितम् । तेन जात्यादीनां शब्दत्वप्रसङ्गः परिहृतः । एवं चालक्ष्यजात्यादेर्व्यावृत्तिमुखेन वाचकशब्द-स्वरूपनिरूपणपरमिहोपादानपदम्, न तु नदीप्रवाहघोषादेर्व्यावृत्तिपरम्, तेषामवाचकत्वादिह शब्दपदेन ग्रहणस्य प्रसङ्गाभावादित्युपपादितं प्राक् ।

इदं त्ववधेयम् - शब्दविवर्त्तवादे यथा सर्पविवर्तोपादानं रज्जुस्तथा अर्थविवर्तोपादानं शब्द इति स इहोपादानशब्देन गृह्यते । रज्जौ सर्प इव 'वाचैवायं ज्योतिषा' इत्यादिश्रुत्या स्वयंज्योतिषि ज्ञानात्मके बौद्धे शब्देऽर्थोऽध्यारोप्यते, इति अर्थविवर्तोपादानं बौद्धः शब्द इति केचित् । परे

दूसरा शब्द आन्तर स्फोट है, जो हृदय देश में स्थित 'मध्यमावाणी' नादरूप है । वह श्रोत्र का विषय नहीं है, उपांशु जप में योगी को ध्यान से गम्य होता है । वस्तुतः यह स्वयं वर्ण-पद आदि क्रम विभाग से रहित है - अखण्ड है, किन्तु दर्पण वा स्फटिक आदि में रक्त-पीत-हरित पुष्पों के प्रतिबिम्ब क्रम के समान वैखरी के वर्ण आदि क्रमरूप से प्रतिबिम्बित होकर वर्ण-पद आदि क्रमवाला प्रतिभासित होता है, यही इसकी अभिव्यक्ति है । फलतः स्फोट नियमतः व्यञ्जक ध्वनि के रूप से प्रतिबिम्बित ही प्रकाशित होता है । अतः श्रोत्रग्राह्य ध्वनि स्फोट का व्यञ्जक माना गया है तथा स्फोट व्यङ्ग्य माना गया है । नित्य सिद्ध नादात्मक स्फोट ही शक्ति का आश्रय तथा साक्षात् अर्थ का वाचक होता है ।

पादानबोधकम् उपादानपदम् । तथा च उपादानशब्देषु = वाचकशब्देषु शब्दविदः = वैयाकरणाः द्वौ शब्दौ = वाचकौ विदुः = जानन्ति, एकः = श्रोत्रग्राह्यवैखरीवाग्रूपः शब्दानाम् = स्फोटरूपाणां निमित्तम् = प्रकाशकारणम्, तेन हि स्फोटः

तु – अर्थबोधनिमित्तं स्फोटाभिव्यक्तिनिमित्तं वा साक्षात् परम्परया वाचक उपादानशब्द उच्यते, इति वदन्ति ।

यद्वा अव्युत्पत्तिपक्षे – गवादिशब्दस्यानुपूर्वीस्वरूपमेव गवादिशब्दस्य व्युत्पत्तिनिमित्तम्, इति गवादिशब्दस्वरूपे गवादिरर्थोऽध्यारोप्यते, इत्यतोऽभेदेन तत्तदर्थे तत्तद्वाचकशब्दव्यवहारः । एवं चार्थस्य निमित्तं शब्दस्वरूपम्, तत्स्वरूपवांश्च वाचक उपादानशब्दो बोध्यः ।

व्युत्पत्तिपक्षे तु गुणक्रियादिरर्थो गवादिशब्दव्युत्पत्तिनिमित्तम्, इति सोऽर्थ उपादानम् अस्ति अस्य स उपादानः, अर्शाद्यच् । उपादानश्चासौ शब्दश्च इति उपादानशब्दः । एतत्कल्पेऽपि शब्दव्युत्पत्तेरुपादानमर्थः शब्दे समारोप्यते, इति शब्दार्थयोरभेदव्यवहारः ।

यद्वा 'घट इति शब्दः, घट इत्यर्थः' इत्यादिव्यपदेशेन शब्दार्थयोरभेदाध्यवसायाद् भेदघटितवाच्यवाचकसम्बन्धस्यायोग्यत्वेनालोकवदभिन्नेऽपि द्योत्यद्योतकत्वस्य सत्त्वाद् अर्थद्योतकः शब्द उपादान इत्युच्यते ।

इमे विकल्पाः संग्रहे वृत्तौ च प्रपञ्चिताः । अस्तु तावदर्थविवर्त्तोपादानं हि शब्दः, स नेह विवक्ष्यते, आदावेव तदुक्तम्, नेह पुनरुपक्रम्यते । अस्तु

यहाँ यह अवधेय है कि – एक ओर हृदय देश में स्थित स्वप्रकाशज्ञानस्वरूप अखण्ड स्फोट व्यञ्जक ध्वनि के वर्ण-पद आदि रूप से प्रतिबिम्बित होता है, तो दूसरी ओर शब्दबोध्य – अर्थ का आकार भी प्रतिबिम्बित होता है । फलतः शब्द में अर्थ संक्रान्त होकर शब्दरूपता को ग्रहण कर लेता है, तथा शब्द भी अर्थरूपता को ग्रहण कर लेता है, जिससे शब्द अर्थ दोनों का तादात्म्य हो जाता है, क्योंकि शब्द अर्थ दोनों ही मूलतः बौद्ध हैं, ज्ञानरूप हैं । अत एव शब्द, अर्थ दोनों का एकाकार व्यवहार होता है – 'घट इति शब्दः, घट इत्ययमर्थः' ।

प्रकाश्यते न तूत्पाद्यते, तस्य ब्रह्मरूपतया नित्यत्वात्। अपरः= स्फोटरूपः अर्थे प्रयुज्यते = अर्थबोधनक्षमो भवतीति सारः ।

अयमाशयः – वैखरीवागात्मकशब्दः न साक्षादर्थं बोधयति, अपितु स्फोटप्रकाशनद्वारा अर्थं बोधयति, मध्यमा-वाग्रूपस्फोटश्च साक्षादर्थं बोधयतीति वैयाकरणसमय इति दिक् ॥ ४४ ॥

शब्दो वाचको द्योतको वा, न स इह प्रतिपादनीयः । इह तु उपादानपदेन द्विविधः शब्दः प्रतिपाद्यते । बाह्यो वर्णपदाद्यात्मको ध्वनिरूपो व्यञ्जक एकः । अपरश्चान्तरो ध्वनिव्यतिरिक्तः स्वयमक्रमोऽपि व्यञ्जकधर्मोपरागेण क्रमप्रतिभासवान् स्फोटरूपो व्यङ्ग्यः । तदुभयमिह उपादानशब्द उच्यते, यथाऽह भाष्ये – 'येनोच्चारितेन' इति 'अथवा प्रतीतपदार्थको लोके ध्वनिः शब्दः' इति च ॥ ४४ ॥

निष्कर्ष में यहाँ अर्थ के बोध का निमित्त शब्द – 'उपादानशब्द' कहा गया है, तथा अर्थ के विवर्त का निमित्त भी 'उपादानशब्द' कहा गया है । इनमें अर्थ-बोध का निमित्त – साक्षात् और परम्परया दोनों विवक्षित हैं । आन्तर शब्द – 'स्फोट' साक्षात् अर्थ का वाचक है, बाह्य शब्द वैखरी स्फोट के प्रकाशन द्वारा परम्परा से अर्थ का वाचक है । दोनों ही उपादान शब्द हैं, जो कि यहाँ मुख्य प्रतिपाद्य हैं । अर्थविवर्त का उपादान शब्द तो प्रारम्भ में ही कहा जा चुका है, अतः यहाँ वह प्रकृत प्रतिपाद्य विषय नहीं है ॥ ४४ ॥

आत्मभेदस्तयोः केचिदस्तीत्याहुः पुराणगाः ।
बुद्धिभेदादभिन्नस्य भेदमेके प्रचक्षते ॥ ४५ ॥

प्रत्येकार्थप्रकाशिका

तत्र प्रकारमाह – कार्यकारणयोर्भेद इति पक्षे – वैखरीवाक्-

आनन्दा

उपादानशब्दत्वेन प्राक् प्रतिपादितयोर्द्वयोः शब्दयोः स्वरूपविषये प्रकारभेदेन भेदाभेदमतमाह – 'आत्मभेद' इति ।

अन्वयः – केचित् पुराणगाः तयोः आत्मभेदः अस्ति, इति आहुः । एके अभिन्नस्य बुद्धिभेदाद् भेदम् प्रचक्षते ।

व्याख्या – केचित् = असत्कार्यवादिनः कार्यकारणयोर्भेदं मन्वानाः पुराणगाः = 'असदेवेदमग्र आसीत्' इति ऐतिह्यानुगामिनः तयोः = उपादान-शब्दत्वेन प्रोक्तयोः वैखरीस्फोटयोः आत्मभेदः = स्वरूपभेदः – प्रथमः शब्दो बाह्यः, द्वितीयस्तु शब्द आन्तर इति पृथक् स्वरूपमस्ति, इत्याहुः । एके = अन्ये सत्कार्यवादिनः कार्यकारणयोरभेदं मन्वानाः सिद्धान्तिनस्तु अभिन्नस्य = तत्त्वतो भेदरहितस्य – अभिन्नस्वरूपस्य शब्दस्य बुद्धिभेदाद्= वक्तृबोद्धव्यबुद्ध्युपाधिभेदाद् भेदम् = श्रावणज्ञानविषयतया – मानसज्ञान-

---

सूर्यमाया

दार्शनिकों के मतभेद से पूर्वोक्त दो उपादानशब्द – 'वैखरी और स्फोट' का भेद अथवा अभेद पक्ष का निरूपण करते हैं – 'आत्मभेदः' ।

अर्थ : – पुराण के अनुगामी कुछ लोग पूर्वोक्त उन दोनों उपादानशब्दों 'वैखरी और स्फोट' का परस्पर भेद है, यह कहते हैं । अन्य लोग अभिन्न शब्द का – 'स्थूल और सूक्ष्म' इस बुद्धि के भेद से भेद कहते हैं । वस्तुतः उनका अभेद है ।

आशय : – दर्शनों के असत्कार्यवाद तथा सत्कार्यवाद इन मतभेदों के कारण वैखरी और स्फोट का कोई परस्पर भेद मानते हैं, तो दूसरे अभेद मानते हैं ।

स्फोटयोर्भेद इति केचित् ।

विषयतया च स्थूलसूक्ष्मस्वरूपभेदं प्रचक्षते = व्यपदिशन्ति, तात्त्विकस्तु तयोरभेद एव ।

विमर्श : - विनष्टादेव बीजादङ्कुरोत्पत्तिदर्शनाद् ये अभावाद् भावोत्पत्तिम्-असतः कारणाद्वा कार्योत्पत्तिं मन्यन्ते, तेषां नये कारणकार्ययोरत्यन्तं विरूपत्वाद् भेद एव । तथा च प्रकृते वक्तुर्विवक्षाप्रयत्नाद् वर्णपदाद्यात्मना जायमानः श्रुतिगोचरः शब्द उत्पत्तेः पूर्वं तेन रूपेण सर्वथा नासीत् ।

अस्तु तावद् वक्तुर्हृदये वर्णपदादिरूपहीनो निष्क्रमो ज्ञानात्मकः कश्चन बौद्धः शब्दः, स हि श्रुतिग्राह्यस्य सक्रमस्य बाह्यस्य शब्दस्य कारणं भवन्नपि ततो भिन्न एव, नहि कथमप्यभिन्नो, वैरूप्यात् । इति वैखरी-स्फोटयोर्भेद एवास्थेयः । इत्येकं दर्शनम् ।

सत्कार्यवादिनस्तु प्रचक्षते - यद् असतः कारणात् सर्वथाऽसम्बद्धस्य कार्यस्य जन्म नैव भवितुमर्हति । अभावादसतो वा भावोत्पत्तौ सर्वं सर्वस्मादुत्पद्येतेति धान्यार्थी धान्यबीजमेवोपादत्ते न गोधूमबीजम्, गोधूमार्थी च गोधूमबीजमेवोपादत्ते न धान्यबीजमिति, कार्यकारणभावव्यवस्था समुच्छिद्येत । नहि विनष्टाद् बीजादङ्कुरोत्पत्तिः, किन्त्ववस्थान्तरपरिणामाद् । अन्यथा जलाप्लावनेऽत्यन्तं विलये कथं नाङ्कुरोत्पत्तिः । तस्मात् सत एव कारणाद् नित्यसम्बद्धात् सत् कार्यं समवायेन तादात्म्येन वा संजायते । सदेव

अभाव से भाव अथवा असत् कारण से कार्य की उत्पत्ति पक्ष में कारण से अत्यन्त भिन्न कार्य को माननेवाले असत्कार्यवादी जो 'असदेवेदमग्र आसीत्' इस पुराण इतिवृत्त को प्रमाण मानते हैं, वे वैखरी और स्फोट का भेद मानते हैं । सत कारण से सत् कार्य का जन्म होता है, ऐसा माननेवाले सत्कार्यवादी दोनों शब्दों का कारणस्वरूप से वास्तविक अभेद तथा कार्यस्वरूप से कल्पित भेद मानते हैं, जैसे सुवर्णकुण्डलों का अपने कारण द्रव्य सुवर्ण से वस्तुतः अभेद है, जो भेद दीखता है वह तो कार्य कुण्डल के दृश्य आकारभेद से कल्पित है, न कि स्वाभाविक है, वैसे ही आन्तर स्फोट और बाह्य वैखरी का कारण स्वरूप से

अपरे तु - एकः श्रोत्रेन्द्रियग्राह्यः, अपरः मनोग्राह्य इति बुद्धिभेदाद् भेदो वास्तविकस्तु अभेद इत्याहुः ॥ ४५ ॥

सूक्ष्ममव्यक्तं सत् कारणम्, तदेव व्यक्तावस्थापन्नं स्थूलं दृश्यं कार्यमिति व्यपदिश्यते, इति कार्यकारणयोरभेद एव परिस्फुरति ।

प्रकृतेऽप्यस्तु तावद् व्यवहारे श्रवण-मनोगोचरयोः स्थूलसूक्ष्मयो-वैखरी-स्फोटयोः स्थूलदृशा भेदव्यवहारः, किन्तु वस्तुतस्तयोरभेद एव शब्दविदामिह प्रतिपिपादयिषितो राद्धान्तो वक्ष्यमाणकारिकास्वारस्यात् । यथा हि अरणेरन्तःस्थ एव वह्निर्मन्थनेन समुद्भूय बहिः समुपलभ्यते, तथा हृदयस्थ आन्तर एव ज्ञानात्मकशब्दो बहिर्वर्णादिरूपेण श्रोत्रेण समुपलभ्यते । वक्तृ-श्रोतृबुद्ध्युपाधिभेदकृतस्तु तयोर्भेदो न तु स्वाभाविक इत्यग्रे स्फुटीभविष्यति । वक्ष्यते च - 'अथेदमान्तरं ज्ञानं सूक्ष्मवागात्मना स्थितम्' इत्यादिना । भाष्यकृताऽप्युक्तम् - 'श्रोत्रोपलब्धिर्बुद्धिनिर्ग्राह्यः' इत्यलम् ॥ ४५ ॥

वस्तुतः अभेद है, क्योंकि हृदयदेश में स्थित ज्ञानरूप सूक्ष्म मध्यमावाक् - स्फोट ही तत् तत् स्थानों में प्रयत्नसमीरित वायु के आघात से श्रोत्रग्राह्य 'कादि-चादि' वर्णरूप - वैखरीवाक् रूप में विवृत्त होता है । जो भेद लक्षित होता है, वह अवस्थाभेद से कल्पित है । वक्ता को जो मनोग्राह्य है, वही वैखरी रूप में परिणत होकर श्रोता को श्रोत्रग्राह्य होता है, भिन्न नहीं । भेद तो वक्ता और श्रोता की बुद्धि के भेद से कल्पित है । कारणवस्तु अपने अभिन्न स्वरूप से कार्य में सर्वदा अनुगत रहता है, भेद तो कार्य का आगत आकार का है, तावता कार्य का कारण से अभेद नहीं बाधित होता । भगवान् भाष्यकार ने कहा भी है - 'आकृतिरन्या चान्या च भवति द्रव्यं पुनस्तदेव' । फलतः व्यावहारिक भेद है तथा पारमार्थिक अभेद है । अतः वैखरी और स्फोट का अभेद ही यहाँ सिद्धान्त पक्ष है । यह आगामी कारिका में अरणि के दृष्टान्त से स्पष्ट होगा ॥ ४५ ॥

अरणिस्थं यथा ज्योतिः प्रकाशान्तरकारणम् ।
तद्वच्छब्दोऽपि बुद्धिस्थः श्रुतीनां कारणं पृथक् ॥ ४६ ॥

प्रत्येकार्थप्रकाशिका

वैखरी-स्फोटयोरभिन्नत्वेऽपि प्रकाश्यप्रकाशकभावमूलक-कार्य्यकारणभावं दृष्टान्तबलेनोपपादयति – 'अरणिस्थ'-मिति । अरणिस्थम् = शमीकाष्ठमध्यवर्ति ज्योतिः = वह्निः

आनन्दा

स्फोटवैखर्योररणिगर्भस्थवह्निदृष्टान्तेन स्वाभाविकमभेदमुपपाद्य व्यङ्ग्य-व्यञ्जकभावात्मककार्यकारणभावेन कल्पितं भेदं प्रतिपादयति – 'अरणिस्थम्' इति ।

अन्वयः – अरणिस्थम् ज्योतिः यथा प्रकाशान्तरकारणम्, तद्वत् बुद्धिस्थः शब्दः अपि पृथक् श्रुतीनाम् कारणम् ।

व्याख्या – अरणिस्थम् = शमीगर्भे सूक्ष्मरूपेण स्थितं ज्योतिः = अव्यक्तवह्निः मथितः सन् प्रकाशान्तरकारणम् = अन्यः प्रकाशः – प्रकाशान्तरं – बहिर्व्यक्तो वह्निः, तस्य कारणम्, तद्वत् = तदिव बुद्धिस्थः = बुद्धौ – अन्तःकरणे सूक्ष्मरूपेण स्थितः शब्दः = अव्यक्तमध्यमानादात्मकः स्फोटोऽपि विवक्षाप्रयत्नेन व्यक्तः सन् पृथक् = नाना श्रुतीनाम् = बहिःश्रवण-विषयाणां क-च-ट-त-पादिवर्णानां कारणम् = उपादानं भवतीति शेषः ।

सूर्यमाया

अरणि (शमी) काष्ठ में स्थित अग्नि के दृष्टान्त से वैखरी और स्फोट का अभेद सिद्धकर उनका प्रकाश्यप्रकाशकभावमूलक कार्यकारणभाव बताते हैं – 'अरणिस्थम्' ।

अर्थ : – अरणिकाष्ठ के अन्दर वर्तमान अदृश्य सूक्ष्म जो अग्नि है, वह संघर्षण से व्यक्त होकर जैसे बाहर दृश्य अग्नि का कारण होता है, वैसे हृदय में स्थित अव्यक्त ज्ञानरूप जो स्फोटात्मक शब्द है, वह (विवक्षा प्रयत्न से व्यक्त होकर) श्रवणविषय – विभिन्न वर्ण रूप – वैखरीशब्द का कारण होता है ।

यथा प्रकाशान्तरस्य = मन्थनादिना उद्बुद्धस्य बहिरुपलभ्यमानस्य ज्योतिषः कारणम् = उपादानम्, वस्तुतोऽन्तःस्थितमेव ज्योतिर्मन्थनेनोद्बुद्धं सत् बहिरुपलभ्यते न त्वन्यत्, इति भावः, तद्वत् = तथैव बुद्धिस्थः = हृदयस्थः शब्दः = स्फोटः - अपि

विमर्श : - यथा अरणेरभ्यन्तरे वर्तमानश्चक्षुषोऽगोचरोऽव्यक्त एव वह्निर्मन्थनेन प्रादुर्भूतः बहिश्चक्षुषा समुपलभ्यते, नान्यः । आन्तरबाह्ययोस्तयो-र्वह्न्योरभिन्नत्वेऽपि सूक्ष्मस्याव्यक्तस्य कारणत्वम् - बहिर्दृश्यमानस्य तु कार्यत्वमिति मन्यते, तथा वक्तुर्हृदये वर्तमानः श्रवणाविषयः स्फोटाख्यो ज्ञानरूपः शब्द एव विवक्षाप्रयत्नेन समीरितो वह्निज्वालेवोर्ध्वं समुल्लसितः कण्ठादिस्थानेषु समीरणाघातेन वर्णादिध्वनिरूपेण विवर्तमानो बहिः श्रोतृभिः श्रवणेनोपलभ्यते, नान्यः सः । आन्तरबाह्ययोस्तयोः शब्दयोरभेदेऽपि हृदयस्थस्याव्यक्तस्य स्फोटस्य कारणत्वम्, बहिः श्रोतृभिः श्रूयमाणस्य वैखरीरूपस्य कार्यत्वमित्यभेदेऽपि व्यक्ताव्यक्ताद्यवस्थाभेदाद् वक्तृश्रोतृबुद्धि-भेदाद्वा भेदमुपचर्य भवति कार्यकारणभावः ।

आशय : - अरणिकाष्ठ में अन्तर्हित बीजरूप में स्थित अग्नि अव्यक्त व असंवेद्य है, संवेद्य नहीं । वह अव्यक्त कारण के रूप में अथवा कार्यशक्ति के रूप में विद्यमान रहकर भी न तो स्वयं प्रकाशित होता है, ना ही अन्य किसी को प्रकाशित करता है - न दाह ही करता है । किन्तु संघर्षण करने से जब वह प्रस्फुटित होता है, तब स्वयं भी स्फुट प्रकाशमान होता है, तथा अन्यवस्तु को भी प्रकाशित करता है एवं दाहकार्य भी करता है ।

यद्यपि अरणि में अन्तर्हित जो अग्नितत्त्व है, वही मन्थन से बाहर व्यक्तरूप धारण करता है, प्रकट अग्नि उससे भिन्न तत्त्व नहीं है, तथापि अरणि में स्थित अग्नि अदृश्य है - अप्रकाशमान है, वही मन्थन से उद्भूत प्रकाशमान दृश्य होता है, यह अन्तर अवश्य है । इसी भेद के रहने से उनका कार्यकारणभाव होता है । ऐसे ही प्रकृत में वक्ता के हृदय में सूक्ष्मनाद के रूप में स्थित - 'स्फोटाख्य'

अर्थबोधनेच्छया प्रयत्नादिनोद्बुद्धः सन् - इत्यध्याहारः पृथक् श्रुतीनाम् = विभिन्नरूपेण श्रवणेषु कारणम् = बीजम् । अन्यैः श्रोत्रेन्द्रियेण बहिरुपलभ्यमानं व्यञ्जकध्वनिगत-कत्वगत्वादि-रूपेणाभासमानं पृथग् अभिलक्ष्यते ।

एवं च यद्यपि स्फोटो हि कारणं वैखर्या इत्यायातम्, तथापि स्फोटस्याभिव्यक्तेः - प्रकाशस्य निमित्तं वैखरी, इत्यपि ध्येयम् । तदुक्तं प्राक् - 'एको निमित्तं शब्दानाम्' इति । स्फोटो व्यङ्ग्यो वैखर्या । वैखरीरूपरूषितो लब्धवर्णादि-क्रमविभागवान् स्फोटः प्रकाशते । तदित्थं स्फोटवैखर्योः प्रकाश्यप्रकाशकभाव - व्यङ्ग्यव्यञ्जकभावतयाऽपि कार्यकारणभावः समुल्लसत्यन्योन्यम् ।

शब्द ही - विवक्षा प्रयत्न से उत्पन्न वायु का कण्ठ आदि स्थानों में अभिघात से 'क-ख' आदि वैखरी वर्णों के रूप में विवृत्त होकर श्रवण का विषय हो जाता है । अत एव दोनों वस्तुतः अभिन्न रहने पर भी अव्यक्त स्फोट रूप शब्द सूक्ष्म रूप में कारण तथा व्यक्त श्रवणगोचर वैखरी रूप शब्द स्थूल रूप में कार्य कहा जाता है ।

यहाँ यह अवधेय है कि पूर्वोक्त प्रकार से सत्कार्यवाद में उपादान और उपादेय का सर्वथा अभेद रहने पर भी अवस्थाभेद से कार्यकारणभाव होता है । आकार-प्रकार-भेद से रहित अव्यक्तवस्तु उपादान होता है, तथा आकार-प्रकार-भेद वाला व्यक्तवस्तु उपादेय - 'कार्य' व्यवहृत होता है ।

प्रकृत में भी स्फोट और वैखरी का अभेद रहने पर भी अव्यक्त ज्ञानरूप सूक्ष्म शब्द कारण तथा स्थूल श्रुतिगोचर वैखरीरूप शब्द कार्य व्यवहृत होता है ।

इसके अतिरिक्त यहाँ यह भी ध्येय है कि - एक ओर वक्ता के हृदय में स्थित अक्रम - 'स्फोट' का सक्रम 'वैखरी रूप' शब्द व्यञ्जक व प्रकाशक होता है, स्फोट व्यङ्ग्य व प्रकाश्य होता है, तो दूसरी ओर श्रोता के द्वारा श्रुत वह वैखरी रूप सक्रम शब्द देहली-दीपन्याय से श्रोता के हृदय में स्थित स्फोट को अपने क्रमरूप से प्रतिबिम्बित कर उसका भी व्यञ्जक तथा प्रकाशक होता है । इस प्रकार स्फोट वैखरी से व्यङ्ग्य एवं प्रकाश्य होता है । अत एव वक्ता श्रोता दोनों को अर्थबोध होता है । इस प्रकार पूर्वकल्प में जहाँ स्फोट उपादान

अयमत्र सारः - वक्तुः प्रयत्नेन विवृत्तः स्फोटः ध्वनिगतधर्म्मरूषितः सन् परश्रवणग्राह्यो भवति, परेण श्रुतः स हृत्स्थं स्फोटमभिव्यञ्जयति, ततोऽर्थबोध, इति वस्तुत एकस्यैव प्रयत्नाद्युपाधिवशाद् उभयोः प्रकाश्यप्रकाशकभावः, अत एव कार्य्यकारणभाव इति ॥ ४६ ॥

इदन्त्ववधेयम्-वक्त्रोच्चारितो वैखरीशब्दः स्वेन परेण च श्रूयमाणो देहलीदीपन्यायेन वक्तुः श्रोतुश्चोभयो र्हृदयस्थस्य स्फोटाख्यशब्दस्य प्रकाशकः, न तु केवलं श्रोतुरेव हृदयस्थस्य । यथा श्रोता परेणोच्चारितं शब्दं श्रुत्वा तदर्थमवगच्छति, तथा वक्ता स्वयमपि स्वशब्दं श्रुत्वा तदर्थमवगच्छत्येव । एतावांस्तु विशेषो यद् वक्तुः प्रयोगात् प्रागपि हृदयेऽर्थज्ञानं प्रयोगे निमित्तभूतं तिष्ठति, किन्तु तद् अव्यपदेश्यमेव, प्रयोगात् जायमानं तु व्यपदेश्यम्, एवं च द्विधा कार्यकारणभावः - स्फोटवैखर्योरुपादानोपादेयभावः, वैखरीस्फोट-योश्चोपाधानोपाधेयतया प्रकाशनेऽभिव्यक्तौ वा निमित्तनिमित्तिभाव इति विवेकः ॥ ४६ ॥

तथा वैखरी उसका उपादेय है, वहाँ द्वितीयकल्प में उसके विपरीत वैखरी स्फोट के प्रकाश तथा अभिव्यक्ति का निमित्त हो जाता है । अतः स्फोट और वैखरी का परस्पर प्रकाश्य-प्रकाशकभाव एवं व्यङ्ग्य-व्यञ्जकभावमूलक भी कार्यकारणभाव फलित होता है । निष्कर्ष में अभिन्न नित्यशब्द में भी अवस्थाभेद से कल्पित भेद मानकर स्फोट और वैखरी का परस्पर प्रकाश्य - प्रकाशक - भाव तथा तन्मूलक कार्यकारणभाव होता है ॥ ४६ ॥

वितर्कितः पुरा बुद्ध्या क्वचिदर्थे निवेशितः ।
कारणेभ्यो विवृत्तेन ध्वनिना सोऽनुगृह्यते ॥ ४७ ॥

प्रत्येकार्थप्रकाशिका

नन्वेवं घटशब्देन पटोऽप्यर्थः कथं न प्रतीयत इति शङ्कां परिहरन्नाह - 'वितर्कितः' इति । पुरा = पूर्वं बुद्ध्या = मनसा वितर्कितः = घटशब्दस्य कम्बुग्रीवादिमतैव तादात्म्यसम्बन्धः न तु पटेन, एवं पटस्य तदर्थेनैव, इत्यादिरीत्या तत्तदर्थेन सह

आनन्दा

यदि स्फोटवैखर्योरभेदस्तर्हि घटशब्दाभिन्नस्य स्फोटस्य पटशब्देनाप्यभिन्नत्वे, तदभिन्नाभिन्नस्य तदभिन्नत्वनियमाद् घटपटशब्दयोरेकार्थवाचकत्वेन पर्यायत्वे घटशब्दात् पटोऽप्यर्थः प्रतीयेतेत्याशङ्कां परिहरति- 'वितर्कितः' इति ।

अन्वयः - पुरा बुद्ध्या वितर्कितः क्वचिद् अर्थे निवेशितः कारणेभ्यः विवृत्तेन ध्वनिना सः अनुगृह्यते ।

व्याख्या - पुरा = तं तमर्थं बोधयितुं शब्दप्रयोगात् पूर्वं, बुद्ध्या = मनसा वितर्कितः = तत्तदर्थसम्बन्धितया प्रकल्पितः श्रुत्यविषयः सूक्ष्मः शब्दः

सूर्यमाया

उपर्युक्त कथन अनुसार यदि स्फोट एक ही है, तथा स्फोट से अभिन्न ही वैखरी है, तो एक ही स्फोट-'घट और पट आदि' सभी अर्थों का वाचक हो जायगा, ऐसी स्थिति में घट शब्द से पट अर्थ का भी बोध होना चाहिए, इस आशङ्का का समाधान करते हैं- 'वितर्कितः' ।

अर्थ : - शब्द के प्रयोग से पहले विवक्षाकाल में वक्ता अपनी बुद्धि से प्रथमतः अर्थसम्बन्धी शब्द की संकल्पना व अवधारणा करता है । तत्पश्चात् बुद्धिकल्पित वह शब्द वक्ता की बुद्धि द्वारा ही किसी अर्थ विशेष में अभिन्न रूप

तादात्म्यसम्बन्धितया - ऊहितः शब्दः, 'पश्चाद्'- इत्यध्याहारः, क्वचिदर्थे निवेशितः = अर्थबोधनेच्छया प्रयुक्त इति भावः, कारणेभ्यः = वाय्वभिहतताल्वादिभ्यः विवृत्तेन = जातेन ध्वनिना = कत्व-ह्रस्वत्वोदात्तत्वादिधर्माश्रयेण - 'सोऽर्थबोधने'

पश्चात् क्वचित् = कस्मिंश्चित् कम्बुग्रीवादिमति अर्थे = बोध्यतया विवक्षिते जात्यादिमति निवेशितः = सोऽयमिति तादात्म्येनाध्यवसितः कारणेभ्यः= तत्तत्स्थानेभ्यः प्रकृतिभूतेभ्यो विवृत्तेन = समुद्भूतेन ध्वनिना = वर्णात्मकेन सः = मानसः शब्दः अनुगृह्यते = तदीयक्रमरूपानुकारेणाभिव्यज्यमानो विविक्तार्थबोधे उपकृतो भवति ।

विमर्शः - ज्ञातमर्थं परान् बोधयितुं विवक्षुः शब्दान् प्रयुङ्क्ते । शब्द-प्रयोगात् पूर्वं विवक्षाकाले प्रमातुर्बुद्धौ शब्दालिङ्गित एव घटादिरर्थस्तिष्ठति । तदेतत् - 'न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते' इति वक्ष्यते । शब्दार्थयोः - 'सोऽयम्' इत्यभिसन्धानाद् शब्दतादात्म्यापन्नोऽर्थः, अर्थतादात्म्यापन्नश्च शब्दो नियमेन बुद्धिविषयो भवति, न विविक्तः । इति ज्ञातमर्थं परान् बोधयितुं यदा वक्ता शब्दं प्रयुयुक्षते तदा तस्य बुद्धौ

से स्थापित किया जाता है तथा अर्थ के स्वरूप में अनुप्रवेशित किया जाता है । इस प्रकार अर्थ से तादात्म्य को प्राप्त वह बुद्धिविषय सूक्ष्मशब्द ही कण्ठ आदि स्थानरूप उद्भवकारणों से श्रोत्रग्राह्य वर्ण आदि ध्वनि के रूप में विवृत्त व उद्भूत होता है, जिसके क्रमरूप के अनुकरण से उपकृत होकर वह वर्णक्रमरूपवाला अभिव्यक्त होता है, तथा जिस अर्थ से उसका तादात्म्य स्थापित है, उसी का वह बोध कराता है, अन्य का नहीं ।

आशय : - शब्द और अर्थ का अनादिकाल से एकरूप में मिलित बुद्धि होने से दोनों का अनादि तादात्म्य है । अपने ज्ञात अर्थ को दूसरों को बोध कराने के लिए जब शब्द की विवक्षा होती है, तब वक्ता जिस अर्थ का बोध कराना चाहता

इत्यध्याहारः अनुगृह्यते = उपक्रियते । ध्वनिगत - घटत्वादिधर्मवानिवाभिलक्ष्यते - अतो नार्थबोधसङ्कर इति भावः । इदमत्र निस्सृतम् - यादृशधर्मवान् ध्वनिः -

---

बुबोधयिषितार्थेनालिङ्गितः श्रुत्यविषयः शब्दः प्रथमं वितर्कितो भवति । ततश्च तं सूक्ष्मं शब्दं बहिः श्रुतिविषयतां नेतुं यतते । 'जानाति, इच्छति, ततो यतते' इत्यस्ति क्रमः । वक्तु र्विवक्षावन्मनसो वेगेन प्रतिघाते प्राणाग्नेः समुद्गतो वायु र्बुद्धिविषयेणार्थालिङ्गितेन तेन सूक्ष्मशब्देन सहैवोर्ध्वं चरन् कण्ठादिस्थानेष्वभिहतः श्रुतिविषयवर्णरूपतां धत्ते ।

यथाह पाणिनीयशिक्षायाम् -

''आत्मा बुद्ध्या समेत्यार्थान् मनो युङ्क्ते विवक्षया ।
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् ॥
सोदीर्णो मूर्ध्न्यभिहतो वक्त्रमापद्य मारुतः ।
वर्णाञ्जनयते................।'' इति ।

है, उस अर्थ से अभिन्नरूप में सम्बद्ध ही शब्द की प्रकल्पना अपनी बुद्धि में करता है । वह बुद्धिस्थ शब्द प्रथमतः विवक्षाकाल में इच्छाशक्ति से संवलित नाद बिन्दु ज्ञानरूप होता है, वह श्रुति का अविषय 'अक्रम' रहता है । वह विवक्षाप्रयत्न से समीरित व समुल्लसित हो कण्ठ आदि नाना स्थानकारणों से जब 'घट पट' आदि अनुक्रम से 'नाना वर्ण व पदरूप' ध्वनि के रूप में उद्भूत होकर श्रुति का विषय होता है, तब ध्वनि के क्रमरूप से वह बुद्धिस्थ सूक्ष्मशब्द भी वर्ण व पद के क्रमरूपवाला प्रतिभासित होता है तथा दोनों का अभेद ज्ञान होने से तादात्म्य प्रतिष्ठित हो जाता है । फलतः विवक्षाकाल में जिस अर्थ से तादात्म्यापन्न शब्द प्रथमतः बुद्धि में प्रकल्पित होता है, वह ध्वनिरूप में विवृत्त होने पर उसी अर्थ से तादात्म्यरूप से सम्बद्ध रहता है । अतः ध्वनिरूप - वर्ण पद तथा उसका अनुहारी बुद्धिस्थ शब्द दोनों ही अभिन्न रूप में उसी अर्थ का बोधक होते हैं, अन्य अर्थ का नहीं । इस प्रकार बुद्धिविषय स्फोट का वैखरी से मूलतः भेद

तादृशधर्मवानिव शब्दोऽभिव्यज्यते, तेन सह यस्यार्थस्य पूर्वं सङ्केतो गृहीतः, तस्यैव बोधो नान्यस्येति दिक् ॥ ४७ ॥

एवं च विवक्षाकाले वक्तु र्बुद्धौ स्थितः शब्दस्तत्तदर्थालिङ्गित एव विवक्षाप्रयत्नेन वैखरीवर्णरूपेण विवर्तते । ततश्च स बुद्धिविषयः सूक्ष्मः शब्दः स्वयमक्रमोऽपि वैखर्या वर्णादिक्रमरूपेण प्रतिबिम्बितः सन् ताद्रूप्येण प्रतिभासमानोऽन्योऽन्यस्मिन्नन्योऽन्यात्मकतां दधानः प्राचीनेन तेनैवार्थविशेषेण तादात्म्यापन्नस्तिष्ठति, इत्यतस्तस्य व्यञ्जिकाया वर्णपदादिस्वरूपाया वैखर्या अपि तस्मिन्नेवार्थे तादात्म्यरूपसंकेतो गृह्यते, नान्यस्मिन् कस्मिंश्चिदर्थे । तत्तदानुपूर्वीमत्याः श्रुतिविषयाया वैखर्या यस्मिन्नर्थे तादात्म्यरूपसङ्केतस्य ग्रहः, तयाऽऽलिङ्गितस्य भिन्नत्वेन प्रतिभासमानस्य स्फोटस्य तस्मिन् तस्मिन्नेवार्थे तादात्म्यरूपसङ्केतग्रहात्तस्य तस्यैवार्थस्य बोधकत्वं, न भिन्नार्थस्येति स्फोटस्याभिन्नत्वेऽपि नार्थसाङ्कर्यमित्यलम् ॥ ४७ ॥

न होने पर भी अपने व्यञ्जक बाह्य ध्वनि के रूपभेद से विभिन्न पदों के रूप में भासमान स्फोट अपने तादात्म्यापन्न नियत अर्थ का ही बोधक होता है । जिस शब्द का जिस अर्थ से मूलतः तादात्म्य प्रतिष्ठित है, वह शब्द उसी अर्थविशेष का बोध कराता है । अन्य शब्द अन्य अर्थ का बोध नहीं करा सकता, क्योंकि घट शब्द का पट आदि अन्य अर्थ में तादात्म्यरूप संकेत नहीं है । संकेतरूप शक्ति का ज्ञान ही अर्थबोध में कारण है ॥ ४७ ॥

नादस्य क्रमजातत्वान्न पूर्वो नापरश्च सः ।
अक्रमः क्रमरूपेण भेदवानिव गृह्यते ॥ ४८ ॥

प्रत्येकार्थप्रकाशिका

नन्वेवं स्फोटो नाना स्यादत आह – 'नादस्ये' ति । नादस्य= ध्वनेः क्रमजातत्वात् = क्रमेणोत्पद्यमानत्वात्, ध्वनिरेव

आनन्दा

घटपटादिशब्देभ्यो विविक्तार्थबोधाय स्फोटस्य नियमतो भिन्नत्वेन भाने तस्य नानात्वापत्तिं परिहरति – 'नादस्य' इति ।

अन्वयः – स न पूर्वः, न च अपरः, अक्रमः नादस्य क्रमजातत्वाद् क्रमरूपेण भेदवान् इव गृह्यते ।

व्याख्या – सः = स्फोटः न पूर्वः = न कुतोऽप्यग्रे, न च = नापि अपरः = पश्चिमः कुतोपि, तस्माद् अक्रमः = पूर्वापरक्रमभेदरहितः, किन्तु नादस्य= वैखर्या वाचः क्रमजातत्वाद् = कण्ठादिस्थानेषु प्रयत्नजनित-वाय्वभिघातक्रमेण जायमानत्वात् क्रमरूपेण = व्यञ्जकध्वनेः पूर्वापरक्रम-भेदस्योपरागेण भेदवान् इव = आरोपितक्रमभेदवान् नानेव गृह्यते = उपलभ्यते । न तु वस्तुतः स नाना, अपितु स्वभावतः सदाऽखण्ड एक एवेत्यर्थः ।

सूर्यमाया

पृथक् विशकलित अर्थ के बोध के लिए स्फोट को नियमतः – 'घट-पट' आदि विभिन्न पदरूप मानने पर उसके नानात्व की आपत्ति होगी? इस आशङ्का का निवारण करते हैं – 'नादस्य' ।

अर्थ : – वह स्फोट स्वतः न पूर्व है – किसी से न आगे है, न अपर है – न किसी से पीछे है । पूर्वापर क्रम से रहित – अक्रम है, किन्तु व्यञ्जक ध्वनि

पौर्वापर्य्यव्यवहारविषय इति यावत्, स च = स्फोटः, न पूर्वः नापरः = पौर्वापर्य्यव्यवहारशून्यः, अतः अक्रमः = क्रमशून्यः क्रमरूपेण = व्यञ्जकध्वनिगततत्तद्धर्मेण भेदवानिव = नाना

विमर्शः - यद्यपि स्फोटः स्वभावतः स्फटिक इव शुद्धः स्वतः पूर्वापरक्रमविहीनोऽखण्ड एक एव, तथापि व्यञ्जकध्वनिरूपरूषितस्यैव तस्य प्रकाश इति नियमाद् व्यञ्जकध्वनेः पूर्वापरक्रमभेदस्योपरागेण स्फोटो नानेव भासते, यथा पीत - लोहित - हरित - पुष्पोपरागेण स्फटिको नानारूपवानिव प्रतिभासते । एवं च नियमेन स्फोटस्य ध्वन्युपाधिकृत - 'घट-पटादि' भिन्नपदरूपेण प्रकाशमानत्वाद् विविक्ततत्तदर्थबोधकत्वम्, स्वतश्च तस्याखण्डत्वमेकत्वमित्युभयमपि सूपपन्नम्, न किमपि विरुद्धम् ।

अत्र 'क्रमजन्मत्वाद्' इति पाठपक्षे - 'क्रमेण जन्म यस्य तत्त्वाद्' इति व्यधिकरणबहुव्रीहिः कल्पनीयः । 'क्रमजातत्वाद्' इति पाठे तु - क्रमेण जातः, तत्त्वाद् इति ''कर्तृकरणे कृतेति'' तृतीयासमास आञ्जस्येनोपपद्यते ।

का क्रम से उद्भव होने के कारण उसके क्रमभेद से आरोपित क्रमभेदवाला वह नानारूप उपलब्ध होता है । वस्तुतः वह सदा एक है ।

आशय : - स्फोट वस्तुतः अपने स्वभाव से एक है, किन्तु व्यञ्जक ध्वनि के क्रमरूप से प्रतिबिम्बित हुए विना शुद्ध रूप में स्फोट का भान नहीं होता, अतः स्फोट सदा ही अपने एकत्व स्वरूप से प्रच्युत न होता हुआ ही ध्वनि के उपधान व संसर्ग से उसके 'वर्ण पद' आदि क्रमभेदों को अपने स्वरूप में ग्रहण कर लेता है, जिससे अक्रम स्फोट क्रमभेदवाला उपलब्ध होता है । पूर्वापर क्रमभेद तो बाह्य ध्वनि का है, जोकि कण्ठ आदि स्थानों में वायु के अभिघात क्रम से क्रमशः उत्पन्न होता है । इस प्रकार स्फोट में उपलभ्यमान भेद ध्वनिकृत औपाधिक है,

इव गृह्यते = उपलभ्यते, वस्तुत एक एव स इति फलितम् । स्फोटस्य वस्तुत एकत्वेऽपि ह्रस्वत्वादिधर्मशून्यत्वेऽपि च व्यञ्जकध्वनिगत-तत्तद्धर्मभेदेन नार्थबोधसङ्कर इति ॥ ४८ ॥

किंचेह वृत्तौ 'तथा ह्यत्यन्तमभिन्नात्मा......वैचित्र्येणोपलभ्यते' इति विवरणाक्षरस्वारस्यं 'गृह्यते' इति पाठकल्पे यथा समुपपद्यते, न तथा 'जायते' इति पाठे । अर्थे तु न कश्चन विशेषः ॥ ४८ ॥

तथा एकत्व स्वाभाविक है । अतः स्फोट के वास्तविक नानात्व की शङ्का निर्मूल है । साथ ही स्फोट का ध्वनि धर्म - वर्ण - पदभेद रूप के उपराग से भिन्न भिन्न अर्थ का वाचकत्व व्यवस्थित है, तथा अपने स्वरूप से एकत्व व अखण्डत्व भी अक्षत है ॥ ४८ ॥

प्रतिबिम्बं यथान्यत्र स्थितं तोयक्रियावशात् ।
तत्प्रवृत्तिमिवान्वेति स धर्मः स्फोटनादयोः ॥ ४९ ॥

प्रत्येकार्थप्रकाशिका

एतदेव दृष्टान्तेन द्रढयति - 'प्रतिबिम्ब' मिति । यथा अन्यत्र = जलादौ स्थितम् = निविष्टं प्रतिबिम्बम् = प्रतिच्छायं

आनन्दा

अक्रमस्य स्फोटस्य ध्वनिधर्मोपरागेण क्रमभेदवत्त्वे दृष्टान्तमाह - 'प्रतिबिम्बम्' इति ।

अन्वयः - यथा अन्यत्र स्थितं प्रतिबिम्बं तोयक्रियावशात् तत्प्रवृत्तिम् इव अन्वेति, स्फोटनादयोः स धर्मः ।

व्याख्या - यथा अन्यत्र = बिम्बाद् भिन्ने उपाधिभूते जले दर्पणे वा स्थितम् = उपसंक्रान्तम् प्रतिबिम्बम् = चन्द्रादेः प्रतिरूपम् तोयक्रियावशात्= उपाधेस्तोयस्य चलनकम्पनादिक्रियाया उपग्रहणनिमित्तात् तत्प्रवृत्तिम् - इव = स्वयं निष्क्रियमपि तोयादीनां चलनकम्पनादिक्रियाम् अन्वेति = अनुहरति, तथा स्फोटनादयोः = स्फोटवैखर्योः स धर्मः = परस्परधर्मोपग्रहण-

---

सूर्यमाया

अक्रम स्फोट में ध्वनि के क्रमभेदग्रहण का प्रतिबिम्ब दृष्टान्त से उपपादन करते हैं - 'प्रतिबिम्बम्' ।

अर्थ : - जैसे चन्द्रबिम्ब से भिन्न जल आदि में स्थित चन्द्रमा का प्रतिबिम्ब जल की कम्पन आदि क्रियात्मक प्रवृत्ति को प्राप्त सा कर लेता है, वैसे ही स्फोट और वैखरीनाद का वह स्वभाव पाया जाता है कि स्फोट ध्वनि के वर्ण आदि क्रमभेद को अपनाकर तादृश क्रमभेदवाला प्रतीत होता है ।

स्वतोऽक्रियमपि तोयक्रियावशात् = जलकम्पाद्युपाधिनिमित्तात् तत्प्रवृत्तिमिव = कम्पादिक्रियामिव, अन्वेति = प्राप्नोति,

---

स्वभावः । स्फोटस्य वाचकत्वस्वभावं वैखरी गृह्णाति, वैखर्याः सक्रमत्वं स्फोटः प्रतिबिम्बरूपेण गृह्णाति ।

विमर्शः - सूर्यचन्द्रादेः प्रतिबिम्बभ्रमो हि जलाद्युपाधिकः । उपाधिधर्मा उपधेये भासन्ते । जले सूर्यचन्द्रादेः प्रतिबिम्बं दृश्यते । तत् प्रतिबिम्बं स्वयं निष्क्रियम् किन्तु जलोपाधिकृतं तत्र चलनकम्पनादिकं समारोप्यते । प्रतिबिम्बे समारोपिता उपाधेर्धर्मा विवेकाग्रहाद् बिम्बे सूर्यचन्द्रादावपि समारोप्यन्ते । तथा च सूर्यः कम्पते - चन्द्रः कम्पते - इत्यादि भवति व्यपदेशः । तदाह - 'वृद्धिह्रासभाक्त्वमन्तर्भावाद्' इति (ब्र॰ सू॰ ३-२-२०)। ब्रह्मसूत्रभाष्ये च - ''जलगतं सूर्यप्रतिबिम्बं जलवृद्धौ वर्धते, जलह्रासे ह्रसति, जलचलने चलति'' इति ।

आशय : - उपाधि का धर्म - 'गुण क्रिया' आदि उपहित में तथा उपहित में भासमान धर्म अनुपहित शुद्ध वस्तु में भी आरोपित होता है । मणि, कृपाण, दर्पण आदि उपाधिभेद से मुख का प्रतिबिंम्ब भिन्न भिन्न तद्रूप दीखता है । जबकि मुख एकरूप भेदरहित है । जल में सूर्य-चन्द्र आदि का प्रतिबिम्ब जल के चाञ्चल्य से चञ्चल दीखता है, जबकि प्रतिबिम्ब में वस्तुतः अपनी कोई क्रिया नहीं है । वैसे ही वैखरी ध्वनि का जो 'वर्ण-पद-वाक्य' क्रमभेद है, उसका प्रतिबिम्ब रूप में अनुसरण कर स्फोट भी क्रमभेदवाला हो जाता है, जबकि स्फोट स्वतः सर्वथा क्रमभेदरहित है । फलतः स्फोट और वैखरी का भेदज्ञान न होने से तादात्म्य हो जाता है, जिससे स्फोट विभिन्न पदरूप होकर विभिन्न अर्थ का वाचक होता है तथा स्फोट का जो अर्थवाचकत्व है, वह वैखरी में भी माना जाता है ।

तथैवेत्यध्याहारः, स्फोटनादयोः स धर्म्मः = स्वभाव इति ॥ ४९ ॥

तथा प्रकृते - दार्ष्टान्तिके स्फोटेऽपि स्वोपाधेर्ध्वने धर्मस्योपग्राहित्व-स्वभावः समानः । तथाहि स्वयमक्रमोऽपि स्फोटो व्यञ्जकध्वनिधर्मं क्रमभेदमनुविधत्ते । स्फोटो हि स्वोपाधेः प्राकृतध्वनेर्धर्मान् क-च-ट-त-पादीन् ह्रस्वदीर्घप्लुतादीन् वर्णभेदान्, तेषां पूर्वापरक्रमभेदेन च पद-वाक्यभेदानुपगृह्णाति, ध्वनिश्च स्फोटे प्रतिबिम्बरूपतां दधत् स्फोटाभेदेन वाचकतां प्रप्नोति, इति स्फोटनादयोः परस्पररूपोपग्रहस्वभावः समानः ॥ ४९ ॥

यहाँ यह ध्यान रहे कि - दृष्टान्त प्रतिबिम्ब और दार्ष्टान्तिक स्फोट में यह अन्तर है कि प्रतिबिम्ब जल आदि उपाधि से कल्पित है, किन्तु स्फोट स्वतः सिद्ध नित्य वस्तु है । हाँ, उसका वर्ण - पदरूप ध्वनि उपाधि से कल्पित है । दृष्टान्त स्वरूप प्रतिबिम्ब और स्फोट का यहाँ इतना ही साम्य है कि दोनों में स्वतः निष्क्रियत्व है तथा उपाधिधर्म का अनुहरण व अनुकरण स्वभाव है ॥ ४९ ॥

आत्मरूपं यथा ज्ञाने ज्ञेयरूपं च दृश्यते ।
अर्थरूपं तथा शब्दे स्वरूपं च प्रकाशते ॥ ५० ॥

प्रत्येकार्थप्रकाशिका

नन्वेवं गवादिशब्दानां सास्नादिमद्व्यक्तिबोधने एव सामर्थ्यञ्चेत् तदा 'गामुच्चारय', ''राज्ञो यत्'' इत्यादौ लोके शास्त्रे च - अर्थे कार्यस्य बाधाद् उक्तवाक्यानाम् अप्रामाण्यं स्यात् । अतः शब्दोऽपि शब्दजन्यबोधे भासते, इति स्वमतं

आनन्दा

''स्वं रूपम्'' इति शास्त्रमालम्ब्य ज्ञानदृष्टान्तेन 'शब्दोऽपि विषयतया शाब्दबोधे भासते' इति स्वसिद्धान्तमुपपादयति - 'आत्मरूपम्' इति ।

अन्वयः - यथा ज्ञाने ज्ञेयरूपम् आत्मरूपं च दृश्यते, तथा शब्दे अर्थरूपम् स्वरूपं च प्रकाशते ।

व्याख्या - यथा ज्ञाने = घटादिप्रत्यक्षे ज्ञेयरूपम् = न्यायनये ज्ञानस्य सविषयत्वनियमाद् विषयं विना दुर्निरूपत्वाच्च ज्ञानविषयस्य घटादेरर्थस्य स्वरूपं कम्बुग्रीवादिमत्त्वादिरूपम्, आत्मरूपम् = विषयिणो ज्ञानस्य स्वीयं रूपम् च उभयमपि दृश्यते = प्रत्यक्षविषयीक्रियते, तथा शब्दे = अर्थतादात्म्यापन्ने वाचके अर्थरूपम् = वाच्यतया प्रसिद्धस्य घटादेरर्थस्य

सूर्यमाया

शब्द से अर्थ के साथ शब्दस्वरूप भी प्रकशित होता है, यह 'ज्ञान' दृष्टान्त द्वारा स्पष्ट करते हैं - 'आत्मरूपम्' ।

अर्थ : - जैसे ज्ञान में अपना स्वरूप और ज्ञेय विषय का स्वरूप प्रकाशित होता है, वैसे शब्द में अर्थ का स्वरूप और अपना 'वर्ण पद' रूप भी प्रकाशित होता है ।

आशय : - स्वयं प्रकाशमान ही ज्ञान विषय को प्रकाशित करता है, अप्रकाश-मान ज्ञान ज्ञेयविषय को प्रकाशित नहीं कर सकता है । स्वप्रकाश होने से ही ज्ञान

दृष्टान्तेन साधयति - 'आत्मे'ति । यथा ज्ञाने = न्यायनयेनानुव्यवसायात्मके, भट्टमतेन प्रत्यक्षात्मकज्ञानसामान्ये, ज्ञेयरूपम्-आत्मरूपं च = भूतभविष्यद्वर्तमानघटादिस्वरूपम् - ज्ञानमपि, दृश्यते= विषयो भवति, अत एव ज्ञानस्य प्रत्यक्षतया 'ज्ञानवान्

निरुक्तस्वरूपम् स्वरूपम् = शब्दस्य स्वकीयं तत्तद्वर्णानुपूर्वीरूपं च, उभयमपि प्रकाशते = शाब्दबोधविषयो भवति । "स्वं रूपम्" इत्यनुशासनम्, 'घट इति शब्दः, घट इत्यर्थः, घटमुच्चारय, घटमानय' इत्याद्यनुभवश्चेह मानम् ।

विमर्शः - न्यायनये हि द्विविधं प्रत्यक्षम् - निर्विकल्पकं सविकल्पकं च । तत्र प्रथमं सामान्यविशेषविभागविवेकशून्यं वस्तुमात्रविषय-मालोचनज्ञानमव्यपदेश्यं निर्विकल्पकम् । तदानीं सामान्यं विशेषो वा नानुभूयते, तयोराधारभूता व्यक्तिरेवानुभूयते । तदुत्तरं ततो जायमानमभि-लापसंसर्गविषययोग्यं व्यपदेश्यमनुव्यवसायात्मकं ज्ञानं सविकल्पकम् ।

बौद्धमते स्वलक्षणं सर्वं प्रत्यक्षं निर्विकल्पकम् । भाट्टमते तु सर्वं प्रत्यक्षं सविकल्पकमेव, 'कल्पनाऽपोढमभ्रान्तम्' इति निर्विकल्पकलक्षणस्या-स्वीकारात् । आस्तां तावत् । जाति-द्रव्य-गुण-क्रिया-नामभिः पञ्चधा विभज्यमानम्- 'गौरयम्, शङ्कुकर्णोऽयम्, शुक्लोऽयम्, गच्छत्ययम्, डित्थोऽयम्'

होने पर ज्ञान के स्वरूप के विषय में कभी किसी को सन्देह नहीं होता कि मुझे ज्ञान है, अथवा नहीं । इसलिए ज्ञान स्वयं स्व का विषय होता है, क्योंकि वह प्रकाशस्वभाव है, वह कदापि अप्रकाशमान नहीं रहता है । तभी तो वह ज्ञान कालान्तर में स्मृतिरूप में परिणत होता है । स्मृतिज्ञान से यह स्पष्ट होता है कि अतीत काल में कभी ज्ञान प्रकाशमान था ।

यह अवश्य है कि विषय के सम्पर्क से ज्ञान व्यवहारयोग्य होता है, अन्यथा वह अभिलाप के अयोग्य - अनिर्देश्य रहता है ।

ज्ञान के समान ही शब्द भी जब अर्थ का प्रकाशन करता है, तब अर्थ के साथ अपने 'वर्ण पद आदि' स्वरूप को भी प्रकाशित करता है, अपने स्वरूप को प्रकाशित किये विना कभी अर्थ को प्रकाशित नहीं करता है, क्योंकि

न वे' ति सन्देहो न जायते, तथा = एवमेव शब्दे अर्थरूपम् = सास्नादिमदादि - व्यक्तिः, स्वरूपं च = 'ग्-औः' इत्याद्यानुपूर्वी, प्रकाशते = उभयं शब्दजन्यबोधविषयो भवतीति फलितम् । इदमत्र बोध्यम् - शब्दानां शब्दे अर्थे च खण्डशः

इत्याकारकं सविकल्पकं ज्ञानं बौद्धं विहाय सर्वैरेव मन्यते । तस्य शब्दविषयकत्वे न कस्यचिद् विमतिः ।

किन्तु प्रथममनिर्देश्यं निर्विकल्पकं यदि सर्वथा शब्दानालिङ्गितं, तर्हि 'घटः, पटः' इत्यनयोः प्रथमं जायमानयो र्व्यवसायात्मकज्ञानयो वैलक्षण्ये को हेतुः? । विषयभेद एव हि ज्ञानभेदनियामकः । स च विषयभेदः प्रवृत्तिनिमित्त-तदाश्रयभेदकृतः, स तु विवेकः संमुग्धवस्तुमात्रविषये प्राथमिके ज्ञाने नेष्यते, तदा व्यवसायभेदविनिगमे हेतु र्वस्तुनो वाचकशब्दरूपतां विहाय कोऽन्यो भवितुमर्हति क्षमः ? अथ वस्तुभेदे घटपटादेराकृतिभेदो विनिगमकस्तर्हि तत्रेदं प्रष्टव्यं यद् यावन्नामभेदो न गृह्यते, तावद् 'भिन्नाकृतिर्घटः, भिन्नाकृतिश्च पटः' इति कथं निश्चीयते ? कम्बुकण्ठो घट इति, तन्तुसमवायश्च पट इति व्यक्तिभेदो ज्ञानभेदहेतुरित्युच्यते, तर्हि समायातं यद् भिन्नानुपूर्वीकौ घट-पटशब्दौ तयोराकृतिभेदनियामकौ - कम्बुकण्ठाकृति र्घटः, तन्तुसमवायाकृतिः पट इति । घट इति, पट इति भेदेन व्यपदेशो नामभेद एव हेतुः । नो चेत् 'घटो न पटः, पटो न घटः इति विवेकः किंकृतः स्यात् ? नामभेदं विना वनस्पतिविशेषानभिज्ञेन दृश्यमानं

शब्दस्वरूप से आलिङ्गित अर्थ तथा अर्थ से आलिङ्गित ही शब्द है, परस्पर दोनों का तादात्म्य है । फलतः शब्द का अभिधेय जहाँ जाति व्यक्ति आदि होते हैं, वहाँ स्वयं शब्द भी शब्द का अभिधेय होता है । अत एव शब्द भी शाब्दबोध का विषय होता है । शब्द, अर्थ दोनों समानरूप में शब्द से प्रकाशित होते हैं । हाँ, उनका विशेष्य-विशेषणभाव प्रकरणानुसार विवक्षा के अधीन होता है ।

लोकव्यवहार में शब्द का आनयन आदि कार्य बाधित होने से सास्नादिमान् व्यक्तिरूप गोशब्दार्थ विशेष्य होता है, शब्द किसी भिन्नव्यक्ति के व्यावर्तक के रूप में विशेषण होता है, किन्तु व्याकरणशास्त्र में ''गोपयसोर्यत्'' इत्यादि सूत्रों

शक्तिः । अत उभयो र्विशेष्यविशेषणभावस्य स्वेच्छानुसारित्वात् क्वचिदर्थो विशेष्यः शब्दो विशेषणम्, क्वचिद् शब्दो विशेष्यः अर्थो विशेषणम् । तथा च यत्रार्थे कार्य्यस्य सम्भवस्तत्र स एव विशेष्यः - यथा 'गामानय' । यत्र च बाधस्तत्र शब्द एव विशेष्यः - यथास्मद्व्याकरणसूत्रादौ, इति ॥ ५० ॥

श्यामायमानं सर्वं निर्विशेषं स्यात् । पश्यन्नपि पुरो जनं तन्नामाज्ञाने न जानामीत्यपरिचितो जनो ब्रूते । एवं चाभिधानभेदहेतुक एव वस्तुस्वरूपविवेको व्यवसायज्ञानभेदेऽपि नियामक इति ज्ञानमात्रस्य शब्दविषयत्वं पर्यवस्यति । तदेतद् वक्ष्यते - 'न सोऽस्ति प्रत्ययो लोके' इति । तस्मान्निर्विकल्पेऽपि प्रत्यये वस्तुस्वरूपतयाऽनुप्रविष्ट एव शब्दः ।

इयांस्तु विशेषो यत्तत्र शब्दार्थयो र्नास्ति भेदग्रहः, शब्दस्तदानीं वस्तुस्वरूपे प्रविष्टः । सविकल्पके तु वाच्यस्वरूपात् पृथक् वाचकतया भासते शब्द इत्यलं पल्लवितेन ॥ ५० ॥

से गो व्यक्ति तथा दुग्ध आदि अर्थ से यत् प्रत्यय का विधान असम्भव होने से ''स्वं रूपं शब्दस्याशब्दसंज्ञा'' इस अनुशासन के अनुसार संज्ञाविधि से भिन्न 'प्रत्यय आदेश आदि' विधि के विषय में शब्द विशेष्य होता है तथा अर्थ शब्द का विशेषण होता है । अतः यथासम्भव अर्थविशिष्ट शब्द से ही प्रत्यय आदि का विधान होता है, अनर्थक से नहीं ॥ ५० ॥

अण्डभावमिवापन्नो यः क्रतुः शब्दसंज्ञकः ।
वृत्तिस्तस्य क्रियारूपा भागशो भजते क्रमम् ॥ ५१ ॥

प्रत्येकार्थप्रकाशिका

स्फोटनादयोर्भेदं प्रकारान्तरेणाह - "अण्डभाव" मिति । यः शब्दसंज्ञकः = शब्दः संज्ञा यस्य सः शब्दाख्य इत्यर्थः,

---

आनन्दा

"द्वावुपादानशब्देषु" इत्यत्र पुरा द्विविधः शब्दः - 'आन्तरो व्यङ्ग्यः, बाह्यश्च व्यञ्जकः' प्रोक्तः, तयो र्निमित्तनिमित्तिभावश्चोपपादितः । तमेवार्थमिह 'अण्ड'दृष्टान्तेन प्रकाशयति - 'अण्डभावम्' इति ।

अन्वयः - यः शब्दसंज्ञकः क्रतुः अण्डभावम् इव आपन्नः, तस्य क्रियारूपा वृत्तिः भागशः क्रमम् भजते ।

व्याख्या - यः = पूर्वप्रकृतः शब्दसंज्ञकः = शब्दनामकः क्रतुः = अवयवविभागमतिक्रान्तो - 'यज्ञक्रमरूपप्रवर्तकारणिकाष्ठान्तर्निहिताग्निरिव क्रतुपदवाच्य' आन्तरः स्वयंज्योतिर्ब्रह्म, अण्डभावम् = मयूरादेरण्डरसवत् निर्विभागम् - 'वक्तुर्हृदये विवक्षासंकल्परूपेणावयवग्रहणयोग्यस्वरूपम् इव'

सूर्यमाया

पक्षियों के अण्ड दृष्टान्त से शब्द का 'अवयव विभागरहित - अक्रम, तथा अवयवविभागसहित - सक्रम' द्विविधस्वरूप स्पष्ट करते हैं - 'अण्डभावम्' इत्यादि ।

अर्थ : - शब्दनामक ज्ञानरूप ब्रह्म विवक्षा से अण्डे के समान निरवयव बीज-रूप को पाकर वक्ता के हृदय में अवस्थित होता है, उसका वर्ण आदि अवयव-ग्रहण-क्रियारूप विवर्त प्रत्येक वर्णों के विभाग क्रम से पद-वाक्यरूप क्रम को प्राप्त करता है ।

क्रतुः = ब्रह्म अण्डभावम् इव आपन्नः = अवयवविभागमतिक्रम्य स्थितः, तस्य क्रियारूपा वृत्तिः = विवर्तः भागशः = अवयवशः क्रमम् = पौर्वापर्य्यं भजते = आश्रयते ।

आपन्नः= प्राप्तः, तस्य = निर्विभागस्याक्रमस्यान्तरस्य शब्दब्रह्मणः क्रियारूपा= कण्ठादिस्थानाभिहतवायुपरिणाम-'नाद'धर्मवर्णादिरूपग्रहणात्मिका वृत्तिः = विवर्तः भागशः = वर्णाद्यवयवविभागप्रतिभासतः क्रमम् = पदवाक्यरूपं पूर्वापरभावं भजते = आधत्ते । आन्तरः शब्दः स्फोटः स्वतोऽक्रमोऽपि व्यञ्जकनादधर्मेण क्रमवानिव भासते इत्यर्थः ।

विमर्शः - यथा पक्षिणामण्डोऽवयवविभागरहितोऽवयवग्रहणशक्तिमान् कालपरिपाकवशात् समुद्भिन्नः समुपलब्धावयवविशेषक्रमः समुद्भवति, तथा हृदयेऽवयवविभागरहितः क्रतुपदवाच्यो ब्रह्मस्वरूपः शब्दो विवक्षया सङ्कल्पात्मना बिन्दुरूपतामापन्नो वर्णपदादिरूपावयवग्रहणशक्तिमान् विवक्षाप्रयत्नवशाद् नादधर्मेण वर्णपदादिना क्रमवान् बहिः परिस्फुरति ।

इदन्त्ववधेयम् - इह आन्तरस्याक्रमस्य शब्दस्य बाह्यक्रमरूपग्रहणमात्रेऽयमण्डो दृष्टान्तो न सर्वांशे । अण्डः परिणामित्वादनित्यः स्फोटस्तु नित्यः । तदेवं वक्तुर्हृदयेऽर्थज्ञानरूपोऽक्रमः शब्दः परबोधनाय विवक्षया वर्णादिक्रमरूपं प्रतिगृह्णातीत्येतन्मात्रमण्डदृष्टान्तेन बोध्यते ।

आशय : - मयूर आदि पक्षियों का अण्डा अवयवविभाग से रहित रसरूप होता है, उसमें अवयवों के ग्रहण की शक्तिमात्र रहती है, वही पश्चात् काल के परिपाक से मुख चरण पङ्ख आदि प्रत्येक अवयवों को ग्रहणकर अवयवक्रम से सम्पन्न - 'अवयवी' पक्षी के रूप में प्रस्फुटित होता है, ऐसे ही अवयवविभाग से रहित - ज्ञानरूप शब्द वक्ता के हृदय में विवक्षाकाल में केवल संकल्परूप में अवस्थित रहता है, उसमें केवल वर्ण आदि अवयवविभाग ग्रहण की योग्यता रहती है । वह पश्चात् वक्ता के विवक्षा प्रयत्न से समीरित वायु के कण्ठ आदि स्थानों में अभिघात से परिणत 'वैखरी' ध्वनि के रूप में वर्ण-पद आदि विभाग

अयमाशयः - यथा पक्षिणामण्डः पूर्वमवयवादिविहीन एकरूपेण स्थितो दृश्यते, स एव पश्चाद् उद्भिन्नः अवयवादिमान् लोके दृश्यते, तथैव शब्दब्रह्म हृदयस्थः अवयवादिशून्यः 'स्फोट'

अत्र प्रकरणबलात् क्रतुपदार्थः शब्दब्रह्मैव । यथा - ईशावास्ये बृहदारण्यके च "ओं क्रतो स्मर कृतं स्मर" इति मन्त्रे क्रतुपदम् - आत्मनः संकल्पभूतां मनसि व्यवस्थिताम् 'अग्निदेवताम्' प्राह, तथेहापि क्रतुपदं वक्तुर्हृदये संकल्पात्मना स्थितं शब्दब्रह्म-स्फोटमाह ।

छान्दोग्येऽपि "यथा क्रतुरस्मिंल्लोके पुरुषो भवति तथेतः प्रेत्य भवति" इति मन्त्रे क्रतुशब्दः संकल्पाध्यवसायमाह । शाङ्करभाष्ये हि - 'क्रतु-र्निश्चयोऽध्यवसाय' इति व्याख्यातम् । एवमिह क्रतुपदेन वक्तुर्हृदये संकल्पबीजज्ञानरूपेणावस्थितस्य शब्दब्रह्मणो निर्देशो बोध्यः । क्रियते = स्वस्वरूपे तादात्म्येनाध्यारोप्यते 'अर्थो' येन स क्रतुः - निष्क्रमः शब्दसंज्ञकः शब्दब्रह्मैव नान्यः, 'प्रक्रिया जगतो यतः' इति प्रतिज्ञातत्वात् । इदं तु बोध्यम् - वक्तुर्हृदये स्थितोऽक्रमः शब्दो बहिर्वर्णपदादिक्रमरूपेण विवर्तते । स च व्यावहारिकः सक्रमः शब्दः श्रुतः सन् स्वकीयं वर्णपदादिक्रमविभागं संहृत्य श्रोतुर्हृदये प्रलीनः पुनरक्रमो भवति । तदित्थं श्रोतृवक्तृप्रणाल्या सक्रमाक्रमयो र्बाह्यान्तरयोः शब्दयोराविर्भावतिरोभावाभ्यां परस्परं निमित्तनिमित्तिभावः पर्यवस्यति । वस्तुतस्तु - निर्विभागोऽक्रमः

एवं क्रमरूप को ग्रहण कर रूपान्तर में विवृत्त प्रकट होता है । फलतः वह आन्तर शब्द बाह्य वैखरी के वर्ण-पद क्रम रूप में अभिव्यक्त हो घट-पट आदि तत् तत् अर्थों के तादात्म्य से उनका वाचक-स्फोटसंज्ञक होता है ।

सारांश में - श्रोता अथवा वक्ता के हृदय देश में संकल्पात्मक क्रतुरूप शब्द-अण्डरस के समान अवयवविभाग ग्रहण के योग्य-वस्तुतः स्वयं निरवयव-क्रमरहित तत्तद् अर्थों से तादात्म्यापन्न वाचकशब्द स्फोट है । उसका

इति, स च यदा वाय्वाद्यभिहतः ताल्वादिना विवर्तते, तदा अवयववान् पौर्वापर्य्यक्रमवांश्च 'नाद' इति कथ्यते। परं च दृष्टान्तस्थले - अण्डोऽनित्यः, दार्ष्टान्तिके तु नित्य इति बोध्यम् ॥ ५१ ॥

~✡~

पारमार्थिको निमित्तं व्यावहारिकस्य सक्रमस्य । अक्रमस्य वास्तविकत्वं सक्रमस्य तु कल्पितत्वं बोधयितुमिह वृत्तिपदं विवर्तपरमुपन्यस्तम् । तेन निर्विभागस्याखण्डस्य शब्दस्य वर्णपदादिविभागोपग्रहणक्रियाया विवर्त-रूपत्वस्य स्पष्टोक्त्या कल्पितत्वं सिद्ध्यति । तदर्थमिह 'क्रियाभूता' इति पाठान्तरं प्रकल्प्य - 'भूत' शब्दस्य 'पितृभूतो देवदत्त' इत्यादिदृष्टान्तेन तुल्यार्थकत्वकल्पनमनावश्यकम् ॥ ५१ ॥

~✡~

विवर्त है - असत्य अवयवविभागवाला वायु का परिणाम-सक्रम नादरूप शब्द, जो कि श्रोत्र का विषय बाह्य 'वैखरी' ध्वनिरूप है । यह स्फोट और नाद का स्वरूपभेद है । स्फोट व्यङ्ग्य है तथा उसका व्यञ्जक है - वैखरीनाद । वैखरी के क्रमरूप से प्रतिबिम्बित ही स्फोट का भान होता है ।

यहाँ यह ध्येय है कि दृष्टान्त अण्ड परिणामी अनित्य है, किन्तु दार्ष्टान्तिक-आन्तर शब्द स्फोट अपरिणामी नित्य है । निरवयव अक्रम स्वरूप का सावयव सक्रम रूप के ग्रहणमात्र साम्य से यहाँ अण्ड दृष्टान्त है, सर्वांश में नहीं । अण्ड का पक्षी परिणामरूप कार्य है, स्फोट का नाद तो विवर्त है - अतात्त्विक रूपान्तर है । स्फोट का व्यञ्जक नाद तो वायु का परिणाम है ॥ ५१ ॥

~✡~

यथैकबुद्धिविषया मूर्तिराक्रियते पटे ।
मूर्त्यन्तरस्य त्रितयमेवं शब्देऽपि दृश्यते ॥ ५२ ॥

प्रत्येकार्थप्रकाशिका

शब्दोऽपि शब्देन गृह्यते, इत्यत्र दृष्टान्तपूर्वकं युक्त्यन्तरमाह- 'यथे' ति । यथा मूर्त्यन्तरस्य = पुरुषान्तरस्य मूर्तिः = चित्रम् पटे = वस्त्रकुड्यादिषु एकबुद्धिविषया = एकज्ञानग्राह्या आक्रियते=

आनन्दा

शब्दस्य पूर्वमक्रमस्य क्रमरूपग्रहणं प्रदर्श्येदानीं सक्रमस्य क्रमरूपोपसंहारेणाक्रमरूपग्रहणं, ग्राह्यत्वं ग्राहकत्वं च चित्रदृष्टान्तेनाह - 'यथैक' इति । **अन्वयः** - यथा मूर्त्यन्तरस्य मूर्तिः पटे एकबुद्धिविषया आक्रियते, एवम् त्रितयं शब्दे अपि दृश्यते ।

व्याख्या - यथा = येन प्रकारेण मूर्त्यन्तरस्य = चित्राद् चित्राधारपटकुड्यादेर्वा भिन्नस्य रामकृष्णादेः मूर्तिः = प्रतिरूपम् पटे = वस्त्रे काष्ठफलकादौ वा आधारे एकबुद्धिविषया = भेदबुद्धेरुपसंहारेण संकलय्य रामचित्रेत्येकज्ञानविषया आक्रियते = करचरणनयनाद्याकारक्रमेण विरच्यते, एवम् त्रितयम् = 'सक्रम-अक्रम-सक्रम' इत्यवस्थात्रयम् शब्दे = शब्दस्वरूपे अपि दृश्यते = श्रोतृवक्तृभिर्गृह्यते ।

सूर्यमाया

पूर्वकारिका में अण्डदृष्टान्त से अक्रमशब्द का सक्रम तथा अक्रम स्वरूपग्रहण बताकर अब यहाँ चित्रदृष्टान्त से सक्रमशब्द का अक्रम तथा सक्रमस्वरूपग्रहण एवं ग्राह्यत्व और ग्राहकत्व - उभयस्वरूप स्पष्ट करते हैं - 'यथैक' इत्यादि ।

अर्थ - जैसे चित्र तथा चित्रसामग्री - 'पट, रङ्ग, आदि' से भिन्न किसी पुरुष आदि के अवयवक्रम से देखे गये स्वरूप का संकलित एक ज्ञान कर वस्त्र अथवा दीवार आदि पर क्रम से चित्र बनाया जाता है तथा दर्शक उसको प्रत्येक अवयव क्रम से देखता हुआ भी एक चित्र के रूप में देखता है, ऐसे ही सक्रम शब्द का भेदरहित एक ज्ञान तथा भेदरहित अक्रम का 'सक्रम' ज्ञान, ये तीनों स्वरूप शब्द में भी देखे जाते हैं ।

आकारः प्राप्यते । अयम्भावः - 'पुरुषः १, पटः २, मूर्तिः ३', इति पृथक् पृथक् क्रमेण गृहीतमपि चित्रस्थले त्रितयम् एकवारेणैव ज्ञायते, एवम् = तथैव त्रितयं शब्देऽपि दृश्यते ।

विमर्श : - चित्रकारो यदा चित्रमाचिकीर्षति, तदा स चित्रणीयं रामकृष्णादिं चित्राधारपटादिं चित्रणसामग्रीं रङ्गादिकं सर्वं चित्राद् भिन्नं गृह्णाति । तत एतादृशाकारवर्णं रामचित्रं निर्मातव्यमिति सकलं संकलय्य रामेत्येकबुद्धिविषयं चित्रं पटादौ क्वचनाधारफलके तत्तदवयवक्रमेण राम-कृष्णादेर्महापुरुषस्य प्रतिकृतिं रचयति । पूर्णाकारतां प्राप्तं तच्चित्रं चित्रसामग्र्याः पुरुषादेश्चित्रस्य च भेदबुद्धिमुपसंहृत्य रामेति कृष्णेत्येकबुद्धिविषयत्वमापद्यते । चित्रदर्शकोऽपि तत्तदवयवभेदक्रमेण चित्रं पश्यन् सकलं संकलय्य रामेति कृष्णेत्येक-बुद्धिविषयमभिजानाति । तदेवं प्रथमं क्रमभेदबुद्धिः, तत उपसंहृतक्रमभेदबुद्धिः, ततश्च पुनः सक्रमबुद्धिरित्येतत्त्रितयमवस्थाभेदेन चित्रे यथा दृश्यते, तथा शब्देऽप्यवस्थात्रयं गृह्यते । श्रोता प्रथमं बाह्यं वैखरीशब्दं वर्णपदादिभेदवन्तं

आशय - चित्रकार जब किसी का चित्र बनाता है, तब वह पहले उसके प्रत्येक अवयवों को क्रम से देख लेता है, इसके पश्चात् उसके समस्त आकार प्रकार को अपनी बुद्धि में एकरूप में संकलन कर किसी वस्त्र आदि आधार-फलक पर उसके सभी आकारों प्रकारों को क्रम से चित्रित करता है । अर्थात् चित्र के आलेखन में पहला चित्रणीय पुरुष आदि का अवयव क्रम से ज्ञान, दूसरा बुद्धि-पटल में समस्त आकार प्रकारों का संकलित एक ज्ञान, तीसरा अवयवक्रम से चित्र का आलेखन ये तीन विधाएँ पाई जाती हैं। इसके अतिरिक्त यह भी ज्ञान रहता है कि - चित्र से भिन्न यह आलेख्य पुरुष आदि वस्तु है, यह चित्रालेखन का आधार-फलक है, यह आलेखन-सामग्री रङ्ग आदि है, ऐसा सबका आलेख्य चित्र से भेदज्ञान रहता है । अवयवक्रम से लिखे जाने पर जब चित्र पूर्ण बन जाता है, तो उन सबका भेदज्ञान मिटाकर चित्ररूप में सब एक ज्ञान व व्यवहार का विषय हो जाते हैं कि - यह राम है, वा कृष्ण है । चित्र का दर्शक समाज भी चित्र को अवयवभेद क्रम से देखता हुआ एक चित्र के रूप में समस्त आकार प्रकार का संकलित ज्ञान करता है ।

अयमाशयः - वैखरीरूपशब्दः 'घ् अ ट् अ' इत्यादि-क्रमेण ज्ञातोऽपि प्रतिसंहृतक्रमध्वनिः एकबुद्धिविषयो भवति, ततश्च - अन्तःकरणे क्रमशून्यश्च स्फोटो ज्ञायते, इत्यवस्था-भेदात् स एव ग्राह्यः स एव ग्राहकोऽपीति विचार्य्यताम् ॥ ५२ ॥

सक्रमं गृह्णाति, तत उपसंहृतक्रमभेदमेकबुद्धिविषयमान्तरं गृह्णाति, ततश्च परबोधनाय विवक्षयोपसंगृहीतवर्णपदादिभेदं सक्रमं गृह्णाति ।

स चोपसंगृहीतक्रमभेदो भिन्नत्वेन प्रतिभासमानः शब्दः श्रोत्रग्राह्यः सन् शक्त्या तं तमर्थं ग्राहयतीति शब्दस्य प्रकाशवद् ग्राह्यत्वं ग्राहकत्वं चोभयं व्यवस्थितमित्यग्रे वक्ष्यते - 'ग्राह्यत्वं ग्राहकत्वं चे' त्यादिना । शब्दोऽर्थं बोधयन् स्वस्वरूपमपि बोधयतीति यावत् ॥ ५२ ॥

निष्कर्ष में - प्रथम सक्रम, द्वितीय अक्रम, तृतीय पुनः सक्रम, ये तीन स्वरूप जैसे चित्र में पाये जाते हैं, ऐसे ही शब्द में भी अवस्थाभेद से त्रिविध स्वरूप पाये जाते हैं । उच्चारित 'घट' आदि वैखरी शब्द प्रथम - 'घ् अ ट् अ' इस उच्चारणक्रम से सुना जाता है, पश्चात् वह सक्रमशब्द श्रोता की बुद्धि में क्रमरूप का उपसंहार कर एक पद-वाक्यस्वरूप स्फोट रूप में अभिव्यक्त हो 'अक्रम'-एक बुद्धि का विषय होता है तथा अर्थ का बोधक होता है । वह अक्रमशब्द पुनः विवक्षाप्रयत्नों से स्थान करणों के अभिघात क्रम से वैखरी ध्वनिरूप को प्राप्त कर वर्ण-पद-क्रमवाला हो जाता है । इस प्रकार वक्ता और श्रोता की स्थिति भेद से अक्रम आन्तरशब्द सक्रमरूप को तथा सक्रम बाह्यशब्द अक्रम रूप को प्राप्त करता है । उभयविध शब्द का ग्राह्य-ग्राहक-भाव एवं प्रकाश्यप्रकाशकभाव व्यवस्थित है । प्रकारान्तर से शब्द स्वयं ग्राह्य होता है तथा ग्राहक भी । वह अर्थ के बोध के साथ अपने स्वरूप का भी बोध कराता है ॥ ५२ ॥

यथा प्रयोक्तुः प्राग्बुद्धिः शब्देष्वेव प्रवर्तते ।
व्यवसायो ग्रहीतॄणामेवं तेष्वेव जायते ॥ ५३ ॥

प्रत्येकार्थप्रकाशिका

(यथेति) यथा प्रयोक्तुः = प्रयोगकर्तुः प्राक् = प्रथमं शब्देष्वेव = शब्दविषयिकैव बुद्धिः = ज्ञानं प्रवर्तते = जायते, यस्य शब्दस्य येनार्थेन तादात्म्यसम्बन्धस्तस्यैवोच्चारणे तस्यार्थस्य

आनन्दा

शब्दः स्वस्वरूपं बोधयन्नेवार्थं बोधयतीति शब्दादर्थबोधे स्वस्वरूपबोधस्य प्राथम्यं युक्तिबलादुपपादयति - 'यथा' इति ।

अन्वयः - यथा प्रयोक्तुः बुद्धिः प्राक् शब्देषु एव प्रवर्तते, एवम् ग्रहीतॄणाम व्यवसायः तेषु एव जायते ।

व्याख्या - यथा प्रयोक्तुः = अर्थबोधनेच्छया शब्दं प्रयोक्ष्यमाणस्य वक्तुः बुद्धिः = मतिः प्राक् = उच्चारणात् पूर्वम् शब्देषु = विवक्षितार्थसम्बद्ध-शब्दविशेषविषया एव प्रवर्तते = भवति । एवम् = वक्तुरिव ग्रहीतॄणाम् = बोद्धॄणाम् व्यवसायः = प्राथमिकबोधः तेषु = बुभुत्सितार्थसम्बद्धशब्द-विशेषविषय एव जायते, नैवाजिज्ञासितार्थबोधकशब्दविषयः, नाप्यर्थविषयः-शब्दाधीनत्वादर्थबोधस्य । अतो वक्ता बोद्धा वा प्राथमिकशब्दभावनाबलाद् शब्दविशिष्टमेवार्थं जानाति, न शब्दविकलम् ।

सूर्यमाया

शब्द का प्रयोग अथवा अर्थ का ज्ञान करने से पहले शब्द के ज्ञान की प्राथमिकता सिद्ध करते हैं - 'यथा' इत्यादि ।

अर्थ : - जैसे शब्द का प्रयोग करनेवाले - वक्ता की बुद्धि शब्द के प्रयोग से पहले शब्दों के एक नियतस्वरूप-विषयक होती है, ऐसे ही श्रोताओं की बुद्धि भी अर्थज्ञान से पहले शब्द के सम्यक् स्वरूपविषयक ही होती है । अर्थात् सर्वप्रथम शब्द ज्ञान का विषय होता है; इसके बाद अर्थ ।

बोधो भवतीत्यतोऽर्थबोधनेच्छया प्रथमं शब्दं जानन्ति, अनन्तरमुच्चारयन्तीति भावः ।

एवं ग्रहीतॄणाम् = श्रोतॄणां व्यवसायः = ज्ञानं तेष्वेव = शब्देषु एव जायते ।

विमर्शः - अविवक्षितार्थप्रतिपत्ति-विवक्षितार्थाप्रतिपत्तिदोषनिरासाय वक्ता यथा शब्दप्रयोगात् पूर्वं शब्दान्तराद् व्यवच्छिन्नं विवक्षितार्थसम्बद्धं शब्दस्वरूपं स्वबुद्धौ संकलय्य तदनन्तरमेव शब्दविशेषोच्चारणे प्रयत्नं करोति, येन सम्यगुच्चारितः शब्द इष्टार्थमेव प्रतिपादयति नानिष्टार्थम्, तथा श्रोतापि स्वबुद्धौ शब्दान्तराद् व्यवच्छिन्नं बुभुत्सितार्थसम्बद्धं शब्दस्वरूपं गृहीत्वैव

आशय - ज्ञात शब्द ही अर्थ का बोधक होता है, अज्ञात नहीं, कदाचित् मन की अनवधानता से श्रोता सुनकर भी शब्द को भलीभाँति नहीं जान पाता, तो वह पूछकर शब्द को स्पष्ट जानने का प्रयास करता है । अतः विज्ञ वक्ता दूसरों को सम्यक् अर्थ का ज्ञान कराने के लिए शब्द के प्रयोग से पूर्व अपनी बुद्धि में वक्तव्य अर्थ के वाचक शब्द का भिन्नार्थक शब्द से व्यावृत्त स्वरूप की स्पष्ट अवधारणा कर लेता है, तत्पश्चात् ही शब्दविशेष का प्रयोग करता है, जिससे विवक्षित अर्थ का ही प्रकाशन हो, अन्य किसी अर्थ का नहीं ।

वक्ता के समान श्रोता भी श्रुत शब्द के सम्यक् स्वरूप को अपनी बुद्धि में भलीभाँति आकलन कर अवधारणा कर लेता है, तत्पश्चात् अर्थ का बोध करता है ।

निष्कर्ष में - वक्ता और श्रोता दोनों को सर्वप्रथम शब्द का सम्यक् स्वरूप बुद्धि-विषय होने पर ही शब्दप्रयोग तथा अर्थबोध होता है । इसका फलितार्थ यह है कि - शब्द सर्वप्रथम अपने स्वरूप को प्रकाशित करके पश्चात् अर्थ को प्रकाशित करता है । अर्थात् शब्द से शब्दविशिष्ट अर्थ का बोध होता है ।

यहाँ यह अवश्य अवधेय है कि - शब्द प्राथमिक प्रतीति का विषय होने पर भी लोकव्यवहार में शब्द का प्राधान्य नहीं होता है । वहाँ वह अर्थ के बोध

अयमाशयः - शब्दाधीन एवार्थबोधः, अत उच्चारयितु-र्बोद्धुश्चोभयोः शब्दभावनाप्राबल्यात् शब्दविशिष्टमेवार्थं जानाति, किन्तु क्वचित् शब्दः विशेषणं क्वचिद् विशेष्य-इत्यत्र पूर्वोक्तयुक्तिरनुसरणीया इति ॥ ५३ ॥

तदर्थविशेषं जानाति । एवं च वक्तुः श्रोतुश्च शब्द एव प्रथमं भवति बुद्धिविषयस्तदनन्तरमर्थ इति शब्दस्वरूपबोधपूर्वकत्वमर्थावबोधस्य स्पष्टम् । शब्दोऽर्थश्च शब्दजन्यबोधविषय इति फलितार्थः । तत्र लोकेऽर्थो विशेष्यः, शब्दे कार्यस्यानन्वयात्, व्याकरणशास्त्रे तु शब्दो विशेष्यः, अर्थे कार्यस्य बाधादिति विवेकः ॥ ५३ ॥

में सहायक मात्र रहकर अर्थ के विशेषण रूप में अर्थ में अनुगत रहता है । क्योंकि सभी क्रियाकलाप तो व्यक्तिरूप - अर्थविशेष में ही सम्भव है, शब्द में नहीं । किन्तु व्याकरणशास्त्र में विधेय - 'प्रत्यय-आगम-आदेश' आदि कार्य शब्द से ही सम्भव होने से शब्द का प्राधान्य होता है । फलतः अर्थ शब्द का विशेषण हो जाता है । अतः यथासम्भव अर्थविशिष्ट शब्द से प्रत्यय आदि कार्य होते हैं ॥ ५३ ॥

अर्थोपसर्जनीभूतानभिधेयेषु केषुचित् ।
चरितार्थान् परार्थत्वान्न लोकः प्रतिपद्यते ॥ ५४ ॥

प्रत्येकार्थप्रकाशिका

ननु शब्दस्यापि प्रातिपदिकार्थत्वे 'गामानये' त्यादौ अर्थस्य यथा क्रियान्वयस्तथा शब्दस्यापि स्यादत आह - 'अर्थोपसर्जनी'ति । अभिधेयेषु = वाच्येषु केषुचित् मध्ये अर्थोपसर्जनीभूतान् = विशेषणीभूतान् अत एव चरितार्थान् = इतरव्यावर्तकतया सफलान् परार्थत्वात् = विशेष्योपकारकत्वात्

आनन्दा

उक्तयुक्त्या शब्दस्य शाब्दबोधविषयत्वेन प्रातिपदिकार्थत्वे सति तस्य गवादिव्यक्तिवत् सर्वत्र वाक्यार्थक्रियायामन्वयप्रसङ्गं परिहरति - 'अर्थोपसर्जनीभूतान्' इति ।

अन्वयः - अभिधेयेषु केषुचित् अर्थोपसर्जनीभूतान् चरितार्थान् परार्थत्वात् लोकः न प्रतिपद्यते ।

व्याख्या - अभिधेयेषु = शक्येषु जात्यादिषु केषुचित् मध्ये अर्थोपसर्जनीभूतान्= अर्थस्य विशेष्यतयोपस्थितस्य गवादिव्यक्तेः प्रकारतयोपस्थितान् अत एव चरितार्थान् = अश्वादिव्यावृत्त-गोत्वादिसमनुगतबुद्धिजनकतया कृतार्थान्

सूर्यमाया

व्यक्ति आदि के साथ स्वयं शब्द, शब्द का अर्थ माने जाने पर भी व्यक्ति के समान शब्द का लोक में क्रियान्वय न होने में हेतु बताते हैं - 'अर्थोपसर्जनी' इत्यादि ।

अर्थ : - शब्द के वाच्य - अनेक अर्थों में व्यक्ति रूप किसी मुख्य अर्थ को उपस्थित करके सफल, अत एवं उसमें विशेषण एवं गुणीभूत शब्दों को अर्थपरक होने से अर्थात् अन्य का बोधक होने से जनसमुदाय उनको अपने रूप में क्रिया के साथ अन्वय व्यवहार नहीं मानता है ।

आशय : - व्याकरण के सिद्धान्त अनुसार जाति-व्यक्ति-लिङ्ग-संख्या और कारक - ये पाँच प्रातिपदिक के अर्थ हैं, किन्तु इनमें मुख्य अर्थ व्यक्ति है,

तान् विशेषणीभूतान् लोकः न प्रतिपद्यते = जानाति क्रियान्वयितया, इति शेषः ।

अयम्भावः - 'शुक्लवाससं भोजय' इत्यादौ विशेषणीभूतवासः शुक्लवस्त्ररहितस्यान्यस्य पुरुषस्य ग्रहणं मास्तु इति बोधनद्वारा चरितार्थं चेत्, तस्य क्रियान्वये मानाभावः फलाभावश्च, विशेष्यस्तु क्रियान्वयमन्तरा अचरितार्थः सन् क्रियान्वयी । एवं 'यो गोशब्दः सोऽयं पिण्ड' इति प्रतीत्या शब्दविशिष्टार्थप्रतीतावपि शब्दस्य 'अयं पिण्डः - अस्य पदस्य

जात्यादीनिव गवादिशब्दान् परार्थत्वात् = स्वातिरिक्तविशेष्यभूत 'व्यक्ति'-परत्वेन स्वपरत्वाभावाद् लोकः = जनः न प्रतिपद्यते = क्रियान्वयं न जानाति । आनयन-बन्धनादि-क्रियासु शब्दस्यान्वयायोग्यत्वात् - 'गामानय' इत्यादौ गोशब्दादे र्नास्ति स्वपरत्वं, किन्त्वर्थपरत्वमेवेति भावः ।

विमर्शः - यथा 'गो'शब्दस्य जात्यादिविशिष्टसास्नादिमति पिण्डे शक्तिज्ञानाद् जात्यादयः शब्दवाच्याः सन्तोऽपि विशेष्यभूतेऽर्थे सास्नादिमति पिण्डविशेषे प्रकारीभूताः, अतः 'गामानय' इत्यादौ क्रियान्वयं न लभन्ते, तथा शब्दो वाच्यः सन्नपि विशेष्यभूतार्थ-'पिण्डव्यक्ति'-बोधनेन तत्र गुणीभूतः परार्थत्वात् क्रियान्वयं न लभते, एकस्मिन्नर्थे प्रकारतयोपस्थितस्यार्थस्यान्यत्रान्वयस्याव्युत्पन्नत्वात् । अत एव 'पचन्तं पश्य' इत्यादौ पाकादेर्न दर्शनादावन्वयः ।

लोकव्यवहार में उसी का वाक्यार्थ - 'आनयन, बन्धन' आदि क्रिया में अन्वयबोध होता है, जाति आदि का नहीं । क्योंकि जाति आदि तो व्यक्ति का परिचायक मात्र रहकर विशेषण बनकर रहते हैं । अत एव वे क्रिया में अन्वयी नहीं होते । उनमें क्रिया के अन्वय की योग्यता भी नहीं है । ऐसे ही शब्द भी छठा प्रातिपदिकार्थ है, किन्तु मुख्यरूप में अर्थबोध के लिए जब शब्द प्रयुक्त होता है, तब वह अपने स्वरूप से भिन्न-व्यक्ति आदि किसी अर्थ का बोध कराने में उपयुक्त होने से स्वपरक न रहकर अर्थ का परिचायक होकर विशेषण बनकर रहता है । अत एव उसका स्वतन्त्र रूप में अपने अर्थ से अतिरिक्त किसी क्रिया में अन्वय नहीं होता है ।

वाच्यः, नान्यस्ये'ति बोधनेन चरितार्थत्वात् न क्रियान्वयित्वम् । एतद्युक्तिमूलक एव - 'इतरनिष्ठविशेष्यतानिरूपित-प्रकारतासम्बन्धेनान्वयं प्रति मुख्यविशेष्यतासम्बन्धेनोपस्थितिः कारणम्' इति कार्यकारणभावः । अत एव घटत्वान्वयतात्पर्येण न 'नित्यो घट' इति प्रयोग इति नैयायिकादीनामुद्घोषणम् इति ॥ ५४ ॥

इदं तु बोध्यम् - गवादिशब्दाद् जात्यादेः प्रकारतयैवोपस्थिति र्न तु जातु विशेष्यतया । अतस्ते व्यावृत्तानुगतव्यक्तिपरतया चरितार्थत्वाद् अयोग्यत्वाच्च न कदापि तदितरेषु दर्शनानयनक्रियादिषु कर्मतयाऽन्वयं लभन्ते । शब्दस्य तु शब्देऽर्थे च खण्डशः शक्तिः । अतो विवक्षावशात् शब्दस्य कदाचिद्विशेषणतया कदाचिच्च विशेष्यतयाप्युपस्थितिः । यदा 'गामानय' इत्यादौ शब्दस्य विशेषणतयोपस्थितिस्तदा क्रियान्वयं न लभते । यदा तु 'शब्दं शृणु- मन्त्रमुच्चारय' इत्यादौ शब्दस्य विशेष्यतयोपस्थितिस्तदा शब्दः क्रियान्वयं लभते । लोके तावद् विवक्षावशादुभयथा व्यवस्था । व्याकरणशास्त्रे तु "अग्नेर्ढक्" इत्यादौ सर्वत्र शब्दस्य विशेष्यतयैवोपस्थितिः, अर्थस्य विशेषणतयेति विवेकः ॥ ५४ ॥

यह अन्तर अवश्य है कि व्यक्ति में सदा विशेषणीभूत जाति आदि का स्वतन्त्र कभी कोई कार्यव्यवहार नहीं होता है, किन्तु शब्द कभी विवक्षावश स्वतन्त्र स्वस्वरूप का बोधक भी होता है । जब शब्द अपने स्वरूप का बोधक होता है, तब वह क्रिया के अन्वययोग्य भी होता है । उच्चारण-श्रवण आदि क्रिया के साथ शब्द का स्वतन्त्र अन्वय होता है । व्याकरणशास्त्र में तो "स्वं रूपम्" शास्त्र के निर्देश से सभी कार्य-विधि शब्द से ही होते हैं ॥ ५४ ॥

ग्राह्यत्वं ग्राहकत्वं च द्वे शक्ती तेजसो यथा ।
तथैव सर्वशब्दानामेते पृथगिव स्थिते ॥ ५५ ॥

प्रत्येकार्थप्रकाशिका

तत्रैव प्रकारान्तरं वदन्नुपसंहरति - 'ग्राह्यत्व'मिति । ग्राह्यत्वं घटादौ न तु ग्राहकत्वम्, ग्राहकत्वं च चक्षुरादीन्द्रियादौ न तु

आनन्दा

तेजोदृष्टान्तेन शब्दे ग्राह्यत्वग्राहकत्वशक्तिद्वयमुपपादयन्नुपसंहरति- 'ग्राह्यत्वम्' इति ।

अन्वयः - यथा तेजसः ग्राह्यत्वम् ग्राहकत्वम् च द्वे शक्ती, तथा एव सर्वशब्दानाम् एते पृथक् इव स्थिते ।

व्याख्या - यथा तेजसः = आदित्यादेः प्रकाशस्य ग्राह्यत्वम् = स्वरूप-प्रकाशकत्वेन स्वयं प्रकाश्यत्वम्, ग्राहकत्वम् च = स्वेतरस्य घटादेर-प्रकाशरूपस्य प्रकाशकत्वं च द्वे शक्ती = सामर्थ्ये स्तः, तथैव = एवमेव सर्वशब्दानाम् = सर्वेषां वाचकशब्दानाम् एते = स्वेन स्वस्य ग्राह्यत्वम्-अर्थग्राहकत्वं च द्वे शक्ती पृथगिव = वस्तुतोऽभिन्नत्वेऽपि बुद्धिभेदेन भिन्ने इव स्थिते = प्रतिभासेते ।

सूर्यमाया

उपसंहार में तेज दृष्टान्त से शब्द की ग्राह्यत्व और ग्राहकत्व ये दो शक्ति बताते हैं - 'ग्राह्यत्वम्' इत्यादि ।

अर्थ : - जैसे तेज (प्रकाश) की ग्राह्यत्व = स्वयं प्रकाश्यत्व और ग्राहकत्व = अन्यवस्तुओं का प्रकाशकत्व ये दो शक्ति हैं, वैसे ही सभी शब्दों की ये दो शक्ति वस्तुतः एक होने पर भी परस्पर पृथक् जैसी रहती हैं ।

आशय : - सूर्य आदि का प्रकाश 'स्व' को प्रकाशित करने के साथ अन्य सभी वस्तुओं को प्रकाशित करता है । अत एव वह स्वयं स्व से प्रकाश्य होने से ग्राह्य एवं सभी अन्य वस्तुओं का प्रकाशक होने से ग्राहक भी होता है । वस्तुतः सूर्य आदि तेज पदार्थ तो स्वयं प्रकाशरूप है प्रकाश्य नहीं, किन्तु चाक्षुष प्रत्यक्ष में

ग्राह्यत्वम्, तेजसस्तु = आलोकादेः ते द्वे = उभे शक्ती - यथा घटादिग्राहकतया ग्राहकत्वं स्वरूपग्राहकतया ग्राह्यत्वमपि, तथैव

विमर्शः - घटादयो हि विषयाश्चक्षुरादीन्द्रियजन्यज्ञानेन प्रकाश्याः - ग्राह्या एव भवन्ति, न तु स्वस्य परस्य वा प्रकाशकाः सन्तो ग्राहकाः । चक्षुरादीनि ज्ञानकरणानीन्द्रियाणि - अतीन्द्रियाणि परस्य घटादेर्ज्ञानजननेन ग्राहकाण्येव भवन्ति, न तु कदापि स्वस्य ज्ञानजननेन स्वयं ग्राह्याणि भवन्ति । एवं च ज्ञानविषये ग्राह्यत्वं ज्ञानकरणे च ग्राहकत्वं यद्यपि वैयधिकरण्येन दृश्यते, नैतावता तयोः शक्त्योः सर्वत्र वैयधिकरण्यमेवेति नियमः, सामानाधिकरण्यस्यापि क्वचिद् दर्शनात् । तेजसि स्वेन स्वस्य ग्राह्यत्वम्, स्वेतरस्य च ग्राहकत्वमुभयमुपलभ्यते । अञ्जनमिव चक्षुषोऽनुग्राहकं तेजो भास्वरशुक्लोष्णस्पर्शादिभिर्गुणैः स्वविरुद्धसन्तमसादिभ्यो व्यावृत्तस्वरूपं गृहीतमेव सद् घटादीन् ग्राहयति, नागृहीतम् । तथा प्रकृते शब्दोऽपि

आलोक सहकारी कारण होता है, अत एव जब चक्षुरिन्द्रिय से रूपवान् वस्तुओं का प्रत्यक्ष होता है, तब आलोक चक्षुरिन्द्रिय का अञ्जन के समान संस्कारक व अनुग्राहक बनकर चाक्षुष ज्ञान का साधक होने से ग्राहक होता है । इसके साथ आलोक स्वयं भी चक्षु से अन्धकारादि भिन्न वस्तुओं से व्यावृत्तरूप ज्ञान का विषय होता है, जिससे वह ग्राह्य भी माना जाता है । ऐसे ही प्रकृत में शब्द स्वयं ग्राह्य है और अर्थ का ग्राहक भी है । उच्चारित शब्द स्वयं स्व से ग्राह्य होकर अर्थ का बोधक व ग्राहक होता है । उच्चारित 'घट' आदि शब्द भिन्न आनुपूर्वीवाले पट आदि अन्य शब्दों से व्यावृत्तरूप गृहीत होने पर ही श्रोता को नियत अर्थ का बोधक होता है । अत एव शब्द में ग्राह्यत्व और ग्राहकत्व उभय शक्ति स्पष्ट है ।

यहाँ यह ध्येय है कि शब्द की ये दोनों शक्ति शब्द से तथा परस्पर वस्तुतः अभिन्न हैं, भिन्न नहीं । किन्तु व्यवहार में भिन्न सी प्रतीत होती हैं । जैसे अग्नि

सर्वशब्दानाम् एते = ग्राह्यत्वग्राहकत्वे उभे शक्ती पृथगिव= भिन्ने इव स्थिते, वस्तुत उभयो र्नित्यत्वात्मरूपत्वाद अभिन्नैवेति ॥ ५५ ॥

विरुद्धार्थकशब्दान्तरेभ्यो व्यावृत्तस्वरूपो गृहीत एव तं तमिष्टमर्थं ग्राहयति, नागृहीत इति सिद्धं सर्वशब्दानां ग्राह्यत्वं ग्राहकत्वं च शक्तिद्वयम् ।

इदं तु बोध्यम् - शब्दस्य ते द्वे शक्ती न पृथक् स्थिते, वस्तुतोऽभिन्नेऽपि ते शब्दस्य नित्यमात्मरूपे ग्राह्यग्राहकव्यपदेशभेदेनान्योन्यं शब्दाच्च भिन्नत्वेन भासेते ।

एवं चेह 'पृथक्त्वेनेव प्रत्यवभासेते' इति वृत्तिस्वारस्याद् 'इव' शब्दपाठो युक्तः । 'पृथगवस्थिते' इति पाठे तु तयोः शक्त्योर्वास्तविकं पार्थक्यमेव बोधितं स्यात्, तथा च न वृत्तिस्वारस्यलाभ इति विभाव्यताम् ॥ ५५ ॥

में प्रकाशकत्व और दाहकत्व ये दोनों शक्ति अग्नि से तथा परस्पर भी अभिन्न रहने पर भी प्रकाश और दाहकार्य के भेद से भिन्न व्यवहृत होती हैं । क्योंकि प्रतिबन्धक मणि के समवधान में केवल दाह कार्य नहीं होता है, अन्यथा उक्त दोनों कार्य होते हैं । इस प्रकार कार्यभेद से शक्ति का तथा शक्ति के आश्रय का कल्पित भेदव्यवहार भले ही हो, वस्तुतः अर्थभेद से शक्तिभेद अथवा शक्तिभेद से शब्द का भेद नहीं हैं, जैसे - आदित्य और प्रभा का, चन्द्र और चन्द्रिका का भेद कल्पित है, वास्तविक नहीं ॥ ५५ ॥

विषयत्वमनापन्नैः शब्दैर्नार्थः प्रतीयते ।
न सत्तयैव तेऽर्थानामगृहीताः प्रकाशकाः ॥ ५६ ॥

प्रत्येकार्थप्रकाशिका

शब्दानामुभयशक्तिसत्त्वादाह - 'विषयत्व'मिति । विषयत्वम् = बोधविषयताम् अनापन्नैः = अनाश्रितैः शब्दैर्नार्थः प्रतीयते = बोध्यते, यतस्ते = शब्दा अगृहीताः = अज्ञाताः

आनन्दा

शब्दानामुक्तशक्तिद्वयसद्भावेऽनुभवप्रमाणमाह - 'विषयत्वम्' इति ।
अन्वयः - विषयत्वम् अनापन्नैः शब्दैः अर्थः न प्रतीयते,
ते अगृहीताः सत्तया एव अर्थानाम् न प्रकाशकाः ।
व्याख्या - विषयत्वम् = स्वयं ज्ञानविषयत्वम् अनापन्नैः = अप्राप्तैः-अज्ञातस्वरूपैः शब्दैः अर्थः = जाति-व्यक्त्यादिः कश्चनाभिधेयः न प्रतीयते= बोधविषयो न भवति । तत्र बीजमाह-ते = शब्दा अगृहीताः = अज्ञाता अनवधृतस्वरूपाः सत्तया = अनुच्चारिता हृदये सत्तामात्रेण, देशान्तरे वा उच्चारितास्तत्र स्थितिमात्रेण अर्थानाम् = स्वाभिधेयानाम् न प्रकाशकाः = न बोधकाः, अपितु स्वयं सम्यग् ज्ञाता एव शब्दा अर्थबोधका भवन्तीत्यनुभवः । अत एव - "उच्चारित एव शब्दः प्रत्यायको नानुच्चारित" इति हि नयः । एवं चानुभवबलाद् ग्राह्य एव शब्दोऽर्थग्राहक इति सुस्पष्टम् ।

सूर्यमाया

शब्द में उपर्युक्त - 'ग्राह्यत्व और ग्राहकत्व' उभयशक्ति के सद्भाव में अनुभव प्रमाण प्रस्तुत करते हैं - 'विषयत्वम्' इत्यादि ।
अर्थ : - स्वयम् ज्ञान का विषय हुए विना अज्ञातस्वरूप शब्दों से कोई अर्थ नहीं जाना जाता है । क्योंकि अज्ञातस्वरूप शब्द केवल अपनी सत्तामात्र से अपने अर्थों का ज्ञान नहीं कराते हैं ।
आशय : - उच्चारित शब्द स्वयं ज्ञान का विषय होकर ही अपने अर्थों का ज्ञान कराते हैं, अज्ञात रहकर नहीं । अर्थात् उच्चारित शब्दों से श्रोता को सर्वप्रथम शब्द का अपना स्वरूप अवगत होता है, तत्पश्चात् उससे अभिमत अर्थ का ज्ञान होता

सत्तयैव = सत्तामात्रेण अर्थानां न प्रकाशकाः = उपस्थापका भवन्ति । अयम्भावः - अनुच्चारणदशायाम् अर्थबोधो न भवति, अतो ज्ञाता एव शब्दा अर्थबोधकाः । तथा च शब्देन यथा गोत्वस्य व्यक्तेश्चोपस्थितिः, एवमेव शब्दस्यापि । अतो गोत्वादिवत् शब्दस्यापि विशेषणत्वसम्भवे तत्परित्यागे मानाभाव इति ॥ ५६ ॥

विमर्शः - वक्तुर्हृदये वर्तमानः शब्दोऽनुच्चारणदशायां यद्वा देशान्तरे उच्चारितः सन्नपि श्रोतृभिः श्रवणाभावदशायां सर्वथा अगृहीतस्वरूपः शब्दोऽर्थबोधको न भवति, किन्तु गृहीत एव भवत्यर्थबोधक इत्यनुभवाद् ग्राह्यः सन्नेव शब्दो ग्राहको भवतीति शब्दस्य सम्बलितं शक्तिद्वयमुपपन्नम् । शब्देन प्रथमं व्यावृत्तं स्वस्वरूपं गृह्यते, तदनन्तरमर्थः । इदं तु बोध्यम् - दाहं प्रति वह्निः स्वरूपसन् कारणम्, तस्य दाहकताशक्तिरपि स्वरूपसती कारणम्, शब्दस्तु अर्थबोधम्प्रति ज्ञातः सन् कारणम्, शब्दस्य शक्तिरपि ज्ञाता सत्येव कारणं न स्वरूपसत्तामात्रेण । शाब्दबोधं प्रति शब्दज्ञानं शक्तिज्ञानं चोभयं कारणम् । तथा च गृहीत एव शब्दो ग्राहक इति फलितार्थः ॥ ५६ ॥

है । देशान्तर में बोले गए अथवा उच्चारण से पहले वक्ता के हृदय में स्थित सूक्ष्म शब्द जो कि अज्ञातस्वरूप हैं, वे कभी किसी को अर्थ का ज्ञान नहीं कराते । किन्तु उच्चारण से अभिव्यक्त सम्यक् ज्ञात ही शब्द अर्थ का प्रकाशक व बोधक होते हैं । इस अन्वय और व्यतिरेक से शब्द में - 'ग्राह्यत्व और ग्राहकत्व, दूसरे शब्दों में प्रकाश्यत्व तथा प्रकाशकत्व' - उभयशक्ति अनुभवसिद्ध है । यहाँ यह अवधेय है कि - कुछ वस्तु तो स्वरूपसत् कारण होते हैं, कुछ ज्ञातसत् कारण होते हैं । अग्नि तथा अग्नि की दाह-प्रकाश की जनकताशक्ति अज्ञात रहने पर भी स्वरूपसत्तामात्र से दाह व प्रकाश के जनक होते हैं, तथा चक्षु आदि इन्द्रियाँ भी अज्ञात ही सत्तामात्र से अपने सन्निकृष्ट विषय का ज्ञान कराते हैं । किन्तु शब्द तथा शब्द की शक्ति ज्ञात ही अर्थ का बोधक होते हैं, इससे यह स्पष्ट सिद्ध है कि सभी शब्द ग्राह्य-ग्राहक उभयस्वरूप हैं, शब्द का ग्राह्यत्व, ग्राहकत्व दोनों स्वभाव है, जो कि शब्द से भिन्न नहीं है ॥ ५६ ॥

अतोऽनिर्ज्ञातरूपत्वात् किमाहेत्यभिधीयते ।
नेन्द्रियाणां प्रकाश्येऽर्थे स्वरूपं गृह्यते यथा ॥ ५७ ॥

प्रत्येकार्थप्रकाशिका

ननु अनुभवकरणं यथा इन्द्रियं तथा शब्दोऽपि, ततश्च शब्दो यथा बोधविषय एवमिन्द्रियमपि कथं नेत्युभयोर्वैषम्ये

आनन्दा

अनुभवकरणत्वे समानेऽपि शब्दानां ज्ञातानाम्, इन्द्रियाणां त्वज्ञातानां ज्ञानकरणत्वमिति वैषम्ये बीजमनुभवप्रमाणेन व्यवस्थापयति- 'अत' इति ।

अन्वयः - अतः अनिर्ज्ञातरूपत्वात् किमाह? इति अभिधीयते । इन्द्रियाणाम् स्वरूपम् प्रकाश्ये अर्थे यथा न गृह्यते ।

व्याख्या - प्राक् प्रतिपादितदिशा यतः शब्दानां गृहीतानामेव ज्ञानकारणत्वम् अतः = अस्माद्धेतोः अनिर्ज्ञातरूपत्वात् = स्पष्टोच्चारणाभावे - दूरे - कलरवे वा श्रोतृभिरज्ञातशब्दस्वरूपत्वात् किमाह = वक्ता किं कथयति? इति अभिधीयते = शब्दज्ञानार्थं पृच्छ्यते । अज्ञातशब्दानामर्थज्ञानकारणत्वे तु प्रश्नो नोत्पद्येत, शब्दज्ञानं विनैवार्थज्ञानस्य संभवात् । तत्र वैपरीत्ये दृष्टान्तमाह- 'इन्द्रियाणाम्' इति । इन्द्रियाणाम् = चक्षुरादीनां स्वरूपम् =

सूर्यमाया

शब्द तथा इन्द्रिय समान रूप में अर्थों के ज्ञान का कारण होने पर भी शब्द ज्ञात होकर किन्तु इन्द्रिय अज्ञात रहकर ही ज्ञान का कारण होते हैं, दोनों के इस वैषम्य में अनुभव प्रमाण देते हैं - 'अतोऽनिर्ज्ञात' इत्यादि ।

अर्थ : - शब्द का स्वरूप ज्ञात न होने पर अर्थज्ञान में बाधा होने से श्रोता शब्द को जानने के लिए पूछता है कि - वक्ता ने क्या कहा है? क्योंकि ज्ञात ही शब्द ज्ञानकारण होता है । किन्तु इन्द्रिय का स्वरूप अज्ञात रहने पर उसके विषय में कोई नहीं पूछता है, क्योंकि इन्द्रियों का स्वरूप न तो ज्ञेय अर्थ के रूप में गृहीत होता है, ना ही ज्ञात होकर ज्ञान कारण होता है, अज्ञात ही ज्ञान का कारण होता है ।

बीजमाह - 'अत' इति । 'यतः शब्दानाम्' इत्यध्याहारः, अनिर्ज्ञातरूपत्वात् = यदा वक्त्रा उच्चारितः शब्दः श्रोत्रा न ज्ञायते तदा किमाह = किं ब्रूते, इत्यभिधीयते = प्रत्युच्यते,

---

भास्वरशुक्लरूपादिकं प्रकाश्ये = ग्राह्ये अर्थे = अभास्वररूपवति घटादौ यथा न गृह्यते = ज्ञानविषयो न भवति, अत इन्द्रियाणामग्राह्यत्वेन तेषां स्वरूपज्ञानस्य ग्राह्यघटादिज्ञानेऽनपेक्षणादज्ञातानामेव ज्ञानकारणत्वेनेन्द्रिय-स्वरूपज्ञानं विनैवार्थज्ञानसंभवेनेन्द्रियस्वरूपज्ञानार्थं प्रश्नो नोत्पद्यते । अतो वैषम्याद् अर्थज्ञानकारणत्वे समानेऽपि नेन्द्रियवत् शब्दानामज्ञातानां ज्ञानकारणत्वम्, प्रत्युत ज्ञातानामिति भावः ।

विमर्शः - ज्ञानकारणत्वसाम्याद् इन्द्रियाणामिव शब्दानामज्ञातस्वरूपाणामेव ग्राहकत्वम्, यद्वा शब्दानामिवेन्द्रियाणामपि ज्ञातस्वरूपाणामेव ग्राहकत्वं साधयितुं न शक्यते, तयोर्वैषम्यात् । तथाहि-शब्दानां स्वरूपेऽज्ञाते सति प्रतिपत्तुरर्थज्ञानानुपपत्तौ शब्दविषयकः प्रश्न उपलभ्यते - 'किमाह' इति । इन्द्रियाणां स्वरूपेऽज्ञाते तु कदाप्यर्थज्ञाने बाधकाभावात्, प्रत्युताज्ञातैरेवेन्द्रियैः सर्वदाऽर्थज्ञानदर्शना-दिन्द्रियजिज्ञासया प्रश्नो नोपलभ्यते । तत्रेदमेव बीजं यत् - शब्दैरर्थज्ञाने

आशय : - शब्दों से अर्थ के ज्ञान में शब्दस्वरूप के ज्ञान की अपेक्षा होती है । अत एव यह सर्वसम्मत सिद्धान्त है कि - शाब्दबोध में शब्दज्ञान भी कारण है । उच्चारित शब्द का किसी कारण से जब ज्ञान नहीं होता है, तब अर्थ का ज्ञान सम्भव न होने से उसको जानने के लिए श्रोता प्रश्न करता है कि - वक्ता ने क्या कहा है? इससे यह स्पष्ट होता है कि ज्ञात शब्द ही अर्थ का बोधक होता है, किन्तु इन्द्रियों का शब्द से भिन्न स्वभाव है । अतीन्द्रिय होने से इन्द्रिय अज्ञात रहकर ही अर्थज्ञान का कारण होते हैं । इन्द्रियों से अर्थ के ज्ञान में इन्द्रियों के स्वरूप ज्ञान की अपेक्षा नहीं होती है । अत एव इन्द्रियों के स्वरूप को जानने के लिए कभी किसी को प्रश्न नहीं उठता । इससे यह स्पष्ट होता है कि शब्द और इन्द्रिय भले ही अर्थ के ज्ञान में समान कारण हों, किन्तु उनका परस्पर विलक्षणस्वभाव भी है कि शब्द ज्ञात होकर और इन्द्रिय अज्ञात रहकर ही अर्थज्ञान कराते हैं । अत एव उनसे होने वाले अर्थज्ञान फल में भी विलक्षणता

अतः ज्ञाता एव शब्दा अर्थबोधका इति शब्दोऽपि बोध-विषयः । इन्द्रियाणां स्वरूपं प्रकाश्येऽर्थे = बोध्ये विषये यथा न गृह्यते = ज्ञायते, अज्ञातान्येवेन्द्रियाणि कारणानि, इति भेदान्नेन्द्रियं बोधविषय इति वैषम्यम् ॥ ५७ ॥

शब्दज्ञानस्यापेक्षणाद् अज्ञाते शब्दे तस्य ज्ञानाय प्रश्न उपपद्यते, इन्द्रियैरर्थज्ञाने त्विन्द्रियस्वरूपज्ञानस्यानपेक्षणादिन्द्रियविषयकः प्रश्नो नोदयते । तदेवम्-अज्ञातेषु शब्देषु तेषां ज्ञानाय प्रश्नोपलम्भात्, इन्द्रियेषु त्वज्ञातेषु तेषां ज्ञानाय प्रश्नानुपलम्भाद् वैषम्याद् ज्ञानकारणत्वस्योभयोः साम्येऽपि शब्दानां ज्ञातानाम्-इन्द्रियाणां त्वज्ञातानामेव ज्ञानकारणत्वं पर्यवस्यति । तथा च शब्दानां स्वरूपं ग्राह्यं सद् ग्राहकम्, इन्द्रियाणां तु स्वरूपमग्राह्यं सद् ग्राहकमिति तयोर्विवेकः ॥ ५७ ॥

है । शब्दजन्य बोध में शब्द स्वयं भी ग्राह्य विषय होता है, किन्तु इन्द्रियजन्य बोध में इन्द्रिय स्वयं ग्राह्य विषय नहीं होता है । इन्द्रिय तो अदृष्टपिशाचन्याय से अर्थ का केवल ग्राहक होते हैं ।

सारांश में - स्वजन्य बोध का विषय स्वयं भी होने से शब्द - ग्राह्य और ग्राहक उभयस्वरूप है, किन्तु इन्द्रिय अज्ञात ही ग्राहक होने से एवं स्वयं बोध का विषय न होने से केवल ग्राहक होते हैं, ग्राह्य नहीं । इसका अन्त:साक्ष्य यह अनुभव प्रमाण है कि - अर्थज्ञान के समय अज्ञानदशा में शब्द के स्वरूप की जिज्ञासा तो होती है, किन्तु इन्द्रिय के स्वरूप की जिज्ञासा कभी नहीं होती है ॥ ५७ ॥

भेदेनावगृहीतौ द्वौ शब्दधर्मावपोद्धृतौ ।
भेदकार्य्येषु हेतुत्वमविरोधेन गच्छतः ॥ ५८ ॥

प्रत्येकार्थप्रकाशिका

ननु "अग्नेर्ढगि"त्यादौ बोध्यबोधकयोः समानानुपूर्वीकत्वेनैकत्वात् "स्वं रूप" मिति शास्त्रबोधितसंज्ञासंज्ञिभावोऽनुपपन्न इत्यत आह - 'भेदेने' ति । शब्दधर्मौ = शब्दार्थौ अपोद्धृतौ = वस्तुतोऽभिन्नावपि बुद्धिकल्पितपृथग्भावौ -

---

आनन्दा

एकस्मिन्नेव शब्दे "स्वं रूपम्" इति शास्त्रबोधितस्य संज्ञासंज्ञिभावस्य विरोधादनुपपत्तिं परिहरन् सामञ्जस्यमुपपादयति - 'भेदेन' इति ।

अन्वयः - शब्दधर्मौ अपोद्धृतौ भेदेन द्वौ अवगृहीतौ भेदकार्येषु अविरोधेन हेतुत्वं गच्छतः ।

व्याख्या - शब्दधर्मौ = शब्दस्य धर्मिण एकस्य धर्मौ वाच्यत्वं वाचकत्वं च अपोद्धृतौ = शब्दस्वरूपतया वस्तुतोऽभिन्नावपि बुद्धिभेदेन पृथक् कल्पितौ भेदेन = वाच्यवाचकविभागेन द्वौ = विविक्तौ अवगृहीतौ = ज्ञातौ भेदकार्येषु = संज्ञासंज्ञिभेदरूपकार्येषु संज्ञासंज्ञिभेदनिमित्तक-'ढग्यदादि'-

---

सूर्यमाया

अन्यत्र संज्ञा और संज्ञी का भेद होने पर भी यहाँ "स्वं रूपम्" शास्त्र से एक ही शब्द का 'संज्ञा और संज्ञी' दोनों के विधान में अविरोध बताते हैं - 'भेदेन' इत्यादि ।

अर्थ : - एक ही शब्द में भेद की कल्पना से 'वाचक शब्द और वाच्य अर्थ' ये दो शब्द के धर्म पृथक् गृहीत होकर - संज्ञा और संज्ञी इन भेदकार्यों के विधान में विना किसी विरोध के हेतु हो जाते हैं, अर्थात् भेद की कल्पना से एक ही शब्द संज्ञा और संज्ञी दोनों बन जाता है ।

आशय : - एक ही शब्द स्व का बोधकरूप में संज्ञा तथा स्व से स्वयं बोध्यरूप में संज्ञी दोनों व्यवहृत होता है, इसमें कोई अनुभवविरोध नहीं है ।

अत एव भेदेनावगृहीतौ = भिन्नतया ज्ञातौ द्वौ भेदकार्येषु = भेदप्रयुक्तविधेयेषु हेतुत्वम् = कारणत्वम् अविरोधेन = समावेशेन गच्छतः = प्राप्नुतः ।

अयमाशयः - यथा लोके यस्य देवदत्तस्यैकपुत्रः, तेन बुद्ध्या पृथक् प्रकल्प्य ज्येष्ठत्व-कनिष्ठत्वादिमारोप्य ज्येष्ठत्व-प्रयुक्तकार्य्यस्य कनिष्ठत्वप्रयुक्तकार्य्यस्य च समावेशः क्रियते,

---

प्रत्ययविधिषु च अविरोधेन = विरोधाभावेन - अभेदेऽपि भेदबुद्ध्या हेतुत्वम् = निमित्तत्वं गच्छतः । एक एवाग्न्यादिशब्दो लक्ष्यलक्षणस्थलो-पाधिकृतभेदः ''स्वं रूपम्'' इतिशास्त्रबोधितं संज्ञासंज्ञिभावं सामञ्जस्येन लभते, इत्यर्थः ।

विमर्शः - लोके शास्त्रे च भिन्नयोरेव संज्ञासंज्ञिभावो दृश्यते । लोके व्यक्तिविशेषे संकेतितो देवदत्तादिशब्दो भवति संज्ञा, तस्मादन्यः पुत्रादिः पिण्डविशेषो बोध्यो भवति संज्ञी । शास्त्रे च संकेतितो गुणवृद्ध्यादिशब्दः संज्ञा, तस्मादन्यः संकेतितोऽर्थः 'अदेङ् - आदैजादि' बोध्यः संज्ञी । एवं च सर्वत्र संज्ञासंज्ञिभावस्य भिन्नेष्वेव प्रसिद्धेरेकस्मिन् विरोधात् ''स्वं रूपम्'' इति शास्त्रेण बोध्यमानमेकस्मिन्नेव शब्दे बोधकस्वरूपत्वेन संज्ञात्वं-बोध्यस्वरूपत्वेन च संज्ञित्वं यद्यपि नोपपद्यते इति सत्यम्, तथापि लक्ष्यलक्षणघटकत्वेनाभिन्नेऽपि शब्दे उपाधिकृतं भेदमुपादाय संज्ञासंज्ञिभावो नानुपपन्नः ।

''अग्नेर्ढक्'' इत्यादि सूत्रों में प्रयुक्त अग्नि शब्द 'आग्नेयम्' इत्यादि प्रयोगों में लक्ष्य 'अग्नि' शब्द का ग्राहक होता है । ऐसी स्थिति में स्थलभेद से वही एक 'अग्नि' शब्द स्वयं ग्राहक तथा स्वयं ग्राह्य भी होता है । फलतः वही 'अग्नि' शब्द ग्राहकरूप में संज्ञाशब्द व्यवहृत होकर स्वयं ही ग्राह्यरूप में संज्ञी अर्थ भी व्यवहृत होता है । इस प्रकार एक ही शब्द लक्षण और लक्ष्य स्थलभेदकृत बुद्धिभेद से बोधकरूप में संज्ञा-शब्द तथा बोध्यरूप में संज्ञी-अर्थ, ये दोनों मान लिये जाते हैं । अर्थात् अभिन्न शब्द में ही स्थलभेद से बुद्धिकल्पित भेद मानकर भेदप्रयुक्त - 'संज्ञा-संज्ञी' व्यवहार होने में कभी कोई विरोध वा असंगति नहीं है । लोक तथा शास्त्र दोनों में मुख्य-भेद-प्रयुक्त व्यवहार के समान

शास्त्रेऽपि - 'आभ्या' मित्यादौ एकस्मिन् अकारे अदन्तत्वादि-मारोप्य तत्प्रयुक्तदीर्घादिकार्य्यस्य समावेशः, तथैव तत्रापि एकस्मिन् एव सूत्रघटकत्व-प्रयोगघटकत्वोपाधिभेदात् पृथक्त्वकल्पनया संज्ञासंज्ञिभाव इति ॥ ५८ ॥

तथाहि-कुण्डलकटकादिकं सुवर्णान्नान्यद् वस्तु सुवर्णमेव तत्, तथापि प्रकृतिविकृतिभेदकृतं भेदमुपादाय भवति भेदसम्बन्धव्यपदेशः - 'सुवर्णस्य कुण्डलम्' इति । शिर एव राहुर्नान्यः शिरसः, तथाप्यवस्थोपाधिभेदकृत-भेदमुपाश्रित्य सम्बन्धव्यवहारः - 'राहोः शिर' इति । शब्दशास्त्रेऽपि 'इयाय-आभ्याम्' इत्यादौ प्रकृतिभूते एकस्मिन्नेव 'इवर्णे-अवर्णे' च ''व्यपदेशिवदेकस्मिन्'' इति न्यायेन भेदसमारोपेण 'एकाच्त्वादन्तत्व' निमित्तकं द्वित्व-दीर्घादिकं कार्यं भवति निर्विरोधम् । तथा प्रकृते ''स्वं रूपम्'' इति शास्त्रेऽपि लक्षणघटकत्व-लक्ष्यघटकत्वोपाधिभेदकृतं भेदमाश्रित्यै-कस्मिन्नभिन्ने एव शब्दे संज्ञासंज्ञिभावो भेदनिबन्धनं कार्यं च निर्बाधमुपपद्यते । ''अग्नेर्ढक्'' इतिलक्षणघटक एक एवाग्निशब्दो लक्ष्यशब्दस्वरूपबोधकः सन् भवति संज्ञा, लक्ष्यघटकश्चाग्निशब्दो बोध्यः सन् भवति हि संज्ञी, को विरोधः? लक्षणघटकेनाग्निशब्देन संज्ञाभूतेन बोधिताद् संज्ञिनोऽग्नि-शब्दाल्लक्ष्यभूताद् भवति हि निर्बाधं ढक् कार्यम्, न काप्यनुपपत्तिः । सर्वं समञ्जसम् ॥ ५८ ॥

एक असहाय में भी कल्पित भेदप्रयुक्त व्यवहार होते हैं । लोक में जिसका एक ही पुत्र है, वही ज्येष्ठ, मध्यम, कनिष्ठ व्यवहृत होता है । शास्त्र में भी 'आभ्याम्', 'इयाय' इत्यादि प्रयोगों में एक ही वर्ण को अदन्त अथवा एकाच् मानकर यथास्थल- 'दीर्घ- द्वित्व' आदि कार्य किये जाते हैं । अत एव ''स्वं रूपम्'' इस शास्त्र से बोधित एक ही शब्द का संज्ञासंज्ञिभाव अविरुद्ध तथा सुसङ्गत है ॥ ५८ ॥

वृद्ध्यादयो यथा शब्दाः स्वरूपोपनिबन्धनाः ।
आदैच्-प्रत्यायितैः शब्दैः सम्बन्धं यान्ति संज्ञिभिः ॥ ५९ ॥

प्रत्येकार्थप्रकाशिका

किञ्च - 'वृद्ध्यादय' इति । यथा वृद्ध्यादयः शब्दाः = "वृद्धिरादैच्" इत्यादिसूत्रघटकाः 'वृद्धिः' इत्यादिशब्दाः स्वरूपोपनिबन्धनाः = स्वरूपाणाम् उपनिबन्धनाः - बोधकाः

आनन्दा

अभिन्नस्यैव शब्दस्य स्वेन स्वस्य बोधकत्वे संकेतग्रहात् पूर्वं संज्ञाशास्त्रघटकं वृद्ध्यादैजादिपदं दृष्टान्तमाह - 'वृद्ध्यादयः' इति ।

अन्वयः - यथा वृद्ध्यादयः शब्दाः स्वरूपोपनिबन्धनाः आदैच्-प्रत्यायितैः शब्दैः संज्ञिभिः सम्बन्धम् यान्ति, 'अग्निशब्दस्तथैवायम्' इति वक्ष्यमाणेनान्वयः ।

व्याख्या - यथा वृद्ध्यादयः = संज्ञासूत्रघटका वृद्धिगुणादयः शब्दाः स्वरूपोपनिबन्धनाः = संज्ञासंज्ञिसम्बन्धग्रहात् पूर्वं स्वानुपूर्वीस्वरूप-प्रवृत्तिनिमित्तका वृद्ध्यादिवर्णानुपूर्वीरूपबोधकाः सन्तः आदैच्-प्रत्यायितैः=

सूर्यमाया

शब्द का स्वयं ग्राह्यत्व और ग्राहकत्व संज्ञासूत्र के अन्तर्गत वृद्धि आदि शब्दों के दृष्टान्त द्वारा भी सिद्ध करते हैं - 'वृद्ध्यादयो' इत्यादि ।

अर्थ : - जैसे अपने आनुपूर्वी स्वरूपमात्र का बोधक वृद्धि आदि संज्ञासूत्रघटक शब्द 'आदैच्' आदि शब्द से बोधित - आकार, ऐकार आदि भिन्नरूप संज्ञी शब्दों के साथ संकेतरूप तादात्म्य सम्बन्ध अर्थात् संज्ञासंज्ञिभाव सम्बन्ध को प्राप्त करते हैं, [ऐसे ही विधिसूत्रघटक 'अग्नि' आदि स्वरूपमात्र का बोधक शब्द अपने से अभिन्न ही प्रयोगस्थ 'अग्नि' आदि शब्दों के साथ संकेत रूप तादात्म्य सम्बन्ध को प्राप्त करते हैं, यह आगामी कारिका से पूरणीय है ।]

स्वरूपेणैवार्थवन्त इति यावत्, आदैच्प्रत्यायितैः = स्वरूपेणार्थवदादैच्शब्देन बोध्यैः शब्दैः = 'आदैच्' - इत्यानुपूर्वीभिः संज्ञिभिः सम्बन्धम् = तादात्म्यरूपं यान्ति =

आदैच्पदबोधितैः शब्दैः = 'आदैच्' - इतिवर्णानुपूर्वीरूपैः संज्ञिभिः = वृद्ध्यादिशब्दबोध्यत्वेन संकेत्यमानैः सम्बन्धम् = तादात्म्यसंकेतं यान्ति, तथैवायं सूत्रघटकोऽग्निशब्दः प्रयोगघटकस्याग्निशब्दस्य बोधकोऽग्न्यर्थ-वाचकेनाग्निशब्देन संज्ञासंज्ञिभावं सम्बन्धं यातीति वक्ष्यमाणोऽर्थः ।

विमर्शः - इह शास्त्रे संज्ञाशास्त्रेण संज्ञाशब्दात् क्वचिद् भिन्नरूपाणां क्वचिच्चाभिन्नरूपाणां संज्ञिनां तादात्म्यरूपः संकेतो बोध्यते । तत्र ''आदिरन्त्येन-'' इत्यादिसंज्ञाशास्त्रेण संज्ञाशब्देभ्य इग्यणादिभ्यो भिन्नरूपाणामिकारादियकारादीनां तादात्म्यसंकेतरूपः संज्ञासंज्ञिभावसम्बन्धो बोध्यते। एवं च ''इको यणचि'' इत्यादिविधिशास्त्रेषु सूत्रोच्चारितानामिग्यणादीनां न स्थान्यादेशभावः, किन्तु तैरुपस्थापितानां संज्ञाशब्दाद्भिन्नरूपाणामिकारादि-यकारादीनां संज्ञिनाम् ।

''स्वं रूपम्'' इत्यादि संज्ञाशास्त्रेण तु अभिन्नरूपेष्वेव भेदकल्पनया संज्ञासंज्ञिभावसम्बन्धो बोध्यते। तथाहि ''अग्नेर्ढक्'' इत्यादौ समानानुपूर्वीकत्वेन स एवाग्निशब्दः संज्ञा, स एव चाग्निशब्दः संज्ञी, परन्तु विधिसूत्रघटकत्व-

---

आशय : - ''इको यणचि'' इत्यादि विधिसूत्रों में प्रयुक्त इक् और यण् आदि शब्दों का स्थान्यादेशभाव बोधित नहीं होता है, अपितु इक्-शब्द से बोधित लक्ष्यस्थ इकार आदि का यण्-शब्द से बोधित यकार आदि के साथ स्थान्यादेशभाव होता है, इसी प्रकार ''वृद्धिरादैच्'' इत्यादि संज्ञासूत्रों में प्रयुक्त वृद्धि आदि शब्द तथा आदैच् आदि शब्द का संज्ञासंज्ञिभाव बोधित नहीं होता है, किन्तु वृद्धिशब्द से बोधित वृद्धि-शब्द का आदैच्-शब्द से बोधित आदैच् (आ-ऐ-औ) शब्द के साथ संज्ञासंज्ञिभाव बोधित होता है । क्योंकि संज्ञासूत्र से उनका संकेतज्ञान होने के अनन्तर संज्ञासूत्र से अन्यत्र विधिप्रदेशों में ही संज्ञाशब्द संज्ञी का बोध कराते

प्राप्नुवन्ति । इदं फलितम् - "वृद्धिरादैच्" इति संकेत-ग्राहकवाक्ये संकेतग्रहात् पूर्वं वृद्धिपदबोध्यं वृद्धिपदम् - आदैच्-पदबोध्यमादैच् पदमिति स्वरूपशक्त्यैवार्थवत्त्वात् प्रातिपदिकत्वेन

प्रयोगघटकत्वरूपस्थलभेदेन तत्र भेदकल्पनया संज्ञासंज्ञिभावः । इत्थं च विधिसूत्रोच्चारितोऽग्निशब्दो न ढगादिकार्यभाक्, स तु केवलं स्वस्वरूपपरकः प्रयोगघटकस्य प्रत्यायक एव । तेन प्रत्यायितः प्रयोगघटकोऽर्थपरकोऽग्निशब्दो भवति कार्यभाक् । इदं तु बोध्यम् - "वृद्धिरादैच्" इत्यादिसंज्ञासूत्रेषूच्चारितयो-र्वृद्ध्यादैजादिशब्दयोर्न संज्ञासंज्ञिसम्बन्धो बोध्यते, प्रत्युत वृद्धिशब्देन प्रत्यायितस्य वृद्धिशब्दस्य आदैच्छब्देन प्रत्यायितानामादैचाम् । यतो हि संज्ञाशास्त्रेण संकेतग्रहे कृते संज्ञाशास्त्रादन्यत्र विधिप्रदेशेष्वेव वृद्ध्यादयः संज्ञाशब्दाः संज्ञिनं बोधयन्ति न तु संज्ञाशास्त्रे, तत्र संकेतग्रहात् प्राक् तेषां संज्ञात्वस्याग्रहात् । "स्वं रूपम्-" इतिशास्त्रेऽशब्दसंज्ञेतिपर्युदासेन संज्ञाशास्त्रादन्यत्र वृद्ध्यादिसंज्ञाशब्दानां संज्ञिपरत्वेन संज्ञाशास्त्रे स्वरूपपरत्वमेव व्यवस्थितम् ।

एवं च संज्ञाशास्त्रेषु वृद्ध्यादयः शब्दाः पूर्वं स्वस्वरूपं बोधयन्ति, ततो वृद्धिशब्दप्रत्यायितेन वृद्धिशब्देनादैच्प्रत्यायितानामादैचाम् - 'आदैचो वृद्धिपदाभिन्नाः' इत्येवं तादात्म्यरूपं संकेतं बोधयन्ति । इत्थं च "वृद्धिरादैच्"

हैं, संज्ञासूत्र में नहीं । संज्ञासूत्र में तो संकेतज्ञान होना ही है, जब तक संकेतज्ञान पूरा नहीं हुआ है, उससे पहले संज्ञाशब्द से संज्ञी का ज्ञान सम्भव नहीं । फलतः संज्ञासूत्र में संज्ञाशब्द और संज्ञीशब्द अपने स्वरूपमात्र का बोध कराते हैं ।

इस प्रकार जहाँ संज्ञाशब्द से भिन्नरूप संज्ञी का संज्ञाशास्त्र से संज्ञासंज्ञिभाव बोधित होता है, वहाँ भी पहले - "स्वं रूपम्-" शास्त्र से 'वृद्धि' आदि संज्ञाशब्द का अपने समानानुपूर्वीक स्वरूप के साथ ग्राह्यत्व-ग्राहकत्व शक्तिभेद

'वृद्धिरि'- त्यत्र विभक्तिः, अनन्तरम् उभयोः संज्ञासंज्ञिभावः, एवं भेदाभावस्थलेऽपि बोध्यम् ॥ ५९ ॥

इत्यादौ यत्रापि भिन्नरूपाणां संज्ञासंज्ञिभावसम्बन्धो बोध्यते, तत्रापि पूर्वं वृद्ध्यादिशब्दानां ग्राह्यत्व-ग्राहकत्वशक्तिभेदकल्पितं भेदमुररीकृत्याभिन्नेऽपि ''स्वं रूपम्'' इतिशास्त्रेण संज्ञासंज्ञिभावो बोध्यते, तदनन्तरं तैः प्रत्यायितानां वृद्ध्यादीनामादैचां च भिन्नरूपाणां संकेतो बोध्यते । अत एव प्राक् स्वरूपबोधका वृद्ध्यादिशब्दाः स्वरूपेणार्थवन्त एव प्रातिपदिकत्वात् सुबन्ताः पदत्वमापन्ना आदैच्प्रत्यायितैराकारैकारादिभिर्वर्णैस्तादात्म्यसंकेतरूपं संज्ञासंज्ञिसम्बन्धं यथा लभन्ते, तथैवाभिन्नोऽप्यग्न्यादिशब्दः कल्पितभेदमूलकं संज्ञासंज्ञिभावसम्बन्धं लभतेऽत्र कः सन्देहः? ॥ ५९ ॥

से अभिन्न में ही भेद की कल्पना द्वारा संज्ञासंज्ञिभाव बोधित होता है, तदनन्तर ही वृद्धि आदि शब्द से बोधित वृद्धि आदि शब्द का आदैच् आदि से बोधित आदैच् आदि के साथ तादात्म्यरूप संकेतज्ञान कराया जाता है, अत एव स्वरूप का बोधक होने से अर्थवान् वृद्धि आदि शब्द प्रातिपदिकसंज्ञक होकर सुप्विभक्ति की उत्पत्ति से पदत्व व साधुत्व को प्राप्त करते हैं, तो ऐसी स्थिति में जहाँ संज्ञाशब्द से अभिन्न रूप संज्ञी का ''स्वं रूपम्-'' इत्यादि शास्त्र से संज्ञासंज्ञिभाव बोधित होता है, वहाँ भी वैसे ही विधिसूत्रघटक अग्नि आदि शब्द का लक्ष्यघटक अग्नि आदि समानानुपूर्वीक शब्द के साथ वस्तुतः अभेद में ही स्थलभेदोपाधिक भेद की कल्पना द्वारा संज्ञासंज्ञिभाव सम्बन्धरूप संकेतग्रह सुलभ है ॥ ५९ ॥

अग्निशब्दस्तथैवायमग्निशब्दनिबन्धनः ।
अग्निश्रुत्यैति संबन्धमग्निशब्दाभिधेयया ॥ ६० ॥

प्रत्येकार्थप्रकाशिका

प्रकृते उपसंहरति - 'अग्निशब्दे' ति । तथैवाग्निशब्दस्य निबन्धनः = बोधकोऽयम् अग्निशब्दः = सूत्रघटकः,

---

आनन्दा

शब्दस्य ग्राह्यत्वे ग्राहकत्वे च संज्ञासूत्रस्थं वृद्ध्यादिशब्दं दृष्टान्तमुक्त्वा प्रकृतमुपसंहरन् विधिसूत्रस्थम् 'अग्न्यादिशब्दं' दार्ष्टान्तिकं संगमयति - 'अग्निशब्द' इति ।

अन्वयः - तथा एव अग्निशब्दनिबन्धनः अयम् अग्निशब्दः अग्निशब्दाभिधेयया अग्निश्रुत्या संबन्धम् एति ।

व्याख्या - तथा = संज्ञासूत्रघटक-वृद्ध्यादिशब्दवत् एव अग्निशब्दनिबन्धनः= अग्निशब्दस्य बोधकः - अयम् = ''अग्नेर्ढक्'' इति विधिसूत्रघटकः अग्निशब्दः अग्निशब्दाभिधेयया = लक्ष्यघटकाग्निशब्दस्वरूपमात्रार्थकया अग्निश्रुत्या = अग्निशब्देन वस्तुतोऽभिन्नेनापि लक्ष्यलक्षणघटकत्वोपाधिना कल्पितभेदेन संबन्धम् = तादात्म्यसंकेतरूपं संज्ञासंज्ञिभावम् एति = लभते ।

सूर्यमाया

''स्वं रूपम्-'' शास्त्र से अभिन्न शब्द का स्वयं स्व से संज्ञासंज्ञिभाव विधान में वृद्धिसंज्ञासूत्र के वृद्धिशब्द को दृष्टान्त बताकर विधिसूत्र के 'अग्नि'शब्द में दार्ष्टान्तिक रूप में संज्ञासंज्ञिभाव का संगमन करते हैं - 'अग्निशब्द' इत्यादि ।

अर्थ : - जैसे वृद्धिसंज्ञासूत्र में 'वृद्धि'शब्द पहले स्वस्वरूप 'वृद्धि' शब्द का बोधक होता है, उसके पश्चात् अन्यत्र आदैच् संज्ञी का, वैसे ही विधिसूत्र में 'अग्नि'शब्द स्वस्वरूप 'अग्नि'शब्द का पहले बोधक होता है, उसके पश्चात्

अग्निशब्दोऽभिधेयोऽर्थो यस्यास्तयाऽग्निश्रुत्या = प्रयोगघटकेन संबन्धम् एति = प्राप्नोति । सूत्रघटकोऽग्निशब्दः केवलशब्द-

---

विमर्शः - यथा संज्ञासूत्रस्थो वृद्धिशब्द आदैच्-प्रत्युपस्थापितै-र्भिन्नरूपैराकारादिभिः संज्ञासंज्ञिसम्बन्धलाभात् प्रथमं स्वसमानानुपूर्वीकेणा-भिन्नरूपेण 'वृद्धि'शब्देन ''स्वं रूपम्-'' इतिशास्त्रबोधितेन सह संज्ञासंज्ञिभावं सम्बन्धं लभते । तदनन्तरमेव 'आदैच्'प्रत्युपस्थापितैराकारादिभि र्भिन्नरूपैः सह स्वोपस्थापितो वृद्धिशब्दः संज्ञासंज्ञिभावं लभते, न तु संज्ञासूत्रस्थो वृद्धिशब्दः, तथा ''अग्नेर्ढक्'' इति विधिसूत्रस्थोऽग्निशब्दः स्वाभिन्नेन

विधिसूत्र के उस अग्निशब्द से बोधित प्रयोगस्थ अग्निशब्द का बोधक होता है, जिसके साथ ''स्वं रूपम्-'' सूत्र से संज्ञासंज्ञिभाव सम्बन्ध को प्राप्त करता है ।

आशय : - जैसे संज्ञासूत्रों में 'वृद्धि - गुण' आदि शब्द से बोधित वृद्धि-गुण आदि शब्द का आदैच् - अदेङ् आदि शब्द से बोधित आदैच् - अदेङ् आदि भिन्नरूप शब्द के साथ संज्ञासंज्ञिसम्बन्ध बोधित होता है, उससे पहले 'वृद्धि' आदि शब्द का स्वयं 'वृद्धि' आदि अभिन्नरूप शब्द के साथ संज्ञासंज्ञिभाव ''स्वं रूपम्-'' शास्त्र से बोधित होता है । वैसे ही विधिसूत्र - ''अग्नेर्ढक्'' इत्यादि में प्रयुक्त 'अग्नि'शब्द का अपने अभिन्न रूप प्रयोगस्थ 'अग्नि'शब्द के साथ ''स्वं रूपम्-'' शास्त्र से संज्ञासंज्ञिभाव बोधित होता है । अत एव विधिसूत्रस्थ अग्निशब्द से बोधित प्रयोगस्थ अग्निशब्द 'ढक्' आदि कार्य का भागी होता है । विधिसूत्रस्थ और प्रयोगस्थ अग्निशब्द वस्तुतः अभिन्न होने पर भी विधिसूत्रस्थ अग्निशब्द केवल स्वरूपपरक अग्निशब्दार्थक होता है, किन्तु प्रयोगस्थ अग्निशब्द दाहजनक 'अग्नि' अर्थ का वाचक होता है, जो कि ढक् आदि कार्य का भागी होता है ।

यहाँ यह अवधेय है कि 'वृद्धि' आदि संज्ञाशास्त्रस्थ शब्द का अभिन्नरूप 'वृद्धि' आदि शब्द से कल्पित भेद मानकर पहले संज्ञासंज्ञिभाव बोधित होने के

बोधकः संज्ञा, अर्थबोधकप्रयोगस्थाग्निशब्दः संज्ञीति काल्पनिक-भेदव्यवहारेणोपपाद्य इति भावः ॥ ६० ॥

समानरूपेण लक्ष्यस्थाग्निशब्देन सह "स्वं रूपम्-" इतिशास्त्रेण संज्ञासंज्ञिभावसम्बन्धं लभते । तथा च विधिसूत्रस्थाग्निशब्देनोपस्थापितो लक्ष्यस्थोऽग्निशब्दो ढक्कार्यं लभते, न तु विधिसूत्रस्थः । विधिसूत्रस्थोऽग्निशब्दः केवलं स्वस्वरूपप्रत्यायकः संज्ञा भवति, न तु कार्यभाक्, लक्ष्यस्थोऽग्निशब्दस्तु ज्वालामालार्थकः संज्ञी कार्यभाक्, इति विवेकः ॥ ६० ॥

अनन्तर ही वृद्धिशब्द से बोधित वृद्धिशब्द का आदैच्-शब्द से बोधित आदैच शब्द के साथ संज्ञासंज्ञिभाव बोधित होता है । क्योंकि संकेतज्ञान से पहले संज्ञासूत्र में प्रयुक्त वृद्धिशब्द आदैच् का बोधक नहीं हो सकता । बोधकता के विना 'वृद्धि'शब्द अर्थवत्त्व के अभाव में सुबुत्पत्ति तथा पदत्व का लाभ नहीं कर सकता । अत एव अगत्या वृद्धिशब्द को "स्वं रूपम्-" शास्त्र से अपने शब्दस्वरूप का बोधक मानना अपरिहार्य है । इस प्रकार जैसे वृद्धिशब्द का अपने अभिन्नरूप वृद्धिपद से संज्ञासंज्ञिभाव प्रथमतः बोधित होता है, ऐसे ही विधिसूत्रस्थ अग्निशब्द का अभिन्नरूप प्रयोगस्थ अग्निशब्द से संज्ञासंज्ञिभाव "स्वं रूपम्-" शास्त्र से बोधित होता है ॥ ६० ॥

यो य उच्चार्यते शब्दो नियतं न स कार्य्यभाक् ।
अन्यप्रत्यायने शक्तिर्न तस्य प्रतिबध्यते ॥ ६१ ॥

प्रत्येकार्थप्रकाशिका

ननु उच्चारित एव शब्दः कथन्न कार्यान्वयीत्यत आह - 'यो य' इति । यो यः शब्द उच्चार्यते स नियतम् = निश्चितम्

आनन्दा

''अर्थोपसर्जनीभूतान्'' - (५४) इत्यत आरभ्य - लोके शास्त्रे वोच्चारितस्य शब्दस्य स्वभावत अर्थप्रत्यायकत्वेन परार्थत्वात् कार्यान्वयाभाव उपपादितः, तमेव द्रढयन् पुनरुपपादयति- 'यो य' इति ।

अन्वयः - यः यः शब्दः उच्चार्यते, सः नियतम् कार्यभाक् न, तस्य अन्यप्रत्यायने शक्तिः न प्रतिबध्यते ।

व्याख्या - यः यः = कश्चन स्वातिरिक्तस्य प्रत्यायकतया संज्ञाभूतः शब्द उच्चार्यते = लोके 'गामानय' इत्यादौ, शास्त्रे ''गोपयसोर्यत्'' इत्यादौ वा गवादिशब्दः प्रयुज्यते, सः = उच्चार्यमाणः सर्वः संज्ञाशब्दः स्वयं नियतम्= नियमेन कार्यभाक् = कार्ययोगी न भवति, किन्तु यः संज्ञी स कार्यभाग् भवति । यत्र तु अर्थे कार्यस्य बाधः, तत्रोच्चार्यमाणः शब्दोऽपि कार्यभाग् भवति, यथा लोके - 'गामुच्चारय' इत्यादौ ।

सूर्यमाया

लोक अथवा शास्त्र में उच्चारित शब्द स्वयं किसी कार्य का अन्वयी नहीं होता है, इसका पुनः प्रकारान्तर से उपपादन करते हैं - 'यो य' इत्यादि ।

अर्थ : - जो जो शब्द उच्चारित होता है, वह नियतरूप में कार्य का अन्वयभागी नहीं होता है, किन्तु कहीं अर्थ का कार्यान्वय में बाध होने पर उच्चारित शब्द भी कार्य का अन्वयी होता है ।

उच्चारित शब्द कार्य का अन्वयी भले ही न होवे, एतावता उसकी जो अर्थबोधकता शक्ति है, वह नहीं नष्ट होती है, अतः वह किसी न किसी अर्थ का बोधक होता ही है ।

सर्वत्र कार्य्यभाक् = कार्य्यान्वयी न, किन्तु यत्रार्थे कार्यस्य बाधः, तत्रैव शब्देऽपि कार्यान्वयित्वम्, यथा- 'गामुच्चारय'।

नन्वेवं तस्य स्वरूपबोधनेन कार्यभागित्वेऽर्थप्रत्यायकत्वं न स्यादिति चेत्तत्राह - तस्य = स्वरूपबोधकस्यापि शब्दस्य अन्यप्रत्यायने = इतरार्थबोधने संज्ञिभूततुल्यरूपशब्दान्तरबोधने वा शक्तिः = बोधकत्वसामर्थ्यं न प्रतिबध्यते= न विहन्यते । शब्दस्य हि उच्चार्यमाणस्य प्रत्यायकत्वं स्वभावः, स न जातु नश्यति । शब्दो हि क्वचित् स्वातिरिक्तं सास्नादिमत्पिण्डमर्थम् क्वचिच्च स्वतुल्यरूपं शब्दान्तरं वा कमप्यर्थं प्रत्याययत्येव स्वभावबलात् । शब्दस्य प्रत्यायकत्वशक्तिर्न केनापि कदापि प्रतिबध्यते ।

विमर्शः - लोके शास्त्रे वा यो यः शब्द उच्चार्यते स स स्वातिरिक्तं स्वनिष्ठवृत्तिज्ञानाधीनोपस्थितिविशेष्यं कमप्यर्थमुपस्थाप्य क्षीणबलत्वात् स्वयं कार्यान्वयं न लभते, किन्तु स उच्चार्यमाणः शब्दो यमर्थं प्रत्याययति, स एवार्थः कार्यान्वयं लभते ।

स चार्थो द्विविधः - गवादेः शब्दस्य सास्नादिमत्पिण्डादिरर्थः, शब्दस्वरूपं च-"स्वं रूपमिति" शास्त्रबलात्, शब्देऽर्थे च खण्डशः शक्तिस्वीकाराद्वा । तत्र लोके 'गामानय' इत्यादौ प्रयुक्तगोशब्दस्य न क्रियाऽन्वयोऽयोग्यत्वात्, किन्तु तदर्थस्य सास्नादिमत्पिण्डस्यैव । 'गामुच्चारय' इत्यादौ तु यत्रार्थे क्रियान्वयस्य बाधः, तत्र शब्देऽपि क्रियान्वयः, शब्दस्यापि प्रातिपदिका-

---

आशय : - उच्चारित शब्द जैसे संज्ञारूप में अन्य किसी अर्थ का बोधक होता है, वैसे "स्वं रूपम्-" शास्त्र के वचन से स्वयं स्व से बोध्य भी होता है । लोक में 'गामानय' इत्यादि वाक्य में उच्चारित गो शब्द सास्ना (गलकम्बल) वाले व्यक्तिरूप अर्थ का बोधक होने से स्वयम् आनयन क्रिया का अन्वयी नहीं होता है, किन्तु 'गामुच्चारय' इत्यादि वाक्य में 'शब्द' स्वपरक होने से उच्चारण आदि क्रिया का अन्वयी भी होता है, क्योंकि उच्चारण-श्रवण आदि शब्द का ही होता है, अर्थ का नहीं । व्याकरणशास्त्र में - "अग्नेर्ढक्, गोपयसोर्यत्" इत्यादि विधिसूत्र में उच्चारित 'अग्नि-गो' आदि शब्द 'आग्नेयम्-गव्यम्' इत्यादि लक्ष्यों में स्थित 'अग्नि-गो' आदि शब्द का बोधक होने से वह स्वयं 'ढक्-यत्' आदि

अत एव नियत इति पदम् इति भावः । इदमग्रे ६३ श्लोके स्फुटीभविष्यति ।

र्थत्वात् । शास्त्रे तु - ''गोपयसोर्यत्, अग्नेर्ढक्'' इत्यादौ सूत्रे य उच्चार्यमाणो गोशब्दादिः स न यत्प्रत्ययादिकार्यं लभते, किन्तु स्वं रूपमिति शास्त्रपरिभाषणात् तेन बोधितो यो लक्ष्यस्थो गोशब्दादिः स एव यदादिप्रत्ययकार्यं लभते । विधिसूत्रस्थस्य गोशब्दस्य तुल्यरूपलक्ष्यस्थ-शब्दान्तरबोधकत्वेऽपि लक्ष्यस्थगोशब्दस्य सास्नादिमत्पिण्डार्थबोधकता शक्तिर्न प्रतिबध्यते, तस्य बोधकताशक्तेः केनापि प्रतिबन्धाभावात्, बोधकत्वं हि शब्दस्योच्चारितस्य स्वभावः, स्वं रूपं बोधयत्वर्थान्तरं वा । यत्रार्थे कार्यस्य बाधस्तत्र स्वं रूपमेव बोधयति । अत एवाह- 'नियतं न स कार्यभाक्' इति ।

प्रत्यय विधि का अन्वयभागी नहीं होता, किन्तु उससे बोध्य-लक्ष्यस्थ-अग्नि आदि शब्द से ही ढक्-यत् आदि प्रत्यय का विधान होता है ।

यहाँ यह अवधेय है कि - विधिसूत्र में तथा साध्य प्रयोगों में, उभयत्र 'अग्नि-गो' आदि शब्द समान रूप में उच्चारित होते हैं, अन्तर यह है कि - विधिसूत्र में लक्ष्य का बोधक संज्ञारूप में शब्द- उच्चारित है, किन्तु लक्ष्य प्रयोगों में बोध्य संज्ञी रूप में शब्द उच्चारित है, बोधकरूप में उच्चारित संज्ञाशब्द कार्यभागी नहीं होता है, क्योंकि वह परार्थ है, किन्तु बोध्यरूप में उच्चारित - तुल्यरूप संज्ञीशब्द ही कार्यभागी होता है । संज्ञाशब्द संज्ञी को उपस्थित करके कृतार्थ हो जाता है, अतः उसका कार्यान्वय नहीं होता । संज्ञी शब्द उद्देश्यरूप में प्रधान तात्पर्यविषय होता है, अतः वह कार्य का अन्वयी होता है । इसके साथ ही विधिसूत्र में उच्चारित शब्द लक्ष्यस्थशब्द का केवल बोधक होता है, स्वयं वह बोध्य नहीं । अत एव वह अपने रूप में कभी कार्य का अन्वयभागी नहीं होता, किन्तु लक्ष्य - 'प्रयोग' के अन्तर्गत उच्चारित अग्नि आदि शब्द संज्ञीरूप में बोध्य तथा संज्ञारूप में लोकप्रसिद्ध अर्थ का बोधक, उभयरूप होता है । एक ओर वह विधिसूत्रस्थ अग्निशब्द का बोध्य होता है, तो दूसरी ओर वह ज्वालामाला वाले 'अग्नि' आदि लोकप्रसिद्ध अर्थ का बोधक भी होता है । वह

ननु तर्हि अर्थबोधकता शक्तिरपि न स्यादत आह- तस्य= शब्दस्य अन्यप्रत्यायने = इतरबोधने शक्तिः, न प्रतिबध्यते= प्रतिबन्धकाभावान्न विनश्यतीति सारः ॥ ६१ ॥

यो यः शब्द उच्चार्यते स सर्वत्र नियमेन कार्यभाग् न भवति, क्वचित्तु यत्रार्थे कार्यस्य बाधस्तत्रोच्चार्यमाणः शब्दः कार्यभाग् भवत्येव, यथा- 'गामुच्चारय' इत्यादौ ।

एतावता - 'यत्र यत्र शब्दे उच्चार्यमाणत्वं, तत्र तत्र कार्यभाक्त्वाभाव' इति सामान्यतो व्याप्तिरपाकृता भवति, स्वरूपपरत्वे व्यभिचारात् ।

तस्मात् अन्य प्रत्यायकत्वेनोच्चार्यमाणो न कार्यभाक्, प्रत्याय्यत्वेनोच्चार्यमाणस्तु कार्यभाग् भवत्येवेति वचनं वरम् ॥ ६१ ॥

बोध्यरूप में 'ढक्' आदि शास्त्रीय कार्य का अन्वयी होता है, बोधकरूप में नहीं । हाँ, वह लोकप्रसिद्ध अर्थ का अवश्य बोधक भी होता है । बोधकरूप में कार्य का अन्वयी न होने से उसकी अपनी अर्थबोधकता शक्ति समाप्त नहीं हो जाती, किन्तु सुरक्षित रहती है ।

यहाँ सामान्य रूप में यह कहना उचित नहीं है कि जो भी कहीं उच्चारित शब्द है, वह कहीं भी कार्य का अन्वयभागी नहीं होता । क्योंकि विधिसूत्र में स्वरूप का बोधक संज्ञाशब्द तथा लक्ष्य में बोध्य संज्ञी शब्द दोनों ही उच्चारित होते हैं, तभी तो लक्ष्यस्थ शब्द अपने अर्थ का बोधक भी होता है । अतः यहाँ इतना ही अभिप्रेत अर्थ है कि किसी अन्य का बोधक रूप में उच्चारित 'संज्ञाशब्द' कार्य का अन्वयभागी नहीं होता, किन्तु बोध्य रूप में उच्चारित 'संज्ञी' ही कार्य का अन्वयभागी होता है ॥ ६१ ॥

उच्चरन् परतन्त्रत्वात् गुणः कार्यैर्न युज्यते ।
तस्मात्तदर्थैः कार्याणां सम्बन्धः परिकल्प्यते ॥ ६२ ॥

प्रत्येकार्थप्रकाशिका

कार्यान्वयाभावे कारणमाह - 'उच्चरन्नि' ति । गुणः = विशेषणीभूतः कार्यैः = आनयनादिभिः न युज्यते = नान्वितो

आनन्दा

प्राक् प्रतिपादिते - 'उच्चारितशब्दस्य कार्यान्वयाभावे' बीजं प्रदर्शयन् उच्चारितशब्दबोध्यस्यार्थस्य कार्यान्वयमाह - 'उच्चरन्' इत्यादि ।

अन्वयः - उच्चरन् परतन्त्रत्वाद् गुणः कार्यैः न युज्यते, तस्मात् तदर्थैः कार्याणां सम्बन्धः परिकल्प्यते । इति सरलोऽन्वयः ।

व्याख्या - उच्चरन् = अर्थबोधनाय लोके शास्त्रे वा प्रयुज्यमानः शब्दः परतन्त्रत्वात् = अर्थाधीनत्वात् गुणः = बोधनीयेऽर्थे उपसर्जनीभूतः, अत एव कार्यैः = विधेयक्रियादिभिः न युज्यते = नान्वेति, 'गुणानां च परार्थत्वादसम्बन्ध' इति हि न्यायः ।

तस्मात् = उच्चारितस्य शब्दस्य स्वार्थे गुणीभूतत्वेन कार्यान्वयाभावाद्धेतोः तदर्थैः = तस्योच्चारितशब्दस्य बोध्यैरर्थैः कार्याणाम् = लोके -

---

सूर्यमाया

पूर्वोक्त बोधकरूप में उच्चारित शब्दों का कार्य से सम्बन्ध न होने में तथा उच्चरित शब्द के बोध्य अर्थों का कार्य से सम्बन्ध होने में मूल कारण बताते हैं - 'उच्चरन्' इत्यादि ।

अर्थ : - अपने स्वरूप से इतर अर्थ का बोध कराने के लिए उच्चारित शब्द अर्थ के पराधीन प्रयुक्त होने से गुणभूत वह स्वयं कार्यों से अन्वित नहीं होता है, अतः उच्चारित शब्द के बोध्य अर्थों के साथ कार्यों के सम्बन्ध की कल्पना की जाती है ।

भवतीत्यर्थः, तत्र हेतुमाह - उच्चरन् परतन्त्रत्वात् = पारार्थ्यादिति यावत् ।

आनयनादिक्रियाणाम्, शास्त्रे-विधेयप्रत्ययादीनां वा सम्बन्धः = अन्वयः परिकल्प्यते = विधीयते ।

विमर्शः - यथा हि लोके 'गामानय' इत्यादिवाक्ये सास्नादिमत्पिण्डमर्थं बोधयितुं तदुपायतया गवादिशब्दाः प्रयुज्यन्ते, इत्यर्थाधीन एव शब्दप्रयोगः । यमर्थं बोधयितुं शब्दः प्रयुज्यते, सोऽर्थः प्रधानः, शब्दस्तु तदुपायतया तमर्थं प्रति भवत्यप्रधानः, शब्दप्रयोगस्यार्थपरतन्त्रत्वात् । प्रधानीभूतः शब्दबोध्यः सोऽर्थः साधनतया क्रियास्वन्वयं लभते, शब्दस्त्वर्थे गुणीभूतः परार्थत्वात क्रियास्वन्वयं न लभते, तथा शास्त्रे "अग्नेर्ढक्" इत्यादिसूत्रे प्रयुज्यमाना अग्न्यादिशब्दाः समानरूप-लक्ष्यशब्दान्तरबोधने परतन्त्रा ढगादिकार्यान्वयं न लभन्ते, किन्तु ततोऽन्ये तदर्थभूता बोध्या लक्ष्यघटका अग्न्यादिशब्दास्तु कार्यान्वयं लभन्ते ।

आशय : - अर्थ के बोध के लिए शब्द का प्रयोग किया जाता है, अतः अर्थ के अधीन प्रयोग होने से शब्द अर्थ का उपसर्जन होकर अप्रधान बन जाता है, उसका स्व में तात्पर्य न होने से - अर्थात् परार्थ होने से विधेय कार्यों के साथ अन्वय नहीं होता है, किन्तु उसका तात्पर्यविषय - उद्देश्यभूत अर्थ प्रधान होने से कार्य का अन्वयी होता है ।

लोक में तथा शास्त्र में समान रूप से उच्चारित शब्द अर्थपरक होने से अर्थ का पराधीन होता है । हाँ, यह अन्तर अवश्य है कि लोक में 'गो' आदि शब्द का अर्थ चक्षुरिन्द्रिय से ग्राह्य तत्तद् व्यक्तिरूप होता है, जिसका आनयन आदि योग्य क्रिया से सम्बन्ध किया जाता है, किन्तु "अग्नेर्ढक्-गोपयसोर्यत्" आदि व्याकरण के विधिसूत्रों में उच्चारित - 'अग्नि-गो' आदि शब्द का विवक्षित अर्थ - चक्षुर्ग्राह्य - 'व्यक्ति' न होकर श्रोत्रेन्द्रिय से ग्राह्य - स्वसमानरूप शब्द होता है, जिससे 'ढक्-यत्' आदि प्रत्यय कार्य किया जाता है ।

तस्माद्धेतोः तदर्थैः = शब्दार्थैः कार्याणाम् = आनयनादीनाम् सम्बन्धः परिकल्प्यते = अन्वयो भवतीत्यर्थः ॥ ६२ ॥

एवं चोच्चारितो बोध्यार्थपरतन्त्रो बोधक एव भवति न बोध्यः । उच्चारितशब्दबोध्यः स चार्थः – क्वचित् चक्षुरादिग्राह्यः, क्वचिच्च श्रोत्रग्राह्यस्तुल्यरूपः शब्दः ।

तदयमत्र निष्कर्षः – बोधकतया प्रयुक्ताः शब्दा न कार्यभाजो बोध्यार्थपरतन्त्रत्वेन गुणत्वात्, उच्चारितशब्दबोध्यास्तु चक्षुरादिग्राह्याः श्रोत्रग्राह्या वा अर्थाः कार्यभाजो बोध्यत्वेन प्रधानत्वात्, इति ॥ ६२ ॥

अर्थात् – सूत्र में उच्चारित जो 'अग्नि-गो' आदि शब्द है, उससे प्रत्यय कार्य नहीं होता है, प्रत्युत उससे बोधित – प्रयोग घटक जो तुल्य रूप 'अग्नि-गो' आदि शब्द है, उससे प्रत्यय कार्य किया जाता है । प्रयोगघटक-अग्नि आदि शब्द भले ही अपने लोकप्रसिद्ध अर्थ का बोध करावे, किन्तु उससे प्रत्यय कार्य सम्भव नहीं, अतः ''स्वं रूपम्-'' शास्त्र के वचन से विधिसूत्र में उच्चारित शब्द का संज्ञी जो तुल्यरूप 'अग्नि' आदि शब्द है, उससे 'ढक्' आदि कार्य होता है, विधिसूत्र में उच्चारित शब्द से नहीं, क्योंकि वह संज्ञास्वरूप परार्थ गुणीभूत है, एवं संज्ञाशब्द संज्ञी का बोध कराके कृतार्थ हो निवृत्त हो जाता है ॥ ६२ ॥

सामान्यमाश्रितं यद्यदुपमानोपमेययोः ।
तस्य तस्योपमानेषु धर्मोऽन्यो व्यतिरिच्यते ॥ ६३ ॥

प्रत्येकार्थप्रकाशिका

नन्वेवम् - "अग्नेर्ढगि" त्यादौ अर्थभूतस्यापि - अग्न्यादिशब्दस्य ढगादिकार्ययोगो न स्यादुच्चारणपरतन्त्रत्वात्, अनुच्चारितस्य अर्थबोधकत्वासम्भव - इत्यत आह -

---

आनन्दा

यथा विधिसूत्रे "अग्नेर्ढक्" इत्यादावुच्चारितस्याग्निशब्दस्य बोध्यार्थपरतन्त्रत्वाद् ढगादिकार्ययोगो न भवति, तथा तेन बोधितस्य प्रयोगघटकाग्निशब्दस्यापि लोकेऽर्थबोधनायोच्चारितस्योच्चारितत्वसादृश्ंयात् कार्ययोगो न स्यात्, उच्चारितस्यैव शब्दस्यार्थबोधकत्वादित्याशङ्कां परिहरति- 'सामान्यम्' इति ।

अन्वयः - उपमानोपमेययोः यत् यत् सामान्यम् आश्रितम् तस्य तस्य उपमानेषु अन्यः धर्मः व्यतिरिच्यते ॥

व्याख्या - उपमानोपमेययोः = उपमानं च उपमेयं च तयोः, यथा- 'ब्राह्मणवदधीते क्षत्रियः' इत्यादौ ब्राह्मणक्षत्रिययोः, यद् यत् सामान्यम् =

सूर्यमाया

विधिसूत्र में उच्चारित - 'अग्नि' आदि शब्द के समान ही प्रयोग में उच्चारित 'अग्नि' शब्द भी अन्य का बोधक होने से 'ढक्' आदि कार्य का अन्वयी नहीं हो सकेगा? क्योंकि वह भी समान रूप से परार्थ है, इस शङ्का का निवारण करते हैं - 'सामान्यम्' इत्यादि ।

अर्थ : - उपमान और उपमेय का जो जो समान धर्म उपमा के लिए ग्रहण किया जाता है, तत्तद् उपमेय के समान धर्म से अतिरिक्त धर्म भी उममानों में विशेष होता है । अतः धर्मभेद के परिणामस्वरूप उपमान से उपमेय का भेद भी होने से सर्वत्र उनका एकरूप ही कार्य नहीं होता, अतः उक्त शङ्का ठीक नहीं ।

'सामान्यमि' ति । उपमानोपमेययो र्यद् यत् सामान्यम् = सादृश्यम् - उच्चारणपरतन्त्रत्वादिकमाश्रितम् तस्य तस्य =

समानो धर्मः अध्ययनकर्तृत्वम् आश्रितः = उपादीयते तस्य तस्य = उपमेयस्य क्षत्रियादेस्तत्सामान्यधर्मस्य सर्वस्य उपमानेषु = उपमितिकरणेषु ब्राह्मणादिषु अन्यो धर्मः = सामान्याद् भिन्नोऽपि धर्मः कश्चन विशेषः व्यतिरिच्यते = आधिक्येन वर्तते, यत्कृतभेदमाश्रित्य सादृश्यव्यपदेशः, सर्वथाऽभेदे नास्ति सादृश्यम् । सादृश्यं हि - तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वम् । तथा प्रकृते विधिसूत्रस्थाग्निशब्दस्य प्रयोगघटकाग्निशब्दस्य चोच्चारितत्वरूप-सामान्यधर्मस्य तुल्यत्वेऽपि विधिसूत्रस्थस्य बोधकत्वेन प्रकारतायाः, प्रयोगघटकस्य तु बोध्यत्वेन विशेष्यतायाः सत्त्वेन धर्मभेदोऽप्यस्ति, येन कस्यचित् कार्ययोगः, कस्यचिन्नेति व्यवस्थाभेद उपपद्यते ।

विमर्शः - दृष्टान्तदार्ष्टान्तिकयोरुपमानोपमेयभावसिद्ध्यर्थं नूनं कश्चन समानो धर्म आश्रीयते, तावता न तयोः सर्वथा भवत्यभेदो येन सादृश्यात् तयोः सर्वो व्यवहारोऽभिन्न एव भवेत् । तस्माद् विधिसूत्रस्थाग्न्यादिशब्ददृष्टान्तेन प्रयोगस्थ-तत्तुल्यरूपाग्न्यादिशब्दस्यापि कार्यान्वयाभावापत्तिर्नाशङ्कनीया, सर्वांशेऽभेदे दृष्टान्तदार्ष्टान्तिकभाव एवोच्छिद्येत, भेदे सत्येव दृष्टान्त-दार्ष्टान्ति-

---

आशय : - उपमान - उपमेय व्यवहार अथवा दृष्टान्त-दार्ष्टान्तिक व्यवहार भेदगर्भित सादृश्यमूलक होता है, सर्वथा अभेदमूलक नहीं । उपमान से उपमेय का भेद रहने पर ही उभयसाधारण किसी धर्म को एक मानकर सदृश व्यवहार होता है, वस्तुतः वह साधारण धर्म भी आश्रय व्यक्ति के भेद से भिन्न होता है, एक नहीं ।

जैसे - 'ब्राह्मण के समान क्षत्रिय पढ़ता है' यहाँ उपमान - ब्राह्मण तथा उपमेय क्षत्रिय के एक अध्ययनकार्य को साधारणधर्म मानकर क्षत्रिय की उपमा ब्राह्मण से की जाती है, वस्तुतः अध्ययनकर्ता व्यक्ति के भेद से दोनों की अध्ययनक्रिया भिन्न है, अभिन्न नहीं । किन्तु दोनों की उपमा के लिए जब

सर्वस्येत्यर्थः, उपमानेषु अन्यो धर्मः = प्रकारतासमानाधिकरणत्व - विशेष्यतासमानाधिकरणत्वेति विशेषधर्मः व्यतिरिच्यते = भिद्यते, सर्वांशस्य साम्ये दृष्टान्तताहानिः ।

कभावस्य कल्पनात् । 'ब्राह्मणवदधीते क्षत्रिय' इत्यादौ ब्राह्मणक्षत्रिययोर्भेदे सत्येवाध्ययनक्रियासाम्यमाश्रित्य तयोरुपमानोपमेयभावः कल्प्यते । उपमेये क्षत्रिये व्यपदिश्यमानमध्ययनमुपमाने ब्राह्मणेऽपि नूनं समन्वीयते । यदि तु 'ब्राह्मणाध्ययनेन तुल्यं क्षत्रियाध्ययनम्' इत्युच्यते, तर्हि तत्राप्यध्येतृभेदेन भिन्नयोरेवाध्ययनयोः सम्यग्ज्ञानपूर्वकसम्यगुच्चारणादिकं सौष्ठवं कमपि व्यतिरिक्तं साधारणं धर्ममाश्रित्योपमानोपमेयभावः कल्प्यते ।

इदं त्ववधेयम् - क्वचिदुपमानोपमेययो र्वास्तवे भेदे सत्युभयसाधारणं कमप्येकं धर्ममाश्रित्य तयोः कल्पितेऽभेदे सादृश्यमुपचर्यते, यथा - ब्राह्मणक्षत्रिययोरध्ययनकृतं सादृश्यम् । क्वचित्तु अभेदेऽपि कल्पितं भेदमुपचर्य सादृश्यव्यपदेशः, यथा विधिसूत्रस्थ-प्रयोगस्थयोरग्निशब्दयोरभिन्नानुपूर्वीकत्वेनैकत्वेऽपि 'सूत्र-प्रयोगरूप'स्थानभेदेन शब्दपरत्वार्थ-

---

अध्ययन को एक साधारणधर्म की कल्पना की जाती है, तब दोनों के अध्ययन की एकता सिद्ध करने के लिए तुलना की जाती है कि - ब्राह्मण के अध्ययन के तुल्य क्षत्रिय का अध्ययन है, अर्थात् ब्राह्मण का अध्ययन उपमान होता है तथा क्षत्रिय का अध्ययन उपमेय होता है । यहाँ भी दोनों के अध्ययनों के उपमान-उपमेयभाव के लिए अध्ययन से अतिरिक्त दोनों अध्ययनों का एक साधारण धर्म-'सम्यक् ज्ञानपूर्वक सम्यक् उच्चारण' आदि सौष्ठव को मानकर अत्यन्त सादृश्यमूलक अध्ययन को भी एक साधारणधर्म मान लिया जाता है, जिससे क्षत्रिय की उपमा ब्राह्मण से की जाती है । इस प्रकार कल्पित एक साधारणधर्म मूलक सादृश्य रहने से उपमान और उपमेय का 'ब्राह्मणवदधीते क्षत्रियः' इत्यादि स्थलों में कहीं अध्ययनरूप एक कार्य से योग भले ही इष्ट हो,

अयमाशयः - अस्तु सर्वत्राग्निशब्द उच्चारणपरतन्त्रः, किन्तु यः शाब्दबोधे विशेष्यः स कार्यभाक्, यथा- "अग्नेर्ढक्" इत्यादौ, यत्र विशेषणम् तत्र न, यथा - 'अग्निमानय'। उभयत्रोच्चारणपरतन्त्रत्वसामान्यधर्मस्य सत्त्वेऽपि विशेष्यत्व - विशेषणत्वेति - विशेषधर्मयो र्भेदादिति हृदयम् ॥ ६३ ॥

परत्वोपाधिभेदमाश्रित्य प्रकारतासमानाधिकरणत्व-विशेष्यतासमानाधिकरणत्वरूपधर्मभेदे सति तयोरुच्चारणपरतन्त्रत्वमर्थपरतन्त्रत्वं वा कमपि साधारणं धर्ममाश्रित्य सादृश्यव्यपदेशः। वास्तवं कल्पितं वा भेदमाश्रित्यैव सर्वत्र भवति सादृश्यम्, न सर्वथाऽभेदे। अत एव न सर्वत्रोपमानोपमेययोरभिन्नकार्ययोग इति हृदयम् ॥ ६३ ॥

किन्तु उपमेय और उपमान का भिन्न धर्ममूलक भेद भी रहने से सर्वत्र एक कार्य से योग नहीं हो सकता है। अतः विधिसूत्रस्थ 'अग्नि' आदि शब्द के दृष्टान्त से प्रयोग के अन्तर्गत 'अग्नि' आदि शब्द का ढक् आदि कार्य के अभाव की कल्पना नहीं की जा सकती, क्योंकि विधिसूत्र में अग्निशब्द अन्य के बोधक रूप में विशेषण है, और साध्य प्रयोग में अग्निशब्द बोध्यरूप में विशेष्य है ॥ ६३ ॥

गुणः प्रकर्षहेतुर्यः स्वातन्त्र्येणोपदिश्यते ।
तस्याश्रिताद् गुणादेव प्रकृष्टत्वं प्रतीयते ॥ ६४ ॥

प्रत्येकार्थप्रकाशिका

अन्यस्माद् व्यावर्तके धर्मेऽपि धर्मान्तरमस्तीत्युपपादयति- 'गुण' इति । प्रकर्षहेतुः = 'शुक्लो घट' इत्यादौ द्रव्यस्य

आनन्दा

भेदकधर्मेऽपि प्रकर्षहेतुः धर्मान्तरमस्तीत्युक्तमर्थं गुणदृष्टान्तेनोपपादयति- 'गुणः' इति ।

अन्वयः - प्रकर्षहेतुः यः गुणः स्वातन्त्र्येण उपदिश्यते तस्य प्रकृष्टत्वम् आश्रिताद् गुणाद् एव प्रतीयते ।

व्याख्या - प्रकर्षहेतुः = घट इति सामान्यतो निर्दिश्यमानाद् घटद्रव्याद् द्रव्यान्तरस्यान्यघटव्यक्तेर्भेदहेतुर्यः गुणः = 'शुक्लो घटः - नीलो घटः' इत्यादौ घटादिद्रव्याश्रिततया विशेषणतया प्रयुज्यमानः शुक्लनीलादिः, सोऽपि यदि स्वातन्त्र्येण = 'रजतघटे शुक्लः - मृद्घटे नीलः' इत्यादौ विशेष्यतया उपदिश्यते = व्यपदिश्यते तर्हि तस्य = रजतघटादिवृत्तिशुक्लादिगुणस्य प्रकृष्टत्वम् = जलादेः शुक्लगुणादुत्तमत्वम् आश्रिताद् = स्वनिष्ठाद् गुणात्= शुक्लतरत्व-शुक्लतमत्वलक्षणात्तारतम्याद् एव प्रतीयते ।

सूर्यमाया

एक द्रव्य से अन्य द्रव्य का प्रकर्षहेतु विशेषधर्म में भी प्रकर्षहेतु विलक्षण धर्मान्तर की सत्ता दृष्टान्त द्वारा सिद्ध करते हैं - 'गुणः' इत्यादि ।

अर्थ : - एक द्रव्य की अन्य द्रव्य से विशेषता (व्यावृत्ति) का ज्ञानकारण जो गुण (धर्म) विशेष है, वह जब प्रधान रूप में स्वतन्त्र प्रयुक्त होता है, तो उसका भी अन्य से उत्कृष्टत्व - उसमें स्थित अन्य गुण से (धर्मविशेष से) ज्ञात होता है ।

आशय : - सामान्यरूप में प्रयुक्त - द्रव्यवाचक 'घट' आदि शब्द अन्य घट-व्यक्ति से अव्यावृत्तस्वरूप घटसामान्य का बोधक होता है । प्रकर्ष अथवा

द्रव्यान्तराद् विशेषकरणे कारणम् यो गुणः = शुक्लादिः स्वातन्त्र्येण = 'घटे शुक्ल' इत्यादौ उपदिश्यते = प्रयुज्यते,

---

एवं च द्रव्ये विशेषणतया स्थितो भेदकः शुक्लादिर्गुणो यथा द्रव्यस्य धर्मस्तथा द्रव्यधर्मे शुक्लादिगुणेऽपि विशेषणतया स्थितो गुणान्तरात् स्वाश्रयगुणस्य भेदकः शुक्लतरत्वादिर्गुणो धर्मान्तरं वर्तते । इत्थं च धर्मे धर्मान्तरम्, तत्रापि धर्मान्तरमिति नास्ति क्वचन कश्चनावच्छेदो धर्मस्य ।

विमर्शः - स्वतः प्रकर्षापकर्षरहितमव्यावृत्तस्वरूपं निमित्तान्तरेण व्यावर्त्य प्राधान्येन व्यपदिश्यमानं हि द्रव्यम्, न तु वैशेषिकाभिमतम् - 'गुणक्रियाश्रयो द्रव्यम्' इति । गुणस्तु द्रव्यप्रकर्षहेतुः परतन्त्रः । भेद्यं द्रव्यम्, भेदको गुण इति वैयाकरणसमयः ।

एवं च 'शुक्लो घट' इत्यादौ घटद्रव्यस्य प्रकर्षहेतुर्यो गुणः सोऽपि यदा 'राजतघटे शुक्लतरं रूपम्' इत्यादौ प्राधान्येन प्रोच्यते, तदा प्रधानत्वाद् विशेष्यभूतस्य तस्य रूपस्य पटादिनिष्ठशुक्लादिगुणेभ्यः प्रकृष्टत्वं स्वनिष्ठ-शुक्लतरत्वादिगुणादेव गम्यते, इति राजतघटद्रव्यस्य प्रकर्षहेतुः शुक्लरूपं

अपकर्ष आदि विशेष से रहित अत एव अव्यावृत्तस्वरूप प्रधानरूप में प्रतीयमान 'द्रव्य' होता है, तथा एक द्रव्य से अन्य द्रव्यव्यक्ति का भेदक व प्रकर्षक विशेषणरूप में प्रयुक्त 'गुण' होता है । यह वैयाकरणों की मान्यता है ।

गुण के विना एक द्रव्यव्यक्ति का अन्य द्रव्यव्यक्ति से उत्कृष्टत्व आदि का ज्ञान होना तो दूर है, उनके भिन्नस्वरूप का निर्धारण भी सम्भव नहीं है । उनका विशेषस्वरूप तो अपने में आश्रित विशेषणीभूत-गुणविशेष से ही निर्धारित होता है ।

जैसे 'शुक्लो घटः' इस वाक्य में विशेषणरूप में प्रयुक्त शुक्ल गुण ही एक घटव्यक्ति का नील-रक्त आदि अन्य घटव्यक्ति से भेदज्ञान कराता है । उसके विना केवल 'घट' शब्द सर्वसाधारणस्वरूप - घट का ग्राहक होता है, किसी विशेषस्वरूप का नहीं । सुवर्ण का, रजत का अथवा मिट्टी का घड़ा होवे,

तस्य = घटगतशुक्लादिगुणस्य प्रकृष्टत्वम् = पटादिगतशुक्लादिगुणतो विलक्षणत्वम् आश्रिताद् = घटगतशुक्ले स्थिताद् गुणात्= शुक्लतरत्वादितः प्रतीयते = ज्ञायते ।

यथा गुणस्तथा शुक्लरूपस्यापि प्रकर्षहेतुः शुक्लतरत्वं गुणो भेदकत्वाद् धर्मान्तरं सिध्यति ।

अयमत्र सारः - सामान्यतया 'घट' इति प्रोक्तेऽव्यावृत्तस्वरूपं घटद्रव्यमात्रं प्रतीयते, किन्तु घटद्रव्यस्य नीलघटादितो व्यावृत्तये यदा 'शुक्लो घट' इत्यत्र शुक्लरूपं विशेषणतयोपादीयते, तदा तस्य नीलादितो व्यावर्तकत्वाद् गुणत्वम् । यदा तु राजतघटादिनिष्ठशुक्लरूपस्य पटादिनिष्ठशुक्लरूपाद् व्यावृत्तये 'राजतघटे शुक्लतरं रूपम्' इति प्राधान्येन रूपं द्रव्यत्वेनोपादीयते, तदा राजतघटरूपनिष्ठशुक्लतरत्वस्य पटादिनिष्ठशुक्लरूपतो व्यावर्तकत्वाद् गुणत्वम्, रूपस्य तु ततः प्रधानत्वाद् द्रव्यरूपत्वं प्रतिपद्यते । तद्धि रूपं द्रव्यभूतं सत् स्वनिष्ठात् शुक्लतरत्वाद् धर्माद् गुणभूतात् प्रकृष्टत्वव्यपदेशं लभते । एवं यदा सुवर्णघटनिष्ठभास्वरशुक्लरूपस्य राजतघटनिष्ठाभास्वरशुक्लरूपाद् व्यावृत्तये 'सुवर्णघटे शुक्लतमं रूपम्' इत्युच्यते, तदा

सामान्यतया घड़े के रूप में सब एक हैं। उनका परस्परभेद तथा एक से अन्य के प्रकर्ष का कारण केवल गुण होता है । क्योंकि वही विशेषणरूप में द्रव्य के भेद व प्रकर्ष का कारण है ।

किन्तु वह भी जब विशेष्यरूप में प्रयुक्त होकर प्रधानीभूत द्रव्यरूपता को प्राप्त कर लेता है, तो उसकी भी किसी से उत्कृष्टता का ज्ञान-उसमें आश्रित तथा उसके विशेषणरूप में प्रयुक्त किसी अन्य धर्म से होता है, जो कि उसका गुण हो जाता है ।

जैसे 'पट में रूप शुक्ल है, उससे अधिक रजतघट में शुक्लतर रूप है, उससे भी अधिक सुवर्णघट में शुक्लतम रूप है' इन सभी वाक्यों में रूप गुण विशेष्य होने से द्रव्यरूप में विवक्षित है, तथा पट के शुक्लरूप से रजतघट के शुक्ल रूप का प्रकर्षबोधक शुक्लतरत्व धर्म एवं उससे भी सुवर्णघट के शुक्ल

अयम्भावः - 'शुक्लो घट' इत्यत्र नीलघटतो विशेषकारकः शुक्लगुणः, तस्यापि पटगतशुक्लादितो विशेषकारकः - तद्गतशुक्लतरत्वादिधर्मः, एवं प्रकारेण विशेषकारकधर्मेऽपि भेदकधर्मान्तरम्, इति ॥ ६४ ॥

सुवर्णघटनिष्ठभास्वरशुक्लरूपनिष्ठशुक्लतमत्वस्य राजतघटनिष्ठाभास्वर-शुक्लरूपतो व्यावर्तकत्वाद् गुणत्वम्, सुवर्णघटरूपस्य तु प्राग् गुणीभूतस्येह प्रधानत्वेन विवक्षितत्वाद् द्रव्यत्वं पर्यवस्यति ।

इत्थं च यथापूर्वं भेदकत्वात् प्रकर्षहेतुत्वाच्च शुक्लादिगुणस्योत्तरोत्तरं भेदकधर्मान्तरकल्पनाधारायां नास्ति क्वचन धर्मे धर्मान्तरकल्पनाया विराम इत्यहो निरवधि धर्मे धर्मान्तरकल्पनासाम्राज्यम् । धर्मे धर्मान्तरकल्पनाया अविरामे नानवस्था दोषाय, विशेषणविशेष्यभावविनिमयेन गुणप्रधानभावस्य प्रयोगभेदेन विवक्षाऽधीनत्वात् ॥ ६४ ॥

रूप का प्रकर्षबोधक शुक्लतमत्वधर्म विशेषणरूप में उत्तरोत्तर रूप का गुण हो जाता है । इस प्रकार द्रव्य का विशेषाधायक शुक्ल आदि गुणों का भी विशेषाधायक - शुक्लतरत्व शुक्लतमत्व आदि धर्म पूर्वपूर्व का उत्तरोत्तर विशेषण रूप में गुण हो जाता है । अतः पूर्वपूर्व धर्म में उत्कर्ष का आधायक उत्तरोत्तर धर्मान्तर की कल्पना का कोई विराम नहीं । प्रयोगभेद से धर्म में धर्मान्तर की कल्पना की अनवस्था शिरोधार्य है । जगत् में सब वस्तु सातिशय हैं, निरतिशय तो - एक अद्वितीय शब्दब्रह्म ही है ॥ ६४ ॥

तस्याभिधेयभावेन यः शब्दः समवस्थितः ।
तस्याप्युच्चारणे रूपमन्यत्तस्माद्विविच्यते ॥ ६५ ॥

प्रत्येकार्थप्रकाशिका

तत् प्रकृतेऽपि संघटयति - 'तस्ये' ति । तस्य = सूत्रस्थाग्निशब्दस्य अभिधेयभावेन = वाच्यत्वेन समवस्थितः=

आनन्दा

सूत्रस्थाग्निदृष्टान्तेन प्रयोगस्थाग्निशब्दस्य कार्याभावापत्तिशङ्कां परिहर्तुं दृष्टान्तदार्ष्टान्तिकयोः समानधर्मे सत्यपि धर्मान्तरस्यापि सद्भावं संसाध्य तं प्रकृतेऽपि संगमयति - 'तस्ये'ति ।

अन्वयः - तस्य अभिधेयभावेन समवस्थितः यः शब्दः तस्य उच्चारणे अपि तस्माद् अन्यत् रूपम् विविच्यते।

व्याख्या - तस्य = ''अग्नेर्ढक्'' इत्यादिविधिसूत्रस्थाग्निशब्दादेर्दृष्टान्तस्य अभिधेयभावेन = बोध्य-संज्ञित्वेन समवस्थितः = व्यवस्थितः यः शब्दः = दार्ष्टान्तिकरूपः प्रयोगघटकः, तस्य = समानानुपूर्वीकत्वेन सरूपस्य प्रयोगस्थस्य, उच्चारणे अपि = अर्थबोधनायोच्चारणपरतन्त्रत्वे समानेऽपि तस्मात् = शब्दस्वरूपबोधकात् विधिसूत्रस्थाग्निशब्दाद् प्रकारीभूताद् अभिधानरूपाद् अन्यत् = भिन्नम् रूपम् = अभिधेयरूपं विशेष्यभूतं

सूर्यमाया

विधि सूत्र में उच्चारित 'अग्नि' आदि शब्द के दृष्टान्त से प्रयोग में उच्चारित 'अग्नि' आदि शब्द का भी 'ढक्' आदि कार्य के अभाव की आशङ्का का समाधान करने के लिए पूर्व श्लोक में दृष्टान्त और दार्ष्टान्तिक का धर्मभेद तथा वैषम्य सिद्ध कर प्रकृत में उसका समन्वय करते हैं - 'तस्य' इत्यादि ।

अर्थ : - विधिसूत्र में स्थित संज्ञारूप 'अग्नि' आदि शब्द का अभिधेय संज्ञी रूप में अवस्थित जो लक्ष्य 'अग्नि' आदि शब्द है, उसका ज्ञान एक समान ही उच्चारण के अधीन होने पर भी विधिसूत्र में स्थित संज्ञारूप 'अग्नि' आदि शब्द से उसका अभिधेय प्रयोगस्थ 'अग्नि' आदि शब्द का विलक्षण धर्म भी पृथक् होता है ।

बुद्धो यः शब्दः = प्रयोगादिस्थः तस्योच्चारणेऽपि = उच्चारणाधीनत्वेऽपि तस्मात् = सूत्रघटकाग्निशब्दात् अन्यत् रूपम् = धर्मान्तरम् विविच्यते = भिद्यते, इत्यर्थः ।

प्रयोगस्थं विविच्यते = पृथक्त्वेन ज्ञायते । विधिसूत्रस्थस्याभिधानत्वं प्रकारत्वं च, प्रयोगस्थस्य त्वभिधेयत्वं विशेष्यत्वं चेति विवेकः ।

विमर्शः - शब्दः क्वचिदभिधानरूपः क्वचिदभिधेयरूपश्च । अभिधानाभिधेययोरुभयोस्तुल्यरूपत्वेऽपि सूत्रेऽभिधानरूपाच्छब्दात् प्रयोगे तस्याभिधेयरूपः शब्दो भिद्यते । विधिसूत्रे शब्दः स्वरूपबोधनायोच्चार्यमाणस्तत्र प्रकारीभूतोऽभिधानव्यपदेशं लभते, प्रयोगे तु तत्तद्व्यक्तिरूपार्थबोधनायोच्चार्य-माणोऽपि स्वरूपबोधनायानुच्चार्यमाणः प्राधान्येन वाच्यतया विवक्षितः शब्दोऽभिधेयव्यपदेशं लभते । उभयोरुच्चारणपरतन्त्रत्वे समानेऽपि विधिसूत्रे स्वरूपपरत्वेन लक्ष्ये च व्यक्तिरूपार्थपरत्वेन प्रकारताविशेष्यताभेदात् विधि-सूत्रेऽभिधायकाच्छब्दात् तस्याभिधेयभूतः प्रयोगस्थः शब्दो व्यतिरिक्तः कल्प्यते ।

आशय : - विधिसूत्र में उच्चार्यमाण जो 'अग्नि' शब्द है, वह अपने समान ही रूपवाले भिन्न शब्द का वाचक व बोधक - अभिधानरूप है, संज्ञारूप है, जो कि इतर का बोधक होने से विशेषणरूप है, उससे बोधित जो प्रयोग में वाच्य-रूप में स्थित है, वह प्रधानरूप में उसका बोध्य-संज्ञी रूप है, अतः विशेष्य है । अत एव एक समान रूप होने पर भी स्थितिभेद से धर्मभेद भी होने के कारण अभिधानशब्द और अभिधेयशब्द परस्पर एक दूसरे से पृथक् हो जाते हैं । जब भी किसी शब्द का स्वरूप बताने के लिए उसका उच्चारण किया जाता है, तब उच्चार्यमाणशब्द अभिधान अर्थात् संज्ञा बन जाता है, तथा उससे बोध्य शब्द उससे पृथक् संज्ञी रूप में प्रधान अभिधेय अर्थ बन जाता है । यह भेद यद्यपि विवक्षाभेद से कल्पित है, तथापि कल्पितभेदमूलक ही अभिधान और अभिधेय

अयं सारः - वाच्यवाचकयोरुभयोरुच्चारणाधीनत्वस्याविशेषेऽपि वाचके सूत्रघटके स्वरूपार्थमात्रसम्बन्धित्वम्, प्रयोगादिस्थ-वाच्ये व्यक्त्यर्थ-सम्बन्धित्वमिति धर्मभेदोऽस्त्येवेति बोध्यम् ॥ ६५ ॥

इदं तु बोध्यम् - लोके 'गामानय' इत्यादौ वाचकस्य श्रोत्रग्राह्यस्य गवादिशब्दस्य वाच्यश्चक्षुरादिग्राह्यः सास्नादिमानर्थो वस्तुतो भिन्नः । इह तु शास्त्रे ''स्वं रूपम्-'' इतिशास्त्रेण शास्त्रीयसंज्ञाशब्दं विहाय तुल्यानुपूर्वीकयोः शब्दयोर्वस्तुत ऐक्येऽपि संज्ञासंज्ञिभावे बोधितेऽभिधायकत्वेनाभिधेयत्वेन च कल्पितो भेद आश्रीयते । वस्तुतः 'प्रत्युच्चारणं शब्दो भिद्यते' इति हि नयः । सर्वत्राभिधानाभिधेययोर्भेद एव व्यपदेशबीजम् । एवं चाभिधायकाभिधेययोः शब्दयोर्धर्मभेदस्य जागरूकत्वेन विधिसूत्रस्थाग्निदृष्टान्तेन दार्ष्टान्तिकस्य प्रयोगस्थस्याग्निशब्दस्य कार्यान्वयाभावो नोपपद्यते, तयोर्वैषम्यस्य कार्यभेद-नियामकत्वात्, इति फलितार्थः ॥ ६५ ॥

व्यवहार होता है । समस्त भेद कल्पित हैं, इससे क्या? भेदमूलक ही सारा जगत् व्यवहार है । वस्तुतः प्रति उच्चारणभेद से शब्द भिन्न होता है । फलतः अभिधायक शब्द से अभिधेय शब्द भिन्न है, किसी एक समान धर्म को लेकर सादृश्य मान लिया जाय, तावता उपमान और उपमेय का - दृष्टान्त और दार्ष्टान्तिक का सकल कार्य एक रूप ही नहीं होता, अपितु भिन्न कार्य भी होता है । अतः प्रकृत में विधिसूत्रस्थ - 'अग्नि' शब्द के दृष्टान्त से प्रयोगस्थ 'अग्नि' शब्द का समानरूप में कार्याभाव की कल्पना नहीं की जा सकती, क्योंकि बोधकशब्द से बोध्यशब्द भिन्न है ॥ ६५ ॥

प्राक् संज्ञिनाऽभिसम्बन्धात् संज्ञा रूपपदार्थिका ।
षष्ठ्याश्च प्रथमायाश्च निमित्तत्वाय कल्पते ॥ ६६ ॥

प्रत्येकार्थप्रकाशिका

यथा''ऽग्नेर्ढगि''त्यादौ स्वरूपार्थबोधकाः शब्दाः, तथा शक्तिग्राहकवाक्येऽपि स्वरूपार्थबोधका - इत्युपपादयति - 'प्रागि' ति । संज्ञिना 'आदैच्' इत्यनेनाभिसम्बन्धात् प्राक् =

आनन्दा

'ढग् - यदादि'विधिसूत्रे स्वरूपपरत्वेन - प्रयोगे च व्यक्त्याद्यर्थ-परत्वेनाभिधानाभिधेययोः शब्दयोर्भेदं प्रतिपाद्येदानीं संज्ञाशास्त्रे संज्ञायाः संकेतग्रहात् पूर्वं स्वरूपार्थकत्वं - संकेतग्रहानन्तरं तु तयोर्बोधकत्वेन बोध्यत्वेन च भेदं सप्रमाणमुपपादयति - 'प्राक्' इति ।

अन्वयः - संज्ञिना अभिसम्बन्धात् प्राक् संज्ञा रूपपदार्थिका षष्ठ्याश्च प्रथमायाश्च निमित्तत्वाय कल्पते ।

व्याख्या - संज्ञिना = 'आदैच्' इत्यादिना सह अभिसम्बन्धात् प्राक्= वृद्ध्यादिसंज्ञाया बोध्यबोधकसम्बन्धकल्पनात् पूर्वं संकेतबोधनकाले, संज्ञा= वृद्ध्यादिः रूपपदार्थिका = रूपम् - स्वरूपमेव पदार्थो यस्याः सा, यावदर्थान्तरे संज्ञिविशेषे संकेतबोधनं न कृतं तावत् स्वरूपेणार्थेनार्थवती सती प्रातिपदिकत्वात् षष्ठ्याः = ''उञः'' इत्यादौ 'उञ्' शब्दात् स्वरूपार्थकात्

सूर्यमाया

संज्ञाशास्त्र में संज्ञाशब्द का स्वरूपमात्र अर्थ रहने में उससे विभक्ति की उत्पत्ति प्रमाण बताते हैं - 'प्राक्' इत्यादि ।

अर्थ : - संज्ञी के साथ संज्ञा का संकेतरूप सम्बन्धग्रह होने से पहले संज्ञाशब्द अपने स्वरूपमात्र - अर्थ का बोधक रहता हुआ अर्थवत्त्वमूलक प्रातिपदिक-संज्ञक होने से 'भेदपक्ष में' संज्ञीशब्द से षष्ठी तथा संज्ञाशब्द से प्रथमा विभक्ति, अभेदपक्ष में संज्ञा और संज्ञी दोनों शब्दों से केवल प्रथमा विभक्ति का निमित्त होने में समर्थ होता है ।

''वृद्धिरादैच्'' - आदैच् वृद्धिसंज्ञको भवतीति वाक्यार्थबोधात् पूर्वम्, संकेतग्रहाभावेन शक्तिज्ञानाभावात् 'आदैच् संज्ञी - वृद्धिः संज्ञा' इति ज्ञानाभावः, अतस्तद्वाक्ये इत्यर्थः, संज्ञा =

भेदविवक्षायां भेदसम्बन्धार्थिकायाः षष्ठीविभक्तेः, प्रथमायाश्च= प्रगृह्यादि-संज्ञाशब्दात् प्रथमाविभक्ते विंधेयस्वरूपसमर्पिकायाः, निमित्तत्वाय कल्पते= प्रातिपदिकत्वेन कारणं भवति । ''वृद्धिरादैच्'' इत्यादौ बाहुल्येन तु समानविभक्तिक - 'समानाधिकरण' प्रयोगस्वारस्येन 'आदैचो वृद्धिपदाभिन्ना' इत्येवं संज्ञासंज्ञिनोरभेदविवक्षायां संज्ञाशब्दात् संज्ञिशब्दाच्चोभयस्मात् स्वरूपेणार्थवत्त्वात् प्रातिपदिकत्वेन प्रथमाया एव भवति निमित्तम् । एवं च संज्ञाशब्दः प्राक् स्वरूपमभिधायैवानन्तरमर्थान्तरेण संकेतरूपसम्बन्धग्रहे जातेऽर्थान्तरं बोधयति । अर्थान्तरेण सम्बन्धग्रहात् प्राग् यदि संज्ञाशब्दः स्वरूपमपि न बोधयेत्तदाऽर्थवत्त्वाभावेन प्रातिपदिकसंज्ञाया अभावे तस्माद् विभक्तिरपि न स्यात्, तथात्वे तु संज्ञासूत्रे - 'वृद्धिः, आदैच्' इत्यादि-विभक्त्यन्तनिर्देशो नोपपद्येत । तदेतदव्यवहितोत्तरकारिकायामुपपा-दयिष्यते ।

विमर्शः - संज्ञाशब्दस्य भवत्यभिधेयद्वयम्, श्रोत्रग्राह्यं प्रथमं स्वकीयं स्वरूपम्, द्वितीयं च तदतिरिक्तं चक्षुरादिग्राह्यं बाह्यम् । तत्र संकेतग्रहकाले संज्ञाशब्दः संज्ञाशास्त्रे स्वरूपार्थकः । तत्र प्रमाणं तस्माद् विभक्त्युत्पत्तिः । संकेतग्रहात् प्राक् संज्ञाशब्दो नहि संज्ञिनं बोधयितुं क्षमः, संकेतग्रहाभावात् । एवं स्थितौ स यदि स्वरूपमपि न बोधयेत्तर्हि अर्थवत्त्वाभावेन

आशय : - 'वृद्धि' आदि संज्ञा का 'आदैच्' आदि संज्ञी से संज्ञाशास्त्र द्वारा संकेतरूप सम्बन्धग्रह करने के समय अथवा पहले संज्ञाशब्द का केवल अपना वर्णानुपूर्वीरूप अर्थ होता है, मुख्यतया विवक्षित संज्ञी नहीं । जब तक संज्ञा का संज्ञी से संकेत सम्बन्ध-नामकरण द्वारा स्थापित नहीं हो जाता, अर्थात् - 'यह जातक देवदत्त है' ऐसा अभेदरूप में अथवा 'इसका देवदत्त नाम है' ऐसा भेदरूप में संज्ञास्वरूप का संज्ञीस्वरूप में समर्पण करके उपसर्जन रूप में मुख्य संज्ञी-परक घोषित नहीं हो जाता, तब तक वह अपने वर्णानुपूर्वी स्वरूप का ही बोध कराता है, संज्ञी का नहीं । ऐसी स्थिति में वह अपने स्वरूप से ही अर्थवान् होने से प्रातिपदिक संज्ञक होकर सुप् विभिक्त का हेतु होता है ।

वृद्धिरिति, रूपपदार्थिका = स्वरूपेणैवार्थवत् षष्ठ्या विभक्तेः प्रथमायाश्च निमित्तत्वाय कल्पते = विभक्त्युत्पत्तिकारणं भवति, अन्यथा अर्थवत्त्वाभावेन प्रातिपदिकत्वाभावाद् विभक्त्युत्पत्तिर्न स्यात्, इति भावः ॥ ६६ ॥

प्रातिपदिकत्वाभावात् प्रथमादिविभक्तिर्न स्यात् । एवं च - "वृद्धिरादैच्" इत्यादौ वृद्ध्यादिशब्दाद् विभक्तिदर्शनमेव तस्य स्वरूपार्थकत्वे प्रमाणम् ।

द्वितीयार्थस्तु बाह्यो व्यक्त्यादिः 'संज्ञी' संकेतग्रहानन्तरं बोध्यते, न ततः प्राक् । यदा बाह्योऽर्थो बोध्यते, तदा स्वरूपार्थस्तस्मिन्नुपसर्जनीभूतः प्रकारतया गम्यते ।

इदं तु बोध्यम् - 'षष्ठ्याश्च प्रथमायाश्च' इत्यत्र प्रथमश्चकारोऽप्यर्थः, द्वितीयोऽवधारणार्थः । एवं च - 'षष्ठ्या अपि प्रथमाया एव' इति तदर्थः । पूर्वत्र - अपिना प्रथमा विभक्तिः समुच्चीयते । तस्मादिह चकारद्वयप्रयोगः सार्थको न निरर्थकः । तथाहि- संज्ञासंज्ञिनो र्भेदपक्षे संज्ञिशब्दात् षष्ठ्याः संज्ञाशब्दात्तु प्रथमायाश्चोभयोरपि विभक्त्योरुत्पत्तिः । यथा - "उञः" इति सूत्रे 'उञः प्रगृह्यम्' इत्यादौ । सामानाधिकरण्याद् "वृद्धिरादैच्" इत्यादौ संज्ञासंज्ञिनोरभेदारोपकल्पे तु स्वरूपार्थकात् संज्ञाशब्दात् संज्ञिशब्दाच्चोभयस्मात् प्रथमैव केवलमिति भावः ॥ ६६ ॥

जैसे लोक में संज्ञा और संज्ञी का अभेद मानकर अथवा भेद मानकर दोनों प्रकार से नामकरण संस्कार किया जाता है । वैसे ही इस व्याकरण शास्त्र में भी दोनों प्रकार से संज्ञासूत्र द्वारा संकेतग्रह किया जाता है । "उञः" इस सूत्र में भेद मानकर संज्ञी 'उञ्' शब्द से षष्ठी विभक्ति होती है, तथा 'प्रगृह्य'संज्ञाशब्द से प्रथमा विभक्ति होती है, तो अभेदपक्ष में - "वृद्धिरादैच्" इत्यादि सूत्र में संज्ञा और संज्ञी दोनों शब्दों से प्रथमा विभक्ति होती है, फलतः दोनों समान विभक्त्यन्त का समानाधिकरण प्रयोग से अभेद बोधित होता है । इस प्रकार संज्ञासूत्रों में संज्ञा और संज्ञी दोनों शब्दों से विभक्ति का दर्शन उनके स्वरूपार्थकत्व में प्रमाण है ॥ ६६ ॥

तत्रार्थवत्त्वात् प्रथमा संज्ञाशब्दाद्विधीयते ।
अस्येति व्यतिरेकश्च तदर्थादेव जायते ॥ ६७ ॥

प्रत्येकार्थप्रकाशिका

ते उभे विभक्ती उपपादयति - 'तत्रे'ति । अस्यान्वयः सुलभः । अयम्भावः -''वृद्धिरादैच्'' इति संकेतग्राहकवाक्ये

आनन्दा

संज्ञासंज्ञिनोर्भेदाभेदविवक्षाभेदेन पूर्वनिर्दिष्टयोः 'षष्ठी-प्रथमा-विभक्त्योः' प्रयोगस्थलभेदमुपपादयति - 'तत्रार्थवत्त्वात्' इति ।

अन्वयः - तत्र प्रथमा अर्थवत्त्वात् संज्ञाशब्दाद् विधीयते, अस्य इति व्यतिरेकः च तदर्थाद् एव जायते ।

व्याख्या - तत्र = तयोः षष्ठीप्रथमयोर्मध्ये प्रथमा = विभक्तिः अर्थवत्त्वात्= स्वरूपेणार्थवतः संज्ञाशब्दात् = आदैच्स्वरूपबोधकात् 'आदैच्' - शब्दात् संज्ञास्वरूपबोधकाद् वृद्धिशब्दाच्च उभयस्माद् विधीयते, यथा - ''वृद्धिरादैच्'' इत्यादौ सोऽयमिति संज्ञासंज्ञिनोरभेदकल्पे । यदा - अस्य इति व्यतिरेकः= 'अस्यायं वाचक' इति शब्दार्थयोर्भेदः कल्प्यते, तदा तदर्थात् = तस्य

सूर्यमाया

भेदपक्ष में केवल संज्ञीशब्द से षष्ठी विभक्ति तथा अभेदपक्ष में संज्ञा और संज्ञी दोनों शब्दों से समान रूप में प्रथमा विभक्ति के विधान का उपपादन करते है - 'तत्र' इत्यादि ।

अर्थ : - उन - षष्ठी और प्रथमा विभक्तियों में से (शब्द से अर्थ का तादात्म्य मानने पर) अपने अभिन्न - स्वरूप अर्थवाला होने से संज्ञाशब्द से प्रथमा का विधान किया जाता है । (फलतः उसका समानाधिकरण - संज्ञीशब्द से भी प्रथमा होती है), और 'इसका यह वाचक है' ऐसा भेदसम्बन्ध मानने पर उस संज्ञाशब्द का अर्थ जो संज्ञीशब्द है, उससे केवल षष्ठी होती है ।

उभयोः स्वरूपेणार्थवत्त्वेऽपि यदि 'आदैच्-पदाभिन्नं वृद्धिपदम्' इति संज्ञासंज्ञिनोस्तादात्म्याध्यवसायेन शक्तिनियमश्चिकीर्ष्येत,

---

संज्ञाशब्दस्य संकेतविषयादर्थात् - 'उञ्' इत्यादिसंज्ञिशब्दात् एव षष्ठी विभक्तिः, प्रगृह्यादिसंज्ञाशब्दात्तु प्रथमा केवलं जायते । 'तदर्थादेव' इत्येवशब्दः संज्ञाशब्दात् षष्ठीं व्यवच्छिनत्ति । एवं च संज्ञित्वेनाभिमतात् शब्दात् प्रथमा षष्ठी चोभे भवतः, संज्ञाशब्दात्तु प्रथमैवेति फलितार्थः ।

विमर्शः - यथा 'गौर्वाहीकः' इत्यादौ गोवाहीकयोः प्रत्यक्षभेदमपाकृत्य वाहीके गोस्वरूपतामध्यवस्य 'सोऽयम्' इत्यभेदाध्यारोपेण तयोस्तादात्म्यं मत्वाऽभिन्नार्थकत्वादुभयत्र प्रथमायाः समानविभक्ते र्विधानेन समानाधिकरण-प्रयोगबलादुभयोरभेदो बोध्यते - गवाभिन्नो वाहीक इति ।

यथा वा लोके जातकस्य नामकरणकालेऽभिधानादभिधेयस्य जातकस्य प्रत्यक्षभेदमपाकृत्य जातके पिण्डविशेषेऽभिधानस्वरूपतामध्यवस्य- 'अयं देवदत्तः' इत्यभिधानाभिधेययोरभेदाध्यारोपेण तयोस्तादात्म्यलक्षण-संकेतरूपसम्बन्धं गृहीत्वैकार्थकत्वात् समानविभक्तेः प्रथमाया विधानेन समानाधिकरणप्रयोगादभेदो बोध्यते - देवदत्ताभिन्नोऽयं पिण्ड इति ।

आशय : - 'गो' शब्द सास्ना - 'गलकम्बल' वाले पशुव्यक्ति का वाचक है, तथा 'वाहीक' शब्द उससे अत्यन्त भिन्न हल आदि जोतनेवाले मनुष्य का वाचक है, परन्तु वाहीक को गोरूप बताने के लिए वाहीक में गो का तादात्म्य आरोपित करके कहा जाता है कि - वाहीक बैल है - मूर्ख है, तो ऐसी स्थिति में गो-शब्द अपने मुख्य अर्थ बैल का बोधक न होकर मूर्ख व्यक्ति का बोधक हो जाता है । उसके फलस्वरूप 'गौर्वाहीकः' इत्यादि प्रयोगों में - गो और वाहीक इन दोनों शब्दों से समान रूप में प्रथमा विभक्ति का प्रयोग किया जाता है, जिससे दोनों का समानाधिकरण अन्वय से तादात्म्य बोधित होता है । ऐसे ही प्रकृत में जब वृद्धि आदि संज्ञाशब्द का भिन्नरूप - आदैच् अर्थ में अभेद आरोप करके

तदा उभयत्र प्रथमा, यथा - 'गौर्वाहीक' इत्यत्र । यदा तु - 'अस्यायं वाचको भिन्नश्च' एवंरूपेण शक्तिनियमस्तदा एकत्र

तथा प्रकृतेऽपि संकेतग्रहकाले संज्ञाशास्त्रेण संज्ञासंज्ञिनोः प्रसिद्धभेदमपाकृत्य संज्ञिनि संज्ञास्वरूपतामध्यवस्य 'सोऽयम्' इत्यभेदाध्यारोपे वा तादात्म्यलक्षणं तयोः संकेतसम्बन्धं नियम्य स्वरूपेणार्थवत्त्वात् समानविभक्तेः प्रथमाया उभयत्र विधानेन - 'वृद्धिः, आदैच्' इति समानाधिकरणप्रयोगादभेदो बोध्यते - आदैच्पदाभिन्नं वृद्धिपदमिति ।

यदा तु - लोके यथा 'अस्य पिण्डस्याभिधानं देवदत्त' इति व्यधिकरण-प्रयोगाद् अभिधानादभिधेयस्य 'अस्य' इति भेदो व्यपदिश्यते, तदा त्वभिधेयात् षष्ठी, अभिधानात् प्रथमा विधीयत इति विवेकः, एवं प्रकृतेऽपि संज्ञाशास्त्रे संज्ञासंज्ञिनोर्भेदे विवक्षिते संज्ञिशब्दात् षष्ठी विभक्तिः, संज्ञाशब्दात्तु प्रथमा विधीयते, यथा - 'उञः प्रगृह्यम्' इति । तथा च तत्र व्यधिकरणप्रयोगात् संज्ञासंज्ञिनोर्वाच्यवाचकभावरूपभेदलक्षणः संकेतसम्बन्धो बोध्यते ।

संज्ञाशास्त्र से तादात्म्य रूप - संकेत किया जाता है, अर्थात् वृद्धि शब्द का आदैच् में शक्तिनियम किया जाता है, तब संज्ञाशब्द अपने अभिन्नरूप संज्ञी-अर्थ का वाचक अर्थवान् होने से संज्ञा और संज्ञी दोनों प्रातिपदिकसंज्ञक शब्दों से समान रूप में प्रथमा विभक्ति की जाती है, जिससे समानाधिकरण अन्वय बल से संज्ञा और संज्ञी दोनों का अभेद बोधित होता है कि - 'आदैच् पद से अभिन्न वृद्धि पद' है ।

किन्तु जब - संज्ञाशब्द का संज्ञीशब्द से भेद मानकर वाच्यवाचकभाव सम्बन्ध का ज्ञान कराया जाता है, तब संज्ञीशब्द से भेदसम्बन्धार्थक - षष्ठीविभक्ति, तथा संज्ञाशब्द से विधेयबोधक - प्रथमा विभक्ति की जाती है, जैसे ''उञः'' सूत्र में उञ् की प्रगृह्यसंज्ञा होती है- ऐसा भेद अभिमत है ।

षष्ठी - अपरत्र प्रथमा, यथा - ''उञ'' इत्यादौ । स्वरूपेणार्थवदुञ्शब्दस्य प्रगृह्यमिति संज्ञेति तदर्थ इति ॥ ६७ ॥

'तस्य वाचकः प्रणवः', 'ओमित्येकाक्षरं ब्रह्म' इत्यादिश्रुतिस्मृतिप्रसिद्धः संज्ञासंज्ञिनो र्भेदव्यपदेशोऽभेदव्यपदेशो वा षष्ठीप्रवृत्तिहेतुः प्रथमाप्रवृत्तिहेतुश्च । इदं तु बोध्यम् - सर्वे सर्वार्थवाचका इति नये सर्वार्थाभिधानसमर्थशब्दस्य संज्ञाशास्त्रेण संज्ञाकरणज्ञानरूपप्रकरणाद् अर्थान्तराद् व्यवच्छिद्य संज्ञाशब्दस्य संज्ञिनि विशेषे संकेतरूपशक्ति र्नियम्यते, अतः संज्ञाया नियमत्वव्यपदेशः । तदुक्तं शेखरे ''वृद्धिरादैजि''ति सूत्रे - व्यवहाराय नियमः संज्ञायाः संज्ञिनि क्वचिदिति । अज्ञातशक्तिज्ञापकत्वात् संज्ञाशास्त्राणां विधित्वमपि न विरुद्धम् ॥ ६७ ॥

निष्कर्ष में - 'भेद - अभेद' दोनों पक्षों में संज्ञाशब्द से प्रथमा ही होती है, क्योंकि वह विधेयसमर्पक विभक्ति है । किन्तु संज्ञीशब्द से - भेदपक्ष में षष्ठी, संज्ञाशब्द से प्रथमा विभक्ति होती है। अभेदपक्ष में संज्ञीशब्द से भी प्रथमा ही होती है, क्योंकि उसका प्रधान - संज्ञाशब्द से सामानाधिकरण्य विवक्षित है, जिससे उनका अभेद बोधित होता है ॥ ६७ ॥

स्वं रूपमिति कैश्चित्तु व्यक्तिः संज्ञोपदिश्यते ।
व्यक्तौ कार्याणि संसृष्टा जातिस्तु प्रतिपद्यते ॥ ६८ ॥

प्रत्येकार्थप्रकाशिका

"स्वं रूपं शब्दस्ये-" त्यनेन संज्ञासंज्ञिभावो बोध्यते, तत्र केषांचिन्मते व्यक्तिः संज्ञा, केषांचिन्मते जातिः संज्ञा, एवं

आनन्दा

वस्तुतोऽभिन्नेऽपि शब्दस्वरूपे भेदकल्पनया "स्वं रूपम्-" इति सूत्रेण संज्ञासंज्ञिभावो बोधितः । अथ 'जाति-व्यक्ति'भेदेन संज्ञाविषयकं मतभेदं निरूपयति - 'स्वं रूपमिति' इति ।

अन्वयः - कैःचित् 'स्वं रूपम्' इति व्यक्तिः संज्ञा उपदिश्यते, व्यक्तौ संसृष्टा जातिः तु कार्याणि प्रतिपद्यते ।

व्याख्या - कैश्चित् = व्यक्तिवादिभिराचार्यैः 'स्वं रूपम्' इति = स्वं रूपमितिशास्त्रप्रवृत्तिविषये "राजश्वसुराद्यत्" इत्यादौ स्वं रूपमित्यनेन व्यक्तिः = प्रतिनियतस्वरूपविशेषा - राजादिशब्दव्यक्तिः, संज्ञा = ग्राहकं शब्दस्य - 'शब्दनिष्ठजातेः राजशब्दत्वादेः' उपदिश्यते । एवं च व्यक्तिः संज्ञा, जातिः संज्ञिनी - इत्यायातम् । व्यक्तीनां भेदेऽपि जातेरेकत्वान्न लक्ष्यासंग्रहः । जातिवादिभिरपरैस्तु - स्वं रूपमित्यनेन जातिः = शब्दत्वजातिः संज्ञा शब्दस्य = शब्दव्यक्तेः - इत्युच्यते । एतत्पक्षे - व्यक्तौ =

सूर्यमाया

"स्वं रूपम्-" इस सूत्र से अभिन्न शब्द में भी शब्दव्यक्ति के आरोपित भेद से संज्ञासंज्ञिभाव का पूर्व में उपपादन करके अब यहाँ उक्त सूत्र के व्याख्यानभेद से जाति वा व्यक्ति की संज्ञा बताते हैं - 'स्वं रूपम्' इत्यादि ।

अर्थ : - कुछ लोग "स्वं रूपम्-" इस सूत्र से व्यक्ति की संज्ञा होना बताते हैं, तो कुछ लोग बताते हैं कि व्यक्ति में रहनेवाली जाति ही संज्ञा आदि कार्यों को प्राप्त करती है ।

संज्ञित्वं व्यक्तौ जातौ वा मन्यन्ते-इति मतभेदं दर्शयति श्लोकद्वयेन- 'स्वं रूप' मिति । 'स्वं रूपम्' इति विषये राज्ञो

राजादिशब्दव्यक्तौ वक्तृणामुच्चारणभेदेन प्रभिन्नायामपि संसृष्टा = समनुगता जातिः = शब्दत्वसामान्यम्, कार्याणि = शब्दव्यक्तेः संज्ञां, तद्द्वारेण यत्प्रत्ययादिकार्ययोगं च, प्रतिपद्यते = लभते । एवं च जातिः संज्ञा, व्यक्तिः संज्ञिनी, इति व्यक्तिभेदेऽपि जात्या सकलव्यक्तिसंग्रहान्न लक्ष्यासंग्रह आपद्यते । ''स्वं रूपमि''ति सूत्रे ग्राहकमित्यध्याहारे - 'स्वं रूपं ग्राहकं शब्दस्य' इत्यर्थो लभ्यते, ग्राह्यमित्यध्याहारे तु 'स्वं रूपं ग्राह्यं शब्दस्य' इति पक्षभेदः पर्यवस्यति । वस्तुतः संज्ञाप्रकरणबलादिह 'संज्ञा' इति लभ्यत एव । संज्ञाशब्दश्च करणव्युत्पत्त्या ग्राहकपरः, कर्मव्युत्पत्त्या च ग्राह्यपर इत्युभयसंग्रहः । वस्तुतस्तु कर्मव्युत्पत्तिरेवात्र भाष्यसंमतेत्यग्रे स्फुटीभविष्यति ।

विमर्शः - ''स्वं रूपम्-'' इति सूत्रे 'स्वम्' इत्यनेन व्यक्तिर्गृह्यते - 'रूपम्' इत्यनेन च सामान्यं गृह्यते । यदा - शब्दस्य रूपमित्युद्दिश्य स्वम् = व्यक्तिः संज्ञेति विधीयते, तदा व्यक्तिः संज्ञा, जातिः संज्ञिनीति पक्ष आयाति । यदा तु - शब्दस्य स्वमित्युद्दिश्य रूपम् = सामान्यं संज्ञेति विवक्ष्यते तदा जातिः संज्ञा, व्यक्तिः संज्ञिनीति पक्षः पर्यवस्यति । समासेन व्यक्तिः संज्ञेति प्रथमः पक्षो व्यक्तिवादिनाम्, जातिः संज्ञेति द्वितीयः पक्षो जातिवादिनाम् । तदाह प्रकृतसूत्रभाष्ये कैयटः - ''व्यक्तेः सामान्यं

आशय : - व्यक्तिवादी ''स्वं रूपम्-'' इस सूत्र का व्याख्यान करते हैं कि - शब्दव्यक्ति शब्दजाति की संज्ञा है, तो दूसरी ओर जातिवादी व्याख्यान करते हैं कि- शब्दजाति शब्दव्यक्ति की संज्ञा है । जो कि व्याख्यानभेद इस प्रकार है -

''स्वं रूपम्-'' इस सूत्र में संज्ञा के प्रकरणबल से संज्ञापद का स्वत एव लाभ होता है । 'सम्यग् ज्ञायतेऽर्थोऽनया सा संज्ञा' इस करणव्युत्पत्ति से संज्ञाशब्द का ग्राहक (बोधक) अर्थ होता है । इसका 'स्वं रूपम्' इस प्रथमा-विभक्त्यन्त से अन्वय करने पर - 'स्वं रूपं संज्ञा शब्दस्य' यह वाक्य बनता है । जिसका साधारण अर्थ होता है कि - स्व-रूप संज्ञा अर्थात् बोधक होता है - शब्द का ।

यदित्यादौ कैश्चित् = आचार्यैः व्यक्तिः = राजेतिव्यक्तिः संज्ञा उपदिश्यते = बोध्यते । अस्यायमाशयो - यत्र भेदवन्तोऽर्थास्तत्र

संज्ञा, सामान्यस्य वा व्यक्तिरिति व्याख्याने कामचारः" । यद्वा प्रकृते सूत्रे स्वं रूपमित्यनेन व्यक्तिर्गृह्यते - शब्दस्येत्यनेन शब्दत्वजातिस्तदा प्रथमः पक्षः, अथ स्वं रूपमित्यनेन तु जातिर्गृह्यते, शब्दस्येत्यनेन शब्दव्यक्तिस्तर्हि द्वितीयः पक्ष आयाति । व्यक्तिः कार्यं प्रतिपद्यमाना जात्या संसृष्टैव प्रतिपद्यते, जातिरपि कार्यं प्रतिपद्यमाना व्यक्तिद्वारेणैव प्रतिपद्यते । इदं तु बोध्यम् - शास्त्रे व्यक्तेः कार्ययोगित्वेन संस्कारे विवक्षिते व्यक्तेः प्राधान्यम्, नान्तरीयकतया लभ्यमानाया जातेरप्राधान्यम् । जातेः कार्ययोगित्वेन संस्कारे विवक्षिते तु जातेः प्राधान्यम्, नान्तरीयकतया गृह्यमाणाया व्यक्तेरप्राधान्यम् । विवक्षाभेदेन पक्षभेदोऽस्तु, फले तु न भेदः ।

तत्र व्यक्तिवादिनामयमभिप्रायः - यथा गोत्वादिका जातयो महिषीत्वादिजात्यन्तरेभ्यः स्वत एव व्यावृत्ताः, न तु गोत्वादौ गोत्वत्वादिजात्यन्तरमुररीक्रियतेऽनवस्थाऽऽपत्तेः, तथा गोव्यक्तयोऽपि गुणकर्मादिभ्यः स्वत एव व्यावृत्तस्वरूपभेदा जातिं विनैव गुणकर्मादिभ्यो भिन्नत्वेनाध्यवसीयमाना गवादिपदव्यपदेशं लभन्ते । 'नयनानयन-वहन-कर्षणादि' - प्रवृत्तिनिवृत्तिव्यवहारविषया गवादिव्यक्तय एव, न गोत्वादिजातयः । गवादिव्यक्तीनां प्रतिनियतस्वरूपभेदानामपि 'स एवायम्'

यहाँ यदि स्वरूप का अर्थ व्यक्ति करें तथा शब्द से शब्दत्व जाति का ग्रहण करें, तो उसका फलितार्थ यह होता है कि सूत्र में उच्चारित - 'अग्नि - राजन्' आदि शब्दव्यक्ति उनमें रहनेवाली शब्दत्वजाति अर्थात् शब्दसामान्य - 'प्रयोगस्थ शब्द' की संज्ञा है - बोधक है । अतः सूत्र में उच्चारित शब्दव्यक्ति अपने से भिन्न लक्ष्यस्थ शब्द का ग्रहण कराता है । इस प्रकार इस व्याख्यानपक्ष में शब्दव्यक्ति शब्दनिष्ठ जाति की संज्ञा है, यह प्रथम पक्ष निकलता है ।

इसके विपरीत यदि स्वरूप का अर्थ जाति करें तथा शब्द से शब्दव्यक्ति का ग्रहण करें, तो फलितार्थ होता है कि शब्दनिष्ठ जाति शब्दव्यक्ति की संज्ञा है, अर्थात् सूत्र में उच्चारित शब्दसामान्य प्रयोगस्थ शब्दव्यक्ति का ग्राहक होता

सोऽयमिति बुद्ध्युपपादनाय - जातिः, अत्र तु स्वरूपभेदा-

इत्यनुगतबुद्धिनिमित्तत्वेन तासु गोत्वादिजातेः सत्ता त्वनुमीयते । प्रकृते 'वाचक' शब्देष्वपीत्थमेव व्यवस्था । तथाहि- प्रतिनियतस्वरूपभेदा राजादिशब्दव्यक्तयो विनैव राजशब्दत्वजातिं गवादिशब्दव्यक्तिभ्यः स्वत एव व्यावृत्ताः । तत्तत्कर्तृकोच्चारणभेदभिन्नराजादिशब्दव्यक्तीनाम् 'सोऽयम्' इत्यनुगतबुद्धिनियामकतया तत्तच्छब्दवृत्तिजातेरनुमानेऽपि कार्यान्वययोग्यताया अभावेन व्यवहारे नास्ति तस्या आवश्यकता ।

वस्तुतस्तु भेदवत्स्वर्थेषु समनुगतबुद्धये जातिरास्तां तावत्, प्रकृते तु सरूपयोः शब्दयोः संज्ञासंज्ञिसम्बन्धसम्पत्तये कल्पितभेदाभ्युपगमेऽपि स्वभावतः स्वरूपभेदाभावाद् व्यावृत्तैव बुद्धिरुपजायते, इति तदर्थमुपेक्षणीयैवेह जातिर्वराकी कार्योद्वाहे । एवं च "राज्ञो यत्" इत्यादौ विधिसूत्रस्थराजशब्दव्यक्तिः प्रयोगस्थराजशब्दव्यक्तेः संज्ञेति फलितार्थो भवति ।

जातिवादिनां त्वयमाशयः - शुकसारिकापुरुषादिसमुदीरितानां तत्तत्कर्तृकोच्चारणभेदभिन्नानन्तशब्दव्यक्तीनां स्वरूपं जातिमन्तरा नास्ति व्यपदेश्यं, नापि संवेद्यम् । व्यक्ते र्व्यक्त्यन्तराद् व्यावृत्तानुगतैकाकारबुद्धिजनिका जातिरेव भिन्नानामभिन्नव्यवहारप्रयोजिका शब्दप्रवृत्तिनिमित्तमिति गीयते । तदाह भाष्ये- 'नहि गौः स्वरूपेण गौर्नाप्यगौः, गोत्वाभिसम्बन्धात्तु गौः' इति ।

प्रतिनियत-परिमितस्वरूपविशेषा अपि व्यक्तयो जातिं विना नहि शब्देन व्यपदिश्यन्ते, तासामानन्त्यादननुगमात् । जातौ शक्ताः शब्दा जातिमुखेन व्यक्तिं प्रत्याययन्ति । जातिरूपोपरक्ता व्यक्तयो जातिसरूपतामापन्ना

है । इस व्याख्यापक्ष में - शब्द की जाति शब्दव्यक्ति की संज्ञा है, यह दूसरा पक्ष निकलता है । व्यक्ति जाति की संज्ञा होवे अथवा जाति व्यक्ति की संज्ञा होवे, दोनों पक्षों में एक दूसरे से समन्वित ही कार्य के भागी होते हैं । अन्तर केवल यह है कि - व्यक्तिपक्ष में व्यक्ति का कार्य से साक्षात् सम्बन्ध होने से व्यक्ति का प्राधान्य होता है, अविनाभाव रूप में गृहीत जाति का नहीं, एवं जातिपक्ष में जाति से कार्य के सम्बन्ध की विवक्षा होने से जाति का प्राधान्य और अपरिहार्य रूप में ग्राह्य-व्यक्ति का अप्राधान्य होता है । व्यक्तिवादी का तात्पर्य

भावान्नावश्यकता तस्याः । अपरे पुनः - व्यक्तौ संसृष्टा =

जातितादात्म्यापन्नतयैवानुगतैकाकाराः शब्दै र्व्यपदिश्यन्ते संवेद्यन्ते च, स्वतस्तु न व्यपदेश्या नैव संवेद्याः । यथा निमित्तवति घटादौ कार्ये कारक-निमित्तमृदादिस्वरूपप्रत्ययः - 'मृद् घट' इति जायते, तथा निमित्तवति 'गवादिव्यक्तौ' ज्ञाप्येऽर्थेऽविनाभूततया ज्ञापक-निमित्त' जातिस्वरूप'-प्रत्ययो गोत्वतादात्म्यावगाही - 'गौः' इत्याकारकः प्रत्यय उपपद्यते ।

तत्र निमित्तानि - कानिचिद् दृष्टाभिधानानि कानिचिद् अदृष्टाभिधानानि चानुवृत्तशब्द-प्रत्ययौ जनयन्ति । दृष्टमभिधानं येषां निमित्तानां तानि, यथा-गोत्वादीनि । गोत्वादिप्रवृत्तिनिमित्तस्याभिधानानि गोशब्दादीनि दृष्टानि । तानि हि 'गौः' इत्यनुवृत्तशब्दप्रत्ययौ सारूप्येण प्रवर्तयन्ति । अत्रात्यन्तसारूप्येण त्रयमनुवर्तते - जातिः, शब्दः, प्रत्ययश्च ।

अदृष्टाभिधानानि निमित्तानि यथा - उत्पलगन्धत्वादीनि । उत्पलगन्धत्वादेः प्रवृत्तिनिमित्तस्याभिधानानि = उत्पलगन्धादीनि नहि दृष्टानि । नहि उत्पलगन्धशब्द उत्पलगन्धत्वं निमित्तमाह, उत्पलगन्धशब्दस्यो-त्पलसम्बन्धिनो गन्धस्याभिधायकत्वेनोत्पलगन्धत्वजात्यभिधायकत्वाभावात् । उत्पलगन्धशब्दो हि नोत्पलगन्धत्वस्याभिधानं भवितुमर्हति सम्बन्धावच्छिन्न-सम्बन्धिनोऽभिधानात् । न चैतावतोत्पलगन्धत्वं जातिर्नास्तीति वक्तव्यम्, उत्पलजातेरेवैकाश्रयसमवायेन गन्धस्यावच्छेदकत्वस्वीकारात्, परिदृष्टचरोत्प-लद्रव्यस्यासकृद्गन्धमात्रग्रहणे 'स एवायं गन्धविशेष' इत्यनुवृत्तप्रत्ययदर्श-नादुत्पलगन्धत्वजातिविशेषः सिध्यति, परं नहि तस्याभिधानमुत्पलगन्धशब्दः सम्बन्धिवाचकत्वात् ।

है कि जैसे जाति में जाति माने विना ही गोत्व आदि एक जाति अन्य जाति से स्वयं ही व्यावृत्त रहती है, ऐसे ही द्रव्यव्यक्ति भी विना जाति के ही स्वयं अपने नियतरूप में गुण-कर्म आदि से व्यावृत्त रहता है । यह अवश्य है कि नियतस्वरूपभेदवाले असंख्य व्यक्तियों का एकाकार अनुगत व्यवहार के लिए जाति की कल्पना की जाती है, किन्तु कार्य के साथ अन्वय तो प्रत्यक्षसिद्ध व्यक्ति का ही योग्य है । जातिवादी का अभिप्राय है कि - असंख्य व्यक्ति का

आश्रिता जातिः कार्याणि = संज्ञादीनि प्रतिपद्यते = प्राप्नोती - ति ॥ ६८ ॥

एवं चादृष्टाभिधानेषु निमित्तेषु द्वयमनुवर्तते - जातिर्बुद्धिश्च । शब्दस्तु नानुवर्तते - अदृष्टाभिधानत्वात् । जाते बुद्धेश्च तत्र ताद्रूप्येण प्रतिभानेऽपि शब्दस्यानभिधायकत्वेन जात्या सह ताद्रूप्याप्रसक्त्या सामानाधिकरण्येन शब्दस्यानुवृत्त्यसम्भवात् ।

अत्र 'जातेः कार्याणि संसृष्टा' इत्यपि पाठान्तरं दृश्यते । तद्रीत्या 'व्यक्तिः संज्ञोपदिश्यते जातेः' इत्यन्वयो बोध्यः । तदापि व्यक्तिः संज्ञा जातेः, जातिः संज्ञा व्यक्तेः' इति पक्षद्वयं लभ्यते । तत्र व्यक्तेः प्रत्यक्ष-सिद्धत्वम्, जातेस्त्वनुमानगम्यत्वमिति प्रथमाभिप्रायः । जातेरेवानुगतस्वरूपतया व्यपदेश्यत्वम्, व्यक्तेश्चानुपपत्तिलभ्यत्वमिति द्वितीयाभिप्रायः ।

एकशेषशास्त्रारम्भदिशा केवलव्यक्तिवादे - व्यक्ति र्व्यक्तेः संज्ञा । "जात्याख्यायाम्-" इत्यादिशास्त्रदिशा केवलजातिवादे तु जातिर्जातेः संज्ञा, इत्यप्युन्नीयताम् ॥ ६८ ॥

स्वरूप अननुगत होने से जाति के विना नियत व्यवहार सम्भव नहीं, अतः जाति से समनुगतस्वरूप ही व्यक्ति का व्यवहार संगत होता है । अतः व्यक्ति के अनुगत व्यवहार में निमित्त जाति का ही प्रधानरूप में कार्यान्वय उचित है, व्यक्ति तो जाति से अनुगतरूप ही कार्यान्वय के लिए ग्रहणयोग्य होता है ॥ ६८ ॥

संज्ञिनीं व्यक्तिमिच्छन्ति सूत्रग्राह्यामथापरे ।
जातिप्रत्यायिता व्यक्तिः प्रदेशेषूपतिष्ठते ॥ ६९ ॥

प्रत्येकार्थप्रकाशिका

संज्ञिविषये आह - 'संज्ञिनी' मिति । सूत्रेण ग्राह्याम्= बोध्यां व्यक्तिम् संज्ञिनीम् = वाच्याम् इच्छन्ति । अथापरे जातिमिच्छन्तीत्यध्याहृत्य व्याख्येयम् ।

आनन्दा

व्यक्तिः संज्ञा जातिर्वेति संज्ञाविषयकं मतभेदमुक्त्वा तत्फलितार्थ एव 'व्यक्तिः संज्ञिनी जातिर्वेति' संज्ञिविषयको मतभेद उच्यते - 'संज्ञिनीम्' इति ।

अन्वयः - सूत्रग्राह्याम् व्यक्तिम् संज्ञिनीम् इच्छन्ति,
अथ अपरे - 'जातिम्' इत्यध्याहारः ।
जातिप्रत्यायिता व्यक्तिः प्रदेशेषु उपतिष्ठते ॥

व्याख्या - सूत्रग्राह्याम् = स्वं रूपमिति सूत्रे स्वं रूपमित्यस्य व्यक्त्यर्थकत्वे तेन ग्राह्याम् व्यक्तिम् = शब्दव्यक्तिम् संज्ञिनीम् = संकेतविषयत्वेन बोध्याम् इच्छन्ति = मन्यन्ते केचन व्यक्तिवादिनः । अपरे = जातिवादिनः स्वं रूपमित्यस्य जात्यर्थकत्वे जातिं संज्ञिनीमिच्छन्ति, किन्तु जातिप्रत्यायिता= जात्या अनुगतरूपेण बोधिता व्यक्तिः = शब्दव्यक्तिः प्रदेशेषु = कार्यदेशेषु प्रयोगेषु उपतिष्ठते = कार्येणान्वयं समधिगच्छति ।

सूर्यमाया

पूर्वकथन का फलितार्थ ही संज्ञा के समान संज्ञी के विषय में भी उक्त मतभेद प्रकारान्तर से बताते हैं - 'संज्ञिनीम्' इत्यादि ।

अर्थ : - व्यक्तिवादी कुछ लोग "स्वं रूपम्-" सूत्र से ग्राह्य व्यक्ति को संज्ञी मानना चाहते हैं, तो दूसरे जातिवादी लोग जाति को । जाति से कार्ययोग संभव नहीं है, अतः जाति से आक्षिप्त व्यक्ति प्रयोगदेशों में उपस्थित होता है, अर्थात् जाति के द्वारा अनुगत व्यक्ति कार्य के लिए प्रयोगों में गृहीत होता है ।

ननु जातिश्चेत्संज्ञिनी तदा ''राज्ञो यदि''त्यादौ जातेर्यत्-प्रत्ययः कथं स्यादत आह - जातिप्रत्यायितेति, प्रदेशेषु =

विमर्शः - ''स्वं रूपम्'' इति सूत्रे प्रकरणाद् भाष्यस्वारस्याच्च संज्ञाशब्दस्य कर्मव्युत्पत्त्या संज्ञिपरत्वे - 'स्वं रूपं शब्दस्य संज्ञि' इत्यर्थः सम्पद्यते ।

तदाह सूत्रवृत्तौ दीक्षितः - 'शब्दस्य स्वं रूपं संज्ञि' इति । भाष्योद्योते नागेशोऽप्याह - शब्दस्य स्वं रूपमिह ग्राह्यत्वेन विधित्सितमिति । तत्रैव 'रूपं शब्दस्य संज्ञा' इति भाष्यप्रतीकमुपादायाह - अत्र संज्ञाशब्दो बोध्यपरः कर्मव्युत्पत्तेः, इति । शेखरेऽप्याह - स्वं रूपमित्यस्य बोध्यमिति शेषो व्याख्यानादिति ।

पूर्वश्लोके साकल्येन केवलव्यक्तेः संज्ञात्ववर्णनम्, अत्र तु केवल-जातेरिति केचित् । फलतो भेदाभावेऽपि पूर्वत्र करणव्युत्पत्त्या संज्ञाशब्दस्य ग्राहकपरत्वे मतभेदेन जातिव्यक्त्योरुभयोः संज्ञात्वस्य, इह तु कर्मव्युत्पत्त्या संज्ञाशब्दस्य ग्राह्यपरत्वे जातिव्यक्त्योरुभयोर्मतभेदेन संज्ञित्वस्य च क्रमशः प्रतिपादने श्लोकद्वयस्य स्वारस्यमिति तत्त्वविदः ।

आशय : - यहाँ प्रकरण से गृहीत 'संज्ञाशब्द' कर्मसाधन पक्ष में ग्राह्य-संज्ञी परक होता है, यह कहा जा चुका है । 'स्वं रूपम्' पद से जो लोग व्यक्ति का ग्रहण करते हैं, उनके अनुसार - आनुपूर्वीविशेषरूप - तत्तद् शब्दव्यक्ति शब्दसामान्य का संज्ञी है, यह ''स्वं रूपम्-'' इस सूत्र का अर्थ होता है । इस पक्ष में शब्दव्यक्ति संज्ञी तथा शब्दत्वजाति संज्ञा विवक्षित है ।

इसके विपरीत जो 'स्वं रूपम्' पद से जाति का ग्रहण करते हैं, उनके मन्तव्य अनुसार शब्दत्वजाति अर्थात् शब्दसामान्य शब्दव्यक्ति का ग्राह्य - संज्ञी है, अर्थात् शब्दव्यक्ति संज्ञा है । जो व्यक्ति को संज्ञी मानते हैं, उनके मत में प्रत्यक्ष व्यवहार के योग्य होने से व्यक्ति का कार्य से साक्षात् सम्बन्ध होता है । जाति व्यक्ति का उपलक्षणमात्र है, शब्द का वाच्यार्थ नहीं । जो व्यक्ति के अनुगत स्वरूप का ग्राहक होने से जाति को बोध्य - संज्ञी मानते हैं, उनके मत में यद्यपि जाति का कार्य से साक्षात् सम्बन्ध नहीं हो सकता, तथापि जाति से अनुगतरूप व्यक्ति के ग्रहण द्वारा जाति का कार्य से परम्परासम्बन्ध होता ही है । यदि जाति

प्रयोगेषु जात्या प्रत्यायिता = अविनाभावेन बोधिता - व्यक्तिं विना आश्रयताया असम्भवात् जात्याश्रिता व्यक्तिः उपतिष्ठते = उपस्थिता भवति, अतस्तत्रैव कार्यं स्यात्, इति ॥ ६९ ॥

इत्थं च - स्वं रूपम् = शब्दव्यक्तिः शब्दस्य = शब्दत्वजातेः संज्ञिनी, इत्येवं सूत्रं व्याचक्षाणाः सूत्रग्राह्यां व्यक्तिं संज्ञिनीमिच्छन्ति, शब्दत्वजातिं च संज्ञाम्, अपरे तु स्वं रूपम् = शब्दत्वजातिः शब्दस्य = शब्दव्यक्तेः संज्ञिनी, इत्येवं सूत्रं व्याचक्षाणा जातिं संज्ञिनीं व्यक्तिं च संज्ञामिच्छन्ति । जातेः संज्ञित्वे व्यक्तिं विना तस्या भानासम्भवान्नान्तरीयकतया जात्याऽऽक्षिप्ता व्यक्तिः प्रयोगेषु कार्यान्वयायोपतिष्ठते = कार्यान्वयं लभते, इति संकलितोऽर्थः ।

यदा व्यक्तिः संज्ञिनी तदा जातिः संज्ञा, इति प्रथमं मतम् । अथवा जातिः संज्ञिनी तदा व्यक्तिः संज्ञा, इति द्वितीयं मतम् । उभयथा कार्ययोगो व्यक्तेरेव, पूर्वत्र साक्षात् परत्र तु जातिद्वारा परम्परयेति विवेकः ॥ ६९ ॥

से अनन्त व्यक्तियों का एक समान रूप में ग्रहण न हो तो व्यक्ति का भी नियत रूप न होने से कार्य के साथ सम्बन्ध कैसे सम्भव है? एक दूसरे से अन्वित ही कार्य के योग्य होते हैं । अतः जाति की उपेक्षा कैसे की जा सकती है?

सारांश में - व्यक्ति को संज्ञी मानें तो जाति को संज्ञा, अथवा जाति को संज्ञी मानें तो व्यक्ति को संज्ञा, दोनों कारिकाओं का निहितार्थ एक ही है, केवल प्रकारभेद अवश्य है । पूर्वकारिका में करणसाधनपक्ष में - ग्राहकपरक संज्ञा-व्यक्ति को मानें अथवा जाति को, उत्तरकारिका में कर्मसाधनपक्ष में - ग्राह्यपरक संज्ञा होने से संज्ञी व्यक्ति को मानें अथवा जाति को । शब्दभेद है अर्थभेद नहीं, दोनों का फलितार्थ एक ही है ॥ ६९ ॥

कार्यत्वे नित्यतायां वा केचिदेकत्ववादिनः ।
कार्यत्वे नित्यतायां वा केचिन्नानात्ववादिनः ॥ ७० ॥

प्रत्येकार्थप्रकाशिका

जातिवादिनस्त्वयमाशयो-व्यक्तेरानन्त्याज्जातावेव शक्तिः, येषां मते एक एव शब्दस्तेषां मते जातिव्यक्तिव्यवहारो नास्ति, किन्तु अनेकत्ववादिमते एव तद्व्यवहार इति दर्शयति - 'कार्यत्व'

आनन्दा

अनन्तरपूर्वकारिकाद्वये व्यक्तेर्जातेश्च संज्ञात्वं संज्ञित्वं वेति मतभेदं प्रतिपाद्येदानीं मुख्यशब्दैकत्ववादे जातिव्यक्तिव्यवहाराभावेन तन्मूलकपक्ष-भेदासम्भवेऽपि शब्दनानात्ववादे जातिव्यक्तिभेदमूलकं मतभेदं संगमयितुं दर्शनभेदेन शब्दैकत्व-नानात्ववादद्वयमुपन्यस्यति - 'कार्यत्वे' इति ।

अन्वयः - सरलः ।

व्याख्या - कार्यत्वे = अद्वैतिनये वियदादिवत् शब्दस्य जन्यत्वे, नित्यतायाम्= शाब्दिकनयेऽत्यन्तनित्यत्वे वा, केचित् = यथाक्रमम् - अद्वैतिनः शाब्दिकाश्च शब्दस्य एकत्ववादिनः = अद्वैतिनः सर्गादारभ्य प्रलयपर्यन्तं वियदादिवत् स्थायित्वेन शब्दस्य सापेक्षमेकत्वं वदन्ति, शाब्दिकास्त्वखण्डस्फोटवादिनः शब्दस्यात्यन्तिकं निरपेक्षं स्वगतसजातीयविजातीयभेदशून्यमेकत्वं वदन्ति ।

सूर्यमाया

पूर्व की दो कारिकाओं में जाति तथा व्यक्ति का संज्ञासंज्ञिभाव बताकर शब्द के एकत्व सिद्धान्त में जाति और व्यक्ति का सद्भाव सिद्ध न होने पर भी नानात्व पक्ष में उनका सद्भाव होने से पूर्वोक्त संज्ञासंज्ञिभाव की उपपत्ति के रूप में यहाँ शब्द का एकत्ववाद और नानात्ववाद स्पष्ट करते हैं - 'कार्यत्वे' इत्यादि ।

अर्थ : - शब्द का कार्यत्व अर्थात् अनित्यत्व हो अथवा नित्यत्व हो, कुछ लोग शब्द का एकत्ववादी हैं, तो कुछ लोग शब्द के अनित्यत्व वा नित्यत्व दोनों पक्षों में शब्द का नानात्ववादी हैं ।

इति । कार्यत्वे = शब्दस्यानित्यत्वे 'स एवायं गकार' इति प्रत्यभिज्ञाबलात्, नित्यतायाम् = नित्यश्चेच्छब्दस्तदा मुख्यमेव शब्दस्यैकत्वमिति वादिनः केचित् । अपरे तु - अनित्या वा

शब्दैकत्ववादे जातिव्यक्तिव्यवस्था न सम्भवतीति तामुपपादयितुं नानात्ववादमाह - अपरे तु तार्किकाः करणजन्यत्वेन घटादिवत् शब्दस्य सर्वथा कार्यत्ववादिनः, मीमांसकाश्च वर्णरूपशब्दस्य नित्यत्ववादिनः प्राहुः- कार्यत्वे = शब्दस्य सर्वथा जन्यत्वेनानित्यत्वे, नित्यतायां वा = वर्णरूपस्य शब्दस्य नित्यत्वे वा केचित् = यथाक्रमं तार्किका मीमांसकाश्च शब्दस्य नानात्वं वदन्ति ।

आशय : - अद्वैतमत में आकाश आदि के समान शब्द भी कार्य माना गया है, किन्तु वह घट-पट आदि के समान किसी व्यक्ति का कार्य नहीं है, अपितु सृष्टि से प्रलयकाल तक स्थायी ईश्वर का कार्य है । अतः अनित्य है ।

अखण्ड स्फोटवादी वैयाकरण के मत में शब्द उत्पत्तिविनाश से रहित - आत्यन्तिक नित्य है । ये दोनों वादी शब्द का एकत्व मानते हैं, अभिव्यञ्जक - स्थान - करणों के भेद से नाना रूप में अभिव्यक्ति मानते हैं ।

इनके मत में व्यक्तिभेद न होने से उनके अनुगम के लिए जाति की परिकल्पना नहीं की जाती है । जाति के विना ही स्वतः अनुगत एक व्यवहार होता है । अतः इनके मत में जाति व्यक्ति व्यवहार नहीं है ।

इनके अतिरिक्त कार्यत्व और नित्यत्ववादी क्रमशः नैयायिक और मीमांसक हैं, जो शब्द का नानात्व मानते हैं । उनमें अन्तर यह है कि - नैयायिक स्थान-प्रयत्न करणों के भेद से उत्पन्न शब्द को घट-पट आदि वस्तुओं के समान ही अत्यन्त अनित्य तथा परस्पर अत्यन्त भिन्न मानते हैं । यहाँ तक कि समानवर्णानुपूर्वीक जो एकरूप गो शब्द है, उसका भी अर्थभेद से तथा वक्ता के उच्चारणभेद से नाना व्यक्तिभेद मानते हैं, तो विभिन्न वर्णों की आनुपूर्वीवाले शब्दों की कथा ही क्या है ? परन्तु शब्द का नानात्ववादी मीमांसक शब्द को

नित्याः, नाना एव शब्दाः-इति जल्पन्ति । एतन्मते 'स एवायमि'-तिरक्षणार्थं जातिस्वीकार इति हृदयम् ॥ ७० ॥

विमर्शः - तत्र तावत् तार्किका घटपटादिवत् करणजन्यानां प्रत्यर्थं भिन्नानां स्वगत-सजातीय-विजातीयभेदविशिष्टानां गवादिशब्दानां प्रत्यक्षमेव नानात्वं वदन्ति । मीमांसकाश्च क-च-ट-त-पादीनां नित्यानां विभूनां वर्णानां स्वगत-सजातीयभेदरहितानामपि विजातीयभेदवतां स्पष्टमेव नानात्वं वदन्ति ।

अतस्तेषां मते व्यक्तिभेदस्वीकारेण 'स एवायं शब्द' इत्यनुगमाय जातिस्वीकार आवश्यक इति जातिव्यक्तिपक्षभेदेन संज्ञासंज्ञिभावव्यवस्था नानुपपन्ना ॥ ७० ॥

सर्वथा कार्य व अनित्य नहीं मानते हैं । इनके मत में क-ख आदि वर्णरूप शब्द नित्य तथा विभु हैं, कार्य तथा परिच्छिन्न नहीं । हाँ, उनका परस्पर भेद अवश्य है । क च ट त प आदि वर्णों का परस्परभेद वर्गभेद तथा वर्णों के क्रमभेद से पदभेद - वाक्यभेद होने से शब्द का अनेकत्व है ।

इसके साथ ही समानवर्णानुपूर्वीवाले - नानार्थक 'गो - हरि' आदि शब्द भी अर्थ के भेद से तथा उच्चारण के भेद से नाना व्यक्तिरूप में विभाजित - परस्पर भिन्न हैं । शब्द का नानात्ववादी दोनों के मत में 'गो' आदि शब्द का पुनः पुनः उच्चारण करने पर 'स एवायं शब्दः' ऐसा जो व्यक्तिभेद में भी एकरूप समनुगत अभेदव्यवहार होता है, वह जाति के स्वीकार विना सम्भव नहीं है । अतः इन दोनों वादियों के मत में जाति की परिकल्पना आवश्यक है । इस प्रकार शब्द के नानात्ववाद में जाति-व्यक्ति व्यवहार होने से उनका पूर्वोक्त संज्ञासंज्ञिभाव उपपन्न है ॥ ७० ॥

पदे भेदेऽपि वर्णानामेकत्वं न निवर्तते ।
वाक्येषु पदमेकञ्च भिन्नेष्वप्युपलभ्यते ॥ ७१ ॥

प्रत्येकार्थप्रकाशिका

इदानीं पदव्यवस्थां वक्तुमुपक्रमते - 'पदे भेदे' इति । वर्णानां भेदेऽपि = नानात्वेऽपि पदे एकत्वं न निवर्तते, एकं

आनन्दा

दर्शनभेदेन शब्दस्यैकत्वं नानात्वं वा वदतां मतं प्रदर्श्य तयोरेकत्ववादं सिद्धान्तयिष्यन् प्रथमं तावत् परमतेन वर्णाद्यवयवकपदादेः सखण्डत्वमभिप्रेत्य पदस्यैकत्वं प्रतिष्ठापयति - 'पदे' इति ।

अन्वयः - पदे वर्णानाम् भेदे अपि एकत्वम् न निवर्तते,
भिन्नेषु वाक्येषु अपि एकम् पदम् च उपलभ्यते ॥

व्याख्या - 'पदे' इत्यावर्तनीयम् । तथा च पदे = घट इत्यादौ वर्णानाम्= घकाराकारटकारादीनां स्वगतावयवानां भेदेऽपि = अनेकत्वेऽपि पदे = वर्णसमुदायात्मके 'घट' इत्यादौ सुबन्ते तिङन्ते वा एकत्वम् = सजातीयद्वितीयरहितत्वम् न निवर्तते = स्वगतवर्णरूपावयवनानात्वेन नापैति, तिष्ठत्येवेति भावः ।

सूर्यमाया

अखण्ड शब्द के एकत्ववाद को इष्ट सिद्धान्तपक्ष बताने के लिए पहले प्रथम सोपान के रूप में परकीयमतानुसार - वर्णरूप अवयवक्रमवाले सखण्ड पद का एकत्व प्रतिपादन करते हैं - 'पदे' इत्यादि ।

अर्थ : - पद में (अवयव) वर्णों का भेद रहने पर भी वस्तुतः पद में समष्टिरूप एकत्व की निवृत्ति नहीं होती, तथा भिन्न वाक्यों में भी पद स्वरूपतः एक ही उपलब्ध होता है ।

पदमिति व्यवहारो भवत्येव, समुदायनिबन्धनत्वादेकत्वस्य - 'वनं सेना' इत्यादिवत् ।

ननु समुदाये तिरोहितावयवभेदत्वाद् 'वनम्' इतिवत् पदैकत्वमस्तु - माऽस्तु तेन नानात्वम्, तथापि 'गामानय, गां बधान, अश्वमानय, अश्वं बधान' इत्यादिषु विभिन्नेषु वाक्येषु प्रयुज्यमानस्य - 'गाम् - अश्वम् - आनय - बधान' इत्यादिपदस्य कालव्यवधानात् शब्दान्तरव्यवधानाच्च स्यादेव नानात्वमितिशङ्कां निरस्यति - 'वाक्येषु' इति ।

भिन्नेषु वाक्येषु = 'घटमानय - घटं पश्य, गामानय - गां बधान' इत्यादिषु अपि एकं पदम् = 'तदेवेदम्' इत्यभेदेन व्यपदिश्यमानं सजातीयद्वितीयरहितं 'घट' इत्यादिकम् उपलभ्यते = अनुभूयते । वाक्येषु प्रयोगदेश-कालभेदेन प्रतीतिभेदेऽपि पदस्यैकत्वमेव, न नानात्वमिति सारः । इदं भाट्टमीमांसकानां मतम् । ते हि सखण्डपदवाक्यवादिनो वर्णानां विजातीयभेदवतां नित्यत्वमेकत्वं च स्वीकुर्वन्ति ।

अत्र 'पदभेदेऽपि' इति पाठान्तरमपि दृश्यते । तत्पक्षे दृष्टान्तब्याजेन वर्णैकत्वं प्रतिपाद्य पदैकत्वं प्रतिपाद्यते । यथा घटपटादीनां पदानां परस्परं भेदेऽपि तदवयवानाम् - अकार - टकारादीनां वर्णानां प्रतिस्वमेकत्वमेव, पदभेदेन नानेकत्वम्, तथा भिन्नेष्वपि वाक्येषु समानानुपूर्वीकं पदमेकमेव, न वाक्यभेदेनानेकम्, इति तदर्थः ।

आशय : - घट आदि पदों के अन्तर्गत - घकार, अकार, टकार आदि वर्ण परस्पर एक दूसरे से विजातीय व भिन्नरूप भले ही हों, किन्तु वे प्रत्येक वर्ण अपने रूप में - सजातीय व्यक्ति के भेद से रहित - एक ही हैं, तथा उनका समुदायरूप घट आदि पद भी अपने स्वरूप से व्यक्तिभेद से रहित एक है, नाना नहीं । अपने अवयव वर्णों के नाना रहने से अथवा एक ही समय में भिन्न भिन्न नानावाक्यों में तथा भिन्न भिन्न समयों में प्रयोग होने से पद नाना नहीं हो जाता, प्रत्युत एक ही रहता है । जैसे असंख्य नानाविध वृक्षों का समूह रूप - 'वन'

किञ्च भिन्नेषु वाक्येषु अपि = 'घटमानय-घटोऽस्ति' इत्यादिवाक्यानां परस्परं भेदेऽपि सर्वत्र-'घट' इति एकं पदम्,

---

विमर्शः - करचरणाद्यवयवानां प्रत्येकं नानात्वेऽपि तत्समुदायावयविन एकत्वमाश्रित्य यथा शरीरैकत्वव्यवहारस्तथा पदे स्वगतवर्णरूपावयवानां नानात्वेऽपि तत्समुदायनिष्ठमेकत्वमाश्रित्य तत्तदर्थवाचकाभिन्नानुपूर्वीकस्य सरूपस्य पदस्य स्वरूपत एकत्वमेव, न त्ववयवगतभिन्नत्वमाश्रित्य नानात्वम् । 'आनय घटम् - घटमानय' इत्यादिपौर्वापर्यविनिमयेन प्रयोगभेदेऽपि- 'अव्यवहितोत्तरत्वसम्बन्धेन तद्वर्णविशिष्टतद्वर्णवत्त्वरूपायाः' सरूपानुपूर्व्या एकत्वेन 'घट-पट-गो-हरि' इत्यादिप्रत्येकपदस्य स्वेन रूपेणैकत्वमवसीयते ।

इदं तु बोध्यम् - यथा भिन्नेषु मणि-कृपाण-दर्पणोदकादिषु चन्द्रादित्यमुखादिप्रतिबिम्बानामुपलब्धिनिमित्तभेदेन भिन्नत्वप्रतिभासेऽपि बिम्बस्यैकत्वं न प्रतिहन्यते, तथा - 'अण्डः - दण्डः, अर्कः - अश्वः' इत्यादिषु भिन्नवर्णानुपूर्वीकभिन्नपदेषु युगपद् देशपृथक्त्वेन कालपृथक्त्वेन च भिन्नत्वेन प्रतिभासमानस्याकारादिप्रत्येकवर्णस्य चन्द्रादित्यादिवत् स्वरूपत एकत्वम् । तदाह प्रत्याहारसूत्रे भाष्यकारः - 'तत्रानुवृत्तिनिर्देशे सवर्णाग्रहणमनण्त्वादिति प्रसङ्गे एकत्वादकारस्य सिद्धम्' इति । एवम् -

---

एक व्यवहृत होता है, ऐसे ही नाना वर्णों का समूह - पद भी एक व्यवहृत होता है । साथ ही यह ज्ञातव्य है कि - वर्णों के क्रमभेद से पदों का भेद भले ही प्रतीत हो, किन्तु भिन्न भिन्न पदों में पुनः पुनः प्रयोग से वर्ण का व्यक्तिभेद नहीं होता है, तथा पदों के क्रमभेद से अथवा विभिन्न पदों के प्रयोग से वाक्य का भेद भले ही हो, किन्तु भिन्न भिन्न वाक्यों में पुनः पुनः प्रयोग से पद का व्यक्तिभेद नहीं होता है । यहाँ तक कि अर्थ के भेद से भी पद का भेद नहीं होता है । नानार्थक गो शब्द का - 'गौ - भूमि- वाणी - इन्द्रिय - किरण' आदि नवविध

इति-उपलभ्यते = व्यवह्रियते, इति यावत् ॥ ७१ ॥

'गामानय, गां नय, गां बधान' इत्यादिपदविनिमयेन, 'आनय गाम् - नय गाम्-बधान गाम्' इत्यादिपदपौर्वापर्यविनिमयेन चैकैकस्य पदस्य विभिन्नवाक्येषु युगपद् देशपृथक्त्वेन कालपृथक्त्वेन च भिन्नत्वेन भासमानस्यापि वस्तुतः स्वरूपत एकत्वमेव प्रत्येकपदस्य, न तु व्यक्तिभेदः । युगपद्देशपृथक्त्वं कालपृथक्त्वं च शब्दस्योपलब्धिभेदे निमित्तं न तु शब्दभेदे ॥ ७१ ॥

अर्थ होने पर भी उनका वाचक 'गो' शब्द एक ही है । किसी पद का नाना वाक्यों व स्थलों में अथवा भिन्न कालों में प्रयोग उसके विभिन्न रूप में ज्ञान का कारण तो होता है, किन्तु उसके स्वरूपभेद का कारण नहीं होता है । अत एव भिन्न देशों वा भिन्नकालों में पुनः पुनः प्रयोग होने पर भी वर्ण तथा पद का एकत्व बना रहता है ।

यहाँ यह ध्यातव्य है कि - शब्द का केवल एकत्ववाद ही स्वाभिमत है, इसके अतिरिक्त - पद में वर्णरूप अवयवविभाग तथा वाक्य में पदविभाग तो सखण्ड शब्दवादी मीमांसकों का अभिमत पक्ष है, अखण्ड स्फोटवादी का अपना नहीं । एकत्ववाद के सोपानरूप में यह पूर्वपक्ष मात्र है, अपना सिद्धान्त तो - 'पदे न वर्णा विद्यन्ते' इत्यादि आगे कहा जायगा ॥ ७१ ॥

तद् वर्णव्यतिरेकेण पदमन्यन्न विद्यते ।
वाक्यं वर्णपदाभ्यां च व्यतिरिक्तं न किञ्चन ॥ ७२ ॥

प्रत्येकार्थप्रकाशिका

नन्वेवं वर्णातिरिक्तं पदमित्यत आह - 'तद् वर्णेति' । वर्णव्यतिरेकेण = वर्णभिन्नं पदं न विद्यते = नास्ति, प्रत्येकं

आनन्दा

वर्णानामनेकत्वेऽपि पदस्यैकत्वे वाक्यानां चानेकत्वेऽपि पदस्यैकत्वे स्वीकृते वर्णभिन्नं पदम् - वर्णपदभिन्नं च वाक्यं स्यादित्याशङ्कां वारयति- 'तद्वर्ण' इति ।

अन्वयः - तत् पदम् वर्णव्यतिरेकेण अन्यत् न विद्यते,
वाक्यम् च वर्णपदाभ्याम् व्यतिरिक्तम् किञ्चन न ।

व्याख्या - तत् = वर्णरूपावयवविभागवत् पदम् - वर्णव्यतिरेकेण = वर्णभिन्नरूपेण अन्यत् = वस्त्वन्तरं न विद्यते, क्रमजन्मवर्णमात्रं हि तत्- अन्वयव्यतिरेकबलात् । एवं वाक्यं च = वाक्यमपि वर्णपदाभ्यां व्यतिरिक्तम् = भिन्नं किञ्चन = वस्त्वन्तरं किमपि न विद्यते । वर्णपदाभिन्नरूपमेव वाक्यम् - समुदायस्य प्रत्येकानतिरेकादिति भावः ।

सूर्यमाया

पद में नानावर्णों तथा वाक्य में नानापदों की सत्ता में भी पद और वाक्य को समान आनुपूर्वीरूप में एक मानने से यह संशय होता है कि क्या वर्णों से भिन पद है, तथा वर्णसमुदाय - पदों से भिन्न वाक्य है? इस शङ्का का निवारण करते हैं - 'तद्वर्ण' इत्यादि ।

अर्थ : - वर्णरूप अवयवक्रमवाला - पूर्वोक्त वह पद वर्णों से अतिरिक्त- स्वरूप कोई अन्य शब्द नहीं है, और वाक्य भी वर्णों व पदों से अतिरिक्त कुछ नहीं है ।

समुदायातिरिक्तमपि समुदायस्य प्रत्येकानतिरेकत्वमिति-न्यायादिनये प्रसिद्धतया वर्णसमुदायात्मकपदस्य वर्णभिन्नत्वा-स्वीकारात् ।

विमर्शः - न्यायनये क्रमजन्मनामुच्चरितप्रध्वंसिनां वर्णानां नश्यतामुत्पद्य-मानानां वस्तुतो युगपदवस्थानासंभवेन पदप्रत्यक्षानुपपत्तिरित्यतो मीमांसकै-र्वर्णपदवाक्यात्मको नित्यः शब्द आस्थीयते । यथा न्यायनये विजातीय-पृथिवीजलादिद्रव्यभेदे सत्यपि स्वगतसजातीयभेदरहित-विभुनित्याकाश-स्याभ्युपगमस्तथा भाट्टमीमांसकनये विजातीयकवर्णादिभेदे सत्यपि स्वगतसजातीयभेदशून्य-विभुनित्यवर्णानां स्वीकारः । तेषां च हृदय-कण्ठादिदेशावच्छेदेन क्रमजन्मभिस्तत्तत्स्थानाभिहतवायुजनितध्वनि-भिरभिव्यक्तिरिति वर्णसमुदायरूप-पदस्य वर्णपदसमुदायरूप-वाक्यस्य च विद्यमानत्वेन प्रत्यक्षमुपपद्यते । नास्ति वर्णातिरिक्तं पदम् - वर्णपदातिरिक्तं

आशय : - यह ठीक है कि - वर्णों का समुदाय पद है तथा वर्ण व पदों का समुदाय वाक्य है, किन्तु वर्णरूप में ही पद पाया जाता है, भिन्न रूप में नहीं तथा वाक्य भी वर्ण व पद रूप में ही पाया जाता है, अन्य किसी रूप में नहीं । ऐसी स्थिति में पद को वर्णों से भिन्न तथा वाक्य को वर्णों व पदों से भिन्न क्यों माना जाय ? प्रत्येक से भिन्न समुदाय नहीं होता । प्रत्येक की सत्ता ही समुदाय की सत्ता होती है । प्रत्येक न हो, तो समुदाय किसका कहाँ से होगा ? अत एव जबकि प्रत्येक वर्णों की सत्ता ही पद की सत्ता है एवं प्रत्येक पदों की सत्ता वाक्य की सत्ता है, तो वर्णों से भिन्न पद - पदों से भिन्न वाक्य कैसे सिद्ध हो सकता है ? न्यायमत में तो वर्णों वा पदों का समुदाय बुद्धिकल्पित भले ही हो, वस्तुतः नहीं हो सकता, क्योंकि वर्ण उच्चरितप्रध्वंसी हैं, पूर्ववर्णों का नाश होने पर उत्तरोत्तर वर्णों का जन्म होता है । अतः एक काल में अनेक वर्णों की स्थिति ही नहीं हो सकती तो उनका समुदाय कैसे होगा ? अगत्या न्यायमत में पूर्वपूर्व वर्ण के अनुभवजन्य संस्कारसहित अन्तिम वर्ण के ज्ञान से पदज्ञान कथंचित् संभव

एवं च वाक्यं वर्णपदसमूहात्मकं वर्णपदभिन्नं नेति सारः ॥ ७२ ॥

च वाक्यम् । वर्णानामनेकत्वेऽपि तत्समुदायस्यैकत्वात् पदैकत्वम् । वैयाकरणेषु कौण्डभट्टा अत्रैव सन्ति सपक्षाः । इदं तु बोध्यम् - इह पूर्वप्रकृतवर्णरूपावयवविभागक्रमवत्पदपरामर्शाय तदिति निर्देश उचितः । अन्यथा सामान्यतो वर्णव्यतिरिक्तपदस्याभावोक्तौ पूर्वापरविरोधः प्रसज्जेत । सिद्धान्ते - प्राकृतध्वनिधर्मवर्णातिरिक्तस्य निर्विभागाक्रमस्फोटाख्य-शब्दस्याग्रे वक्ष्यमाणत्वादिति ध्येयम् । एवं चेह - 'न वर्णव्यतिरेकेण' इति पाठश्चिन्तनीयः ॥ ७२ ॥

है । अतः वर्ण से अतिरिक्त पद की सत्ता वस्तुतः नहीं है । मीमांसकों के मत में वर्ण नित्य तथा व्यापक हैं । उनकी कण्ठ आदि स्थानों में वायु के अभिघात से उत्पन्न ध्वनि से क्रमशः अभिव्यक्ति होती है । अतः अभिव्यक्तिक्रम से वर्णों का समुदाय पद, तथा पदों का समुदाय वाक्य है । वर्णों से अतिरिक्त पद का एवं वर्णसमुदाय पदों से अतिरिक्त वाक्य का कोई स्वतन्त्र स्वरूप नहीं है । अतः पद तथा वाक्य सभी शब्द वस्तुतः वर्णरूप ही हैं । भूषणकार कौण्डभट्ट भी इसी मत के पक्षधर हैं, वे अष्टविध स्फोटवादी हैं ॥ ७२ ॥

पदे न वर्णा विद्यन्ते वर्णेष्ववयवा न च ।
वाक्यात् पदानामत्यन्तं प्रविवेको न कश्चन ॥ ७३ ॥

प्रत्येकार्थप्रकाशिका

इदं परमतं प्रथमं प्रतिपाद्य स्वमतं सिद्धान्तयति - 'पदे न वर्णा' इति । पदे न वर्णाः = वर्णात्मकावयवाः न विद्यन्ते- इति प्रतिज्ञा, अत्रोभयमतसिद्धस्थलं दृष्टान्तमुपन्यस्यति -

---

आनन्दा

मीमांसकादिपरमतेन पूर्वं सखण्डशब्दस्यैकत्वं निरूप्येदानीं स्वमते शब्दस्याखण्डत्वमेकत्वं च साधयन् वर्णपदाद्यवयवविभागं निरस्यति - 'पदे न वर्णा' इति ।

अन्वयः - सरलः ।

व्याख्या - वर्णपदयोर्दृष्टान्तदार्ष्टान्तिकभावलाभायेह 'यथा-तथा' इत्यध्याहृत्य व्याख्येयम् ।

यथा वर्णेषु = ककारादिषु अवयवाः = अवयवविभागा न च विद्यन्ते, तथा पदेषु = 'घट' इत्यादिषु वर्णाः = घकारादिवर्णरूपावयवविभागा न विद्यन्ते । एवं वाक्यात् = अखण्डार्थबोधकादभिन्नरूपाद् भागभेदरहितात् अखण्डात् शब्दात् पदानाम् = ध्वनिरूपवर्णक्रमव्यङ्ग्यानाम् अत्यन्तं प्रविवेकः= भेदज्ञानम् कश्चन = स्वगत - सजातीय - विजातीयभेदज्ञानेष्वन्यतममपि (भेदज्ञानं) न विद्यते, किन्त्वत्यन्तमभेदज्ञानमेवेति - नास्ति वाक्येऽपि पदरूपावयवः, अवयवावयविविभागस्य भेदे सत्येव कल्पनान् ।

सूर्यमाया

मीमांसक प्रभृति दूसरों के मतानुसार सखण्ड शब्द का एकत्व बताकर अपने मत में अखण्ड स्फोटरूप शब्द के अभिप्राय से पद में वर्णविभाग तथा वाक्य में पदविभाग का निषेध करते हैं - 'पदे न वर्णाः' इत्यादि ।

अर्थ : - जैसे (अकार, ककार आदि) वर्णों में अवयव नहीं हैं, ऐसे ही पद में अवयव वर्ण नहीं हैं, तथा वाक्य से पदों का कोई अधिक भेद नहीं है, अभेद ही है । अर्थात् वाक्य में भी पदविभाग नहीं है ।

वर्णेष्ववयवा न चेति, यथा वर्णे अवयवा न सन्ति - शब्दत्वरूपहेतोः स्पष्टतया पृथक् नोक्तः, एवं वाक्येष्वपि पदावयवो नास्तीति कारिकायाः सामान्योऽर्थः ।

विमर्श : - यथा 'ऋ-लृ' इत्यादिवर्णेषु रेफलकारादिसदृशा अवयवरूपवर्णाः प्रतिभासमाना अपि वस्तुतो न सन्ति, तथा पदेषु प्रतिभासमाना अप्यवयवरूपवर्णा वस्तुतो न सन्ति, वाक्येषु चावयवरूपाणि पदानि वस्तुतो न सन्ति । नहि दर्पणोदकादिषु प्रतिबिम्बप्रतिभासे मुखचन्द्रादिबिम्बसत्त्वं वस्तुत उपजायते, सत्यपि तस्य बिम्बतुल्यत्वे । एवं स्फोटे प्रतिभासमाना अपि ध्वनिधर्मा वर्णपदवाक्यक्रमरूपास्तत्र वस्तुतो न सन्ति ।

यथा हि नानावर्णप्रतिपत्तेरुपायतया नानावर्णविषयस्य प्रयत्नस्य भेदाद् व्यञ्जकस्य ध्वने र्भेदे तत्तन्नानावर्णप्रतिपत्तिरुपजायते, तथा पदप्रतिपत्तेरुपायतया पदादपोद्धृतानां शास्त्रकृत्कल्पितानां तावतां वर्णानां समुदायविषयस्य प्रयत्नस्य भेदाद् व्यञ्जकध्वनेर्भेदे सति पदे वर्णरूपावयवविभागप्रतिपत्त्या पदस्यैकस्य प्रतिपत्तिर्भवति । वस्तुतो यथा वर्णे स्वगतभेदो नास्ति, तथा पदेऽपि स्वगतवर्णरूपावयवभेदो नास्ति । एवमेव वाक्यस्य प्रतिपत्तेरुपायतया वाक्यादपोद्धृतानां शास्त्रकृत्कल्पितानां तावतां पदानां समुदायविषयस्य प्रयत्नस्य भेदाद् व्यञ्जकध्वनेर्भेदेन वाक्ये पदविभागप्रतिपत्त्या वाक्यस्यैकस्य

आशय : - जैसे अकार - ककार आदि वर्ण - अवयवभेद न रहने से अपने रूप में अखण्ड एक है, ऐसे ही पद तथा वाक्य भी अवयवभेद न रहने से वस्तुतः अपने रूप में अखण्ड हैं - एक हैं । यद्यपि 'ऋ-लृ' आदि वर्णों में क्रमशः रेफ-लकार आदि अवयव वर्णों का आभास होता है, परन्तु उनमें वस्तुतः कोई अवयव वर्ण नहीं है, इसी प्रकार पद में अनेक वर्ण तथा वाक्य में अनेक पद अवयव सदृश प्रतीत होते हैं, किन्तु वस्तुतः वे उनके अवयव नहीं हैं । जैसे प्रत्येक वर्ण अखण्ड हैं, ऐसे पद और वाक्य वस्तुतः अखण्ड हैं ।

अयमाशयः - ''पदाद्यात्मकशब्दः अवयवशून्यः शब्दत्वात् वर्णवत्'' इत्यनुमित्या वर्णसमुदायात्मकं पदमिति परमतं न युक्तिसहम् ।

किञ्च वर्णेऽवयवान्तरमस्वीकृत्य पदे वर्णावयवत्वस्वीकारे

प्रतिपत्तिर्जायते । वस्तुतो यथा पदे न वर्णविभागस्तथा वाक्येऽपि न स्वगतपदरूपावयवविभागः, प्रतिभासमात्रं हि तत् । वस्तुतोऽखण्ड एव पदस्फोटो वाक्यस्फोटश्चेति भाष्यसंमतः स्वसिद्धान्तः । वाक्यं हि भवत्येकपदात्मकम् - अनेकपदात्मकं च । तत्र 'कोऽस्ति' इति प्रश्ने - 'देवदत्त' इत्येकपदात्मकमुत्तरवाक्यम्, यद्वा - 'पिधेहि' इत्युक्ते द्वारमित्यर्थादेव लभ्यते, इति भवति तदेकपदात्मकं वाक्यम् । अनेकपदात्मकं तु - 'गामानय' इत्यादिकं प्रख्यातमेव । अतः पदस्फोटो वाक्यस्फोटश्च सर्वसम्मतौ ।

इदं तु विविच्यताम् - कार्यशब्दवादे क्षणप्रध्वंसिनां वर्णानामेककालेऽवस्थानासम्भवेन समुदायासिद्ध्या समुदायनिष्ठमेकत्वमादाय 'तदेवेदं पदम्' इति पदैकत्वप्रत्ययस्य, 'सोऽयं गकार' इत्येकत्वप्रत्यभिज्ञायाश्च उपपादनासम्भवेन भाट्टास्तदनुसारिणश्च वर्णानां पदानां वाक्यानां च नित्यत्वं विभुत्वं चातिष्ठन्ते । दिनान्तरानुभूतेनाधुनाऽनुभूयमानस्य 'सोऽयम्' इति

यह अवश्य है कि - वाक्य के ज्ञान के लिए उसमें अवयवरूप पदों की तथा पद के ज्ञान के लिए उसमें अवयवरूप वर्णों की कल्पना उपायरूप में की जाती है । शास्त्रीय प्रक्रिया अथवा लोकव्यवहार के निर्वाह के लिए अपोद्धार द्वारा अखण्डवाक्य में अवयवरूप पद विभाग तथा पद में अवयवरूप वर्णविभाग किया जाता है, जिससे रूढि पाकर वाक्य में पदों की, पद में वर्णों की अवयवरूप में प्रतीति होती है । रज्जु में सर्प की - स्फटिक में पुष्प के रङ्ग की प्रतीति होने मात्र से वहाँ उनकी सत्ता नहीं सिद्ध हो जाती है । अतः वास्तविकता में शब्द

किं ते बुद्धिवैशद्यम् ? यदि च 'घ्-ट्' इत्यत्र - अकारो नोच्चरितः, 'घट' इत्यत्र घकारः - अकारोऽप्युच्चरित इति व्यवहार एव प्रमाणमिति ब्रूषे - तदपि सुभिदमूलमेव, तद्व्यवहारस्य घत्वटत्वादिधर्मस्य ध्वनिगतत्वस्वीकारेण ध्वनिगतवैलक्षण्यादेवोपपत्तेः ।

प्रत्यभिज्ञया क्षणविनाशित्वनिरासेन तावत्कालस्थिरत्वे सिद्धे नित्यत्वम्-सर्वदेशेषूपलम्भाद् विभुत्वं च वर्णानाम् । एवं च 'गकार उत्पन्न' इत्यादि-प्रत्ययस्तु वर्णाभिव्यञ्जकध्वनिगतोत्पत्तिविनाशयोः स्वाश्रयाभिव्यङ्ग्यत्व-सम्बन्धेन वर्णे समारोपेणोपपद्यते - स्फटिके स्वाश्रयसंयोगित्वसम्बन्धेन जपालौहित्यप्रत्ययवत्, श्यामगुणनाशे रक्तगुणोत्पत्तौ स्वाश्रयसमवायित्व-सम्बन्धेन गुणगतोत्पत्तिविनाशयोर्घटे समारोपेण 'श्यामो नष्टो रक्त उत्पन्न' इत्यादिप्रत्ययवद्वा ।

यदि तु - 'स एवायं शङ्खध्वनिः' इत्यादिप्रत्यभिज्ञया ध्वनीनामपि नित्यत्वमभ्युपगम्येत, तर्हि ध्वनिकारणवायुसंयोगनिष्ठमुत्पत्त्यादिकं स्वाश्रयजन्य-ध्वन्यभिव्यङ्ग्यत्वरूपपरम्परासम्बन्धेन वायुसंयोगनिष्ठमुत्पत्त्यादिकं वर्णेष्वारोप्यते । तदाह भामती - "तारत्वादि वायुनिष्ठं वर्णेष्वारोप्यते" इति शाङ्करभाष्ये देवताऽधिकरणे । किं च प्रागसत्त्वे सति सत्त्वरूपाया उत्पत्तेर्वर्णेषु नानुभवः, 'वर्णमुच्चारयति' इत्येव विश्वजनीनप्रत्ययात् ।

अवयवभेद - पूर्वापर क्रमभेद से रहित स्वतः अखण्ड - अभेद्य है । वाक्य से पद का, पद से वर्ण का भेद उपाधिकल्पित है । शब्द में कत्व - खत्व आदि जो भी धर्मभेद लक्षित होते हैं, वे उसके नहीं हैं, अपितु उसके अभिव्यञ्जक जो ध्वनि अथवा ध्वनि के कारण वायुसंयोग हैं, उनके धर्म हैं, जो कि व्यङ्ग्य शब्द में प्रतिभासित होते हैं, जैसे कि स्फटिक में गुलाब फूल की लालिमा प्रतिबिम्ब रूप में भासित होती है ।

किञ्च 'वनं, सेना' इतिवत् 'एकं पदम्' इति व्यवहारोपपादनमपि ते आशामोदकायमानम्, वनस्य वृक्षाद्यवयवानां यावतामेककाले विद्यमानतया तावदवयवकसमुदायस्य सिद्धतया तद्गतैकत्वमादाय वनमिति व्यवहारोपपत्तावपि वर्णाना-

---

शुकसारिकानवनार्याद्युच्चारणव्यङ्ग्येषु वर्णेषु तत्तदुच्चारितत्वानुमापकानि वैजात्यान्यपि विजातीयवायुसंयोगव्यङ्ग्यान्येव ।

शब्दानां नित्यत्वादेवानेककर्तृकोच्चारणविषयेऽपि 'एकमिदं घटपदम्' इति प्रत्यय उपपद्यते । तदाह सरूपसूत्रे भाष्यम् - "एक इन्द्रशब्दोऽनेकेषु क्रतुष्वाविर्भवति" इति ।

ननु वर्णाभिव्यक्तेः क्रमिकत्वेनैककालिकत्वासिद्ध्या पद-वाक्यरूपतानापत्तिस्तदवस्थैवेति चेन्न; वर्णानां नित्यत्वेन विद्यमानतया वर्णाभिव्यक्तेः क्रमिकत्वेऽप्यव्यवहितोत्तरत्वसम्बन्धेन पूर्वपूर्ववर्णवत्त्वमुत्तरोत्तर-वर्णेषु गृहीत्वा पूर्वपूर्ववर्णांशेऽलौकिकप्रत्यक्षस्य चरमवर्णांशे च लौकिक-प्रत्यक्षस्य स्वीकारेण 'सरो रसः' इत्याद्यनतिप्रसक्तस्य तादृशानुपूर्वी-विशिष्टपदप्रत्यक्षस्य वाक्यप्रत्यक्षस्य चोपपत्तौ तत्र बोधकत्वशक्तेरक्षतत्वात्, इत्याहुर्भाट्टाः ।

कैयटानुयायिनस्तु नैतत् सहन्ते ।

भाट्टमते - अकार एक एव, ककार एव, तत्तत्पदमप्येकमेवेति सजातीयभेदानङ्गीकारेऽपि विजातीयभेदवन्तः परस्परं भिन्ना अनेके वर्णाः स्वीक्रियन्ते, तन्न विचारसहम्, विजातीयभेदस्येव सजातीयभेदस्यापि वक्तृभेदेन

यह ध्यातव्य है कि - भाट्ट मीमांसकों तथा उनके अनुगामी वैयाकरणों में कौण्डभट्ट प्रभृति के मत में वर्ण-पद-वाक्यरूप ही नित्य शब्द अभिमत है, जिसको कौण्डभट्ट स्फोट कहते हैं । कैयट तथा उनके पक्षधर नागेश आदि का भाष्यकार तथा हरिसंमत सिद्धान्त है कि ध्वनिरूप वर्ण आदि से भिन्न तथा ध्वनि से अभिव्यङ्ग्य - मध्यमा वाक्स्वरूप स्फोटात्मक अखण्ड शब्द है । जैसे वस्त्र

मुच्चरितप्रध्वंसितया एकक्षणे यावतां साहित्याभावेनावयवसापेक्षसमुदायत्वस्यैवासिद्धतया तद्गतैकत्वमादायोपपादनस्यासम्भवात्, इति विमृश्यतां सुधीभिः । अधिकन्तु विस्तरभयान्नोक्तम् । अस्मन्मते पदादिव्यवहारस्य काल्पनिक-

---

सत्त्वसिद्धेः । तस्मात् सजातीय-विजातीय - स्वगतभेदशून्यो वर्णव्यतिरिक्तो वर्णाभिव्यङ्ग्योऽखण्डः स्फोटात्मकः शब्दो न्याय्यः । वर्ण-पदादिस्वरूपः स्फोटो न युक्तियुक्तः । तन्मते वर्णानां नित्यत्वेऽपि तदभिव्यक्तेः क्रमिकत्वेन क्षणिकत्वेन च व्यक्ततिरोहितयोर्युगपदुपलम्भाभावेन तयोरव्यवहितोत्तरत्वस्य वक्तुमशक्यतया पदप्रत्यक्षस्य दुरुपपादत्वात् । एवं च स्फोटस्य वर्णाभिव्यङ्ग्यत्वमेव न तु वर्णात्मकत्वम् । कत्वादिकं तु व्यञ्जकध्वनिनिष्ठं तत्तत्स्थानाभिघातव्यङ्ग्यम् । कत्वादिवैजात्यविशिष्टैर्ध्वनिभिः स्वरूपरूषितस्यैव स्फोटस्योपलब्धिः, न तु वर्णरहितस्य, वर्णभिन्नव्यञ्जकाभावात् । व्यञ्जकवैजात्यमादाय ककारहकारादीनां भेदव्यवहार औपाधिकः, देशकालभेदोऽप्यौपाधिकः । अखण्डः स्फोट एव पदादिरूपेण व्यङ्ग्यः । प्रकृतिप्रत्ययपदवाक्यविभागः, सर्वः शास्त्रकृत्कल्पित एव । अत एव 'स्फोट एव कत्वादिना व्यज्यते' इति ''ए ओङ्'' इति सूत्रे भाष्ये ध्वनितम् । तत्र हि - वर्णैकदेशानां वर्णग्रहणेनाग्रहणमिति सिद्धान्ते 'क्लृप्तः' इत्यत्र लत्वाप्राप्तिमाशङ्क्य ''अथवोभयतः स्फोटमात्रं निर्दिश्यते -

---

में नाना रञ्जकद्रव्य के भेद से रक्त, पीत आदि नाना वर्णों का अथवा स्फटिक-दर्पण आदि में नानाविध पुष्पों के नानावर्णों का उपराग होने से भान होता है, ऐसे ही एक अद्वितीय अखण्ड स्फोट में उच्चारणक्रम से ध्वनिरूप नाना वर्णों का उपराग होने से प्रतिभास होता है, ध्वनि के वर्णरूप से रूषित ही स्फोट का ज्ञान होता है । अतः व्यञ्जक ध्वनि के वर्णरूप से प्रतिबिम्बित ही स्फोट का तत्तद् अर्थ में शक्तिज्ञान होने से केवल किसी एक वर्ण की अभिव्यक्ति मात्र से अर्थ

तया वास्तविकोऽखण्ड एको निरवयवः स्फोट एव शब्द इति 'एकं पदम्-वाक्य' मित्यादिप्रतीतिः । एतेन स्फोटमनङ्गी-कुर्वन्तोऽपि परास्ताः ॥ ७३ ॥

रश्रुतेर्लश्रुतिर्भवति'' इत्युक्तम् । वस्तुतो रत्वादिमान् न कश्चित्, किन्तु अन्यगततत्तद्रूपेण स्फोटस्य प्रतिभासमात्रमिति तदाशयः ।

यथा मणिकृपाणदर्पणाद्यभिव्यञ्जकोपाधिवशादेकमेव मुखं चन्द्रादित्यादिकं वा लोहित-दीर्घ-वर्तुलादिरूपेण प्रतिभासते, तथैक एवाखण्डः स्फोटः श्रोत्रग्राह्यध्वनिधर्मकत्वादिवैजात्योपरागवशात्तेन तेन रूपेणावभासते ।

प्रयोगान्तर्गतप्रत्येकवर्णानां व्यञ्जकत्वेऽपि चरमवर्णाभिव्यक्तस्यैव स्फोटस्य वाचकत्वान्नाद्यवर्णजाभिव्यक्तिमात्रादर्थबोधः प्रसज्जते, व्यञ्जकरूपरूषितस्यैव स्फोटस्य तत्तदर्थे शक्तिग्रहात् ।

एवं च 'ऋ-लृ' वर्णादौ रेफलकारादीनामवयवत्वप्रतीतिरिव पदे वर्णानां वाक्ये च पदानामवयवत्वप्रतीतिर्वस्तुतः प्रक्रियानिर्वाहाय कल्पिता भ्रान्तिरेवेति निष्कर्षः ।

एतेन – 'नानादर्शनमधिकृत्यापर आह' इति केषांचिद् इह विपर्ययः पराकृतः ॥ ७३ ॥

का बोधप्रसङ्ग नहीं होता, अपितु पद के अन्तर्गत प्रत्येक वर्णों की अभिव्यक्ति होने पर सम्पूर्ण वाचक पद के ज्ञान से अर्थबोध होता है । यह सिद्धान्त मूलरूप में 'येनोच्चारितेन' इत्यादि भाष्य के प्रदीप तथा उद्योत में स्पष्ट है, जो कि यहाँ ग्रन्थकार को अभिप्रेत है ॥ ७३ ॥

भिन्नं दर्शनमाश्रित्य व्यवहारोऽनुगम्यते ।
तत्र यन्मुख्यमेकेषां तत्रैतेषां विपर्ययः ॥ ७४ ॥

प्रत्येकार्थप्रकाशिका

ननु स्वमते पदादीनामसत्यतया पदादिसाधुत्वप्रदर्शनं कथमित्यत आह - 'भिन्न' मिति । भिन्नं दर्शनम् = मतान्तरम्

आनन्दा

दर्शनभेदेन शब्दस्य सत्यत्वमसत्यत्वं वाऽस्तु, सर्ववादिसंमत-पदादिव्यवहारस्यानुगमाय शब्दानुशासनस्य सार्थक्यमुपपादयति - 'भिन्नम्' इति ।

अन्वयः - सरलः ।

व्याख्या - भिन्नम् = परकीयं दर्शनम् = सिद्धान्तम् आश्रित्य = अभ्युपगम्य अभ्युपगमवादेनान्यमतसिद्धं पदादेः सत्यत्वं स्वीकृत्य, व्यवहारः= पदादेः साधुत्वव्यवहारः अनुगम्यते = सामान्यविशेषलक्षणैः प्रकृतिप्रत्ययादिनिर्वचनद्वारा व्युत्पाद्यते । तत्र = दर्शनभेदे एकेषाम् = अन्येषां पदादिसत्यत्ववादिनां तार्किकादीनां मते यत् = सत्यत्वं नानात्वं वा मुख्यम् = प्रधानम् अकल्पितं वास्तविकम्, तत्र = वैयाकरणमते एतेषाम्= पदादीनाम् विपर्ययः = मुख्यत्वविपरीतममुख्यत्वं सत्यत्वं नानात्वं वेति कल्पितत्वादसत्यत्वमेव बाह्यशब्दस्य, वस्तुत आन्तरः शब्द एकोऽखण्डः । एवं च दर्शनभेदो भवतु, परन्तु पारमार्थिको व्यावहारिको वोभयथा पदादिव्यवहारः सर्वसंमतः शास्त्रेणानुगम्यते, इत्यर्थः ।

सूर्यमाया

अपने सिद्धान्त में - आन्तर शब्द ही सत्य होने से वर्ण व पद रूप बाह्य शब्द वस्तुतः असत्य माने जाने पर भी दूसरों के मत में प्रसिद्ध पद आदि व्यवहार के अनुगम के लिए शास्त्र की सार्थकता बताते हैं - 'भिन्नम्' इत्यादि ।

अर्थ : - अन्य दर्शन के मतानुसार प्रसिद्ध वर्ण-पद आदि व्यवहार का इस शास्त्र से अनुगम किया जाता है । दर्शनों में अन्तर यह है कि - दूसरों के मत में पद

आश्रित्य = आलम्ब्य व्यवहारः = पदादिव्यवहारः अनुगम्यते= अनुगमः क्रियते । तत्र = मतान्तरे एकेषाम् = प्रधानानां यन्मुख्यम्= पदादिः सत्य इति, एतेषाम् = पदादीनां तत्र = व्याकरणमते

विमर्शः - स्वमते वर्णपदादिक्रमभेदरहित आन्तरो मध्यमावस्थोऽखण्डः स्फोट एव शब्दः, तस्य वर्णपदादिव्यवहारस्तु बाह्यवैखरीधर्मारोपेणोपचरितोऽसत्यः । परन्तु वैखरीरूपशब्दवादिनां परेषां मतेऽभिमतो लोके च प्रसिद्धः पदादिव्यवहारः प्रक्रियानिर्वाहायापोद्धारेण स्वशास्त्रेऽपि वाक्यादिप्रतिपत्त्युपायतयाऽभ्युपगतः । तदाह भाष्यम् - "अथवा प्रतीतपदार्थको लोके ध्वनिः शब्दः" इति । इत्थं च परमते सत्योऽपि स्वमते व्यावहारिकः परमार्थतोऽसत्यः पदादिव्यवहारः 'कल्पितप्रकृतिप्रत्ययादि-तत्तदर्थ-विभागनिर्वचनपूर्वकसाधुत्वव्युत्पत्त्या' लाघवेन सकललक्ष्यसंग्रहेणानेन

आदि का जो नानात्व तथा सत्यत्व मुख्य है - कल्पित नहीं वास्तविक है, वहाँ वैयाकरणों का मत उसके विपरीत है, अर्थात् उनके मत में आन्तर शब्द ही मुख्य रूप में सत्य है तथा एक है, किन्तु वर्ण-पद आदि रूप बाह्य नाना शब्द आन्तर शब्द में आरोपित व कल्पित हैं, असत्य हैं ।

आशय : - "येनोच्चारितेन-" इत्यादि भाष्य के अनुसार प्रथमपक्ष के रूप में अपने अभिमत सिद्धान्त में ध्वनिरूप - वर्ण-पदों से भिन्न मनोग्राह्य आन्तरशब्द ही पारमार्थिक सत्य है, तथा वह एक है अखण्ड है, इसके विपरीत श्रोत्र से ग्राह्य बाह्य ध्वनिरूप - नाना वर्ण-पद तो आन्तर शब्द में क्रमसंनिविष्ट - कल्पित तथा असत्य प्रतिभासमात्र है, यह ठीक है । किन्तु अन्य दर्शनों में अभिमत तथा लोक में प्रसिद्ध - अर्थ के बोध के लिए प्रयुक्त जो पद-वाक्य का व्यवहार है, उसकी नितान्त उपेक्षा नहीं की जा सकती । वे अनन्त हैं, उनका नियत - अव्यभिचरित रूप में अनुगत ज्ञान व्याकरण-शास्त्र से किया जाता है । लाघव में वाक्य के ज्ञान के लिए वाक्य में पदों का, पदों में प्रकृति-प्रत्ययों का अपोद्धार (विभाग) करके उनके निर्वचन तथा प्रक्रियानिरूपण द्वारा पदों का साधुत्वान्वाख्यान तथा अनुगम

विपर्ययः = वैपरीत्यम्, असत्यत्वमिति यावत् । अन्यमते प्रसिद्धः पदादिव्यवहारः स्वमतेऽसत्योऽपि रेखागवयन्यायेन अनुगम्यते, इति भावः ॥ ७४ ॥

शास्त्रेणानुगतो बोध्यते, इति स्वमते वस्तुतः पदादिव्यवहारस्यासत्यत्वेऽपि तदनुगमाय शास्त्रस्य सार्थक्यम् ।

इह क्वचित् - "तत्रान्येषां विपर्ययः" इत्यपि पाठः । तस्यायमर्थः- तत्र एकेषाम् = प्रधानानामेकत्वसिद्धान्तिनाम् यत् = आन्तरशब्दस्य सत्यत्वं मुख्यम् = अनारोपितं वास्तवम्, तत्र अन्येषाम् = परेषां नानात्ववादिनाम् विपर्ययः = मतवैपरीत्यम् । ते हि बाह्यशब्दस्य नानावर्णपदादेर्मुख्यं सत्यत्वं मन्यन्ते ॥ ७४ ॥

व्याकरणशास्त्र का मुख्य प्रयोजन है, जो कि कल्पित पदविभाग - प्रकृति-प्रत्यय-विभाग के विना संभव नहीं है । अतः पदों की व्यावहारिक सत्ता सिद्धान्ती को भी स्वीकार्य है । भले ही पद आदि को कोई अत्यन्त सत्य मानें, चाहे - कोई कल्पित वा व्यावहारिक मानें, यह पृथक् बात है । परन्तु उन असंख्य पदों का जो एक नियत व अनुगत प्रयोग अथवा ज्ञानरूप व्यवहार होता है, वह सर्वमान्य है, यह एकमात्र व्याकरणसाध्य है । अतः निष्कर्ष में पद के सत्यत्व अथवा असत्यत्व - उभयपक्ष में प्रसिद्ध पदादिव्यवहार के अनुगम के लिए व्याकरणशास्त्र की सर्वथा सार्थकता है, किसी पक्ष में अनर्थकता की आपत्ति नहीं है ॥ ७४ ॥

स्फोटस्याभिन्नकालस्य ध्वनिकालानुपातिनः ।
ग्रहणोपाधिभेदेन वृत्तिभेदं प्रचक्षते ॥ ७५ ॥

प्रत्येकार्थप्रकाशिका

स्फोटे पदादियावद्व्यवहाराभावं प्रपञ्चयति - चतुर्भिः श्लोकैः । स्फोटस्य अभिन्नकालस्य = कालानवच्छिन्नस्येत्यर्थः, अत एव नित्यत्वमिति फलितम् । ननु तदा लोके -

---

आनन्दा

"नित्याः शब्दार्थसम्बन्धाः" इत्येवं प्राक् सिद्धान्तितस्य स्फोटाख्यस्य नित्यस्य शब्दस्य स्वतः कालभेदाभावेऽपि व्यञ्जक-ध्वन्युपाधिकल्पितं कालभेदं वृत्तिभेदं च निरूपयति - "स्फोटस्य" इति ।

अन्वयः - सरलः ।

व्याख्या - स्फोटस्य = तत्तदर्थनिरूपितशक्त्याश्रयस्य वाचकशब्दस्य, अभिन्नकालस्य = कालपरिच्छेदरहितस्य अत एव नित्यस्य ध्वनिकालानुपातिनः = व्यञ्जकध्वनेर्यः कालस्तस्यानुवर्तिनः, अर्थात् स्वतः कालभेदशून्यस्यापि स्वभिन्नस्य प्राकृतध्वनेः मात्राकालभेदमादाय परकीय-कालभेदानुकारिणः, ग्रहणोपाधिभेदेन = ग्राहकस्य ध्वनिरूपोपाधेरे-

---

सूर्यमाया

वस्तुतः कालभेद से रहित स्फोट का औपाधिक कालभेद तथा वृत्तिभेद बताते हैं - 'स्फोटस्य' इत्यादि ।

अर्थ : - कालभेद से रहित होने पर भी ध्वनि के कालभेद का उपग्राही-स्फोट का व्यञ्जक - ध्वनिरूप उपाधि के भेद से द्रुत-मध्य आदि वृत्तिभेद कहते हैं ।

आशय : - जैसे नित्य होने से आत्मा का काल-परिमाण नहीं है, ऐसे ही नित्यशब्द- स्फोट का कोई कालपरिमाण नहीं है, वह अपने स्वरूप से एकमात्रा-द्विमात्रा आदि कालभेद से तथा द्रुत-विलम्बित स्थिवि रूप वृत्तिभेद से रहित है, यह सत्य है । परन्तु वह उपाधिकल्पित - कालभेद तथा वृत्ति

तदानीं घटशब्द उच्चारितो न त्विदानीमिति व्यवहारः कथमित्यत आह - ध्वनिकालानुपातिन इति, ध्वनेर्व्यञ्जकस्य काललक्ष्यस्य इत्यर्थः । ग्रहणोपाधिभेदेन = ग्रहणस्य - व्यञ्जकस्योपाधेर्ध्व-

---

कक्षणत्रिक्षणादिस्थितिभेदेन वृत्तिभेदम् = 'द्रुता-मध्या-विलम्बिता' इतिनामकं कल्पितं वृत्तित्रयं प्रचक्षते = प्रवदन्ति ।

विमर्शः - यद्यपि नित्यत्वात् स्फोटः कालभेदरहितो वृत्तिभेदरहितश्च तथापि स स्वव्यञ्जकध्वनेर्मात्राभेदेन स्थितिभेदेन च मात्राकालिकत्वादि-कालभेदवान् द्रुतादिवृत्तिभेदवान् भासते । यतोहि नियमेन ध्वनिसंसृष्टस्य तद्रूपरूषितस्यैव स्फोटस्योपलब्धिर्भवति न तु तद्रहितस्य शुद्धस्य । यावन्मात्राकालपरिमाणो भवति प्राकृतध्वनिः, तावन्मात्राकालपरिमाणः स्फोट उपलभ्यते, यावदेव वैकृतध्वनेः स्थितिर्भवति, तावदेव स्फोटस्य

भेदवाला भी होता है । क्योंकि अपने व्यञ्जक ध्वनि के रूप से प्रतिबिम्बित ही स्फोट की उपलब्धि होती है, शुद्ध रूप में नहीं ।

फलतः ध्वनि और स्फोट का भेद कभी परिलक्षित न होने से दोनों का अभेद आरोपित हो जाता है, ध्वनि के अभिन्न रूप में स्फोट का ज्ञान होता है । जितनी मात्रा में जब तक ध्वनि की स्थिति होती है, उतनी मात्रा में तभी तक स्फोट की उपलब्धि उसी रूप में होती है । अतः ध्वनि के जो ह्रस्व-दीर्घ-प्लुत रूप एकमात्रा, द्विमात्रा, त्रिमात्रा कालभेद हैं, वे सब स्फोट के कालभेद व्यवहृत होते हैं, साथ ही ध्वनि के जो अल्पकाल - दीर्घकाल स्थिति के भेद से वृत्ति-भेद हैं, वे भी स्फोट के कहे जाते हैं, जैसे कि कमल का लौहित्य उसके संसर्गी दर्पण - स्फटिक आदि में व्यवहृत होता है । यद्यपि कमल और दर्पण आदि का पृथक् भी ज्ञान होता है, किन्तु ध्वनि और स्फोट का तो कभी पृथक् ज्ञान होता ही नहीं है, क्योंकि ध्वनि ही स्फोट का अभिव्यञ्जक है, उनका सहोपलम्भ नियम है, अतः अभेदारोप स्वाभाविक है, अत एव योगाचार बौद्ध मत में ज्ञान और

न्यादेर्भेदेन वृत्तिभेदम् = द्रुतादिवृत्तिम् प्रचक्षते = कथयन्ति, न तु तस्य वास्तविकद्रुतादिवृत्तिरिति फलितम् ॥ ७५ ॥

स्थितिरुपलभ्यते, इति ध्वनेरन्वयव्यतिरेकानुविधायितया व्यञ्जकध्वनि-रूपोपाधेर्धर्मभेदा व्यङ्ग्ये स्फोटे समारोप्यन्ते, तत्कृतः स्फोटस्य कालभेदो वृत्तिभेदो व्यपदिश्यते, यथाहि नित्यस्यात्मनो न कालभेदस्तथा स्फोटस्यापि । स्वतस्तु स्फोटः कालभेदरहितत्वान्नित्यः, देशभेदरहितत्वाद् व्यापकः, सजातीय-भेदरहितत्वादेकः, विजातीयभेदरहितत्वादद्वितीयः, स्वगतभेदरहितत्वान्निरवयवो वर्णपदादिविभागरहितोऽक्रम इत्युपपादितं प्राग् ग्रन्थारम्भे ।

इह वृत्तिभेद उपलक्षणं वर्णपदादिभेदव्यवहारस्यापि, आदित्ये जलस्य कम्पादिरिव स्फोटे ध्वनेर्वर्णपद-ह्रस्वदीर्घ-द्रुतमध्यादिभेदः सर्वः कल्पित इति हृदयम् ॥ ७५ ॥

विषय का अभेद संमत है । जैसा कि उनका कथन है -

"सहोपलम्भनियमादभेदो नील-तद्धियोः ।"

वे ज्ञान और नीलगुण आदि विषय का वास्तविक अभेद मानते हैं, उनके मत में ज्ञान से भिन्न विषय नहीं है । यहाँ व्यञ्जक ध्वनि से अत्यन्त भिन्न स्फोट है, जिनका नियमतः सहोपलम्भ होने से अभेद कल्पित है, असत्य है ।

निष्कर्ष में - नित्यशब्द - स्फोट का कालभेद तथा वृत्तिभेद व्यञ्जक ध्वनिरूप उपाधि से कल्पित है, असत्य है । नित्यशब्द-'स्फोट' वस्तुतः वर्णपदविभाग - मात्रारूप कालविभाग तथा वृत्तिविभाग से रहित है, यह शब्द का एकत्ववादी आचार्यों का सिद्धान्त है ॥ ७५ ॥

स्वभावभेदान्नित्यत्वे ह्रस्वदीर्घप्लुतादिषु ।
प्राकृतस्य ध्वनेः कालः शब्दस्येत्युपचर्यते ॥ ७६ ॥

प्रत्येकार्थप्रकाशिका

स्वभावेति - प्राकृतस्य = एतन्नामकस्य स्वाभाविकस्येति यावत् - तदग्रे स्पष्टं स्यात्, ध्वनेः स्वभावभेदात् =

आनन्दा

नित्ये स्फोटे कालभेदव्यवहारस्य प्रयोजकं प्राकृतध्वनिं निरूपयति - 'स्वभाव' इति ।

अन्वयः - शब्दस्य नित्यत्वे प्राकृतस्य ध्वनेः स्वभावभेदात् ह्रस्वदीर्घप्लुतादिषु कालः शब्दस्य इति उपचर्यते । शब्दस्येत्यावर्त्यान्वयः ।

व्याख्या - शब्दस्य = स्फोटस्य नित्यत्वे = कालानवच्छिन्नत्वे सत्यपि प्राकृतस्य = प्राकृताख्यस्य, वर्णादेः प्रकृतिभूतस्य वक्ष्यमाणस्वरूपस्य, ध्वनेः = तत्तत्स्थानेषु वाय्वभिघातजन्यस्य वायोर्विकारस्य स्वभावभेदात्= अल्पत्व-महत्त्व-तारत्वरूपोच्चारण-स्वरूपवैलक्षण्यात् ह्रस्वदीर्घप्लुतादिषु= ह्रस्वदीर्घप्लुतसंज्ञकभेदेषु जातेषु कालः = कुक्कुटरुतवत् तदुच्चारणकालसदृशो मात्रिकद्विमात्रिकत्रिमात्रिकत्वरूपः परस्परविलक्षणकालः शब्दस्य =

सूर्यमाया

नित्यशब्द में कालभेद का प्रयोजक प्राकृतध्वनि को बताते हैं - 'स्वभाव' इत्यादि ।

अर्थ : - शब्द का नित्यत्व होने पर भी प्राकृतध्वनि के स्वभावभेद से ह्रस्वदीर्घप्लुत आदि वर्णों में जो कालभेद पाया जाता है, वह 'शब्द का है' यह आरोप किया जाता है, अर्थात् शब्द का स्वाभाविक कालभेद नहीं है, किन्तु ध्वनि का काल ही शब्द में उपचरित होता है ।

अल्पमध्योच्चैरुच्चारणभेदात् - ह्रस्वदीर्घप्लुतादिषु सत्सु कालः= एकमात्रिक - द्विमात्रिकादिकालः नित्यत्वे - 'सत्यपि'

निर्विभागस्यैकस्याभिन्नकालस्य स्फोटस्य सम्बन्धी, इत्युपचर्यते = अभिव्यक्तावविनाभावसंसर्गवशात् समारोप्यते, इत्यर्थः ।

विमर्शः - यथा जपापुष्पस्य स्वाभाविको यो लौहित्यवर्णः स शुद्धे स्फटिके जपापुष्पोपधाने प्रतिबिम्बितः सन् तत्र समारोपितः 'लोहितः स्फटिक' इत्यभेदेन गृह्यमाणोऽविवेकिभिः स्फटिकस्य लौहित्यवर्ण इत्युच्यते, तथा प्राकृतस्य ध्वनेरल्पत्वमहत्त्वादिकृतो ह्रस्वदीर्घादिवर्णेषु य एकमात्रिकत्व-द्विमात्रिकत्वादिकालभेदः स शुद्धे स्फोटे समारोपितोऽभेदेन गृह्यमाणः सहोपलम्भनियमादविवेकिभिः, स्फोटस्य काल इति आख्यायते । ततश्च

आशय : - यह पहले कहा जा चुका है कि काल-परिमाण-भेद अनित्य वस्तु का होता है, नित्य का नहीं, शब्द नित्य है, अतः उसका कोई कालभेद नहीं है । परन्तु प्राकृत नामक ध्वनि ही नित्य आन्तर शब्द का अभिव्यञ्जक है, उसके सँनिधान में ही नियमतः शब्द की अभिव्यक्ति व उपलब्धि होती है, उसके विना नहीं । अतः प्राकृतध्वनि के रूप से उपरञ्जित ही शब्द का स्वरूप पाया जाता है ।

प्राकृत ध्वनि तत्तत् स्थानों में वायु के अभिघात से उत्पन्न वायु का विकार है - अनित्य है, अतः उसका अवश्य कालभेद है, वायु के न्यून-अधिक परिमाणभेद से प्राकृतध्वनि का अल्पाधिक मात्रारूप कालभेद स्वाभाविक है । जिसके फलस्वरूप ह्रस्व दीर्घ, आदि वर्णों में एकमात्रा, द्विमात्रा आदि उच्चारण का कालभेद होता है । वह वस्तुतः प्राकृतध्वनि का ही कालभेद है, नित्य शब्द का नहीं, किन्तु प्राकृतध्वनि के सहोपलम्भ नियम से शब्द की उपलब्धि होने के कारण प्राकृतध्वनि का शब्द से अभेदग्रह होने से प्राकृतध्वनि का जो काल है, वह नित्यशब्द में आरोपित हो जाता है । वह व्यवहारपरम्परा से रूढ़ होकर शब्द का काल कहा जाता है, जो कि इस शास्त्र में भी मान्य है । शब्द का ह्रस्व

इत्यध्याहारः, शब्दस्येत्युपचर्यते = आरोप्यते इति यावत्, न तु वस्तुतस्तस्य कालानवच्छिन्नत्वादिति फलितम् ॥ ७६ ॥

शास्त्रीयप्रक्रियाविषयो ह्रस्वदीर्घादिकालभेदव्यवहारो युज्यते। तेन "तपरस्तत्कालस्य" इतिशास्त्रनियमेन "अतो भिस ऐस्" इत्यादौ ह्रस्वे तपरकरणेन 'रमाभिः' इत्यादौ लक्ष्ये दीर्घादेर्व्यावृत्तिर्लभ्यते, इति सकलेष्टसिद्धिः ॥ ७६ ॥

आदि व्यावहारिक कालभेद मानकर ही शास्त्र की शब्दव्युत्पत्ति प्रक्रिया का निर्वाह होता है। जैसा कि - "अतो भिस ऐस्" इस विधिसूत्र में ह्रस्व अकार में तपर निर्देश करने से "तपरस्तत्कालस्य" इसके नियम से भिन्नकाल - दीर्घ की व्यावृत्ति होने से 'रमाभिः' इत्यादि प्रयोगों में दीर्घ से परे भिस् विभक्ति का ऐस् आदेश नहीं होता है ॥ ७६ ॥

वर्णस्य ग्रहणे हेतुः प्राकृतो ध्वनिरुच्यते ।
वृत्तिभेदे निमित्तत्वं वैकृतः प्रतिपद्यते ॥ ७७ ॥

प्रत्येकार्थप्रकाशिका

प्राकृतवैकृतयोर्लक्षणमाह - वर्णस्येति । येन वर्णज्ञानं स

आनन्दा

स्फोटव्यञ्जकस्य प्राकृतध्वनेः प्रचयापचयकृत-कालभेदस्य व्यङ्ग्ये शब्दे समारोपेऽपि वैकृतध्वनेः स्थितिकालकृतवृत्तिभेदस्य शब्दे समारोपाभावे बीजं प्रकटयन् प्राकृतवैकृतयोः स्वरूपमाह - 'वर्णस्य' इति ।

अन्वयः - प्राकृतः ध्वनिः वर्णस्य ग्रहणे हेतुः उच्यते,
वैकृतः वृत्तिभेदे निमित्तत्वं प्रतिपद्यते ।

व्याख्या - प्राकृतः = व्यञ्जकत्वेन स्फोटस्य प्रकृतिभूतः प्राकृत - नामकः ध्वनिः वर्णस्य = स्फोटे वर्णपदादिक्रमरूपस्य ग्रहणे = ज्ञाने हेतुः= प्रयोजक उच्यते । वैकृतः = प्राकृतध्वनेरुत्तरकालभावी प्राकृतस्य सन्तानरूपविकारत्वाद् वैकृतनामको ध्वनिः वृत्तिभेदे = प्राकृतेनाभिव्यक्तस्य स्फोटस्य वर्णादिरूपस्याविच्छेदेन चिराचिरकालस्थितिरूपे - 'द्रुत-मध्य-विलम्बिताख्य' वृत्तिविशेषे निमित्तत्वम् = निमित्तकारणत्वं प्रतिपद्यते = स्फोटस्वरूपबहिर्भावेन ताटस्थ्येन तस्य चिराचिरस्थितिं भजते, द्रुतादिवृत्तीनां स्फोटरूपताया अनभ्युपगमात् ।

सूर्यमाया

स्फोट का व्यञ्जक ध्वनि के प्रसङ्ग से उसका प्राकृत और वैकृत ये दो भेद तथा इनका कार्यभेदमूलक स्वरूपभेद बताते हैं - 'वर्णस्य' इत्यादि ।

अर्थ : - वर्णरूप स्फोट के ज्ञान में जो हेतु है, वह प्राकृतनामक ध्वनि कहा जाता है, तथा द्रुत - विलम्बित आदि वृत्ति के भेद में जो निमित्तकारण होता है, वह वैकृतनामक ध्वनि है ।

ध्वनिः प्राकृतो नाम - अयन्तु प्रथमं भवति । अनन्तरं येन द्रुता,

विमर्शः - प्राकृतो वैकृतश्च द्विविधो हि ध्वनिः । तत्र प्राकृतः प्रक्रियते= स्वस्वरूपतां प्राप्यतेऽनया सा प्रकृतिः, प्रकृतेः प्रभवतीति प्राकृतः, स्वेन रूपेणोपरञ्जकतया स्फोटप्रकृतिं गतः, स्वेन रूपेण निरूपणीयतया स्फोटोपलब्धौ कारणं भवति यः स प्राकृतो ध्वनिः । यद्वा प्रकृतिः = स्फोटाभिव्यक्तेः काले स्थानकरणाभिघातजन्यो वर्णस्वभावः - प्रकृतिरेव प्राकृतः, स्वार्थेऽण् प्रत्ययः, स चासौ ध्वनिः, स्फोटस्य वर्णरूपताप्राप्तेर्मूलकारणम्, तेन विना स्फोटस्य वर्णरूपताया अनुपलब्धेः ।

वैकृतस्तु स्फोटाभिव्यक्त्युत्तरकालवर्ती स्फोटस्य वर्णरूपताऽऽधाने न हेतुः, किन्तु प्राकृतध्वनिनाऽभिव्यक्तस्य तस्योपलब्धिकालस्य न्यूनाधिकता-रतम्येन स्थितिरूपवृत्तिभेदे भवति निमित्तमात्रम्, स्फोटस्वरूपभेदे तु न तस्य कश्चन व्यापारः ।

इदं तु बोध्यम् - उपचितापचितप्राकृतध्वनिभिः कालभेदभिन्नै-र्ह्रस्वदीर्घादिवर्णै र्भेदवानेव स्फोटोऽभिव्यज्यते, अत एव न जातु ह्रस्वदीर्घादिवर्णानां व्यक्त्येकत्वप्रत्यभिज्ञा, वर्णाभिव्यक्त्यनन्तरकालिकै र्वैकृतैस्तु स्फोटस्योपलब्धिकालभेदेऽपि न स्फोटस्वरूपभेदः । त्वराऽऽलस्यादिकृतद्रुत-

---

आशय : - विवक्षाप्रयत्न के कारण कण्ठ आदि स्थानों में विलक्षण वायु के अभिघात से उत्पन्न - प्राकृतध्वनि ह्रस्वदीर्घ आदि बाह्य नानावर्णरूप है, उससे अत्यन्त पृथक् नित्यशब्द - स्फोट आन्तर है, किन्तु वह प्राकृतध्वनि व्यञ्जक उपाधि होकर स्फोट को अपने नाना वर्णरूप से उपरञ्जित करता है । जैसे कि जपापुष्प अपने लौहित्यवर्ण से स्फटिक को उपरञ्जित करते हैं । इसके फलस्वरूप प्राकृतध्वनि का जो नाना वर्णरूप है, वह स्फोट में अभिव्यक्त होकर स्फोट का स्वरूप बन जाता है, जिससे कि नियमतः स्फोट का वर्णरूप में ही ज्ञान होता है । इस प्रकार वर्णरूप स्फोट के ज्ञान में कारण होता है - स्फोट का व्यञ्जक उपाधि - प्राकृतध्वनि । साथ ही प्राकृतध्वनि अपने स्वरूप से विषय

मध्या, विलम्बितेति वृत्तित्रयं भवति, स ध्वनि वैंकृत-

विलम्बितोच्चारणरूपवृत्तिभेदे – 'तमेव ह्रस्वमवर्णमयं बालो द्रुतमुच्चारितवान्, अन्यश्च विलम्बितमिति' ह्रस्वादिवर्णव्यक्तेरेकत्वप्रत्यभिज्ञादर्शनात् । तदाह- तपरसूत्रे तत्रभवान् भाष्यकार:- "स्फोटस्तावानेव, ध्वनिकृता वृद्धि:" इति । "स्फोट: शब्द:, ध्वनि: शब्दगुण:" इति च ।

पद्यमिदं संग्रहकार: पठतीति वृत्तिराह ।

नागेशपादास्तु तपरसूत्रभाष्योद्योते हरिपद्यत्वेनोदाहरन्ति । तेनेदं हरिपद्यमेवेति प्रतीम: । अन्यथा पूर्वत्र "प्राकृतस्य ध्वने: काल:" इत्युक्तेरनन्तरं प्रसङ्गसङ्गतं प्राकृतस्वरूपनिरूपणं विहायाग्रे "शब्दस्योर्ध्वम्" इत्यादिना वैकृतस्य स्वरूपाभिधाने प्रकृतहानि: प्रक्रमभङ्गो न्यूनता चापद्येरन्। इतोऽपि हर्युपज्ञा वृत्तिरित्यत्र मम नाश्वास: ।

अत्र 'वर्णस्य ग्रहणे' इति 'वृत्तिभेदे' इति च पाठस्तपरसूत्रभाष्योद्योते नागेशानुमत: पाठ: । इह 'शब्दस्य ग्रहणे' इति 'स्फोटस्य ग्रहणे' इति वा पाठभेदो दृश्यते । तात्पर्यतस्तु न भेद: । शब्दस्य = स्फोटस्याभिव्यञ्जक: प्राकृतो ध्वनिरिति तदाशय: । परन्तु स्फोटाख्यशब्दे ह्रस्वदीर्घादिवर्णवैलक्षण्यस्य हेतुतया प्राकृतध्वने: स्वरूपनिरूपणप्रसङ्गे विषयविधया वर्णस्य साक्षादेव स्पष्टमभिधानमुचितम् । एवमिह 'स्थितिभेदे' इति पाठेऽपि नार्थभेद: ।

रूप में भी वर्णस्फोट के ज्ञान में कारण होता है, क्योंकि जब वह वर्णरूप है तभी तो स्फोट भी वर्णरूप ज्ञात होता है । अत: प्राकृतध्वनि अपने वर्णात्मक स्वरूप से विषय बनकर भी वर्णस्फोट के ज्ञान में कारण होता है । सारांश में- प्राकृतध्वनि स्फोट के वर्णस्वरूप का उपधायक तथा ग्राहक है ।

इससे विलक्षण है - वैकृतध्वनि । यह स्फोट का स्वरूपोपधायक अर्थात् व्यञ्जक नहीं है, किन्तु अभिव्यक्त स्फोट की चिरकाल वा अचिरकाल तक स्थिति का प्रयोजक है, एक ही शब्द को कोई हड़बड़ी में क्षणभर में बोलता

नामक इति सारार्थः ॥ ७७ ॥

परन्तु तपरसूत्रे भाष्ये - "द्रुतायां तपरकरणे मध्यविलम्बितयोरुपसंख्यानम् कालभेदात्" इत्यापादने तत्परिहारोपायतया स्पष्टं द्रुतादिवृत्तीनामेव भेदे वैकृतरूपनिमित्तस्य भेदकथनं शोभनम् । तस्मिन्नभिहिते तु वैकृतस्य चिराचिरकालस्थितिभेदे निमित्तत्वं त्वर्थादेव पर्यवस्यतीत्यलं तदभिधानेन ।

एवं च प्राकृतो ध्वनि वर्णरूपत्वात् स्वरूपतो विषयविधया स्फोटे चोपधायकतया वर्णस्य ग्रहणे = वर्णस्फोटस्य व्यञ्जने कारणम्, वैकृतस्तु व्यक्तस्य स्फोटस्य चिराचिरोपलम्भरूपद्रुतादिवृत्तिभेदे निमित्तमिति प्राकृतवैकृतयोर्विवेकः ॥ ७७ ॥

है, तो दूसरा कोई अनेक क्षणों में विलम्ब से बोलता है, उससे शब्द का स्वरूपभेद वा मात्रारूप कालभेद नहीं होता है । शब्द की अभिव्यक्ति के पश्चात् उसकी अल्पकाल वा अधिककाल तक स्थिति तथा उपलब्धिरूप जो - 'द्रुत-मध्य-विलम्बित' वृत्तियाँ हैं, उनके भेद का निमित्तकारण वैकृत ध्वनि है, जो कि स्फोट की अभिव्यक्ति के पश्चात् होने से स्थिति का प्रयोजक भले ही हो, पर स्वरूपभेद का प्रयोजक नहीं ॥ ७७ ॥

शब्दस्योर्ध्वमभिव्यक्ते र्वृत्तिभेदे तु वैकृताः ।
ध्वनयः समुपोहन्ते स्फोटात्मा तैर्न भिद्यते ॥ ७८ ॥

प्रत्येकार्थप्रकाशिका

शब्दस्येति - शब्दस्योर्ध्वदेशम् अभिव्यक्तेः = प्रकाशस्य निमित्तानि, ये प्राकृता इति पूर्वत आक्षेपः वृत्तिभेदे =

आनन्दा

प्राकृतवैकृतयोः कार्यवैलक्षण्येन स्वरूपवैलक्षण्यमभिधाय तयोः संघातरूपत्वेन वस्तुतो भेदकत्वाभावात् स्फोटस्याखण्डत्वमाह - 'शब्दस्योर्ध्वम्' इति ।

अन्वयः - शब्दस्य अभिव्यक्तेः ऊर्ध्वम् वृत्तिभेदे तु वैकृताः ध्वनयः समुपोहन्ते, तैः स्फोटात्मा न भिद्यते ।

व्याख्या - शब्दस्य = आन्तरस्य नित्यशब्दस्य स्फोटाख्यस्य अभिव्यक्तेः= प्राकृतध्वनिना ताद्रूप्येण ग्रहणस्य ऊर्ध्वम् = पश्चात् वृत्तिभेदे = द्रुतादिवृत्तिभेदे हेतवो न तु कालभेदे हेतवः वैकृता ध्वनयः समुपोहन्ते = अविच्छेदेनानुवर्तमानाः समूहरूपतां प्राप्नुवन्ति । तैः = ध्वनिभिः स्फोटात्मा= स्फोटस्वरूपं न भिद्यते = वस्तुतस्ताद्रूप्याभावादखण्डमेव तिष्ठति ।

सूर्यमाया

शास्त्र की प्रक्रिया में अन्तरङ्ग-बहिरङ्ग-भाव से प्राकृत का कालभेद ग्राह्य हो अथवा वैकृत का वृत्तिभेद ग्राह्य न हो, वस्तुतः ध्वनि के भेद से स्फोट का स्वरूप कभी भिन्न नहीं होता, यह यहाँ ध्वनिप्रसङ्ग का उपसंहार करते हैं - 'शब्दस्य' इत्यादि ।

अर्थ : - आन्तर शब्द - 'स्फोट' की अभिव्यक्ति होने के पश्चात् केवल द्रुत आदि वृत्तियों के भेद में कारण - वैकृतध्वनियाँ कुछ समय तक वर्तमान रहते हुए संचित व उपचित होते हैं, किन्तु उनसे स्फोट का स्वरूप वस्तुतः भिन्न नहीं होता है - अखण्ड ही रहता है ।

उक्तवृत्तिभेदे तु कारणानीत्याक्षेपः ये - वैकृताः, तैः = प्राकृत-वैकृतैः ध्वनयः समुपोहन्ते = संघाता भवन्ति, स्फोटात्मा न

ध्वनिभिः संसृज्यमानस्य स्फोटस्य ताद्रूप्याध्यारोपाद् भेदप्रतिभासेऽपि स्वरूपतो नास्ति कश्चन भेद इत्यर्थः ।

यद्वा अवतरणभेदेनेह व्याख्याप्रकारान्तरम् - ननु यथा स्फोटे वर्णस्य ग्रहणे हेतुः प्राकृतो ध्वनिस्तथा वृत्तिभेदे हेतुर्वैकृतो ध्वनिः, एवं च स्फोटे प्राकृतध्वने र्ह्रस्वादिकालभेदवत् वैकृतध्वने र्वृत्तिकालभेदोऽपि किं न स्यादित्याशङ्कां परिहरन् प्राकृतवैकृतयोर्वैषम्यं दर्शयति - 'शब्द' इति । प्राकृतध्वनिना स्फोटस्याभिव्यक्तेः पश्चात् अनुवर्तमानो वैकृतो ध्वनि र्वृत्तिभेदे हेतुः सन्नपि स्फोटव्यतिरेकेणोपलभ्यमानस्ताद्रूप्यस्यानारोपात् स्फोटे ह्रस्वादि-कालभेदवत् वृत्तिकालभेदव्यवहारं न प्रवर्तयति ।

विमर्शः - यथा प्रदीपादिप्रकाशो जायमानः प्रथमं घटादिस्वरूपज्ञाने हेतुः, घटे ज्ञाते तदुत्तरकालमनुवर्तमानस्तु प्रकाशो ज्ञानसन्तानरूपाया वृत्तेर्हेतुः, तथा प्राकृतो ध्वनिः स्वेन रूपेणालिङ्गितस्य स्फोटस्वरूपस्य ज्ञाने हेतुः, ताद्रूप्येण व्यक्ते स्फोटे पश्चादनुवर्तमानो वैकृतो ध्वनिस्तु स्फोटविषयां

आशय : - जैसे दीपक जलाते ही उसका प्रथम प्रकाश वहाँ के समस्त वस्तु का व्यक्त रूप में ज्ञान कराता है, उसके बाद का प्रकाश थोड़े या अधिक जितने समय तक रहता है, उतने समय सीमा तक पूर्व उत्पन्न उस ज्ञान को अनवरत बनाये रखता है, किन्तु दुबारा पुनः उस वस्तु का कोई नवीन ज्ञान नहीं कराता, ऐसे ही स्थान-करणों के अभिघात से प्रथम उत्पन्न प्राकृत ध्वनि अपने रूप से अभिव्यक्त शब्दस्वरूप का ज्ञान कराता है, उसके पश्चात् अनुवर्तमान जो वैकृत ध्वनि है, वह शीघ्र अथवा विलम्बित उच्चारण की शैली के अनुसार जितने समय तक अवस्थित रहता है, उतने समय तक पूर्व उत्पन्न शब्दस्वरूप को अविच्छिन्न बनाये रखता है, जिससे द्रुत-मध्य तथा विलम्बित शब्द के स्थितिकाल भेद से द्रुत आदि वृत्तिभेद तो होता है, किन्तु अन्य कोई नवीन शब्द-स्वरूप का ग्राहक नहीं होता है ।

भिद्यते = वस्तुतो न भिन्नो भवति, तस्यैकत्वान्नित्यत्वाच्चेति भावः ॥ ७८ ॥

समुपजातबुद्धिमविच्छेदेन प्रवर्तयति । एवं च स्फोटस्य प्राकृत-व्यतिरेकेणानुपलब्धेस्ताद्रूप्याध्यारोपेण तत्कृतस्वरूपभेदव्यवहारेऽपि ज्ञात-स्वरूपस्फोटव्यतिरेकेण वैकृतस्योपलब्धेस्ताद्रूप्यस्यानारोपात् स्फोटे न वैकृतध्वनिकृतो वृत्तिकालभेदव्यवहारः ।

अत्र 'वृत्तिभेदं तु वैकृताः' इत्यपि पाठः । तदा - वैकृता ध्वनयः वृत्तिभेदं समुपोहन्ते = सम्पादयन्तीत्यर्थः ।

किन्तु 'सम्-उप'पूर्वकस्य - 'ऊह' धातोः समूहार्थकत्वप्रसिद्ध्या तस्याकर्मकत्वेन द्वितीयाया अप्रवृत्तौ 'वृत्तिभेदम्' इति द्वितीयान्तपाठानुरोधेन 'समुपोहन्ते' इत्यस्य सम्पादयन्तीति व्याख्यानं क्लिष्टम् । तस्मात् 'वृत्तिभेदे' इति सप्तम्यन्तपाठो युक्तः ॥ ७८ ॥

इस प्रकार प्राकृतध्वनि के अनुरूप ही शब्द की अभिव्यक्ति होने से प्राकृतध्वनि का रूपभेद व कालभेद शब्दस्वरूप के अन्तर्गत हों, अथवा वैकृतध्वनि से शब्दस्वरूप का कोई भेद न होने पर भी व्यक्त शब्द के स्थिति-कालभेद से 'द्रुत-मध्य-विलम्बित' ये शब्दस्वरूप से बहिर्भूत त्रिविध वृत्तिभेद हों, वस्तुतः ध्वनि के इन भेदों से नित्यशब्द - स्फोट का स्वरूपतः कभी कोई भेद नहीं होता है, वह सदा अखण्ड स्वरूप है, एक है ॥ ७८ ॥

इन्द्रियस्यैव संस्कारः शब्दस्यैवोभयस्य वा ।
क्रियते ध्वनिभिर्वादास्त्रयोऽभिव्यक्तिवादिनाम् ॥ ७९ ॥

प्रत्येकार्थप्रकाशिका

ध्वनिभिः कः संस्क्रियते ? येन शब्दः प्रकाश्यते, इति मतभेदेनाह - 'इन्द्रियस्येति ।' ध्वनिभिः - इन्द्रियस्यैव =

आनन्दा

'शब्दस्योर्ध्वमभिव्यक्ते' रित्यनेन नित्यत्वेन शब्दस्याभिव्यक्तिवादं पुरस्कृत्य ध्वनेर्व्यञ्जकत्वमुक्तम् । व्यञ्जकत्वं चावरणभङ्गेन विशेषाधानेन वा संस्कारविशेषेण सिद्धवस्तुनो ज्ञानजनकत्वम् । स हि संस्कारः - किं ज्ञानसाधनेन्द्रियस्य, किं वा ज्ञानविषयस्य, किं वा विषयेन्द्रिययोर्द्वयोरपीति वादत्रयं ध्वनिविषयेऽपि विकल्प्य यथाक्रममुपन्यस्यति - 'इन्द्रियस्यैव' इति ।

अन्वयः - ध्वनिभिः इन्द्रियस्य एव संस्कारः क्रियते, शब्दस्य एव वा, उभयस्य वा, (संस्कारः क्रियते - इत्यावृत्त्याऽन्वयः), इति अभिव्यक्तिवादिनाम् त्रयः वादाः ।

सूर्यमाया

पूर्व में वर्णित ध्वनि के प्रसङ्ग से शब्द की अभिव्यक्तिवादी का ध्वनि के कार्य विषय में तीन मत प्रस्तुत करते हैं - 'इन्द्रियस्यैव' इत्यादि ।

अर्थ : - ध्वनि से केवल श्रोत्रेन्द्रिय का ही संस्कार किया जाता है, अथवा ध्वनि से केवल शब्द का संस्कार किया जाता है, अथवा इन्द्रिय और शब्द दोनों का ध्वनि से संस्कार किया जाता है, ये तीन मत शब्द की अभिव्यक्तिवादियों के हैं ।

आशय : - नित्यशब्दवादी ध्वनि को शब्द का व्यञ्जक मानते हैं । अर्थात् बाह्यध्वनि से आन्तरशब्द की अभिव्यक्ति मानते हैं । शब्द की अभिव्यक्ति प्रक्रिया में तीन मत हैं ।

श्रोत्रेन्द्रियस्यैव संस्कारः क्रियते = संस्कृतेन तेन शब्दो गृह्यते, इति केषांचिन्मतम् । वा = अथवा शब्दस्यैव, शब्द एव

व्याख्या - ध्वनिभिः = शब्दाभिव्यक्तिहेतुभिः प्राकृतैः इन्द्रियस्य = शब्दग्राहकस्य श्रोत्रस्य एव संस्कारः = शब्दग्रहणशक्त्युद्बोधरूपोऽतिशयः क्रियते = आधीयते, प्रतिबन्धकदोषेण श्रोत्रसंस्काराभावे बधिरस्य शब्दग्रहणाभावाद् ज्ञायते यत् संस्कृतेन निर्दुष्टेनैव श्रोत्रेन्द्रियेण शब्दो गृह्यते इति ।

यद्वा शब्दस्य = ज्ञानविषयस्यान्तरस्य स्फोटस्य एव ध्वनिभिः संस्कारः= ध्वनिसंसर्गात् वर्णपदादिक्रमरूपविशेषाधानरूपोऽतिशयः क्रियते = उपाधीयते । ध्वनिभिः स्वस्वरूपोपरागेण संस्कृत एवान्तरः शब्दः श्रावणज्ञानविषयो भवति, नान्यथा । यद्वा उभयस्य = विषयस्य शब्दस्य-श्रोत्रेन्द्रियस्य चोभयोः ध्वनिभिः संस्कारः क्रियते, द्वयोरन्यतरस्यैव संस्कारे विनिगमकाभावात्, इति अभिव्यक्तिवादिनाम् = शब्दनित्यत्ववादिनाम् त्रयो वादाः = शब्दाभिव्यक्तिप्रक्रियाविषयकं मतत्रयम् । तदेतदग्रे दृष्टान्तोपन्यासेनोपपादयिष्यते ।

विमर्शः - नित्यः स्फोटरूपः शब्दो बुद्धिगुहायामन्तःसंनिविष्टोऽभिव्यञ्जकध्वनेरसंसर्गेऽज्ञानावरणेन तिरोहितोऽव्यक्तस्तिष्ठति । स हि ध्वनिसंसर्गेणा-

---

इनमें प्रथम मत यह है कि - कण्ठ आदि स्थानों में वायु के आघात से उत्पन्न ध्वनि श्रोत्रेन्द्रिय का अतिशयाधान रूप संस्कार करता है । अर्थात् श्रोत्र में शब्द के ग्रहण का जो सामर्थ्य विशेष है, उसके अवरोध को दूरकर ध्वनि अपने रूप में आन्तरशब्द का सन्निकर्ष स्थापित करता है । इस प्रकार ध्वनि के संनिकर्ष से अवरोधमुक्त व संस्कृत श्रोत्रेन्द्रिय से शब्द का ज्ञान होता है । ध्यान रहे कि यह शब्द - 'स्फोट' है ।

दूसरा मत है कि - ध्वनि के संसर्ग से केवल शब्द का संस्कार होता है । अर्थात् स्फोट रूप आन्तरशब्द ध्वनि के उपराग से व्यक्त वर्णक्रमरूप

ध्वनिभिः संस्कृतः श्रोत्रविषयो भवति, इति अपरमतम् । वा - उभयस्य, शब्दश्रोत्रेन्द्रिययोरुभयोः संस्कार इति परमतम् ।

ज्ञानावरणाभिभवे व्यक्तरूपः श्रावणज्ञानविषयो भवति । एवं स्फोटग्रहस्य ध्वन्यन्वयव्यतिरेकानुविधायित्वदर्शनेन स्फोटज्ञानसामग्र्याः कश्चन ध्वनिकृतः संस्काररूप उपकारः स्वीकर्तव्यः । स संस्कारो ज्ञानकरणेषु कतमस्य भवतीत्यन्वेष्टव्यः । ध्वनिना - किं शब्दज्ञानकरणस्य श्रोत्रेन्द्रियस्य संस्काराख्य उपकारः क्रियते, किं वा ज्ञानविषयस्य शब्दस्य, किं वोभयस्येति जिज्ञासायाम्- केचन वदन्ति-ध्वनिना श्रोत्रेन्द्रियस्य संस्कारः क्रियते, श्रोत्रेण ध्वनेर्ग्रहणे शब्दस्य ग्रहणं ध्वनेर्ग्रहणाभावे च शब्दग्रहणाभाव-इत्यन्वय-व्यतिरेकाभ्यां श्रोत्रस्यैव कश्चनातिशयविशेषः संस्कारः सिध्यति । स संस्कारः श्रोत्रस्य शब्दग्रहणे प्रतिबन्धापनयेन तत्सामर्थ्याविर्भावविशेषः । अपरे वदन्ति - श्रोत्रे शब्दग्रहणसामर्थ्यस्य निर्विशेषेण सद्भावेऽपि विषयस्य व्यक्तत्वा-व्यक्तत्वाभ्यां तज्ज्ञानस्य जन्माजन्मनोर्दर्शनाद् विषयस्य शब्दस्यैवाभिव्यक्ति-विशेषरूपो ग्राह्यत्वसामर्थ्यातिशयः संस्कारो मन्तव्यः ।

परे तु सिद्धान्तिनो वदन्ति - विषयेन्द्रिययोरुभयोः संस्कारोऽभ्युपेयः । योग्यविषयेन्द्रियसंनिकर्षस्य प्रत्यक्षजनकत्वाद् - श्रोत्रेण संनिकर्षे सति

को प्राप्त करता है, जिससे प्राप्तसंस्कार वह व्यक्त शब्द श्रोत्र के ग्रहण का विषय होता है, क्योंकि उद्भूत विषय ही इन्द्रिय का विषय होता है, अव्यक्त 'सूक्ष्म' नहीं ।

तीसरा समन्वयवादी सिद्धान्त है कि - ध्वनि - 'श्रोत्रेन्द्रिय और शब्द' दोनों का संस्कार व उपकार करता है । ध्वनि के व्यङ्ग्यव्यञ्जकभाव संबन्ध से व्यक्त आन्तरशब्द ध्वनि के रूप में श्रोत्र के साथ संनिकर्ष पाकर श्रोत्र में अतिशयाधान से श्रोत्र का संस्कार करता है, साथ ही ध्वनि अपने संसर्ग से आन्तरशब्द को व्यक्त रूप देकर - शब्द का भी संस्कार करता है । ध्वनि से अभिव्यक्त शब्द

इति त्रयो वादा अभिव्यक्तिवादिनाम् = नित्यवादिनां नये प्रसिद्धा इति ॥ ७९ ॥

शब्दस्य साक्षात्कारो जायते, तदभावे तु न जायते, इत्यन्वयव्यतिरेकाभ्यां कल्प्यते यद् ध्वनिः स्वोपरागेण शब्दमभिव्यज्य तस्मिन् श्रोत्रग्रहण-विषयत्वयोग्यतां संपाद्याऽऽन्तरं शब्दं विषयमनुगृह्णाति, श्रोत्रदेशं चोपगतः स ध्वनिः स्वद्वारेण संनिकर्षबलाद् शब्दग्रहणयोग्यतां संपाद्य श्रोत्रेन्द्रियं चानुगृह्णाति । एवं च ध्वनिना विषयेन्द्रिययोरुभयोरपि संस्कारः क्रियते - इति स्पष्टम् । अत एव ध्वनेर्जन्माभावेऽप्राप्तसंस्कारोऽव्यक्तः शब्दो नैव श्रोत्रेन्द्रियस्य ग्रहणविषयत्वं गच्छति, श्रोत्रं चासंस्कृतमान्तरेण शब्देनासंनिकृष्टं नैव शब्दग्रहणयोग्यं भवति । तस्मादुभयोः संस्कार इष्यते ॥ ७९ ॥

ही श्रोत्र का विषय होता है । ध्यान रहे कि श्रोत्रेन्द्रिय का संस्कार है - ध्वनिरूप में शब्द के संनिकर्ष से श्रोत्र में होनेवाला अतिशयविशेष । अत एव वह न होने पर दूर व्यवहित उच्चारित शब्द का देशान्तर में स्थित व्यक्ति को ज्ञान नहीं होता है । विषय का संस्कार है - प्रकृत में शब्द की अभिव्यक्ति । वह न होने पर अव्यक्त आन्तरशब्द का ज्ञान कभी किसी को नहीं होता है ।

अतः श्रोत्रेन्द्रिय और उसका विषय - शब्द, दोनों का ध्वनि से संस्कार स्वीकार्य है ॥ ७९ ॥

इन्द्रियस्यैव संस्कारः समाधानाञ्जनादिभिः ।
विषयस्य तु संस्कारस्तद्गन्धप्रतिपत्तये ॥ ८० ॥

प्रत्येकार्थप्रकाशिका

उक्तवादत्रयेऽपि दृष्टान्तमाह - इन्द्रियस्येति । समाधानम्= चित्तैकाग्रता अञ्जनम्, आदिना - मण्डूकवसादिः, तैः -

आनन्दा

ध्वनिभिरिन्द्रियस्य विषयस्योभयस्य वा संस्कार इत्युक्तवादत्रये - प्रथमे द्वितीये च वादे दृष्टान्तमुपन्यस्यति - 'इन्द्रियस्यैव' इति ।

अन्वयः - समाधानाञ्जनादिभिः इन्द्रियस्य एव संस्कारः, विषयस्य तु तद्गन्धप्रतिपत्तये संस्कारः ।

व्याख्या - समाधानाञ्जनादिभिः = समाधानेन चित्तस्यैकाग्रतालक्षणेन, अञ्जनेन = कज्जल-सुरमाविशेषेण, आदिना तत्सदृशैश्च गङ्गोदक - गोमूत्र-त्रिफलोदकप्रभृतिद्रव्यैः, इन्द्रियस्य = यथासंख्यमन्तरिन्द्रियस्य मनसो बहिरिन्द्रियस्य च चक्षुरादेः, एव = न तु विषयस्य, संस्कारः = अतिशयाधानम् भवतीति शेषः । अत एव समाहितस्य सूक्ष्मव्यवहितविप्रकृष्टवस्तूनामपि दर्शनं जायते, अञ्जनादिना च द्रव्येण रात्र्यन्धादिदोषवारणे रात्रावपि सम्यग् दर्शनं प्रवर्तते ।

सूर्यमाया

क्रमशः प्रथम और द्वितीय मत का साधक दृष्टान्त देते हैं - 'इन्द्रियस्यैव' इत्यादि ।

अर्थ : - पहला यह है कि - समवधान से तथा आँजन आदि से मन या चक्षु आदि इन्द्रिय का ही संस्कार देखा जाता है, विषय का नहीं ।

दूसरा यह है कि मिट्टी के नये घड़े या कसोरे आदि में जल के अभिषेक से इन्द्रिय का विषय - उस पात्र का ही संस्कार देखा जाता है, जिससे कि उसकी सौंधी गन्ध की अभिव्यक्ति व उपलब्धि होती है ।

इन्द्रियस्यैव = चक्षुरादेरेव संस्कारः । अन्यथा विषयस्य संस्कारे संस्कृतो घटो यथा चक्षुषा गृह्यते तथा अन्येनापि स्यात् ।

द्वितीयवादोपपादकं दृष्टान्तमाह – विषयस्येति । विषयस्य = नवशरावादेः पार्थिवद्रव्यस्य, तुना इन्द्रियस्य व्यवच्छेदः, तद्गन्धप्रतिपत्तये = तस्य नवशरावादेर्द्रव्यस्य यो गन्धस्तस्य समुद्बोधाय संस्कारः प्रकल्पते, न त्विन्द्रियस्य । क्लृपि संपद्यमाने चतुर्थी तादर्थ्ये वा बोध्या ।

विमर्शः – समाधानं हि = चित्तस्यैकाग्रता ध्येयैकप्रवणता यद्वा अन्तःकरणस्य मनसो बहिरिन्द्रियेण योगविशेषः समवधानम्, तयोराद्यमलौकिकं युक्तानां युञ्जानानां वा योगिनां भवति, दिव्यदृष्टीनाम् ऋषीणां च । समाधानेनातिशयाहितं तेषां चक्षुः सूक्ष्मातीन्द्रिय-धर्माधर्मादिदर्शनसमर्थं भवति, व्यवहितविप्रकृष्ट-वस्तुदर्शनसमर्थं च । द्वितीयं तु समाधानं जनसाधारणं लौकिकम् प्रत्यक्षमात्रं प्रति कारणम् । प्रमादादिवशान्मनसोऽनवधाने सत्यपि विषयेन्द्रियसम्प्रयोगे प्रत्यक्षानुपपत्तेः । तदुक्तम् – 'आत्मा मनसा युज्यते, मन इन्द्रियेण, इन्द्रियमर्थेन, ततः प्रत्यक्षमुपजायते' इति । ख्यातमेवैतदाख्यानकं यत् प्रियध्यानमग्ना शकुन्तला पुरोऽवस्थितमपि ऋषिं दुर्वाससं न ददर्श, नापि तस्य शापवचः शुश्राव ।

आशय : – मन की एकाग्रता से इन्द्रिय का संस्कार होता है, अर्थात् मन के समवधान से इन्द्रिय अपने विषय के ज्ञान में समर्थ होते हैं । मन का योग न हो तो अन्यमनस्क व्यक्ति को अपने समक्ष दृश्यमान वस्तु भी अनदेखा हो जाता है, जैसे कि शकुन्तला को अपने समक्ष महर्षि दुर्वासा का आगमन – गमन तथा अभिशाप वचन का ज्ञान न हो सका । क्योंकि मन का इन्द्रियों से योग प्रत्यक्षमात्र में कारण है । यह साधारण लौकिक प्रत्यक्ष की बात है । योगियों व ऋषियों का जो अलौकिक प्रत्यक्ष होता है, उसका कारण भी अलौकिक चित्त का समाधान है । जिससे योगी तथा ऋषिगण दिव्य दृष्टि पाकर सूक्ष्म धर्म – अधर्म,

द्वितीयदृष्टान्तमाह - विषयस्येति, शरावादेरुदकादिना संस्कारः, अत एव शरावस्थगन्ध एव गृह्यते न तु घटस्थः ।

एवं च समाधानेनान्तःकरणस्य तद्युक्तस्य बहिरिन्द्रियस्य च संस्कारः प्रोक्तः ।

अञ्जनादिभिर्द्रव्यैस्तु बहिरिन्द्रियस्यैव संस्कारः प्रख्यातः, तद्यथा अञ्जनेन गोमूत्रेण गङ्गोदकेन वा चक्षुषः संस्कारः, त्रिफलोदकेन पित्तादिदोषदूषितस्य रसनेन्द्रियस्य संस्कारः, श्लेष्मादिदूषितस्य घ्राणेन्द्रियस्य नस्यादिभिः संस्कार उदीरितः । तदित्थं समाधानेनाञ्जनादिभिश्चेन्द्रियस्यैव संस्कारो न तु विषयस्य दृष्टः । विषयस्य संस्कारे तु संस्कृतत्वाविशेषाद् दोषदूषितलोचनैरसंस्कृतेन्द्रियैरपि गृह्येत, न त्वेवं दृश्यते, तस्माद् समाधानादिभिरिन्द्रियस्यैव संस्कारः स्मृतः । अपि च विषयस्य संस्कारे चक्षुषा संस्कृते रूपे संस्कृतत्वाविशेषात् तत्र श्रोत्रस्यापि विषयत्वं स्यात्, न त्वेवं जातु दृश्यते । इन्द्रियेऽतिशये स्वीक्रियमाणे तु चक्षुष्येव सोऽतिशयो मतो येन रूपग्रहणं, न श्रोत्रे । तदाह श्लोकवार्तिके भट्टपादः -

यत्राप्यतिशयो दृष्टः स स्वार्थानतिलङ्घनात् ।
दूरसूक्ष्मादिदृष्टौ स्यान्न रूपे श्रोत्रवृत्तिता ।। इति ।

तथा व्यवहित वा सुदूरवर्ती वस्तुओं को भी देखने में समर्थ होते हैं, जैसे कि अर्जुन ने विश्वरूप विराट् कृष्ण को देखा, संपाती गीध ने शत योजनों दूर लङ्का में स्थित भगवती सीता को देखा । यह समाधान अन्तःकरण-संस्कार है, जिससे संयुक्त बहिरिन्द्रियों का भी संस्कार होता है । इसके अतिरिक्त - अञ्जन, गोमूत्र, गङ्गाजल, त्रिफलाजल आदि अनेकों बाह्य द्रव्य हैं, जिनसे चक्षु आदि बहिरिन्द्रियों का संस्कार होता है, नेत्रों का - काचदोष, कामलदोष, तिमिरदोष (रतौंधी) आदि रोगों का निवारण होता है ।

निष्कर्ष में - समाधान तथा अञ्जन आदि द्रव्यों से इन्द्रिय का संस्कार देखा गया है, विषय का नहीं । विषय का संस्कार माना जाय तो दोषयुक्त असंस्कृत

अन्यथा घ्राणेन्द्रियस्य संस्कारे संस्कृतेन घ्राणेन्द्रियेण यथा शरावगन्धप्रत्यक्षः, तथा घटादिस्थगन्धस्यापि स्यात्,

---

योगबलेन चक्षुरादाविन्द्रिये सूक्ष्मव्यवहितविप्रकृष्टादिविषयदर्शन-सामर्थ्यातिशयो यः स्मर्यते, स स्वविषयमनतिक्रम्य प्रवर्तते, तस्मान्न रूपे श्रोत्रेन्द्रियस्य व्यापार इति तदर्थः । सैषा व्यवस्थेन्द्रियस्यैव संस्कारे संघटते ।

किं च विषयस्य संस्कारेऽपि - इन्द्रियस्यासंस्कारे तिमिरकाच-कामलादिदूषितलोचनेन विषयस्य संस्कृतत्वात् शुक्तित्वशङ्खत्वादिविशेषधर्मस्य दर्शने सति 'शुक्तिरजत-पीतशङ्खादि' विभ्रमवार्तायाः कथापि न स्यात् । इतीन्द्रियसंस्कारवादिनो वदन्ति ।

अपरे तु विषयस्य संस्कारे दृष्टान्तं निदर्शयन्ति - गृह्यते हि नवशरावस्योदकाभिषेकेण गन्धोद्रेकः । वृषतपनसन्तप्तमेदिन्या नववारिदोदक-बिन्दुनिकरसंपातेन परितः प्रसरति - घ्राणसन्तर्पणोऽपूर्वो मेदुरसौरभसंचारः । तदिदं संस्कृतासंस्कृतद्रव्यगन्धोपलम्भानुपलम्भवैलक्षण्यं गृह्यमाणं विषयस्य संस्कारे सत्येव संगच्छते । इन्द्रियस्यैव संस्कारे तु सकृदपि घ्राणेन्द्रिये

इन्द्रिय से भी विषय का ज्ञान होना चाहिए, अथवा चक्षु के अतिरिक्त श्रोत्र से भी रूप का ज्ञान होना चाहिए क्योंकि विषय समानरूप में संस्कृत हैं, पर ऐसा कभी नहीं देखा गया है, अतः समाधान आदि से इन्द्रिय का ही संस्कार मान्य है ।

दूसरे मतवादियों की मान्यता है कि - ग्रीष्म के प्रचण्ड आतप से दहकती हुई भूमि पर अथवा आवे में पके हुए लालसुर्ख मिट्टी के बर्तन पर जल का फुहारा पहले पहल पड़ने पर उन द्रव्यों का ही संस्कार पाया जाता है, जिससे कि तत्काल अभिव्यक्त उनकी अपूर्व सोंधी वासना प्रकट ज्ञात होती है । अतः जल के अभिषेक आदि से भूमि अथवा मिट्टी के पात्र आदि विषय का ही संस्कार मान्य है, अत एव जो मिट्टी का पात्र अभिषेक से संस्कृत है, उसमें प्रकट

इन्द्रियस्याविशेषात् इति ॥ ८० ॥

संस्कृते तेनोदकाभिषिक्तशरावगन्धस्येवानभिषिक्तघटादिगन्धस्याप्युपलम्भः सम्पद्येत, न त्वेवं जातु गृह्यते । तस्माद् दृश्यते हि वारिणा निषिक्तानिषिक्तयोर्नवशरावकलशयोः सौरभवैलक्षण्यस्य ग्रहः । तस्मादभ्युपगम्यतां विषयस्यैव संस्कारः ॥ ८० ॥

सौरभ - सुगन्ध गृहीत होता है, जो अभिषिक्त व संस्कृत नहीं है, उसमें सुगन्ध गृहीत नहीं होता, यह विषय की विलक्षणता पाई जाती है । इन्द्रिय का संस्कार मानने पर तो विषय में विलक्षणता न होने से सभी विषयों का समान रूप में ही ज्ञान होना चाहिये, विलक्षण नहीं ॥ ८० ॥

चक्षुषः प्राप्यकारित्वे तेजसा तु द्वयोरपि ।
विषयेन्द्रिययोरिष्टः संस्कारः स क्रमो ध्वनेः ॥ ८१ ॥

प्रत्येकार्थप्रकाशिका

तृतीयमते दृष्टान्तमाह - 'चक्षुष' इति । चक्षुषः प्राप्यकारित्वे= चाक्षुषप्रत्यक्षे तेजसा = आलोकेन तु विषयेन्द्रिययोर्द्वयोरपि संस्कार इष्टः, अन्यथा विषयस्यासंस्कारे

आनन्दा

विषयेन्द्रिययोरन्यतरस्य संस्कारे दर्शितामनुपपत्तिं हृदि निधायोभय-संस्कारवादितृतीयमते साधकं दृष्टान्तमुपन्यस्यति - चक्षुष इति ।

अन्वयः - चक्षुषः प्राप्यकारित्वे तेजसा तु विषयेन्द्रिययोः द्वयोः अपि संस्कारः इष्टः, स क्रमः ध्वनेः ।

व्याख्या - चक्षुषः = चक्षुरिन्द्रियस्य प्राप्यकारित्वे = घटादिविषयमुपगम्य प्रत्यक्षजनकत्वे तेजसा = सूर्यप्रदीपादेः प्रकाशेन सहकारिणा विषयेन्द्रिययोः= घटादिद्रव्यस्य विषयस्य - चक्षुरिन्द्रियस्य च द्वयोः = उभयोः संस्कारः =

सूर्यमाया

इन्द्रिय और विषय दोनों का संस्कारवादी तृतीय मत में उपपादक दृष्टान्त देते हैं - 'चक्षुषः' इत्यादि ।

अर्थ : - चक्षुरिन्द्रिय का प्राप्यकारित्व रहने पर आलोक से विषय और इन्द्रिय दोनों का संस्कार अभीष्ट है, वह प्रणाली ध्वनि के संस्कार विषय में भी इष्ट है । अर्थात् ध्वनि से विषय - शब्द का, तथा श्रोत्रेन्द्रिय का संस्कार अभिमत है ।

आशय : - चक्षुरिन्द्रिय तैजस होने से प्राप्यकारी है । वह अपनी रश्मियों के द्वारा विषयदेश में पहुँचकर सन्निकृष्ट विषय का ही ग्राहक होता है, असन्निकृष्ट का नहीं । चक्षु की क्या कथा ? कोई भी इन्द्रिय सन्निकृष्ट विषय के ग्राहक

अन्धकारस्थितघटस्यापि प्रत्यक्षं स्यात्, इन्द्रियस्यासंस्कारे स्वयम् अन्धकारस्थितोऽपि पुरुषः घटं पश्येत् । एवमेव स क्रमः =

अन्धकारावरणप्रतिबन्धविघातरूपोऽनुग्रहः इष्टः । अन्धकारावरणनिवारणेन प्रतिबन्धमुक्तं संस्कृतमिन्द्रियं संस्कृतं विषयं गृह्णातीत्यर्थः । स क्रमः = पद्धतिः ध्वनेरपीष्टः । ध्वनिरपि शब्दं विषयं श्रोत्रेन्द्रियं चोभयं संस्करोति ।

विमर्शः - नवशरावादौ मृत्पात्रे जलाभिषेकेणेन्द्रियस्यैव संस्कारो मन्येत, तदा विषयवैलक्षण्याभावेनाभिषिक्तशरावस्येवानभिषिक्तघटादेरपि गन्धो गृह्येत, घ्राणेन्द्रियस्य संस्कृतत्वाविशेषात् । असंगतं चेदम्, मृत्पात्रे जलस्याभिषेके तदसम्बद्धस्य घ्राणेन्द्रियस्य संस्कारः कथं स्यात् ? अथ चेद् विषयस्यैव संस्कारो मन्येत, तदेन्द्रियस्य वैलक्षण्यानपेक्षणाद् श्लेष्मादिदोषदूषितेनासंस्कृतेन

होते हैं, असन्निकृष्ट के नहीं । यह अन्तर अवश्य है कि कुछ इन्द्रिय अप्राप्यकारी हैं, तो कुछ प्राप्यकारी । जिनमें - 'घ्राण, रसना, त्वक्' ये सब इन्द्रिय अप्राप्यकारी हैं, स्वयं विषयदेश में न जाकर अपने ही देश में आगत विषय का ग्राहक होते हैं । क्रमशः इनके विषय गन्ध, रस, स्पर्श इन्द्रिय के देश में ही सन्निकृष्ट होकर गृहीत होते हैं । दूर सरोवर में स्थित कमल का परागकण वायु के द्वारा नासिका प्रदेश में पहुँचे विना स्वदेश में नासिका से गृहीत नहीं होता, रसनेन्द्रिय में संनिकृष्ट हुए विना आपण में स्थित मिष्टान्न के मधुर रस का आस्वादन नहीं होता है, गङ्गा के शैत्य का त्वक् देश में सम्बन्ध हुए विना अनुभव नहीं होता है । ये विषय इन्द्रिय के देश में ही गृहीत होते हैं, इन्द्रिय स्वयं विषयदेश में नहीं जाते हैं । अतः ये अप्राप्यकारी माने गये हैं ।

किन्तु इनके विपरीत चक्षुरिन्द्रिय प्राप्यकारी है, तथा श्रोत्र प्राप्यकारी तथा अप्राप्यकारी भी है । ये विषयदेश में पहुँचकर अपने विषय का ग्राहक होते हैं । यद्यपि वीचीतरङ्गन्याय से प्रथम उत्पन्न शब्द से शब्दान्तर उत्पन्न होता हुआ श्रोत्रदेश में पहुँचकर शब्द गृहीत हो सकता है, तथापि 'भेरी - नगाड़े का शब्द मैंने सुना है' इस अनुभव की उपपत्ति के लिए भेरीदेश में पहुँचकर उसके प्रथम

परिपाटी ध्वनेः । ध्वनि र्हि श्रोत्रेन्द्रियं संस्करोति, अत एव अत्रोच्चारितशब्दः अन्यत्र स्थितपुरुषेण नोपलभ्यते । शब्दमपि

घ्राणेन्द्रियेणापि शरावादिगन्धो गृह्येत, तस्योदकेन संस्कृतत्वाविशेषात् । तस्मात् प्रतिपत्तिवैलक्षण्याय विषयेन्द्रिययो र्द्वयोरपि संस्कार एष्टव्यः । दृश्यते तु सवितृप्रदीपादितेजसा घटादिविषयस्य चक्षुरिन्द्रियस्य चोभयोः संस्कारः । चक्षुरिन्द्रियं हि तैजसं प्राप्यकारि । तद्धि तैजसत्वात् स्वरश्मिभिर्विषयं संप्राप्यैव प्रत्यक्षं जनयति, नाप्राप्यकारित्वमस्माकं सम्मतम् । अत एव अन्धकारावरणे चक्षुषाऽसंनिकृष्टस्य विषयस्य चाक्षुषप्रत्यक्षं न जातु जायते । यदा त्वन्धकारावृतं भवति चक्षुः, विषयश्चान्धकारस्थः, तदा चक्षुषो रश्मयोऽन्धकारावरणेन प्रतिबद्धा विषयेण चक्षुःसम्बन्धमाधातुमसमर्था

उत्पन्न शब्द का ग्राहक माने जाने से श्रोत्र को प्राप्यकारी मानना भी उचित है । परन्तु चक्षुरिन्द्रिय प्राप्यकारी ही है, क्योंकि गन्ध आदि के समान घट आदि द्रव्य अथवा उसके रूप आदि विषय का चक्षु के गोलकदेश में जाना तो सम्भव नहीं, तब तो चक्षु ही अपने विषयदेश तक जाय, तभी उसका अपने विषय से सन्निकर्ष हो सकेगा, जिससे वह अपने विषय का ग्राहक होगा । अत एव चक्षु का प्राप्यकारित्व उचित है, बौद्धों का अभिमत - अप्राप्यकारित्व मान्य नहीं ।

चक्षु का यह प्राप्यकारित्व तभी देखा गया है, जबकि उसका सहकारी आलोक रहता है । अपने सहकारी आलोक के अभाव में वह विषय का ग्राहक नहीं होता । आलोक के अभाव में अन्धकार से आवृत चक्षु हो तथा विषय हो, दोनों का चक्रवाकयुगल के समान संनिकर्ष न होने से परस्पर ग्राह्यग्राहकभाव नहीं होता है, आलोक - 'चक्षुरिन्द्रिय और विषय' दोनों का मध्यघटक ऐसा सहकारी होता है कि दोनों का संनिकर्ष स्थापित कर अनुग्राहक होता है । अन्धकार के आवरण प्रतिबन्ध को हटाकर आलोक चक्षु तथा विषय दोनों का संस्कार व उपकार करता है । आलोक से संस्कृत चक्षु ही आलोक से संस्कृत - उद्भूतरूप का तथा द्रव्य का ग्रहण करने में समर्थ होता है । अत एव आदित्य

संस्करोति - अत एव 'घट' इति ध्वनिसंस्कृतेन श्रोत्रेण पटशब्दो नोपलभ्यते, इति भावः ॥ ८१ ॥

भवन्ति । एवं च स्वरश्मिद्वारा विषयेणासन्निकृष्टं चक्षुः प्रत्यक्षजनने नहि भवति समर्थम् । अतश्चाक्षुषप्रत्यक्षं प्रत्यालोकः सहकारिकारणं मन्यते । आलोको हि विषयेन्द्रिययोः सन्निकर्षे प्रतिबन्धकमन्धकारावरणमपनीय तयोः स्वरूपं संस्करोति । आलोकसंस्कृतं चक्षुरालोकसंस्कृतमुद्भूतरूपं घटादिविषयं गृह्णाति यथा, तथैव ध्वनिना संस्कृतं श्रोत्रेन्द्रियं तेन संस्कृतं व्यक्तं स्वविषयं शब्दं गृह्णाति । ध्वनिसंस्कृत एवान्तरः शब्दो वीचीतरङ्गन्यायेन कदम्बमुकुलन्यायेन वा श्रोत्रदेशमुपगतो गृह्यते, घटध्वनिसंस्कृतेन श्रोत्रेण घट एव गृह्यते, न पट इति हृदयम् ॥ ८१ ॥

आदि के आलोक से चक्षुरिन्द्रिय और उसका विषय दोनों का संस्कार मान्य है, अन्यतर का ही नहीं । ऐसे ही प्रकृत में ध्वनि से श्रोत्रेन्द्रिय और उसका विषय-शब्द, दोनों का संस्कार अभीष्ट है, केवल किसी एक का नहीं । श्रोत्र का संस्कार होने से तद्देश में उच्चारित शब्द का ग्रहण तद्देश में स्थित पुरुष का संस्कृत श्रोत्र ही करता है, भिन्नदेशस्थ पुरुष का संस्काररहित श्रोत्र नहीं । साथ ही घटध्वनि से संस्कृत अर्थात् अभिव्यक्त घटशब्द ही श्रोत्र से ग्राह्य होता है, असंस्कृत व अनभिव्यक्त पटशब्द नहीं । इन्द्रिय और विषय दोनों का संस्कार होने से ही संस्कृत और असंस्कृत में यह भिन्नता पाई जाती है ॥ ८१ ॥

स्फोटरूपाविभागेन ध्वनेर्ग्रहणमिष्यते ।
कैश्चिद् ध्वनिरसंवेद्यः स्वतन्त्रोऽन्यप्रकाशकः ॥ ८२ ॥

प्रत्येकार्थप्रकाशिका

तत्र ध्वनिस्फोटयो र्ग्रहणे मतभेदमाह - स्फोटेति । स्फोटे रूपस्य = स्वकीयरूपस्याविभागेन = अभिन्नतया स्फोटे रूपस्यानुषक्त्येति यावत्, ध्वनेर्ग्रहणमिष्यते । अयं भावः-

---

आनन्दा

ध्वनेः संस्काररूपकार्यविषये मतत्रयं निर्वर्ण्य तस्य ज्ञानविषये मतभेदमाह- स्फोट इति ।

अन्वयः - सरलः ।

व्याख्या - स्फोटरूपाविभागेन = स्फोटे ध्वनिरूपोपरागवशात् स्फोटस्वरूपाभेदेन ध्वनेः ग्रहणम् = ज्ञानम् इष्यते, न तु स्फोटरूपाद् भेदेन स्वातन्त्र्येण । स्फोटपरतन्त्रमेव ध्वनेर्ग्रहणमिति फलितोऽर्थः ।

कैश्चित् = अन्यैस्तु ध्वनिः असंवेद्यः = चक्षुरादीन्द्रियवत् स्वयमज्ञात एव स्वतन्त्रः = स्फोटानधीनः केवलः सन् अन्यप्रकाशकः = स्वस्मादन्यस्य स्फोटस्य प्रकाशकः = ज्ञानकारणम् इष्यते ।

विमर्शः - यथा प्रदीपादित्यादेरालोकः प्राप्यकारी घटादिविषयं संप्राप्तो विषयादविभक्तरूपो गृह्यमाणो विषयप्रकाशकः, यथा वा जपापुष्पलौ-

---

सूर्यमाया

ध्वनि का स्फोट से अपृथक् वा पृथक् ज्ञान में मतभेद बताते हैं - 'स्फोट' इत्यादि ।

अर्थ : - स्फोट में ध्वनिरूप के विभाग विना ही मिलित - अभिन्न रूप में ध्वनि का ज्ञान इष्ट माना गया है । दूसरे कुछ लोग ज्ञान का विषय हुए विना स्फोट से पृथक्-स्वतन्त्र ध्वनि को अपने से भिन्न स्फोट का प्रकाशक मानते हैं ।

आशय : - जैसे लाल जपा व गुलाब आदि पुष्प के संसर्ग में स्फटिक का लोहित वर्णरूप ज्ञान होता है, लोहित रूप से पृथक् ज्ञान नहीं होता है, इसी प्रकार

व्यञ्जकरूपानुषक्त एव व्यङ्ग्यो लोके भवति, यथा जपाकुसुमगतलौहित्यरूपमिश्रितस्यैव स्फटिकादेर्भानम्, एवं - ध्वनिस्फोटरूपयोरभिन्नतयैव ज्ञानमिति ।

हित्योपरागादभेदेन स्फटिकस्य ग्रहणम्, तथा ध्वनिरूपोपरागात् स्फोटाभेदेन ध्वनेर्ग्रहणम्, गृह्यमाणश्च स ध्वनिः स्फोटस्य प्रकाशक इति ध्वनेर्ग्रहणपरं प्रथमं मतम् । अस्मिन् पक्षे सहोपलम्भनियमात् स्फोटादविविक्तः स्फोटपरतन्त्रो ध्वनिरित्यवधीयताम् ।

अपरं च ध्वनेरग्रहणपरं मतम् - यथा प्राप्यकारि तैजसं चक्षुरिन्द्रिय-मगृह्यमाणं स्वतन्त्रं घटादिविषयं सम्प्राप्य तस्मादविभक्तं सत् स्वविषय-प्रकाशकम्, तथा ध्वनिरपि प्राप्यकारी स्फोटादविभक्तोऽगृह्यमाण एव स्वतन्त्रः स्फोटस्य प्रकाशक इति द्वितीयं मतम् ।

चक्षुषोऽप्राप्यकारित्वे तु ध्वनेरग्रहणपक्षस्यैव प्रकारभेदः - यथा घ्राणादिवदप्राप्यकारि चक्षुर्घटादिविषयाद् विभक्तं स्वतन्त्रं सत् आलोक-सहकारेण विषयेण संनिकृष्टमगृह्यमाणमेव विषयस्य ग्राहकं तथा स्फोटाद् विभक्तः स्वतन्त्रो ध्वनिरगृह्यमाण एव स्फोटस्य ग्राहक इति परकीयं तृतीयं

ध्वनि के संसर्ग से उसके रूप से प्रतिबिम्बित स्फोट में ध्वनि का विभक्त ज्ञान नहीं होता है, अपितु स्फोट से अविभक्त ही ज्ञान होता है । अथवा प्रकारान्तर से यह कहा जाय कि जैसे प्रकाश में स्थित घट आदि विषय का प्रकाश के साथ ही ज्ञान होता है, प्रकाश से पृथक् नहीं । अर्थात् प्रकाश पहले स्वयं ज्ञान का विषय होकर ही घट आदि दूसरों का ज्ञान कराता है, इसी प्रकार ध्वनि के रूप से अनुषक्त स्फोट के साथ ही ध्वनि का ज्ञान होता है, स्फोट से पृथक् नहीं । अतः ध्वनि पहले स्वयं ज्ञान का विषय होकर ही अपने से अविभक्त स्फोट का ज्ञान कराता है, यह अभीष्ट मत है । इस प्रकार यह ध्वनि का ग्रहणपक्ष है ।

दूसरा ध्वनि का अग्रहण पक्ष है, जैसे चक्षु आदि इन्द्रिय अज्ञेय हैं तथा अपने विषयों से अत्यन्त पृथक् स्वतन्त्र हैं, किन्तु वे स्वयम् अज्ञात रहकर ही अपने विषयों का ज्ञान कराते हैं, ऐसे ही ध्वनि भी स्फोट से अत्यन्त पृथक्-स्वतन्त्र है, वह अज्ञात रहकर ही स्फोट का ज्ञान कराता है । ध्वनि से स्फोट के ज्ञान के लिए ध्वनि के ज्ञान की अपेक्षा नहीं है । इस पक्ष का तात्पर्य यह है कि -

कैश्चित् ध्वनिः असंवेद्यः = स्वयमप्रत्यक्षः स्वतन्त्रः = केवलः अन्यस्य = स्फोटस्य प्रकाशको ज्ञापक इत्यर्थः । यथा चक्षुरादीन्द्रियाणि स्वयमज्ञातानि विषयान् प्रकाशयन्ति- तद्वत् ॥ ८२ ॥

मतम् । इह 'स्वतन्त्रोऽन्यैः प्रकल्पितः' इत्यपि पाठान्तरम्। स्वतन्त्रः = स्फोटाद् विभक्तो दूरात् स्फोटानवधारणरूपो गृह्यमाणो ध्वनिरिति तदर्थः । परन्तु दूरादुपलभ्यमानस्याव्यक्तस्य वर्णानात्मकस्य ध्वनेः स्फोटव्यञ्जकत्वा- भावेनेह प्रसङ्गाभावादकाण्डताण्डवं तदुपेक्षणीयम् ।

समासेनेह मतद्वयमेव कीर्त्यते - आलोकदृष्टान्तेन स्फोटाभिन्नरूपतया ध्वनेर्ग्रहणपरम्, चक्षुरिन्द्रियदृष्टान्तेन स्फोटाद् विभक्तस्य ध्वनेरग्रहणपरं च । तत्राद्यं स्वकीयं द्वितीयं च परकीयं मतमिति विवेकः ॥ ८२ ॥

तैजस चक्षुरिन्द्रिय तथा उसका जो सूक्ष्म रूप है, वा पार्थिव घ्राणेन्द्रिय तथा उसमें जो सूक्ष्म गन्ध है, वह अतीन्द्रिय होने से असंवेद्य रहकर ही अपने उद्भूत विषयों का ग्राहक होता है, इसी प्रकार ध्वनि भी स्फोट से पृथक् स्वतन्त्र रूप में असंवेद्य रहकर स्फोट का ग्राहक होता है । परन्तु इन्द्रिय के दृष्टान्त से ध्वनि का अग्रहण मत यहाँ इष्ट नहीं है, क्योंकि ज्ञानेन्द्रिय सूक्ष्मभूत का कार्य हों अथवा स्थूलभूत के सत्त्वगुण का कार्य हों, उभयथा अतीन्द्रिय - असंवेद्य हों, यह ठीक है, किन्तु कण्ठ आदि स्थानों में वायु के आघात से उत्पन्न - वर्णादिरूप व्यक्त कार्य- यहाँ स्फोट का व्यञ्जक ध्वनि विवक्षित है, उसका श्रोत्र से ग्रहण ही संमत है । प्रकारभेद से यह पक्षभेद अवश्य मान्य है कि - ध्वनिरूप से अनुषक्त स्फोट का ध्वनि से विवेक न होने से तथा दोनों का नियमतः एक साथ ज्ञान होने से अभेद माना जाय, अथवा आन्तर स्फोट का बाह्यध्वनि से व्यङ्ग्य और व्यञ्जक के रूप में भेद माना जाय । वस्तुतः ध्वनि से भिन्न स्फोट है, जैसे प्रकाश से भिन्न घट आदि प्रकाश्य वस्तु हैं ॥ ८२ ॥

यथानुवाकः श्लोको वा सोढत्वमुपगच्छति ।
आवृत्त्या न तु स ग्रन्थः प्रत्यावृत्त्या निरूप्यते ॥ ८३ ॥

प्रत्येकार्थप्रकाशिका

इदानीं स्वमते ध्वनीनां क्रमिकत्वेऽपि 'एकं पदं वाक्यम्' इत्यादिव्यवहारमुपपादयति - यथेति । यथा अनुवाकः = तदाख्यग्रन्थः - नानावाक्यसमुदायः, श्लोको वा = नानापदसमुदायः सोढत्वम् = एकबुद्धिविषयताम् उपगच्छति =

आनन्दा

विभिन्नप्रयत्नसाध्यानां क्रमेणोत्पद्यमानानां नानावर्णध्वनीनां प्रत्येकं स्फोटस्य व्यञ्जकत्वे द्वितीयाद्युच्चारणवैयर्थ्यप्रसङ्गः, एकं पदं वाक्यमिति व्यवहारानुपपत्तिश्च स्यात् । समुदितानां व्यञ्जकत्वमपि वक्तुमशक्यम् - उच्चरितप्रध्वंसिनां तेषां समुदायासम्भवादित्याद्यापत्तिं परिहरन् अनुवाकादि-दृष्टान्तेनैकबुद्धिविषयत्वेन पदवाक्यस्फोटस्यैकत्वमुपपादयति - 'यथानुवाक' इति ।

अन्वयः - यथा अनुवाकः श्लोकः वा सोढत्वम् उपगच्छति, स ग्रन्थः आवृत्त्या प्रत्यावृत्त्या न तु निरूप्यते ।

सूर्यमाया

अनुवाक और श्लोक दृष्टान्त से पद और वाक्य का एकत्व सिद्ध करते हैं- 'यथा' इत्यादि ।

अर्थ : - जैसे नाना मन्त्रों का समुदायरूप 'अनुवाक' नामक अध्याय तथा नाना चरणों का समुदाय - श्लोक, एक कहे जाने के क्षम होता है, एवं वह आवृत्ति तथा पुनरावृत्ति के भेद के कारण अनेक नहीं कहा जाता है, ऐसे ही प्रकृत में वस्तुतः पद और वाक्य स्फोट भी ध्वनि के भेद से अनेक नहीं कहा जा सकता है ।

प्राप्नोति, न तु स ग्रन्थ आवृत्त्या = सकृदावृत्त्येति यावत्, प्रत्यावृत्त्या = वारं वारम् आवृत्त्यापि भेदेनेत्यध्याहारः निरूप्यते= निश्चीयते, किन्त्वेक इत्येव बुद्धिः, एवमेव पदेऽपीति ।

अयमाशयः - तत्प्रयत्नजनितै र्ध्वनिभिरवास्तविकान् सखण्डवर्णपदवाक्यान् स्फोटान् पुनः पुनराविर्भावयद्भिः -

---

व्याख्या - यथा = येन प्रकारेण अनुवाकः = वेदे मन्त्राणामनुवाकाख्योऽध्यायविशेषः, श्लोकः = चरणचतुष्टयात्मकश्छन्दोबद्धपदसमुदायो वा सोढत्वम् = नानात्वेऽपि वाक्यपदानां संकलनया समूहालम्बनैकस्मृतिबुद्धिविषयत्वेनैकत्वव्यपदेशो क्षमताम् उपगच्छति । स ग्रन्थः = अनुवाकः श्लोको वा आवृत्त्या = पुनः पाठेन प्रत्यावृत्त्या = पुनः पुनराभीक्ष्ण्येन पाठेन च न तु निरूप्यते = आवृत्तिभेदेन नाना नोच्यते, प्रत्युतैक एव व्यवह्रियते तथा प्रकृतेऽपि । किं च पूर्वपूर्वध्वनिसंस्कारसहकृतश्चरमो ध्वनिः समुदितैकबुद्धिविषयः सन् पूर्णं स्वरूपं प्रकाशयितुं समर्थो भवति, न त्वेकैक एवेति सर्वेषां सार्थक्यम्, तथा स्फोटेऽपि बोध्यम् ।

विमर्शः - यथा अनुवाकः श्लोको वा तदेकदेशपदमात्रश्रवणे स्फुटमप्रकाशमानोऽपि चरमपदश्रवणे पूर्वपूर्वपदाहितसंस्कारबलात् संवलितैकबुद्धिविषयः स्फुटतरं प्रकाशमान एकत्वव्यपदेशभाग् भवति, न त्वावृत्तिप्रत्यावृत्तिभि र्भिद्यते, तथा प्रकृते स्फोटाभिव्यक्तिहेतवः पूर्वपूर्वध्वनयः स्फोटं स्फुटमप्रकाशयन्तोऽपि क्रमेणोत्पद्यमानाः स्वस्वसंस्कारमादधानाश्चरमध्व-

---

आशय : - वेद के अनुवाक नामक मन्त्रभाग में मन्त्रवाक्य अनेक हैं, किन्तु वह 'अनुवाक' शब्द से एक व्यवहृत होता है, एवं चार चरणों वाले एक श्लोक में अनेक पद होते हैं, किन्तु उनका समुदितरूप 'श्लोक' एक कहा जाता है । इतना ही नहीं, जब अनुवाक और श्लोक का एक बार कथन से स्पष्ट स्वरूप का ज्ञान नहीं होता, तो दुबारा आवृत्ति तथा पुनः पुनः अनेकों आवृत्ति द्वारा उसका अभ्यास

अल्पशोऽल्पशः वास्तविकाखण्डस्फोटबुद्धिं प्रकाशयद्भिः अन्त्ये साकल्येनैकः स्फोटः प्रकाश्यते, इयं प्रक्रिया नित्यैकत्ववादिनां नये। तथा च वास्तवैकत्वमादाय- 'एकोऽयमिति' व्यवहारः, अवान्तरे तत्तद्ध्वनिगतसखण्डत्वधर्मकृतनानाधर्मप्रयुक्त-

---

न्याविर्भावे पूर्वपूर्वाहितसंस्कारबलात् संकलितैकस्मृतिबुद्धिविषयतां प्राप्ताः स्फुटतया स्फोटतत्त्वं प्रकाशयन्तीति सिद्धं तेषां व्यञ्जकत्वम् । एवं च ध्वनीनां स्फोटव्यञ्जकत्वे सिद्धे स्फोटस्यैकत्वात् पदवाक्यैकत्वव्यपदेशो युज्यते । व्यञ्जकध्वनीनां च नानात्वमुपादाय पदवाक्यनानात्वव्यपदेशोऽपि भवतु, परं तैः स्फोटः स्वरूपतो न भिद्यते ।

परमते तु वर्णानामुच्चरितप्रध्वंसित्वेन स्थिरस्य कस्यचन वस्तुनोऽभावे पूर्वपूर्ववर्णानामुत्तरत्र संस्काराधानासम्भवेन चरमवर्णे पूर्वपूर्ववर्णसंस्कार-सहकारस्य वक्तुमशक्यतया तेषामेकस्मृतिबुद्धिविषयत्वेन समुदायो न संभवतीति तदैक्यमादाय पदवाक्यैक्यव्यपदेशोऽपि दुर्वचः स्यात् ।

ध्वनिव्यतिरिक्तस्फोटस्वीकारे तु कृत्स्नमपि शब्दस्वरूपमाद्यन्तं यावत् ध्वनिभिः प्रकाशितं बुद्धौ सन्निविष्टं पौर्वापर्यव्यवहाराय कल्पते । स्वाभिव्यञ्जकयावद्ध्वनिरूपरूषित एव स्फोटो बुद्धौ संनिविष्टः श्रावणप्रत्यक्षविषयः पौर्वापर्यव्यवहारविषयश्च भवति ।

तदेतत् संहितासंज्ञासूत्रे भाष्ये स्पष्टमाह -

"बुद्धौ कृत्वा सर्वाश्चेष्टाः कर्ता धीरस्तन्वन्नीतिः ।
शब्देनार्थान् वाच्यान् दृष्ट्वा बुद्धौ कुर्यात् पौर्वापर्यम् ॥" इति ।

करने से विशद ज्ञान होता है, किन्तु इस आवृत्ति और प्रत्यावृत्ति से उसका स्वरूपभेद नहीं होता है, यथावत् वह एक ही रहता है । प्रत्येक स्थिति में वह एक बुद्धि का विषय होने से एक अभिन्न ही व्यवहृत होता है, उच्चारणभेद से कभी भिन्न नहीं कहा जाता है, ऐसे ही प्रकृत में अनेक वर्ण व पदरूप ध्वनि से स्फोट की अभिव्यक्ति होने पर भी एक बुद्धि का विषय होने से पदस्फोट

वैलक्षण्यमादाय - 'नाना पदानि, नाना वाक्यानीति' अवास्तविकव्यवहारः, इति शाब्दिकनये सर्वं समञ्जसम् । मतान्तरे क्रमेण तु वर्णग्रहणे सति समुदायाभावादविषयत्वं तेषां बुद्धौ स्यादिति संहितासूत्रे भाष्ये स्पष्टम्, इति ॥ ८३ ॥

धीरो ध्यानशीलो बुद्धौ सर्वान् शब्दान् प्रतिबिम्बितान् कृत्वा शब्देन वाच्यानर्थान् बुद्धिदेशे दृष्ट्वा तत्रैव पौर्वापर्यव्यवहारं कुर्यादिति तदर्थः ।

एवं च प्रयत्नविशेषसाध्या ध्वनयोऽवास्तवान् सखण्डवर्णपदवाक्य-स्फोटानुपायभूतान् प्रकाशयन्तोऽन्ते साकल्येनैकमेवाखण्डस्फोटं वास्तवं प्रकाश-यन्तीति सारः ।

इह - 'प्रत्यावृत्ति निरूप्यते' इति पाठान्तरम् । तत्पक्षे - अनुवाकः श्लोको वा आवृत्त्या = आद्यन्तं यावत् पुनः पुनरुच्चारणेन सोढत्वमुपगच्छति= साकल्येनैकबुद्धिविषयो भवति, न तु प्रत्यावृत्ति = पूर्वपूर्वप्रत्येकावृत्तौ सकलं स्वरूपं निरूप्यते, इति तदर्थः ॥ ८३ ॥

तथा वाक्यस्फोट वस्तुतः अपने स्वरूप से एक ही रहता है, भिन्न नहीं होता, साथ ही प्रत्येक ध्वनि के संस्कार से सहकृत चरमध्वनि - मिलित एक बुद्धि का विषय होकर पूर्ण स्फोट को व्यक्त करता है । अतः प्रत्येक ध्वनि सार्थक है । इसका फलितार्थ यह है कि - पद और वाक्य का स्फोट के रूप में वास्तविक एकत्व है तथा व्यञ्जक ध्वनि के रूप में अवास्तविक नानात्व व्यवहार भी है, दोनों उपपन्न हैं । वस्तुतः स्फोट एक है, उसके पूर्णस्वरूप की सम्यक् अभिव्यक्ति आदि से अन्त तक सभी ध्वनि मिलकर करते हैं, स्वतन्त्र - एक एक ही नहीं ॥ ८३ ॥

प्रत्ययैरनुपाख्येयैर्ग्रहणानुगुणैस्तथा ।
ध्वनिप्रकाशिते शब्दे स्वरूपमवधार्यते ॥ ८४ ॥

प्रत्येकार्थप्रकाशिका

ननु 'घटे' त्यत्र श्रवणानन्तरं स्फोटो ज्ञातश्चेत्, अलम् तज्ज्ञानार्थमेव घटध्वनिस्वीकारेणेति शङ्कामपनुदन्नाह-प्रत्ययैरिति । ग्रहणानुगुणैः = ग्रहणोपकारकैः अनुपाख्येयैः = अवाच्योपायैः

आनन्दा

सम्यक् स्फोटस्वरूपप्रकाशे प्रत्येकध्वनीनामुपायत्वमाह - प्रत्ययैरिति । **अन्वयः** - तथा ग्रहणानुगुणैः अनुपाख्येयैः प्रत्ययैः ध्वनिप्रकाशिते शब्दे स्वरूपम् अवधार्यते ।

व्याख्या - तथा = अनुवाकवत् श्लोकवद् वा ग्रहणानुगुणैः = व्यक्तस्फोट-स्वरूपज्ञानोपायैः अनुपाख्येयैः = अवाच्यैः प्रत्ययैः = मध्यवर्तिभि वर्ण-पदाद्यवान्तरज्ञानैः ध्वनिप्रकाशिते = आदितश्चरमपर्यन्तं समुदितेन

सूर्यमाया

पूर्व में प्रदर्शित अनुवाक और श्लोक दृष्टान्त की प्रकृत स्फोट में तुलना करते हुए स्फोट के व्यक्त स्वरूप के ज्ञान में अवान्तर प्रत्येक ध्वनि की सार्थकता बताते हैं - 'प्रत्ययैः' इत्यादि ।

अर्थ : - अपने घटक प्रत्येक के ज्ञानसाध्य अनुवाक और श्लोक के ज्ञान के समान स्फोट के व्यक्तरूप के ज्ञान में एक उपायरूप सहायक तथा अपूर्ण होने से विशेषरूप में निर्वचन के अयोग्य जो प्रारम्भ से अन्त तक प्रत्येक ध्वनि का अवान्तर ज्ञान होता है, उसके द्वारा अन्त में मिलकर समस्त ध्वनि से प्रकाशित स्फोट में शब्द के पूर्णस्वरूप का अवधारण किया जाता है ।

प्रत्ययैः = घटाद्यवान्तरज्ञानैः ध्वनिप्रकाशिते = ध्वनिना व्यक्ते शब्दे स्वरूपम् = स्फोटरूपम् अवधार्यते = सम्यग् ज्ञायते ।

ध्वनिनाऽभिव्यक्ते शब्दे = उपेये वाचकशब्दे स्वरूपम् = स्फोटस्य पूर्णं स्वरूपम् अवधार्यते = स्फुटं गृह्यते ।

विमर्शः - आदितोऽन्तं यावत् प्रत्येकमन्त्राणां ज्ञानद्वारेणानुवाकस्य पूर्णस्वरूपस्य ज्ञानवत्, प्रत्येकचरणवर्तिसकलपदज्ञानद्वारेण सम्पूर्णस्य श्लोकस्य ज्ञानवच्च व्यक्तस्फोटस्वरूपस्य ग्रहणे उपायभूता 'इदं तदिति' विशिष्य निर्वक्तुमशक्या अस्फुटाकारा मध्ये जायमानाः सहकारिणो ध्वनिप्रत्यया अन्ते

आशय : - प्रारम्भ से अन्त तक प्रत्येक मन्त्रों के ज्ञान से जैसे अनुवाक के पूर्णरूप का ज्ञान होता है अथवा प्रत्येक चरणों में प्रत्येक पदों के ज्ञान से पूर्ण श्लोक का ज्ञान होता है, ऐसे ही अवान्तर प्रत्येक ध्वनि के ज्ञान से पूर्ण स्फोट की अभिव्यक्ति होने से स्फोट के पूर्णस्वरूप का सम्यक् ज्ञान होता है । प्रत्येक ध्वनि भले ही स्फोट के पूर्णस्वरूप का प्रकाशन नहीं करते, किन्तु वे सब अन्त में एक संवलित रूप में स्मृति का विषय बन-पूर्ण स्फोट का प्रकाशन करते हैं । अतः प्रत्येक ध्वनि स्फोट के पूर्णस्वरूप के प्रकाशन का सहायक एक अपरिहार्य उपाय हैं । यद्यपि पूर्व पूर्व प्रत्येकध्वनि अपने रूप में किसी अर्थविशेष का बोधक न होने से व्यक्त शब्द के रूप में व्यवहारयोग्य नहीं हैं, अतः अनुपाख्येय हैं, तथापि वे सब एक साथ स्फोट में प्रतिबिम्ब के रूप में संस्कार के आधान से एक बुद्धि का विषय होकर स्फोट के पूर्णरूप का प्रकाशन करने में समर्थ होते हैं । इस प्रकार यहाँ स्फोटवादियों की यह प्रक्रिया है कि - स्फोट के व्यक्तरूप के ज्ञान से पहले उसके व्यञ्जक प्रत्येक ध्वनि का आंशिक अस्फुट ज्ञान होता है, ततः चरमध्वनि के ग्रहणकाल में पूर्वपूर्व सब ध्वनि स्फोट में मिलित एक रूप में व्यक्त होकर स्फोट के पूर्ण स्वरूप के निश्चय का कारण होते हैं ।

अयमाशयः - नहि सकृद् द्विर्ज्ञानेन स्फोटः सम्यक्तया ज्ञायते, किन्तु सकलध्वनिभिः सम्यगभिव्यक्तस्य स्फोटस्य स्वरूपज्ञानं भवतीति ॥ ८४ ॥

समेत्यैकबुद्ध्युपारूढाः सन्तः पूर्णं स्फोटस्वरूपं स्फुटमवग्राहयन्तीति सिद्धं समेषां ध्वनीनां स्फोटाभिव्यक्तौ व्यञ्जकत्वेन सार्थक्यम् । स्फोटे सखण्ड-वर्णपदादिरूपध्वन्याकारावग्रहेण कल्पितेनोपायेन वास्तवाखण्डस्फोटस्वरूप-निर्धारणमिति हृदयम् ॥ ८४ ॥

सारांश में - प्रत्येक ध्वनि के ग्रहण से सखण्ड-वर्ण-पदरूप-स्फोट का ग्रहण होता है, एवं सखण्ड स्फोट के ग्रहण से वास्तविक - अखण्ड स्फोट का ग्रहण होता है ॥ ८४ ॥

नादैराहितबीजायामन्त्येन ध्वनिना सह ।
आवृत्तपरिपाकायां बुद्धौ शब्दोऽवधार्यते ॥ ८५ ॥

प्रत्येकार्थप्रकाशिका

तत्र सम्यग् ज्ञानस्य क्रममाह - नादैरिति । नादैः = पूर्वपरध्वनिभिः आहितं = स्थापितं बीजम् = सम्यक् प्रकाशानुगुणसंस्कारः यस्यां तस्याम्, आवृत्तपरिपाकायाम्= आवृत्तः - पुनः पुनः कृतः परिपाकः - प्रत्यक्षकरणयोग्यता

आनन्दा

प्रत्येकध्वनिसंस्कारपरिपाकबलेन स्फोटस्य स्फुटप्रतिपत्तिक्रममाह - नादैरिति ।

अन्वयः - नादैः आहितबीजायाम् आवृत्तपरिपाकायाम् बुद्धौ अन्त्येन ध्वनिना सह शब्दः अवधार्यते ।

व्याख्या - नादैः = आदितोऽन्तं यावत् प्रत्येकध्वनिभिः आहितबीजायाम्= संनिवेशित-स्फोटस्वरूपप्रकाशनयोग्य-संस्कारायाम्, आवृत्तपरिपाकायाम् = पुनः पुन र्भावनाबलात् स्फोटस्वरूपग्रहणदृढतरयोग्यतावत्यां बुद्धौ = अन्तःकरणे अन्त्येन = चरमेण ध्वनिना - सह = सहकृतायां शब्दः = पूर्णस्वरूपो व्यक्तः स्फोटः अवधार्यते = सम्यग् निश्चीयते । नाद्येन केवलेन न

सूर्यमाया

स्फोट के स्फुट स्वरूपज्ञान की प्रक्रिया बताते हैं - 'नादैः' इत्यादि ।

अर्थ : - तत्तत् अवान्तर ध्वनियों के द्वारा आधान किये गये संस्कारबीजवाली तथा बार-बार परिशीलन व अभ्यास के परिपाक से स्वरूपज्ञान की क्षमतावाली बुद्धि में अन्तिम ध्वनि के सहयोग से स्फोट सम्यक् रूप से जाना जाता है ।

यस्याम्, असकृदनुभवजनितसंस्कारसंस्कृतायामिति यावत् - तस्यां बुद्धौ = अन्तःकरणे - अन्त्येन ध्वनिना सह = चरमध्वनि-सहकारेणेत्यर्थः, शब्दः = स्फोटः अवधार्यते = निश्चयरूपेण ज्ञातो भवतीत्यर्थः ।

अयमाशयः - मणिपरिचयः सकृद् दर्शनेन न भवति, अपितु एकवारदर्शनेन कश्चित् संस्कारो मनसि जातः, पुनर्दर्शने

चान्त्येन केवलेन ध्वनिना स्फोटः स्फुटं परिज्ञायते, किन्तु तैः सर्वैरु-त्तरोत्तरोत्कर्षेण संस्काराधानेन चरमध्वनिग्रहणकाले संकलय्यैकबुद्धिविषयैः पूर्णस्फोटस्वरूपं व्यक्तं प्रकाश्यते, तेन न कस्यचन ध्वनेरानर्थक्यमिति हृदयम् ।

विमर्शः - यथा निषादर्षभगान्धारादिसप्तस्वराणां साक्षात्कारः सकृदेव श्रवणेनोच्चारणेन वा न भवति, किन्तु पुनः पुनः श्रवणोच्चारणाभ्यास-जनितदृढतरसंस्कारेण परिपक्वबुद्धे र्भवति, तथा स्फोटस्य साक्षात्कारः केवलेनैकैकेन ध्वनिना सकृदेव ज्ञातेन न भवति, किन्त्वादितोऽन्तं यावत् सर्वैरेवोत्तरोत्तरं संस्कारोत्कर्षेण स्फुट-स्फुट-तरस्फुटतमक्रमेण स्फोटं द्योतयद्भिः

आशय : - जैसे प्रथम बार निरीक्षण से किसी मणि व रत्न का विशेष ज्ञान न होकर सामान्य ज्ञान ही हो पाता है, पुनः निरीक्षण से पूर्व की अपेक्षा कुछ विशेष ज्ञान होता है, और निरन्तर देख भाल-जाँच-बूझ करने से उत्तरोत्तर ज्ञान -संस्कार परिपक्व व प्रखर हो जाता है, जिससे कोई जौहरी मणि का विशेषज्ञ - परीक्षक हो जाता है । अथवा जैसे संगीतशिक्षार्थी प्रथम बार - 'निषाद - ऋषभ - गान्धार' आदि सात स्वरों में किसी स्वर को सुनकर तथा उच्चारण कर उसके विशेष स्वरूप को पहचानने में भले ही समर्थ न होवे, किन्तु उसका कुछ सामान्य रूप अवश्य जान पाता है, इसके पश्चात् क्रमशः प्रतिदिन तत्तत् स्वर का

सति ततोऽधिकसंस्कारः, एवं रीत्या चरमदर्शनेनोद्बुद्ध-संस्कारसहकृतेनान्त्यानुभवेन सम्यक् परिचितो भवति, एवमेव पूर्वपूर्वध्वन्यनुभवजन्यसंस्कारसंस्कृतेऽन्तःकरणेऽन्त्यध्वनिसह-कारेण स्फोटः प्रत्यक्षीभवति, अत एव न कस्यचिद् ध्वने-र्वैयर्थ्यमिति ॥ ८५ ॥

ध्वनिभिरन्ते संवलितैस्तैराहितेन दृढसंस्कारेण परिपक्वबुद्धेर्भवतीति सर्वेषां ध्वनीनां सार्थक्यम् । ते ते पूर्वे ध्वनयः स्वं स्वं रूपं स्फोटे रञ्जयन्तोऽपि स्फोटं स्फुटं न प्रकाशयन्ति, केवलं स्वस्वसंस्कारबीजमादधते, चरमेण ध्वनिना सह ते संवलिता एकबुद्धिविषयाः सन्तः स्फोटं स्फुटमवद्योतयन्तीति शाब्दिकानां प्रक्रिया ॥ ८५ ॥

पुनः पुनः अभ्यास करने से उत्तरोत्तर उत्कर्ष के साथ स्वरों का विशेषज्ञ हो जाता है, ऐसे ही प्रकृत में प्रारम्भ से अन्त तक प्रत्येक ध्वनि के क्रमिक ज्ञानजन्य संस्कार से उत्तरोत्तर उत्कर्ष को प्राप्त परिपक्व बुद्धि में स्फोट के अभिव्यक्त स्वरूप का सम्यक् अवधारण होता है ॥ ८५ ॥

असतश्चान्तराले याञ्छब्दानस्तीति मन्यते ।
प्रतिपत्तुरशक्तिः सा ग्रहणोपाय एव सः ॥ ८६ ॥

प्रत्येकार्थप्रकाशिका

ननु वास्तविकस्फोटोऽखण्डश्चेत् तदा मध्ये मध्ये वर्णपदाद्यवयवावभासोऽसङ्गतः स्यादत आह - असत इति । अन्तराले = मध्ये असतः = असत्यान् यान् शब्दान् = वर्णरूपान्

आनन्दा

अवयवविभागरहितेऽखण्डे स्फोटे वर्णपदाद्यवयवविभागभानस्य स्फोटग्रहणे कल्पितोपायत्वेनासत्यत्वमाह - असतश्चेति ।

अन्वयः - अन्तराले असतः यान् शब्दान् अस्ति इति मन्यते सा प्रतिपत्तुः अशक्तिः, सः ग्रहणोपायः एव ।

व्याख्या - अन्तराले = स्फोटस्य पूर्णस्वरूपज्ञानात् प्राक् - ग्रहणकालमध्ये, असतः = वस्तुतोऽविद्यमानानपि सत्त्वेन प्रतिभासमानान् शब्दान् = वर्ण-पद-वाक्यरूपावयवविभागान् अस्ति-इति मन्यते = प्रत्येकं सत्त्वेन प्रत्येति प्रतिपत्ता, सा = अवयवविभागावभासरूपा प्रतिपत्तिः प्रतिपत्तुः = बोद्धुः अशक्तिः = व्यङ्ग्यव्यञ्जकयोः स्फोटध्वन्यो र्विवेकेन ग्रहणस्यासामर्थ्यम्,

---

सूर्यमाया

अखण्ड स्फोट में वर्ण-पद और वाक्यरूप क्रमिक विभाग की प्रतीति को कल्पित - प्रक्रिया के रूप में स्फोट के ज्ञान का उपाय बताते हैं - 'असत्' इत्यादि ।

अर्थ : - अखण्ड स्फोट में बीच में वर्ण, पद आदि जिन असत् शब्दों की कोई सत्ता मानता है, वह समझनेवाले की असमर्थता है । वस्तुतः वह स्फोट के क्रमिक ज्ञान का कल्पित उपायमात्र है ।

वर्णावयवकपदरूपान् पदावयवकवाक्यरूपान् शब्दानित्यर्थः, अस्तीति मन्यते = अस्तित्वेन बुध्यते, सा प्रतिपत्तुः = ज्ञातुः अशक्तिः = वर्णाद्यवयवावभासः व्यञ्जकध्वनिषु विद्यते -

---

वस्तुतस्तु सः = वर्णादिविभागरूपो ध्वनिः ग्रहणोपाय एव = स्फोटस्य ज्ञाने रेखागवयन्यायेन कल्पितो मार्ग एव, व्यञ्जकध्वनिव्यतिरेकेण स्फोटस्यानुपलम्भात् ।

विमर्शः - वस्तुतः स्फोटे नास्ति वर्णपदवाक्यरूपावयवविभागः - पौर्वापर्यक्रमो वा, स त्वखण्डोऽक्रमश्चेत्युक्तं प्राक् - 'पदे न वर्णाः' इत्यत्र । किन्तु स्फोटे व्यञ्जकध्वनिसंसर्गाद् ध्वनेर्धर्मा वर्णपदवाक्यरूपावयवविभागा अवभासन्ते । पूर्वपूर्वध्वनिसंस्कारसहकृतचरमध्वनिना स्फोटस्य स्फुटस्वरूपग्रहणात् प्राक् मध्ये क्रमेण प्रत्येकध्वनिग्रहणकाले 'कृ' इत्यादौ रेफसदृशावयवविभागवान् - ऋकारादिर्वर्णविभागः, घकाराकारटकारादिवर्णावयवको घटादिपदविभागः - घटादिपदावयवको 'घटमानये'त्यादिवाक्यविभागश्च ध्वनिस्फोटयोरविवेकिभि र्ज्ञायते, सोऽभेदेन स्फोटे गृह्यते । अव्युत्पन्नाः प्रतिपत्तारो हि ध्वनिना सहैव नियमेन स्फोटमुपलभन्ते, तस्माद् ध्वनिव्यतिरेकेण स्फोटस्वरूपस्यावधारणे तेषां शक्ति र्नास्ति,

---

आशय : - वस्तुतः अखण्ड स्फोट में वर्ण - पद और वाक्य रूप कोई अवयवविभाग वा पूर्वापर क्रम नहीं है, जैसा कि पूर्व में 'पदे न वर्णा विद्यन्ते' यहाँ कहा है, किन्तु जिनको ध्वनि और स्फोट का भेदज्ञान नहीं है, वे लोग ध्वनि के वर्ण-पद आदि विभाग का स्फोट में अवयव रूप में ज्ञान करते हैं, जो कि असत् है । यह उनकी स्फोट के सम्यक् स्वरूपज्ञान की अक्षमता है कि - निरवयव शब्द को सावयव समझते हैं अथवा असत् सावयव शब्द को सत् समझते हैं । शब्द के स्वरूपनिश्चय में अव्युत्पन्न जो ठहरे । वस्तुतः व्युत्पन्न भी वर्ण, पद आदि कल्पित अवयवज्ञान के द्वारा ही अखण्ड स्फोटरूप शब्द का ज्ञान करते

तद्व्यङ्ग्यस्फोटस्तु निरवयवः शुद्धोऽखण्ड इति विवेचन-शक्तेरभाव इत्यर्थः, वस्तुतस्तु सः = ध्वनिः ग्रहणोपाय एव = स्फोटप्रकाशक इति ॥ ८६ ॥

अतस्तेऽसत्यं सविभागं सक्रमं शब्दमभिमन्यन्ते, व्युत्पन्नास्तु ध्वनिव्यतिरेकेण स्फोटं निश्चिन्वन्तोऽन्तरालेऽवयवविभागेन गृह्यमाणं व्यञ्जकध्वन्युपाधि-कृतमसत्यशब्दं स्फोटस्य ग्रहणे द्वारभूतं कल्पितमुपायं वदन्ति । तदेतदुक्तं प्राक् – 'अपोद्धारपदार्था ये' इति । असत्यत्वेऽपि वर्णादिक्रमविभागस्य तत्साध्यमेव स्फोटस्य ग्रहणं, नान्येन केनाप्युपायेन व्युत्पन्नानामपि सुकरम् । निष्क्रमं निर्विभागमखण्डं स्फोटं तु योगिन आर्षेण ज्ञानेन व्यञ्जकध्वनीन् विनैव पश्यन्तीत्यन्यदेतत् ॥ ८६ ॥

हैं । क्योंकि ध्वनि ही स्फोट का व्यञ्जक है । ध्वनि के रूपज्ञान विना स्फोट के स्वरूप का ज्ञान सम्भव नहीं है । ध्वनि के रूप से प्रतिबिम्बित ही स्फोट का ग्रहण होता है । अतः स्फोट में वर्ण, पद आदि कल्पित विभाग का ज्ञान सोपानरूप में अखण्ड स्फोट के ज्ञान का द्वारभूत उपाय है । व्याकरणशास्त्र की सारी – 'प्रकृति – प्रत्यय – विभाग' प्रक्रिया साधु शब्द के ज्ञान में कल्पित उपाय है ॥ ८६ ॥

भेदानुकारो ज्ञानस्य वाचश्चोपप्लवो ध्रुवः ।
क्रमोपसृष्टरूपाया ज्ञानं ज्ञेयव्यपाश्रयम् ॥ ८७ ॥

प्रत्येकार्थप्रकाशिका

नन्वेवं वाक्यानां पदानां च परस्परं भेदो न स्यादत आह-भेदेति । ज्ञानम् = वस्तुतो निरवयवम् एकं नित्यं विषयाकारं तु नानारूपात्मकम्, व्यावहारिकमसत्यम् - विषयाणामसत्यत्वेन तदाकारताया अपि असत्यत्वात् - इत्यद्वैतवेदान्तमतेन दृष्टान्तः,

---

आनन्दा

शब्दस्य वस्तुत एकत्वेऽपि विषयौपाधिकज्ञानभेददृष्टान्तेन ध्वन्युपाधिकृतं वर्णपदवाक्यभेदव्यवहारमुपपादयति - भेदानुकार इति ।

अन्वयः - ज्ञानम् ज्ञेयव्यपाश्रयम् (अतः) ज्ञानस्य भेदानुकारः, (तथा) क्रमोपसृष्टरूपायाः वाचः उपप्लवः ध्रुवः ।

व्याख्या - ज्ञानम् = आकारभेदरहितं शुद्धमेकम्, यतोहि ज्ञेयव्यपाश्रयम्= ज्ञेयविषयसंसर्गेणैव व्यवहारयोग्यं भवति नान्यथा, अतः ज्ञानस्य = स्वत आकारभेदरहितस्यैकस्यापि व्यवहारे भेदानुकारः = विषयाकारभेदपरिग्रहेण भेदावभासो भवति, तथा प्रकृते क्रमोपसृष्टरूपायाः = व्यञ्जकध्वनेः क्रमोपसर्गेण

सूर्यमाया

ज्ञान दृष्टान्त से अखण्ड स्फोट में पद, वाक्य के भेदव्यवहार का उपपादन करते हैं - 'भेदानुकार' इत्यादि ।

अर्थ : - ज्ञेय - विषय के अधीन ही ज्ञान का व्यवहार होता है, अत एव विषय के आकारभेद से ज्ञान का आकारभेद व्यवहृत होता है, ऐसे ही ध्वनि के अधीन ही स्फोट का ज्ञान होने से ध्वनि के पूर्व-पर वर्णक्रमरूप से संसृष्ट मध्यमा वाक् रूप स्फोट का भेदव्यवहार होना अपरिहार्य है ।

'यत' इत्यध्याहार: - ज्ञेयव्यपाश्रयम् = व्यवहारे घटाद्याकारकम्, अतो ज्ञानस्य भेदानुकार: = भेदप्रतीति: घटज्ञानं पटज्ञानाद् भिन्नमिति व्यवहार:, तथा - क्रमोपसृष्टरूपाया: = क्रमेण - 'घट' इत्यादिध्वनिक्रमेण, उपसृष्टम् - संश्लिष्टं रूपं

परिगृहीतभिन्नक्रमरूपाया: वाच: = आन्तरस्य मध्यमाख्यस्य व्यङ्ग्यस्य शब्दस्य च उपप्लव: = व्यञ्जकध्वनिभेदौपाधिको भेदव्यवहार: ध्रुव: = नान्तरीयक:, व्यञ्जकध्वनिं विना स्फोटाख्यस्यान्तरस्य शब्दस्य व्यवहारा-सम्भवात् ।

विमर्श: - वस्तुतो ज्ञानं सजातीय-विजातीय-स्वगतभेदशून्यमेकमद्वितीयं सदपि नियमेन घटादिकं विषयं व्यपाश्रित्यैव लोके - 'घटज्ञानं, पटज्ञानम्' इत्यादिना विशिष्य व्यपदेश्यं भवति । स्वतो व्यवहारातीतमभिन्नमप्यान्तरं ज्ञानं ज्ञेयं विषयमुपाधाय तदीयं भिन्नरूपमनुकरोति, येन विभिन्नविषया-कारपरिग्रहेण घटज्ञानात् पटज्ञानमन्यदिति रीत्या तस्य भिन्नत्वव्यवहारो भवति, तथा प्रकृते स्वत: सर्वथा भेदरहितोऽक्रम: स्फोटाख्य आन्तर: शब्दो व्यञ्जकध्वनिं व्यपाश्रित्यैव व्यवहारयोग्यो भवति, नान्यथेति हेतो: स्वव्यञ्जकं बाह्यं ध्वनिमुपाधाय तदीयं भेदरूपमनुहरन् संसृष्टक्रमरूप: सन् नियमेन भिन्नरूप: प्रतिभासमान: पद-वाक्यभेदव्यवहारविषयो भवति ।

आशय : - अद्वैतमत में ज्ञान स्वभावत: सकलभेदों से रहित एक अद्वितीय है, किन्तु विषय के भेद से उसका भेदव्यवहार अभिमत है, क्योंकि बाह्यविषयों के विना ज्ञान का स्वरूप व्यवहारयोग्य नहीं होता है, विषय के अधीन ही व्यवहार होता है । ज्ञान के इस व्यावहारिक पक्ष की दृष्टि से ही नैयायिकों की मान्यता है कि - ज्ञान सविषयक ही होता है । ऐसे ही प्रकृत में दार्ष्टान्तिक स्फोट भी सकलभेदों से रहित-निष्क्रम एक अद्वितीय अखण्ड है, किन्तु उसकी अभिव्यक्ति

यस्यास्तस्याः वाचः = स्फोटस्य च उपप्लवः = भेदः ध्रुवः = अवश्यं व्यवहार इति शेषः । घटेतिव्यञ्जकध्वनिरूपानुषक्तः शब्दः पटेतिव्यञ्जकरूपानुषक्ताद् तद्व्यङ्ग्यात् शब्दाद् भिन्न इति व्यावहारिको भेदः, परमार्थतस्तु एक एवेति सारः ॥ ८७ ॥

ज्ञेयोपसर्गेण ज्ञानस्य भेदानुकृतिरिव ध्वनेरुपसर्गेणानुकृततत्क्रमभेदरूपाया आन्तरवाचः कल्पितभेदव्यपदेशोऽपि नियतो ध्वनिना सह नियमेनोपलम्भादिति हृदयम् ।

एवं चात्र पर्यवसितोऽनुमानप्रयोगः - "स्फोटाख्यः शब्दः कल्पित-भेदव्यवहारविषयः, उपाधिसंसर्गेणैव विभाव्यमानभेदत्वाद् ज्ञानवत्" इति ।

यद्वा - "स्फोटाख्यः शब्दः स्वाभाविकभेदशून्यः उपाधिसंसर्गं विनाऽविभाव्यमानभेदत्वाद् ज्ञानवत्" इति ॥ ८७ ॥

जब ध्वनि से होती है, तभी वह प्रत्यक्षव्यवहार के योग्य होता है, अन्यथा नहीं । अतः ध्वनि के साहचर्य से उसके स्वरूपभेद तथा क्रमभेद को ग्रहण कर स्फोट भी सक्रम तथा वर्ण-पद-वाक्य-भेदवाला प्रत्यक्ष गृहीत होता है, जो कि वस्तुतः ध्वनि का स्वभाव है, स्फोट का नहीं ॥ ८७ ॥

यथाऽऽद्यसंख्याग्रहणमुपायः प्रतिपत्तये ।
संख्यान्तराणां भेदेऽपि तथा शब्दान्तरश्रुतिः ॥ ८८ ॥

प्रत्येकार्थप्रकाशिका

'ग्रहणोपाय एव स' इत्युक्तेऽर्थे दृष्टान्तमुपन्यस्यति - यथेति । संख्यान्तराणाम् = अवान्तरैकत्वादिसंख्यानां परस्परं

आनन्दा

प्राक् वर्णपदाद्यवयवविभागग्रहणस्य स्फोटग्रहणोपायत्वं यदुक्तं तदेव संख्यादृष्टान्तेनोपपादयति - 'यथाऽऽद्यसंख्या' इति ।

अन्वयः - संख्यान्तराणाम् भेदे अपि संख्यान्तराणां प्रतिपत्तये आद्यसंख्याग्रहणम् यथा उपायः तथा शब्दान्तरश्रुतिः उपायः । 'संख्यान्तराणाम्' 'उपायः' इत्यस्य च आवृत्त्याऽन्वयः ।

व्याख्या - संख्यान्तराणाम् = अवान्तराणां पूर्वसंख्यानामेकत्वद्वित्वादीनाम् भेदेऽपि = परस्परमत्यन्तवैलक्षण्येऽपि संख्यान्तराणाम् = पूर्वसंख्यातो भिन्नानामुत्तरसंख्यानां शतसहस्रादीनाम् प्रतिपत्तये = बुद्ध्ये आद्यसंख्याग्रहणम् = आदौ भवानां पूर्वासामेकत्वादीनां संख्यानां ज्ञानम् यथा उपायः = साधनम्, ता अपेक्ष्यैवोत्तरसंख्याबुद्धेर्जननात्, तथा वाक्यस्फोटस्य प्रतिपत्तये शब्दान्तरश्रुतिः = अवयवकल्पानां घटादिपदान्तराणां पदावयवघादिवर्णान्तराणां

सूर्यमाया

वाक्य में अवयवरूप में भासमान पद-वर्ण को निरवयव - अखण्डस्फोट के ज्ञान का उपाय जो कहा गया है, उसका उत्तरसंख्या के ज्ञानोपाय पूर्वसंख्या के दृष्टान्त से उपपादन करते हैं - 'यथाऽऽद्यसंख्या' इत्यादि ।

अर्थ : - जैसे संख्याओं का परस्पर अत्यन्त भेद रहने पर भी उत्तरवर्ती संख्या के ज्ञान के लिए पूर्ववर्ती संख्याओं का ज्ञान अनिवार्य साधन है, पूर्व संख्याओं के ज्ञान विना उत्तर संख्या का ज्ञान नहीं होता, ऐसे ही अखण्ड वाक्य के ज्ञान

भेदेऽपि, शतत्वसंख्यायाः प्रतिपत्तये = ज्ञानाय आद्यसंख्या = एकत्वादिः, तस्याः, ग्रहणम् = ज्ञानं यथोपायः, तथा

च ग्रहणमुपायः= नान्तरीयकं साधनम्, पूर्वपूर्वध्वनिभिः संकलय्य वाक्यस्फोटस्याभिव्यञ्जनात् ।

विमर्शः - एकत्वादिकाः परार्धपर्यन्ताः सर्वाः संख्याः परस्परं विलक्षणाः स्वाश्रयस्य भेदिकाः । सत्यपि तासां परस्परभेदे उत्तराः संख्याः पूर्वाः संख्या अपेक्षन्ते, द्वित्वादिकाः परार्धपर्यन्ताः संख्या अपेक्षाबुद्धिजन्या इति समयः । एवं च शतसहस्राद्युत्तरसंख्याज्ञाने पूर्वासामवान्तरसंख्यानां ज्ञानं नान्तरीयक उपायः, नैकस्यापि न्यूनत्वे शतादिव्यवहारः, तासां परस्परं व्यावृत्तानां संख्यानां तन्तुपटयोरिव परस्परं नास्त्यवयवावयविभावः, शतसहस्रादिसंख्याया एकत्वद्वित्वादिकाः संख्या न सन्त्यवयवाः । नापि तासां वनवृक्षयोरिव परस्परं समुदायसमुदायिभावः, नहि शतादिसंख्या एकत्वद्वित्वादीनां समुदायः, तथापि शतसहस्रादिसंख्याघटकतया ताः पूर्वा

के लिए उसमें अवयवरूप में प्रतीयमान वर्ण-पदरूप विलक्षण शब्द का ज्ञान अपरिहार्य साधन है । क्रमशः वर्णों और पदों के ज्ञान विना अखण्ड वाक्य का सम्यक् ज्ञान सम्भव नहीं है ।

आशय : - वैशेषिक मतानुसार - एक से परार्ध (महाशङ्ख) तक सभी संख्याएँ परस्पर भिन्न हैं । न कोई किसी का अवयव है, न कोई किसी का समुदाय है । सब परस्पर विरुद्ध हैं, परिच्छेदक हैं, अपने आश्रय का भेदक हैं । ऐसा होने पर भी एक दूसरे के सापेक्ष हैं, निरपेक्ष नहीं । उत्तरसंख्या को पूर्वसंख्या की अपेक्षा रहती है, पूर्वसंख्या के ज्ञान विना उत्तरसंख्या का ज्ञान नहीं होता है, क्योंकि पूर्वसंख्या की संकलनात्मक अपेक्षाबुद्धि से उत्तरसंख्या का जन्म होता है । उत्तरसंख्या - शत, सहस्र आदि के ज्ञान में पूर्वसंख्या का ज्ञान नान्तरीयक उपाय है । इसके फलस्वरूप ही लोग पूर्वसंख्याओं को उत्तरसंख्या का भाग समझते हैं, तथा उत्तरसंख्या को पूर्वसंख्याओं का संकलितरूप समुदाय समझते हैं । ऐसे ही स्फोट

शब्दान्तरश्रुतिः = वाक्यस्फोटज्ञानाय तदवान्तरपदादिश्रुतिः उपाय इति ॥ ८८ ॥

एकत्वादिकाः संख्याः शतादिज्ञाने नूनमपेक्ष्यन्ते, अत एकत्वादिसकल-संख्यासमूहरूपं शतं, शतसमूहरूपं च सहस्रं मन्यन्ते जनाः, तथा प्रकृते निरवयवस्यापि वाक्यस्फोटस्य ग्रहणे घटकतया वर्णपदग्रहणं नान्तरीयक उपायः । नहि वर्णश्रुतिं विना भवति पदावधारणम्, नापि पदश्रुतिं विना जातु भवति वाक्यावधारणम् । तस्मात् पदग्रहणे कल्पित उपायो वर्णग्रहणम्, वाक्यग्रहणे च कल्पित उपायोऽवान्तरपदग्रहणम् । सर्वा हि शास्त्रीयप्रक्रिया कल्पितेति न काचिदनुपपत्तिः ॥ ८८ ॥

के विषय में भी अवधारणा है । वस्तुतः वाक्यरूप स्फोट अखण्ड - निरवयव है, उसका न पद अवयव है, न वर्ण अवयव है । यद्यपि वर्ण-पद-वाक्य परस्पर विलक्षण हैं, कोई न किसी का अवयव है न कोई किसी का समुदाय है, तथापि वाक्य के अवयव रूप में वर्ण और पद प्रतीत होते हैं, क्योंकि वर्णो और पदों के ज्ञानमाध्यम से ही वाक्यस्फोट का ज्ञान होता है अन्यथा नहीं । अत एव वाक्य में अवयवरूप में भासमान जो भिन्न वर्णपदों की श्रुति है, वह वाक्यज्ञान का उपायमात्र है वास्तविक नहीं । जैसा कि व्याकरणशास्त्र की समस्त - 'प्रकृति-प्रत्यय-विभाग' प्रक्रिया साधुशब्द के ज्ञान का कल्पित उपायमात्र है ॥ ८८ ॥

प्रत्येकं व्यञ्जका भिन्ना वर्णा वाक्यपदेषु ये ।
तेषामत्यन्तभेदेऽपि सङ्कीर्णा इव शक्तयः ॥ ८९ ॥

प्रत्येकार्थप्रकाशिका

इदानीं वाक्यपदादिविषयक-'देवदत्तादि' श्रुतीनां ध्वनीनां भेदेऽपि तदभिव्यङ्ग्यस्यैक्यमुपपादयति - प्रत्येकमिति । वाक्यपदेषु = वाक्येषु पदेषु च प्रत्येकं भिन्नाः = नानारूपाः व्यञ्जकाः = स्फोटद्योतकाः ये वर्णाः = वर्णरूपा ध्वनयः,

---

आनन्दा

नन्वस्तु वाक्ये वर्णपदादिश्रुति र्वाक्यप्रतिपत्तेरुपायः, किन्तु वर्ण-पदवाक्यव्यञ्जका ध्वनयः प्रत्येकं यदि भिन्नाः परस्परव्यावृत्तस्वरूपाः स्वतन्त्राः, वाक्यव्यञ्जको ध्वनिरन्यः, पदव्यञ्जकोऽन्यः, वर्णव्यञ्जकश्च कश्चिदन्य एव, तर्हि परस्परं विलक्षणानां तेषां लेशतोऽपि रूपसादृश्याभावात् वाक्ये तुल्यरूपपदविभागश्रुतिः, पदे वर्णविभागश्रुतिः, वर्णे च मात्राविभाग-श्रुतिर्नोपपद्यते, वाक्ये व्यज्यमाने पदव्यञ्जकः - पदे व्यज्यमाने च वर्णव्यञ्जको ध्वनि र्नास्ति, इति कथं तेषां मध्ये प्रत्ययः स्यादिति शङ्कां परिहरन् निरवयवेष्वपि व्यङ्ग्येषु वर्णपदवाक्येषु तुल्यरूपभागभेदश्रुतौ बीजं व्यञ्जकध्वनिशक्तेः साङ्कर्यमाह - प्रत्येकमिति ।

अन्वयः - वाक्यपदेषु प्रत्येकम् भिन्नाः व्यञ्जकाः ये वर्णाः तेषाम् अत्यन्तभेदे अपि शक्तयः सङ्कीर्णाः इव ।

सूर्यमाया

वाक्य, पद और वर्ण के व्यञ्जक ध्वनि को परस्पर अत्यन्त भिन्न मानने पर वाक्य में पद की, पद में वर्ण की तथा वर्ण में मात्रा की विभागसम्भावना कथमपि न होने से उनको वाक्यज्ञान का उपाय कहना सङ्गत नहीं, इस आक्षेप के समाधान के साथ एक अखण्ड निरवयव वाक्य में पद-वर्ण आदि विभाग का उपपादन करते हैं - 'प्रत्येकम्' इत्यादि ।

तेषामत्यन्तभेदेऽपि = नानात्वेऽपि शक्तयः = मात्रारूपाः संकीर्णा इव = अभिन्ना इव ।

अयं सारः - तत्तत्प्रयत्नप्रेरिता वायवः तत्तत्स्थानाभिघातेन ध्वनीनुत्पादयन्ति, इति तेषां परस्परभेदेऽपि अत्वादिरूपेण

व्याख्या - वाक्यपदेषु = वाक्यम् - 'देवदत्त ! गामानय' इत्यादि, पदं च - 'देवदत्त' इत्यादि, तेषु, प्रत्येकम् = प्रतिस्वम् भिन्ना व्यञ्जकाः = वाक्यस्य व्यञ्जका अन्ये, पदस्य व्यञ्जका अन्ये - परस्परं व्यावृत्ताः, ये वर्णाः = भिन्नस्थानप्रयत्नजन्या ध्वनयः, तेषाम् = वाक्यव्यञ्जकानां पदव्यञ्जकानां च अत्यन्तभेदेऽपि = सर्वथा पार्थक्येऽपि शक्तयः = भेदज्ञानजननसामर्थ्यरूपा मात्राविशेषाः संकीर्णाः = मिश्रिताः सामान्यरूपानुगताः सूक्ष्मभेदस्य दुर्ज्ञेयत्वादभिन्ना इव प्रतिभासन्ते । एवं च वाक्ये पदश्रुतिः, पदे वर्णश्रुतिः, वर्णे च ह्रस्वादिमात्राश्रुतिरुपपद्यते ।

विमर्श: - यथा हि गोत्वजात्यभिव्यञ्जकोऽवयवसंस्थानविशेषः सास्नादिमत्त्वरूपोऽन्यः, गवयत्वजातिव्यञ्जकोऽवयवसंस्थानविशेषस्तस्मादन्यः परस्परव्यावृत्तरूपस्तथापि कतिपयसमानाकृत्या तयो र्भेदमनाकलय्या - भेदाध्यवसायेन गवये भवति गोसदृशप्रत्ययः । यथा वा भ्रमणत्व-रेचनत्व-स्यन्दनत्वादिव्यञ्जकाः परस्परव्यावृत्तस्वरूपा विलक्षणाः कर्मविशेषास्तथापि तेषां सूक्ष्मभेदस्य दुर्ज्ञेयत्वेन कर्मसामान्यमाश्रित्य भवति भ्रमणादिव्यपदेशः । तथा प्रकृते वर्णविषयाः पदविषया वाक्यविषयाश्च भिन्नप्रयत्नजनितभिन्न-

---

अर्थ : - वाक्यों और पदों में प्रत्येक का व्यञ्जक जो भिन्नरूप वर्णात्मक ध्वनि हैं, उनका परस्पर अत्यन्त भेद रहने पर भी सूक्ष्म विशेषरूप अज्ञेय होने से सामान्यरूप में उनकी अभिव्यञ्जनशक्ति परस्परमिश्रित एकरूप जैसी होती हैं, जिसके परिणामस्वरूप समानश्रुति होने से निरवयव वर्ण, पद, वाक्य में क्रमशः अवयवरूप - मात्रा, वर्ण और पद का भान होता है ।

आशय : - वस्तुतः निरवयव - वर्ण, पद, वाक्य रूप स्फोट का व्यञ्जक ध्वनि भिन्न भिन्न प्रयत्नों से साध्य होने से प्रत्येक एक दूसरे से विलक्षण होते हैं, जो वर्णस्फोट का व्यञ्जक होता है, वह पद - वाक्य का नहीं, जो पदस्फोट का

सर्वत्राकारादिमात्राणां साम्यात् - एकैवाकारश्रुतिः सर्वत्र, यथा-गोत्वादिजात्यभिव्यञ्जकानाम् भ्रमणत्वादिजात्यभिव्यञ्जकानामिव च भेदो दुर्ज्ञान इति ।

एवं च निरवयवेष्वपि वर्णपदवाक्येषु मात्राविभागः, वर्णविभागः, पदविभागश्च तत्कृत एव काल्पनिको मिथ्या, इत्यग्रे दृष्टान्तद्वारा स्पष्टो भविष्यति ॥ ८९ ॥

स्थानाभिघातेन विलक्षणवायुजन्या ध्वनयः परस्परव्यावृत्तस्वरूपा अत्यन्तविलक्षणास्तथापि समनुगतैकाकारश्रुतिबलात्तेषां भेदज्ञानजनकत्वशक्तेः सांकर्येण भेदाग्रहादेकरूपत्वाध्यवसायेन निरवयवेष्वपि वर्णेषु ह्रस्वदीर्घादिमात्राध्यवसायः, पदेषु वर्णाध्यवसायः, वाक्येषु च पदाध्यवसायोऽसत्य इत्यत्र न काचिदनुपपत्तिः ॥ ८९ ॥

व्यञ्जक होता है, वह वर्ण और वाक्य का नहीं, जो वाक्यस्फोट का व्यञ्जक होता है, वह वर्ण और पद का नहीं । प्रत्येक ध्वनि परस्पर अत्यन्त भिन्न होते हैं । परन्तु उनका जो भेदक सूक्ष्म स्वरूपविशेष है वह दुर्ज्ञेय है, अतः उनकी जो मात्रारूप भेदकशक्ति है, उसका साङ्कर्य व संमिश्रण हो जाने से सामान्यरूप में ध्वनि तुल्यरूप पाये जाते हैं, जिससे उनकी आंशिक समानश्रुति के कारण अविवेकवश निरवयव वाक्य में पदविभाग की, पद में वर्णविभाग की, वर्ण में ह्रस्व, दीर्घ आदि मात्राविभाग की प्रतीति होती है, जो कि लोकविदित है, असत्य है ॥ ८९ ॥

यथैव दर्शनैः पूर्वैर्दूरात् सन्तमसेऽपि वा ।
अन्यथाकृत्य विषयमन्यथैवाध्यवस्यति ॥ ९० ॥

प्रत्येकार्थप्रकाशिका

उक्तार्थे एव दृष्टान्तं प्रदर्शयति - यथेति । यथा दूराद वा सन्तमसे = अन्धकारे अपि वा पूर्वैर्दर्शनैः =

आनन्दा

पूर्वं संख्यादृष्टान्तेन निर्विभागस्य वाक्यस्य विरुद्धभागभेदेन ग्रहणमुपपादितमपि भ्रमज्ञानदृष्टान्तेनापि तदुपपादयति - यथैवेति ।

अन्वयः - यथा एव दूरात् सन्तमसे अपि वा पूर्वैः दर्शनैः विषयम् अन्यथाकृत्य अन्यथा एव अध्यवस्यति, तथा वाक्ये - इति वक्ष्यमाणेनान्वयः ।

व्याख्या - यथैव दूरात् = विप्रकृष्टदेशात् सन्तमसे = सन्ततान्धकारे अपि वा पूर्वैः = प्राक्तनैः दर्शनैः = अवलोकनैः विषयम् = वृक्षादिकं दूरात्, रज्ज्वादिकं चान्धकारे, सामान्यमात्रज्ञाने अन्यथाकृत्य = हस्त्यादिना सर्पादिना चान्यरूपेण ज्ञानं कृत्वा अन्यथैव = पूर्वविपर्य्ययेणैव यथार्थं वृक्षादिकं समीपे, रज्ज्वादिकं च प्रकाशे स्थित्वा अध्यवस्यति = सामान्यतो विशेषतश्च निश्चिनोति, तथा निर्विभागे वाक्ये पूर्वं भागावग्रह इति दार्ष्टान्तिकेनान्वयो वक्ष्यते ।

सूर्यमाया

यहाँ भ्रमज्ञान दृष्टान्त से अत्यन्तभिन्न रज्जु में सर्पज्ञान की तरह अवयवविभागरहित वाक्य में वर्ण-पद-विभाग ग्रहण का उपपादन करते हैं - 'यथैव' इत्यादि ।

अर्थ : - जैसे पहले - दूर से वृक्ष आदि वस्तु को अथवा समीप से भी अन्धकार में रज्जु आदि को देखने से हाथी वा सर्प आदि भिन्न वस्तु के रूप में ज्ञान कर बाद में समीप पहुँचकर अथवा प्रकाश होने पर पूर्व ज्ञान के विपरीत - यथार्थ वृक्ष वा रज्जु का निश्चय कोई करता है, वैसे ही वाक्य में पहले वर्ण-पद-विभाग का ज्ञान कर बाद में यथार्थ - 'विभागरहित' वाक्य का ज्ञान करता है ।

प्राथमिकविलोकनैः विषयमन्यथाकृत्य = विपरीतं बुद्ध्वा पुनः समीपे – आलोके वा, इति शेषः अन्यथैव = पूर्वदृष्टविपरीततया अध्यवस्यति = निर्णीयते ।

विमर्शः – यथा दूरत्वदोषाद् वृक्षादौ शाखापल्लवादिविशेषादर्शने श्यामलारोह-परिणाहादिसामान्याकारमात्रदर्शने सति हस्तिभिन्ने तस्मिन् हस्तिप्रत्ययं कुर्वन्ति प्राकृता अनवहितेन्द्रिया जनाः । यथा वा मन्दान्धकारे समीपे स्थिता अपि जना अन्धकारावरणदोषात् रज्जुत्वविशेषादर्शने कौटिल्यादिसामान्या – कृतिमात्रदर्शने सति असर्पभूतायां रज्जौ सर्पबुद्धिं कुर्वन्ति, तथा प्रकृते निर्विभागे वाक्ये प्राकृताः स्थूलदर्शिनो जना व्यङ्ग्यव्यञ्जकयोः स्फोटध्वन्योः सहोपलम्भेन विवेकाग्रहात् ध्वनिधर्मवर्णपदविभागग्रहम् – अतस्मिंस्तत्प्रत्ययरूपं मिथ्याप्रत्ययं कुर्वन्ति । समीपगमने आलोके वा सति सन्निकृष्टेन्द्रियास्तु अशेषविशेषदर्शने सति पूर्वविपरीतं यथार्थं वृक्षादिकं रज्ज्वादिकं वा

आशय : – जैसे दूर से देखने पर शाखा, पल्लव आदि विशेषरूप का ज्ञान न होने से कोई वृक्ष को हाथी समझ लेता है, जब उसके पास जाता है तो उसके विशेष स्वरूप को देखकर उससे अत्यन्त भिंन्न यथार्थरूप में वृक्ष का ज्ञान होता है, अथवा अन्धेरे में कोई समीप की रस्सी को सर्प समझ लेता है, तथा प्रकाश होने पर उसको अत्यन्त विपरीत – यथार्थरूप में रस्सी का सम्यक् ज्ञान होता है । ऐसे ही भले ही वाक्यस्फोट ध्वनि से अत्यन्त भिन्न है, तथापि व्यञ्जक होने के कारण ध्वनि के साथ ही नियमतः वाक्यस्फोट की उपलब्धि होने से अवयवविभागरहित वाक्य में ध्वनि के वर्ण-पद-विभागों का मिथ्याज्ञान होता है, यह ज्ञान ध्वनि और स्फोट का भेदज्ञान न होने से होता है । जब ध्वनि और स्फोट का विवेकज्ञान हो जाता है, तब ध्वनि से भिन्न अवयवविभागरहित यथार्थ वाक्यस्फोट का सम्यक् ज्ञान होता है ।

अयं भावः - दूरतोऽन्धकारे वा जनस्य प्रथमं वृक्षादौ रज्ज्वादौ च हस्त्यादेः सर्पादेश्च भ्रमात्मकबोधः, ततः समीपगमने आलोकानयने च - 'वृक्षोऽयम्, रज्जुरियम्' इति च निश्चिनोति, इति ॥ ९० ॥

विषयमवधारयन्ति यथा, तथैव ध्वनिस्फोटयो र्विवेकिनो निर्विभागं ध्वनिविलक्षणं स्फोटमवधारयन्तीति सर्वं समञ्जसम् । इदं तु ध्येयम् - वृक्षरज्ज्वादौ हस्तिसर्पादिप्रत्ययः प्रातिभासिकः, दार्ष्टान्तिके वाक्येऽवयव-विभागग्रहस्तु व्यावहारिक इति विवेकः ॥ ९० ॥

यह अन्तर अवश्य है कि दृष्टान्तभूत-वृक्ष में हस्ती का अथवा रज्जु में सर्प का ज्ञान प्रातिभासिक है, भ्रम है, परंच दार्ष्टान्तिक - वाक्यस्फोट में वर्ण-पद-अवयवविभाग का ज्ञान शास्त्रकल्पित व्यावहारिक है । वर्णपदविभाग के ज्ञान द्वारा ही वाक्य का ज्ञान होता है, सर्वथा यह अज्ञानमूलक नहीं है । योगबल से प्रातिभ - 'आर्ष' ज्ञान होने पर ही विभागरहित वाक्यस्फोट का वास्तविक ज्ञान होता है ॥ ९० ॥

व्यज्यमाने तथा वाक्ये वाक्याभिव्यक्तिहेतुभिः ।
भागावग्रहरूपेण पूर्वं बुद्धिः प्रवर्तते ॥ ९१ ॥

प्रत्येकार्थप्रकाशिका

दृष्टान्तं व्युत्पाद्य दार्ष्टान्तिके योजयति - व्यज्यमान इति । वाक्यानामभिव्यक्तयः = प्रकाशाः तासां हेतवः = कारणानि तैः = ध्वनिभिः व्यज्यमाने = प्रकाश्यमाने वाक्ये पूर्वम् = प्रथमं भागानाम् = वर्णपदाद्यात्मकावयवानाम् अवग्रहः =

आनन्दा

पूर्वोक्तदृष्टान्ते रज्जुसर्पादिभ्रमज्ञाने दृष्टम् - अतस्मिन् तत्प्रत्ययं दार्ष्टान्तिकेऽखण्डवाक्ये संगमयति - व्यज्यमाने इति ।

अन्वयः - तथा वाक्याभिव्यक्तिहेतुभिः व्यज्यमाने वाक्ये पूर्वम् भागावग्रहरूपेण बुद्धिः प्रवर्तते ।

व्याख्या - तथा = रज्जुसर्पादिभ्रमज्ञानमिव वाक्याभिव्यक्तिहेतुभिः = वाक्याभिव्यञ्जकै र्भिन्नध्वनिभिः व्यज्यमाने = स्वकीयरूपोपरागेण प्रकाश्यमाने वाक्ये = अखण्डनिर्विभागवाक्ये पूर्वम् = अखण्डवाक्याभिव्यक्तेः प्रथमम् भागावग्रहरूपेण = ध्वनिधर्म-वर्णपदावयवविभागप्रतिभासरूपा बुद्धिः = मिथ्याप्रतीतिः प्रवर्तते = जायते । तत्पश्चात् यथार्थनिर्विभागवाक्यस्य निश्चयो भवतीति फलितार्थः ।

सूर्यमाया

पूर्वश्लोक में भ्रमज्ञान दृष्टान्त से अन्य में अन्य का ज्ञान होना बताकर यहाँ दार्ष्टान्तिक निर्विभागवाक्य में ध्वनि के भागभेद का ज्ञान होना सिद्ध करते हैं- 'व्यज्यमाने' इत्यादि ।

अर्थ : - दूर से अथवा अन्धकार में किसी वस्तु का अन्यरूप में ज्ञान होने के समान वाक्य की अभिव्यक्ति का साधन-ध्वनियों से व्यक्त किये जाने वाले अखण्डवाक्य में पहले वर्ण-पदरूप भागभेदविषयक बुद्धि होती है, अर्थात् उसके पश्चात् भागभेदरहित अखण्डवाक्य की बुद्धि होती है ।

आभासस्तस्य रूपेण = स्वरूपेण, 'प्रकृत्यादिभ्य' इति तृतीया, तस्या अभेदोऽर्थः, अतो वर्णपदावयवकाभासरूपेति फलितम्, बुद्धिः = ज्ञानं प्रवर्तते = भवतीत्यर्थः । निरवयवेषु वाक्येषु विवेकाभावप्रयुक्तसावयवत्वभ्रम इति भावः ॥ ९१ ॥

विमर्शः - यथाऽन्धकारे रज्जुसर्पादे र्विवेकाग्रहेण तयोरभेदग्रहे सर्पभिन्नरज्ज्वादौ सर्पावग्रहः, प्रकाशे तयो र्विवेकेऽभेदबुद्धिबाधेन यथार्थरज्जुनिश्चयो जायते, तथा प्रकृते भिन्नै र्ध्वनिभि र्व्यज्यमाने निर्विभागे वाक्ये ध्वनिस्फोटयोः सहोपलम्भेन विवेकाग्रहेऽभेदप्रत्यये वाक्ये प्रथमं ध्वनिधर्म-वर्णपदावयवविभागस्य ग्रहस्तदनन्तरं व्यक्ते स्फोटे सत्यस्य निर्विभागवाक्यस्य निश्चयो जायते ।

यथा अत्यन्तभिन्नरज्जौ तमसि भेदाग्रहे सर्पभ्रमः, प्रकाशे तु तस्य बाधेन सत्यरज्जुनिश्चयस्तथाऽत्यन्तभिन्ने निरवयवे आन्तरे वाक्यस्फोटे ध्वनिसंसर्गेण वर्णपदावयवविभागग्रहः, व्यक्ते तु निर्विभागे स्फोटेऽवयवविभागोपसंहारेण वास्तविकाखण्डवाक्यनिश्चय इति निष्कर्षः ॥ ९१ ॥

आशय : - अवयवविभाग से रहित अखण्डवाक्य से वर्ण-पद-रूप अवयवविभागवाला ध्वनि अत्यन्त भिन्न है, अतः वाक्य में ध्वनि के वर्ण-पद-विभाग का ज्ञान असम्भव है, यह कहना युक्तिसंगत नहीं है, जैसे अन्धकार में अत्यन्त भिन्न रज्जु में सर्प का भान होना देखा गया है, वृक्ष में दूर से हाथी का भान होना सम्भव है, ऐसे ही अत्यन्त भिन्न निरवयव वाक्य में ध्वनि के अविवेक के कारण ध्वनिधर्म-वर्ण-पद-विभाग का ज्ञान वाक्य के यथार्थज्ञान से पहले होता है । क्योंकि ध्वनि ही वाक्य का व्यञ्जक है, वह वाक्य के अभिव्यञ्जनकाल में नियमतः अपने रूप का ग्रहण कराता है, तत्पश्चात् ही उससे अखण्ड वाक्य की अभिव्यक्ति होती है ॥ ९१ ॥

यथानुपूर्वीनियमो विकारे क्षीरबीजयोः ।
तथैव प्रतिपत्तॄणां नियतो बुद्धिषु क्रमः ॥ ९२ ॥

प्रत्येकार्थप्रकाशिका

पूर्वम् आभासरूपा ततो निश्चयरूपा बुद्धिरित्यत्र दृष्टान्तमाह - यथेति । क्षीरं च बीजं च तयोः = दुग्धस्य

आनन्दा

वर्णपदादेरवभासक्रमेण वाक्यस्फोटनिश्चये क्षीर-बीजादेर्दधिवृक्षादि-विकारेऽवान्तरक्रमनियमं दृष्टान्तमाह - यथानुपूर्वीनियम इति ।

अन्वयः - यथा क्षीरबीजयोः विकारे आनुपूर्वीनियमः तथा एव प्रतिपत्तॄणाम् बुद्धिषु क्रमः नियतः ।

व्याख्या - यथा क्षीरबीजयोः = दुग्धस्य वृक्षादिबीजस्य च विकारे = दधिपरिणामे वृक्षादिजन्मनि च आनुपूर्वीनियमः = अवान्तरावस्थाविशेष-परम्पराक्रमनियम उपलभ्यते तथैव प्रतिपत्तॄणाम् = अखण्डवाक्यस्फोटस्य वाक्यार्थस्य च बोद्धॄणाम् बुद्धिषु = वाक्यतदर्थविषयकज्ञानेषु क्रमः = वर्णपदग्रहणपूर्वकं वाक्यग्रहणम्, वाक्यग्रहणपूर्वकं च वाक्यार्थग्रहणमिति पौर्वापर्यरूपः, नियतः = नान्तरीयको भवति ।

सूर्यमाया

वर्ण-पद के ज्ञानक्रम से अखण्डवाक्य के ज्ञान में - दूध का दधिरूप तथा बीज का वृक्षरूप विकार होने में मध्य के परिवर्तमान विभिन्न अवस्थाक्रम को दृष्टान्त प्रस्तुत करते हैं - 'यथा' इत्यादि ।

अर्थ : - जैसे दूध और किसी बीज का विकार - दही तथा पेड़-पौधा होने में उसके पूर्वरूप अवस्थाओं का पूर्वापरक्रम नियम है, वैसे ही शब्द और अर्थ के बोद्धाओं की बुद्धि में वर्ण और पद के ज्ञानक्रम से अखण्ड-वाक्य और वाक्यार्थ के ज्ञान का क्रम नियत है । अर्थात् वर्णों के ज्ञान के अनन्तर पद का ज्ञान तथा पदों के ज्ञान के अनन्तर वाक्य का ज्ञान एवं वाक्य के ज्ञानानन्तर वाक्यार्थ का ज्ञान होता है ।

आम्रादिबीजस्य चेत्यर्थः, विकारे = दधिरूपे वृक्षरूपे च यथानुपूर्वीनियमः = अयं हि क्रमः क्षीरदध्नोः - प्रथमं क्षीरं द्रवद्द्रव्यं, ततः किंचित्काठिन्यविशिष्टद्रवद्रव्यं, ततश्चाधिक-काठिन्यविशिष्टं भवति, तदा दृढं सत् 'दधि' इति परिणतं

'घकारोत्तराकारोत्तरटकारोत्तराकारे' ति वर्णानुपूर्वीग्रहणे सति - 'घट' इति पदग्रहणम्, 'घटः-अस्ति' इत्यादिपदानुपूर्वीग्रहणे सति 'घटोऽस्ती'-त्यादिवाक्यस्वरूपस्य ग्रहणम्, वाक्यस्वरूपग्रहणे च सति 'घटाभिन्नैका-श्रया सत्ता' इत्यखण्डवाक्यार्थस्य ग्रहणं भवति मादृशां स्थूलदृशां नान्यथेति भावः ।

विमर्शः - यद्यपि निद्रादोषजन्ये स्वप्नभ्रमे, काचकामलादिदोषजन्ये शुक्तिरजत-शङ्खपीतत्वादिभ्रमे, तमोदोषजन्ये च रज्जुसर्पादिभ्रमे नास्ति कश्चन क्रमनियम-स्तथापि स्फटिकादौ जपाकुसुमाद्युपाधिकल्पिते प्रतिबिम्बविभ्रमे रक्तपीत-नीलादिकुसुमोपधानजन्ये वर्तते कश्चन क्रमनियमः । स्फोटेऽपि स्फटिके इव ध्वन्युपाधिकः प्रतिबिम्बभ्रमो विवक्षितः, स च व्यञ्जकध्वनिक्रमेण सक्रमः । तत्र सक्रमस्फोटग्रहे जपाकुसुमाद्युपाधिकः स्फटिके लौहित्यग्रहो भवति दृष्टान्तः । उपसंहृतक्रमस्याखण्डवाक्यस्फोटस्य ग्रहणे वर्णपदभागक्र-मावभासस्यावान्तरोपायत्ववर्णने त्वयमस्त्यपरो दृष्टान्तः - क्षीरबीजयो र्विलक्षणे

आशय : - दूध अकस्मात् दही नहीं जम जाता है, तथा आम - धान आदि का बीज अकस्मात् पेड़ पौधा नहीं बन जाता है, अपितु उससे पहले उसकी अनेक परिवर्तनरूप अवान्तर अवस्थाएँ होती हैं, जो एक के पश्चात् एक क्रम से होती हैं । दूध जामन देने के पश्चात् कुछ काल में माँड़ जैसा गाढ़ा बन जाता है, क्रमशः तरल से घन, घन से दृढ, दृढ से कठोर अवस्था को पाकर दही रूप में परिणत हो जाता है । आम - धान आदि का बीज भी नोंक - अङ्कुर-नाल-पत्ता-दो पत्ते- शाखा - प्रशाखा - अवस्थाक्रम से विकसित होकर

भवति, एवं बीजमपि द्वैधीभावाङ्कुरादिक्रमेण वृक्षरूपेण परिणमति, तथैव प्रतिपत्तृणाम् = बोद्धृणां बुद्धिषु = ज्ञानेषु क्रमः = परिपाटी नियतः = जायते इति फलितम् । स्फोट-बुद्धिरपि पूर्वं वर्णाद्याभासादिक्रमेण पश्चात् निरवयवस्फोट-विषयकनिश्चयात्मिका भवतीति भावः ॥ ९२ ॥

दधिवृक्षादिरूपे विकारे मध्ये जायमानोऽवस्थान्तरक्रमविशेषः । तथाहि-क्षीरस्य विलक्षणे दध्यादिपरिणामे तरलावस्थातः कठिनीभावपर्यन्तं मध्ये परिवर्तमानानां प्रकृतिधर्मं शुक्लत्वस्निग्धत्वादिमजहतां दशाविशेषाणां संयमनत्व-मण्डकत्व-दृढत्व-कठिनीभावादिरूपः कश्चन क्रमः । एवमेवाम्रामलक-शाल्यादि-बीजस्यापि विलक्षणे पादपादिभावे मध्येऽवान्तरावस्थाविशेषः - शिथिलत्व-शूकत्व-नालाङ्कुरत्व-द्विपत्रत्वादिरूपः कुर्वद्रूपत्वाख्यः कश्चन व्यापारक्रमः । तथा ध्वनिभिर्व्यज्यमानेऽखण्डे वाक्यस्फोटेऽपि समुपलभ्यते तस्याभिव्यञ्जनोपायरूपो व्यञ्जकध्वन्यविवेकनिबन्धनो वर्णपदादिविभागाव-भासक्रमोऽर्वाग्दृशां बुद्धिविषयः ।

सोऽयं ज्ञानक्रमः - प्रथमं वर्णावभासः, ततश्च वर्णानुपूर्वीकः पदावभासः, ततश्च पदानुपूर्वीकः सक्रमवाक्यावभासः, ततश्चोपसंहृतक्रमाखण्डवाक्य-स्फोटाध्यवसायः, ततश्चाखण्डवाक्यार्थबोध-इत्युपायोपेयभावेन व्यवस्थितः कश्चन क्रमः प्रतिपत्तृणां बुद्धिषु ॥ ९२ ॥

पेड़ पौधा के रूप में परिणत होता है । इसी प्रकार बोद्धा को वर्ण, पद और सक्रम वाक्य के ज्ञानक्रम से - क्रमविभागरहित अखण्ड वाक्य और वाक्यार्थ का बोध होता है ॥ ९२ ॥

भागवत्स्वपि तेष्वेवं रूपभेदो ध्वनेः क्रमात् ।
निर्भागेष्वप्युपायो वा भागभेदप्रकल्पनम् ॥ १३ ॥

प्रत्येकार्थप्रकाशिका

अयमेव पन्थाः स्फोटानङ्गीकृतां वर्णनित्यतावादिनां वेदान्तिनामवश्यमाश्रयणीय इत्युपपादयति - भागवदिति । भागवत्सु = 'न्-अ-द्-ई' इति वर्णचतुष्टयावयवकसमुदाय-रूपादि-पदेषु अपि तेषु = वेदान्तिमतेषु रूपभेदः = दीनेति-समुदायरूपात् नदीतिसमुदायस्य स्वरूपभेदः ध्वनेः क्रमात् = ध्वनिक्रमप्रयुक्त एवेत्यर्थः ।

आनन्दा

स्फोटमनङ्गीकुर्वतां नित्यवर्णवादिनां मतेऽपि ध्वनिक्रमेण वर्णपदादिभाग-भेदग्रहणस्य वाक्यविशेषग्रहणोपायत्वं समानमाह - भागवत्सु इति ।

अन्वयः - भागवत्सु अपि तेषु ध्वनेः क्रमात् रूपभेदः, एवम् निर्भागेषु अपि भागभेदकल्पनम् उपायः वा ।

व्याख्या - भागवत्सु = मीमांसकनये वर्णावयवकेषु पदेषु पदावयवकेषु च वाक्येषु मतेष्वपि नित्यविभूनां वर्णानां स्वतः पौर्वापर्यरूपक्रमासम्भवेन रूपभेदः = वर्णादिक्रमभेदकृतो 'नदी-दीनादि' शब्दस्वरूपभेदः ध्वनेः क्रमात् = पूर्वापरक्रमभेदादेव मन्तव्यः । तथा च तन्मते व्यञ्जकध्वनेः

सूर्यमाया

नित्यवर्णरूप अवयवविभाग माननेवाले मीमांसक व वेदान्तियों के मत में अथवा निरवयव स्फोटरूप शब्द माननेवाले वैयाकरणों के मत में अर्थविशेष का वाचक शब्दविशेष की व्यवस्था के लिए शब्द में ध्वनि के क्रमभेद ग्रहण को शब्दविशेषज्ञान का समान रूप में स्वीकार्य उपाय बताते हैं - 'भागवत्सु' इत्यादि ।

अयमाशयः - नदीत्यत्र भवद्भिः तद्वर्णाभिव्यङ्ग्यः तदतिरिक्तः स्फोटोऽर्थवाचक इति नाङ्गीक्रियते, अपितु तावद्वर्णसमुदाय एव वाचकः - वर्णश्च नित्य इति स्वीक्रियते, तदा प्रत्येकवर्णाभिव्यक्त्यनन्तरं समुदायप्रतीतिश्चेत् द्वितीयादि-वर्णानां वैयर्थ्यम्, तावद्वर्णाभिव्यक्त्यनन्तरं समुदायबोधश्चेत्-नदी-दीनेत्युभयत्र तावतां वर्णानां साम्यादर्थसंकरः। अत इत्थमेव उत्तरणीयं स्यात् - यादृशक्रमेण ध्वनिः तत्तादृशक्रमेणैव तत्तद्वर्णाभिव्यक्तिः, तावद्वर्णाभिव्यक्त्यनन्तरं - क्रमिक-समुदायबोधः, अतो न नदीदीनयोरर्थसंकरः, इति तत्तद्ध्व-निक्रमेण पूर्वपूर्ववर्णाभिव्यक्तिस्तूपायः अन्त्यवर्णप्रत्यक्षकाले

क्रमभेद: शब्दस्वरूपभेदग्रहणोपाय इति फलितम्, एवं शाब्दिकनये निर्भागेषु= वस्तुतोऽवयवविभागरहितेष्वखण्डेषु शब्देषु अपि ध्वने: = स्फोटव्यञ्जकस्य क्रमात् = पौर्वापर्यभेदात् भागभेदप्रकल्पनम् = वर्णपदाद्यवयवविभागेन स्वरूपभेदग्रहणम् उपाय: = अखण्डपदवाक्यरूपस्फोटस्य ग्रहणोपाय: । 'वा' इति पादपूर्त्यर्थ: । एवं च नित्यवर्णवादिनामिवाखण्डस्फोटवादिनां भागभेदग्रहणस्य शब्दस्वरूपग्रहणोपायत्वं समानम् ।

अर्थ : - मीमांसकमतानुसार - अवयवविभागवान् शब्दों में भी ध्वनि के क्रमभेद से ही स्वरूपभेद गृहीत होता है, वैसे ही वैयाकरण मतानुसार - अवयवविभाग-रहित अखण्ड शब्द में भी ध्वनि के क्रमभेद से ही अवयवविभाग की कल्पना शब्द के स्वरूपभेद के ज्ञान का उपाय है ।

आशय : - मीमांसक और वेदान्ती के मत में वर्णों का समुदाय पद तथा पदों का समुदाय वाक्य है, वर्ण नित्य तथा व्यापक हैं । वर्ण से भिन्न स्फोटनामक

समुदायग्रहस्येति अभिव्यञ्जकध्वनिकृतैव नदी-दीनेत्यादौ भेदबुद्धिः, यथा-मण्डूकवसासम्बद्धप्रदीपेनाभिव्यक्तरज्ज्वां सर्पज्ञानभेद इति समायातम् । एतत् स्वमते साम्यं निगमयति- निर्भाग इति । एवं निर्भागेषु = निरवयवपदादिस्फोटेषु अपि भागभेदकल्पनम् = वर्णाद्यवयवकल्पनम् उपायः = बोधद्वार- मित्यर्थः । तव मते सावयवपदादिसमुदायबोधे पूर्वपूर्ववर्णा- नामुपायता, अस्मन्मते निरवयवस्फोटबोधे - इति भावः ।

एतेनोपायस्यावयोस्तुल्यत्वेऽपि तव मतेऽनन्तानन्तपदानां वाचकत्वम्, अनन्तानन्तध्वनीनां व्यञ्जकत्वमिति द्विविधानन्त- गौरवकल्पनाऽपेक्षयाऽनन्तपदानामवाचकत्वकल्पनालाघवाद एकः अखण्डस्फोटो वाचक इति वैयाकरणसरणिरेव

विमर्श : नदी-दीनादितत्तदर्थविशेषबोधाय सत्यपि वर्णसाम्ये तत्तदर्थवाचकस्य स्फोटाख्यशब्दस्य स्वरूपभेदोऽवश्यमभ्युपेयः, अन्यथाऽर्थसाङ्कर्यं स्यात् । स हि स्वरूपभेदोऽखण्डस्यैकस्य स्फोटस्य न स्वतः सम्भवति, किन्तु व्यञ्जकध्वनिभेदकृतो भेदावभासरूपः । एवं च व्यञ्जकध्वनिक्रमरूपरूषिते भिन्नत्वेन गृह्यमाणे स्फोटे तत्तदर्थनिरूपितशक्तिग्रहेण तत्तदर्थविशेषविषयकः

शब्द नहीं हैं । नित्यवर्ण की अभिव्यक्ति ध्वनि से होती है । यद्यपि नित्य व्यापक वस्तु का पूर्व-पर-कालभेद तथा देशभेद एवं तत्प्रयुक्त क्रमभेद भी नहीं होता, तथापि व्यञ्जक ध्वनि के क्रमभेद से वर्णों का क्रमभेद माना जाता है, जिससे समान वर्णों के रहने पर भी नदी दीन, सर रस, जरा राज इत्यादि शब्दों का परस्पर स्वरूपभेद तथा शक्तिभेद से अर्थभेद व्यवस्थित है । परिणामतः ध्वनि के क्रमभेद का ज्ञान ही पद-वाक्य-रूप वाचक शब्द के ज्ञान का एकमात्र उपाय है ।

ज्यायसीति विभाव्यतां सुधीभिरधिकं तु विस्तरभयान्न वितन्यते, इति ॥ १३ ॥

शाब्दबोध उपपद्यते । एवं च तत्तदर्थवाचकशब्दविशेषग्रहे ध्वने र्भागभेदग्रहणं नान्तरीयकं साधनम् । एवं स्फोटममन्वानानां मीमांसकानां विभु-नित्यवर्णाभ्युपगमेऽप्येषैव गतिः, तेषामपि तत्तदर्थविशेषबोधाय तत्तदर्थवाचकशब्दस्वरूपभेदस्योपेयतया तद्भेदग्रहणे ध्वनेः क्रमभेदग्रहण-स्योपायत्वमविशेषेणाभ्युपेतव्यम् । विस्तरस्तु प्रत्येकार्थप्रकाशिकातोऽ-वसेयः ॥ १३ ॥

वर्ण से भिन्न-स्फोटरूप निरवयव शब्दवादी वैयाकरण भी समानरूप में यह मानते हैं कि ध्वनि का क्रमविभागज्ञान पदवाक्यरूप स्फोट के ज्ञान का उपाय है । किन्तु यह अन्तर है कि मीमांसकमत में वर्णावयववाले अनन्त पदों को वाचक मानना तथा अनन्त ध्वनि को व्यञ्जक मानना यह द्विगुण गौरव है, तदपेक्षया एक अखण्ड स्फोट को वाचक मानने में लाघव है ॥ १३ ॥

अनेकव्यक्त्यभिव्यङ्ग्या जातिः स्फोट इति स्मृता ।
कैश्चिद् व्यक्तय एवास्या ध्वनित्वेन प्रकल्पिताः ॥ ९४ ॥

प्रत्येकार्थप्रकाशिका

मतान्तरमाह - अनेकेति । कैश्चिद् = आचार्यैः - अनेकाश्च ता व्यक्तयः क्रमोत्पन्ना वर्णास्तैरनेकवर्णैः अन्त्यवर्णप्रत्यक्षकाले पूर्वपूर्ववर्णानुभवसंस्कारसहकारेणाभिव्यज्यत इति अभिव्यङ्ग्या

आनन्दा

शक्यत्वमिव शक्तत्वमपि जातेरेवेति दिशा जातेर्वाचकत्वं वदतां जातिं स्फोटं मन्वानानां मतमाह - अनेकेति ।

अन्वयः - कैश्चित् अनेकव्यक्त्यभिव्यङ्ग्या जातिः स्फोटः इति स्मृता, अस्याः ध्वनित्वेन व्यक्तयः एव कल्पिताः ।

व्याख्या - कैश्चित् = जातेर्वाचकत्वं वदद्भिः परैः अनेकव्यक्त्यभिव्यङ्ग्या= अनेकाभिर्वर्णव्यक्तिभिः क्रमजन्मभिः पूर्वपूर्वसंस्कारसहकृतचरमवर्णपर्यन्ताभिः प्रकाश्या, जातिः = शब्दत्वसामान्यादन्या तत्तदनुगता शब्दाकृतिरूपा स्फोट इति = 'स्फोट' इत्याख्या स्मृता = मता । अस्याः = अनुगताकृतिविशेषरूपाया जातेः ध्वनित्वेन = ध्वनयति -व्यञ्जयतीति व्युत्पत्त्या ध्वनिः - व्यञ्जकः, तत्त्वेन व्यक्तयः = क्रमेणोत्पद्यमानाः ककार-खकारादिवर्णव्यक्तयः एव

सूर्यमाया

अन्य किसी के मतानुसार जातिस्फोट का निरूपण करते हैं - 'अनेक' इत्यादि ।

अर्थ : - नाना वर्णव्यक्तियों से अभिव्यङ्ग्य जाति ही अर्थवाचक स्फोट है, ऐसा कुछ आचार्यों ने कहा है । इस जातिस्फोट का व्यञ्जक नाना वर्णव्यक्ति ही माने गये हैं । यहाँ 'ध्वनि' तथा 'व्यक्ति' शब्द व्यञ्जकपरक हैं ।

आशय : - तत्तत् - वर्ण-पद-वाक्य-रूप शब्दव्यक्ति यद्यपि अनित्य हैं, तथापि शब्दनिष्ठ जाति नित्य होने से शब्दव्यक्ति भी प्रवाहनित्य माना जाता है, ऐसा माननेवाले आचार्य नाना वर्णों, पदों और वाक्यों में जो अनुगत ज्ञान का निमित्त

जातिः स्फोट इति स्मृता = कथितेत्यर्थः । एतेन शब्दव्यक्तीना-मनित्यत्वेऽपि तद्गताकृतिनित्यत्वात् 'शब्दो नित्य' इति व्यवहार इति सूचितम् । ''स्फोटमात्रं निर्दिश्यते रश्रुतेर्लश्रुति'' रिति,

---

प्रकल्पिताः = ध्वनिनाम्ना व्यवहृताः । जातिस्फोटस्य व्यञ्जिकाः क्रमेणोत्पत्तिमत्योऽनित्या वर्णरूपशब्दव्यक्तय एव ध्वनिनाम्ना व्यवह्रियन्ते, इत्यर्थः ।

विमर्श : - ''सिद्धे शब्दार्थसम्बन्धे'' इति भाष्यवार्तिके सिद्धे शब्दे-अर्थे-सम्बन्धे चेति विगृह्य नित्यपर्यायसिद्धशब्दस्य प्रत्येकमन्वयात् अर्थस्य जातिरूपस्य नित्यत्वोक्त्या शक्यत्वमिव शक्तत्वमपि शब्दगतजातेरेवाभिप्रेत्य शब्दस्य नित्यत्वमुक्तम्, न तु शब्दव्यक्तेरिति मन्वानै र्नित्या शब्दवृत्तिजातिः स्फोट इति मन्यते । शब्दवृत्तिजातेर्वाचकत्वं न तु शब्दव्यक्तेरित्यर्थः । सा च जातिः क्रमजन्मभिर्नानावर्णव्यक्तिभिरभिव्यज्यते । वर्णाश्च ध्वनिरूपाः । तैरभिव्यक्ता सती जातिरर्थबोधिका । तेन नित्यत्वेन जातेः सर्वदा विद्यमानत्वेऽपि व्यञ्जकवर्णरूपध्वनीनामसमवधाने एकैकसमवधाने वा नार्थबोधप्रसङ्गः, जातेरनेकव्यक्तिपर्याप्तत्वेन कतिपयवर्णव्यक्तिमात्रेणाभिव्यक्तेरसत्त्वात् । व्यज्यतेऽनया सा व्यक्तिः, ध्वन्यते = व्यज्यतेऽनेन स ध्वनिरिति करणसाधने व्यक्तिध्वनिशब्दयोः पर्यायत्वमिह बोध्यम् ।

जाति है, वह अर्थ का वाचक स्फोट है - यह मानते हैं । शब्दवृत्ति जाति को एकाकार - अनुवृत्त और व्यावृत्त बोध का जनक होने से स्फोट कहा जाता है ।

''ए ओङ्'' सूत्र के भाष्य में ''स्फोटमात्रं निर्दिश्यते - रश्रुतेर्लश्रुतिर्भवति'' इस कथन से शब्दवृत्ति जाति का 'स्फोट'शब्द से निर्देश किया है । यह शब्दजाति शब्दत्वसामान्यरूप नहीं है, किन्तु उससे भिन्न अनुगत तत्तद् आकृतिरूप है, नाना ककार, खकार वर्णों में कत्व, खत्व आदि रूप है, नाना घटपद - गोपद आदि में घटपदत्व, गोपदत्व आदि रूप है तथा नाना व्यक्तियों से उच्चारित नाना 'गामानय' आदि वाक्यों में - वाक्यत्वरूप है । इस जातिस्फोट की अभिव्यक्ति यथाक्रम उत्पन्न नाना वर्णव्यक्ति - पदव्यक्ति तथा वाक्यव्यक्ति से होती है । अत एव नित्य होने से जाति सर्वदा वर्तमान रहने पर भी अनभिव्यक्त दशा में अर्थ

"एओङ्" इत्यादिसूत्रभाष्ये स्फोटशब्देन शब्दगतजातिः बोध्यते । एतन्मतमनुसृत्य भूषणकारेण स्वग्रन्थे प्रतिपादितम्, इति तत एव विस्तरेण द्रष्टव्यम् । अस्याः = जातेः ध्वनित्वेन= व्यञ्जकत्वेन व्यक्तय एव = उत्पत्तिमत्योऽनित्याः शब्दव्यक्तयः प्रकल्पिताः= कथिताः, इति ॥ ९४ ॥

इदं तु ध्येयम् - यथा घटत्वादिजातिं विना लोकेऽव्यपदेश्या घट-गवादिव्यक्तिर्जात्या व्यावृत्तानुवृत्तप्रत्ययविषया सती 'घट-गवादि' - व्यपदेशं लभते, तथोत्पत्तिमत्योऽनित्याः वर्णव्यक्तयो घट-गोपदत्वादिजातिं विनाऽव्यपदेश्या जात्यैव व्यावृत्तानुवृत्त 'घट-गवादिपद'व्यपदेशं भजन्ते । इत्थं च घटादिशब्दव्यक्तीनां व्यपदेशे हेतुभूता घटपदत्वादिजातिः स्फोट इति कथ्यते, वर्णध्वनयस्तस्या व्यञ्जिकाः ॥ ९४ ॥

का बोधक नहीं होती है । पूर्व-पूर्ववर्णों के अनुभवजन्य संस्कारों के सहयोग से अन्तिम वर्ण के ज्ञानकाल में जातिस्फोट की अभिव्यक्ति होती है । जाति के विना अनन्त व्यक्तियों का अनुगत और इतर से व्यावृत्त व्यवहार संभव नहीं है, अतः जाति को अर्थ का बोधक 'स्फोट' माना गया है ।

यहाँ यह ध्यान रहे कि - 'व्यज्यते-अनया' इस करणसाधन में व्यक्तिशब्द व्यञ्जकपरक है, तथा 'ध्वन्यते-अनेन' इस करणसाधन में ध्वनिशब्द भी व्यञ्जकपरक है । अतः जातिस्फोट का व्यञ्जक शब्दव्यक्ति ध्वनि है, वह ध्वनि वर्णरूप तथा वर्णों की आनुपूर्वी-पदादिरूप है ॥ ९४ ॥

अविकारस्य शब्दस्य निमित्तै र्विकृतो ध्वनिः ।
उपलब्धौ निमित्तत्वमुपयाति प्रकाशवत् ॥ ९५ ॥

प्रत्येकार्थप्रकाशिका

पूर्वमतस्यैव सिद्धान्तसम्मतत्वं मुख्यत्वं च दर्शयितुं पुनस्तदेवाह - अविकारस्येति । परे तु जातिमसहमाना एकमेव

आनन्दा

शब्दानित्यत्वाभिमानि-जातिवादिमतमुपन्यस्य "पदे न वर्णा"- इत्यादिना सिद्धान्तितं मुख्यं शब्दनित्यत्वं निगमयति - अविकारस्येति ।

अन्वयः - निमित्तैः विकृतः ध्वनिः अविकारस्य शब्दस्य उपलब्धौ प्रकाशवत् निमित्तत्वम् उपयाति ।

व्याख्या - निमित्तैः = स्पृष्टतादिप्रयत्नैः कण्ठादिस्थानेषु वायोरभिघातरूपै-र्विलक्षणैः कारणैः विकृतः = विभिन्नवर्णाकारेण बहिः परिणतः ध्वनिः = श्रोत्रगोचरः शब्दः अविकारस्य = उत्पत्त्यादि-षड्विधविकाररहितस्य नित्यस्य शब्दस्य = एकस्यान्तरनादरूपशब्दतत्त्वस्य उपलब्धौ = ज्ञाने प्रकाशवत् = आदित्यादेरालोक इव निमित्तत्वम् = अभिव्यक्तिकारणत्वम् उपयाति = भजते । आलोको यथा विकारमनुत्पाद्यैव सन्निकृष्टवस्तुस्वरूपं प्रकाशयति,

---

सूर्यमाया

पराभिमत जाति स्फोट पक्ष में उपर्युक्त अरुचि के कारण पूर्वोक्त अपना सिद्धान्त - नित्य एक शब्दतत्त्व का समन्वय करते हैं - 'अविकारस्य' इत्यादि ।

अर्थ : - स्थान, प्रयत्न आदि नाना कारणों से उत्पन्न नाना ध्वनि - विकारों से रहित नित्य शब्दतत्त्व के स्वरूपज्ञान में प्रकाश के समान निमित्त होते हैं । जैसे प्रदीप आदि का प्रकाश अपने सन्निकृष्ट-घट आदि वस्तु का कोई विकार या

शब्दतत्त्वं नित्यमिति मन्यन्ते, अतोऽविकारस्य = विकाररहितस्य नित्यस्येति यावत्, शब्दस्य - एकवचनेनैकशब्दतत्त्वमिति सूचितम्, उपलब्धौ = ज्ञाने निमित्तैः = तत्तत्प्रयत्नप्रेरित-

---

तथा ध्वनिरपि कमपि विकारमनुत्पाद्यैव स्वरूपोपरञ्जितमिव स्फोटं प्रकाशयतीत्यर्थः ।

विमर्शः - जातिस्फोटो नहि विचारसहः । सति शब्दव्यक्तिभेदे तत्र जातिः सिध्येत्, सति चाश्रयाश्रयिभावे ध्वनिस्फोटयोर्जातिव्यक्तिव्यवहारः प्रवर्तेत, तदिदं द्वयमपि ध्वनिस्फोटयोर्नोपलभ्यते । नहि स्वभावतो नित्यं शब्दतत्त्वं भिद्यते, येन कापि जातिः स्वीक्रियेत । वायोः स्थानकरणाभिघातो हि ध्वनेरेव भेदे निमित्तं न तु शब्दतत्त्वभेदे । नापि ध्वनिस्फोटयोराश्रयाश्रयिभावः, नहि ध्वनेराश्रयः स्फोटः । मुखस्य मुकुर इव स्फोटस्य ध्वनिरुपधायकः, अतो व्यङ्ग्यव्यञ्जकभाव एव तयोः । तदिह ध्वनिस्फोटयोर्व्यक्तिजातिभ्यां वैलक्षण्यदर्शनाद् जातिस्फोटवादो न विचारपेशलः, किन्तु प्रकाशप्रकाश्ययो-

---

भेद किये विना केवल उसके स्वरूप को प्रकाशित करता है, ऐसे ही ध्वनि अपने सन्निकृष्ट स्फोटरूप शब्दतत्त्व का विकार या भेद किये विना अपने रूप से अनुषक्त कर उसके स्वरूप को अभिव्यक्त व प्रकाशित करता है ।

आशय : - स्थान और प्रयत्न आदि विभिन्न कारणों से उत्पन्न ध्वनिरूप अनित्य शब्द का व्यक्तिभेद तथा उसमें एक जाति की कल्पना की जा सकती है, किन्तु अनित्य शब्द का जातिमूलक नित्यव्यवहार आरोपित - गौण होगा, वस्तुतः नहीं । अतः उसको शक्ति का आश्रय स्फोट कहना अनुचित है, नित्य-अखण्ड-एक शब्दतत्त्व को ही स्फोट कहा गया है । उसका कोई स्वाभाविक भेद नहीं है, तो उसमें जाति की कल्पना भी निराधार है । स्थान-प्रयत्न कारणों के भेद से ध्वनि का भेद होता है, आन्तर शब्द-स्फोट का नहीं । ध्वनि तो केवल स्फोट के

वाय्वभिघातरूपकारणैः विकृतः = उत्पन्नो ध्वनिः प्रकाशवत्= आलोकस्थानाश्रितस्य पटादेरुपलब्धौ यथा, तथा निमित्तत्वम्= कारणत्वम् उपयाति = प्राप्नोतीत्यर्थः । ध्वनिना तद्रूपानुषक्त-तदनाश्रितस्फोटस्य बोध इति भावः ॥ ९५ ॥

दीपघटयोरिव शब्दस्वरूपग्रहे निमित्तनिमित्तिभाव एव । यथा प्रदीपादेः प्रकाशः स्वानुषक्तान् घटादीनर्थान् प्रकाशयति, न तु विकुरुते, न वा भेदं जनयते, तथा करणभेदैर्भिन्ना ध्वनयः परिणामिनोऽपरिणामि नित्यमेकं शब्दतत्त्वं स्वानुषक्तरूपं प्रकाशयन्ति, न तु विकुर्वते - न वा स्वरूपभेदं प्रकुर्वते । स्फोटस्य नित्यत्वे नहि तस्य सर्वदोपलम्भप्रसङ्गः, व्यञ्जकध्वनेः समवधाने तद्रूपरूषितस्यैव तस्य भानात् ॥ ९५ ॥

स्वरूप का व्यञ्जक होता है - भेदजनक नहीं, जैसे कि सूर्य, चन्द्र आदि का प्रकाश अपने सन्निकृष्ट घट आदि वस्तु के यथावत् स्वरूप का प्रकाशक होता है, विकार अथवा भेदजनक नहीं । व्यञ्जक के भेद से व्यङ्ग्य वस्तु में भेद भले ही भासित होवे, वस्तुतः भेद नहीं होता है । अतः नित्य व एक शब्दतत्त्व में जाति की कल्पना न होने से उसको स्फोट मानना युक्तिसंगत नहीं है ॥ ९५ ॥

न चानित्येष्वभिव्यक्ति र्नियमेन व्यवस्थिता ।
आश्रयैरपि नित्यानां जातीनां व्यक्तिरिष्यते ॥ ९६ ॥

प्रत्येकार्थप्रकाशिका

ननु शब्दस्याभिव्यक्तिपक्षेऽपि - अनित्यस्यापि घटादेः प्रदीपादिभिर्लोकेऽभिव्यक्तिदर्शनात् 'शब्दोऽनित्यः - अभिव्यङ्ग्यत्वाद् घटादिवत्' इत्यनुमित्या अनित्यत्वं सेत्स्यति, उत्पत्तिपक्षे तु सुतरामनित्यत्वमित्याशङ्क्याह - न चेति ।

आनन्दा

शब्दस्य नित्यत्वं परिरक्षितुं ध्वनेः कारकत्वं विहाय प्रकाशवद् व्यञ्जकत्वे स्वीकृतेऽपि प्रदीपादिप्रकाशाभिव्यङ्ग्य' घटादि 'दृष्टान्तेन शब्दस्याभिव्यङ्ग्यत्वेन हेतुना नित्यत्वविपरीतमनित्यत्वसाधनं व्यभिचारेण परिहरति-न चेति ।

अन्वयः - अभिव्यक्तिः अनित्येषु नियमेन न च व्यवस्थिता, नित्यानाम् जातीनाम् अपि आश्रयैः व्यक्तिः इष्यते ।

व्याख्या - अभिव्यक्तिः = अभिव्यङ्ग्यत्वम् अनित्येषु = घटादिषु नियमेन = अव्यभिचारेण न च = न तु व्यवस्थिता = प्रतिबद्धा, अभिव्यङ्ग्यत्वम् अनित्यत्वेन नहि व्याप्तमित्यर्थः । नित्यानां जातीनाम् = घटत्वादीनाम् अपि आश्रयैः = घटादिभिः व्यक्तिः = अभिव्यक्तिः इष्यते =

सूर्यमाया

अभिव्यङ्ग्यत्व हेतु से शब्द में अनित्यत्व के अनुमान के प्रतिकूल - नित्यजाति में अभिव्यङ्ग्यत्व को अनित्यत्व का व्यभिचारी प्रकट करते हैं - 'न चानित्येषु' इत्यादि ।

अर्थ : - घट आदि अनित्य वस्तुओं में ही प्रदीप आदि से अभिव्यक्ति नियमपूर्वक पाई जाती है, नित्य में नहीं, यह निश्चित नहीं है, क्योंकि नित्य जाति की भी अपने आश्रय - अवयवसंस्थान-विशेषों से अभिव्यक्ति मानी जाती है ।

अनित्येषु = वस्तुषु अभिव्यक्तिः = अभिव्यङ्ग्यत्वम् नियमेन= नियततया - 'यत्राभिव्यङ्ग्यत्वं तत्र तत्रानित्यत्वमिति' व्याप्तिरूपेणेति यावत्, न च व्यवस्थिता = नहि निश्चिता । अनित्यत्वसाध्यव्यभिचारी अभिव्यङ्ग्यत्वहेतुरिति भावः ।

मन्यते जातिवादिभिः, इत्यनित्यत्वव्यभिचारि अभिव्यङ्ग्यत्वम् । तथा च - 'शब्दोऽनित्योऽभिव्यङ्ग्यत्वाद् घटवत्' इति नानुमातुं शक्यते ।

विमर्शः - अनित्यस्यैव वस्तुनः प्रदीपादिभिरभिव्यक्तिर्भवतीति नास्ति नियमो व्यवस्थितः, नित्यानामपि घटत्वादिजातीनां जातिवादिभिस्तदाश्रयैरवयवसंस्थानविशेषैः कम्बुग्रीवादिभिरभिव्यक्तेः स्वीकारेण व्यभिचारात् । द्विविधं हि वस्तु - कार्यं ज्ञाप्यं च । तत्र कार्यमस्तु व्यापकेनानित्यत्वेन सर्वत्र प्रतिबद्धम्, ज्ञाप्यं तु नित्यमनित्यमुभयं भवतीति नास्ति तन्नियमेनानित्यत्वेन व्याप्तम् ।

तस्मादभिव्यङ्ग्यत्वेन शब्देऽनित्यत्वं साधयितुं न शक्यम्, विपक्षवृत्तित्वात् ।

यद्यपि सर्वक्षणिकत्ववादिनां सुगतानां नये नास्ति किमपि नित्यं वस्तु, यत्र हेतोर्विपक्षवृत्तित्वेनानैकान्तिकत्वमुद्भाव्येत, तथापि तन्मते नित्यानां

आशय : - ध्वनि से शब्द की अभिव्यक्ति मानने पर भी जैसे दीपक आदि प्रकाश से अभिव्यङ्ग्य घट आदि वस्तु अनित्य होते हैं, ऐसे ही अनुमान द्वारा शब्द भी अनित्य सिद्ध हो जायगा, यह शङ्का नहीं करनी चाहिए, क्योंकि नित्य तथा अनित्य दोनों वस्तु अभिव्यङ्ग्य होते हैं, जैसे अनित्य घट आदि वस्तु की दीपक के प्रकाश से अभिव्यक्ति होती है, ऐसे ही नित्य गोत्व-घटत्व आदि जाति की उसके आश्रय - गो-घट आदि व्यक्ति से अभिव्यक्ति होती है । अतः व्यभिचारी होने से अभिव्यङ्ग्यत्व हेतु से शब्द के अनित्यत्व का अनुमान नहीं हो सकता है । अभिव्यङ्ग्यत्व अनित्य के विपक्ष नित्य में भी रहने से स्पष्ट ही अनित्यत्व का व्यभिचारी है ।

व्यभिचारं प्रदर्शयति - नित्यानां जातीनाम् = घटत्व-गोत्वादीनाम् आश्रयैः = कम्बुग्रीवावयवैर्व्यक्तिः = अभिव्यक्ति-रिष्यते - उभयमते सिद्धमित्यर्थः । जातौ अभिव्यङ्ग्यत्वहेतोः सत्त्वेऽपि अनित्यत्वरूपसाध्याभावाद् व्यभिचारोऽतः पूर्वोक्तहेत्वा-भासेन नानित्यत्वं साधयितुमलमिति भावः ॥ ९६ ॥

जातीनामसिद्धतामात्रेणानैकान्तिकत्वं नापाकर्तुं शक्यम्, वैशेषिकादिनये नित्यजातिस्वीकारेण विपक्षवृत्तित्वसंभावनया, सौगतनयेऽपि - 'यत्रानित्यत्वं नास्ति तत्राभिव्यङ्ग्यत्वं नास्ति' इति व्यतिरेकव्याप्तेरसिद्ध्या च हेतोः सन्दिग्धानैकान्तिकत्वस्य जागरूकत्वात् । घटदृष्टान्तेन शब्दस्यानित्यत्वसाधन-वत्तस्य चाक्षुषत्वादिसाधनस्यापि प्रसङ्गः स्यात् । किंच - 'शब्दोऽनित्योऽ-भिव्यङ्ग्यत्वाद् घटवत्' इत्यनुमानम् 'शब्दो नित्योऽभिव्यङ्ग्यत्वाद् जातिवत्' इति प्रत्यनुमानसमानयोगक्षेमम्, इत्यलम् ॥ ९६ ॥

सब को क्षणविनश्वर माननेवाले - 'अनित्य' वादी बौद्धों के मत में यद्यपि कोई नित्यवस्तु नहीं है, जहाँ कि अभिव्यङ्ग्यत्व की सत्ता मानकर अनित्यत्व का व्यभिचार दिखाया जाय, तथापि नित्यजातिवादी के मत में व्यभिचार स्पष्ट है ही, बौद्धमत में भी 'जहाँ अनित्यत्व नहीं, वहाँ अभिव्यङ्ग्यत्व नहीं' ऐसी कोई व्यतिरेकव्याप्ति न होने से हेतु में सन्दिग्धत्व रूप असिद्धि दोष है ही । अन्वय-व्यतिरेकी हेतु के लिए अन्वयव्याप्ति के साथ व्यतिरेकव्याप्ति भी आवश्यक है, इसके अभाव में हेतु सन्दिग्ध होने से अनित्यत्व साध्य का साधन नहीं हो सकता ॥ ९६ ॥

देशादिभिश्च सम्बन्धो दृष्टः कायवतामिह ।
देशभेदविकल्पेऽपि न भेदो ध्वनिशब्दयोः ॥ ९७ ॥

प्रत्येकार्थप्रकाशिका

ननु गेहान्तरस्थितेन प्रदीपेन गेहान्तरस्थितस्य घटस्याभिव्यक्तेरदर्शनं यथा, तथा ताल्वोष्ठपुटव्यापारप्रकाश्यमानैः श्रोत्रदेशस्थितैः ध्वनिभिः हृद्देशस्थितस्य शब्दस्य वैयधिकरण्यात् कथमभिव्यक्तिरित्यत आह - देशेति । इह= लोके कायवताम्=

आनन्दा

समानाधिकरणयोरेव घटप्रदीपयोर्व्यङ्ग्यव्यञ्जकभावदर्शनाद् व्यधिकरणयोर्बाह्यान्तरयो र्ध्वनिशब्दयो र्व्यङ्ग्यव्यञ्जकभावासम्भव इत्याशङ्कां प्रतिविधत्ते- देशेति ।

अन्वयः - इह कायवताम् देशादिभिः च सम्बन्धः दृष्टः, देशभेदविकल्पे अपि ध्वनिशब्दयोः न भेदः ।

व्याख्या - इह = अस्मिन् संसारे कायवताम् = मूर्तविग्रहवताम् देशादिभिः= एकदेशभिन्नदेशादिभिः सह सम्बन्धः = आधाराधेयभावप्रयुक्तसामानाधिकरण्यादिरूपः सम्बन्धः दृष्टो, न तु परिच्छिन्नविग्रहरहितानाममूर्तानाम् । अतो देशसम्बन्धरहितयोस्तयोर्नास्ति वैयधिकरण्यम् ।

सूर्यमाया

समानदेश में स्थित घट और दीप का व्यङ्ग्यव्यञ्जकभाव देखे जाने से हृदयदेश में स्थित शब्द का भिन्न श्रोत्रदेश में स्थित ध्वनि से व्यङ्ग्यव्यञ्जकभाव कैसे संभव है? इस शङ्का का समाधान करते हैं - 'देशादिभिश्च' इत्यादि ।

अर्थ : - विग्रहधारी मूर्तिमान् वस्तुओं का देशविशेष से सम्बन्ध देखा गया है, विग्रहरहित अमूर्त वस्तु का नहीं । शब्द और ध्वनि अमूर्त हैं, इनका देशभेद से

मूर्तानामेव देशादिभिः सम्बन्धः = 'अस्य पूर्वदेशेन - तस्य च परदेशेन - अनयोस्तु एकदेशेनैव सम्बन्धः' इति व्यवहारादेव नानादेशत्वादिव्यवहारः दृष्टः = प्रत्यक्षीकृतः, ध्वनिशब्दौ त्वमूर्तौ तयोर्नानादेशत्वव्यवहाराभावान्न वैयधिकरण्यमिति भावः ।

देशभेदविकल्पे अपि = उपाधिकल्पितदेशभेदाभेदवृत्तित्वसम्बन्धस्य स्वीकारेऽपि ध्वनि-शब्दयोः = अमूर्तयोः न भेदः = नास्ति देशभेदः, कदम्बमुकुलन्यायेन ध्वनेरपि हृदयदेशव्यापित्वाद् नास्ति वैयधिकरण्यमिति तयोर्व्यङ्ग्यव्यञ्जकभाव उपपद्यते ।

विमर्शः - परिच्छिन्नानां मूर्तिमतामेकदेशमात्रवृत्तीनां प्रदीपघटादीनामेकतरस्य पूर्वदेशवृत्तित्वे देशान्तरासम्बन्धे सति परदेशवर्तिनाऽन्यतरेण सह भवतु तयोर्वैयधिकरण्यम्, सति तु वैयधिकरण्ये न भवति तयोर्व्यङ्ग्यव्यञ्जकभाव इति सत्यम्, किन्तु प्रदेशविशेषसम्बन्धरहितयोरपरिच्छिन्नयोरमूर्तयो-र्ध्वनिशब्दयोस्तु देशविशेषवृत्तित्वावृत्तित्वयोर्वक्तुमशक्यतया नास्ति वैयधिकरण्यकल्पनालेश इति तयोर्व्यङ्ग्यव्यञ्जकभावे नहि काऽप्यनुपपत्तिः । एतेन 'शब्दो ध्वनिभिर्नाभिव्यज्यते वैयधिकरण्यात् व्यधिकरण-प्रदीप-घटवत्' इत्यनुमानं निरस्तम्, वैयधिकरण्यहेतोरसिद्धेः ।

सम्बन्ध नहीं है । अथवा इनका हृदय और श्रोत्ररूप कल्पित देशभेद मान लें, तो भी इनका वास्तविक देशभेद नहीं है, दोनों का एक ही आकाशदेश है । यदि हृदयाकाश से श्रोत्राकाश को भिन्न मानें, तथापि इनका देशभेद नहीं होता, क्योंकि ध्वनि श्रोत्रदेश से हृदयदेश में पहुँच जाता है । अतः एक ही देश में वर्तमान होने से दोनों का व्यङ्ग्यव्यञ्जकभाव उपपन्न है ।

आशय : - जो परिमित सावयव मूर्त वस्तु है, उसका किसी देशविशेष से सम्बन्ध होता है । समानदेश में वर्तमान वस्तुओं का समानाधिकरण व्यवहार होता है, भिन्नदेशस्थ वस्तुओं का व्यधिकरण व्यवहार होता है, क्योंकि मूर्त परिच्छिन्न

इदानीं नानादेशव्यवहारं स्वीकृत्यापि समाधत्ते - देशेति । देशानां भेदः तस्य विकल्पेऽपि = अयं पूर्वदेशस्थः - अयं परदेशस्थः - इमावेकदेशस्थाविति व्यवहारस्वीकारेऽपीत्यर्थः, ध्वनिशब्दयोर्न भेदः = न देशभेदः । हृद्देशेऽपि आकाशः श्रोत्रेऽप्याकाश इत्युभयत्राकाशत्वस्य तुल्यत्वात्, इति भावः ।

अथ औपाधिकदेशसम्बन्धकल्पनया ध्वनिशब्दयोः श्रोत्रहृदयदेशभेदोऽभ्युपगम्यते, तथापि स्थूलदृशां देशभेदाभिमानेऽपि वस्तुगत्या सूक्ष्मदृशामाकाशैकदेशवृत्तित्वेन श्रोत्राकाशस्थध्वनेर्हृदयाकाशदेशे गमनेन वा तयोः सामानाधिकरण्यमेव, न वैयधिकरण्यमिति सर्वं समञ्जसम् ।

वस्तुतो ध्वनिशब्दयोर्व्यङ्ग्यव्यञ्जकभावे नेष्यते प्रदीपघटदृष्टान्तः, किन्तु जलसूर्यकाद्युपमैवेह प्रतिमानभूमिरित्यवधीयताम् । यथाहि- दूरदेशस्थोऽपि संसरन्नाकाशे सूर्यो जलाशयेषु कलशशरावोदञ्चनोदकादिषु वा बहुष्वधिकरणेषु, दवीयानपि तारापतिः स्रोतस्तरङ्गभङ्गेषु, कुम्भाम्भसि, अम्भोनिधौ

वस्तु किसी एक देश में रहता है तो दूसरे देश में नहीं रहता । घट और प्रदीप आदि मूर्तवस्तु हैं, उनका समान अधिकरण होने पर व्यङ्ग्यव्यञ्जकभाव-प्रकाश्य-प्रकाशकभाव होता है, भिन्न अधिकरण होने पर नहीं होता है । किन्तु ध्वनि और शब्द दोनों अमूर्त अपरिच्छिन्न वस्तु हैं, इनका किसी देशविशेष से सम्बन्ध ही नहीं होता, तो उनका एक अधिकरण अथवा भिन्न अधिकरण में वृत्तित्व सम्बन्ध की चर्चा ही नहीं है, तो उनका वैयधिकरण्य मानकर व्यङ्ग्यव्यञ्जकभाव की अनुपपत्ति की शङ्का निर्मूल है । स्थूलदृष्टि से दोनों का हृदय तथा श्रोत्र रूप देशभेद मान लिया जाय, तथापि श्रोत्रदेश में स्थित ध्वनि वीचीतरङ्गन्याय से देशान्तर में व्यापनशील होने से हृदयदेश में पहुँचकर समानाधिकरण हो जाता है, जिससे घट और प्रदीप के समान उनका व्यङ्ग्यव्यञ्जकभाव सम्पन्न होता है ।

किं वा ध्वनिः श्रोत्रेन्द्रियद्वारा हृद्देशे गच्छतीति नास्ति देशभेदप्रयुक्तवैयधिकरण्यमिति भावः ॥ १७ ॥

वैकस्मिन्नधिकरणेऽगणितस्तारागणोऽतिदवीयानपि बिम्बप्रतिबिम्बभावेन व्यङ्ग्यव्यञ्जकभावमुपगच्छति, तथा ध्वनिशब्दयोरमूर्तयोरपि विम्बप्रति-बिम्बभावेन व्यङ्ग्यव्यञ्जकभावोपगमः सुगम एव।

इदं तु ध्येयम् - वक्तुर्विवक्षाप्रयत्नान्मूलाधारादुत्थितो मारुतो नाभिदेशादूर्ध्वदेशं हृदयं प्राप्याकृतवर्णरूपपरिग्रहो नादाख्य उपांशुजपगोचरो ज्ञानरूपः शब्द एवोर्ध्वं समीरितो मूर्धानमाहत्य तत्तत्स्थानेषु प्रत्यागत्य प्रतिहतः कृतवर्णरूपपरिग्रहो वैखरीरूपो वक्तुः श्रोतुश्च श्रुतिगोचरः श्रोत्राकाशं प्राप्य हृदयदेशं प्रतिनिवृत्तस्तत्रत्यं शब्दमभिव्यञ्जयतीति शाब्दिकानां प्रक्रिया । तथा च ध्वनिशब्दयोः क्व वैयधिकरण्याशङ्केत्यलम् ॥ १७ ॥

वस्तुतः ध्वनि से आन्तरशब्द की अभिव्यक्ति प्रतिबिम्बाधान रूप है, प्रदीप से घट के समान नहीं । बिम्बप्रतिबिम्बभावरूप व्यङ्ग्यव्यञ्जकभाव तो भिन्न देशस्थ का भी होता है । अतिदूरस्थ-सूर्य-चन्द्र-मण्डल की नदी, तालाब, कूप आदि नाना अधिकरणों में प्रतिबिम्बरूप में अभिव्यक्ति होती है, तथा सागर व जलाशय रूप एक अधिकरण में सुदूरवर्ती अपरिगणित तारागण की अभिव्यक्ति होती है, ऐसे ही भिन्नदेशवर्ती नानावर्णरूप ध्वनि यदि स्फोटरूप एक आन्तर शब्द में प्रतिबिम्बित होकर अपने रूप से स्फोटात्मक शब्द की अभिव्यक्ति करते हैं, तो इसमें कोई अनुपपत्ति नहीं है ॥ १७ ॥

ग्रहणग्राह्ययोः सिद्धा योग्यता नियता यथा ।
व्यङ्ग्यव्यञ्जकभावेन तथैव स्फोटनादयोः ॥ ९८ ॥

प्रत्येकार्थप्रकाशिका

ननु प्रदीपादयोऽभिव्यञ्जका यथा घटमभिव्यञ्जयन्ति तथा पटमपीत्यत्रानियमो दृश्यते, ध्वनीनां तु नियताऽभिव्यञ्जकता-ताल्वभिघातजेन नादेन चादय एवाभिव्यज्यन्ते नतु कादय इति नियमः, तस्मात् 'शब्दा उत्पद्यन्ते' इत्येव पक्ष इत्यत

आनन्दा

शब्दस्याभिव्यक्तौ कारणनैयत्येन जन्यत्वपक्षम् अव्यङ्ग्यत्वसाधनं च निरस्यति - ग्रहणेति ।

अन्वयः - यथा ग्रहणग्राह्ययोः व्यङ्ग्यव्यञ्जकभावेन योग्यता नियता सिद्धा तथा एव स्फोटनादयोः योग्यता नियता सिद्धा ।

व्याख्या - यथा ग्रहणग्राह्ययोः = ज्ञानकारण-ज्ञानविषययोः चक्षुरादीन्द्रिय-रूपादिविषययोः व्यङ्ग्यव्यञ्जकभावेन = प्रकाश्यत्वेन प्रकाशकत्वेन च योग्यता= सामर्थ्यम् नियता = अविचलिता सिद्धा = अनादितः प्रवृत्ता - चक्षुषि रूपग्राहकत्वयोग्यता, रूपे च चक्षुर्ग्राह्यत्वयोग्यता नियमेनानादिर्व्यव-स्थिता, तथा स्फोटनादयोः व्यङ्ग्यव्यञ्जकभावयोग्यता अपरिवर्तिता अनादिसिद्धा । स्फोटस्य तत्तद्ध्वनिव्यङ्ग्यत्वमेव, तत्तद्ध्वनीनां च स्फोटव्यञ्जकत्वमेवेत्यर्थः ।

सूर्यमाया

घट आदि कार्यवस्तु में मृत्तिका आदि कारण का नियम पाया जाता है, व्यङ्ग्य में व्यञ्जक का नियम नहीं होता, घट आदि का व्यञ्जक तो सूर्य, चन्द्र, दीपक कोई भी होता है । स्फोट की अभिव्यक्ति में नियमतः ध्वनि ही कारण होने से अभिव्यक्ति के विपरीत उत्पत्ति की सिद्धि का निराकरण करते हैं - 'ग्रहण' इत्यादि ।

आह- ग्रहणेति । गृह्यतेऽनेनेति ग्रहणम् = चक्षुरिन्द्रियादिः, गृह्यन्त इति ग्राह्याः = रूपादयस्तयोर्योग्यता = चक्षुषि रूपग्राहकता, रूपे चक्षुर्ग्राह्यता चेति यथा नियता सिद्धा= चक्षुषा रूपमेव गृह्यते न तु गन्धः, रूपे चक्षुर्ग्राह्यतैव न तु

विमर्शः - यत्र यत्रास्ति कारणनियमस्तत्र तत्र जन्यजनकभाव एव दृश्यते, यथा-मृत्पिण्डादेव मृद्घटशरावादयो जायन्ते, दुग्धादेव दधि जायते-इत्यस्ति कारणनियमः । यत्र तु व्यङ्ग्यव्यञ्जकभावः प्रकाश्यप्रकाशकभावो वा तत्र नास्ति कारणनियमः, घटादयो यथा प्रदीपेनाभिव्यज्यन्ते तथा मणि-चन्द्रादित्यादिभिरप्यभिव्यज्यन्ते, किंच प्रदीपो यथा घटमभिव्यञ्जयति तथा पटमठादीनप्यविशेषेणाभिव्यञ्जयति । स्फोटस्याभिव्यक्तौ तु कारणनियमो दृश्यते कवर्णस्फोटः कण्ठाभिघातजन्येनैव ध्वनिना व्यज्यते, न तु ताल्वभिघातजन्येन, इति कारणनियमदर्शनाद् घटादिवत् शब्दस्योत्पत्तिरेव सिध्यति नाभिव्यक्तिः । तथा चानुमानप्रयोगः - "शब्दो नाभिव्यज्यते अभिव्यक्तिविपरीतकारणनियमदर्शनाद् घटादिवत्" इति । यत्र यत्र कारणनियमस्तत्र तत्राभिव्यक्तिविपरीतोत्पत्तिर्यथा घटादौ, इत्यस्ति पूर्वपक्षः ।

अर्थ : - जैसे ज्ञान कारण 'चक्षु' आदि इन्द्रिय और उनका ग्राह्य - 'रूप' आदि विषयों में ग्राहकत्व और ग्राह्यत्व रूप योग्यता नियत रहती है, तथापि व्यङ्ग्यव्यञ्जकभाव होता है, वैसे ही स्फोट और ध्वनि की ग्राह्यत्व तथा ग्राहकत्वरूप योग्यता नियत रहने पर भी उनका व्यङ्ग्यव्यञ्जकभाव होता है ।

आशय : - कार्यवस्तु में ही कारण का नियम है, व्यङ्ग्यवस्तु में व्यञ्जक का नियम नहीं होता, यह तर्क निराधार है । व्यङ्ग्य में भी व्यञ्जक का नियम पाया जाता है । इन्द्रिय और उनका विषय परस्पर नियत होते हैं । रूप का ग्राहक इन्द्रिय

श्रोत्रग्राह्यतेति नियम इति भावः, तथैव स्फोटनादयोः व्यङ्ग्य-व्यञ्जकभावेन नियमः । ताल्वभिघातजध्वनिः चादीनेवाभि-व्यञ्जयति न तु कादीनिति नियमेन अभिव्यक्तेर्न कापि क्षतिरिति भावः ॥ ९८ ॥

अत्र समाधीयते-सत्यपि कारणनियमे ग्राह्यग्राहकयोर्विषयेन्द्रिययोर्व्यङ्ग्य-व्यञ्जकभावदर्शनाद् व्यभिचारेण नानुमानप्रवृत्तिः । चक्षुर्ग्राह्यमेव रूपम् - रूपग्राहकमेव चक्षुरिति सत्यपि ग्रहणकारणनियमे चक्षुषा रूपस्याभिव्यक्ति-दर्शनादनैकान्तिकोऽयं कारणनियमो हेतुः शब्दस्य नाभिव्यक्तिविपर्ययेणोत्पत्तेः साधकः । तस्मात् चक्षुरादीन्द्रियतद्विषययोरिव स्फोटनादयो र्व्यङ्ग्यव्यञ्जकभावे नास्ति किमपि बाधकं मानम् ।। ९८ ।।

चक्षु ही है, श्रोत्र आदि नहीं । चक्षु का ग्राह्य विषय रूप ही है, शब्द आदि नहीं । जैसे चक्षु में रूप की ग्राहकत्वयोग्यता अनादि नियत है, तथा रूप में चक्षु से ग्राह्यत्वयोग्यता भी अनादिसिद्ध है, ऐसे ही ध्वनि में स्फोट की व्यञ्जकता तथा स्फोट में ध्वनि से व्यङ्ग्यता की योग्यता भी अनादिसिद्ध है । अतः स्फोट और ध्वनि के व्यङ्ग्यव्यञ्जकभाव का नियमदर्शन से स्फोट की अभिव्यक्ति न मानकर उत्पत्ति की कल्पना करना अयुक्त है ।। ९८ ।।

सदृशग्रहणानां च गन्धादीनां प्रकाशकम् ।
निमित्तं नियतं लोके प्रतिद्रव्यमवस्थितम् ॥ ९९ ॥

प्रत्येकार्थप्रकाशिका

नन्वस्तु विभिन्नेन्द्रियग्राह्यरूपादिषु तादृशनियमः, एकेन्द्रिय-ग्राह्यध्वनिषु कथं नियम इत्यतो नियममाह - सदृशेति । सदृशानि ग्रहणानि = ग्राहकाणि येषां तेषाम् - तुल्येन्द्रिय-ग्राह्याणामित्यर्थः, गन्धादीनाम् प्रकाशकम् = अभिव्यञ्जक-

---

आनन्दा

भिन्नेन्द्रियग्राह्येषु रूपरसादिषु व्यङ्ग्यव्यञ्जकनियमसद्भावेऽपि अभिन्नेन्द्रियग्राह्येषु क-च-ट-त-पादिवर्णध्वनिषु नायं व्यङ्ग्यव्यञ्जकनियम इत्याशङ्कायां तत्रापि तं नियमं लोकदृष्टान्तेनोपपादयति - सदृशेति ।

अन्वयः - सरलः ।

व्याख्या - सदृशग्रहणानां च = अभिन्नेन्द्रियग्राह्याणामपि गन्धादीनाम् = कुङ्कुमगन्ध-सक्तुरसादीनां गुणानां प्रकाशकं निमित्तम् = व्यञ्जकं कारणम लोके = प्रत्यक्षे जगति प्रतिद्रव्यम् = कुङ्कुमसक्तुकादिप्रत्येकद्रव्ये नियतम् अवस्थितम् = पृथक् पृथग् व्यवस्थितं वर्तते ।

सूर्यमाया

चाहे पृथक् इन्द्रियों से ग्राह्य-रूप रस आदि हों अथवा एक ही इन्द्रिय से ग्राह्य विभिन्न वस्तुओं का गन्ध हो, उभयत्र व्यञ्जकनियम एक समान बताते हैं- 'सदृश' इत्यादि ।

अर्थ : - लोक में समान इन्द्रिय से ग्राह्य जो नाना वस्तुओं के गन्ध, रस आदि हैं, उनकी भी प्रत्येक द्रव्य में अभिव्यक्ति का कारण वस्तुविशेष पृथक् पृथक् व्यवस्थित व नियत पाया जाता है ।

आशय : - भिन्न इन्द्रियों से ग्राह्य-रूप रस आदि में ही ग्राहक इन्द्रिय का नियम है, अतः उन्हीं में व्यङ्ग्यव्यञ्जकभाव होता है, एक इन्द्रिय से ग्राह्य-ध्वनि और शब्द में व्यङ्ग्यव्यञ्जकभाव नहीं सिद्ध होता, यह कल्पना तर्कसंगत नहीं है ।

गोघृतादीत्यर्थः निमित्तम् = कारणं नियतम् लोके प्रतिद्रव्यम् = द्रव्यं-द्रव्यं प्रति अवस्थितम् = वर्तते, इति यावत् ।

गोघृतं हि कुङ्कुमगन्धमेवाभिव्यञ्जयति न तु पाषाणगन्धम्, उदकं हि सक्तुरसमेवाभिव्यञ्जयति न तु पाषाणरसमिति नियमो यथा, तथैव प्रकृतेऽपीति भावः ॥ ९९ ॥

विमर्श : - नहि केवलं भिन्नेन्द्रियग्राह्येषु रूपरसादिष्वेव व्यङ्ग्यव्यञ्जक-भावनियमः, अपितु तुल्येन्द्रियग्राह्येष्वपि गन्धादिषु स नियमः । अभिन्नेन घ्राणेन्द्रियेण ग्राह्योऽपि गोघृतस्य गन्धः कुङ्कुमगन्धमेवाभिव्यञ्जयति न तु पाषाणगन्धम्, अर्थात् गोघृतेन कुङ्कुमगन्ध एव व्यज्यते न पाषाणगन्ध इत्यस्ति व्यङ्ग्यनियमः । एवम् - अभिन्नरसनेन्द्रियग्राह्योऽप्युदकरसः सक्तुरसमेव व्यञ्जयति न पाषाणरसमिति व्यङ्ग्यविषयको नियमो दृश्यते लोके । एवं व्यञ्जकविषयकोऽपि नियमो दृश्यते, कुङ्कुमगन्धस्य गोघृतमेव व्यञ्जकं न तु उदकम्, पाषाण-शरावादेर्गन्धस्योदकमेव व्यञ्जकं न तु गोघृतम्, इत्यस्ति व्यञ्जकविषयको नियमः प्रतिद्रव्यं व्यवस्थितः, तथा प्रकृतेऽभिन्नेन्द्रियग्राह्ययोरपि ध्वनिशब्दयोर्नानुपपन्नो व्यङ्ग्यव्यञ्जकभाव-नियमः ॥ ९९ ॥

क्योंकि विभिन्न द्रव्यों का गन्ध समान रूप में एक घ्राणेन्द्रिय से ही ग्राह्य होता है, तथापि भिन्न भिन्न द्रव्यों के गन्ध का व्यञ्जक नियत पाया जाता है, सबका व्यञ्जक एक वस्तु ही नहीं। कुङ्कुम-रोली के गन्ध का व्यञ्जक घी होता है, जल नहीं । आवे में नया पका मिट्टी के कसोरे आदि पात्र का गन्ध जल से अभिव्यक्त होता है, घी से नहीं । इस प्रकार एक घ्राणेन्द्रिय से ग्राह्य गन्ध का प्रतिद्रव्य में व्यञ्जक नियत होने पर भी व्यङ्ग्यव्यञ्जकभाव होता है। अतः एक श्रोत्रेन्द्रिय से ग्राह्य - ध्वनि और स्फोट रूप शब्द का व्यङ्ग्यव्यञ्जकभाव मानने में कोई बाधक तर्क नहीं ॥ ९९ ॥

प्रकाशकानां भेदांश्च प्रकाश्योऽर्थोऽनुवर्तते ।
तैलोदकादिभेदे तत् प्रत्यक्षं प्रतिबिम्बके ॥ १०० ॥

प्रत्येकार्थप्रकाशिका

नन्वेवमपि यथा लोके प्रदीपादीनां वृद्धिह्रासयोः सत्त्वेऽपि न घटादीनां वृद्धिह्रासौ, किञ्च व्यञ्जकप्रदीपादीनां संख्याभेदेऽपि अभिव्यङ्ग्ये न संख्यान्तरसम्बन्ध इति दृश्यते, न तथा शब्दे । शब्दो ध्वनिधर्मानुसारेण वृद्धिह्रास-संख्यान्तरसम्बन्धादिधर्ममनुसरति, अतो व्यङ्ग्यधर्माभावात् न

आनन्दा

घटादौ प्रदीपादिव्यञ्जकधर्मानुपलम्भनियमदर्शनेन तद्विपर्ययेण शब्दे ध्वनिधर्मोपलम्भस्यानभिव्यङ्ग्यत्वसाधकम् - 'शब्दो नाभिव्यज्यते ध्वनिधर्मोपलम्भात्' इत्यनुमानं विघटयितुं तैलोदकादौ मुखादिप्रतिबिम्बे व्यञ्जकधर्मोपलम्भस्यापि दर्शनेन व्यङ्ग्ये व्यञ्जकधर्मानुपलम्भस्य व्यभिचारेण क्वाचित्कत्वाद् अनियममुद्घाटयति - प्रकाशकानामिति ।

अन्वयः - प्रकाशकानाम् भेदान् प्रकाश्यः च अर्थः अनुवर्तते, तत् तैलोदकादिभेदे प्रतिबिम्बके प्रत्यक्षम् ।

सूर्यमाया

कहीं व्यङ्ग्य में व्यञ्जक का धर्मभेद न होना जो स्वभाव है, उसके विपरीत शब्द में ध्वनि का धर्मभेद पाये जाने से उसमें व्यङ्ग्य के विपरीत अव्यङ्ग्यत्व की सिद्धि हो जायगी, इस आक्षेप का समाधान करते हैं - 'प्रकाशकानाम्' इत्यादि ।

अर्थ : - व्यङ्ग्य कहीं व्यञ्जकों के स्वरूपभेदों को भी ग्रहण कर लेता है, जैसा कि तेल-जल आदि वस्तुभेद में जो मुख आदि का प्रतिबिम्ब होता है- उसमें वह प्रत्यक्ष देखा जाता है ।

शब्दोऽभिव्यज्यत इति शङ्कां परिजिहीर्षुराह - प्रकाशेति । प्रकाशकानाम् = आदर्शजलादीनां भेदान् = उन्नतनिम्नत्वभेदान् जलतरङ्गादिभेदांश्च प्रकाश्यः = अभिव्यङ्ग्यमुखचन्द्रादि-प्रतिबिम्बः अर्थः = पदार्थः अनुवर्तते = अनुसरति, प्रतिबिम्बके= मुखचन्द्रादिप्रतिबिम्बके तैलोदकादिभेदे सति तत् = व्यञ्जकगत-

---

व्याख्या - प्रकाशकानाम् = व्यञ्जकानाम् भेदान् = धर्मभेदान् प्रकाश्यः च = व्यङ्ग्योऽपि अर्थः = वस्तुविशेषः अनुवर्तते = अनुहरति, तत् = व्यञ्जकधर्मविशेषानुहरणम् तैलोदकादिभेदे = तैलजलादीनां व्यञ्जकानां भेदे सति प्रतिबिम्बके = मुखादिप्रतिबिम्बे प्रत्यक्षम् उपलभ्यते, इत्यर्थः ।

विमर्शः - यत्र यत्र व्यङ्ग्यत्वम् तत्र तत्र व्यञ्जकधर्माननुविधायित्वमिति यदि व्याप्तिर्भवेत्, तदा तद्व्यतिरेकेण शब्दे ध्वनिधर्मानुविधायित्वदर्शनेन अनभिव्यङ्ग्यत्वं कल्प्येत, परंच नेयमस्ति व्याप्तिः, प्रतिबिम्बे व्यभिचारदर्शनात् । तैलजलादौ मुखादिप्रतिबिम्बे व्यङ्ग्ये व्यञ्जकानां तैलजलादीनां धर्मभेदस्य श्यामत्वचञ्चलत्वादेरनुविधानमुपलभ्यते । तस्माद् व्यङ्ग्ये प्रदीपप्रकाश्ये घटादौ व्यञ्जकानां प्रदीपादीनां प्रकाशानां वृद्धिह्रासादिधर्मभेदस्याननुविधानेऽपि तस्य क्वाचित्कत्वमेव न सार्वत्रिकत्वं सिध्यतीति तद्व्यतिरेकेण शब्देऽनभिव्यङ्ग्यत्वस्य साधनं कर्तुमशक्यम् ।

आशय : - जहाँ व्यङ्ग्य और व्यञ्जक का प्रकाश्य प्रकाशक भाव है, वहाँ व्यङ्ग्य वस्तु में व्यञ्जक का स्वभावभेद वा स्वरूपभेद गृहीत नहीं होता है, जैसा कि घट आदि प्रकाश्य वस्तु दीपक आदि प्रकाशकों के धर्मभेद को ग्रहण नहीं करते । दीपक आदि के प्रकाश के बढ़ने या घटने से प्रकाश्य घट न बढ़ता है न घटता है, किन्तु यह कोई व्यापक नियम नहीं है कि - व्यञ्जक वस्तु का स्वभाव व स्वरूपभेद व्यङ्ग्य वस्तु में कहीं भी गृहीत न हो । प्रत्युत जहाँ व्यञ्जक - उपाधिरूप वस्तु होता है, वहाँ उसका स्वभावभेद व्यङ्ग्य - 'प्रतिबिम्बरूप' वस्तु में पाया ही जाता है । जैसे कि तेल-जल आदि उपाधिरूप

श्यामादिप्रत्यक्षं दृश्यते इति शेषः । आदर्शादिगतविकारप्रयुक्तं प्रतिविम्बमुखे उन्नतनिम्नत्वादि, प्रियङ्गुतैलगतश्यामादि-प्रतिविम्बेऽपि श्यामत्वम्, जलतरङ्गादिगतसंख्याभेदप्रयुक्त-श्चन्द्रप्रतिविम्बे संख्याभेदश्च, इत्यादि दृश्यते; तथैव प्रकृते ध्वनिशब्दयोर्बोध्यमिति भावः ॥ १०० ॥

यत्र घटप्रदीपादौ प्रकाश्यप्रकाशकभावलक्षणो व्यङ्ग्यव्यञ्जकभावस्तत्र मा भूद् व्यङ्ग्ये व्यञ्जकानां धर्मभेदस्यानुविधानम्, यत्र त्वस्ति तद्विलक्षणो जलसूर्यकादिवद् व्यङ्ग्यव्यञ्जकभावस्तत्र भवत्येव व्यङ्ग्ये व्यञ्जकधर्म-भेदानुविधानम्, तदुक्तं प्राक् - 'प्रतिविम्बं यथान्यत्र' इति । तृतीयाध्याय-द्वितीयपादे ब्रह्मसूत्रमपि तदाह - "अत एव चोपमा सूर्यकादिवत्" इति, "वृद्धिह्रासभाक्त्वमन्तर्भावात्" इति च।

प्रकृते ध्वनिशब्दयो र्व्यङ्ग्यव्यञ्जकभावे घटप्रदीपविलक्षणो जलसूर्यादि-प्रतिविम्बदृष्टान्त इष्यते ॥ १०० ॥

व्यञ्जक का धर्म चाञ्चल्य, वृद्धि, ह्रास तथा संख्याभेद प्रतिविम्ब - 'सूर्य - चन्द्र-मुख आदि' में प्रत्यक्ष लक्षित होते हैं । वैसे ही प्रकृत में भी उपाधिरूप व्यञ्जकध्वनि का धर्म वर्ण-पद-वाक्यभेद उपधेय - व्यङ्ग्य स्फोटशब्द में गृहीत होते हैं । ध्वनि का प्रतिबिम्बग्रहण ही शब्द की अभिव्यक्ति है । अतः ध्वनिधर्म के ग्रहण से शब्द के अनभिव्यङ्ग्यत्व की कल्पना अयुक्त है । व्यञ्जक का धर्मभेद व्यङ्ग्य में गृहीत होता भी है, नहीं भी होता है, दोनों प्रकार के दृष्टान्त पाये जाते हैं, अतः व्यभिचारी होने से व्यञ्जकधर्म का ग्रहण शब्द के अव्यङ्ग्यत्व का साधक नहीं हो सकता है ॥ १०० ॥

विरुद्धपरिमाणेषु वज्रादर्शजलादिषु ।
पर्वतादिसरूपाणां भावानां नास्ति संभवः ॥ १०१ ॥

प्रत्येकार्थप्रकाशिका

ननु चन्द्रादिभ्यः पदार्थान्तरमेव हि प्रतिविम्बम् आदर्शादिषु दृश्यते, एवं च नादर्शादयोऽभिव्यञ्जकास्तत उक्तदृष्टान्ता-सङ्गतिरत आह - विरुद्धेति । विरुद्धं - पर्वताद्यपेक्षया लघुरूपं परिमाणं येषां तेषु - वज्रादर्शजलादिषु = स्वच्छे मणौ -

---

आनन्दा

अन्धकारावरणेनावृतस्वरूपः सिद्धो घटादिरर्थः प्रदीपादिभिरावरणभङ्गे व्यक्तरूपः स एव प्रकाश्यते न त्वर्थान्तरं भवति स, इति युक्तमेव तस्य प्रकाशव्यङ्ग्यत्वम्, तत्र तु नास्ति व्यञ्जकप्रकाशधर्मस्य वृद्धिह्रासादेरनु-विधानम् । प्रतिविम्बं तु विम्बेभ्यो मुखचन्द्रादिभ्यः पदार्थान्तरमेव तैलोदकादर्शादिष्वन्तः संनिविष्टमुत्पद्यते, न तु भवति विम्बेभ्योऽभिन्नम् । अतो नास्ति प्रतिविम्बस्य व्यङ्ग्यत्वम् । एवं च व्यङ्ग्यस्य व्यञ्जकधर्मानुविधाने प्रतिविम्बदृष्टान्तो न युक्त इत्याशङ्कां परिहरन् प्रतिविम्बस्य व्यङ्ग्यत्वमुपपादयति - विरुद्धेति ।

सूर्यमाया

दर्पण आदि में मुख - पर्वत आदि का प्रतिविम्ब - विम्ब 'मुख आदि' से भिन्न वस्तु उत्पन्न होता है, न कि वह व्यङ्ग्य होता है । अतः व्यङ्ग्य का व्यञ्जक के धर्मग्रहण में यह प्रतिबिम्ब दृष्टान्त असङ्गत है, इस शङ्का के निराकरण के रूप में प्रतिविम्ब को व्यङ्ग्य सिद्ध करते हैं - 'विरुद्ध' इत्यादि ।

अर्थ : - विम्बवस्तु से विपरीत लघुपरिमाण वाले मणि-दर्पण जल आदि में पर्वत आदि जैसे बृहत् परिमाण वाले वस्तुओं का वास्तविक रूप में जन्म संभव नहीं है ।

आदर्शे = दर्पणे - जले, आदिपदेन स्वच्छलौहादेर्ग्रहणम्, पर्वतादिसरूपाणाम् = गुरुपरिमाणपर्वतहस्त्यादीनाम् भावानाम्= पदार्थानां संभवः = तत्र संनिवेशो नास्ति ।

अन्वयः - सरलः ।

व्याख्या - विरुद्धपरिमाणेषु = बृहत्परिमाणपर्वतादिविम्बापेक्षया न्यूनपरिमाणेषु वज्रादर्शजलादिषु = मणि-दर्पण-जल-प्रभृतिषु स्वच्छोपाधिषु पर्वतादिसरूपाणाम् = पर्वत-हस्त्यादितुल्यानां बृहत्परिमाणानां विम्बरूपाणां भावानाम् = वस्तूनाम् संभवः = अन्तःसमावेशेनोत्पत्तिः नास्ति = नहि संभवति, स्वल्पपरिमाणेष्वायतनेषु ततोऽधिकपरिमाणानां पर्वतादीनां समावेशाभावात् ।

विमर्शः - उपाधिसन्निधाने उपधेयाद् वास्तविकात् पर्वताद् हस्त्यादितो वा भिन्नानां तत्सदृशानां सत्यानामेव बृहदाकाराणां पर्वतहस्त्यादीनां लघ्वाकारेषु मणिदर्पणकृपाणशरावजलादिषु अन्तरनुप्रवेशेन समुत्पादो नहि सम्भवति, अतिलघ्वाकारेषु बृहदाकारस्य समावेशासम्भवाद् - उत्पादकाभावाच्च । नहि मूषकबिले गज उत्पद्यते ।

तस्मात् स्वच्छेषु दर्पणादिषूपाधिष्वभिमुखेषु सौरं तेजो विम्बात् प्रतिस्रोतः प्रतिनिवृत्तं तेषु निपतितं सत् विम्बभूतपर्वतादिप्रतिरूपतया विवर्तमानं - मिथ्याभूतं पदार्थान्तरमवभासते, न तु सत्य एवान्यः कश्चित् पर्वतादिरुत्पद्यते तेषु न्यूनपरिमाणेषु । अधिकं तु ब्रह्मजिज्ञासा-सूत्रेऽध्यासभाष्ये भामत्यां द्रष्टव्यम् । स एवावभासः प्रतिविम्बम् - न

आशय : - दर्पण आदि व्यञ्जक उपाधि के समवधान में विम्बभूत पर्वत आदि का अभिव्यक्त प्रतिरूप ही प्रतिबिम्ब है, जो कि आभासरूप मिथ्या है, सत्य वस्त्वन्तर नहीं । यह प्रतिविम्ब अपने व्यञ्जक मणि - दर्पण - जल आदि के लौहित्य तथा चाञ्चल्य आदि धर्मों का अनुवर्तन व अनुहरण करता है, अत एव

लघुनि आदर्शतले गुरुपरिमाणहस्त्यादेः सन्निवेशस्या-संभवात् न वास्तविकहस्त्यन्तरन्तत्र, किन्तु आदर्शसम्बन्धेन तस्यैव हस्तिन आभासो व्यज्यते, स एव प्रतिविम्बपदार्थ इति न दृष्टान्तासङ्गतिरिति भावः ॥ १०१ ॥

तु सत्यं किमपि पदार्थान्तरमुत्पद्यमानम् । तदाह शारीरके द्वितीयाध्याय-तृतीयपादे -

"आभास एव च" इति ।

एवं च सिद्धस्वरूपस्य पर्वतादेरादर्शादिषु प्रतिविम्बतया प्रतिभास एवाभिव्यक्तिरिति प्रतिविम्बस्य व्यङ्ग्यत्वानपायादुपपद्यत एव व्यङ्ग्यस्य व्यञ्जकधर्मानुविधाने प्रतिविम्बस्य दृष्टान्तत्वम् ॥ १०१ ॥

वह सत्य मुख आदि की असत्य प्रतिकृति रूप में व्यङ्ग्य होकर ही अपने व्यञ्जक के धर्मों का उपग्राही होने से - व्यङ्ग्य का व्यञ्जकधर्म के ग्रहण में समीचीन ही दृष्टान्त है ॥ १०१ ॥

तस्मादभिन्नकालेषु वर्णवाक्यपदादिषु ।
वृत्तिकालः स्वकालश्च नादभेदाद्विभज्यते ॥ १०२ ॥

प्रत्येकार्थप्रकाशिका

नन्वेवं स्फोटस्यैकत्वात् भेदप्रयुक्तः पौर्वापर्यव्यवहारः-ह्रस्वदीर्घादिव्यवहारः - द्रुतविलम्बितादिवृत्तिव्यवहार - श्चासंगतः स्यादत आह - तस्मादिति । तस्मात् = स्फोट- स्यैकत्वात्, अभिन्नफालेषु - अभिन्नाः काला येषां तेषु = कालभेदशून्येषु,

---

आनन्दा

शब्दस्य नित्यत्वमेकत्वं रक्षितुं व्यङ्ग्यत्वमुपपाद्य व्यञ्जकध्वनि-धर्मानुविधायित्वेन तस्यौपाधिकं ह्रस्वादिकालभेदव्यवहारं द्रुतादि-वृत्तिभेदव्यवहारं संगमयति - तस्माद् इति ।

अन्वयः - तस्माद् अभिन्नकालेषु वर्णवाक्यपदादिषु नादभेदाद् वृत्तिकालः स्वकालः च विभज्यते ।

व्याख्या - तस्मात् = स्वतः शब्दस्यैकत्वेऽपि व्यञ्जकधर्मानुवर्तनाद्धेतोः अभिन्नकालेषु = नित्यत्वात् कालपरिच्छेदरहितेषु वर्णवाक्यपदादिषु = वर्णपदवाक्यमहावाक्यरूपेषु स्फोटेषु नादभेदात् = ध्वनिभेदात् वृत्तिकालः= चिराचिरस्थितिकालरूपो द्रुतादिः, स्वकालः = मात्राकालिकत्वादिरूपह्रस्वादिश्च विभज्यते = भेदव्यवहारः कल्प्यते ।

सूर्यमाया

अभिव्यञ्जक ध्वनि के भेद से स्फोट में भेदव्यवहार का उपसंहार करते हैं- 'तस्माद्' इत्यादि ।

अर्थ : - पूर्वोक्त युक्तियों से एक तथा नित्य शब्द होने के कारण वस्तुतः कालभेद न होने पर भी वर्ण-पद-वाक्यरूप स्फोट में वैकृत और प्राकृतध्वनि के भेद से द्रुत आदि वृत्ति का स्थितिकाल और स्वरूपगत ह्रस्व आदि अपना मात्राकाल विभक्त हो जाता है ।

वर्णवाक्यपदादिषु, आदिपदेन वाक्यसमुदायमहावाक्यस्य ग्रहणम्, वृत्तिकालः = द्रुतादिभेदः, स्वकालः = ह्रस्वादि-व्यवहारः, चकारेण पौर्वापर्यव्यवहारस्य संग्रहः, नादभेदाद् = ध्वनिभेदाद् विभज्यते = विविच्यते, इत्यर्थः ।

वस्तुत उक्तव्यवहारः स्फोटे नास्त्येव, किन्तु ध्वनिगत-पौर्वापर्य्यं प्राकृतध्वनिप्रयुक्तह्रस्वादिव्यवहारं वैकृतध्व-निकृतद्रुतादिव्यवहारं चादाय तत्र तावद् व्यवहारः कल्प्यते-इति भावः ॥ १०२ ॥

विमर्शः - वीचीतरङ्गादीनां तद्गतकम्पचाञ्चल्यादीनां धर्माणां च भेदो यथा तद्गतसूर्यचन्द्रादिप्रतिविम्बेषु भासमानोऽविवेकिभिर्विम्बेषु सूर्यचन्द्रादिष्वपि व्यवह्रियते, तथा शब्दस्यैकत्वाद् भेदत्रयशून्यत्वेऽपि, नित्यत्वाच्च कालपरिच्छेदशून्यत्वेऽपि प्राकृतध्वनिभेदाद् ह्रस्वादिमात्राकालभेदो वैकृतध्वनिभेदाच्च द्रुतादिवृत्तिकालभेदस्तत्प्रतिविम्बेषु भासमानोऽविवेकेन नित्यैकशब्देऽपि व्यवह्रियत इति हृदयम् । तदिदम् - 'स्फोटस्याभिन्न-कालस्य' इत्यादिना 'प्राकृतस्य ध्वनेः कालः' इत्यादिना च प्राक् प्रतिपादितमेव प्रतिविम्बस्य व्यङ्ग्यत्वसाधने व्यङ्ग्यस्य व्यञ्जकधर्मानु-वर्तनप्रसङ्गेनेहानुगम्यते ॥ १०२ ॥

आशय : - जैसे सूर्य, चन्द्र आदि विम्ब का वस्तुतः भेद न रहने पर भी जल की धाराओं व तरङ्गों के भेद से प्रतिविम्ब का जो भेद है, वह अविवेकी को विम्ब में भी प्रतीत होता है, ऐसे ही वस्तुतः स्फोट का भेद न रहने पर भी ध्वनि और स्फोट के अविवेकी को प्राकृत और वैकृतध्वनि का क्रमशः ह्रस्व-दीर्घ-प्लुत वर्णों का एकमात्रा - द्विमात्रा - त्रिमात्राकालरूप -स्वरूपगतभेद तथा कम या अधिक काल तक स्थितिरूप - 'द्रुत-मध्य-विलम्बित नामक' वृत्ति का कालभेद स्फोट में प्रतीत होता है ॥ १०२ ॥

य: संयोगवियोगाभ्यां करणैरुपजन्यते ।
स स्फोटः शब्दजाः शब्दा ध्वनयोऽन्यैरुदाहृताः ॥ १०३ ॥

प्रत्येकार्थप्रकाशिका

इदानीं ध्वनिस्फोटयोरनित्यत्ववादिमते स्वरूपमाह- य इति । संयोगः = तत्तत्स्थानेषु वायोरभिघातः, वियोगश्च = उक्तस्थानान्निःसरणम्, ताभ्याम् करणैः = स्थानादिभिः यः = प्राथमिक उपजन्यते = उत्पद्यते स स्फोटः = शब्दः, अस्य देश

आनन्दा

अनित्यशब्दवादे ध्वनिस्फोटयोः स्वरूपमाह - यः संयोग इति ।

अन्वयः - सरलः ।

व्याख्या - संयोगवियोगाभ्याम् = वर्णरूपशब्दजनकवायोः तत्तत्स्थानेषु संयोगेन वियोगेन च, करणैः = कण्ठादिस्थानैः जिह्वाग्रोपाग्रादि-सम्बन्धजनक-स्पृष्टताद्याभ्यन्तरप्रयत्नैश्च यः प्रथमः शब्द उपजन्यते स स्फोटः = स्फुटत्यर्थोऽस्मादिति व्युत्पत्त्या - अर्थबोधकः शब्दो वर्णात्मकः स्फोटसंज्ञकः । शब्दजाः शब्दाः = वीचीतरङ्गन्यायेन कदम्बमुकुलन्यायेन वा ये प्रथमोत्पन्नात् शब्दात् श्रोत्रदेशपर्यन्तं जायमानाः प्रथमशब्दसन्तानभूतास्ते द्वितीयादिशब्दा अन्यैः = कार्यत्ववादिभि नैयायिकैः ध्वनय उदाहृताः = परिभाषिताः ।

सूर्यमाया

अनित्यशब्दवादी - नैयायिक आदि के मतानुसार ध्वनि और स्फोट का स्वरूप बताते हैं - 'यः' इत्यादि ।

अर्थ : - वायु के संयोग और वियोग से स्थान - प्रयत्न करणों के द्वारा जो शब्द सर्वप्रथम उत्पन्न होता है, वह 'स्फोट' रूप शब्द है, तथ उस प्रथमोत्पन्न शब्द से जो अन्य शब्द उत्पन्न होते हैं, वे अन्यों के अनुसार ध्वनि कहे गये हैं ।

आकाशः, स चैकोऽपि संयोगिद्रव्यान्तर-कृतभेदेन भिन्नः, अतो न पौर्वापर्य्यादिव्यवहारविरोधः ।

शब्दाज्जाताः शब्दजाः, प्रथमोत्पन्नात् शब्दात् शब्दान्तरं जायते, ततोऽपि शब्दान्तरम् - एवं रूपेण श्रुतिपथमारोहन्ति, अत्रैव वीचितरङ्गन्यायो दृष्टान्त इत्यन्यत्र विस्तरः, ते शब्दाः अन्यैः = नैयायिकैः ध्वनय उदाहृताः = कथिता इत्यर्थः । अन्यैरित्युक्त्या नेदं स्वमतमिति सूचितम् । स्वमतन्तु -

---

विमर्शः - स्थानकरणाभिघातात् प्रथमोत्पन्नः शब्दः स्फोट इति व्याहृतः, तरङ्गात्तरङ्गान्तरमिव प्रथमोत्पन्नात् शब्दात् शब्दान्तरं जायमानं प्रतिकृतिकल्पं ध्वनिरिति नैयायिकैरुच्यते । यथा दीपप्रभा दूरदूरतरं याता यथोत्तरमपचीयमाना मन्दीभूता स्पष्टरूपप्रकाशनासमर्था भवति, तथा शब्दजाः शब्दा उत्तरोत्तरमपचीयमाना अस्फुटाक्षरा भवन्तीति ध्वनय उच्यन्ते । अत एव समीपवर्तिनां स्फुटवेद्याक्षराः सुदूरवर्तिनां तु कलकलनादमात्रा अस्फुटाक्षराः श्रवणविषया भवन्ति । तेषां च सर्वदिग्व्यापिनां यद्यप्येक एवाकाशदेशस्तथापि कर्णशष्कुल्यादिसंयोगिद्रव्यभेदाद् भेद, इति वर्णानां पौर्वापर्यव्यवहार उपपद्यते; इति कार्यत्ववादिनां परेषां मतम् । स्वमते तु - ध्वनिव्यतिरिक्तो ध्वनिव्यङ्ग्यः-ध्वनिसम्भूतनादाभिव्यङ्ग्यो वा नित्यः शब्दः स्फोटः । ध्वनयस्तु

आशय : - जिह्वा के मूल - मध्य - अथवा अग्रभागों का स्पर्श - ईषत् स्पर्श अथवा मुख का संकोच विकास आदि प्रयत्नों से विवक्षाप्रेरित वायु का कण्ठ आदि तत्तत्स्थानों में आघात प्रतिघात होने से ह्रस्व-दीर्घ आदि वर्ण रूप जो ध्वनि प्रथम उत्पन्न होते हैं, वे अर्थ का वाचक 'स्फोट' शब्द हैं, प्रथम उत्पन्न उन शब्दों से जो अन्य शब्द तरङ्गरूप में आकाशदेश में चतुर्दिक् फैलते हुए श्रोताओं के श्रोत्रदेश तक पहुँचते हैं - जो कि कुछ दूर तक फैलते हुए क्रमशः क्षीण व मन्द होते जाते हैं, वे ध्वनि कहे गये हैं, यह अनित्य शब्द माननेवाले नैयायिकों का मत है । प्रथम उत्पन्न जिस प्राकृत नामक ध्वनि को वैयाकरण स्फोट का

संयोगवियोगजा ध्वनयस्तदभिव्यङ्ग्यः स्फोटः शब्दो नित्य इति ।

केषांचित्तु संयोगविभागजध्वनिसम्भूतनादाभिव्यङ्ग्यः स्फोट इति मतम् । तत्र ह्रस्वादिव्यवहारहेतवो ध्वनय इति पूर्वमेवोक्तत्वान्नात्र पृथगुक्त इति भावः ॥ १०३ ॥

स्थानकरणाभिघातजन्या उपचयापचयस्वभावा 'ह्रस्वादि-द्रुतादि' भेद-व्यवहारप्रयोजकाः स्फोटस्योपरञ्जका उपाधयोऽनित्याः । तदुक्तं प्राक्- 'वर्णस्य ग्रहणे हेतुः प्राकृतो ध्वनिः' इत्यादिना । भाष्यमप्याह- 'ध्वनिः स्फोटश्च शब्दानां ध्वनिस्तु खलु लक्ष्यते । अल्पो महांश्चे'ति हृदयम् । इदं तु बोध्यम् - वैयाकरणमते स्फोटस्य व्यञ्जको यः प्राकृतो ध्वनिः सोऽन्यैरर्थवाचकः स्फोट उच्यते, यश्च द्रुतादिवृत्तिहेतुर्वैकृतो ध्वनिः स ध्वनिरुच्यते, इति विवेकः ॥ १०३ ॥

अभिव्यञ्जक मानते हैं, उसको अनित्य शब्दवादी स्फोट कहते हैं तथा प्रथम शब्द से उत्पन्न शब्दतरङ्ग - जिसको वैयाकरण द्रुत आदि वृत्तियों का हेतु वैकृत कहते हैं, उसको ध्वनि कहते हैं । ये दोनों शब्द अनित्य हैं । इनके अतिरिक्त कोई नित्य व्यङ्ग्य शब्द इनके मत में मान्य नहीं है । यह वैयाकरणों का इष्ट पक्ष नहीं है, वैयाकरण तो ध्वनि से अतिरिक्त - ध्वनिव्यङ्ग्य नित्य शब्द को स्फोट मानते हैं ॥ १०३ ॥

अल्पे महति वा शब्दे स्फोटकालो न भिद्यते ।
परस्तु शब्दसंतानः प्रचयापचयात्मकः ॥ १०४ ॥

प्रत्येकार्थप्रकाशिका

अधुना प्राकृतवैकृतयोर्भेदं श्लोकद्वयेनाह - अल्प इति । अल्पे महति वा शब्दे = ध्वनौ - ध्वनेरल्पत्वे महत्त्वेऽपीति

आनन्दा

अथ श्लोकद्वयेन प्राकृतवैकृतयोः स्वरूपभेदमाह - अल्पे इति ।

अन्वयः - सरलः ।

व्याख्या - अल्पे = लघौ ह्रस्वे, महति = गुरौ दीर्घे प्लुते वा शब्दे = ध्वनौ सत्यपि तेन स्फोटकालो न भिद्यते = स्फोटस्य कालभेदो नास्ति । परः = स्फोटादन्यः तु शब्दसन्तानः = शब्दतरङ्गः प्रचयापचयात्मकः = वृद्धिह्रासस्वभावः, तत्कृतो हि स्थितिकालभेदप्रतिभास इत्यर्थः ।

विमर्शः - सिद्धान्ते नित्यशब्दवादे खलु प्राकृतध्वनिव्यतिरिक्तः प्राकृतध्वनिव्यङ्ग्य आन्तरो नित्यः शब्दः स्फोटः । स स्वतः कालभेदरहितोऽपि स्वाभिव्यञ्जकप्राकृतध्वनिधर्मं कालभेदमनुसरन् एकमात्रत्व-द्विमात्रत्व-त्रिमात्रत्वरूप-ह्रस्वदीर्घप्लुतकालभेदव्यवहारविषयो भवति, स्वतस्तु तस्य कश्चन कालभेदो नास्ति । प्राकृतध्वनिस्तु स्वकारण-स्थानकरणाभिघात-

---

सूर्यमाया

अनित्यशब्दवादी के मतानुसार स्फोट और ध्वनि का स्वरूप बताकर प्राकृत और वैकृत का स्वरूप बताते हैं - 'अल्पे' इत्यादि ।

अर्थ : - अल्पपरिमाणवाला शब्द - ह्रस्व हो या अधिकपरिमाणवाला शब्द-दीर्घ, प्लुत हो, स्फोट का कालभेद वस्तुतः नहीं होता है, परन्तु शब्द से जो शब्दान्तर उत्पन्न होते हैं, वे उपचय, अपचय - वृद्धि, ह्रास स्वभाव भेदवाले होते हैं ।

आशय : - शब्द दो प्रकार के हैं - कारणशब्द तथा कार्यशब्द । प्रथम - विवक्षाप्रयत्न के भेद से अल्प या अधिक मात्रा में उत्पन्न वायु के कण्ठ आदि

यावत्, स्फोटकालो न भिद्यते = न भिन्नो भवतीत्यर्थः । स्फोटस्य नित्यत्वादेकत्वाद् व्यापकत्वाच्च नादाल्पत्वमहत्त्व-कृताल्पत्वमहत्त्वे, इति यावत् ।

सामर्थ्यभेदाद् भवति कालभेदवान् । निमित्तस्य हि स्थानकरणाभिघातस्य यादृशं भवति सामर्थ्यम्, तादृश एव प्रचयापचयविशेषविशिष्टः प्राकृतध्वनि-र्ह्रस्वदीर्घादिस्वरूपभेदवानुपजायते । प्राकृतध्वनेर्जातो वैकृतः किलाल्पाधिक-स्थितिकालव्यापित्वाद् कालाल्पत्व-महत्त्वकृतं बाह्यं द्रुतादिवृत्तिभेदमेव जनयति, न तु प्राकृतध्वनिवत् स्वरूपभेदम् ।

यद्यपि शब्दस्य गुणत्वात् - द्रव्यवादे चामूर्तत्वात् नास्ति तस्याल्पत्वं महत्त्वं वा परिमाणम्, तथापि शशो यथा अल्पदेशव्यापित्वादल्पः - गजोऽधिकदेशव्यापित्वाद् महानुच्यते, तथा घण्टानादो भेरीनादो वा दूरदूरतरदेशव्यापित्वाद् महान् - लोहकंसशब्दस्तु समीपदेशव्यापित्वादल्पो व्यपदिश्यते, अत्र लोकप्रसिद्धिरेव मूलं नागमः । अनित्यशब्दपक्षे तु स्थानकरणाभिघातजः प्राथमिको ध्वनिः स्फोट उच्यते । तस्योत्पत्त्यनन्तरोत्तरक्षणे विनाशित्वाद् ह्रस्वदीर्घप्लुतानां सर्वेषामेकक्षणावस्थानात् कालभेदो यद्यपि

स्थानों में विलक्षण आघात प्रतिघात से जो अल्प परिमाणवाला ह्रस्व तथा अधिक परिमाण वाला दीर्घ - प्लुत वर्णरूप ध्वनि उत्पन्न होता है, उसको नित्यशब्दवादी वैयाकरण प्राकृत कहते हैं, अनित्यशब्दवादी नैयायिक स्फोट कहते हैं । दूसरा कार्यशब्द वह है, जो प्रथम उत्पन्न शब्द से तदनुरूप ही शब्दान्तर उत्पन्न होता हुआ शब्द का सन्तानरूप हो जाता है, उसको वैयाकरण वैकृतनामक ध्वनि कहते हैं, नैयायिक साधारणतया ध्वनि कहते हैं । यह स्वस्थ, बलवान् या रुग्ण, दुर्बल-भयभीत या निर्भय व्यक्ति के 'ऊँचे-नीचे, जल्दी-धीरे' उच्चारणभेद से तथा घण्टा, नगाड़े आदि की चोट या लोहा-काँसे की चोट से उत्पन्न ध्वनि के भेद से - ह्रास के कारण समीप-कम दूरी तक पहुँचने से अल्पपरिमाणवाला अथवा परिपुष्ट बलशाली होने के कारण दूर दूर तक पहुँचने से महत्परिमाणवाला होता है । जिससे इसके द्रुत, मध्य, विलम्बित वृत्तिभेद होते हैं । वस्तुतः शब्द स्वयं गुण माना गया है, गुण का गुण नहीं होता, अथवा द्रव्य माननेवालों के मत में

ध्वनि र्द्विविधः - आद्य उत्तरोत्तरशब्दानां कारणम्, स एव प्राकृत इत्युच्यते । अस्य यादृशसामर्थ्यं तादृश एव उत्तरोत्तरशब्दोऽल्पो महान् वा उत्पद्यते, स एव प्राकृतः । अत

नास्ति, तथापि प्राथमिकध्वनिरूपात् स्फोटाज्जातानां सन्तानरूपाणां परवर्तिनां ध्वनीनां प्रचयापचयवत्त्वाद् यः कालभेदः, स प्राथमिकध्वनिरूपे स्फोटे समारोप्यमाणो लोके व्यवह्रियते, इति कार्यशब्दवादेऽपि प्राकृतवैकृतयोः स्वरूपभेदः स्पष्टः । इदं तु बोध्यम् - यथा शशगजयोः परिमाणभेदेऽपि तयोर्ज्ञाने नास्ति कश्चन कालभेदस्तथा कारणशब्दानां प्राकृतानां तत्कार्याणां च वैकृतध्वनीनां तृतीयक्षणे विनाशित्वादुत्पत्तिद्वितीयक्षणमात्रेऽवस्थिति-सत्त्वात्तेषां परिमाणभेदेऽपि स्थितौ ज्ञाने वा नास्ति कालभेदः, किन्तु विवक्षा-प्रयत्नभेदकृतवाय्वभिघातप्रचयापचयनिमित्तभेदकृतस्तत्कार्ये ध्वनावपि नूनमस्ति प्रचयापचयस्वभावभेदः । तत्र वाय्वभिघातकारणसामर्थ्यभेदाद् यथा ह्रस्वादयो भेदा अल्पत्वमहत्त्वविशिष्टा जायन्ते, तथा द्रुतादिवृत्तयोऽपि तदनुरूपा एव जायन्ते । द्रुतत्वादिकं यथा बाह्यम्, तथा वस्तुतो ह्रस्वत्वादिकमपि बाह्यं समानम् । अत एव ह्रस्वत्वादिजनकप्रयत्नानां बाह्येषु परिगणनात् सवर्णसंज्ञासूत्रे

भी शब्द अमूर्त है, इससे भी उसका परिमाण गुण नहीं होता, मूर्तवस्तु का ही परिमाण होता है । परन्तु लोकप्रसिद्धि के अनुसार शब्द का अल्प या महत् परिमाण संमत है ।

नित्य शब्द पक्ष में - कण्ठ आदि स्थानों में प्रयत्नजन्य वायु के अभिघात से प्रथम उत्पन्न प्राकृतध्वनि नित्यशब्द 'स्फोट' का अभिव्यञ्जक माना गया है, वह अल्पत्व, महत्त्व परिमाणभेद से एकमात्रा - द्विमात्रा आदि कालभेदरूप ह्रस्व-दीर्घ आदि भेदवाला होता है, जो कि व्यङ्ग्य स्फोट में प्रतिविम्बित होकर स्फोट में प्रतीत होता है, वस्तुतः स्फोट का कालभेद नहीं है ।

स्फोट की अभिव्यक्ति के पश्चात् प्राकृतध्वनि से कुछ समय तक अनवरत उत्पन्न होते हुए उसका सन्तानरूप जो दूसरे ध्वनि होते हैं, वे समीपदेश अथवा दूरदेश तक पहुँचने वाले - प्राकृत का कार्य वैकृत ध्वनि हैं, जिनका अल्प महत् परिमाणभेद से द्रुत आदि वृत्तिभेद होते हैं, ये भेद स्फोट की अभिव्यक्ति के अनन्तर होने से स्फोट में आरोपित नहीं होते ।

एव भेरीदण्डाभिघातजशब्दो दूरं गच्छति, लोहकंसाभिघातजस्तु समीपदेशमेवेति वृत्तिभेदः ।

परस्तु = इतरः ध्वनिरूपः शब्दसंतानः = प्राकृतवैकृतः प्रचयापचयात्मकः = अल्पत्वमहत्त्वादिविशिष्टः ॥ १०४ ॥

आस्यविशेषणेन व्यावर्तनात् कालभेदो न सवर्णसंज्ञायां भवति बाधकः, इति ''अइउण्'' सूत्रे भाष्ये स्पष्टम् ।

एवं हि ह्रस्वत्वादे र्द्रुतत्वादिवद् बाह्यत्वस्य तुल्यत्वेऽपि तपरसूत्रे समकालस्य ग्रहणनियमेन भिन्नकालस्य व्यावर्त्यत्वसिद्धये उत्पत्तिप्राग्भावित्वेन तस्य प्राकृतधर्मत्वं स्वीकृत्य स्फोटभेदकत्वं मन्यते, न तु वैकृतधर्मस्य द्रुतत्वादेरित्यस्ति विशेषः, तस्य प्राकृतकार्यत्वेन प्राकृतोत्पत्तेः पश्चाद्भावित्वात् । प्राकृतवैकृतयो र्विविक्तमिदं स्वरूपं प्राग् वर्णितमप्यनित्यशब्दवादिभिर्यथामति प्रकारभेदेन निरूप्यते, तदिति सूचयितुमिह प्रपञ्चितम् ॥ १०४ ॥

अनित्य शब्द पक्ष में - स्थान-करणों के अभिघात से प्रथम उत्पन्न ध्वनि ही अर्थ का वाचक स्फोट है, जो कि अपने कारणों के सामर्थ्यभेद से उपचय-अपचय स्वभावभेद के कारण ह्रस्व आदि भेदवाला होता है । उसकी प्रथमक्षण में उत्पत्ति, द्वितीयक्षण में स्थिति तथा तृतीयक्षण में नाश होने से ह्रस्व आदि सभी भेद क्षणमात्र स्थायी होने से उनका यद्यपि कोई कालभेद नहीं होता, किन्तु उस प्राथमिक शब्द से अन्यान्य शब्द कुछ काल तक निरन्तर उत्पन्न होते हुए श्रोताओं के कानों तक पहुँचते हैं, उनका जो उपचय, अपचय स्वभाव भेद है, वह प्रथम उत्पन्न ध्वनिरूप स्फोट में आरोपित व व्यवहृत होता है । यह वैकृत ध्वनि दूर पहुँचने तक क्षयशील होने से क्रमशः वर्ण अस्फुट हो जाने से केवल ध्वनि शब्द से व्यवहृत होता है ।

इस प्रकार अनित्य शब्द पक्ष में प्राथमिक प्राकृत शब्द को ही स्फोट मानकर प्राकृत और वैकृत द्विविध शब्दस्वरूप अभिमत हैं ॥ १०४ ॥

दूरात् प्रभेव दीपस्य ध्वनिमात्रन्तु लक्ष्यते ।
घण्टादीनां च शब्देषु व्यक्तो भेदः स दृश्यते ॥ १०५ ॥

प्रत्येकार्थप्रकाशिका

अन्यमतमाह - दूरादिति । दीपस्य प्रभा इव = यथा एक एवालोकः दूरादपि, तथा ध्वनिमात्रम् = एक एव नादो लक्ष्यते । एवञ्च प्राकृत एव वैकृत इति मतान्तरम् ।

आनन्दा

अनित्यशब्दवादिनां नये स्फोटरूपत्वेन ध्वनिरूपत्वेनाभिमतयोः प्राकृतवैकृतयोः 'यः संयोगवियोगाभ्याम्' इत्यादिना भेदपक्षमुक्त्वा सम्प्रति केषांचिदनित्यवादिनामेव नये पूर्वविपरीतम् - 'स्फोटनादौ - अभिन्नौ सहजत्वात् प्रदीपप्रभावत्' इति तयोरभेदसाधनं प्रक्षिपन् घण्टादिनाददृष्टान्तेन भेदपक्षं द्रढयति - दूरादिति ।

अन्वयः - दीपस्य प्रभा इव दूरात् ध्वनिमात्रम् तु लक्ष्यते, घण्टादीनां च शब्देषु स भेदः व्यक्तः दृश्यते ।

व्याख्या - दीपस्य प्रभा इव = आलोक इव दूरात् = दूरदेशात् ध्वनिमात्रम्= केवलो ध्वनिरेव तु लक्ष्यते, न तु भिन्नः कश्चित्। यथा दूरात् दीपस्य

सूर्यमाया

अनित्य शब्दवाद में ही पूर्वकथन के विपरीत प्राकृत, वैकृत का अभेदवादी किसी का मत निरस्त कर उनका भेद प्रमाणित करते हैं - 'दूरात्' इत्यादि ।

अर्थ : - दीप की प्रभा के समान दूर से यद्यपि एक ही ध्वनि पाया जाता है, किन्तु घण्टा, काँसे आदि के शब्दों में जो परस्पर भेद है, वह स्पष्ट पाया जाता है । अर्थात् प्रभा के समान आदि से अन्त तक ध्वनि एक नहीं माना जा सकता । समीप से दीप और प्रभा का भी भेद स्पष्ट पाया जाता है, भले ही दूर से एक प्रतीत होवे । अतः प्रभा दृष्टान्त से भी प्राकृत और वैकृत का अभेद नहीं सिद्ध हो सकता है ।

उभयभेदवादिमतेनाह - घण्टेति । घण्टादीनाम् = घण्टालोहकंसानाम् शब्देषु = ध्वनिषु स भेदः = कश्चित्

प्रभामात्रं दृश्यते, न तु ततो भिन्नो दीपः, तथा दूरात् ध्वनिरेवैकः श्रूयते, न तु ततो भिन्नः कश्चित् शब्दविशेषः। यथा प्रभया समनुगत एव प्रदीप उपलभ्यते, न तु तद्व्यतिरेकेणातः प्रदीपप्रभयोरभेद एव, तथा ध्वनिना समनुगत एव स्फोट उपलभ्यते, न तु तद्व्यतिरेकेण, तस्मात् ध्वनिस्फोटयोरभेद एव सिध्यति । तथा चानुमानप्रयोगः - ''ध्वनिस्फोटौ अभिन्नौ सहोत्पद्यमानत्वाद्, ध्वनिव्यतिरेकेणानुपलब्धेश्च प्रदीपप्रभावत्'' इति । परमिदं न सम्यक् - घण्टादीनाम् = घण्टानाम्, आदिना लोहकंसभेरीमृदङ्गानां शब्देषु = नादेषु स भेदः = कश्चिन् महान् दूरदेशव्यापी - कश्चित्तु समीपदेशमात्रव्यापी स्वल्पः, किंच प्रथमजस्तत्र तारतरः, द्वितीयादिस्तु क्रमशोऽपचीयमानः कियन्तं देशं गत्वा विरमति, परं देशं न गच्छति, इति भेदः व्यक्तो दृश्यते । तस्मात् स्फोटनादयोः प्राकृतवैकृतयोर्वा भेद एव सिद्धान्तः ।

विमर्शः - उपचितो घनशिखः ज्वालामाली तेजोविशेषः प्रदीपः स्वसन्निकृष्टान् तृणपिपीलिकादीन् दग्धुं क्षमोऽपि, तेन सह जायमानस्तदा-

---

आशय : - दीप की बत्ती लेशने पर दीपक की ज्वाला का प्रभा के साथ ही जन्म होता है, अतः दीपक से प्रभा का भेद नहीं है, दीपक का अभिन्नस्वरूप ही प्रभा अर्थात् आलोक है । क्योंकि कहीं भी प्रभा के विना दीपक नहीं पाया जाता है । प्रभा ही दूर तक फैलकर वस्तु को प्रकाशित करती है, दूर से केवल प्रभा ही दीखती है, उससे भिन्न दीपक नहीं । इसी प्रकार प्राकृत ध्वनि सदा वैकृत ध्वनि से अनुगत रहता है, प्राकृत के अनुरूप ही वैकृत होता है, जो कि दूर तक फैल कर श्रोताओं से सुना जाता है, अतः प्राकृत और वैकृत का परस्पर भेद नहीं है । ऐसा प्रभादृष्टान्त से प्राकृत और वैकृत का अभेद साधन करनेवाले किसी अनित्यशब्दवादी का ही मतान्तर है, जो कि तर्क संगत नहीं है ।

दूरगामी कश्चित् समीपगामीति भेदः व्यक्तः = स्पष्टो दृश्यते। अनेनैव दृष्टान्तेन सर्वत्र वर्णाद्युत्पत्तिस्थले प्राकृतवैकृतनादौ मन्तव्याविति ध्येयम्।

श्रितस्तदनुगतोऽपचीयमानः प्रततो विरलावयवः प्रभारूप आलोको दूरदूरतरं देशं व्याप्नुवन् स्वसंनिकृष्टान् प्रकाशयति केवलं, न तु दहति। सत्यप्यस्मिन् तयोः कार्यभेदे कारणभेदस्यापि नान्तरीयकत्वात् स्पष्ट एव प्रदीपप्रभयोर्भेदः, किन्तु तयोः सहोत्पद्यमानत्वात् प्रभयाऽनुगतस्यैव प्रदीपस्योपलभ्यमानत्वाच्चाविवेकिभिः स्थूलदृग्भिर्दूरात् सूक्ष्मभेदस्यानाकलनात् प्रकाशकत्वसाधारण्यादालोकमात्रं प्रभारूपेणैकत्वेनाध्यवसीयते, न तु ततः पृथक् ज्वालामयः प्रदीपः। अन्तिकादपि नावसीयते तयोर्विवेकः, किमुत दूरात्। यथा चम्पकमल्लिकादिगन्धद्रव्याधिवासिततिलनारिकेलादिनिष्पीडनसमुद्भूतं तैलमुत्पत्तिकाल एव पुष्पगन्धसमवेतं गन्धान्न विविच्यते, एकत्वेन

यहाँ शब्द स्थल में अत्यन्त भिन्न प्रभादृष्टान्त सिद्धान्तसंमत नहीं है, प्रकृत में घण्टा आदि का शब्द ही युक्तिसंगत दृष्टान्त है। जिससे प्राकृत और वैकृत का भेद सिद्ध होता है। घण्टा, लोहा, काँसा आदि का शब्द कोई दूर दूर तक जाता है, तो कोई समीप तक ही जा पाता है; साथ ही उनका पहला शब्द ऊँचा होता है, पश्चात् के शब्द क्रमशः क्षीण होते हुए मन्द हो जाते हैं तथा कुछ दूर तक जाकर समाप्त हो जाते हैं, यह भेद स्पष्ट लक्षित होता है। ऐसे ही स्थान-करणों के अभिघात से उत्पन्न प्रथम प्राकृत शब्द तथा उसके पश्चात् होनेवाला वैकृत शब्द जो कि प्राकृत का ही कार्य है, उनका भेद स्पष्ट है। प्राकृत पूर्व उत्पन्न होता है, उसके उत्तर वैकृत होता है, तभी तो इनका कार्यकारणभाव है। अत एव प्राकृत और वैकृत के अभेदसाधन में प्रभादृष्टान्त कथमपि सम्भव नहीं है, समसामयिक होने से प्रदीप और प्रभा का अभेद कथंचित् मान भी लिया जाय, किन्तु उसका साम्य - भिन्नकालिक प्राकृत व वैकृत से संगत नहीं। वस्तुतः प्रदीप और प्रभा का भी भेद स्पष्ट है। दूर से भले

पूर्वदृष्टान्तस्तु शब्दस्थलातिरिक्तस्थलीयत्वान्न सिद्धान्त-संमत इति भावः ॥ १०५ ॥

चाध्यवसीयमानं सुगन्धितैलमित्युच्यते, तथा दूरदेशव्यापिना वैकृतेन ध्वनिना सहोत्पद्यमानस्तेनानुगम्यमानश्च प्राकृतो ध्वनि वैंकृतादविविक्त एकत्वेनाध्यवसीयतां नाम कैश्चिदनित्यवादिभिः किं तेन ? वस्तुतो न तयोरभेदः, घण्टादीनां नादेषु तारमन्दादितारतम्येन व्यक्तभेदस्योपलम्भवत् प्राकृतवैकृतयोरपि भेदस्य स्पष्टत्वात् ।

इदं तु बोध्यम् - प्रदीपप्रभाया घण्टादिशब्दानां च दूरदेशव्यापित्वस्य तुल्यत्वेऽपि नात्र प्रदीपप्रभादृष्टान्तः प्राकृतवैकृतयोरभेदसाधनाय क्षमः, सव्येतर-विषाणयोरिव सहोत्पद्यमानयोः परस्परं कार्यकारणभावविरहिणोः प्रभाप्रदीपयोः, पौर्वापर्यनियमेन कार्यकारणभावं गाहमानाभ्यां प्राकृतवैकृताभ्यामत्यन्तवैषम्यस्य जागरूकत्वादित्यवधेयम् । तस्मात् शब्दस्थले परमसादृश्यं भजमानस्य घण्टादिनादस्यैव प्राकृतवैकृतयो र्भेदसाधने दृष्टान्तत्वं सुस्थम् ॥ १०५ ॥

ही एक प्रभा के रूप में ही दीप पाया जाय, किन्तु समीप पहुँचने पर ज्वालाशिखारूप घनप्रकाश दीप लक्षित होता है, जो कि दाहक होता है, अपने सन्निकृष्ट तृण, पतङ्ग आदि को जला देता है, किन्तु उसका आलोक ज्वाला से कुछ दूर तक फैलकर वस्तु को प्रकाशित मात्र करता है, जलाता नहीं । अतः वस्तुतः दीप और प्रभा का भी अभेद न होने से प्रभादृष्टान्त से भी प्राकृत और वैकृत का अभेदसाधन युक्त नहीं है ॥ १०५ ॥

द्रव्याभिघातात् प्रचितौ भिन्नौ दीर्घप्लुतावपि ।
कम्पे तूपरते जाता नादा वृत्ते र्विशेषकाः ॥ १०६ ॥

प्रत्येकार्थप्रकाशिका

प्राकृतवैकृतयोः कार्यविशेषमाह - द्रव्येति । द्रव्यैरभिघातस्तस्मात् प्रचितौ = विवृद्धौ, भिन्नौ = परस्परभिन्नौ दीर्घप्लुतौ भवत इति शेषः । तत्तत्स्थानेषु यादृशोऽभिघातो भवति,

---

आनन्दा

अनन्तरपूर्वश्लोकद्वयेन प्राकृतवैकृतयोः स्वरूपभेदमुक्त्वाऽधुना तयोः कार्यभेदादपि भेदमाह - द्रव्याभिघातादिति ।

अन्वयः - सरलः ।

व्याख्या - द्रव्याभिघातात् = द्रव्यैः स्थानकरणै र्विवक्षाप्रयत्नजनितवायोर्वेगवत्संयोगरूपाभिघातप्रचयात् उच्चावचाभिघातात् दीर्घप्लुतौ अपि प्रचितौ= लघुगुरुगुरुतरतारतम्येन न्यूनाधिकरूपेणोपचयं प्राप्तौ उच्चावचौ भिन्नौ भवतः । अपिशब्दः कारणस्याभिघातस्य प्रचयरूपं सामर्थ्यभेदं द्योतयति ।

सूर्यमाया

पूर्व में प्राकृत और वैकृत ध्वनि का स्वरूपभेद बताकर अब उनका कार्यभेद बताते हैं - 'द्रव्याभिघाताद्' इत्यादि ।

अर्थ : - कण्ठ आदि स्थानों में प्रयत्नप्रेरित वायु के उत्तरोत्तर बलवान् अभिघात से तदनुरूप उत्पन्न - प्राकृतनाद के उपचय - अपचय भेद से एक दूसरे से अधिक उपचित - दीर्घ और प्लुत वर्ण परस्पर भिन्न हो जाते हैं । किन्तु जब प्राकृतनादरूप ह्रस्व, दीर्घ आदि वर्ण का स्वरूप पूरा हो जाने से उसका जनक - 'वायुपरिस्पन्दनरूप' कम्पन समाप्त हो जाता है, तब प्राकृतनाद से दूसरा जो वैकृतनाद उत्पन्न होता है, वह वृत्ति के द्रुत-मध्य आदि भेद का जनक होता है ।

तादृशः प्राकृतो नादः । एवं च लघुरूपाभिघातश्चेत्तदा ह्रस्वः, उच्चैरभिघाताद् दीर्घः, उच्चैस्तरात् प्लुतश्च भवति - इत्ययं प्राकृतधर्मः ।

अभिघातप्रचयसामर्थ्यभेदात् तत्कार्यस्य प्राकृतनादस्य भेदः, तत्कृतश्च दीर्घप्लुतादिभेद इत्यर्थः । कम्पे = वर्णस्वरूपलाभपर्यन्तं जायमाने वर्णजनकवायोः परिस्पन्दानुगते कम्पे तु उपरते = विरते सति जाताः = प्राकृतादुत्पन्नाः नादाः = वैकृता ध्वनयः वृत्तेः = द्रुतादेः विशेषकाः= भेदजनकाः भवन्ति, न तु स्फोटस्येत्यर्थः ।

विमर्श : - विवक्षाप्रयत्नप्रेरितवायो स्तत्तत्स्थानेष्वभिघातस्य प्रचयबलाद् वर्णस्वरूपप्राप्तिपर्यन्तं परिस्पन्दानुगतः कम्पः प्रवर्तते, ततश्च ते ते ह्रस्वदीर्घादयो वर्णा यथास्वं प्रस्फुटा भवन्ति, स हि स्थानकरणा-भिघातप्रचयभेदाज्जायमानो दीर्घप्लुतादिभेदहेतुः प्राकृतो नादः । वर्णस्वरूपलाभे सति कम्पो विरतो भवति, तदनन्तरं प्राकृतान्नादाद् वैकृतो नाद उत्पद्यते, स द्रुतादिवृत्तिभेदस्य प्रयोजकः ।

आशय : - वक्ता लघु या गुरु जैसा जो वर्ण बोलना चहता है उसके अनुरूप ही उच्चारण का प्रयत्न करता है । ह्रस्ववर्ण के उच्चारण में विवक्षा प्रयत्न जनित वायु का कण्ठ आदि स्थान में लघु अभिघात करता है, दीर्घ के उच्चारण में ह्रस्व की अपेक्षा द्विगुण अभिघात करता है, तथा प्लुत के उच्चारण में त्रिगुण अभिघात करता है, इस प्रकार स्थानकरणों में वायु के अभिघात की मात्रा के उपचय के अनुरूप ह्रस्व, दीर्घ, प्लुत वर्णों के रूप में प्राकृतनाद का जन्म होता है । जब तक विवक्षित वर्ण का स्वरूप पूर्ण नहीं होता, तब तक स्थान व करणों के संघर्ष से वायु का वर्ण के व्यक्तरूप ग्रहण के अनुरूप कम्पन अविरत बना रहता है, किन्तु वर्ण का स्वरूप स्फुट होने पर वह कम्पन विरत हो जाता है । अर्थात् स्थानकरणों में अभिघात के प्रचय से वायु के स्पन्दन व कम्पन के

कम्पे = वायुना तत्तत्स्थानेषु अभिघाताद् उभयोः परस्परं संघर्षस्ततश्च वर्णादिप्रस्पन्दनानुगतः कम्पो भवति, तस्मिन् उपरते तु = निवृत्ते तु जाताः = उत्पन्ना नादाः = वैकृताख्याः प्राकृतज़्ध्वनयः वृत्तेः = द्रुतादेः विशेषकाः = परिचायकाः, इति ॥ १०६ ॥

इत्थं चाभिघातप्रचयात् प्रचितः प्राकृतो नादो दीर्घप्लुतादिभेदे हेतुः, तदनन्तरं जायमानो नादजो वैकृतो नादस्तु द्रुतादिवृत्तिभेदहेतुरिति कार्यभेदादपि प्राकृतवैकृतयोर्भेद इति सारः । प्राकृतस्य ह्रस्वादिभेदः स्फोटेऽपि कल्प्यते, वैकृतस्य द्रुतादिभेदस्तु स्फोटे न कल्प्यते इति विवेकः ।। तदुक्तं प्राक् - ''प्राकृतस्य ध्वनेः कालः शब्दस्य'' इति, ''शब्दस्योर्ध्वमभिव्यक्ते''-रिति च ।। १०६ ।।

सातत्य में वर्णरूप प्राकृतनाद का जन्म होता है, तत्पश्चात् वह कम्पन उपरत हो जाता है ।

वर्णरूप के ग्रहण में समर्थ उस कम्पन का विराम होने पर प्राकृतनाद से जो दूसरे नाद उत्पन्न होते हैं, वे वैकृतनामक नाद हैं, जो कि केवल वर्ण के चिर वा अचिर काल तक स्थितिरूप द्रुत-मध्य आदि वृत्तिभेद के जनक होते हैं।

सारांश में - स्थान-करणों में अभिघात के बलाबल के अनुरूप वायु के परिस्पन्द व कम्प के सातत्य में जो प्राकृतनाद उत्पन्न होता है, वह ह्रस्व-दीर्घ आदि वर्णभेद का कारण है, जो कि नित्यशब्द पक्ष में व्यङ्ग्य शब्द में भासित होता है तथा प्राकृतनाद से उत्पन्न वैकृतनाद है, जो कि वर्णों की चिर अचिर काल तक स्थितिरूप वृत्ति के द्रुत आदि भेद का कारण है । इस प्रकार कार्यभेद से भी प्राकृत और वैकृत का परस्पर भेद है ।। १०६ ।।

अनवस्थितकम्पेऽपि करणे ध्वनयोऽपरे ।
स्फोटादेवोपजायन्ते ज्वाला ज्वालान्तरादिव ॥ १०७ ॥

प्रत्येकार्थप्रकाशिका

तत्रैव मतभेदमाह - अनवस्थितेति । अपरे ध्वनयः = वैकृताख्याः करणे = ताल्वादौ स्फोटादेव = प्रथमनादादेव न

आनन्दा

कम्पे तूपरते वैकृताख्यो द्वितीयो नादो जायते, इति प्रागुक्तम्, इदानीं तद्विषये मतान्तरमुच्यते - अनवस्थितेति ।

अन्वयः - अपरे ध्वनयः करणे अनवस्थितकम्पे अपि ज्वालान्तराद् ज्वाला इव स्फोटाद् एव उपजायन्ते ।

व्याख्या - अपरे = प्राकृताद् भिन्ना ध्वनयः = वैकृता नादाः करणे = तालुजिह्वादौ अनवस्थितकम्पे अपि = अनवस्थितः - कारणत्वेन न नियतः कम्पो यस्मिन् तस्मिन् - अनुपरतकम्पेऽपि कारणत्वेनाननुवर्तमानकम्पे, ज्वालान्तरात् = इन्धनाग्नेः प्रथमज्वालातः ज्वालाः इव = उत्तरोत्तर-प्रवर्धमानज्वालासन्तानपरम्परा इव स्फोटात् = 'अनित्यवादे वाचकत्वेन संमतात् - नित्यवादे तु स्फोटानुग्राहकात्' प्रथमनादात् प्राकृताद् एव

सूर्यमाया

कम्प के उपरत होने पर वैकृत की उत्पत्ति होती है - इस पूर्वोक्त मत के विपरीत कम्प के अनुपरत काल में वैकृत की उत्पत्ति का अग्नि की ज्वाला दृष्टान्त से साधन करते हैं - 'अनवस्थित' इत्यादि ।

अर्थ : - प्राकृत से भिन्न वैकृत ध्वनियाँ कारण रूप में कम्प के व्यवस्थित न रहने पर भी कण्ठ, तालु आदि स्थान रूप करण में अग्नि की प्रथमज्वाला से दूसरी ज्वाला के जन्म के समान स्फोट से - अर्थात् अनित्यवादी-संमत वाचकशब्द - 'प्राकृत ध्वनि' से ही जन्म लेते हैं, कम्प से नहीं ।

अवस्थितः कम्पः = नानुवर्तमानकम्प इत्यर्थः, तस्मिन् - अकम्पे उपजायन्ते = उत्पद्यन्ते, ज्वालान्तरादिव = यथा इन्धनाश्रित-

---

उपजायन्ते, न कम्पात् । एवकारेण प्राकृतकारणस्य कम्पस्य व्यवच्छेदः ।

विमर्शः - अनित्यशब्दवादे प्राकृत एवार्थवाचकत्वात् स्फोटो मन्यते, नित्यशब्दवादे तु प्राकृतादतिरिक्तः स्फोटः, तस्यानुग्राहकः प्राकृत इति वाचकशब्दविषये तयोरस्ति वैमत्यम्, किन्तु वायोः परिस्पन्दानुगते कम्पेऽनुवर्तमाने एव स्थानकरणाभिघातात् प्राकृत उत्पद्यते, प्राकृताच्च वैकृत इत्यत्र नास्ति तयोर्वैमत्यम् । एवं च - 'कम्पे तूपरते जाता नादा वृत्तेर्विशेषकाः' इत्युक्तिर्न युज्यते । कम्पे उपरते प्राकृतस्याप्युपरामेऽविद्यमानात् प्राकृताद् वैकृतस्योत्पत्तेर्दुर्घटत्वात् । तस्मादनुपरते एव कम्पे वैकृतस्याप्युत्पत्तिरभ्युपगम्यताम्, किन्तु वैकृतोत्पत्तौ प्राकृतस्यैव कारणत्वं न तु कम्पस्य, कम्पकार्यात् प्राकृतादेव वैकृतोत्पत्तेः क्लृप्तत्वात् । प्राकृतमुत्पाद्य कृतार्थः क्षीणबलश्च कम्पोऽनुपरतोऽपि वैकृतोत्पत्तौ तत्सत्ताया अनपेक्षणादनवस्थितः स न भवति कारणम्, अवश्यनियतपूर्ववर्तिनः प्राकृतादेव तस्योत्पत्तौ 'जनकं प्रति पूर्ववृत्तितामपरिज्ञाय न यस्य गृह्यते' इति नयेन तस्यान्यथासिद्धत्वात् ।

तस्मादनुपरतेऽपि कम्पे प्राकृताद् वैकृतोत्पत्तिः स्वीक्रियताम् । यथा काष्ठस्य दीपवर्तिकाया वा सन्दीपने कृते जायमाना प्रथमा ज्वाला ज्वालान्तरमुत्पादयति, साप्यन्यामित्येवं ज्वालासन्तानपरम्परा संजायते, तथा

आशय : - कण्ठ, तालु आदि स्थानों में आहत वायु का परिस्पन्दरूप कम्पविशेष से सर्वप्रथम उत्पन्न होनेवाला प्राकृत ध्वनि है, जिसका साक्षात् जनक कम्प होता है, वायु का कम्पविशेष ही वर्णरूप में परिणत होता है । उस कम्प की कारणरूप में अपेक्षा किये विना पूर्व उत्पन्न प्राकृतध्वनि से ही वैकृतध्वनि साक्षात् जन्म लेता है, अतः वैकृतध्वनि का कारण प्राकृत ही होता है, कम्प

प्रथमज्वालातः ज्वाला = सकम्पा द्वितीया ज्वाला ऊर्ध्वं विवर्धते-अर्थात् प्रकाशयति, तथैव प्रथमनादाद् उत्पन्नाः कम्पानुवर्तमाना वैकृताख्या द्वितीया नादा ऊर्ध्वं विवर्धन्ते द्रुतादीन् प्रकाशयन्ति, इति भावः ॥ १०७ ॥

कम्पादनुवर्तमानात् प्राकृतः प्राकृताच्च वैकृतः संजायते ध्वनिपरम्परा । तत्र प्राकृतो ह्रस्वदीर्घादिभेदे हेतुः, वैकृतस्तु द्रुतादिवृत्तिभेदे, इति विवेकः ।

इदं तु बोध्यम् - यथा मूसानिषक्तद्रुतताम्रादीनां तत्तदाकारतोपग्रहयोग्यता, तथा तत्तत्स्थानकरणाभिहतवायूनां तत्तद्वर्णाकारतोपग्रहयोग्यताशाली परिस्पन्दविशेष एवात्र कम्पपदार्थः, योऽव्यवहितोत्तरक्षणे प्राकृतध्वनिरूपेण परिणमते, न तु जिह्वादिकरणचलनमात्रमत्र कम्पः, तस्य वैकृतेऽप्यविशेषात् । वायोः शब्दत्वापत्तिमनन्तरमेवाग्रे वक्ष्यति - 'वायोरणूनां ज्ञानस्य' इति ॥ १०७ ॥

नहीं । भले ही कम्प की भी पूर्वसत्ता हो, परन्तु वह कारणरूप में व्यवस्थित व नियत नहीं होता । एतावता वैकृत के जन्म से पहले कम्प का सर्वथा उपराम व अभाव नहीं सिद्ध हो जाता । जबकि कम्प के अनुवर्तमान में ही प्राकृत का जन्म तथा प्राकृत के पूर्व सद्भाव में ही वैकृत का जन्म होता है, ऐसी स्थिति में अन्यथासिद्ध होने से कम्प भले ही कारण न माना जाय, परन्तु वैकृत से पूर्व कम्प का अत्यन्ताभव नहीं माना जा सकता है । अतः पूर्वोक्त 'कम्पे तूपरते' यह पक्ष समुचित नहीं है ॥ १०७ ॥

वायोरणूनां ज्ञानस्य शब्दत्वापत्तिरिष्यते ।
कैश्चिद्दर्शनभेदो हि प्रवादेष्वनवस्थितिः ॥ १०८ ॥

प्रत्येकार्थप्रकाशिका

इतः शब्दस्वरूपे मतभेदानाह - वायोरिति । कैश्चित् = आचार्य्यैः वायोः शब्दत्वापत्तिः = शब्दत्वम्, वायुरेव शब्द इति यावत्, अणूनां वा ज्ञानस्य वा = अणव एव शब्दाः,

---

आनन्दा

अथ कारणभेदेन वैखरीशब्दस्य स्वरूपविषयकं मतभेदमाह - वायोरिति ।

अन्वयः - कैश्चित् वायोः शब्दत्वापत्तिः इष्यते, कैश्चित् अणूनां शब्दत्वापत्तिः इष्यते, कैश्चित् ज्ञानस्य शब्दत्वापत्तिः इष्यते । हि प्रवादेषु अनवस्थितिः, अतो दर्शनभेदः ।

व्याख्या - कैश्चित् वायोः = प्राणादेः शब्दत्वापत्तिः = शब्दभावेन परिणाम इष्यते, कैश्चित् अणूनाम् = सूक्ष्मशब्दानां स्थूलशब्दत्वापत्तिरिष्यते, कैश्चित् ज्ञानस्य = वक्तृबुद्धेः शब्दत्वापत्तिरिष्यते । परिणामपरिणामिनोरभेदात् प्रथममते वायुरेव शब्दः, द्वितीयमते परमाणुतुल्यसूक्ष्मशब्दा एव स्थूलत्वमापन्नाः शब्दाः, तृतीयमते ज्ञानमेव विवर्तमानं शब्दः, इति कारणभेदेन

सूर्यमाया

कारणविषयक मतभेद से वैखरीशब्द के स्वरूप विषय में तीन मतों का निर्देश करते हैं - 'वायोरणूनाम्' इत्यादि ।

अर्थ : - कोई आचार्य शब्द को वायु का परिणाम मानते हैं, कोई अणु का परिणाम मानते हैं, कोई ज्ञान का परिणाम मानते हैं । किसी के मन्तव्य विशेष में कोई स्थिरता व सीमा नियत न होने से दर्शनों का यह मतभेद है ।

ज्ञानमेव वा, इत्यादि इष्यते = मन्यते, हि = यतः प्रवादेषु = प्रवचनेषु अनवस्थितिः = प्रत्येकं रुचीनां भिन्नत्वात् इयत्ता नास्ति, अतः दर्शनभेद इति ॥ १०८ ॥

शब्दस्वरूपविषयको दर्शनभेदः = मतभेदः । तत्र बीजमाह–हि = यस्मात् प्रवादेषु = मतविशेषेषु अनवस्थितिः = नास्ति सीमानिर्धारणम् – प्रतिप्रवक्तृ मतिवैचित्र्येण तेषां वचनेषु नास्ति नैयत्यम्, तस्माद् दर्शनभेदः = दर्शनानां प्रतिपाद्यभेदः ।

तदुक्तम् –

"श्रुतिर्विभिन्ना स्मृतयो विभिन्ना
नैको मुनिर्यस्य मतं न भिन्नम्" इति ।

तदेतन्मतत्रयं यथाक्रममग्रे स्फुटीकरिष्यते ॥ १०८ ॥

आशय : – उपादानकारण और कार्य का अभेद होने से जिनके मत में वैखरी शब्द का कारण वक्ता का प्राणवायु है – उनके मत में शब्द – वायुस्वरूप है, जिनके मत में शब्द का कारण अणुरूप सूक्ष्मशब्द है – उनके मत में शब्द अणुरूप है, जिनके मत में शब्द का कारण वक्ता का ज्ञान है – उनके मत में शब्द ज्ञानरूप है । ये मतभेद प्रवक्ता की अपनी अपनी अभिरुचि के विकल्पमूलक हैं, जिसकी कोई सीमा नहीं । यहाँ सामान्यतः मतभेदों का निर्देशमात्र किया है । विशेषरूप में ये तीनों मत आगे क्रमशः विशद बताये जायेंगें ॥ १०८ ॥

लब्धक्रियः प्रयत्नेन वक्तुरिच्छानुवर्तिना ।
स्थानेष्वभिहतो वायुः शब्दत्वं प्रतिपद्यते ॥ १०९ ॥

प्रत्येकार्थप्रकाशिका

सामान्येन मतभेदानुक्त्वा प्रत्येकमुपपादयति - लब्धेति । वक्तुः = प्रयोगकर्तुः - इच्छामनुवर्तयतीति तेन = इच्छानुसारेणेत्यर्थः, प्रयत्नेन लब्धा क्रिया यस्य स वायुः स्थानेषु=

आनन्दा

सामान्यत उद्दिष्टेषु मतभेदेषु क्रमप्राप्तं प्रथमं मतं वायोः शब्दस्वरूपताप्राप्तिं प्रक्रियानिरूपणेनाह - लब्धक्रिय इति ।

अन्वयः - वक्तुः इच्छानुवर्तिना प्रयत्नेन लब्धक्रियः वायुः स्थानेषु अभिहतः शब्दत्वम् प्रतिपद्यते ।

व्याख्या - वक्तुः इच्छानुवर्तिना = वक्ता लोके यमर्थविशेषं बोधयितुमिच्छति तदर्थवाचकं शब्दविशेषं प्रयोक्तुं तज्जनकं प्रयत्नविशेषं करोति, इति वक्तुरिच्छानुसारिणा प्रयत्नेन = विवक्षाजातप्रयत्नविशेषेण लब्धक्रियः =

सूर्यमाया

उपर्युक्त तीनों मतों में प्रथम मत - वायु का शब्दरूप परिणाम बताते हैं - 'लब्धक्रियः' इत्यादि ।

अर्थ : - वक्ता की इच्छा के अनुरूप होनेवाले प्रयत्न से प्रेरणा प्राप्त कर स्पन्दित एवं कण्ठतालु आदि तत्तत् स्थानों में अभिहत वायु शब्दस्वरूप को ग्रहण कर लेता है, अर्थात् वायु शब्दरूप में परिणत हो जाता है ।

आशय : - वक्ता लोक में जिस अर्थ का बोध कराना चाहता है, वह उस अर्थ के वाचक शब्द का प्रयोग करना चाहता है, तादृश इच्छा से उसका प्रयत्न भी वैसा ही होता है, जिससे विवक्षित शब्द ही प्रकट हो अन्य नहीं । अतः उसके प्रयत्नविशेष से अपेक्षित मात्रा में उत्पन्न वायु ऊपर उठकर वर्णविशेष के जन्म के कारण तत्तत् स्थानों में टकराता है, जिससे वह वायु विवक्षित वर्णात्मक व्यक्त शब्द रूप से परिणत हो जाता है, जैसे कि साँचे में ढाला गया तामे आदि का

ताल्वादिषु अभिहतः = संयुक्तः सन् शब्दत्वम् = शब्दप्रवृत्तिनिमित्तम् प्रतिपद्यते = प्राप्नोतीत्यर्थः, शब्दपदेन व्यवह्रियते - इति यावत् ॥ १०९ ॥

प्रेरितः, वायुः = जाठराग्निसमुत्थितो वायुरूर्ध्वं गत्वा स्थानेषु = कण्ठताल्वादिषु अभिहतः = वेगेन संयोगं प्राप्तः, शब्दत्वं प्रतिपद्यते = तत्तद्-वर्णपदादिशब्दरूपेण परिणमते ।

विमर्शः - एषा वैखरीशब्दविषया प्रक्रिया - "आत्मा बुद्ध्या समेत्यार्थान् मनो युङ्क्ते विवक्षया" इत्यादिपाणिनीयशिक्षायां स्पष्टा । सैषा प्रक्रिया वेणुवीणाशङ्खभेरीमृदङ्गादेरव्यक्तशब्दविषयाऽपि संग्राह्या । वेणुशङ्खादिरन्ध्रं प्रविष्टो निःश्वासवायुः, भेरीमृदङ्गादे र्दण्डसंयोगजो वा, वंशादेरुत्पाटने दलद्वयविभागजो वा वायुः शब्दत्वं प्रतिपद्यते । इत्थं वायुरेव दशान्तरं प्राप्तः शब्द इति नैयायिकवैशेषिकाणां कार्यशब्दवादिनां प्रथमः पक्षः ॥ १०९ ॥

गलाया हुआ पानी जमकर किसी मूर्ति का रूप धारण कर लेता है । इस प्रक्रिया के अनुसार वायु का परिणाम शब्द वायुरूप है । यह प्रथम पक्ष का तात्पर्य है ।

यह प्रक्रिया यहाँ यद्यपि वर्ण-पदरूप व्यक्तशब्द वैखरीविषयक है, तथापि शङ्ख, बाँसुरी, वीणा, मृदङ्ग आदि के अव्यक्त ध्वनिरूप शब्दस्थलों में भी यह प्रक्रिया ग्राह्य है । वहाँ भी वादक का श्वासवायु बाँसुरी, शङ्ख आदि के छिद्र में प्रवेश व निष्क्रमण से शब्दरूप में परिणत हो जाता है, अथवा वीणा-मृदङ्ग आदि के आघात से उत्पन्न वायु तत्तत् शब्दरूप में प्रकट हो जाता है । यद्यपि यह प्रथमपक्ष नैयायिक-वैशेषिकों का है, तथापि स्फोट से भिन्न उसका व्यञ्जक प्राकृतध्वनिरूप वैखरी के विषय में वैयाकरणों को भी अभिमत है, नित्यशब्द स्फोट के विषय में नहीं ॥ १०९ ॥

तस्य करणसामर्थ्याद् वेगप्रचयधर्मिणः ।
संनिपाताद् विभज्यन्ते सारवत्योऽपि मूर्तयः ॥ ११० ॥

प्रत्येकार्थप्रकाशिका

ननु वायुश्चेत् कथं कत्वादिना ज्ञायतेऽत आह - तस्येति । वेगप्रचयौ धर्मौ यस्य = वेगवतः प्रचयवतश्चेत्यर्थः तस्य =

आनन्दा

यदि वायुरेव शब्दस्तर्हि क-खेत्यादिनानावर्णविभागः कथमुपपद्यते, वायोरेकत्वादित्याशङ्कां समाधत्ते - तस्येति ।

अन्वयः - वेगप्रचयधर्मिणः तस्य सारवत्यः अपि मूर्तयः करणसामर्थ्यात् संनिपातात् विभज्यन्ते ।

व्याख्या - वेगप्रचयधर्मिणः = वेगः प्रचयश्च धर्मौ यस्य तस्य-वेगस्वभाववतः संघातस्वभाववतश्च तस्य = वायोः सारवत्यः = बलवत्योऽभिन्ना अपि मूर्तयः = कारणबलान्नानास्वरूपग्रहणयोग्यस्वभावाः प्रचयरूपाः करणसामर्थ्यात् = तत्तत्प्रयत्नरूपकारणभेदबलात् संनिपातात्= कण्ठादिविभिन्नस्थानेषु वेगवत्संयोगरूपाभिघाताद् विभज्यन्ते = कवर्गादिना नानावर्णविभागा जायन्ते ।

विमर्शः - विवक्षाप्रयत्नभेदबलाद् वेगं प्रचयभावं च प्रतिपद्यमानो निश्वासवायुः प्रभिन्नेषु कण्ठादिस्थानेषु वेगेनाभिहतो मूषानिषक्तद्रुतताम्रादिरिव तत्तदाकारैर्विभक्तः, यद्वा महाशिलातले गिरिशिखरान्निपतितो निर्झरिणीप्रवाह

सूर्यमाया

वायु का परिणाम शब्द वायुरूप है, इस पक्ष में एक ही वायु का क - ख आदि नाना वर्णरूप परिणाम की प्रक्रिया बताते हैं - 'तस्य' इत्यादि ।

अर्थ : - विभिन्न प्रयत्नरूप करणों के सामर्थ्य से वेग और प्रचय (घनीभाव) स्वभाववाले वायु का कण्ठतालु आदि स्थानों में अभिघात होने से उसका 'क ख' आदि सारभूत 'वर्णरूप' परिच्छिन्न नाना मूर्तियाँ स्थानभेद से परस्पर विभक्त हो जाती हैं । अर्थात् वायु का एक घनीभूत रूप भी नाना स्थानों में विभक्त हो मूर्त नाना वर्णरूप हो जाते हैं, जो कि एक दूसरे से भिन्न हैं ।

वायोः संनिपाताद् = स्थानाद्यभिघातात् करणसामर्थ्यात् = प्रयत्नादिकारणसम्बन्धादित्यर्थः, सारवत्योऽपि = कखेत्यादि-

---

इव चूर्णितः कणशः तत्तदाकारैर्विभक्तः कचटतपादिवर्णाकारतां प्रतिपद्यते । यथा हि गिरिशिखरान्महति शिलाशकले निपतितो बलवानपि निर्झरिणीजलौघो वेगादूर्ध्वं समुच्छलन् बहुधा विदीर्णः सहस्रकणाकारतां धत्ते, तथा विवक्षा-प्रयत्नकारणबाहुल्यबलात् संहत एकोऽपि निश्वासमारुतः कण्ठताल्वादिषु विभिन्नस्थानेषु प्रतिहतो नैकधा विभागं प्राप्तः 'ककारखकारादि' -नानावर्णाकारतां समश्नुते ।

सारवत्योऽपि काचशीशकादिमूर्तयः शिलातले निपातेन शतशो विदीर्यन्ते, तद्वदिह सारवान् संहतोऽपि निश्वासवातः प्रभिन्नस्थानेष्वभिहतो नैकधा विभिद्य तत्तद्वर्णरूपतां प्रतिपद्यते, किमत्र चित्रम् ? किं बहुना, अव्यक्तोऽपि नादो वायुपरिणामो वायुरेव । उपलभ्यते हि वेणुशङ्खादिवाद्येषु निश्वासवायोः प्रवेशनिर्गमाभ्यां रन्ध्रस्थानभेदेन, वीणातन्त्रीमुरजादिषु चाघातजवायोराघात-स्थानभेदेन च निषादर्षभगान्धारादिस्वरसन्तानभेदस्तालमात्रादिभेदश्च ।

"वायु र्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव" इति श्रुतिरपि परब्रह्मणो नानारूपत्वग्रहे दृष्टान्तमुखेनात्रार्थे साक्षिणी, तत्र वायोर्यथा वेणुवीणापणवमुरजाद्युपाधिभेदकृतो विभिन्नरूपः स्वरविशेषपरिणामस्तथा प्रकृते कण्ठताल्वादिस्थानोपाधिभेदकृतो विभिन्नवर्गीयो वर्णविशेषपरिणाम इत्यवधेयम् ।

आशय : - जैसे झरने का वेगशाली बलवान् एक ही प्रवाह पर्वत के उच्चशिखर से नीचे चट्टान पर टकराकर उछलता हुआ नाना टुकड़ों में विभक्त होकर नाना तरङ्गों व फुहारों के रूप में परिणत हो नाना धाराओं में प्रवाहित होता है, ऐसे ही वक्ता का प्राणवायु नाना स्थानों में टकराकर व्यक्त वर्णरूप अथवा वाद्यों का आघातजन्यवायु अव्यक्त ध्वनिरूप शब्द बन जाता है । बाँसुरी -बैण्ड आदि के वादक का श्वासवायु नीचे या ऊपर के तत्तत् छिद्र स्थानों में अङ्गुलियों के दबाने उठाने से टकराकर बाहर निकलता है, तो वही निषाद, ऋषभ आदि सात स्वरों के रूप में नाना मूर्छना-तानलहरी का रूप ग्रहण कर लेता है । शङ्ख में श्वासवायु का प्रवेश और निष्क्रमण के द्वारा विलक्षण प्रयत्नों के अनुसार वेग के न्यून अधिक परिमाण भेद से तार-तारतर-वा तारतम घोष हो जाता है ।

रूपाः मूर्तयः = आकाराः विभज्यन्ते = विभक्ता भवन्ति, इत्यर्थः ।

स एव वायुः स्थानप्रयत्नादिकारणसम्बन्धमाहात्म्यात् कादिवर्णरूपो भवतीति भावः ॥ ११० ॥

अत्र वृषभदेवपद्धतिः - "सारवतां पर्वतादीनामपि वायुना विभागः क्रियते, किमङ्ग पुनस्ताल्वादीनाम्" इत्याह । वायोः संश्लेषात् स्थानकरणानां ताल्वादीनां संयोगविभागौ, ततश्च नानास्थानेषु संनिपातेन वायोः खण्डशो विभागः, ततश्च विभक्तस्य तस्य तस्य वायोस्तत्तन्नानावर्णरूपः परिणाम इति हि तत्प्रक्रिया ।

अस्माकं च ताल्वादिस्थानेषु संनिपातेन वायोस्तदनुरूपप्रविभागः, विभक्तस्य च तत्तद्वायोर्यथायोगं नानावर्णरूपः परिणामः । वायुना स्थानकरणानां संयोगविभागौ त्ववान्तरव्यापाररूपावनायत्या वचनं विनैव लभ्येते, तस्माद् वृषभपद्धतिरपि नात्र प्रतिकूला, साऽपि संग्राह्यैव । किञ्चित्प्रकारभेदेऽपि फलितार्थाभेद एव ।

एवं च वृत्तेर्व्याख्याने सर्वत्र शरणं वृषभपद्धतिमनुकुर्वाणैरिह सा कैश्चित् प्रत्याख्यायते, तत्र बीजं चिन्तनीयम् । नास्तीह किमपि वैपरीत्यम् ।

इह - वेगः प्रचयश्च धर्मौ यस्येति विग्रहे बहुव्रीहौ प्रचयस्य केवलपूर्वपदत्वाभावादनिचोऽभावे मत्वर्थीये 'इनि' प्रत्यये तदन्तान् ङस्प्रत्यये 'वेगप्रचयधर्मिणः' इति पाठः साधुः । कृतद्वन्द्वस्य धर्मपदेन बहुव्रीहौ तु अनिचि कृते 'वेगप्रचयधर्मणः' इत्यपि पाठः साधुः ॥ ११० ॥

प्रकृत में व्यक्त शब्द विषय में भी यह प्रक्रिया है । वक्ता का विभिन्न वर्णों व पदों की विवक्षा अनुसार प्रयत्नों के भेद से वेग और घनीभाव स्वभाववाला श्वासवायु कण्ठ तालु आदि स्थानों में जिह्वा के मूल-मध्य-अग्र-उपाग्र भागों के द्वारा टकरा कर उन उन स्थानों में विभक्त हो साँचे में ढले हुए गले तामे आदि धातुओं के समान स्थानों के अनुरूप मूर्तरूप ग्रहण कर वर्गानुसार - क च ट त प आदि परस्पर विलक्षण तथा सलक्षण नाना वर्णों के रूप में परिणत हो जाता है ॥ ११० ॥

अणवः सर्वशक्तित्वाद् भेदसंसर्गवृत्तयः ।
छायाऽऽतपतमःशब्दभावेन परिणामिनः ॥ १११ ॥

प्रत्येकार्थप्रकाशिका

अणूनां शब्दत्वमुपपादयति - अणव इति । भेदेन संसर्गेण= सम्बन्धेन वृत्तयः परस्परभिन्ना इत्यर्थः, अणवः = नभः-स्थितसूक्ष्मशब्दाः, सर्वा शक्ति र्यस्य तस्य भावस्तत्त्वाद् यतः

आनन्दा

वायोः शब्दत्वापत्तिप्रक्रियां निरूप्य क्रमप्राप्तं शब्दस्याणुपरिणामत्वमतं निरूपयति - अणव इति ।

अन्वयः - भेदसंसर्गवृत्तयः अणवः सर्वशक्तित्वात् छायाऽऽतपतमःशब्दभावेन परिणामिनः ।

व्याख्या - भेदसंसर्गवृत्तयः = भेदेन संसर्गेण वृत्तिर्येषां ते - भिन्नरूपेण वर्तमानाः परस्परं व्यावृत्ताः, यद्वा भेदश्च संसर्गश्च वृत्ती = व्यापारौ येषां ते - विभागसंयोगशीलाः, अणवः = परमाणुतुल्याः सूक्ष्मतमाः शब्दाः सर्वशक्तित्वात् = विरुद्धाविरुद्धसर्वविधकार्यजननसामर्थ्यवत्त्वात् छायाऽऽत-पतमःशब्दभावेन = छाया च आतपश्च तमश्च - छायाऽऽतपतमांसि, ते च शब्दाः - तद्भावेन, द्वन्द्वान्ते श्रूयमाणस्य प्रत्येकमन्वयः, इति छाया-शब्दभावेन, आतपशब्दभावेन, तमःशब्दभावेन च परिणामिनः = परिणमनशीलाः, स्थूलशब्दरूपतां गृह्णन्ति, इत्यर्थः ।

सूर्यमाया

'अणुओं का परिणाम शब्द है' पूर्व प्रतिज्ञात इस द्वितीय मत का यथाक्रम निरूपण करते है - 'अणवः' इत्यादि ।

अर्थ : - भेदसम्बन्ध से रहनेवाले परस्परभिन्न अणुरूप सूक्ष्मतम शब्द - सर्वविध शक्तिमान् होने से छाया-आतप और तमस् आदि परस्परविरोधी विभिन्न शब्दरूप से परिणामस्वभाववाले हैं, फलतः सभी स्थूलशब्द अणुरूप सूक्ष्मतम शब्दों के परिणामरूप कार्य हैं ।

सर्वशक्तिमन्तः - अत इति भावः, छायाशब्दत्वेन आतपशब्दतया तमःशब्दत्वेन च - छायादिसकलशब्दरूपेणेति यावत्,

---

विमर्शः - 'अणूनां शब्दत्वापत्तिरिष्यते' इति प्रतिज्ञावाक्यस्वारस्येनेह - 'अणवः' शब्दपरमाणव एव ग्राह्या नेतरे । ते च न न्यायतन्त्रपरिभाषिता भूतचतुष्टयचरमावयवरूपाः, शब्दस्य तन्मते गुणत्वेन व्याहतत्वात् । नापि ते सांख्यसंमतास्तन्मात्रारूपा ग्राह्याः, तेषामाकाशादिभूतभावेन परिणामित्व-स्याङ्गीकारेऽपि स्थूलशब्दभावेन परिणामित्वस्यासम्मतत्वात् । तस्मादिह परमसूक्ष्मतमत्वेन परमाणुतुल्यास्तन्मात्रातुल्या वा तद्विलक्षणाः स्थूलशब्द-बीजभूताः परमसूक्ष्मशब्दा अणवो विवक्षिता इत्यवधेयम् ।

परमसूक्ष्मास्ते हि शब्दाख्याः परमाणवः परस्परं भिन्ना अप्येकरूपाः संयोगविभागशीला विवक्षाप्रयत्नबलेन संयोगेऽभ्रवत् प्रचीयमानाः स्थूलशब्दभावेन परिणमनशीलाः, प्रयत्ने निवृत्ते तु विभागेन सूक्ष्मभावोपगमनशीला बीजरूपं भजन्ते । ते हि शब्दाख्याः परमाणव एकजातीयाः सन्तोऽपि विभिन्नत्वादेव विचित्रकार्यजननशक्तिमत्त्वाद् विरुद्धार्थकच्छायाऽऽतपतमःप्रभृतिनानाशब्दरूपेण

आशय : - वक्ता के हृदयाकाश में अथवा बाह्य महाकाश में जो शब्द अत्यन्त सूक्ष्मतम रूप में विद्यमान रहते हैं, वे ही वक्ता के विवक्षा प्रयत्न आदि निमित्त-विशेष की प्रेरणा से संयुक्त व संचित होकर स्थूलरूप धारण कर परस्पर विरोधी छाया-आतप-तमस् आदि विभिन्न शब्दरूपों में परिणत हो जाते हैं, जो कि श्रोत्र से ग्राह्य बाह्य वैखरीशब्दरूप में व्यवहृत होते हैं ।

यद्यपि कारणरूप वे सूक्ष्म अणुशब्द एकजातीय होते हैं, तथापि उनमें पृथक् विलक्षण कार्यों की उत्पत्ति करने की सर्वविध शक्ति रहने से विरुद्धार्थक भी तत्तत् सभी शब्दों के रूप में परिणत हो जाते हैं, विवक्षा प्रयत्न आदि निमित्त का विराम होने पर उन शब्द परमाणुओं का विभाग हो जाने से क्रमशः स्थूल-प्रचितशब्द-रूप का उपसंहार होकर वे अणुरूप सूक्ष्म हो जाते हैं । ये सूक्ष्मतम शब्द ही यहाँ

परिणामिनः = परिणता भवन्ति, तेषामेव परिणामो यावच्छब्द इति भावः ।

परिणमन्ते, इत्यत्र किं चित्रम् ? एकविधानामपि शब्दपरमाणूनां प्रयत्नवैलक्षण्याद् विलक्षणसंसर्गेण संघातभेदे विलक्षणस्थूलशब्दपरिणाम इति सुवचम् ।

इदं तु बोध्यम् - सांख्यनये छायाऽऽतपतमसां रूपतन्मात्रापरिणामत्व-सत्त्वेऽपि नेह तदुपपादनं विवक्षितम्, अप्रकृतत्वात् । 'शब्दाख्याः परमाणवः' इति वक्ष्यमाणश्लोकपङ्क्तिस्वारस्यात् प्रकरणबलाच्च शब्दस्यैव परिणामत्वस्यात्र प्रतिपिपादयिषितत्वात्। शब्दपरिणाममुपक्रम्यैव मतत्रयस्य प्रतिज्ञातत्वाच्च । तस्मादिहोपक्रमोपसंहारबलेन सजातीयाः शब्दपरमाणवो ग्राह्या, न त्वाप्यादिभेदेन

अणुशब्द से विवक्षित हैं, न कि न्यायशास्त्र परिभाषित परमाणु, वा सांख्य-परिभाषित तन्मात्राएँ । न्यायदर्शन आरम्भवाद का प्रतिपादक है, परिणामवाद का नहीं, साथ ही उनके मत में शब्द आकाशद्रव्य का गुण है, जो कि निरवयव है, अत एव वह किसी का आरम्भक नहीं होता ।

परिणामवादी होने पर भी सांख्यसंमत तन्मात्राओं का परिणाम आकाश आदि स्थूलभूत हैं, न कि स्थूलशब्द । अतः प्रकरणानुसार यहाँ न्यायदर्शन वा सांख्य-दर्शन की परिभाषा से पृथक् केवल सूक्ष्मतम वस्तु का बोधक 'अणु' शब्द है, जिसका यहाँ विवक्षित अर्थ - स्थूलशब्द का कारण सूक्ष्मशब्द है ।

इस स्थिति में यहाँ अणुशब्द का -'पृथिवी, जल आदि पाँच भूतों का परमाणु' व्याख्यान करना प्रकरणविरुद्ध नितान्त असंगत है, न्यायमत में आकाश नित्य है, उसका परमाणु होता भी नहीं । यहाँ तो आरम्भ में शब्द को मतभेदेन वायु, अणु और ज्ञान का परिणाम बताया गया है, जिसकी क्रमिक प्रक्रियामात्र उत्तरश्लोकों में वर्णित है । छाया, धूप, अन्धकार आदि द्रव्यों के निरूपण का यहाँ कोई प्रसङ्ग ही नहीं है । भले ही सांख्यमत में छाया - आतप आदि रूपतन्मात्रा का परिणाम कार्य हों, इससे क्या ? यहाँ तो प्रश्न है कि - शब्द किसका कार्य

अणवः सर्वशक्तिमन्तः परस्परं भिन्नाश्चेत्यतो विरुद्धार्थक-शब्दरूपेणापि परिणामे न किञ्चिद् बाधकमुन्नेयमिति च्छायाऽऽतपदानेन सूचितमिति भावः ॥ १११ ॥

विजातीयाः पञ्चविधाः परमाणवः । अणुकल्पास्ते सूक्ष्मशब्दा हृदयाकाशे महाकाशे वा वर्तिनो बोध्याः । एवं च कथमेकरूपाणामनेकच्छा-यादिरूपापत्तिरिति वृषभदेवोक्तं 'सर्वशक्तिमत्त्वाद्' इत्यस्यावतरणं समीचीनमेवेति केषांचित्तत्खण्डनमविचारितरमणीयम् ।

वस्तुतस्तु परमाणुपरिणामः शब्द इत्यार्हता आहुः, तन्मते शब्दस्य पौद्गलिकत्वादिति तदनुसारेणायं द्वितीयो वाद इति ध्येयम् ॥ १११ ॥

है? उसका उत्तर यही है कि - स्थूलशब्द अपनी सूक्ष्मतम अवस्थाविशेष - परमकारण अणुरूप शब्द का परिणाम कार्य है, जैसे दुग्ध का दधि - नवनीत आदि, अथवा जल का - हिम, करक आदि ।

इसके विपरीत अणु का परिणाम छाया, आतप आदि द्रव्यों को बताना तो 'आम्रान् पृष्टः कोविदारानाचष्टे' पूछा आम तो कहा कटहल, इस लोकोक्ति को चरितार्थ करता है ।

आगे 'शब्दाख्याः परमाणवः' इस कथन से यही स्पष्ट होता है कि अणु पद से यहाँ सूक्ष्म शब्दविशेष ही विवक्षित अर्थ है, न कि जल, पृथिवी आदि का चरमावयव परमाणु अथवा रूप, रस आदि तन्मात्राएँ ॥ १११ ॥

स्वशक्तौ व्यज्यमानायां प्रयत्नेन समीरिताः ।
अभ्राणीव प्रचीयन्ते शब्दाख्याः परमाणवः ॥ ११२ ॥

प्रत्येकार्थप्रकाशिका

ननु अणूनां सदा विद्यमानतया सदैव कथं न परिणामः ? इत्यत आह - स्वशक्ताविति । प्रयत्नेन = अर्थबोधनेच्छया आन्तरिकप्रयत्नेन, समीरिताः = उदीर्णा अत एव स्वशक्तौ =

आनन्दा

अणूनां शब्दरूपपरिणामे प्रक्रियां वर्णयति - स्वशक्तौ इति ।

अन्वयः - शब्दाख्याः परमाणवः प्रयत्नेन समीरिताः स्वशक्तौ व्यज्यमानायाम् अभ्राणि इव प्रचीयन्ते ।

व्याख्या - शब्दाख्याः परमाणवः = हृदयाकाशे स्थिता बुद्धिविषयाः सूक्ष्मतमाः शब्दाः, प्रयत्नेन = लोकेऽर्थं बोधयितुं शब्दप्रयोगेच्छया जातेनाभ्यन्तरेण प्रयत्नेन समीरिताः = विवक्षोत्पन्न-कायाग्निसमुत्थवायुना प्रेरिताः सन्तः स्वशक्तौ = शब्दरूपताप्राप्तेर्बीजशक्तौ व्यज्यमानायाम् = उद्भूयमानायाम्, अभ्राणि = वाष्परूपमेघपरमाणवः इव प्रचीयन्ते = घनीभावेन स्थूलतामापद्यमानाः शब्दरूपतां प्रतिपद्यन्ते, शब्दव्यपदेशं च लभन्ते, इति भावः ।

विमर्शः - यद्यपि शब्दपरमाणवः सदा शब्दभावापत्तिशक्तिमन्तः सन्ति

सूर्यमाया

अणुओं के शब्दरूप परिणाम की प्रक्रिया बताते हैं - 'स्वशक्तौ' इत्यादि ।

अर्थ : - शब्दप्रयोग की इच्छा से हुए आन्तरिक प्रयत्न से प्रेरित होकर अणुरूप-सूक्ष्मशब्द अपनी शक्ति की अभिव्यक्ति होने पर आकाश में मेघों के समान एकत्रित हो जाते हैं, जो कि स्थूल शब्दरूप में परिणत हो जाते हैं ।।

आशय : - यद्यपि वक्ता के हृदयाकाश में अणुरूप सूक्ष्मशब्द तथा उनकी शब्दपरिणाम होने की शक्ति अव्यक्तरूप में सदा विद्यमान रहते हैं, तथापि उनका

परिणामजनकताशक्तौ व्यज्यमानायां सत्यां शब्दाख्याः परमाणवः प्रचीयन्ते = घटेत्यादिशब्दस्वरूपाः संघीभवन्ति, अभ्राणीव = यथा आकाशे वर्षायां मेघपरमाणवो गगनतलाच्छादिनो भवन्तीत्यर्थः ।

एवं च यदैव प्रयत्नप्रेरिताः तदैव शब्दपरिणामा न सदेति फलितमिति ॥ ११२ ॥

तथापि ते नहि सदा शब्दरूपतां प्रतिपद्यन्ते, किन्तु प्रयत्नप्रेरणया यदा तेषां शक्तिरुद्भवति, तदैव ते च्छायाऽऽतपघटादिशब्दरूपेण संहताः शब्दरूपतां लभन्ते । एवं च शब्दपरमाणूनां शब्दपरिणामत्वे तेषां सदा विद्यमानत्वेन सदा शब्दभावापत्तिरिति शङ्का निरस्ता । यथा सौरकिरणेष्ववस्थिताः सूक्ष्मतमा विरलाः सलिलपरमाणवो मारुतेन प्रेरिता वाष्पीभूता यथाक्रमं प्रचीयमाना उत्तरोत्तरं घनीभूता अञ्जननिचयवन्मेचकतां गता अभ्राणि भूत्वा वियत्तलमालिम्पन्ति, तथा अन्तःस्थिता बुद्धिविषयाः शब्दपरमाणवो विवक्षाप्रयत्नोत्पन्नमारुतेन प्रेरिताः स्वनिष्ठशब्दभावबीजशक्तेः प्रादुर्भावे सति विवक्षिततत्तत्सकलस्थूलशब्दरूपेण संहन्यमानाः वैखरीरूपाः परश्रुतिगोचराः प्रतीतपदार्थकत्वाल्लोके 'शब्द' इत्याख्यां लभन्ते ॥ ११२ ॥

स्थूल शब्दरूप परिणाम सर्वदा नहीं होता है, किन्तु निमित्तकारण के सहयोग से होता है । हृदयाकाश में अवस्थित अणुरूप सूक्ष्मशब्द की विवक्षाजन्य आभ्यन्तर प्रयत्न की प्रेरणा से जब उनकी शब्दपरिणाम की शक्ति अभिव्यक्त होती है, तभी उनका स्थूल शब्दरूप परिणाम होता है अन्यथा नहीं, जैसे कि आकाशमण्डल में सौरताप से आकर्षित अणुरूप सूक्ष्म जलकण वायु की प्रेरणा से वाष्परूप में क्रमशः एकत्रित होकर घनीभूत मेघमण्डल बन जाते हैं ॥ ११२ ॥

अथेदमान्तरं ज्ञानं सूक्ष्मवागात्मना स्थितम् ।
व्यक्तये स्वस्य रूपस्य शब्दत्वेन विवर्तते ॥ ११३ ॥

प्रत्येकार्थप्रकाशिका

ज्ञानस्य शब्दत्वमुपपादयति - अथेति । अथ इदम् = प्रत्येकं स्वतः सिद्धम् - आन्तरं ज्ञानम् = प्रत्येकप्राणिनामन्तरर्थ-

---

आनन्दा

'वायोरणूनां ज्ञानस्य' इत्युपक्रमानुसारं पूर्वं वायोरथ च अणूनां शब्दत्वं परमतं प्रतिपाद्य क्रमप्राप्तं तृतीयं भाष्यसम्मतं स्वमतं ज्ञानस्य शब्दत्वं सोपपत्ति निरूपयति - अथेति ।

अन्वयः - अथ इदम् सूक्ष्मवागात्मना स्थितम् आन्तरम् ज्ञानम् स्वस्य रूपस्य व्यक्तये शब्दत्वेन विवर्तते ।

व्याख्या - अथ = वायोरणूनां च शब्दत्वापत्तिनिरूपणानन्तरम् इदम् = क्रमप्राप्तम् सूक्ष्मवागात्मना स्थितम् = कारणभूतसूक्ष्मशब्दस्वरूपम् आन्तरम्= सर्ववक्तृणामन्तःकरणे वर्तमानम् ज्ञानम् = अर्थविषयको बोधः स्वस्य रूपस्य = अर्थाकारनिजस्वरूपस्य व्यक्तये = लोके प्राकट्याय शब्दत्वेन = विवक्षाप्रयत्नबलाद् श्रोत्रग्राह्यवैखरीशब्दरूपेण विवर्तते = अतात्त्विकान्यथाभावं

सूर्यमाया

पूर्वोक्त ' वायोरणूनां ज्ञानस्य' इस उपक्रम के अनुसार अब क्रमप्राप्त ज्ञान का शब्दरूप विवर्त होना बताते हैं - 'अथ' इत्यादि ।

अर्थ : - वायु या अणुओं का कार्य शब्द है, इन मतों के निरूपण के अनन्तर तीसरे मत के रूप में प्रस्तुत - यह आन्तर ज्ञान - जो कि सूक्ष्मशब्दरूप से अन्तःकरण में विद्यमान रहता है, वह अर्थविषयकज्ञान अपने रूप को बाहर प्रकट करने के लिए स्थूलशब्दरूप हो जाता है ।

विषयकं ज्ञानं वर्तते तदेव - सूक्ष्मवागात्मना = इन्द्रियागोचर-

---

गृह्णाति । अग्राह्यमान्तरमर्थविषयकं शब्दात्मकं ज्ञानं ग्राह्यं बाह्यशब्दस्वरूपं भवतीत्यर्थः ।

विमर्शः - ''आख्यातोपयोगे'' इति सूत्रे - 'ज्योतिर्वज् ज्ञानानि भवन्ति' इति भाष्यप्रतीकमुपादाय प्रदीपे - 'ज्ञानस्य शब्दत्वापत्तिरिति दर्शनमत्र भाष्यकारस्ये'ति कैयटपादैः स्पष्टमभिहितम् । तद्रीत्या भगवतो भाष्यकृत एवायं सिद्धान्तः - ज्ञानस्य शब्दापत्तिरिति ध्येयम् ।

शब्दार्थयोः 'ओमित्येकाक्षरं ब्रह्म' इति ''वृद्धिरादैच्'' इत्यादिश्रुतिस्मृति-प्रसिद्धसमानाधिकरणप्रयोगबलात् - 'घट इति शब्दः, घट इत्यर्थः, घट इति ज्ञानम्' इत्यादिव्यवहारबलाच्च शब्दार्थप्रत्ययानामितरेतरतादात्म्यस्य सिद्धत्वात् शब्दानामर्थानां च स्थूलभावसंपत्तेः प्राक् सर्वेषामज्ञेय-सूक्ष्मज्ञानरूपेणावस्थानं स्रष्टुः परमात्मनः प्रमातुर्वा हृदयाकाशे सिध्यति । प्रमातुः प्रयोक्तुर्वा हृदये समवस्थितं तत्तदर्थाभिन्नतत्तच्छब्दात्मकं ज्ञानमेव विवक्षाप्रयत्नतरङ्गितं सद् बाह्यशब्दरूपेण बाह्यार्थरूपेण च विवर्तते, इति हि हरिसिद्धान्तः । तदाह - ''बुद्धौ कृत्वा सर्वा वाचः कर्ता धीरस्तन्वन्नीति'' रिति । जन्मादिसूत्रे वाचस्पतिपादा अप्याहुः - ''चेतनो हि नामरूपे बुद्धावालिख्य घट इति नाम्ना कम्बुग्रीवादिना रूपेण च बाह्यं घटं निष्पादयति इति ।''

आशय : - अर्थविषयक यथार्थज्ञानवाला आप्त वक्ता पुरुष अपने हृदय में विद्यमान उस ज्ञान को जब दूसरों को प्रकट करना चाहता है, तब वह शब्द का प्रयोग करना चाहता है । ऐसी स्थिति में यह ध्यातव्य है कि उस आप्त वक्ता का जो ज्ञान है, वह एक ओर जहाँ अर्थविषयक होने से अर्थस्वरूप है, वहाँ वह ज्ञान अर्थवाचक शब्दविषयक होने से सूक्ष्म शब्दस्वरूप भी है । फलतः शब्द, अर्थ और ज्ञान ये तीनों परस्पर अभिन्नरूप हैं, परस्पर तादात्म्यापन्न हैं । यहाँ तक

गौतमोऽपि "बुद्धिसिद्धं तु तदसत्" इति सूत्रयन् उत्पत्तेः प्राक् ज्ञानसंकल्पात्मना स्थितस्य सत एव घटादेरुत्पत्तिमाह । योगवाशिष्ठेऽपि - "विप्र पृथ्व्यादि चित्तस्थं न बहिःस्थं कदाचन' इत्यादिना चित्तवृत्त्यात्मना सर्वस्य वस्तुजातस्य चित्तस्थत्वमभिहितम् । अनेन परिकरेण ज्ञानस्यैव विवर्तो बाह्यः शब्दोऽर्थो वेति सिद्धम् । एवं च स्वस्वरूपादप्रच्युतस्यातीन्द्रियस्य सूक्ष्मशब्दाभिन्नस्यान्तरज्ञानस्य श्रोत्रग्राह्यस्थूलशब्दभावेन बहिःप्रतिभासो विवर्त इति स्पष्टम् ।

इह पाठभेदो विमृश्यताम्, तद् यथा - 'अथायमान्तरो ज्ञाता' इति पाठान्तरम्, तदनुरोधेन च 'सूक्ष्मवागात्मना स्थितः' इति स्थितशब्दस्य लिङ्गविपर्य्ययेण पाठः, क्वचित्तु - 'सूक्ष्मवागात्मनि' इति विभक्तिविपरिणामेन पाठः ।

तत्राद्ये - आन्तरो ज्ञाता - वृत्तिविशिष्टमन्तःकरणं सूक्ष्मवागात्मना = सूक्ष्मशब्दशक्तिमत्त्वेन स्थितः स्थूलशब्दभावेन विवर्तते, 'वृत्तिविशिष्टान्तः-करणस्य शब्दभावापत्तिरेव ज्ञानस्य शब्दभावापत्तिः' इति तदर्थमाहुः । एतन्मते अन्तःकरणस्य शब्दभावे तत्परिणामस्वरूपवृत्त्याख्यं ज्ञानमवान्तरो व्यापार इति प्रक्रिया। अपरे तु - सूक्ष्मे = कत्वखत्वादिभेदोपसंहारादतीन्द्रिये वागात्मनि = वाक्सारूप्यानुषक्ते ज्ञानात्मनि स्थित आन्तरो ज्ञाता = वृत्तिरूपज्ञानाश्रयः स्थूलेन्द्रियगम्यरूपेण विवर्तते इति व्याचक्षते । तन्मते ज्ञानात्मके शब्दतत्त्वे मनःसमाश्रयेण ज्ञातृत्वव्यवहार इति प्रक्रिया ।

कि - विशेषण, विशेष्य और उनके संसर्ग से शून्य जो निर्विकल्पक ज्ञान हैं, वे भी शब्दविषयक शब्दात्मक होते हैं, तभी तो व्यवसायात्मक घटज्ञान और पटज्ञान का शब्दभेद से परस्पर भेद सिद्ध होता है । ज्ञान को शब्दात्मक माने विना ज्ञान का परस्पर भेद हो ही नहीं सकता है ।

ज्ञानस्वरूपस्य व्यक्तये = प्रकाशाय शब्दत्वेन विवर्तते = बहिः

फलितार्थाभेदेऽपि प्रक्रियाभेदेन पाठभेदः । तत्र बीजं तु 'आत्मा बुद्ध्या समेत्यार्थान्' इत्यादिपाणिनीयशिक्षायां निर्दिष्टानाम् - 'आत्मबुद्धि-मनसाम्' अन्यतमस्य प्राधान्यमुत्प्रेक्ष्य शब्दबीजत्वाभ्युपगम इति प्रतीमः ।

तत्र - आत्मा = अन्तःकरणं स्वपरिणामपरम्पराभिर्वर्णान् जनयते, इत्येकं मतम्, अर्थान् समेत्य = स्वविषयीकृत्य बुद्धिः = ज्ञानं स्थूलशब्दत्वेन विवर्तते, इत्यपराभिप्रायः, विवक्षासंकल्पप्रेरितं वृत्तिविशिष्टं मन एव कायाग्निसमीरितं शब्दभावमापद्यते, इत्यन्येषां हृदयम् । कायाग्निसमीरितो मारुत एव विभिन्नस्थानेष्वभिहतो नटवत् तत्तद्वर्णरूपशब्दाकारतां धत्ते, इत्यनित्यध्वनिरूपशब्दवादिनामभिमतिः । तदिह समासेन 'वायोरणूनां ज्ञानस्य' इति मतत्रयं प्रतिज्ञातम् ।

ज्ञानस्य शब्दभावापत्तिरिति वैयाकरणसमय इह मुख्यतया हरेः प्रतिपिपादयिषित इत्यवधेयम् । मनसोऽणुत्वात् अणूनामितिवादः स्वतन्त्र आर्हताभिमतो वा पौद्गलिकः शब्द इति वादः, 'पूर्यन्ते संयोगेन -गलन्ति विभागेनेति' संयोगविभागशीला अणवः पुद्गलाः, तद्भवः पौद्गलिकः शब्द इति तन्मतम् । आस्तां तावत्, इदं त्विह विमृश्यताम् - ज्ञानस्य शब्दभावापत्तिमुपक्रम्य साक्षात् ज्ञानस्य शब्दभावप्रक्रियां विहाय ज्ञातुः शब्दभाववर्णनपरम्परया वृत्तिरूपज्ञानस्य शब्दभाववर्णने कः पुरुषार्थः ?

वायोरणूनां ज्ञानस्येति दर्शनत्रयं प्रतिज्ञाय प्रथमद्वितीयवादप्रक्रियावर्णनानन्तरं क्रमोपस्थितं ज्ञानस्य शब्दभावमुपपादयितुमुचितम् । तद् विहाय ज्ञातुः

अतः जगत् के स्रष्टा परमात्मा अथवा आप्तवक्ता के हृदय में विद्यमान जो अर्थविषयक सूक्ष्मशब्दात्मक ज्ञान है, वही जगत् की सिसृक्षादशा में अथवा आप्त पुरुष की विवक्षादशा में प्रयत्न आदि निमित्तबल से तत्तद् अर्थ से अभिन्न स्थूल-रूप बाह्य शब्द का स्वरूप ग्रहण कर लेता है। यह सूक्ष्म आन्तर ज्ञान का बाह्य

शब्दरूपं भवति, इत्यर्थः ॥ ११३ ॥

शब्दभावनिरूपणे प्रक्रमभङ्गः प्रतिज्ञाहानिश्चेति सुधीभिर्विभाव्यताम् । अवतरणे ज्ञानस्य शब्दभावं निरुच्य ज्ञानाश्रयान्तःकरणस्य, ज्ञाने च ज्ञातृत्वाध्यवसायेन ज्ञातुर्वा शब्दभावनिरूपणं पृष्ठतो नासास्पर्शेन वक्रप्राणायाम एव, नान्यत् किमपि फलम् । किमिति वक्रः पन्था आश्रीयते? । वस्तुतस्तु स्वसिद्धान्ते संहृतक्रमं स्वतःसिद्धं ज्ञानं शब्दब्रह्माख्यं वाच्यवाचकभावेन समस्तजगदात्मना विवर्तते-इत्यादावेव – 'अनादिनिधनम्' इत्यादिना प्रोक्तम् । तत्स्वारस्येनेहापि तदेव ज्ञानं शब्दत्वेन विवर्तते इति विवक्षितं नान्यत् । अत एव पूर्वमुपक्रान्तस्येह इदमा परामर्शः । तस्मात् सक्षात् परम्परया वा फलितार्थाभेदेऽपि उपक्रमोपसंहारबलाद् – 'अथेदमान्तरं ज्ञानम्' इत्येव पाठो गरीयानिति प्रतीमः । ज्ञातुरात्मनः शब्दरूपता तु 'अपि प्रयोक्तु'-रित्यत्राग्रे वक्ष्यते ।

ये त्वस्मिन् पाठे उद्योतविरोधं प्रकटयन्तोऽत्र नागेशपादेऽमितां श्रद्धां नाटयन्ति, परमग्रे "वैखर्या मध्यमायाश्च" इति वक्ष्यमाणश्लोकव्याख्याने विहाय तां श्रद्धां नागेशपादाभ्युपगतं वाचश्चतुर्विधत्वं व्याकरणतत्त्वान-वबोधनिबन्धनं प्रवदन्तो हि वैतण्डिकतां वितन्वते, ते तु निर्बन्धाः स्वाभिरुचिप्रमाणका न सन्ति वचनार्हाः । उद्योतानुरोधिनस्तस्य नागेशसम्प्रदाये श्रद्धा चेदङ्गीक्रियतां वाचश्चतुर्विधत्वम्, नो चेदिह त्यज्यतां फलितार्थाविरोधेऽपि कतिचिद्वर्णविपर्य्ययेणोद्योतविरोधचिन्ता, इत्यास्तां तावत् ॥ ११३ ॥

स्थूलशब्दरूप ग्रहण ही – 'अतात्त्विक अन्यथाभावरूप' विवर्त है । "आख्यातोपयोगे" इस सूत्र के भाष्य से संमत यह ज्ञान का शब्दभाव ही वैयाकरणों का इष्टतम सिद्धान्त है ॥ ११३ ॥

स मनोभावमापद्य तेजसा पाकमागतः ।
वायुमाविशति प्राणमथासौ समुदीर्य्यते ॥ ११४ ॥

प्रत्येकार्थप्रकाशिका

तस्य निःसरणप्रकारमाह - स मन इति । सः = ज्ञानाभिन्नः-अन्तःस्थितसूक्ष्मशब्दः, मनोभावम् आपद्य = इच्छावन्मन इति सांख्यमतानुसारेण अर्थबोधनेच्छाविशिष्टो भूत्वा, तेजसा = कायाग्निना पाकम् आगतः = तत्सम्बन्धेनोर्ध्वमापन्नः प्राणं

आनन्दा

आन्तरो ज्ञानस्वरूपः सूक्ष्मशब्दो यया प्रणाल्या बहिः स्थूलशब्दभावं लभते, तामाह - स मनोभावम् इति ।

अन्वयः - सः मनोभावम् आपद्य तेजसा पाकम् आगतः प्राणम् वायुम् आविशति अथ समुदीर्यते ।

व्याख्या - सः = पूर्वप्रकृतो ज्ञानरूपः सूक्ष्मशब्दः मनोभावम् = विवक्षासंकल्परूपेण मनःस्वरूपताम् आपद्य = प्राप्य तेजसा = समिद्धेन जाठराग्निना पाकम् = स्थूलशब्दस्वरूपग्रहणाभिमुख्यरूपमतिशयविशेषम् आगतः = प्राप्तः सन् प्राणं वायुम् आविशति = प्रविशति, अथ =

सूर्यमाया

पूर्वोक्त सूक्ष्मशब्दरूपज्ञान का स्थूलशब्दरूप ग्रहण की प्रक्रिया का निरूपण करते हैं - 'स मनोभावम्' इत्यादि ।

अर्थ : - वह ज्ञानरूप सूक्ष्मशब्द विवक्षासंकल्परूप में मन का स्वरूप ग्रहण करके जठराग्नि के तेज से स्थूलशब्दरूप ग्रहण की परिपाकावस्था को पाकर प्राणवायु में समाविष्ट हो जाता है, इसके अनन्तर वह कण्ठस्थान से ऊपर मूर्ध आदि स्थानों में पहुँचकर उनके आघात से शब्दरूप ग्रहणकर उच्चारित होकर

वायुम् = हृदयस्थवायुम् आविशति = समाश्रयति, अथ = अनन्तरम् समुदीर्य्यते = उच्चार्य्यते इत्यर्थः ।

प्राणवायौ प्रवेशानन्तरं तत्तादात्म्यापन्नः सन् असौ = प्राणवायुस्वरूपः ज्ञानाभिन्नशब्दः कण्ठदेशे स्थूलवर्णरूपतां प्राप्तः समुदीर्यते = वक्तृमुखाद् बहि र्निर्गतः स्व-परश्रोत्रग्राह्यो भवति ।

विमर्शः - तदेतदाह स्वशिक्षायां सूत्रकारः - 'आत्मा बुद्ध्या' इत्यादि ।

प्रतिशाखं शिक्षासु विविधं वचनमुपलभ्यते । तद् यथा - 'नाभिप्रदेशात् प्रयत्नप्रेरितो वायुरूर्ध्वमाक्रमन्नुरस्यादीनां स्थानानामन्यतमं स्थानमभिहन्ति, ततः शब्दनिष्पत्ति' रिति । अपरः पठति - 'वायुः कण्ठस्थानमनुप्रदानमापद्यते,

---

बाहर प्रकट होता है, जो कि श्रोताओं के द्वारा सुना जाता है । यह प्रक्रिया- 'आत्मा बुद्ध्या समेत्यार्थान्' इत्यादि पाणिनीयशिक्षा संमत है ।

आशय : - किसी वस्तु का जब तक नाम का ज्ञान नहीं होता, तब तक वह वस्तु समक्ष देखे जाने पर भी विशेषरूप में अज्ञात ही रहता है, जब उसके नाम का ज्ञान होता है तब उसका विशेषज्ञान होता है । इस अनुभवप्रमाण से यह सिद्ध होता है कि - प्रमाता का जो अर्थविषयक ज्ञान रहता है, वह शब्द से अनुविद्ध शब्दात्मक होता है, यह आगे कहा जाएगा ।

प्रमाता जब अपने हृदय में स्थित किसी वस्तु के ज्ञान को बाहर जनसमुदाय में प्रकट करना चाहता है, तो उसके मन में शब्दप्रयोग की इच्छा से संकल्प होता है कि मैं अपने इस ज्ञान को लोगों को बताऊँ । ऐसा संकल्प होते ही उसका वस्तुविषयक शब्दात्मक ज्ञान मन में पिण्डित होकर मनरूप में प्रतिष्ठित हो जाता है, क्योंकि संकल्प विकल्प मन का स्वरूप है । प्रमाता का - 'वस्तुविषयक सूक्ष्मशब्दरूप' वह ज्ञान जब विवक्षासंकल्प के रूप में मन में प्रतिष्ठित हो जाता है, तब वही मन की इच्छा व संकल्पशक्ति से उत्तेजित होकर कण्ठगत प्राणवायु में समा जाता है, जो कि ऊपर उठकर मूर्धस्थान में टकराकर नीचे वापस मुख

इदमेव भगवान् पाणिनिः स्वशिक्षायामाह –
'आत्मा बुद्ध्या समेत्यार्थान् मनो युङ्क्ते विवक्षया ।
मनः कायाग्निमाहन्ति, स प्रेरयति मारुतम्'' इति ॥ ११४ ॥

स कण्ठगतः श्वासतां नादतां वा प्रतिपद्यते' इत्यादि । अपरः प्राह – 'मनोऽभिहतः कायाग्निः प्राणमुदीरयति, स नाभेरुद्यन् मूर्धन्यभिहतोऽन्येन पुनरुद्यता मरुताऽभिहन्यमानो ध्वनिः सम्पद्यते – 'क इति वा, ख इति वा'' इत्यादि सर्वमनुगन्तव्यम् ॥ ११४ ॥

प्रदेश में आकर कण्ठ, तालु आदि स्थानों में 'क च ट त प' इन वर्गों के भेद से तत्तद् वर्णों का रूप ग्रहण कर बाहर श्रोत्रेन्द्रिय से ग्राह्य स्थूल शब्दरूप में प्रकट होता है । यह आन्तरज्ञान का बाह्य शब्दस्वरूपग्रहण की प्रक्रिया है, जो कि पाणिनि प्रभृति आचार्यों की तत्तद् शिक्षा ग्रन्थों में प्रतिपादित है ॥ ११४ ॥

अन्तःकरणतत्त्वस्य वायुराश्रयतां गतः ।
तद्धर्मेण समाविष्टस्तेजसैव विवर्तते ॥ ११५ ॥

प्रत्येकार्थप्रकाशिका

ततः कथं निःसरतीत्याह - अन्तःकरणेति । अन्तःकरणतत्त्वस्य - यावद्व्यवहारकारणस्य, अद्वैतवेदान्तगेहे

आनन्दा

मनोभावमापन्नस्य सूक्ष्मशब्दरूपज्ञानस्य प्राणवायौ समावेशे बीजं प्रकाशयन् तस्य बाह्यशब्दतया विवर्तप्रकारमाह - अन्तःकरणतत्त्वस्येति ।

अन्वयः - अन्तःकरणतत्त्वस्य आश्रयताम् गतः वायुः तद्धर्मेण समाविष्टः तेजसा एव विवर्तते ।

व्याख्या - अन्तःकरणतत्त्वस्य = विवक्षासंकल्परूपेण मनोभावमापन्न-स्यान्तःकरणस्य आश्रयताम् = अधिकरणतां गतः = प्राप्तः, कारणतया स्थितिनियामकः वायुः = प्राणवायुः तद्धर्मेण = अन्तःकरणधर्मेण ज्ञानरूपेण सूक्ष्मशब्देन समाविष्टः = अनुष्यूतः सन् बाह्यशब्दभावयोग्यतामापन्नः तेजसा= विवक्षाप्रयत्नसमीरितजाठराग्निना एव विवर्तते = मुखाद् बहिर्निर्गतः श्रोत्रग्राह्य- शब्दस्वरूपतया अन्यथाभावं लभते । आन्तरस्य ज्ञानरूपसूक्ष्मशब्दस्य स्वरूपादप्रच्युतस्याग्राह्यस्य बहिः स्थूलशब्दरूपतयाऽन्यथाग्रहणं विवर्त इति भावः ।

सूर्यमाया

अन्तःकरण में स्थित ज्ञानरूप सूक्ष्म शब्दतत्त्व का प्राणवायु में पूर्वोक्त समावेश का मूलकारण स्पष्ट करते हुए बाह्य 'वैखरी' शब्द को उसका विवर्त कार्य बताते हैं - 'अन्तःकरण' इत्यादि ।

अर्थ : - अन्तःकरण तत्त्व की शरीर में स्थिति का मूल आधार प्राणवायु है, क्योंकि जब तक प्राण रहता है, तभी तक शरीर में अन्तःकरण की स्थिति रहती

हि यावदन्तःकरणस्थितिः तावदेव जीवव्यवहारः, तन्नाशे ब्रह्मस्वरूपत्वमिति - तस्य च हृद्देशे स्थितिः, तस्याश्रयताम् = अधिकरणतां गतः = प्राप्तो वायुः = प्राणवायुः, यत्र हि प्राणवायुर्नास्ति तत्र नैवान्तःकरणं यथा मृतशरीरे - इत्यतस्तदधिकरणम्, अतः तद्धर्मेण = अन्तकरणस्य ज्ञानरूप-

---

विमर्शः - यथा अरणेरन्तःस्थं सूक्ष्मं ज्योतिर्मन्थनेन प्रेरितं प्रकाशदाहादिजनक-बाह्यज्योतीरूपेणाविर्भवति, तथा अन्तःकरणस्थो मनोभावमापन्नो ज्ञानरूपः सूक्ष्मः शब्दः प्रयत्नप्रेरितः सन् अन्तःकरणस्य स्थितिकारणत्वेनाश्रये प्राणवायौ समाविष्टो भवति, ततश्च ज्ञानरूपसूक्ष्मशब्दभावं प्राप्तः स प्राणवायुः स्वकारणेन जाठराग्निना प्रदीपितो ज्वालारूपेणोर्ध्वं गतो मुखान्निर्गत्य बहिः श्रोत्रग्राह्यशब्दरूपो भवति । अत्रत्यं तथ्यम् - 'अरणिस्थं यथा ज्योतिः' इत्यत्र प्राक् प्रकाशितम् ।

इदं तु बोध्यम् - यावदेव प्राणवायुस्तावदेवान्तःकरणमिति कारणत्वेनान्तःकरणस्य स्थितेर्नियामकः प्राणवायुः, प्राणवायोश्च कारणत्वेन स्थितिनियामको जाठराग्निः । तदित्थं प्राणवायुरन्तःकरणेन जाठराग्निना चोभाभ्यां संवलितो मध्यमणिः । स हि अन्तःकरणस्य धर्मेण ज्ञानरूपसूक्ष्मशब्देन समन्वितस्तन्मयः सन् स्वकारणेन जाठराग्निना सहकृतो मूर्धानमाहत्य मुखाद् बहिर्निर्गत्य श्रुतिगोचरतां यातीति प्रक्रिया । तदिह विवक्षासंकल्परूपेण मनोभावमापन्नस्य ज्ञानाभिन्नसूक्ष्मशब्दस्य प्राणवायौ

है, अत एव अन्तःकरण का आश्रय होने से प्राणवायु अन्तःकरण के ज्ञानरूप शब्दधर्म से समन्वित हो जाता है - जैसे कि जपापुष्प का आश्रय स्फटिक जपापुष्प के लौहित्यवर्ण से समन्वित प्रतिविम्बित होता है । अन्तःकरण के ज्ञानात्मक शब्दरूप धर्म से विशिष्ट वह प्राणवायु विवक्षाप्रयत्न से प्रेरित जठराग्नि

शब्देन धर्मेण समाविष्टः = पूर्वरीत्या समायुक्तः सन् तेजसैव= कायाग्निनैव विवर्तते = बहिः समागत्य शब्दरूपो भवतीति भावः ॥ ११५ ॥

समावेशे बीजं प्राणवायोरन्तःकरणाश्रयत्वम्, तदाह – 'आश्रयतां गतः' इति । यत एव प्राणवायुर्जीवोपाधेरन्तःकरणस्य शरीरे स्थितेर्नियामकः, अत एव हेतोः सोऽन्तःकरणधर्मेण ज्ञानरूपसूक्ष्मशब्देन समाविष्टस्तद्भावमापन्नः स्वकारणतेजसा कायाग्निना सहकृतो बाह्यशब्दरूपेण विवर्तते, इति हृदयम् ॥ ११५ ॥

के तेज से मूर्धस्थान में टकराकर वापस मुख से बाहर होकर श्रोत्र ग्राह्य - 'वैखरी' शब्द रूप में प्रकट होता है । अर्थात् आन्तर ज्ञानरूप शब्द का प्राणवायु में समावेश से बाह्यशब्द 'वैखरी' रूप विवर्त होता है ॥ ११५ ॥

विभज्य स्वात्मनो ग्रन्थीन् श्रुतिरूपैः पृथग्विधैः ।
प्राणो वर्णानभिव्यज्य वर्णेष्वेवोपलीयते ॥ ११६ ॥

प्रत्येकार्थप्रकाशिका

केन रूपेण बहिर्गच्छतीत्यत आह - विभज्येति । प्राणः = वायुः स्वात्मनः = स्वकीयरूपस्य ग्रन्थीन् = कादिवर्णरूपान्

आनन्दा

अन्तःकरणधर्मेण ज्ञानरूपशब्देन समाविष्टस्य तद्रूपमापन्नस्य प्राणवायोः परस्परविभक्तवर्णरूपग्रहणे प्रक्रियां विशदयति - विभज्येति ।

अन्वयः - प्राणः स्वात्मनः ग्रन्थीन् विभज्य पृथग्विधैः श्रुतिरूपैः वर्णान् अभिव्यज्य वर्णेषु एव उपलीयते ।

व्याख्या - प्राणः = उक्तदिशा ज्ञानाभिन्नसूक्ष्मशब्दरूपतां प्रतिपन्नः प्राणवायुः स्वात्मनः = निजस्वरूपस्य ग्रन्थीन् = उरःकण्ठशिरःपर्वसु बन्धान् विभज्य= विभिद्य पृथग्विधैः = कण्ठताल्वादिस्थानभेदेन परस्परं भिन्नप्रकारैः श्रुतिरूपैः= श्रावणप्रत्यक्षै र्बाह्यरूपै र्विशिष्टान् - नानाप्रकारान् भिन्नश्रुतीन् ध्वनिरूपानिति यावत्, 'धान्येन धनवान्' इत्यत्रेव 'पृथग्विधैः श्रुतिरूपैः' इत्यभेदार्थिका

सूर्यमाया

पूर्वोक्त प्रक्रियाऽनुसार ज्ञानरूप शब्द से गर्भित प्राणवायु का बाहर निकलकर विभक्त नाना वर्णों का रूपग्रहण की प्रक्रिया बताते हैं - 'विभज्य' इत्यादि ।

अर्थ : - ज्ञानरूप शब्द से समाविष्ट - पूर्वोक्त प्राणवायु अपने स्वरूप की ग्रन्थियों को - अर्थात् 'वक्ष, कण्ठ, मस्तक' इन सन्धिपर्वों (पोर) में अपने बन्धन की गाँठों को विभक्त कर भिन्नरूप में सुने जानेवाले व पृथक् आकार-प्रकारवाले नाना ' क, ख' आदि वर्णों को मुख से बाहर प्रकट कर स्वयं वह पृथक् न रहकर वर्णों में ही लीन हो जाता है। अर्थात् वर्णरूप हो जाता है ।

विभज्य = विभागं कृत्वा पृथग्विधैः = नानाप्रकारैः श्रुतिरूपैः= 'क-ख-गे' त्यादिरूपैः वर्णान् - अभिव्यज्य = प्रकाशयित्वा

तृतीया वर्णान् = क-खेत्यादीन् अभिव्यज्य = बहिः प्रकाशीकृत्य वर्णेषु= तेष्वेव ककारादिवर्णेषु उपलीयते = स्वयमप्यन्तर्हितो भवति । यथा मृत्पिण्डः समन्वितः सन् निजरूपमन्तर्भाव्य कम्बुग्रीवादिरूपान्तरपरिग्रहेण घटरूपो भवति, तथा प्राणो निजं ज्ञानाभिन्नसूक्ष्मशब्दस्वरूपमन्तर्भाव्य श्रुतिगोचरबाह्यवैखरीरूपपरिग्रहेण तत्र समन्वितः सन् वर्णरूपो भवतीति भावः ।

विमर्शः - इदं तु बोध्यम् - नित्यशब्दवादे सूक्ष्मशब्दात्मकमान्तरं ज्ञानं प्राणे समाविष्टं प्राणरूपतां प्रतिपन्नं प्राणप्रणाल्या बहिः श्रुतिविषय-वैखरीवर्णरूपेण विवर्तते । कार्यशब्दवादे तु प्राणविकारः स्थानभेदभिन्नो

आशय : - विवक्षा संकल्प के रूप में मनरूप में प्रतिष्ठित आन्तरज्ञानरूप शब्द प्राणवायु में समाविष्ट हो प्राणरूप हो जाता है, उसका ईंख के पोरों की गाँठ के समान 'उर, कण्ठ, मूर्ध' ये तीन गाँठ के रूप में सन्धिस्थल पर्व हैं, जहाँ वह अव्यक्तवर्ण के रूप में पूर्वावस्था में मयूर के अण्डरस के समान पिण्डित निबद्ध रहता है, कालपरिपाक से अण्डरस के आकारग्रह के अनन्तर जैसे अण्डा का भेदन कर पक्षी बाहर प्रकट हो जाता है, ऐसे ही कण्ठ, तालु आदि स्थानों में अभिघात से प्राणवायु व्यक्तवर्णों के रूप में आकार ग्रहण कर अपने सन्धिपर्वों की ग्रन्थियों का उद्भेदन कर मुख से बाहर निकलकर श्रवणयोग्य नाना वर्णों के रूप में प्रकट होता है। वह प्राणवायु स्वयं पृथक् न रहकर वर्णरूप हो जाता है, जैसे घड़ा बन जाने पर मृत्पिण्ड घड़े के रूप में समन्वित रहता है ।

यहाँ यह अवधेय है कि नित्य शब्दवाद में - ज्ञानरूप आन्तर शब्द है, जिसका विवर्त बाह्यशब्द वर्णरूप वैखरी ध्वनि है । नित्यशब्द व्यङ्ग्य है, उसका व्यञ्जक वर्णरूप बाह्यशब्द है । यह - 'चत्वारि शृङ्गा' इस ऋक् मन्त्र के 'द्वे

स्वयमपि वर्णेष्वेवोपलीयते = वर्णतः पृथक् न तिष्ठति, किन्तु तद्रूपमेव भवतीति भावः ॥ ११६ ॥

विभिन्नश्रुतिरूप एव शब्द:। नित्य: शब्दो व्यङ्ग्यस्तस्य व्यञ्जको ध्वनिरिति नित्यशब्दवादे द्विविध: शब्द: । कार्यशब्दवादे तु - प्राणविकार एकविध एव शब्द: । तदाह - 'चत्वारि श्रृङ्गा त्रयोऽस्य पादा:' इति मन्त्रव्याख्यानभाष्यम् - 'द्वे शीर्षे-द्वौ शब्दात्मानौ नित्य: कार्यश्च' इति । व्यङ्ग्यव्यञ्जकभेदेनेति प्राह कैयट: ॥ ११६ ॥

शीर्षे' के व्याख्यानभाष्य में कहा गया है । यह वैयाकरणों का अपना सिद्धान्त पक्ष है । अनित्य शब्दवाद में प्राणवायु का विकार ही वैखरी शब्द है, शब्दमात्र वायु का विकार है, जो कि पूर्वपक्ष के रूप में पहले कहा गया है ॥ ११६ ॥

अजस्रवृत्तिर्यः शब्दः सूक्ष्मत्वाच्चोपलभ्यते ।
व्यञ्जनाद्वायुरिव स स्वनिमित्तात् प्रतीयते ॥ ११७ ॥

प्रत्येकार्थप्रकाशिका

मतान्तरमाह - अजस्रेति । अजस्रं = सततं, वृत्तिः - सत्ता, यस्य स शब्दः, यः सूक्ष्मत्वात् अन्तर्बाह्ये सर्वत्र उपलभ्यते =

आनन्दा

आन्तरस्य ज्ञानरूपसूक्ष्मशब्दस्य प्राणवृत्त्या नानावर्णरूपो विवर्तो भवतीति स्वसिद्धान्तमभिधायेदानीमन्तर्बहिश्च सर्वत्र सर्वदा विद्यमानस्य सूक्ष्मशब्दस्य प्रचय एव स्थूलशब्द इति परमतमाह - अजस्रवृत्तिरिति ।

अन्वयः - अजस्रवृत्तिः यः शब्दः सूक्ष्मत्वात् च उपलभ्यते सः स्वनिमित्तात् व्यञ्जनात् वायुः इव प्रतीयते ।

व्याख्या - अजस्रवृत्तिः = सदा वर्तमानः यः = पूर्वप्रकृतः शब्दः सूक्ष्मत्वात् = अणुरूपत्वात् उपलभ्यते = अन्तर्बहिः सर्वत्र सूक्ष्मरूपेण प्राप्यते सः = सदा सर्वत्र सन्नपि सूक्ष्मः शब्दः स्वनिमित्तात् = स्वप्रचयकारणात् स्थानकरणाभिघातरूपात् व्यञ्जनात् = तालवृन्तादिव्यजनात् वायुरिव प्रतीयते = प्रचितः सन् व्यक्तरूपेण ज्ञायते ।

सूर्यमाया

ज्ञानरूप आन्तर शब्द का विवर्त वर्णरूप बाह्य शब्द है, यह अपना सिद्धान्त पक्ष पहले बताकर अब पुनः पूर्वपक्ष के रूप में - अन्दर या बाहर सर्वत्र वर्तमान सूक्ष्मशब्द का ही प्रचयरूप स्थूलशब्द है, इस भिन्नमतवादी का पक्ष समीक्षार्थ प्रस्तुत करते हैं - 'अजस्र' इत्यादि ।

अर्थ : - जिसकी सर्वदा शाश्वत सत्ता है, ऐसा जो नित्यशब्द अणुरूप सूक्ष्म होने से प्राणियों के अन्दर या बाहर सर्वत्र पाया जाता है, वही पंखे के आघात प्रतिघात

प्राप्यते, हस्तादिताडने सर्वत्रैव शब्दो लभ्यते, अतः सर्वत्र शब्दः सूक्ष्मरूपेण विद्यते इति भावः, स स्वनिमित्तात् =

विमर्शः - यथा सूक्ष्मतमत्वान्निष्प्रतिबन्धं सर्वत्रगः सर्वान्तर्यामी सर्वत्र वर्तमानोऽपि वायुर्यदा त्वव्यक्तो भवति, तदा वायुरिदानीं गुप्तो न चलतीति जना बहुशोऽनुभवन्ति । स एव सूक्ष्मोऽव्यक्तो वायुर्यदा तालवृन्तव्यजनाद्यभिघातेन प्रचितो व्यज्यते, तदा स स्पर्शेन स्फुट उपलभ्यते, तथैव सर्वप्राणिनामन्त र्बहिश्च सर्वत्र सदा वर्तमानोऽपि शब्दः सूक्ष्मत्वादव्यक्तो यदा स्वनिमित्तात् स्थानकरणाद्यभिघातात् प्रचितो भवति, तदा स ध्वनिरूपः सन् सर्वत्र स्फुटो व्यक्तो वीचीतरङ्गन्यायेन कदम्बमुकुलन्यायेन वा व्यापनशीलः श्रोत्रदेशं प्राप्तो गृह्यते जनैः ।

एवं हि सर्वत्र सदा वर्तमानः सूक्ष्म एव शब्दो वायुरिव स्वनिमित्तादुपचितो ध्वनिरूपः श्रुतिग्राह्यः शब्दो भवति, नापूर्वः कश्चनेति पूर्वोक्तहरिसिद्धान्ताद् विवर्तवादात् पक्षान्तरमिदम् । अन्यथाऽस्य स्वपक्षत्वे तु शब्दस्याखण्डज्ञानरूपत्वाभावे ब्रह्मरूपत्वासिद्धौ प्रकरणहानिः स्यात् । अयं हि प्रचयपक्षः 'अभ्राणीव प्रचीयन्ते' इत्यादिना वर्णितस्य परमाणु-परिणामवादस्यैव प्रकारान्तरमित्यवधेयम् ।

से उपचित व विवृद्ध वायु के समान स्थान और प्रयत्नों के आघातरूप अपने कारण से उपचित व घनीभूत संघात होकर स्थूल ध्वनि रूप में श्रवण से ग्राह्य 'शब्द' माना जाता है ।

आशय : - जैसे वायु अत्यन्त सूक्ष्म होने से सभी मूर्त वस्तुओं के अन्दर या बाहर विना किसी अवरोध के सर्वत्र सदा वर्तमान रहता हुआ भी कभी प्रवाह व वेग से रहित सूक्ष्म रूप में गुम पाया जाता है, सर्वसाधारण जन को संवेद्य नहीं होता, किन्तु वही पंखे के झलने से उपचय व वृद्धि को पाकर जब बहने लगता है, तब सबको सुखद स्पर्श से स्पष्ट संवेद्य हो जाता है । यह नहीं कि पहले वायु

प्रयत्नादिवशात् प्रतीयते = प्रकाशितः सन् ज्ञायते इत्यर्थः, व्यञ्जनात् वायुरिव = यथा व्यञ्जनादिद्वारा वायुः प्रकाशितो भवति तथा सदा सर्वत्र सूक्ष्मरूपेण शब्दः स्थित एव निमित्तैर्विवृद्धः सन् ज्ञायते, न तु नवीनो भवतीत्येतन्मतसारः ॥ ११७ ॥

इदं तु ध्येयम् – 'सूक्ष्मत्वान्नोपलभ्यते' इति, तदग्रे च क्वचित् 'प्रतीयते' इत्यस्य स्थाने 'प्रचीयते' इति च पाठान्तरमुपलभ्यते । सर्वत्र सदा विद्यमानोऽपि शब्दः सूक्ष्मत्वान्नोपलभ्यते, इति तदर्थः । तत्पक्षे शब्दस्यानुपलम्भे हेतुः सूक्ष्मत्वमिति । पाठभेदेऽपि फलितार्थोऽभिन्न एवेति न कश्चन विरोधः ॥ ११७ ॥

अत्यन्ततः था ही नहीं, जो कि पंखे से नया कोई अपूर्व वायु उत्पन्न हो गया हो । ऐसे ही प्रकृत में चर, अचर समस्त मूर्त वस्तुओं के अभ्यन्तर अथवा बाहर सर्वत्र सर्वदा सूक्ष्म रूप से विद्यमान जो शब्द है, वह करणों के आघात प्रतिघात से संचित घनीभूत होकर प्रकट स्थूलवर्णों के रूप में श्रोत्रेन्द्रिय का विषय हो जाता है। जोकि साधारण जन को शब्दव्यवहार का विषय होता है, यह नहीं कि अपूर्व कोई विलक्षण नया शब्द उत्पन्न हो गया हो ॥ ११७ ॥

तस्य प्राणे च या शक्तिर्या च बुद्धौ व्यवस्थिता ।
विवर्तमाना स्थानेषु सैषा भेदं प्रपद्यते ॥ ११८ ॥

प्रत्येकार्थप्रकाशिका

पक्षान्तरमाह - तस्येति । तस्य = शब्दस्य प्राणे = प्राणवायौ या शक्तिर्या च बुद्धौ = अन्तःकरणे व्यवस्थिता =

आनन्दा

"वायोरणूनां ज्ञानस्य" इत्युपक्रम्य स्थूलशब्दनिष्पत्तिप्रक्रियायां ये पक्ष-भेदा वर्णितास्तेषु सूक्ष्मवागात्मना स्थितस्याखण्डज्ञानस्य विवर्तो वर्णात्मकध्वनिरूपः स्थूलशब्द इति हरिसिद्धान्तः, ज्ञानभिन्नस्य सूक्ष्मशब्दस्य प्रचय एव स न विवर्त इति भिन्नः कस्यचन पक्षोऽणुवादप्रकारः । शब्दस्य ज्ञानरूपत्वं प्रचयवादं च विहायोभयपक्षसामञ्जस्येनोभयपक्षविलक्षणं मध्यममार्गीयं पक्षान्तरम् - बुद्धिस्थस्य सूक्ष्मशब्दस्य विवर्तवादमाह-तस्येति ।
अन्वयः - तस्य या च शक्तिः प्राणे, या बुद्धौ च व्यवस्थिता, सा एषा स्थानेषु विवर्तमाना भेदम् प्रतिपद्यते ।
व्याख्या - तस्य = वायोरणूनामित्यादिना पूर्वप्रकृतस्य लोकेऽर्थबोधकस्य स्थूलशब्दस्य या च शक्तिः = स्थूलशब्दबीजभूता स्थूलशब्दाकार-ग्रहणसामर्थ्यरूपा सूक्ष्मशब्दस्वरूपा प्राणे = बुद्धिसमाविष्टप्राणवायौ, या बुद्धौ = मनसि च अधिष्ठाने व्यवस्थिता = आश्रिता - श्रोत्रग्राह्यस्थूल-

---

सूर्यमाया

'वायोरणूनां ज्ञानस्य' यहाँ से आरम्भ कर ध्वनिरूप स्थूलशब्द की निष्पत्ति के विषय में पूर्वोक्त पक्षभेदों में - ज्ञानविवर्त पक्ष तथा सूक्ष्मशब्द का प्रचय पक्ष, इन दोनों से भिन्न व दोनों में काट छाँटकर मिला जुला मध्यममार्ग - सूक्ष्मशब्द का विवर्त पक्ष प्रस्तुत करते हैं - 'तस्य प्राणे' इत्यादि ।
अर्थ : - लोकप्रसिद्ध वर्ण, पद आदि ध्वनिरूप उस वाचक शब्द की जो बीजभूत - सूक्ष्मशब्दरूप शक्ति बुद्धि में और प्राणवायु में क्रमशः व्यवस्थित रहती है, वही सूक्ष्मशब्दरूप - शक्ति कण्ठ, तालु आदि स्थानों में नानारूप ग्रहण करती हुई क, ख आदि वर्णभेद को प्राप्त करती है ।

विद्यमानाऽस्ति- शब्दाधिष्ठानं प्राणो बुद्धिश्चेति फलितम्, सा एषा = बुद्धिशक्तिः प्राणशक्तिसहकारेण स्थानेषु = ताल्वादिषु

शब्दाभिव्यक्तेः प्राक् 'अमुं शब्दमुच्चारयामि' इति विवक्षासंकल्परूपेण तिष्ठति इत्यर्थः, सा एषा = प्राणवायौ समाविष्टा सूक्ष्मशब्दाकारा बुद्धिशक्तिः, स्थानेषु = उपाधिभूतेषु कण्ठताल्वादिषु विवर्तमाना = जपापुष्पोपाधिधर्मोपरागेण स्फटिकलौहित्यादिवत् कण्ठादिस्थानोपरागेण स्थूलवर्णाकारतयाऽन्यथा-भावमुपगृह्णती भेदम् = अभिन्नेऽपि शब्दतत्त्वे 'ककारखकारादि' परस्पर-व्यवच्छिन्नवर्णभेदोपरागं प्रतिपद्यते = उपगृह्णाति ।

विमर्शः - वक्तृभिरुच्चार्यमाणः श्रवणविषयो वर्णपदवाक्य - क्रमभेदभिन्न-स्तत्तदर्थवाचको योऽयं लोके प्रसिद्धः शब्दः, स प्रयोगात् प्राक् सूक्ष्मरूपो बुद्ध्यधिष्ठानः प्राणाधिष्ठानश्च । तस्य विवर्तोऽयं लोके प्रयुज्यमानो वर्णादिध्वनिरूपः शब्द इत्ययमन्यः पक्षः । तथाहि-सूक्ष्मः शब्दः प्रथमं प्रयोक्तुरन्तःकरणे तिष्ठति, स एव विवक्षाप्रयत्नवशाद् ज्वालावत् समिद्ध ऊर्ध्वं गतः प्राणे समाविश्य तिष्ठति, ततश्च प्राणाधिष्ठानः स एव सूक्ष्मः शब्दः प्रयत्नसमीरितः कण्ठताल्वादिषु स्थानेषु विभज्य प्रतिहतः स्थानानुरूपं भिन्नं स्थूलं श्रुतिगोचरं वर्णाद्याकारमुपगृह्य बहिः परिस्फुटति, इत्येवं सूक्ष्मशब्दस्य स्थूलशब्दभावरूपप्रक्रिया 'आत्मा बुद्ध्या समेत्यार्थान्' इत्यादि-पाणिनीयशिक्षादिशा बोध्या । प्राक् 'स मनोभावमापद्य' इत्यत्र सूक्ष्मशब्दात्मक-ज्ञानस्य विवर्तप्रक्रिया वर्णिता, इह तु ज्ञानभिन्नस्य बुद्ध्यधिष्ठानस्य प्राणाधिष्ठानस्य च सूक्ष्मशब्दस्येति पक्षभेदः ।

आशय : - जैसे वट आदि वृक्ष की एक ही सूक्ष्म बीजशक्ति क्रमशः अङ्कुर, पल्लव, शाखा, पुष्प आदि नाना रूपभेदों को ग्रहण करती है, अथवा वर्षा का अभिन्नरूप जलप्रवाह नाना स्थानों में पहुँचकर नाना वृक्षों व उनके नाना फलरसों का स्वरूप ग्रहण करता है, वैसे ही विवक्षा संकल्प के रूप में वक्ता की बुद्धि में अवस्थित सूक्ष्म शब्द ही विवक्षाप्रयत्न से प्राणवायु में समाविष्ट हो अग्नि की ज्वाला के समान ऊपर लपट के रूप में पहुँचकर तालु आदि स्थानों में नाना रूप

विवर्तमाना = वर्णादिरूपेण प्रतिभासमाना भेदम् = कादिभेदं (प्रतिपद्यते) = प्राप्नोतीत्यर्थः । तस्या एव शक्तेः कादिवर्णरूपेण अतात्त्विकान्यथाभावो भवतीति भावः ॥ ११८ ॥

यथा वटादिबीजेष्वन्तःस्थिता शक्तिः पृथ्वीजलानिलादिसहकारिसहकृता यथाक्रममङ्कुरशूकशाखापल्लवादिनानाऽकारमादधती बहिर्वृक्षरूपेण प्ररोहति, यथा वा जलदजलमेकरसमपि स्थितं नारिकेल - रसाल - ताल - बिल्वामलक-निम्बादिवृक्षस्थानभेदे मधुराम्लकटुकषायरसफलाकारतया विवर्तते, तथा बुद्धितत्त्वे तदाविष्टप्राणे च सूक्ष्मशब्दरूपा समवस्थिता शक्तिरेकाऽपि स्थानभेदसंनिपातेन, मणिकृपाण-मुकुराद्युपधानेन मुखप्रतिविम्बमिव वा भेदोपरागेण वर्णपदादिविभागं प्रतिपद्यते । प्रतिपन्नविभागा च सा शक्तिः स्वभेदोपरागं स्वाभिव्यङ्ग्ये नित्येऽभिन्ने शब्दतत्त्वे स्फोटाख्येऽनुरञ्जयति । इत्थं च श्रवणविषयो वर्णादिप्रविभागवान् स्थूलः शब्दः प्राणाधिष्ठानस्य बुद्ध्यधिष्ठानस्य सूक्ष्मशब्दस्यैवावस्थान्तरप्रतिभासरूपो विवर्त इति सारः ।

इदं तु बोध्यम् - अत्र 'तस्य' इत्यनेनानन्तरोक्तः प्रचयधर्मा ध्वनिर्नहि परामृश्यते, किन्तु पूर्वप्रकृतस्य स्थूलशब्दस्य वर्णपदादिध्वनिरूपस्य निष्पत्तिप्रक्रियायाः पक्षभेद एवान्वाख्यायते ॥ ११८ ॥

ग्रहण कर बाहर क ख आदि विभक्त वर्णों के रूप में अभिव्यक्त होता है, तथा अपने विभक्तरूपों से अपने अभिव्यङ्ग्य-स्फोटरूप नित्यशब्द को - 'स्फटिक को लाल गुलाब आदि फूंलों के समान ही' अनुरञ्जित कर देता है । इस प्रकार-ज्ञान से भिन्न बुद्धिस्थ तथा प्राणस्थ सूक्ष्मशब्द जो कि बुद्धि और प्राण में स्थूल शब्द की शक्ति रूप में स्थित होता है, उसका विवर्त ध्वनिरूप स्थूल शब्द है । यह ज्ञानविवर्तवाद से भिन्न-सूक्ष्मशब्द का विवर्त पक्ष है ॥ ११८ ॥

शब्देष्वेवाश्रिता शक्ति र्विश्वस्यास्य निबन्धिनी ।
यन्नेत्रः प्रतिभाऽत्मायं भेदरूपः प्रतीयते ॥ ११९ ॥

प्रत्येकार्थप्रकाशिका

'शब्द एव जगत्कारणम्' इति प्रथमत उक्तम्, तदेव पुनर्दार्ढ्याय स्मारयति - शब्द इति । अस्य विश्वस्य = संसारस्य निबन्धिनी = कारणम् शक्तिः = विवर्त्तनात्मिका शक्तिरित्यर्थः,

---

आनन्दा

शब्दविषयं पक्षभेदमुपवर्ण्य शास्त्रारम्भे 'अनादिनिधनम्' इत्यनेन प्रतिज्ञातं शब्दस्य जगत्कारणत्वं निगमयन् पुनरुपपादयति - शब्देष्वेवेति ।

अन्वयः - अस्य विश्वस्य निबन्धिनी शक्तिः शब्देषु एव आश्रिता, यन्नेत्रः प्रतिभात्मा अयम् भेदरूपः प्रतीयते ।

व्याख्या - अस्य = वाच्यवाचकभावापन्नस्य नामरूपात्मकस्य विश्वस्य= निखिलप्रपञ्चस्य निबन्धिनी = जन्मादिनियामिका शक्तिः = मात्रारूपा विवर्तशक्तिः शब्देषु = सूक्ष्मवागात्मकेषु आश्रिता = अधिष्ठिता । यन्नेत्रः= या नेत्रं यस्य सः - यच्छक्त्या बोधितः - अयम् = परिदृश्यमानः भेदरूपः= शब्दतदर्थसम्बन्धरूपः सांसारिकभेदव्यवहारः प्रतीयते = प्रतिभासते । वस्तुतोऽभिन्नेऽपि परब्रह्मणि शब्दतत्त्वे तस्य विवर्तशक्त्या कल्पितः शब्दतदर्थजगत्प्रक्रियारूपो भेदव्यवहार इति भावः ।

सूर्यमाया

शब्द का कारणविषयक पक्षभेद बताकर ग्रन्थारम्भ में प्रतिज्ञात - शब्द का जगत्कारणत्व पुनः निष्कर्ष रूप में बताते हैं - 'शब्देष्वेव' इत्यादि ।

अर्थ : - नामरूपात्मक दृश्यमान इस प्रत्यक्ष जगत् के जन्म आदि की नियामक-बीजशक्ति आन्तर (त्रिविध) सूक्ष्म शब्दों में ही अधिष्ठित है, जिससे प्रणीत व उद्भावित यह अनादिवासनामूलक भेदरूप अर्थव्यवहार प्रतीति का विषय होता है, वस्तुतः भेद है नहीं ।

शब्देषु एवाश्रिता = विवर्ताधिष्ठानतया शब्द एव कारणमिति भावः ।

यन्नेत्रः = या-उक्तशक्तिः नेत्रं ज्ञापकं यस्य सः,

विमर्शः - यथा सर्गात् प्राक् वटबीजादिषु शक्तिरूपेण - सूक्ष्मावस्थापन्नं वृक्षाङ्कुरादिकमव्यक्तं तिष्ठति, सर्गकाले च तत एव व्यक्तं तत् स्थूलरूपमाविर्भवति, यथा वा स्वप्ने विलयं लभमाना विषयमात्रा इन्द्रियेषु, इन्द्रियमात्रा मनसि, मनसो मात्रा बुद्धौ शक्तिरूपेण तिष्ठन्ति, प्रबोधे च लयविपरीतक्रमेण यथोत्तरं बुद्धिमात्राभ्यो मनः, मनसश्चेन्द्रियाणि प्रादुर्भावं लभमानानि विषयसंसर्गेण प्रविभक्तजागरितवृत्तिभेदमातन्वन्ति, तथा वाच्यवाचकभावेन व्यवस्थितं विश्वं प्रलयेऽविभागं गच्छत् शक्तिरूपेण सूक्ष्मे संहृतक्रमे वाक्तत्त्वे तिष्ठति, सर्गे च प्रविभक्तव्यक्तरूपं तत एवाविर्भूय कल्पितवाच्यवाचकभेदव्यवहारं लभते । जात्याकृतिव्यक्तयः सर्वे पदार्थाः प्रलये सूक्ष्मशब्दमाश्रयन्ते, सर्गे चाधिष्ठानशक्त्या स्वाभिव्यक्तिं लभमाना वाच्यवाचकभावेन तिष्ठन्तीति सारः । अक्षरार्थस्तु - दृश्यमानस्यास्य विश्वप्रपञ्चस्य प्रतिभासप्रयोजिका शक्तिः शब्देष्वेवाधिष्ठिता, यस्य ज्ञापिकायाः शक्तेर्ज्ञाप्योऽयमनादिवासनामूलो भेदप्रपञ्चः ।

इदं तु बोध्यम् - परा-पश्यन्ती-मध्यमाभिरान्तरशब्दस्य त्रिविधत्वमभिप्रेत्येह-'शब्देषु' इति बहुवचनप्रयोगः । वैखरीध्वनिरूपस्थूलशब्दाकारतोपग्रहशक्ति-स्तत्तदर्थविवर्तशक्तिश्च त्रिविधे सूक्ष्मे वाक्तत्त्वेऽधिष्ठितेति तदर्थः । तदुक्तं

आशय : - मूल, नाभि और हृदय देश में स्थित क्रमशः परा, पश्यन्ती, मध्यमा नामक त्रिविध सूक्ष्मशब्दों में ही विवर्तनारूप वह शक्ति है, जिससे वे सूक्ष्म शब्द घट, पट आदि नाना स्थूल शब्दों और अर्थों के रूप में विवर्तित हो जगत् के प्रमाता, प्रमाण, प्रमेयरूप भेदव्यवहार का कारण होते हैं । यह भेदव्यवहार अनादि जगत् में प्रवाहरूप से पूर्वपूर्व अनुभवजन्य वासना से उत्तरोत्तर प्रवर्तित होता आ रहा है ।

विवर्तवशादेव भेदव्यवहारः - वस्तुतस्तु नास्तीति सूचितम्, प्रतिभात्मा = प्रतिभा - 'तव ममे'त्यनादिवासना, आत्मा - आश्रयो यस्य सोऽयं भेदरूपः = सांसारिकव्यवहारः प्रतीयते = प्रतीतिमात्रम्, न तु वस्तुसत्ता भेदव्यवहारस्येति फलितम् ॥ ११९ ॥

प्राक् - "ब्रह्मेदं शब्दनिर्माणं शब्दशक्तिनिबन्धनम्" इति । अपरं च - 'वाच्येव विश्वं बहुरूपं निबद्धं

तदेतदेकं प्रविभज्योपभुङ्क्ते ।" इति ।

शब्दब्रह्मणो मायाभिधाना या शक्तिः, सैव तत्तत्प्राण्युपभोगादृष्टवैचित्र्यवशाद् 'वाच्यवाचक - ज्ञातृज्ञेयादि'भेदरूपं विश्वं सर्गे सन्तनोति, विसर्गे च संवृणोतीति हृदयम् ॥ ११९ ॥

इसका फलितार्थ यह है कि - अक्रम अखण्ड ज्ञानरूप शब्दब्रह्म जगत् का अधिष्ठान तत्त्व है, अर्थात् वह जगद्विवर्त का उपादानकारण है । घकार, टकार आदि वर्णों का भेद, तथा उनके क्रमभेद से घट, पट आदि पदों का भेद व वाक्यभेद, उनका अर्थभेद, ये सब शब्द की विवर्तना रूप विक्षेपशक्ति से भासित होते हैं, वस्तुतः भेदों की यथार्थ सत्ता नहीं है । एक अद्वितीय ब्रह्मरूप शब्द ही परमार्थ तत्त्व है ॥ ११९ ॥

षड्जादिभेदः शब्देन व्याख्यातो रूप्यते यतः ।
तस्मादर्थविधाः सर्वाः शब्दमात्राः सुनिश्चिताः ॥ १२० ॥

प्रत्येकार्थप्रकाशिका

व्यवहारमात्रस्य शब्दाधीनत्वं प्रदर्शयति - षड्जेति । व्याख्यातः = सङ्गीतशास्त्रे कथितः षड्जादिभेदः =

आनन्दा

उपर्युक्तदिशा शब्दो न केवलं विश्वस्य कारणमेव, अपितु वस्तुस्वरूप-भेदावधारणस्य - परोक्षापरोक्षेष्टानिष्टवस्तुस्वरूपनिर्धारणपूर्वकप्रवृत्तिनिवृत्तिरूप-सर्वव्यवहारविशेषस्यापि तत्तत्संज्ञाशब्द एव निबन्धनमित्याह - 'षड्जादि' इति ।

अन्वयः - यतः व्याख्यातः षड्जादिभेदः शब्देन रूप्यते, तस्मात् सर्वाः अर्थविधाः शब्दमात्राः सुनिश्चिताः ।

व्याख्या - यतः = यस्मात् कारणात् व्याख्यातः = गान्धर्वशास्त्रे प्रख्यातोऽपि षड्जादिभेदः = षड्जादीनां - निषादर्षभ-गान्धार-षड्ज-मध्यम-धैवत-पञ्चमानां सप्तस्वराणां भेदः - परस्परविलक्षणस्वरूपभेदः, शब्देन = गान्धर्वशास्त्रसंकेतितेन तत्तत्संज्ञाशब्दविशेषेणैव रूप्यते = अवधार्य्यते नान्यथा, तस्मात् कारणात् सर्वाः = सकलाः अर्थविधाः = अर्थानां गवादीनां परस्परविलक्षणस्वरूपविशेषप्रकाराः शब्दमात्राः = डित्थ - डवित्थादित-त्तत्संज्ञाशब्दपरिच्छेद्या वाचकशब्दानुविद्धाः शब्दात्मकाः सुनिश्चिताः = शब्दार्थयोस्तादात्म्येन निर्धारिताः ।

सूर्यमाया

शब्द जगत् का केवल कारण ही नहीं है, अपितु वह प्रत्येक वस्तुओं के स्वरूप को नामरूप से जानने का तथा सभी व्यवहारों का प्रवर्तक भी है, यह बताते हैं - 'षड्जादि' इत्यादि ।

अर्थ : - चूँकि संगीतशास्त्र में प्रख्यात - 'षड्ज-निषाद' इत्यादि सात स्वरों का परस्पर स्वरूपभेद उनके नाम से ही सिखाया व परिचय कराया जाता है, तथा

षड्जर्षभ-गान्धारेत्यादिसप्तस्वरभेदः, यतः शब्देन रूप्यते = निश्चीयते, नहि कश्चिदप्यर्थो वाचकशब्दमन्तरा व्यवह्रियते- अज्ञशिरोमणिर्गोपालोऽपि स्वगोयूथे प्रत्येकं गवां 'हरी-नीली'-

---

विमर्शः - पुरस्तात् परिदृश्यमानोऽपि पदार्थस्तावन्न परिज्ञायते, यावत्तस्य वाचकः संज्ञाशब्दः केनापि विशेषज्ञेन न बोध्यते । बोधिते तु संज्ञाशब्दे तदर्थस्य विविक्तं स्वरूपं सम्यक् निश्चीयते - 'तदिदं वस्तु' इति । अत एव तत्रभवत आचार्य्यस्य पाणिनेरिदमादिमं सूत्रम् - 'वृद्धिरादैच्' इति संज्ञाप्रकरणम् ।

संगीतशास्त्रमध्यापयन् कुशलो गाथकः षड्ज-मध्यम-धैवतादिसप्तस्वराणां दुरवधारं स्वरूपं - तेषां च मात्राविशेषं तालं वा संगीतशास्त्रसंकेतितेन शब्देनैव वेणु-वीणा-मृदङ्ग-मुरजादिलयैः प्रबोधयति शिक्षमाणान् । संज्ञाशब्दे प्रत्यभिज्ञाते सत्येव प्रत्यभिजानाति तत्र भगवान् रामचन्द्रः - सोऽयमात्मजो रघुवंशमणिर्लवोऽयं कुशो वेति, परिचिनोति च सम्राड् दुष्यन्तः- भारतसौभाग्यभालो भरतोऽयमिति । पांसुलपादो गोपालको हालिको वाहीको वा गोबलीवर्दादींश्चारयन्नयन्नानयन् रथे वहन् वा डित्थ-डवित्थेत्यादिसंज्ञाभिः संबोधयन् प्रवर्तयति निवर्तयति वा ।

जाना जाता है, अत एव सभी वस्तुओं का पृथक् पृथक् स्वरूप उनका अपने नामरूप में ही सुनिश्चित किये जाते हैं । इस प्रकार वस्तुओं का स्वरूपज्ञान तथा सारा व्यवहार शब्द के अधीन है ।

आशय : - संगीतशास्त्र में प्रख्यात व परिभाषित षड्ज आदि सात स्वरों का जो परस्पर भिन्नस्वरूप है, वह सीखनेवालों को संगीतज्ञ के द्वारा 'निषाद, ऋषभ, गान्धार, षड्ज, मध्यम, धैवत, और पञ्चम, इन संज्ञाशब्दों से कण्ठ के उच्चारण द्वारा अथवा वेणु, वीणा के वादन द्वारा बताये जाने पर स्पष्ट जाना व समझा जाता है, इन संज्ञाशब्दों के उच्चारण विना नहीं । यही नहीं, अनजाने किसी भी वस्तु का स्वरूपपरिचय उसके नामशब्द से जब कराया जाता है कि- 'यह लक्ष्मणा नामक औषधि है - यह संजीवनी बूटी है', तभी उसका स्वरूप ज्ञान तथा उसका इष्ट उपयोग व व्यवहार होता है । दुर्ज्ञेय शास्त्रीय विषयों के

त्यादि नाम कृत्वा आह्वानादिव्यवहारं विधत्ते, तस्मात् सर्वा अर्थविधाः = अर्थप्रकाराः, शब्दमात्राः = शब्दनिबन्धनाः, परिमाणे मात्रच्, सुनिश्चिताः = निर्णीता इत्यर्थः ॥ १२० ॥

का कथा प्रवृत्तिनिवृत्तिव्यवहारस्य ? यः कश्चनार्थविशेषः प्रत्यक्षेणानुमानेन शब्देन वा बोधविषयो भवति, स सर्वः शब्दानुविद्धः शब्दात्मकस्वरूप एव निर्धारितो भवति । घट इति पट इति व्यवसायात्मको निर्विकल्पकः प्रत्ययोऽपि घट-पटशब्दात्मनैव भवति विविक्तविषयः । तदेतदग्रे वक्ष्यते- 'न सोऽस्ति प्रत्ययो लोके' इति । तदेवं सर्वोऽप्यर्थः शब्देनावधारितस्वरूपः शब्दस्वरूपो वा रूढः शब्दात्मकस्वरूप एव भवति प्रवृत्तिनिवृत्तिरूप - सर्वव्यवहारविषय इति सिद्धं विश्वव्यवहारस्य शब्दाधीनत्वम् ॥ अद्यत्वे तु सप्तद्वीपा वसुमतीयं दूरसंचारसाधनैराकाशवाण्यादिभिः साक्षादेव सम्पर्कसूत्रे सुग्रथितेति शब्दस्य विश्वव्यवहारनिबन्धनत्वे कस्यापि क्वापि का संशीतिः ? १२० ॥

प्रशिक्षण आदि व्यवहार का तो कहना ही क्या है, यहाँ तक कि जो अनजान पशु पक्षी आदि हैं, तथा उनका पालन पोषण करने वाले अज्ञजन हैं, उनका भी परस्पर व्यवहार शब्द से प्रवर्तित होता है ।

पशु, पक्षी, भेड़, बक्कर पालन करने वाले भी किसी न किसी सांकेतिक नाम से उनको उठाते, बैठाते, खिलाते, पिलाते हैं । ग्वाल बाल अपने गौ बैल को डित्थ-डवित्थ आदि किसी नाम से उनको संबोधित कर हल या गाड़ी में जोतते हैं, हाँकते हैं । हाथी का महावत, घोड़े का सवार किसी संकेत शब्द से उनका संचालन करता है, मदारी भालू बन्दर को अपने परिभाषित शब्द से ही उनको नचाता है ।

अतः समस्त लोकव्यवहार शब्द से प्रवर्तित है, शब्द के ही अधीन है । आज सम्पूर्ण विश्व का व्यवहार 'आकाशवाणी, दूरभाष' आदि वैज्ञानिक दूरसंचार साधनों के माध्यम से शब्द द्वारा प्रत्यक्ष संचालित हो रहा है, इसमें सन्देह ही कहाँ है ? १२० ॥

शब्दस्य परिणामोऽयमित्याम्नायविदो विदुः ।
छन्दोभ्य एव प्रथममेतद् विश्वं व्यवर्तत ॥ १२१ ॥

प्रत्येकार्थप्रकाशिका

शब्दादेव सृष्टिरित्यत्र वेदप्रमाणादि दर्शयति - शब्दस्येति । अयम् = संसारः शब्दस्य परिणामः = शब्दादेव जात इत्यर्थः, अत्रोत्पत्तितो विवर्त्तोत्पत्तिर्ग्राह्येति पूर्वोक्तमनु-

---

आनन्दा

सर्वत्र शब्दसमन्वयात् सिद्धमपि जगतः शब्दकार्यत्वं श्रुत्याऽपि प्रमाणयति - शब्दस्य परिणामोऽयमिति ।

अन्वयः - सरलः ।

व्याख्या - अयम् = नामरूपात्मको दृश्यमानः संसारः, शब्दस्य = अखण्डशब्दतत्त्वस्य परिणामः = विवर्तरूपः कार्यः, इति - आम्नायविदः= वेदविदः विदुः = विदन्ति । तथाहि वेद आह - एतद् = प्रत्यक्षम् विश्वम् = जगत् प्रथमम् = आदौ छन्दोभ्यः = कर्तृपारतन्त्र्यरहितेभ्योऽपौरुषेयेभ्यो वेदेभ्यः शब्दब्रह्मण एव व्यवर्तत = अतत्त्वतोऽन्यथात्वेनोदभवत् । विवर्तकार्यमभवदित्यर्थः । स हि वेदः - ''वागेव विश्वा भुवनानि जज्ञे'' इत्यादि-ऋङ्मन्त्रवर्णात्मकः ।

विमर्शः - कार्येषु कारणधर्मसमन्वयं दृष्ट्वा, तदनुगतकारणं कल्पयन्ति कार्यकारणभावविद आचार्याः । यथाहि - नैयायिकवैशेषिका आरम्भवादिनः स्थूलपृथिव्यादिषु गन्धादिसमन्वयं दृष्ट्वा तत्कारणं तदन्वितं सूक्ष्मं

सूर्यमाया

शब्द से विश्व की सृष्टि हुई है, यह वेद से भी प्रमाणित करते हैं - 'शब्दस्य' इत्यादि ।

अर्थ : - यह विश्व शब्द का कार्य है - ऐसा वेद के विद्वान् मानते हैं, क्योंकि वेदमन्त्रों का वचन है कि - यह विश्व पहले अपौरुषेय वेदशब्दों से ही स्थूल दृश्य रूप में प्रकट हुआ है, अर्थात् उत्पन्न हुआ है ।

सन्धेयम् । इत्याम्नायविदः = वेदज्ञा विदुः = जानन्ति, तमेव वेदमाह-छन्दोभ्य इति । एतद् विश्वम् = संसारः प्रथमम् = सृष्ट्यादौ छन्दोभ्य एव = वेदेभ्य एव व्यवर्तत = अजायत

परमाणुसमुदायं कल्पयन्ति, घटादिषु वा मृत्समन्वयं दृष्ट्वा मृत्तिकां घटकारणं कल्पयन्ति, सांख्याः परिणामवादिनो जगति सुखदुःखमोहसमन्वयं दृष्ट्वा सुखदुःखमोहान्वितं सत्त्वरजस्तमःस्वभावं प्रधानं जगत्कारणं कल्पयन्ति, औपनिषदा विवर्तवादिनस्तु त्रिगुणात्मिकां मायां परिणामकारणं - ब्रह्म च विवर्तोपादानं कल्पयन्ति, तथा वेदप्रमाणकाः शब्दविदः सर्वत्र शब्दसमन्वयं दृष्ट्वा सूक्ष्मं शब्दतत्त्वमेव जगद्विवर्तोपादानं सिद्धान्तयन्ति । तदेतदादावेव प्रतिज्ञातम् - ''अनादिनिधनं ब्रह्म शब्दतत्त्वम्...........विवर्ततेऽर्थभावेन'' इति । नात्र तर्क एव प्रमाणम्, परंच वेदा अप्यत्र प्रमाणं तदेतदिहाह ।

इदं तु बोध्यम् - 'विवर्ततेऽर्थभावेन' इत्युपक्रमबलात् मध्ये च- 'तेजसैव विवर्तते' (श्लो. ११५), 'विवर्तमानाःस्थानेषु' (श्लो. ११८), इत्यभ्यासेनोक्तिबलात्, इह च 'एतद्विश्वं व्यवर्तत' इत्युपसंहारबलाच्चात्र परिणामपदं तात्त्विकाऽतात्त्विकविशेषमनपेक्ष्य सामान्यत उत्पत्तिपरम् । तच्च प्रकरणबलाद् अत्र विवर्तकार्यपरमेवेत्यवधेयम् ।

नामरूपाभ्यां प्रत्यक्षं दृश्यमानोऽयं संसारः सर्वप्रथमं वेदेभ्य ऋग्यजुः-सामभ्य एव व्यवर्तत = अतात्त्विकान्यथाभावं प्रापद्यतेत्यक्षरार्थः । तत्र प्रमाणं श्रुतयः स्मृतयश्च । तथाहि श्रुतिः - ''स उ एवैष ऋङ्मयो यजुर्मयः साममयो वैराजः पुरुषः । पुरुषो वै लोकः, पुरुषो यज्ञः'' इति ।

स एष लोकत्रयस्य स्रष्टा विराडेव = वैराजः - विराट् पुरुषः ऋग्यजुःसामशरीरः, तेन सृष्टत्वाद् व्याप्य तेष्वधिष्ठितत्वाद्वा लोकोऽपि

आशय : - दार्शनिकों की प्रक्रिया प्रणाली है कि कार्यों में कारणधर्म का समन्वय देखकर तदनुरूप ही उनके कारण की अवधारणा करते हैं । जैसे कि- घट-शराव आदि कार्यों में मृत्तिका का समन्वय रहने से नैयायिक - वैशेषिक उनका कारण मृत्तिका को निश्चित करते हैं, इनसे दूसरे सांख्यवादी जगत् के वस्तुमात्र में सुख दुःख मोह का समन्वय रहने से क्रमशः सुख-दुःख-मोहात्मक-

इत्यर्थः । वेदानां शब्दरूपत्वात् शब्दादुत्पत्तिरिति सिद्धम् । अत्र प्रमाणम् - ऋग्वर्णः- ''वागेव विश्वा भुवनानि जज्ञे
वाच इत् सर्वमसृजत यच्च मर्त्यम्'' इति ।

पुरुषः, लोकसाधनं यज्ञोऽपि ऋग्यजुःसामस्वरूपवेदपुरुषसाध्यत्वात् पुरुषः इत्यर्थः । अनेन मन्त्रेण त्रयीरूपवेदशब्दस्य विश्वोपादानत्वं स्पष्टम् ।

अपि च - ''एष वै छन्दस्यः साममयः प्रथमोऽक्षन् वैराजः पुरुषो योऽन्नमसृजत'' इत्ययं मन्त्रोऽप्युक्तार्थे प्रमाणम् ।

छन्दस्यः = छन्दसि भवः = गायत्रीत्रिष्टुबनुष्टुबादिछन्दःशरीरः, छन्दसि निवासो वाऽस्य स विराट् पुरुषः - ''छन्दसो यदणौ'' इत्युक्तार्थे यत् । यद्वा - छन्दसा = स्वातन्त्र्येण स्वेच्छया निर्मितो लीलाविग्रहः पुरुषः, न तु कर्मबन्धपारतन्त्र्येणान्येन वा केनापि रचितः, ''छन्दसो निर्मिते'' इत्यनेन वा यत् प्रत्ययः । सोऽयमपौरुषेयो यदृच्छात्मको विराड्विग्रहो हिरण्यगर्भाख्यः शब्दब्रह्मवेदः प्रथमः पुरुषः ''स वै शरीरी प्रथमः स वै पुरुष उच्यते'' इति स्मृतः, सर्वेषामादिकर्ता, यो भूर्भुवःस्वरादिकं लोकं व्रीहियवादिकमन्नं वा भूतकारणमसृजतेत्यर्थः । तदनेन स्पष्टम् - ''छन्दोभ्य एव प्रथममेतद् विश्वं व्यवर्तत'' इति । ''वागेव विश्वा भुवनानि जज्ञे'' इति च ऋङ्मन्त्रवर्णो वाचो विश्वस्योपादानकारणत्वं वर्णयति ।

छन्दस्यः स्वयम्भूः प्रजापतिः स्वस्वरूपच्छन्दोमयीभि र्मात्राशक्तिभि-स्त्रिगुणात्मिकाभिरात्मनो बहुधा विभागं सर्गकाले प्रकल्प्य विसर्गकाले च

सत्त्व, रज, तमोगुणों की समानावस्था प्रकृति को कारण मानते हैं, ब्रह्मवादी - मायाशक्ति को परिणामकारण मानते हैं तथा उससे विलक्षण चेतन ब्रह्म को विवर्तकारण मानते हैं, ऐसे ही शब्दप्रमाणवादी वैयाकरण - जगत् में सर्वत्र शब्द का समन्वय पाये जाने से जगत् का विवर्तकारण शब्द को सिद्ध करते हैं, जो कि आरम्भ में - 'अनादिनिधनम्' इत्यादि से प्रतिज्ञात है । इसका आधारभूत प्रमाण केवल उपर्युक्त तर्क ही नहीं है, अपितु प्रमाणस्वरूप वेदमन्त्र भी कहते हैं कि - वेदों से ही यह विश्व उत्पन्न हुआ है, जो कि वेद अखण्ड ज्ञानात्मक शब्दब्रह्मरूप है । स्पष्टशब्दों में - ''वागेव विश्वा भुवनानि जज्ञे'' यह ऋग्वेदमन्त्र

किञ्च - "एष वै छन्दस्यः साममयः प्रथमो वैराजः पुरुषोऽन्नमसृजत । तस्मात् पशवोऽजायन्त पशुभ्यो वनस्पतयो वनस्पतिभ्यो दिशः" इत्यादिश्रुतिः । स्मृतिरपि -

"विभज्य बहुधाऽऽत्मानं स छन्दस्यः प्रजापतिः ।
छन्दोमयीभि र्मात्राभि र्बहुधैव विवेश तम् ॥"
इत्यादि ।

किञ्च दृष्टान्तोऽपि - यथा घटादौ सर्वत्र मृद्दर्शनात् - मृदुपादानकत्वं सिध्यति, तथैव सर्वत्र शब्दमात्रासमन्वयात् शब्दोपादानकत्वम् ॥ १२१ ॥

सकलविभागमुपसंहृत्य तमेवाखण्डं छन्दस्यमात्मानं विशति - समाहितो भवतीति - "विभज्य बहुधात्मानम्" इत्यादि पुराकल्पोऽप्याह ।

महाभारतशान्तिपर्वण्यप्याह -

"अनादिनिधना नित्या वागुत्सृष्टा स्वयंभुवा ।
आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः ॥" इति ।

तदिदं शब्दस्य जगद्विवर्तोपादानत्वं श्रुतिस्मृतिप्रमाणशतसिद्धम् ॥ १२१ ॥

कहता है कि - शब्दतत्त्व ने ही सभी भुवनों की रचना की है । ऐसे ही "स उ एवैष ऋङ्मयो यजुर्मयः" इत्यादि मन्त्रभाग तथा "एष वै छन्दस्यः साममयः प्रथमः" इत्यादि मन्त्र भी कहते हैं कि - जिसने पृथिवी तथा धान्य, यव आदि अन्न की सृष्टि की है, वह विराट् पुरुष अविनाशी नित्य वेदशब्दस्वरूप है । इन सब मन्त्रवर्णों से प्रमाणित होता है कि समस्त विश्वप्रपञ्च का विवर्तोपादानकारण शब्दब्रह्म है, शब्द ही विश्व का अधिष्ठान तत्त्व है, सभी पदार्थ शब्दाश्रित हैं ॥ १२१ ॥

इतिकर्तव्यता लोके सर्वा शब्दव्यपाश्रया ।
यां पूर्वाहितसंस्कारो बालोऽपि प्रतिपद्यते ॥ १२२ ॥

प्रत्येकार्थप्रकाशिका

सर्वत्र शब्दसमन्वयमुपपादयति - इतिकर्तव्यतेति । लोके सर्वा इतिकर्तव्यता = 'इदं कर्तव्यमिति' नियोगादिसकलव्यवहाराः

आनन्दा

सर्वत्र शब्दसमन्वयदर्शनेन वेदप्रमाणेन च जगत उत्पत्तौ शब्दस्य कारणत्वमुपपाद्येदानीं व्यवहारमात्रं प्रति शब्दस्य कारणत्वमुपपादयितुं व्यवहारमात्रे शब्दसमन्वयं दर्शयति - इतिकर्तव्यतेति ।

अन्वयः - लोके सर्वा इतिकर्तव्यता शब्दव्यपाश्रया, बालः अपि पूर्वाहितसंस्कारः यां प्रतिपद्यते ।

व्याख्या - लोके = लोकव्यवहारे सर्वा = सर्वविधा इतिकर्तव्यता = 'त्वयेदं कर्तव्यम् - इदं न कर्तव्यम्, गामानय - गां बधान' इत्यादिरूपा प्रयोजकवृद्धस्य प्रवर्तना, प्रयोज्यवृद्धस्य वा प्रवृत्तिनिवृत्तिरूपा जायमाना चेष्टा, शब्दव्यपाश्रया = शब्दान्वयव्यतिरेकाभ्यां प्रवर्त्यमाना शब्दप्रयोज्या । का कथा प्रयोज्यप्रयोजकवृद्धव्यवहारस्य, बालोऽपि = व्युत्पित्सुः शिशुरपि

सूर्यमाया

शब्द को जगत् का मूल कारण बताकर आबालवृद्ध सब के व्यवहार का व्यापक कारण बताते हैं - 'इतिकर्तव्यता' इत्यादि ।

अर्थ : - लोक में सकल कर्तव्यप्रणाली शब्द के अधीन है । जिसको कि अबोध बालक भी अपने पूर्वजन्मों के निहितसंस्कार बल से बताये विना भी (माता-पिता आदि बड़ों के शब्दव्यवहार से) स्वतः ग्रहण कर लेता है ।

आशय : - विश्व में औषधि, वनस्पति, पेड़-पौधे आदि अनन्त कितने ही वस्तु-विशेष हैं, जिनके नाम का ज्ञान न रहने पर उनका समुचित प्रयोग - क्रियान्वयन नहीं होता, जब तक कि उनका नाम से स्वरूप परिचय न हो जाय ।

शब्दव्यपाश्रया = शब्दनिबन्धना, पूर्वाहितसंस्कारः = जन्मान्तरसञ्चितसंस्कारः बालोऽपि याम् = इतिकर्तव्यतां प्रतिपद्यते = शब्देन व्यवहरतीत्यर्थः । किमु वक्तव्यम् -

---

पूर्वाहितसंस्कारः = पूर्वस्मिन् जन्मनि आहितः = शब्दव्यवहारबलेन चित्ते खचितः संस्कारो यस्य स, इह जन्मनि वृद्धव्यवहारेण प्रबुद्धशब्दसंस्कारः सन् याम् = शब्दसमनुगतामितिकर्तव्यतां प्रवृत्तिनिवृत्तिचेष्टारूपां प्रतिपद्यते= प्राप्नोति ।

विमर्शः - वृद्धव्यवहारदर्शनप्रबुद्धसंस्कारः शिशुवर्गो मातापित्रादिशिक्षणं विनाऽपि स्वत एव वयःक्रमेण 'तात - अम्ब' इत्यादि वक्तुं ज्ञातुं च प्रक्रमते, इति सर्वो लोकव्यवहारः शब्दान्वयव्यतिरेकानुविधायी शब्दसमनुगत इति सिद्धम् ।

एवं हि लोके दृश्यते यत् वस्तुतः सन्नप्यर्थः शब्देनानुपदिष्टोऽसन्निव न भवति ज्ञानविषयः । शशविषाणादिरसन्नपि शब्दव्यपदेशबलेन भवति विकल्पाख्यज्ञानविषयः । यथा - "एष वन्ध्यासुतो भाति खपुष्पकृत-शेखरः" इति । तदाह भगवान् पतञ्जलि योगसूत्रम् - "शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः" इति । "वस्तुशून्यत्वेऽपि शब्दज्ञानमाहात्म्यनिबन्धनो व्यवहारो दृश्यते" इति च तस्य व्यासभाष्यम्, (पा० १ सू० ९) । एवं च लोके विधिनिषेधनियोगरूपाः सर्वाः प्रवृत्तयः शब्दनिबन्धना एवेति स्पष्टम् । अयमत्र सारः - वचनप्रतिवचनसमर्थानां नियोज्यनियोजकानां प्रौढानां व्यवहारस्य

यहाँ तक कि वे समक्ष वर्तमान होने पर भी असत् ही व्यवहृत होते हैं । इसके विपरीत आकाशपुष्प - शशशृङ्ग इत्यादि जो लोक में असिद्ध - नितान्त असत् हैं, उनका उक्त शब्दों से निर्देश करने पर बुद्धिपटल पर कुछ न कुछ कोई कल्पित आकार प्रकार गृहीत होता है तथा वे बुद्धिकल्पित सत्रूप में व्यवहार का विषय हो जाते हैं । इन अनुभवों से यह स्पष्ट होता है कि शब्द सकल

लोकेऽसदपि वस्तु शशविषाणादि वाचा व्यवह्रियते, सदपि वस्तु शब्दं विना न व्यवह्रियते, अतो यावद्व्यवहारे शब्दसमन्वय इति भावः ॥ १२२ ॥

शब्दान्वयव्यतिरेकमूलकत्वे तु का शङ्का?, ये त्वलब्धवाक्शक्तयः स्तनन्धया मुग्धाः शिशवस्तेषामपि दुग्धपानक्रीडाहासेतिकर्तव्यताप्रवृत्तयो मात्रादेः सस्नेहचुचकारादिसंकेतशब्दैः प्राग्भवसंचितशब्दवासनाप्रतिबोधादेव जायन्ते, नेतरथेति तेषां तथा प्रवृत्त्या गम्यते ॥ १२२ ॥

वस्तुओं का अनुगत रूप है तथा उनके इतिकर्तव्यतारूप प्रवृत्तिनिवृत्ति व्यवहार का मूल कारण है। किसी वस्तु का संकेतरूप - संज्ञास्वरूप का निश्चय हुए विना 'हान - उपादान' आदि कोई व्यवहार नहीं होता है। जिससे यह तथ्य प्रकट होता है कि - अर्थसृष्टि का मूल अधिष्ठानतत्त्व शब्द है, जो मूलकारणरूप में सकल पदार्थ में तथा उनके यावत् व्यवहार में समनुगत है।

आज के विज्ञानयुग में तो आकाशवाणी आदि दूरसंचार साधनों व नियन्त्रण-कक्षों से यह स्पष्ट हो चुका है कि - विश्व का समस्त व्यवहारसंचालन व नियन्त्रण शब्द के अधीन है ॥ १२२ ॥

आद्यः करणविन्यासः प्राणस्योर्ध्वसमीरणम् ।
स्थानानामभिघातश्च न विना शब्दभावनाम् ॥ १२३ ॥

प्रत्येकार्थप्रकाशिका

युक्त्यन्तरमाह - आद्य इति । शब्दभावनां विना = जन्मान्तरे शब्दभावना नासीच्चेत् तदेत्यर्थः, आद्यः = प्राथमिकः, करणविन्यासः = शब्दश्रवणार्थं श्रोत्रेन्द्रियस्य सावधानताकरणम् प्राणस्य = तदाख्यवायोः ऊर्ध्वसमीरणम् = ऊर्ध्वगमनम्-

आनन्दा

"यां पूर्वाहितसंस्कारो बालोऽपि प्रतिपद्यते" इत्यनन्तरपूर्वोक्तमेवार्थं युक्त्या तर्केण व्यवस्थापयति - आद्य इति ।

अन्वयः - सरलः ।

व्याख्या - आद्यः = आदौ भवः - सर्वप्रथमं जायमानः, करणविन्यासः= वृद्धोच्चारितशब्दश्रवणेच्छया करणस्य श्रोत्रेन्द्रियस्य योग्यविषये शब्दे योगकरणम् सन्निकर्षस्थापनम्, शब्दविवक्षया चात्मबुद्धिमनसां मिथः संयोजनम्, किं च प्राणस्य ऊर्ध्वसमीरणम् = मूर्ध्नि नयनम्, स्थानानाम्= तत्तद्वर्णोच्चारणयोग्यकण्ठताल्वादिस्थानानाम् अभिघातः = जिह्वाग्रोपाग्रादि-भिराहननं च शब्दभावनां विना = इह जन्मनि पूर्वमश्रुतशब्दस्याकृत-शब्दोच्चारणस्य च बालस्य पूर्वपूर्वजन्मान्तरीयशब्दानुभवाहितानादिसंस्कारमन्तरेण

सूर्यमाया

अव्यवहित पूर्वश्लोक में कथित - इतिकर्तव्यता का बीजभूत बालक के जन्मान्तरीय शब्दविषयक पूर्वसंस्कार का तर्क द्वारा भी उपपादन करते हैं - 'आद्यः' इत्यादि ।

अर्थ : - वृद्धों से उच्चारित शब्द को जानने के लिए अपने श्रोत्रेन्द्रिय को शब्द की ओर प्रवृत्त करने का जो किसी भी बालक का प्राथमिक प्रयास होता है,

शब्दोच्चारणार्थं वायोरूर्ध्वप्रेरणमित्यर्थः, स्थानानाम् = ताल्वादीनाम् अभिघातश्च = जिह्वादिसंयोगकरणम् न स्यात् ।

जन्मान्तरे शब्दभावनां विना उपदेशाभावेऽपि - 'श्रोत्रेण शब्दः श्रूयते - एवंरीत्या उच्चार्यते' इति ज्ञानस्यासंभवाद

न सम्भवतीति करणविन्यासादिप्रयत्नमूलज्ञानकारणशब्दसंस्कारः प्राग्भवः कल्प्यते ।

विमर्शः - येन कश्चन शब्दः पूर्वं न श्रुतो नाप्युच्चारितः, स बालो यदा प्रयोज्यप्रयोजकवृद्धव्यवहारे प्रयुक्तं शब्दं ज्ञातुं वक्तुं च प्राथम्येन प्रक्रमते, तदा स बालो यद्यपि केनाप्याप्तेन जनेन पूर्वं न शिक्षितो यत् - श्रोत्रेन्द्रियेण शब्दज्ञानं भवति, अथापि वा कण्ठादिस्थानानां जिह्वादिकरणैरभिघातेन विवक्षितकादिवर्णानामुच्चारणं भवतीति, तथापि स उपदेशं विनैव स्वतः शब्दं ज्ञातुं शब्दज्ञानकरणं श्रोत्रेन्द्रियं योग्यविषये शब्दे नियोजयति, शब्दमुच्चारयितुं च तत्तद्वर्णोच्चारणयोग्यकण्ठादिस्थानेषु यथाविभागं जिह्वादिकरणानामभिघातं करोति । तदनेन प्रयत्नदर्शनेन ज्ञायते यत् -

---

अथवा पहले पहल बोलने के लिए जो उसका प्राणवायु को ऊपर की ओर प्रेरित करना तथा तत्तद् वर्णों के उच्चारण के योग्य कण्ठ - तालु आदि स्थानों का जिह्वा से आघात करना, इत्यादि पहला प्रयास होता है, वह उसके पूर्वजन्मों के संचित शब्दविषयक संस्कार के विना संभव नहीं है ।

आशय : - किसी के सिखाये विना शब्द को जानने या बोलने के तत्तत् साधन-विशेषों का जो किसी भी बालक को ज्ञान है - जिसके फलस्वरूप शब्द को जानने के लिए श्रोत्र को ही वह शब्द की ओर प्रवृत्त करता है, अथवा 'क, च, ट' आदि तत्तत् वर्णों के उच्चारण के लिए कण्ठ-तालु आदि योग्य स्थानों को ही जीभ से आहत करता है, उसका कारण प्रत्येक बालक को पूर्व पूर्व जन्मों का शब्दविषयक अनादि संस्कार है, यह मानना पड़ता है ।

इन्द्रियविन्यासाद्यसंभवः स्यात् इति भावः । अत इन्द्रियविन्यासादिदर्शनेन 'श्रोत्रेण शब्दः श्रूयते' इति ज्ञानकारणतया प्रतिपुरुषं पूर्वपूर्वजन्मान्तरकृतशब्दभावनाऽनुमीयते, इति फलितम् ॥ १२३ ॥

'श्रोत्रेणैव शब्दो गृह्यते - कण्ठजिह्वादिकरणाभिघातेनैव वर्णा उच्चार्यन्ते' इति तस्य यद् ज्ञानं तस्य कारणं नूनं प्रतिपुरुषमवस्थितः कश्चन पूर्वपूर्वजन्मान्तरीयानुभवाहितोऽनादिः शब्दसंस्कारः प्रतिभारूपो वर्तते - येनोपदेशं विनापि बालः प्रथमतः शब्दं ज्ञातुमुच्चारयितुं च योग्यकरणविन्यासादिकं यत्नं प्रकुरुते, इति ॥ १२३ ॥

निष्कर्ष में : - यदि बालक को शब्दविषयक पूर्व जन्मों का संस्कार न हो, तो विना सिखाये बताये उसको यह ज्ञान कैसे संभव है कि - शब्द के ज्ञान का हेतु श्रोत्रेन्द्रिय ही है, तत्तद् वर्णों के उच्चारण का हेतु कण्ठ आदि स्थान ही हैं, जिससे कि वह शब्द सुनने या बोलने के लिए उनका ही प्रथमतः उपयोग करता है । अत एव बालकों की शब्दविषयक प्राथमिक इतिकर्तव्यता के ज्ञान का कारण पूर्व पूर्व जन्मों से संचित प्रतिभा नामक अनादि संस्कार है, यह सिद्ध होता है ॥ १२३ ॥

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ॥ १२४ ॥

प्रत्येकार्थप्रकाशिका

सर्वत्र शब्दभावनां प्रदर्शयति - न सोऽस्तीति । लोके = व्यवहारे स प्रत्ययः = ज्ञानं नास्ति यः = प्रत्ययः शब्दानुगमात्

आनन्दा

पदार्थमात्रे शब्दभावनानुगमं निरूप्याधुना प्रत्यक्षादिसकलज्ञाने शब्दभावनाऽनुगमं निरूपयति - न सोऽस्ति, इति ।

अन्वयः - लोके सः प्रत्ययः न अस्ति, यः शब्दानुगमात् ऋते, सर्वम् ज्ञानम् शब्देन अनुविद्धम् इव भासते ।

व्याख्या - लोके = समाजे सः = तथाविधः प्रत्ययः = शब्दप्रमाणजन्यः प्रत्यक्षादिप्रमाणजन्यो वा कोऽपि बोधः न अस्ति = न भवति, यः= अन्यतमोऽपि प्रत्ययः शब्दानुगमाद् ऋते = शब्दसमन्वयं विना स्यात्, ज्ञानं स्वाकारतया शब्दं विषयीकृत्यैव प्रवर्तते, इत्यर्थः ।

व्यतिरेकमुखेन निरुच्यान्वयमुखेन तत्फलितार्थमेवाह - अनुविद्धमिवेति । सर्वं ज्ञानम् = प्रत्यक्षमनुमानं शाब्दं वा शब्देन = 'घटः, पटः' इत्यादिव्यवहारप्रयोजकेन घट-पटादिवाचकशब्देन - अनुविद्धम् = अनुष्यूतम्-समनुगतम् इव = प्रायेण भासते = व्यवहारे व्यपदेश्यं सत् प्रथते ।

विमर्शः - तत्तदर्थवाचक 'नाम' शब्दसंकेतग्रहात् प्राक् घटपटादिना रूपरसादिना वार्थेन चक्षुरादेरिन्द्रियस्य सन्निकर्षे सति स सोऽर्थः शब्दस्वरूपविवेकरहितः

सूर्यमाया

सर्वविध पदार्थों का शब्द से अनुगत रूप बताकर अन्वय और व्यतिरेक के माध्यम से सर्वविध ज्ञान का भी शब्द से अनुगत रूप बताते हैं - 'न सोऽस्ति' ।

अर्थ : - लोकव्यवहार में ऐसा कोई भी ज्ञान नहीं है, जो शब्द को विषय किये विना होवे । सभी ज्ञान शब्द से बिधा हुआ मिश्रित सा भासित होता है ।

ऋते = शब्दमविषयीकृत्य वर्तते, किन्तु सर्वं ज्ञानं शब्देन अनुविद्धम् इव= शब्दं विषयीकृत्यैव भासते = प्रकाशते इत्यर्थः ।

शब्दानालिङ्गित एव निर्विकल्पकेन ज्ञानेन गृह्यते । तद् ज्ञानं तु प्रमातुः स्वसंवेद्यं, न परसंवेद्यम् । तस्यार्थज्ञानस्य व्यवहारप्रयोजकः कश्चन नामशब्दो नास्ति ज्ञातो, येन तस्य व्यवहारः क्रियेतेत्यतस्तदर्थज्ञानमविकल्पमव्यपदेश्यमुच्यते । अथ प्रमाता यदा स्वं ज्ञानं परं प्रति बोधयितुमिच्छति, तदा व्यवहारकाले केनापि नामशब्देन बोधयति । तेन नामशब्देनाख्येयं तद् ज्ञानं व्यपदेश्यं सत् तेन शब्देन समनुगतं भवति सविकल्पकम् । तदाह गौतमसूत्रम् - "इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षम्" इति (१-१-४) ।

'इन्द्रियार्थसन्निकर्षोत्पन्नमव्यभिचारि ज्ञानम्' इति प्रत्यक्षलक्षणम् । तस्य विभागः - अव्यपदेश्यम् - व्यवसायात्मकम्, इति ।। निर्विकल्पकं सविकल्पकं चेति द्विविधं प्रत्यक्षमिति तदर्थः । तयो र्निर्विकल्पकमनाख्येमतीन्द्रियमनुमानवेद्यम्, सविकल्पकं तु समाख्येयमनुव्यवसायग्राह्यमिति विवेकः । शाब्दिकास्तु - वाचकशब्दज्ञानात् प्राक् अज्ञाताभिधानस्य वस्तुतो घटादे रूपादेर्वा चक्षुरादीन्द्रियसन्निकर्षेण जायमाने - 'घटः, पटः, रूपम्, रसः' इत्याकारेऽव्यपदेश्ये निर्विकल्पके प्राथमिकेऽर्थमात्रज्ञाने सूक्ष्मरूपेण शब्दभावना समनुगताऽपि व्यक्तक्रमरूपोपसंहारेणाव्यक्तं तद् ज्ञानमनाख्येयं

आशय : - जैसे माला में मणि या पुष्प आदि सूत्र से ग्रथित व अनुष्यूत ग्रन्थि (गाँठ) के रूप में एकाकार भासित होता है, अथवा व्यञ्जन वर्णों में स्वरवर्ण मिलित एकाकार प्रतीत होते हैं, ऐसे ही व्यवहारकाल में 'प्रत्यक्ष, अनुमान वा शाब्दज्ञान' सभी शब्द से अनुगत व अनुविद्ध प्रतीत होते हैं, शब्द से रहित केवल ज्ञान व्यवहारयोग्य नहीं होता है । ज्ञान की यह प्रक्रिया है कि - 'चक्षु' आदि इन्द्रिय का घट - पट आदि विषय से सन्निकर्ष होने पर किसी को जो 'घट-पट' इत्याकारक वस्तुमात्र का ज्ञान होता है, वह ज्ञान स्वयं अनुभूति का विषय होता है - परसंवेद्य नहीं होता, क्योंकि वह किसी शब्दविशेष से लोक में व्यवहारयोग्य नहीं है - अव्यपदेश्य व निर्विकल्पक होता है । यद्यपि यह वस्तुस्थिति है, तथापि

अयमाशयः - 'गौरयम्' इति प्रत्यक्षस्थलेऽपि शब्दः स्मर्यते, 'अयं शब्द एतदर्थवाचक' इति सङ्केतज्ञानं शब्दार्थोभयविषयकम्,

---

प्रमातुः स्वसंवेद्यमपि परं प्रति नामाज्ञानादप्रतिनिर्देश्यं भवति व्यवहारायोग्यम्, किन्तु तत् स्वसंवेद्यस्वरूपं ज्ञानमपि नूनं सूक्ष्मशब्दानुगतं भवतीति स्वीकार्यम् । अत एव तदा प्रमात्रा घटः पटात्, रूपं रसात् पृथगनुभूयते । तस्मिन् ज्ञाने सर्वथा शब्दस्वरूपाननुगमे घटपटयो रूपरसयो र्विवेके को विनिगमकः स्यात् ? तस्माद् अतीन्द्रियं स्वसंवेद्यं निर्विकल्पकं ज्ञानमनाख्येयाव्यक्तशब्दानुगतं भवतु, परसंवेद्यं सविकल्पकं च व्यवहारे वाचकशब्दसमाख्येयं भवतु सक्रमव्यक्तशब्दानुगतमिति नात्र काचनानुपपत्तिः ।

ज्ञातशब्दसंकेतो व्युत्पन्नः प्रमाता शब्दानुगतं वस्तुरूपं गृह्णाति, अव्युत्पन्नस्तु न गृह्णातीति प्रमातुर्दोषो गुणो वा । तेन वस्तुनः शब्दस्वरूपत्वे तज्ज्ञानस्य च शब्दरूपानुगतत्वे का बाधा ? एवं च सर्वं ज्ञानं शाब्दमनुमानं वा, निर्विकल्पकं सविकल्पकं प्रत्यक्षं वा, शब्देनानुविद्धमित्यवधार्यताम् ।

इदं तु बोध्यम् - प्रथमं तावत् विषयेन्द्रियसम्प्रयोगे जायमानं ज्ञानं स्वसंवेद्यमनाख्येयं 'घट इति, पट इति, रूपं - रस इत्यन्योन्यं विविक्तं सूक्ष्मशब्दरूपानुषक्तं तिष्ठति, तदेव यदा परं प्रत्याययितुं विवक्ष्यते, तदा

वक्ता का प्राथमिक जो 'घट-पट' इत्याकारक वस्तुमात्र का ज्ञान होता है, वह भी अव्यक्त-अनाख्येय-सूक्ष्म शब्द से संवलित व सम्बद्ध ही रहता है, क्योंकि उस ज्ञान का आकार प्रकार 'घट-पट' इत्यादि सूक्ष्म-अव्यक्त-शब्द रूप ही है । यदि उसमें सूक्ष्मरूप में शब्द का रूप अनुप्रविष्ट नहीं हो, तो घट से पट का - पट से घट का ज्ञान किस रूप से परस्पर विलक्षण माना जा सकता है, जबकि उनका बोधक शब्द का भेद विषय न होवे । लोक में 'कम्बुग्रीव' आदि आकारभेद यद्यपि प्रत्यक्षसिद्ध है, तथापि वह घट माना जाय पट नहीं, यह कैसे व्यवस्थित होगा, जबकि उसका वाचक शब्दभेद विषय न माना जाय । अत एव यह मानना होगा कि - वक्ता का जो इन्द्रियसन्निकर्षजन्य प्राथमिक विभिन्न अर्थज्ञान होता है, जो कि अव्यपदेश्य - अनाख्येय निर्विकल्पक रूप है, वह भी सूक्ष्म - अव्यक्त शब्द रूप से मिलित होने से घट-पट शब्द से विभक्त होता है ।

शब्दश्रवणानन्तरमपि उभयविषयकस्मरणम्, शाब्दबोधोऽप्युभय-विषयकः । अत एव षोढा प्रातिपदिकार्थ इत्युद्घोषः । एवं च सर्वत्र शब्दभावनानुगमदर्शनेन शब्दोपादानकत्वं संसारस्येति पूर्वप्रतिज्ञातार्थसिद्धिः ॥ १२४ ॥

तस्य विवक्षावशात् शक्तेः प्रबोधे व्यक्तसक्रमरूपोपग्रहेणोपदेशे समाख्येयशब्दरूपानुगतं भवति व्यपदेश्यम् । तत्र वक्तुः प्रथमं स्वसंवेद्य-मर्थज्ञानमनाख्येयं प्रकृतिः, व्यवहारे तदेव प्रयुज्यमानं व्यक्तरूपं समाख्येयं द्वितीयं ज्ञानं विकृतिरित्यन्यदेतत् । प्रथमं द्वितीयं वा सर्वं ज्ञानं व्यक्ताव्यक्तरूपविशेषं विहाय साधारणतः शब्दानुविद्धमिति सिद्धम् ।

का कथा जागरितज्ञानस्य, स्वप्नेऽपि यावद् ज्ञानं शब्दानुविद्धमेव । व्यक्ताव्यक्त-ज्ञेयाज्ञेयशब्दाकाराकारितमेव मिथो विविक्तं ज्ञानम् इन्धनपिण्डीभूताङ्गारमयदहनवद् भेदेनाभेदेन वा प्रकाशमानं विजृम्भते, इत्यलम् । इदं त्ववधेयम् - मालायां मणेरत्यन्तभिन्नेन सूत्रेणानुवेधो दृष्टो नाभिन्नेन, इह तु ज्ञानान्नात्यन्तभिन्नः शब्द-स्तथापि स्थूलसूक्ष्म-सक्रमाक्रमरूप-भेदमुपादायोपपद्यते कथंचित् कल्पितो भेद इति सूचयितुं प्रयुक्त इवशब्दः । मालायां सूत्रेण ग्रथितो मणिगण इव स्वरव्यञ्जनसंघातशब्देन ग्रथितं विभात्यान्तरं बाह्यं वा सर्वं ज्ञानमित्यर्थः । वस्तुतः शरावोदञ्चनादिकं मृत्तिकयेव - मरुमरीचिकयोदकमिव प्रकृतिभूतेन शब्देन ज्ञानमनुविद्धमिव भातीति भावः ॥ १२४ ॥

यह अन्तर अवश्य है कि - दूसरों को शब्द से उपदेशित ज्ञान सक्रम व्यक्त शब्द से अनुविद्ध रहता है, किन्तु वक्ता का स्वसंवेद्य प्राथमिक ज्ञान अव्यक्तरूप में सूक्ष्म शब्द रूप से संवलित एकात्मक रहता है, वहाँ भेदज्ञान नहीं रहता है, जबकि व्यपदेश्य सविकल्पक ज्ञान में शब्द का भेद भी परिलक्षित होता है ।

अतः निष्कर्ष में मान्य है कि - निर्विकल्पक या सविकल्पक प्रत्यक्षज्ञान तथा अनुमान - उपमान - शाब्द, सभी ज्ञान शब्द से अनुविद्ध होते हैं ॥ १२४ ॥

वाग्रूपता चेदुत्क्रामेदवबोधस्य शाश्वती ।
न प्रकाशः प्रकाशेत सा हि प्रत्यवमर्शिनी ॥ १२५ ॥

प्रत्येकार्थप्रकाशिका

पुनरपि तदेवोपपादयति - वाग्रूपेति । अवबोधस्य = सविकल्पकज्ञानस्य शाश्वती = सदा विद्यमाना वाग्रूपता= ज्ञाने यथा स्वप्रकाशत्वं स्वरूपं सदा तिष्ठति, तथैव

आनन्दा

प्राग् अन्वयव्यतिरेकाभ्यां ज्ञानस्य शब्दरूपतां निरूप्येदानीं तस्य शब्द-रूपताया व्यतिरेके आपत्तिं प्रदर्शयन् परिशेषात् प्रोक्तां ज्ञानस्य शब्दरूपतां निगमयति - वाग्रूपतेति ।

अन्वयः - अवबोधस्य शाश्वती वाग्रूपता उत्क्रामेत् चेत् प्रकाशः न प्रकाशेत हि सा प्रत्यवमर्शिनी ।

व्याख्या - अवबोधस्य = अवगतः सम्यग् व्यवसितो यो बोधस्तस्य निश्चयस्वरूपस्य ज्ञानस्य 'घटोऽयम् - डित्थोऽयम्' इत्याद्याकारस्य सविकल्पकस्य शाश्वती = अविच्छिन्ना नित्यस्वरूपभूता वाग्रूपता = शब्दरूपता उत्क्रामेत् = ज्ञानाद् यदि उत्प्लुत्य निर्गच्छेत् चेत् - "आशंसायां लिङ्", तर्हि प्रकाशः = प्रकाशरूपं ज्ञानम्, न प्रकाशेत = वाग्रूपतां विना विषयाप्रकाशे निर्विषयं न प्रख्यायेत । हि = यस्मात् कारणात् सा =

सूर्यमाया

पूर्वश्लोक में ज्ञान की शब्दरूपता में अन्वय-व्यतिरेकदर्शनरूप अनुभव प्रमाण देकर अब ज्ञान की शब्दरूपता के विना उसके व्यवहार की अनुपपत्तिरूप तर्कप्रमाण भी देते हैं - 'वाग्रूपता' इत्यादि ।

अर्थ : - विषय के आकार से अवधारितस्वरूप - सविकल्पक ज्ञान की सतत वर्तमान जो शब्दरूपता है, वह उड़कर कहीं यदि चली जाय या लुप्त हो जाय तो (शब्द से विषय का प्रकाश हुए विना) विषयविहीन 'ज्ञान' व्यवहार में कभी प्रकाशित नहीं हो सकेगा, क्योंकि ज्ञान की वह शब्दरूपता ही (विषय के उपस्थापन व अवधारण के द्वारा) ज्ञान के नियतस्वरूप को बताती है ।

शब्दानुगतत्वमपि स्वस्वरूपं सदा तिष्ठति - इति भावः, सा उत्क्रामेच्चेत् = यदि विनश्येत् - इत्यर्थः, तदा प्रकाशः = ज्ञानं न प्रकाशेत = न विषयमवधारयेत्, हिं = यतः सा = ज्ञाने वागनुगतता प्रत्यवमर्शिनी = सविकल्पकज्ञानसम्पादिका- इत्यर्थः ।

वाग्रूपता प्रत्यवमर्शिनी = विषयपरामर्शेन ज्ञानस्य प्रख्यापिका । वाग्रूपतां विना विषयाप्रकाशे निर्विषयज्ञानस्य परामर्शानुपपत्त्या ज्ञानस्य वाग्रूपताऽवसीयते, इति फलितार्थः ॥

विमर्शः - विषयेन्द्रियसम्प्रयोगेण जातं शब्दाविषयकं विशेष्यविशेषण-सम्बन्धशून्यं वस्तुस्वरूपमात्रज्ञानमपरोक्षानुभवरूपं प्रकाशमानमपि व्यपदेश-हेतुशब्दरूपतां विना खद्योतवत् परप्रकाशनानर्हं विषयाकारनिर्धारणासमर्थम-व्यपदेश्यं सत् परैरसंवेद्यं निर्विकल्पकं तिष्ठति । व्यवहारकाले परबोधाय 'डित्थोऽयम् - घटोऽयम्' इत्यादिवाचकशब्दप्रयोगे तु तस्य शब्दस्य किंचिद्धर्मावच्छिन्ने शक्तिमत्त्वात् ततो विशेष्यविशेषणभावापन्न - धर्मिधर्मोपस्थापकशब्दोपाख्येयम् 'इदं तद्' इति विशिष्य निर्दिश्य वस्तुस्वरूपावधारणपूर्वकाऽनुसन्धानसमर्थ - शब्दालिङ्गितं व्यपदेश्यं परसंवेद्यं सविकल्पकं ज्ञानं प्रवृत्तिनिवृत्तिव्यवहारप्रवर्तकं जायते ।

यथा वह्नेर्दाह्यतृणादियोगे प्रकाशकत्वसहचरितं दाहकत्वं स्वरूपम्, यथा वा परात्मनो मायाऽन्तःकरणाद्युपधाने चैतन्यसहचरितमन्तर्यामित्वकर्तृत्वादिकं व्यावहारिकं स्वरूपम्, तथा ज्ञानस्य सविकल्पकस्यापि प्रकाशकत्वसहचरितं वाग्रूपत्वं व्यावहारिकं स्वरूपमवधार्यताम् ।

आशय : - जैसे तृण-काष्ठ आदि इन्धन के संनिधान में ही अग्नि का दाहकत्व के साथ प्रकाशकत्व स्वरूप पाया जाता है, अथवा यह कहा जाय कि - जैसे अग्नि का दाहकत्व और प्रकाशकत्व ये दोनों समन्वित स्वरूप हैं, ऐसे ही ज्ञान का शब्दरूपत्व और प्रकाशकत्व ये दोनों समन्वित तथा समनियत स्वरूप हैं ।

जैसे अन्तर्यामी रूप में अग्नि विश्व में सर्वत्र अन्तर्गर्भित रहने पर भी इन्धन के संयोग के विना दाहकार्य के अभाव में प्रकाश न होने से व्यवहार का विषय नहीं होता, ऐसे ही अन्तर्यामी रूप में ज्ञान अन्तःकरण में विद्यमान रहने पर भी शब्द के विना अर्थ की उपस्थिति के अभाव में बाहर प्रकाशित न होने से

घटं दृष्ट्वा 'घटोऽयम्' इति सविकल्पकनिश्चयं करोति, तत्र वाचकतया शब्दोऽपि विषयः । अन्यथा वाचकशब्दाज्ञानेन कोऽयमिति सन्देहो न निवर्तेतेत्यतः - ज्ञाने शब्दानुगतत्वं सविकल्पत्वसम्पादनम् । यत्र च - 'अस्यार्थस्य वाचकोऽयं शब्दः' इति वाचकविशेषस्य ज्ञानं नास्ति, तत्र 'वस्तु इदम्' इति सामान्य- 'वस्तु' शब्दानुगतमेव ज्ञनं भवतीति सर्वथा शब्दविषयितां न कदाचिदपि ज्ञानं जहाति, इति भावः ॥ १२५ ॥

यथा दाह्यनाशे दाहकत्वस्य व्यपगमे प्रकाशकत्वमपि वह्नेर्व्यपगच्छति, यथा वा मायाद्युपधानोत्क्रमणे तदुपहितचैतन्यस्यान्तर्यामित्वकर्तृत्वादि-कमुत्क्रामति, तथा ज्ञानस्य वाग्रूपतोत्क्रमणे विषयाकारनिर्धारणपूर्वकप्रत्यव-मर्शाभावे प्रकाश्याभावात् तत्सहचरितं ज्ञानस्य स्वपरप्रकाशकत्व-स्वरूपमप्युत्क्रामेत् ।

तथा सति स्वपरप्रकाशानर्हं ज्ञानम् 'घटोऽयम्' इत्याद्युत्तरकालिकप्रत्यवम-र्शपूर्वकं हानोपादानादिप्रवृत्तिनिवृत्तिरूपं व्यवहारं न प्रवर्तयेत् । तस्मात् सविकल्पकस्य ज्ञानस्य वाग्रूपता विषयप्रकाशनसहचरिता व्यवहाराविनाभाव-नियता कल्प्यते । वस्तुतोऽव्यपदेश्यं निर्विकल्पकमपि ज्ञानं सूक्ष्मवागनुगत-मेव वस्तुस्वरूपमात्रमनाख्येयं प्रवर्तते । ज्ञानाभिन्नं स्वयंज्योतिःस्वरूपं हि सूक्ष्मवाक्तत्त्वम् । तदाह बृहदारण्यके- "वाचैवायं ज्योतिषा" इति ॥ १२५ ॥

व्यवहारयोग्य नहीं होता है । लोकव्यवहार में तो शब्द के ज्ञान व प्रकाश के साथ ही अर्थ का ज्ञान व प्रकाश होता है । अतः इस अन्वय और व्यतिरेक के दर्शनरूप साहचर्य्यनियम से ज्ञान की समनुगत व्यापक शब्दरूपता स्पष्ट सिद्ध होती है । यह ज्ञान व्यवहारकाल में सविकल्पकरूप है, जो कि आख्येय तथा व्यपदेश्य है । वस्तुतः अपने मत में आन्तर निर्विकल्पक ज्ञान भी नियमतः सूक्ष्म स्वप्रकाश शब्दरूप ही रहता है ॥ १२५ ॥

सा सर्वविद्याशिल्पानां कलानां चोपबन्धिनी ।
तद्वशादपि निष्पत्तौ सर्वं वस्तु विभज्यते ॥ १२६ ॥

प्रत्येकार्थप्रकाशिका

सर्वस्य शब्दाधीनत्वे युक्त्यन्तरमाह - सा सर्वेति । सर्वाश्च ता विद्या वेदादयस्ताश्च - शिल्पाश्च = शरादिनिर्माणविधय-

---

आनन्दा

मृद्घटवत् - मरुमरीच्युदकवद्वोपादानोपादेयत्वेन शब्दस्य सकलार्थे सकलज्ञाने च समन्वयं निरूप्य तमेव संगमयन् शब्दस्य विद्यादिज्ञान-विज्ञानविभाग - पदार्थस्वरूपविभागव्यवस्थाया निबन्धनत्वमाह- सा सर्व-विद्येति ।

अन्वयः - सा सर्वविद्याशिल्पानाम् कलानाम् च उपबन्धिनी, सर्वं वस्तु निष्पत्तौ अपि तद्वशात् विभज्यते ।

व्याख्या - सा = बुद्धिस्था ज्ञानरूपा वाक् सर्वविद्याशिल्पानाम् = सर्वाश्च ताः विद्याः - आत्मज्ञानहेतवो वेदादयश्चतुर्दशविद्याः प्रागुक्ताः, शिल्पाश्च= स्थापत्य - (भवननिर्माण) विज्ञान - शस्त्रास्त्रयन्त्रविज्ञान - रथकारादि - रथयान - घटपटादिविज्ञानानि च तेषाम्, कलानाम् = 'नाट्य-नृत्य-गीतादि'-ललितकलानाम् एतासां चतुःषष्टिसंख्याकानां सर्वासाम्, उपबन्धिनी = उपबध्नाति - ग्रथ्नाति तच्छीला, संगठनसूत्ररूपा विधारिका ग्राहिका वा शरीरभूता । शब्दविग्रहा हि सर्वा विद्याः शिल्पकलाश्चेति भावः । शब्दार्थौ

सूर्यमाया

पूर्व के श्लोकों में सकल पदार्थ और ज्ञान में शब्द का समन्वय बताकर अब शब्द को सभी विद्याओं और कलाओं का तथा वस्तुमात्र का शरीररूप में ज्ञान का एकमात्र साधन बताते हैं - 'सा सर्वविद्या' इत्यादि ।

अर्थ : - वह वाणी (शब्द) ही वेद आदि सभी विद्याओं और सभी शिल्पकलाओं (अस्त्र-यन्त्र-भवन आदि बनाने, रथ - घड़ा - कपड़ा बनाने आदि हाथ की कारीगरी) एवम् ललित कलाओं (अभिनय-नृत्य-गीत आदि) के

स्तेषां कलानाम् = सङ्गीतादीनाम्, चकारेण 'एवं रीत्या पटो वातव्य' इत्यादि- उपदेशग्रहणस्य उपबन्धिनी = ज्ञापिका सा= वाक्। किञ्च निष्पत्तौ = घटाद्युत्पत्त्यनन्तरमित्यर्थः, तद्वशात्=

शरीरं हि ज्ञानस्य । किञ्च सर्वम् = सकलम् वस्तु = घटपटादिकम् निष्पत्तौ = उत्पत्तौ सत्याम् अपि तद्वशात् = शब्दाधीनत्वाद् विभज्यते = वाचकशब्दानुपूर्वीभेदरूपेण समनुगतेन भिद्यते । वस्तुस्वरूपे वाचकशब्दरूपाननुगमे तु 'घट इति, पट इति' परस्परव्यावृत्तव्यवहारः किंप्रयुक्तः स्यात्?

अत्र तृतीयचरणे - 'अपि निष्पत्तौ' इत्यस्य स्थाने 'अभिनिष्पन्नम्' इत्यपि पाठान्तरम् । तत्र शब्दभेदेऽपि नार्थभेदः । सा = अवबोधस्य वाग्रूपता सर्वविद्यानां शिल्पानां कलानां चोपबन्धिनीति व्याख्यानेऽपि नार्थभेदः ।

विमर्शः - वस्तुतत्त्वबुद्धिविषया सूक्ष्मा वागेव लब्धक्रमरूपा 'तत्त्वमसि-अहं ब्रह्मास्मि' इत्याद्यलौकिकार्थोपदेशपराणां वेदादिचतुर्दशविद्यानां लौकिकार्थविषयाणां वा कारुहस्तकौशलानां वास्तुयन्त्रशस्त्रास्त्रवायुयानादिनिर्माणविधिशिल्पविज्ञानानां चतुःषष्टिकलानां सर्वासां बोधिका साक्षाद् विग्रहरूपा वर्तते । वैदिकलौकिकेष्टार्थपराणि सर्वाण्याचार्योपदेशशास्त्राणि वाचि निबद्धानि वाङ्मयानि ।

ज्ञान को संजोनेवाली साक्षात् मूर्ति व शरीर है । उत्पन्न होने पर घट, पट आदि सभी वस्तु भी वाणी के अधीन ही परस्पर विभाजित हो अपने अपने नाम से पृथक् जाने जाते हैं ।

आशय : - पारलौकिक सुख - 'स्वर्ग व मोक्ष' के साधन जो 'नित्यस्वाध्याय-यज्ञ-जप-तप-योग आदि' व्रत हैं, उनका उपदेशशास्त्र पूर्व में वर्णित चौदह विद्याएँ हैं, तथा इस लोक के सुख के साधन जो शिल्प कलाएँ- 'भवन, गृह, रथयान, घट, पट, बर्तनों का निर्माण व यन्त्र अस्त्रशस्त्रों का निर्माण आदि' हाथ की कारीगरी हैं, अथवा नाटक-अभिनय-नृत्य-संगीत-प्रभृति मनोरञ्जन के साधन जो शरीर की ललित कलाएँ हैं, वे सब शब्दों में निबद्ध-वेद, उपवेद, पुराण, दर्शन, स्मृतिग्रन्थों, गृह्यसूत्रों तथा नाट्य, संगीत शास्त्रों से ही सीखे व जाने जाते हैं । सभी विद्याओं या चौंसठ कलाओं के उपदेश का साधन ग्रन्थ भी वाङ्मय है ।

शब्दवशात्, सर्वं वस्तु विभज्यते = घटोऽयं पटोऽयमिति विभागो भवतीत्यर्थः ।

अयमाशयः - लोके विद्यादिभिरेव व्यवहारो भवति, विद्यादयश्च शब्दे एव निबद्धाः । किञ्च घटादावुत्पन्नेऽपि 'घटोऽयं पटोऽय' मिति शब्देनैव विभागो भवतीत्यतः सर्वव्यवहारः शब्दाधीन एवेति ॥ १२६ ॥

नैतावदेव यत् - चतुर्दशविद्यानां चतुःषष्टिकलानामेव शरीरं हि सा वाक्, अपितु घटपटादीनां सकलवस्तूनामपि वागेव शरीरम् । येन जातमात्रं समस्तं वस्तु 'घट-पटेति' शब्देनैव केनापि विविक्तव्यवहारस्य विषयो भवति - 'घटोऽयम्-पटोऽयम्' इति । न केवलव्यवहारस्य सा साधनम्, परं च वस्तूनां निर्माणमपि वाचि नियन्त्रितम् । प्रयोजकवृद्धेन 'कुरु घटम्' इत्यादिष्टोऽर्थः प्रयोज्यकर्तृबुद्धिस्थः सन् निष्पद्यते, न पटः । प्रयोजकेनादिष्टः प्रयोज्यकर्ता घटमेव निष्पादयति न पटम् । अनेन सुस्पष्टं यत् सर्वो ब्रह्माण्डभाण्डनिकायः शब्देनोपनिबद्धः सूत्रेणानुविद्धं कुसुममणिमाल्यमिव, सुवर्णेन सुवर्णघट इव, मरीचिभिर्मरीच्युदकमिव वा शब्देन समनुगतमिदं जगद्व्यवहारसन्तानमिति हृदयम् ॥ १२६ ॥

शब्द ही समस्त शास्त्रों का कलेवर है । उनका शिक्षण-प्रशिक्षण भी शब्दमाध्यम से ही होता है । लोक में जो भी पदार्थ बनते व रचित होते हैं, वे सब रचयिता की बुद्धि में किसी नाम से संकल्पित होकर ही पृथक् नाम से बाह्य जगत् में परिणत होते हैं, पृथक् नाम से ही ज्ञान तथा व्यवहार के विषय होते हैं, अर्थात् वस्तुओं का स्वरूप भी पृथक् नाम से स्पष्ट होता है । अतः सम्पूर्ण जगत् और उसका व्यवहार शब्द से सूत्ररूप में निबद्ध व नियन्त्रित है । क्योंकि सबका मूल कारण शब्द है, जो कि ज्ञानस्वरूप है ॥ १२६ ॥

सैषा संसारिणां संज्ञा बहिरन्तश्च वर्तते ।
तन्मात्रामप्यतिक्रान्ते चैतन्यं सर्वजन्तुषु ॥ १२७ ॥

प्रत्येकार्थप्रकाशिका

तदेव प्रपञ्चयति - सैषेति । सा एषा = वाक् संसारिणाम्= प्राणिनां बहिः = व्यवहारे संज्ञा = वाचिका, तन्मात्राम् =

आनन्दा

प्राणिनां चैतन्यस्य शब्देन सहान्वयव्यतिरेकदर्शनात् पुरोक्तं चैतन्ये शब्दरूपतानुगमं संगमयति - सैषेति ।

अन्वयः - सा एषा संसारिणाम् बहिः संज्ञा वर्तते, तन्मात्राम् अतिक्रान्ते अपि सर्वजन्तुषु चैतन्यम् अन्तः संज्ञा च वर्तते ।

व्याख्या - सा एषा = पूर्वप्रकृता सर्वविद्याशिल्पानां कलानां चोपबन्धिनी वाक् संसारिणाम् = शरीरिणाम् बहिः = लोके संज्ञा = चैतन्यस्य ज्ञापिका वर्तते । वाचा वक्तुश्चैतन्यं संज्ञायते, इति भावः । नहि वाचं विना चैतन्यं बहिः प्रत्यभिज्ञायते, इति वागेव संज्ञा चेतनानाम् ।

किंच तन्मात्राम् = बहिर्वाग्व्यवहारलेशम्, अतिक्रान्ते = अपगते व्यक्तवचनसामर्थ्यराहित्ये अपि सर्वजन्तुषु = पशुपक्ष्यादिसकलप्राणिषु

सूर्यमाया

स्पष्टवाणी बोलने में समर्थ या असमर्थ - मनुष्य, पशु आदि सभी जीवों के बाह्य व आन्तर ज्ञान का तथा उनके चैतन्य का द्योतक होने से शब्द को जीवों की संज्ञा व पहचान बताते हैं - 'सैषा' इत्यादि ।

अर्थ : - पूर्व में वर्णित - 'विद्या, शिल्प और समस्त कलाओं का निबन्धन शरीररूप' वह यह वाणी संसारी सभी मनुष्यों की बाहर व्यवहार में चेतना का स्पष्ट परिचायक संज्ञा है तथा जो स्पष्ट वाणी बोलने से अतिदूर हैं - नहीं बोल सकते, ऐसे पशु, पक्षी आदि सभी जीवों के अन्दर जो सुख-दुःख का ज्ञान है, उसका भी परिचायक यही वाणी अन्तःसंज्ञा रूप है ।

तद्व्यवहारम् अतिक्रान्तेऽपि = अतीतेऽपि सर्वजन्तुषु = सर्वप्राणिषु चैतन्यम् = एतदुपलक्षकं सुखदुःखादीनाम् - अन्तःसंज्ञा वर्तते ।

चैतन्यम् = सुखदुःखादीनामभिज्ञानम् अन्तःसंज्ञा = आन्तरिकं संकेतशब्दरूपं वर्तते ।

विमर्श : - समस्तलोकव्यवहारस्य प्रवर्तिका खलु वागेव । वागेव वक्तुः श्रोतुश्च चेतनां ख्यापयतीति सा मनुष्याणां चेतयितॄणां चेतनास्वरूपा साक्षादेव संज्ञा । तेषामन्तर्ज्ञानस्य प्रख्यापिका सा बहिर्मुखात् परिस्फुटिता विदुषामविदुषां प्रज्ञानं हि विवृण्वती भवति विशेषसंज्ञा । वागेव वक्तुर्ज्ञानं बहिः प्रकाशयति, श्रोतुश्च प्रवृत्त्यादिभिर्ज्ञानं गमयति । यद्येषा वाक् मनुष्येषु व्यक्ता नाभविष्यत्तर्हि तेषां हिताहितप्रवृत्तिनिवृत्तिहेतुविज्ञानं बहिः प्रकाशं नागमिष्यत्, नैव च लोक आप्तोपदेशं विना हिताहितप्रवृत्तिव्यवहारे प्रावर्तिष्यतेति समस्तो गुरुशिष्यसम्प्रदायः प्रयोज्यप्रयोजकवृद्धव्यवहारश्च समुच्छिद्येत, किमधिकं वक्तव्यम् - प्राणिनां प्राणित्वस्य ख्यापिकेयं संज्ञा वाक् । क्षेत्रियरोग-जडीकृतकलेवरस्य संमूर्छितस्य वाक्शक्तेरुत्क्रमणे विसंज्ञोऽयमचेतनो जात इति स व्यपदिश्यते, वाक्शक्तेश्च पुनराविर्भावे जीवनं प्राप्तश्चेतनोऽयं ससंज्ञ इति कथ्यते ।

येऽप्यव्यक्तवाचो गवाश्वपिककाकप्रभृतिपशुपक्ष्यादयस्तेषामपि हिताहितविषयकमन्तर्ज्ञानं शब्दानुगतमेवेति पशुपक्षिभाषाविद्भिरनुसन्धीयते ।

सारांश में वाणी सभी जीवजन्तुओं का ज्ञान तथा चेतना का प्रतीक है ।

आशय : - व्यवहार में किसी व्यक्ति का ज्ञान तथा सुख-दुःखों का अनुकूल-प्रतिकूल अनुभव वाणी से ही बाहर प्रकट होता है, जिससे वह वाणी एक पहचान के रूप में उस व्यक्ति का परिचायक होकर चेतना का प्रतीक संज्ञा कही जाती है । इसके साथ ही वह वाणी चेतन का प्रतीक है - असाधारण चिह्न है, जिसके अभाव में पर्वत, वृक्ष, लता आदि जड़ व स्थावर हैं, चेतन नहीं । वाणी का प्रयोग चेतन ही करते हैं - अचेतन जड़ नहीं । पशु-पक्षी आदि चेतन प्राणी जो व्यक्त वाणी का प्रयोग नहीं कर सकते, उनका भी हित-अहित, सुख-दुःखों का आन्तरिक ज्ञान व चेतना अव्यक्त वाणी में ही निहित है, जो कि उनके अपने अपने वर्गों में अव्यक्त घोष या कलरव से इङ्गित होता है, तथा उनका लालन-पालन करनेवालों के साथ परस्पर खेल, कूद, मनोरंजन में अभिव्यञ्जित होता है । उनकी

सर्वत्र संज्ञादिद्वारा शब्दसमन्वय इति भावः ॥ १२७ ॥

अत एव पशुपक्षिपालकैः संबोध्यमानास्ते तण्डुलकणदूर्वादलादिकवलपाणिं स्वपालकमाकलय्य तमनुकूलमनुगच्छन्ति, प्रतिकूलं च समुद्यतप्रहरणदण्डं विक्रोशन्तमालक्ष्य भीताः पलायन्ते ।

तस्मात्तेषामपि यदन्तर्ज्ञानं तदपि शब्दसमनुगतम् । तदाह शारीरकभाष्ये भगवान् शङ्करः- "यथाहि पश्वादयः शब्दादिभिः श्रोत्रादीनां सम्बन्धे सति शब्दादिविज्ञाने प्रतिकूले जाते ततो निवर्तन्ते, अनुकूले च प्रवर्तन्ते" इति ।

इदं तु बोध्यम् - वस्तुतस्तु वाच्यवाचकभावापन्नं शब्दार्थमयं जडचेतन-स्थावरजङ्गमात्मकं निखिलं जगदिदं शब्दोपादानकं शब्देन समनुगतमिति सत्यम्, परमिह "चैतन्यं सर्वजन्तुषु" इति 'जन्तु' पदाक्षरस्वारस्यात् स्थावरं तरुगुल्मादिकमुपक्रम्य न किञ्चिदुच्यते । अन्तःकरणावच्छिन्नचेतनो हि जीवो जन्तुपदवाच्यो न जडो वृक्षादिः । तत्रान्तःकरणस्यैव विरहेण स्वसंवेद्यसुखदुःखादिसंविज्ञानस्यात्यन्तमप्रसङ्गात् । का नाम चर्चा तत्र चैतन्यस्य शब्दसमन्वयस्य ?

तदयं संकलितोऽर्थः - व्यवहारे प्रवर्तमाना व्यक्तवाचो मनुष्या बहिःसंज्ञा व्यक्तवाग्व्यवहारमतीता अव्यक्तवाचोऽन्तःसंज्ञाः पश्वादयो वा ये केचन जीवास्तेषां समेषां प्रवृत्त्यादिव्यवहारहेतुहितादिज्ञानस्य बहिरन्तर्वा वाचा समनुगतत्वाद् वागेव संज्ञा, यस्या अनुगमे ससंज्ञः, विगमे तु विसंज्ञ उच्यते जीवः ।। १२७ ।।

चेतना तथा भावों का प्रकाशन भले ही व्यक्त शब्दों से बाहर प्रकट न होवे, किन्तु अव्यक्त शब्दों में प्रकट होनेवाली सुख-दुःखों की चेतना उनकी अन्तःसंज्ञा है । बाहर व्यक्त वाणी का प्रयोग करनेवाले मनुष्यों की बहिः संज्ञा है, यह अन्तर अवश्य है, परन्तु समान रूप में वाणी सभी प्राणियों की चेतनासूचक संज्ञा है- पहचान है । इससे भी स्पष्ट है कि मनुष्य, पशु आदि सभी प्राणियों का ज्ञान शब्द से अनुगत है ।। १२७ ।।

अर्थक्रियासु वाक् सर्वा समीहयति देहिनः ।
तदुत्क्रान्तौ विसंज्ञोऽयं दृश्यते काष्ठकुड्यवत् ॥ १२८ ॥

प्रत्येकार्थप्रकाशिका

अपि च - अर्थेति । सर्वा वाक् अर्थक्रियासु = सिद्धो गवादिरर्थः पदार्थः, साध्यम् - आनयनादिक्रियाः तेषु, देहिनः=

आनन्दा

पूर्वप्रकृतं सर्वत्र ज्ञाने शब्दसमन्वयं समर्थयन् - वाचः सत्त्वे चैतन्यसत्त्वमित्यन्वयम् -वाचोऽभावे चैतन्याभाव इति व्यतिरेकं च दर्शयति- अर्थक्रियासु इति ।

अन्वयः - सर्वा वाक् अर्थक्रियासु देहिनः समीहयति, तदुत्क्रान्तौ अयम् काष्ठकुड्यवत् विसंज्ञः दृश्यते ।

व्याख्या - सर्वा वाक् = श्रुतिस्मृतिरूपा वैदिकी लौकिकी वर्णपदाद्यात्मिका व्यक्ता वाक् बहिःसंज्ञारूपा - अव्यक्ता स्वसंवेद्यज्ञानरूपान्तःसंज्ञा वा, अर्थक्रियासु = अर्थस्य सुखदुःखसाधनस्येष्टानिष्टस्य वस्तुनो गोव्याघ्रादेः क्रियासु - उपादानपरिहाररूपासु देहिनः = शरीरधारि-मनुष्यपश्वादिप्राणिनः सर्वान् समीहयति = प्रवर्तयति निवर्तयति, चेष्टयतीत्यर्थः । तदुत्क्रान्तौ=

सूर्यमाया

अन्वय व्यतिरेक द्वारा वाणी को प्राणी मात्र की चेष्टा का प्रयोजक सिद्ध करते हुए पूर्ववर्णित चैतन्य का प्रतीक बताते हैं - 'अर्थक्रियासु' इत्यादि ।

अर्थ : - वेद आदि शास्त्र की या लोक में - मनुष्य, पशु, पक्षी आदि की व्यक्त अथवा अव्यक्त, सभी प्रकार की वाणी देहधारी प्राणियों को इष्ट या अनिष्ट अर्थ का साधक 'ग्रहण और त्याग रूप' क्रियाओं में प्रवृत्त करती है । किसी कारणवश उस वाणी के निकल जाने पर उसके अभाव में यह देहधारी प्राणी काठ और भीत के समान चेतना से शून्य - चेष्टारहित जड़ तथा स्थावर दीख पड़ता है । अतः प्रवृत्ति का हेतु वाणी ही सभी प्राणियों की चेतना का

प्राणिनः समीहयति = प्रेरयति, तदुत्क्रान्तौ= वागुत्क्रमणे सति काष्ठकुड्यवत् = काष्ठभित्त्यादितुल्यम् अयम् = चेतनः विसंज्ञः= चैतन्यशून्यः दृश्यते = व्यवह्रियते ।

तस्या वाचः सुषुप्तिमूर्च्छादौ निवृत्तौ सत्याम् अयम् = देहधारी प्राणी काष्ठकुड्यवत्= काष्ठवत् भित्तिवच्च विसंज्ञः = संज्ञाशून्यो निश्चेष्टो जडः दृश्यते = उपलभ्यते ।

विमर्श : - जाग्रति वाच उपलब्धौ प्राणिनां प्रवृत्तिदर्शनेन चैतन्यमुपलभ्यते, स्वापादौ वाचोऽनुपलब्धौ प्रवृत्तेरदर्शनेनाचेतनत्वं प्रतीयते, इत्यन्वयव्यतिरेक-बलाद् वागविनाभूतचैतन्योपलब्धेः सर्वत्र वाक्तत्त्वानुगतं चैतन्यं वाग्रूपमे-वेत्यवसीयते।

उपपद्यते च, तथाहि - स्वप्रकाशाखण्डचिद्रूपा हि परा वाक् स्थानकरणभेदोपधानेन प्रतिलब्धविभिन्नवर्णपदाकारपरिग्रहा विद्याशिल्प-कलानिबन्धिनी मूलप्रकृतिरिति तस्याः सर्वत्रानुगमः सुस्थः ।

प्रतीक स्वरूप है ।

आशय : - अलौकिक अर्थ - स्वर्ग हो अथवा मोक्ष, उसके साधन यागक्रिया में अथवा ब्रह्मज्ञान में इच्छुक व्यक्ति की प्रवृत्ति करानेवाला 'ज्योतिष्टोमेन स्वर्गकामो यजेत' इत्यादि विधिवाक्य है, अथवा 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यः' इत्यादि वेदान्तवाक्य है । अन्नसाधन कृषि आदि लौकिक अर्थ का उपयोगी गो का पालन - आनयन आदि क्रियाओं में प्रवृत्ति करानेवाला 'गामानय-गां पालय' इत्यादि प्रयोजकवृद्धों का वाक्य होता है । जिसको सुनकर प्रयोज्य की उन क्रियाओं में प्रवृत्ति देखी जाती है । उनकी प्रवृत्ति विधिवाक्य के अर्थज्ञान से होती है । वह ज्ञान शब्दजन्य होने से शब्दात्मक है, अन्य प्रत्यक्ष आदि ज्ञान भी शब्दात्मक होते हैं, क्योंकि सभी अर्थ शब्द का वाच्य होने से शब्दात्मक हैं, यह पूर्व में कहा जा चुका है । जिन पशु-पक्षियों का शब्द व्यक्त नहीं है, उनको भी अव्यक्त किसी संकेत शब्द से ही प्रवृत्ति-निवृत्ति का हेतु इष्ट-अनिष्ट विषयक ज्ञान होता है, उनका वह आन्तरज्ञान भी शब्दात्मक होता है, यह उनके लालन या ताड़न के शब्द से आगमन वा पलायन आदि प्रवृत्तियों से लक्षित होता

शब्दानुगतं चैतन्यं शब्दव्यापाराभावे तदपि न व्यवह्रियते, इति भावः ॥ १२८ ॥

तदाह-

भेदोद्ग्राहविवर्तेन लब्धाकारपरिग्रहा ।
आम्नाता सर्वविद्यासु वागेव प्रकृतिः परा ॥ इति ।
एकत्वमनतिक्रान्ता वाङ्नेत्रा वाङ्निबन्धना ।
पृथक् प्रत्यवभासन्ते वाग्विभागा गवादयः ॥ इति च ।

गवाश्वादिकल्पितवर्णपदक्रमभेदपरिग्रहेण प्रतिभासमानतत्तदाकारा परा वागेव वेदादिसर्वविद्यासु मूलप्रकृतिराख्यातेति तदर्थः ।

इदं तु बोध्यम् - इह 'सर्वा' इति प्रथमैकवचनान्तपाठो वाचो विशेषणत्वेन सर्वविद्यासंग्रहाय व्यक्ताव्यक्तसर्वविधवाक्संग्रहाय चेत्यवधेयम् । 'देहिनः' इति द्वितीयाबहुवचनान्तपाठेनैव सर्वदेहिलाभसम्भवे तद्विशेषणत्वेन 'सर्वान्' इति द्वितीयान्तपदोपादानं 'द्वौ ब्राह्मणौ' इत्यादिप्रयोगवत् सुस्पष्टार्थं तु स्थवीयः स्यात्, इत्यलम् ॥ १२८ ॥

है । भले ही उनका ज्ञान अव्यक्त शब्द रूप में हो । अतः इसका यह निष्कर्ष है कि शब्द ही प्राणी मात्र के ज्ञान का प्रतीक है। शब्द से ही किसी के चेतन होने की अवधारणा होती है, शब्द के विना चेतन अचेतन सा प्रतीत होता है, क्योंकि 'काष्ठ-भित्ति-पाषाण आदि' जहाँ वाणी नहीं, वे अचेतन जड़ ही होते हैं, वाणी ही चेतन होने का लक्षण है । वस्तुतः आन्तर परा वाक् स्वप्रकाश चित् स्वरूप है, जिसका विवर्त यह जगत् है । अत एव वाक् से अनुगत यह जगत् है, वाक् ही सकल व्यवहार का प्रवर्तक है, तत्रापि चेतन प्राणी का तो वाक् असाधारण स्वरूप है, जिसके विना उसका चैतन्य ही नहीं प्रकट होता है । पशु-पक्षियों की भी अपनी अपनी भाषा है, जिससे अपने वर्ग में उनका आहार-व्यवहार चलता है, भले ही वह ध्वनि रूप हो - वर्णात्मक न हो । वे भी मनुष्यों के प्रिय-अप्रिय, अनुकूल-प्रतिकूल शब्द को पहचानते हैं ॥ १२८ ॥

प्रविभागे यथा कर्ता तथा कार्य्ये प्रवर्तते ।
अविभागे तथा सैव कार्यत्वेनावतिष्ठते ॥ १२९ ॥

प्रत्येकार्थप्रकाशिका

लोके कुलालादिकारणरूपं घटादिकार्यरूपं चेति सर्वं शब्दब्रह्मणो विवर्तमहिम्नैव विभज्यते, इत्युपपादयति-प्रविभाग इति । प्रविभागे = शब्दब्रह्मणः 'कुलालः कर्ता-घटः

आनन्दा

अनन्तरपूर्वश्लोके जाग्रत्स्वप्नयोरन्वयव्यतिरेकाभ्यां चैतन्यस्य वागविनाभावदर्शनेन व्यापकं वाग्रूपानुगममुपपाद्य प्रसङ्गात् जाग्रति कर्तृकर्मादि-क्रियाकारकविभागरूपं स्वप्ने तु निर्विभागं वाग्रूपानुगतमेव शब्दब्रह्मणो विवर्तमुपपादयति - 'प्रविभागे' इति ।

अन्वयः - सरलः ।

व्याख्या - प्रविभागे = कर्तृकर्मादिबाह्यार्थविभागरूपे शब्दब्रह्मणो विवर्ते सति जाग्रति यथा = येन वाचकशब्दरूपेण विभक्तः कर्ता = कुम्भकारादिः, तथा = तेन वाचकशब्दरूपेणैव विभक्ते कार्ये = कर्मणि घटादौ प्रवर्तते = प्रवृत्तो भवति । 'कुलालः कर्ता-घटः कर्म' इत्येवं वाचकशब्दानुगते कर्तृकर्मादिभेदज्ञाने सति जाग्रति कर्ता स्वभिन्ने कर्मणि प्रवर्तते, न तु स्वस्मिन्नेवेत्यर्थः ।

सूर्यमाया

पूर्व के श्लोक में - जाग्रत् और स्वप्न अवस्था में वाक् का चैतन्य के साथ अन्वय-व्यतिरेक दर्शन से चैतन्य का वाक् से अनुगतरूप सिद्ध कर प्रसङ्गवश यहाँ दोनों अवस्थाओं का भिन्न स्वरूप स्पष्ट करते हुए उभय अवस्था में सभी व्यवहार को शब्दब्रह्म का विवर्त तथा शब्द से अनुगतरूप - एक समान बताते हैं - 'प्रविभागे' इत्यादि ।

कार्य्यम्' इत्यादिविभागात्मकविवर्ते सति - यथा = येन प्रकारेण कर्ता = कुलालादि:, तथा = तेन प्रकारेण कार्य्ये = घटादौ प्रवर्तते ।

अविभागे = स्वप्ने बाह्यार्थाभावेन कर्तृकर्मादिविभागाभावे सा एव = आन्तरवागेव स्वयं कार्यत्वेन = कर्तृकर्मादिविभागं विहाय कर्मत्वेन कर्तृत्वेन च अवतिष्ठते = निर्विभागा अर्थाभेदेन तिष्ठति । वागेव कर्त्री वागेव कर्म च भवति, नास्ति विभाग इत्यर्थ: ।

इह द्वितीयचरणे 'तथा' इत्यस्य स्थाने 'तया' इति तृतीयाविभक्त्यन्त-पाठोऽपि । कर्ता तया = वाचा करणेन कार्ये प्रवर्तते, इति तदर्थ: ।

विमर्श: - शब्दब्रह्मणो बाह्यार्थरूपेण नानानामरूपेण च विवर्ते सति जाग्रति कर्तृकर्मादिसंज्ञाभेदभिन्न: कुलालघटादिरर्थो बहिरुपलभ्यमानो वाचो व्यतिरिक्त: सन्नपि यदि शब्दब्रह्मविवर्तकार्यत्वान्नियमेन शब्दानुगत: शब्दात्मक एव न भिन्नस्तर्हि स्वप्ने बाह्यसत्ताशून्य: कर्तृकर्मादिविभागरहित आन्तरोऽर्थ: शब्दब्रह्मविवर्तो वाचि प्रतिष्ठित: शब्दात्मक एवेत्यत्र क: संशय: ?

अर्थ : - जाग्रत् अवस्था में बाह्य वस्तुभेद रहने से जैसे कर्ता कर्म से विभक्त रहता है - तथा वह अपने से भिन्न -घट आदि कार्य करने में प्रवृत्त होता है, वैसे स्वप्न अवस्था में कर्ता और कर्म आदि का बाह्य रूप में विभाग न रहने से आन्तर वाक् ही स्वयं सकलरूप होकर कार्य के रूप से अवस्थित होती है तथा कर्ता आदि के रूप से भी ।

आशय : - जाग्रत् अवस्था में बाहर वस्तुभेद रहने से कर्ता, कर्म आदि कारक और क्रिया का परस्पर विभाग प्रत्यक्षसिद्ध है, किन्तु स्वप्न में आन्तरज्ञान के अतिरिक्त कोई बाह्य विषय नहीं होता, जिसका परस्पर भेद माना जाय, ऐसी स्थिति में जाग्रत् के संस्कार से भासमान सभी भेद एक ज्ञानरूप ही मानना होगा, जिसका वस्तुत: कोई विभाग नहीं । वह ज्ञान सूक्ष्म वाक् रूप ही होता है, वाक् से भिन्न नहीं, जाग्रत् में वस्तु की वास्तविक सत्ता होने से भेदव्यवहार होता है, स्वप्न में वस्तुत: कोई भेद नहीं । यह जाग्रत् और स्वप्न का भिन्न स्वरूप अवश्य है, किन्तु सभी पदार्थ शब्दब्रह्म का विवर्तकार्य होने से उनका ज्ञान शब्द से अनुगत ही होता है, इसमें कोई अन्तर नहीं है ।

अविभागे = उक्तविभागशून्ये विवर्ते सति सा = वाक् एव तथा कार्यत्वेन = घटाद्यर्थरूपेण अवतिष्ठते = स्थितो भवतीत्यर्थः ।

अयं भावः - शब्दब्रह्मणः साध्यसाधनभावापन्नकर्मादिकारक-क्रियाभेदरूपबाह्यार्थविवर्ते सति ते बाह्यार्थभेदा वाचः पृथग्भूताः स्फुटमुपलभ्यमाना अपि वाग्रूपतामनुगच्छन्ति । तदा हि सिद्धो बाह्यार्थरूपः कर्ता निर्वर्त्ये प्राप्ये वा घटादौ कर्मणि रचना-दर्शनादिसाध्यक्रियायां प्रवर्तते ।

एवं हि जाग्रति साध्यसाधन-क्रियाकारकोभयरूपो वाचो विवर्तः । स्वप्ने तु कर्तृत्वकर्मत्वादिविरुद्धधर्मावच्छिन्नबाह्यार्थस्याभावात् आन्तरवागेव स्वयं बाह्यवस्तुसमानाकार-रथघटादिदृश्यरूपेण विवर्तते । तदाह - 'न तत्र रथा न रथयोगाः पन्थानो भवन्त्यथ रथान् रथयोगान् पथश्च सृजते' इति श्रुतिः ।

यहाँ यह स्पष्ट होना आवश्यक है कि - ज्ञानरूप - आन्तर परा वाक् में बीजशक्ति के रूप में सभी पद व पदार्थ निहित रहते हैं, जो कि परावाक् से स्थूलरूप में बाहर विवृत्त होकर श्रवणगोचर - वर्णों व पदों के रूप में तथा दृश्य घट-पट आदि पदार्थों के रूप में भिन्न भिन्न व्यवहृत होते हैं । वे पद और पदार्थ बाह्य सत्ता पाकर जाग्रद् व्यवहार में साध्य क्रिया तथा सिद्ध - 'कर्ता, कर्म, करण आदि' कारकों के रूप में एक दूसरे से वस्तुतः पृथक् होते हैं । जो कर्ता होता है वह कर्म वा करण नहीं, जो कर्म होता है वह कर्ता वा करण आदि नहीं, जो साध्य क्रिया होती है वह सिद्ध कारक नहीं । यह भेद अवश्यमेव व्यावहारिक सत्य है ।

किन्तु स्वप्न अवस्था जाग्रत् से अत्यन्त विपरीत होती है । इसमें ज्ञान रूप परावाक् से अतिरिक्त किसी की वास्तविक सत्ता ही नहीं होती है, तो किसका किससे विभाग वा भेद हो सकता है ? स्वप्न में तो स्वप्रकाश ज्ञानरूप - परावाक् ही साध्य क्रिया तथा सिद्ध कर्ता, कर्म आदि कारक के रूप में विवृत्त होती है ।

विभागाविभागरूपेण शब्दब्रह्मणो विवर्तादेव सांसारिकपदार्थ इति भावः ॥ १२९ ॥

इत्थं च तदा वाचः साध्यत्वमेव, न सिद्धरूपत्वम् । स्वप्ने नास्ति साध्यसाधनोभयरूपो विवर्तः, किन्त्वेकविध एव साध्यकार्यरूपः । जाग्रति कर्तृकर्मादीनां विरोधादत्यन्तमस्ति पार्थक्यम्, स्वप्ने तु नास्ति तेषामत्यन्त-पार्थक्यरूपो विरोधः । वागेवैका कर्तृकर्मकरणादिव्यपदेशं भजते ।

यद्यपि स्वप्नेऽपि कर्तृकर्मक्रियादिविभागोऽनुभूयते, तथापि स प्रातिभासिको विभागो न व्यावहारिकः, जाग्रति तु व्यावहारिकः सत्य एव बाह्यार्थविभागः ।

एवं हि जाग्रति क्रियाकारकोभयरूपो वा, स्वप्ने साध्यक्रियाऽर्थरूपो वा भवतु विवर्तः, उभयथा परा वागेव विवर्तते, इति सर्वे व्यवहाराः शब्दमूलाः शब्दानुगता एवेति सुस्थिरम् ॥ १२९ ॥

यद्यपि जाग्रत् के समान स्वप्न में भी क्रिया-कारकों के भेद का भान अवश्य होता है, तथापि वह प्रतिभासमात्र है वास्तविक नहीं, जो कि जाग्रत् का ही प्रतिरूप - संस्कारमूलक होता है ।

इस प्रकार जाग्रत् से स्वप्न का पार्थक्य होने पर भी दोनों अवस्थाएँ शब्दब्रह्म - परा वाक् का विवर्तरूप हैं, अतः दोनों अवस्थाओं में समान रूप से शब्द से अनुगत ही वस्तु का ज्ञान होता है ॥ १२९ ॥

स्वमात्रा परमात्रा वा श्रुत्या प्रक्रम्यते यथा ।
तथैव रूढतामेति तया ह्यर्थो विधीयते ॥ १३० ॥

प्रत्येकार्थप्रकाशिका

पुनरपि जगत्कारणत्वं शब्दस्योपपादयति - स्वमात्रेति । स्वमात्रा = आत्मातिरिक्तं किमपि नास्ति, तस्यैवाभासः प्रतिविम्बकल्पः प्रत्येकं पुरुषे जीव इति व्यवह्रियते,

---

आनन्दा

शब्दसंकेतेनैव प्रवर्तमानानां निवर्तमानानां वा व्यक्तवाचामव्यक्तवाचां मनुष्यपश्वादीनामापामराणां जाग्रत्स्वप्नव्यवहारा यावन्तस्ते सर्वे शब्दमूलाः शब्दानुगता इत्यस्य का कथा? तत्त्वविदामृषीणां ये दर्शनभेदास्तेऽपि श्रुतिभेद-मूला इत्युपपादयति - स्वमात्रेति ।

अन्वयः - सरलः ।

व्याख्या - स्वमात्रा = स्वस्य - आत्मनः स्वरूपमेवेदं सर्वं जगत् नान्यदिति, परमात्रा = परस्यात्मनोंऽशो वा अग्नेर्विस्फुलिङ्ग इव यथा = यादृक्स्वरूपोऽर्थविशेषः श्रुत्या = "इदं सर्वं यदयमात्मा (बृह० २-४-६), अयमात्मा ब्रह्म (बृह० २-५-१८)" इत्यादिश्रुत्या "यथाऽग्नेर्विस्फुलिङ्गा व्युच्चरन्ति, एवमेवास्मादात्मनः सर्वे प्राणाः सर्वे लोकाः" इत्यादिश्रुत्या वा प्रक्रम्यते = निरूप्यते, तथा = तादृक्स्वरूप एव सोऽर्थः रूढताम्=

सूर्यमाया

पूर्व के श्लोक में जनसाधारणव्यवहार को शब्दमूलक बताकर यहाँ तत्त्वज्ञ शास्त्रकारों के दर्शनसम्प्रदायों व उनके आचार, व्यवहार भेदों को भी शब्दमूलक बताते हैं - 'स्वमात्रा' इत्यादि ।

अर्थ : - श्रुतिप्रमाण के द्वारा आत्मा रूप अथवा आत्मा से भिन्नरूप जैसा जो पदार्थ कहा जाता है, वह वैसा ही लोक में रूढ़ि व प्रसिद्धि को पा लेता है, क्योंकि श्रुतिप्रमाण के द्वारा ही वस्तु के स्वरूप की अवधारणा की जाती है ।

प्रतिविम्बप्रतिविम्बिनोर्वस्तुतः पार्थक्याभावात् जीवब्रह्मणोरैक्यम्, एतदेव बोधयति – 'तत्त्वमसी' ति वाक्यम् । संसारश्चासत्यः, अत्रोपोद्बलिका – "यत्र हि द्वैतमिव भवति, यत्र वा अन्यदिव

प्रसिद्धिम् एति = याति, तया = श्रुत्या सर्वतः प्रबलेन प्रमाणेन हि = ख्यातः सोऽर्थः विधीयते = अविच्छिन्नानादिपरम्परया सर्वैस्तथैव स्वस्वसम्प्रदायानुसारं निर्धार्यते ।

विमर्शः – जीवात्मा प्रमाता भोक्ता वा, प्रमेयो भोग्यो वा पदार्थः सर्व आत्मानतिरिक्तस्वरूप अनात्मरूपो वा तैस्तैः सम्प्रदायप्रवर्तकैरभ्युपगम्यमानः स्वस्वप्रतिभया श्रुतिवचनप्राधान्याप्राधान्यमभ्युपेत्य तत्तदर्थविकल्पमूलः स्वस्ववादः प्रवर्तितस्तेषामाचारो व्यवहारश्च सर्वः श्रुतिवचनविकल्पमूल एवेति स्पष्टं तत्त्वज्ञानामपि विचारस्य सकलव्यवहारस्य च श्रुतिमूलत्वम् । श्रुतिवचनप्रमाणादेव कैश्चन सर्वो जगद्विकारः स्वमात्रा = आत्मस्वरूपो मन्यते, अपरैश्च परमात्रा = आत्मनो भेदेन परस्वरूपोऽपि मन्यते ।

इदं तु बोध्यम् – पूर्वपूर्वकल्पसिद्धवर्णपदक्रमानुपूर्वीसमानानुपूर्वीका प्रवक्तृस्वातन्त्र्यविरहादपौरुषेया श्रुतिः सर्वथा भ्रमप्रमादविप्रलिप्साकरणापाटवादिपुंदोषसंभावनाशून्या स्वतःप्रमाणा प्रत्यक्षाद्यविषयं यं यमर्थं स्वर्गापवर्गाभ्युदयसाधनमुपदिशति, स सोऽर्थो लोके रूढिं गतस्तथैव यथामति मन्यते श्रद्धयोपास्यते च । परन्तु विभिन्ना हि श्रुतिरुपलभ्यते, अतस्तन्मूला दर्शनवादा अपि भिन्ना दृश्यन्ते ।

आशय : – प्रत्यक्ष वा अनुमान प्रमाण का भी अविषय आत्मा या अनात्मा आदि जिस वस्तु का जैसा जो स्वरूप वेद आदि शास्त्रों का शब्द प्रतिपादित करता है, वह वस्तुस्वरूप वैसा ही लोक में रूढ़ होकर मान्य हो जाता है, क्योंकि प्रबल प्रमाण शब्द से ही वस्तुतः 'दृष्ट-अदृष्ट' किसी वस्तु के स्वरूप का निश्चय होता है तथा तदनुसार उसका व्यवहार होता है । वेद में दृष्ट या अदृष्ट पदार्थ के निरूपक विविध मन्त्रवाक्य उपलब्ध होते हैं, जिनमें किसी वचन को प्रधान तथा अन्य को गौण मानकर अपनी प्रतिभा के अनुसार शास्त्रकार तत्तद् दर्शनों के रूप में अपना मन्तव्य व सिद्धान्त स्थापित करते हैं ।

स्यात् - तत्रान्योऽन्यत् पश्यति, अन्योऽन्यत् विजानीयात्, यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्येत् केन कं विजानीयात्" इति श्रुतिः - इत्यद्वैतमतम्, परमात्रा = यथा अग्नेर्विस्फुलिङ्गा-

---

तथाहि - "सदेव सोम्येदमग्र आसीत्" (६-२-८) इति छान्दोग्यश्रुतिं प्रक्रम्य प्रवर्तते सत्कारणवादः। तत्रैव च "असदेवेदमग्र आसीत्" इत्युपक्रम्य परेषामसत्कारणवादः, "नैवेह किञ्चनाग्र आसीत्" (१-२-१) इति बृहदारण्यकमुपक्रम्य च शून्यवादः।

जगतः कार्यत्वविषयेऽपि सन्ति बहवो वादाः - विवर्तवादः, परिणामवादः, आरम्भवादश्चेति।

तत्र "आत्मैवेदमग्र आसीत्" (बृह० १-४-१७) "ब्रह्म वा इदमग्र आसीत्" (बृह० १-४-११) "इदं सर्वं यदयमात्मा" (बृह० २-४-६) "अयमात्मा ब्रह्म" (बृह० २-५-१८) इति प्रक्रम्योपक्रमोपसंहाराभ्यासादिषड्विधतात्पर्यनिर्णायकलिङ्गैरद्वैतिनां ब्रह्मात्मैक्यवादः। तत्रापि वृत्त्युपहितचैतन्यरूपा दृष्टिरेव सृष्टिरिति दृष्टिसृष्टिवादे जगत्प्रपञ्चः प्रतिपुरुषं बुद्धौ स्थित एव बहीरूपेण प्रतिभासमान आभासरूप एव।

यद्वा जगदिदं सर्वं परमात्मनो विवर्तरूपो विकारः, जीवोऽपि तस्यैव परमात्मन आभासो जलसूर्यकादिवत् प्रतिविम्बकल्पः। यथाह श्रुतिः -

"यथा ह्ययं ज्योतिरात्मा विवस्वान् अपो भिन्ना बहुधैकोऽनुगच्छन्।
उपाधिना क्रियतेऽनेकरूपो देवः क्षेत्रेष्वेवमजोऽयमात्मा॥" इति।

तदाह ब्रह्मसूत्रम् - "आभास एव च" (२-३-५०) इति। उभयथा

अद्वैतवादी - "तत्त्वमसि", "अहं ब्रह्मास्मि", "इदं सर्वं यदयमात्मा", "अयमात्मा ब्रह्म" इत्यादि श्रुतियों के पुनः पुनः उपदेश अनुसार जीव और ब्रह्म की एकता मानकर तथा ब्रह्म को जगत् का एकमात्र विवर्तकारण मानकर समस्त जगत् को आत्मा का प्रतिरूप मिथ्या आभासमात्र मानते हैं।

स्तथा ब्रह्मणोऽवयवा जीवा इति द्वैतमतम्, वा श्रुत्या = 'नेह नानास्ति किञ्चने' त्यादिश्रुत्या 'द्वा सुपर्णा सयुजे' त्यादिश्रुत्या वा यथा प्रक्रम्यते = यथा प्रदर्श्यते तथैव= सा श्रुतिस्तस्मिन्नर्थे रूढताम् एति = प्राप्नोति, हि = यतः तया= श्रुत्या सोऽर्थो विधीयते = निश्चीयत इत्यर्थः ।

आत्मातिरिक्तं नास्ति किमपि, आत्मस्वरूपमेव सर्वम्, इत्यद्वैतसिद्धान्तः । तदेतदभिप्रेत्य प्राह-स्वमात्रेति । द्वैतिनः परे त्वाहुः - परमेश्वरस्य जीवोंऽशः, यथा अग्नेर्विस्फुलिङ्गाः इति । यथाह बृहदारण्यके - "यथाऽग्ने र्विस्फुलिङ्गा व्युच्चरन्ति" इति । पुरुषसूक्तमप्याह - "पादोऽस्य विश्वा भूतानि" इति ।

गीताऽप्याह - "ममैवांशो जीवलोके जीवभूतः सनातनः" इति । यद्वा परस्याश्चेतनव्यतिरिक्तायाः प्रकृते र्मात्रा = परिणामरूपो विकार एव सर्वः पदार्थो, दुग्धस्य दधिवदिति सांख्याः प्राहुः । यथाह श्वेताश्वतरश्रुतिः -

"अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः।" (४-५) इति ॥

"द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते ।" इति च (४-६) ॥

दूसरे द्वैतवादी - "यथाऽग्नेर्विस्फुलिङ्गाः" अथवा "द्वा सुपर्णा सयुजा सखाया" इत्यादि मन्त्रों के उपदेश अनुसार जीव को परमात्मा का अग्नि की चिनगारियों के समान अंश मानकर ब्रह्म व परमात्मा से भिन्न मानते हैं ।

इनमें भी सांख्यवादी "अजामेकाम्" इत्यादि मन्त्रों को मुख्य प्रमाण मानकर प्रकृति को जगत्रूप में परिणाम का मूलकारण (कर्ता) मानते हैं, तों नैयायिक "विश्वस्य कर्ता भुवनस्य गोप्ता" इत्यादि मन्त्रों को प्रमाण मानकर सर्वज्ञ परमेश्वर को सृष्टि का कर्ता पुरुष मानते हैं ।

तत्तत्प्रवादानुसारेण तत्तच्छब्दस्य तत्तदर्थे संकेतः कृतः, अत एव तच्छब्देन स एवार्थः - न त्वन्य इति व्यवहारनियमः। एवञ्च यावद्व्यवहारस्य शब्दमूलत्वात् शब्दमूलकोऽयं संसार इति ध्वनिः ॥ १३० ॥

एवमेव सर्वज्ञपरमेश्वरकर्तृत्ववादोऽपि न्यायवैशेषिकाणां पातञ्जलयोगानुयायिनां च। यथाह - ''द्यावाभूमी जनयन् देव एकः, विश्वस्य कर्ता भुवनस्य गोप्ता'' इति, ''यः सर्वज्ञः स सर्ववित् यस्य ज्ञानमयं तपः'' इति च। इत्येवं ते ते दर्शनसम्प्रदायभेदास्तेषामाचारभेदा व्यवहारभेदाश्च सर्वे श्रुतिशब्दमूला एवेति का कथा तदनुवर्तिनां सर्वेषामापामरजनव्यवहाराणामित्यलम् ॥ १३० ॥

इस प्रकार सभी दर्शनों के सम्प्रदायभेद तथा उनके अनुयायियों के आचार-व्यवहार-भेद का प्रादुर्भाव श्रुतियों के प्रमाणभूत शब्दों से हुआ है। इससे स्पष्ट होता है कि शब्द ही जगत् का तथा जगत् के सकल व्यवहार का मूल प्रवर्तक है ॥ १३० ॥

अत्यन्तमतथाभूते निमित्ते श्रुत्युपाश्रयात् ।
दृश्यतेऽलातचक्रादौ वस्त्वाकारनिरूपणा ॥ १३१ ॥

प्रत्येकार्थप्रकाशिका

पुनस्तदेव युक्त्यन्तरेणोपपादयति - अत्यन्तेति । निमित्ते= कारणे अत्यन्तम् अतथाभूते = असत्ये सत्यपि, अलातचक्रादौ= उल्कोत्पातशशविषाणादौ श्रुत्युपाश्रयात् = शब्दबलात् वस्त्वाकारनिरूपणा = इदं वस्त्वित्याभासप्रतीतिः दृश्यते ।

आनन्दा

बाह्यसत्तां विनाप्यलातचक्रादिदृष्टान्तेन शब्दस्यार्थव्यवहारे हेतुत्वं व्यवस्थापयति - अत्यन्तमिति ।

अन्वयः - निमित्ते अत्यन्तम् अतथाभूते अलातचक्रादौ श्रुत्युपाश्रयात् वस्त्वाकारनिरूपणा दृश्यते ।

व्याख्या - निमित्ते = ज्ञानकारणे अर्थे, अत्यन्तम् = सर्वथा अतथाभूते= पुरोऽसत्यपि, अलातचक्रादौ = अलातचक्रशशविषाणादिशब्दे प्रयुक्ते सति श्रुत्युपाश्रयात् = शब्दश्रवणबलात् वस्त्वाकारनिरूपणा = सुवर्णकुण्डलाकारस्योल्काभ्रमिजातज्वालामण्डलस्य वस्तुनः काचनाकारप्रकल्पना दृश्यते= बुद्धावुपलभ्यते ।

सूर्यमाया

उल्का आदि शब्द दृष्टान्त द्वारा बाह्य अर्थ की सत्ता की अपेक्षा विना शब्द को ज्ञान व अर्थ व्यवहार का प्रयोजक सिद्ध करते हैं - 'अत्यन्तम्' इत्यादि ।

अर्थ : - ज्ञान तथा व्यवहार का हेतु - विषय न रहने पर भी 'अलातचक्र' आदि शब्द कहने पर शब्दप्रयोग के कारण बुद्धि में गोलाकार चक्र के समान ज्वाला मण्डल वस्तु के आकार प्रकार की कल्पना पाई जाती है ।

आशय : - जलती उल्का (मशाल) को चारों ओर चक्राकार न घुमाने की स्थिति में ज्वाला चक्र की बाह्य सत्ता न रहने पर भी उसका बोधक - 'अलात

बाह्यसत्ताविहीनोऽप्यर्थः शशविषाणादिः शब्दबलेन बुद्धौ सन्निपतति, शब्दसत्ताविहीनस्तु अर्थः न कुत्रापि प्रतीयते, अतः शब्दमूलिकैवार्थसृष्टिरिति भावः ॥ १३१ ॥

विमर्शः - अरण्योर्निहितो वह्निरिव सर्वेऽप्यर्थाः प्रथमं बुद्धौ स्थिता एव निमित्तवशाद् बाह्यसत्तां लभन्ते । स्वप्ने इव जाग्रत्यपि बुद्धौ स्थिता अर्थास्तादात्म्येन शब्दे सन्निहिताः तिष्ठन्ति, अत एव शब्दे श्रुतमात्रे बुद्धिसतोऽर्थस्य ज्ञानं नूनं जायते । सोऽर्थो बहिः सन् भवतु न वा भवतु, नास्ति तस्य शाब्दज्ञानायात्यन्तमपेक्षा । श्रुतः शशशृङ्गादिशब्दः 'एष वन्ध्यासुतो भाति शशशृङ्गधनुर्धरः' इत्यादिवाक्यघटकः काममप्यर्थाकारां बुद्धिं प्रकल्पयति । यथाह-

"अत्यन्तासत्यपि ह्यर्थे ज्ञानं शब्दः करोति च" इति ।

तद्धि ज्ञानं योगनये विकल्पाख्यम् - वैशेषिकनये आहार्य्यं वेत्यन्यदेतत् । यथाह योगसूत्रम् - "शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः" (१-९) इति । बाधज्ञानसमकालिकमिच्छाजन्यं ज्ञानमाहार्य्यज्ञानमिति विशेषः । एवं च सति वाचकशब्देऽर्थव्यवहारः प्रवर्तते, असति तस्मिन्न प्रवर्तते - इत्यन्वयव्यतिरेकदर्शनात् शब्द एव सकलपदार्थव्यवहारप्रवर्तक इति सुस्पष्टम् ॥ १३१ ॥

चक्र' शब्द का प्रयोग करने पर शब्द के माहात्म्य से सुवर्ण कुण्डल के समान ज्वालामाला का आकार मस्तिष्क में प्रतीति का विषय बन जाता है, ऐसे ही 'खरहे का सींग' - 'आकाश पुष्प' - 'वन्ध्या-पुत्र' आदि जो लोक में अत्यन्त असत् हैं, उसकी भी बुद्धि में आकार प्रकार की प्रकल्पना उक्त शब्दों के प्रयोग के माहात्म्य से कुछ-न-कुछ होती है । इस प्रकार विषय वस्तु की लोक में बाह्य सत्ता वस्तुतः हो या न हो, किन्तु उच्चारित शब्द अर्थविशेष का तथा वस्तुविशेष का ज्ञान व व्यवहार करा देता है, क्योंकि शब्द में अर्थ नित्य सन्निहित रहता है । इससे यह स्पष्ट होता है कि समस्त लोकव्यवहार का प्रवर्तक शब्द है ॥ १३१ ॥

अपि प्रयोक्तुरात्मानं शब्दमन्तरवस्थितम् ।
प्राहुर्महान्तमृषभं येन सायुज्यमिष्यते ॥ १३२ ॥

प्रत्येकार्थप्रकाशिका

अन्तर्यामिण एव शब्दत्वे युक्त्यन्तरमाह - अपीति । प्रयोक्तुः= उच्चारयितुः आत्मानम् = अन्तःकरणम् अन्तरवस्थितम् = हृदयस्थितं महान्तम् ऋषभम् = श्रेष्ठम् शब्दं प्राहुः, येन = शब्देन सायुज्यम् = तद्भावापन्नो मोक्षः इष्यते = इष्टोऽस्ति ।

आनन्दा

पुरा 'अथेदमान्तरं ज्ञानम्' इत्यादिना ज्ञानस्य शब्दरूपता निरूपिता । अथेदानीमन्तःकरणस्थजीवात्मनः प्रमातुरपि शब्दरूपता निरूप्यते - अपि प्रयोक्तुरिति ।

अन्वयः - प्रयोक्तुः आत्मानम् अपि अन्तः अवस्थितम् महान्तम् ऋषभम् शब्दम् प्राहुः, येन सायुज्यम् इष्यते ।

व्याख्या - प्रयोक्तुः = वक्तुः आत्मानम् = अन्तःकरणावच्छिन्नचेतनं प्रमातारं जीवम् अपि = न तु केवलं ज्ञानम् अन्तः = हृदयगुहायाम् अवस्थितम् = अनुप्रविष्टम् महान्तम् = अपरिच्छिन्नम् अनन्तम्, ऋषभम्= ऋषति - सर्वत्र गच्छतीति व्युत्पत्त्या सर्वगतं विभुम् अत एव सर्वश्रेष्ठं परब्रह्मरूपं शब्दम् प्राहुः = समामनन्ति ऋङ्मन्त्राः, येन = शब्दब्रह्मणा सह सायुज्यम्= साम्यम् - "सालोक्य - सारूप्य-सामीप्य - तद्भावापत्ति"- इत्येतदन्यतमरूपम् इष्यते = काम्यते मुमुक्षुभिः । तदाह- 'चत्वारि शृङ्गा'

सूर्यमाया

पूर्व में वक्ता के ज्ञान को शब्दस्वरूप बताकर यहाँ प्रकारान्तर से वक्ता के आत्मा को भी शब्दस्वरूप बताते हैं - 'अपि' इत्यादि ।

अर्थ : - अन्तःकरण में अवस्थित - 'अन्तर्यामी' व महान् -सर्वव्यापी सर्वश्रेष्ठ ब्रह्मरूप शब्द को वक्ता का आत्मा भी (मन्त्र आदि) कहते हैं, जिस शब्द ब्रह्म के साथ मुमुक्षु लोग सायुज्यरूप मोक्ष की इच्छा करते हैं ।

अयमाशयः - शब्दो द्विविधः - नित्योऽनित्यश्च । नित्यः स्फोटः, स एवान्तर्यामी सर्वशक्तियुक्तः सर्वेश्वरः प्रतिपुरुषमन्तरवस्थितः । एतद्भावनावशादेव - एतद्भावापन्नो मोक्षः सायुज्याख्यः सर्वेषामिष्टोऽस्ति ।

(४-५८-३) इति ऋक्संहितायाम् 'महो देवो मर्त्याँ आविवेश' इत्यनेन । महता देवेन नः साम्यं यथा स्यादिति तद्व्याख्यानमाह महाभाष्ये पस्पशाह्निके । 'सक्तुमिव तितउना' इति ऋङ्मन्त्रेऽपि (१०-७२-२) 'अत्रा सखायः सख्यानि जानते' इत्यनेन सायुज्यमाह । 'सायुज्यानि जानते' इति च तद्व्याख्यानभाष्यम् । अनेन प्रयोक्तुरात्मनः शब्दब्रह्मरूपता व्याख्याता ।

विमर्शः - हृदयगुहायामन्तः प्रविष्टः प्रयोक्तुरात्मा शब्दब्रह्मरूपो नान्यः, येन स्वात्मैक्यभावनाबलाद् भेदवासनाग्रन्थिसमुच्छेदे शब्दज्ञः सायुज्यरूपं मोक्षं लभते - 'ब्रह्म वेद ब्रह्मैव भवति' इति मुण्डकश्रुतेः । अत्र प्रमाणम् ऋङ्मन्त्रमुदाजहार महाभाष्यकारः -

"चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य ।
त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्याँ आविवेश ॥" इति ।

यथा हि घोषं प्रकुर्वाणो हृष्टः समुत्को वृषभो गोमय - मूत्रोत्सर्ग - क्षेत्रकर्षणादिभि र्यज्ञसाधनमन्नदुग्धघृतादिकं सृजन् सकलान् काम्यानर्थान् वर्षतीति वृषभ उच्यते, तथा शब्दोऽप्यभिमतान् वाच्यलक्ष्यव्यङ्ग्यान् सर्वानर्थान् प्रकाशयन् धर्मादीन् सकलान् पुरुषार्थान् यथेष्टं वर्षतीति सोऽपि वृषभरूपः ।

न केवलं स कामगोरूपः काम्यफलवर्षणक्रियामात्रत एव, अपितु बाह्याभ्यन्तरावयवविभागसंस्थानतोऽपि । तथाहि तस्य शब्दवृषभस्य चत्वारि शृङ्गाणि - परा-पश्यन्ती-मध्यमा-वैखरीरूपाणि - आभ्यन्तराणि, नामाख्यातोपसर्गनिपातरूपाणि च बाह्यानि सन्ति । भूतभविष्यद्वर्तमानास्त्रयः

आशय : - "चत्वारि शृङ्गा" इत्यादि ऋचा के "महो देवो मर्त्याँ आविवेश" इस वाक्यखण्ड से कहा गया है कि -सभी अर्थों को प्रकाशित करनेवाला तथा स्वयं भी प्रकाशमान सूक्ष्मशब्द महान् देव है - स्वयं ज्योतिःस्वरूप ब्रह्म है, जो कि प्रत्येक मर्त्यों के अन्तःकरण में प्रविष्ट व अवस्थित है । जिसके साथ अभेदभावना के निरन्तर अभ्यास से भेदसंस्कारग्रन्थि का उच्छेद होकर तादात्म्यरूप

अनित्यश्च लोके उच्चार्य्यमाणो व्यावहारिक इति । एतदेव महाभाष्ये- ''चत्वारि शृङ्गा त्रयोऽस्य पादा'' इत्यादि प्रतिपादितम् ॥ १३२ ॥

काला अस्य शब्दवृषभस्य पादाः, नित्यः कार्यश्च द्विविधशब्दौ वाचकस्वरूपौ शिरसी, सप्त सुब्विभक्तयस्तदर्थाः कारकाणि च क्रियाजनकानि हस्ताः = करोति क्रियां निर्वर्तयतीति व्युत्पत्तियोगात् कराः, त्रिषु स्थानेषु - उरसि कण्ठे शिरसि तदुपलक्षितेषु कण्ठताल्वादिषु च बद्धः प्राणवायुनाऽभिहतः सन् रोरवीति = बहिर्घोषं व्यक्तं वैखरीरूपं करोति, इति तदर्थः ।

तत्र नित्यः शब्दो निर्विभागोऽखण्डस्फोटरूपः सर्वेषामन्तःकरणेऽनुप्रविष्टः पर्जन्यवत् दवदहनवच्च प्रभवनिरोधादिसर्वशक्तिगर्भितो विवर्तरूपविकारप्रकृतिः सर्वेश्वरः सकलार्थप्रकाशकः । स खलु नित्यो वाचको हि व्यङ्ग्यः । कार्यस्तु शब्दो वैखरीवाग्रूपः श्रवणगोचरो लोके व्यवहारप्रवर्तकः । स तु ध्वनिरूपो व्यञ्जकोऽन्तःसन्निविष्टस्य स्फोटस्य नित्यस्य शब्दस्य । तयोर्मध्ये व्यङ्ग्यः स्फोटाख्योऽखण्डो महान् सर्वविधपरिच्छेदातीतः स्वयं प्रकाशमानः परेषामपि प्रकाशकः संवित्स्वरूपः सर्वस्य द्योतनाद् देवः सान्तःकरणान् सर्वान् मर्त्याननुप्रविश्य जीवभावमुपेतः । तेन देवेन शब्दब्रह्मणा स्वात्मैक्यभावनाया दृढतमाभ्यासपरिपाकात् शब्दयोगवित् सालोक्यं सामीप्यं सारूप्यं ताद्रूप्यं वा सायुज्याख्यं मोक्षं समश्नुते । तदाह श्रीछान्दोग्यश्रुतिः- ''परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यत एष आत्मेति'' इति ॥ १३२ ॥

सायुज्य - 'मोक्ष' प्राप्त होता है, वह शब्दब्रह्म से अभिन्न आत्मा है, यह उक्त मन्त्र का तात्पर्यार्थ है । ऐसे ही महाभाष्य में प्रमाण रूप में उदाहृत - ''सक्तुमिव तितउना पुनन्तः'' इस ऋचा के ''अत्रा सखायः सख्यानि जानते'' इस वाक्यांश से भी कहा गया है कि ध्यानशील धीर शब्दज्ञ शब्द में आत्मा की समानख्याति से अर्थात् अभिन्नरूपता की भावना से सख्य व सायुज्य का अनुभव करते हैं । इस कथन से शब्द का ब्रह्मात्मैकत्व स्पष्ट सिद्ध है ॥ १३२ ॥

तस्माद्यः शब्दसंस्कारः सा सिद्धिः परमात्मनः ।
तस्य प्रवृत्तितत्त्वज्ञस्तद् ब्रह्मामृतमश्नुते ॥ १३३ ॥

प्रत्येकार्थप्रकाशिका

शब्दसंस्कारस्य सायुज्यप्राप्त्युपायतामाह - तस्मेति । तस्मात् = शब्दब्रह्मणोरैक्यात् यः शब्दसंस्कारः = 'अयं शब्दः साधुः, अयं शब्दोऽसाधुः' इत्यादिप्रक्रिया, सा परमात्मनः = परब्रह्मणः सिद्धिः = प्राप्त्युपायः ।

आनन्दा

उपर्युक्तदिशा शब्दब्रह्माभिन्नेनात्मना सायुज्यप्राप्तेरुपायं शब्दसंस्कारमाह- तस्माद्य इति ।

अन्वयः - तस्मात् यः शब्दसंस्कारः सा परमात्मनः सिद्धिः, तस्य प्रवृत्तितत्त्वज्ञः तत् अमृतम् ब्रह्म अश्नुते ।

व्याख्या - तस्मात् = प्रागुक्तदिशा शब्दस्य ब्रह्मात्मरूपत्वात्, यः शब्द- संस्कारः = साध्वसाधुशब्दयोर्ध्वनिस्फोटयोर्वा विवेकेन शुद्धशब्दस्य भावना, सा परमात्मनः = आत्माभिन्नशब्दब्रह्मणः सिद्धिः = स्वरूपदर्शनरूपप्राप्तिः ।

सूर्यमाया

व्याकरणसाध्य शब्दसंस्कार से शुद्ध अखण्डशब्द के ज्ञान को पूर्वोक्त सायुज्यरूप मोक्ष का उपाय बताते हैं - 'तस्माद्यः' इत्यादि ।

अर्थ : - उक्त प्रकार - असाधु तथा ध्वनिरूप से असंकीर्ण - शुद्ध शब्दस्वरूप का विवेचनरूप जो शब्द का संस्कार है, वह आत्मारूप शुद्ध परब्रह्म के स्वरूप निश्चय का तथा परमात्मा की प्राप्ति का उपाय है । क्योंकि उस शब्दब्रह्म का वर्ण - पद आदि बाह्यभेद जो व्यावहारिक स्वरूप है, उसको असत्य व मिथ्या समझता हुआ जो शब्द के शुद्ध अखण्ड स्वरूप को वस्तुतः जानता है, वह जन्म-जरा-मरण-बन्धन-चक्र से मुक्त होकर ब्रह्म के अमृत नित्य सुखस्वरूप को प्राप्त करता है।

कथमित्यत आह - तस्य = शब्दब्रह्मणः प्रवृत्तितत्त्वज्ञः = वर्णादिव्यवहारो ध्वनिकृतः, शब्दब्रह्म तु तदभिव्यङ्ग्योऽखण्ड एकः - इत्यादिरूपेण यावद्व्यावहारिकधर्माणां 'नेति नेति' इत्यादिश्रुतिरीत्या निषेधमुखेन शुद्धाखण्डब्रह्मज्ञानवान् पुरुषः,

---

तद्बीजमाह - तस्य = आत्माभिन्नशब्दब्रह्मणः प्रवृत्तितत्त्वज्ञः = ध्वन्युपाधिकवर्णपदादिक्रमविभागोपग्रहस्य मिथ्यात्वज्ञानवान् शब्दतत्त्वज्ञः तत्= श्रुतिस्मृतिप्रसिद्धम् अमृतम् = जरामरणादिविकाररहितं नित्यं सत्यमनन्तम् ब्रह्म = ब्रह्मस्वरूपम् अश्नुते = लभते । ब्रह्मस्वरूपतां प्राप्तो जरामरण-बन्धचक्राद् विमुक्तोऽजरामरभावं गच्छति - ''न स पुनरावर्तते'' इति, ''ब्रह्म वेद ब्रह्मैव भवति'' इति च श्रुतेः ।

विमर्शः - व्याकरणेन हि शब्दस्यासाधुविविक्तसाधुस्वरूपान्वाख्यानरूपे संस्कारे सत्येव साधुशब्दस्य ज्ञानपूर्वकप्रयोगेण ''एकः शब्दः सम्यग् ज्ञातः सुष्ठु प्रयुक्तः'' इति स्मृतिदिशा विशुद्धान्तःकरणो वैयाकरणः शब्दभावनाऽ-भ्यासयोगेन वर्णपदादिविवर्तविकारभेदस्य मिथ्यात्वनिश्चयवान् तदतिरिक्ता-खण्डशुद्धशब्दब्रह्मरूपाधिष्ठानतत्त्वसाक्षात्कारेण समुच्छिन्नभेदवासनाग्रन्थिः शब्दब्रह्मणा ताद्रूप्यं सारूप्यं वा लभमानः सायुज्याख्यं मोक्षमधिगच्छति । तदाह ऋङ्मन्त्रः-

''सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत ।
अत्रा सखायः सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताधिवाचि'' इति ।

अयमर्थः- तितउना = चालिन्या तुषापाकरणेन सक्तोः संस्कार इव व्याकरणाध्ययनसंस्कृतमनसा शब्दस्यापभ्रंशरूपतुषापाकरणेन शुद्धसाधु-स्वरूपनिर्वचनरूपः संस्कारः - नीरक्षीरविवेकन्यायेन ध्वनिरूपासंकीर्ण-शुद्धस्फोटस्वरूपविवेकरूपो वा संस्कारो यैः कृतस्ते तेन संस्कारेण

आशय : - व्याकरण शास्त्र द्वारा शब्दव्युत्पत्ति की प्रक्रिया के ज्ञान से जो नीर-क्षीर के विवेकज्ञान के समान असाधु शब्दों से पृथक् शुद्ध साधुशब्दों का अवधारण कर साधुशब्दों का ही प्रयोग करता है, तज्जन्य पुण्य से उस वक्ता का अन्तःकरण शुद्ध हो जाता है, जिसके माहात्म्य से वह वक्ता अपने निर्मल अन्तःकरण में वैखरी वाक् स्वरूप से विविक्त 'अखण्ड शुद्ध शब्द ब्रह्म' का

तद्ब्रह्मामृतम् = अजरामरभावम् अश्नुते = प्राप्नोति, ब्रह्मरूपो भवतीत्यर्थः ।

संस्कृतेन ध्वनिना विशुद्धान्तःकरणे विशुद्धं ब्रह्माभिव्यज्यते, इति ध्वनिसंस्कारः परम्परया ब्रह्मप्राप्त्युपाय इति भावः ॥ १३३ ॥

शुद्धान्तःकरणाः शब्दब्रह्मणि आत्मैकत्वभावनया सायुज्यमनुभवन्ति, यतोहि असाधुभ्यः साधुशब्दस्य विवेकख्यातिमतां शुद्धायां वाचि स्वप्रकाशचिद्ब्रह्मरूपा लक्ष्मीः सदा संनिहिता तिष्ठति ।

तदेतत् सर्वमभिसन्धायाह - 'तस्माद्यः शब्दसंस्कार' इति । वृत्तावुदाहृत आगमोऽप्येनमर्थमाह -

वाचः संस्कारमाधाय वाचं ज्ञाने निवेश्य च ।
विभज्य बन्धनान्यस्याः कृत्वा तां छिन्नबन्धनाम् ॥
ज्योतिरान्तरमासाद्य च्छिन्नग्रन्थिपरिग्रहः ।
परेण ज्योतिषैकत्वं छित्त्वा ग्रन्थीन् प्रपद्यते ॥ इति ॥

अयमर्थ : - वैखर्या वाचः पदादिरूपाया व्याकरणेन साधुत्वान्वाख्यानरूपं संस्कारं कृत्वा तां वाचं प्राणवृत्तिक्रमेण सूक्ष्मक्रमप्रतिभासवत्यां मध्यमायां वाचि प्रतिष्ठाप्य मध्यमां वाचं च मयूराण्डरसोपमायां संहृतक्रमायां वर्णादि-संस्कारमात्रशेषायां पश्यन्त्यां विलाप्य पश्यन्तीं च स्वयंज्योतिःस्वरूपायां चिद्रूपपरायां वाचि निवेश्य वर्णपदाद्यध्यारोपमूलाज्ञानबन्धनं विभिद्य विच्छिन्नाहङ्कारग्रन्थिः परावागात्मकमान्तरं ज्योतिः समासाद्य परेण शब्दब्रह्मणाऽऽत्मैकत्वरूपं सायुज्यं प्रपद्यते ।

अनेन व्याकरणस्य मोक्षसाधनत्वं सुस्पष्टम् ॥ १३३ ॥

आत्मा रूप में प्रत्यक्ष दर्शन करता है, तथा उसके सभी व्यावहारिक भेदज्ञान मिट जाते हैं, अन्ततः वह अमृतत्व की प्राप्ति कर 'अजरामर - नित्यसुख' ब्रह्मस्वरूप हो जाता है ।

इससे यह स्पष्ट होता है कि व्याकरण मोक्ष का साधन है ॥ १३३ ॥

न जात्वकर्तृकं कंचिदागमं प्रतिपद्यते ।
बीजं सर्वागमापाये त्रय्येवादौ व्यवस्थिता ॥ १३४ ॥

प्रत्येकार्थप्रकाशिका

इदानीं स्मृतीनां प्रवाहानादित्वव्यवस्थापनेन प्रामाण्यं स्थापयति - न जात्विति । कंचित् आगमम् = स्मृतिम् जातु =

आनन्दा

पुरुषरचितत्वाविशेषात् चार्वाकादिनास्तिकागमानामिव व्याकरणस्यापि सन्दिग्धप्रामाण्ये कुतस्तस्य साक्षात्परम्परया वा परमपुरुषार्थसाधनत्वम् ? इत्याशङ्कां परिहरन् विच्छिन्नमूलतर्कमात्राश्रयत्वेन नास्तिकागमानामप्रामाण्येऽपि पुंदोषशून्यापौरुषेयवेदमूलकत्वेन व्याकरणादिस्मृतीनां प्रामाण्यं व्यवस्थापयति- 'न जात्वकर्तृकम्' इति ।

अन्वयः - जातु कंचित् आगमम् अकर्तृकम् न प्रतिपद्यते, सर्वागमापाये आदौ बीजम् त्रयी एव व्यवस्थिता ।

व्याख्या - जातु = कदाचिदपि कंचित् = कमपि नास्तिकमास्तिकं वा आगमम् = दर्शनम् अकर्तृकम् = पुरुषविशेषैररचितम् न प्रतिपद्यते = नैव मनुते कोऽपि, तत्तत्पुरुषैर्विरचितमेव सर्वो मनुते । इति आगमानां सर्वेषां तत्तत्कर्तृनाम्ना ख्यातानामस्ति साम्यम्, किन्तु न तावता सर्वेषां समानं प्रामाण्यमप्रामाण्यं वा कल्पनीयम्, रचितत्वाविशेषेऽपि नास्तिकास्तिकागमयोर्वैषम्यात् ।

सूर्यमाया

कर्ता विशेष के द्वारा रचित होने से संभावित - भ्रम, प्रमाद, राग, द्वेष आदि दोषों के कारण नास्तिक आगमों के समान ही व्याकरण का भी अप्रामाण्य संभव हो, इस आशङ्का का निवारण करते हुए व्याकरण का प्रामाण्य निरूपण करते हैं- 'न जात्वकर्तृकम्' इत्यादि ।

अर्थ : - कभी भी नास्तिक वा आस्तिक किसी आगम को कोई कर्ता विशेष से अरचित नहीं मानता है, रचित ही मानता है । किन्तु अन्तर यह है कि

कदाचिदपि अकर्तृकम् = अपौरुषेयं न प्रतिपद्यते = न विजानाति, अपितु पौरुषेयमेव जानाति, केवलं वेदवाक्यान्येवापौरुषेयाणि ।

तयोर्वैषम्यमाह - सर्वागमापाये = प्रणेतृपुरुषेषु विच्छिन्नेषु कल्पान्ते सर्वेषामागमानां विनाशे जातेऽपि आदौ = सृष्टेः प्रारम्भे बीजम् = आस्तिकागमानां सर्वेषां मूलम् त्रयी = ऋग्यजुःसामानि एव, व्यवस्थिता = अपौरुषेयत्वेन नित्या सर्गादिभुवामृषीणां बुद्धौ स्थिता । तदाह - ''ऋचो अक्षरे परमे व्योमन्'' इति । तथा च तन्मूलकत्वेन स्मर्यमाणानामास्तिकागमानां स्मृतिरूपाणां प्रामाण्यम्, अन्येषां तु विच्छिन्नमूलानां कपोलकल्पनामात्राधारत्वे-नाप्रामाण्यमिति विशेषः । अत्र 'कश्चित्' इति पाठान्तरे आगमस्य सकर्तृकत्वे सर्वसंमतिरुच्यते, 'कंचित्' इति पाठे सकलागमस्य सकर्तृकत्वं प्रोच्यते, नास्ति कोऽपि विरोधः ।

विमर्शः - बृहस्पतिप्रसूतचार्वाकादिनास्तिकागमानां, कापिलकाणादा-द्यास्तिकागमानां च प्रणेतृपुरुषाभिधानपरिग्रहेणैव ख्यातानां सकर्तृकत्वस्या-भ्युपगमे नास्ति कदाचिदपि कस्यचित् काचन विप्रतिपत्तिः, नहि कमप्यागमं तदनुगामी स्वयमप्यकर्तृकं मनुते । सर्वः सश्रद्धं सगौरवं स्वस्वसम्प्रदायाचार्य-विरचितं स्वस्वागमं स्मरतीति तथ्यम् । परमस्ति नास्तिकास्तिकागमयोः कश्चन भेदको विशेषः । येन नास्ति तयोः सकर्तृकत्वेऽपि तुल्यं प्रामाण्यमप्रामाण्यं वा । अपौरुषेयवेदमूलकत्वेन संभावितपुंदोषशून्यतया

युग-कल्प के अन्त में सभी आगमों का लय होने पर आस्तिक आगमों का मूल प्रमाण वेद अपौरुषेय होने से बीजरूप में व्यवस्थित रहता है, जिसके मूल आधार पर सृष्टि के आदि में पुनः स्मृतिरूप आगमों की रचना की जाती है । अतः वेदमूलक व्याकरण आदि स्मृति प्रमाण हैं, निर्मूल होने से नास्तिक आगम अप्रमाण हैं ।

आशय : - जिन आगमों का उद्गम वेद से होता है, वे कल्पान्त काल में कभी प्रत्यक्षरूप में विलीन हो जाने पर भी अपने मूलस्थल वेद में बीजरूप में अप्रत्यक्ष विद्यमान ही रहते हैं, समूल नष्ट नहीं होते, क्योंकि उनका मूलस्रोत - वेद

नन्वेवं पूर्वस्मृतिषु विनष्टासु पुनः कथं भविष्यन्तीत्यत आह- बीजम् = स्मृतेः कारणरूपम् सर्वागमापाये = सर्वस्मृति-विनाशेऽपि सति त्रयी एव = श्रुतिरेव आदौ व्यवस्थिता = वेदे

आस्तिकागमानामेव प्रामाण्यम् । इतरेषां तु पुरुषबुद्धिविकल्पनामात्रत्वेन भ्रमप्रमादादिसमस्तपुंदोषास्कन्दिततया कल्पान्ते सर्वापाये विच्छिन्नमूलतया चाप्रामाण्यम् ।

ननु वेदा अपि तत्तदृषिपरिग्रहेण ख्याता महाभारतादिवत् सकर्तृकत्वेन पौरुषेया एव भवितुमर्हन्तीति चेन्न; पौरुषेयागमानां कृतकत्वेन विनाशित्वस्या-वश्यंभावितया कल्पान्ते सर्वागमापाये प्रणेतृषु च विच्छिन्नेषु बीजरूपेण वेदपरिशेषस्य नित्यसिद्धस्य सर्वागमाधिष्ठानस्यावश्याभ्युपेयत्वात् । ऋषयस्तु तपःसमाहिते चेतसि मन्त्रद्रष्टारः सम्प्रदायप्रवर्तका एव, न तु प्रमाणान्तरेणार्थ-मुपलभ्य कर्तुमकर्तुमन्यथा वा कर्तुं स्वतन्त्रा रचयितारः । ''धाता यथापूर्वमकल्पयत्'' इति मन्त्रोपदेशदिशा सूर्यचन्द्रादिवत् पूर्वपूर्व-सर्गसिद्धानुपूर्वीसमानानुपूर्वीकस्यैव वेदस्योत्तरोत्तरसर्गेषूपदिश्यमानत्वेन तदुपदेशे ऋषीणां स्वातन्त्र्यविरहेण कर्तृत्वस्यासिद्धेः ।

अपौरुषेय होने से अत्यन्त प्रमाण तथा नित्य सिद्ध शाश्वत है, जिसका कभी विलय नहीं होता । वह सबका अधिष्ठान जो ठहरा । उसका भी यदि विलय हो तो, शून्य या अभाव का नाममात्र भान भी कहाँ किस रूप में होगा ?

अतः यह मानना होगा कि आगम व उनके प्रणेताओं का विलय होने पर सबका प्रकाशक स्वयंप्रकाशरूप वेदविज्ञान बीजरूप में नित्य विराजमान रहता है, जिसके आधार पर ऊहापोह करके यौगिक प्रतिभा बल से कल्पान्तर के प्रारम्भ में प्रति सर्गों में ऋषिमुनिगण वेदरहस्यों का अनुवादक-स्मृतिरूप आगमों की संरचना करते रहते हैं । जिसके फलस्वरूप आगमों का अविच्छिन्न नित्य प्रवाह बना रहता है, कभी मिटता नहीं । अतः वेदमूलक स्मृतिरूप आगम प्रवाह नित्य तथा निर्बाध प्रमाण हैं ।

एव कारणरूपेण तिष्ठतीत्यर्थः । पूर्वस्मृतिषु विनष्टास्वपि पुनः प्रणेतारः तद्वेदबीजमादाय प्रणेष्यन्तीत्यतः स्मृतीनां प्रवाहविच्छेदाभावेन प्रवाहनित्यतया प्रामाण्यम्, इति भावः ॥ १३४ ॥

तस्मात् महाभारतादिवाक्यवत् सजातीयोच्चारणानपेक्षोच्चारणविषयत्वरूपपौरुषेयत्वस्याभावाद् वेदा अपौरुषेया एवेति सिद्धम् ।

एवं चापौरुषेयत्वान्नित्यसिद्धा वेदाः कल्पान्ते पौरुषेयागमानां सर्वेषां विच्छेदेऽपि तेषां मूलभूता बीजरूपेण तिष्ठन्ति, तानुपादायैवोत्तरसर्गेषु स्मृतिकाराः स्मृतीः प्रणयन्तीति वेदमूलत्वेन स्मृतीनां प्रामाण्यं, नेतरेषां विच्छिन्नमूलतार्किकागमानाम्, इति सुस्पष्टम् ।

प्रकृते तु व्याकरणस्य वेदाङ्गत्वेनाविच्छिन्नमूलत्वात् मुनिकर्तृकस्मृतिरूपत्वेन प्रामाण्यमिति तस्य साधुशब्दनिर्वचनद्वारा धर्मादिपुरुषार्थसाधकत्वमक्षुण्णम् ॥ १३४ ॥

जो आगम वेदमूलक नहीं होते, वे भ्रम, प्रमाद, रागद्वेष दोषों से लिप्त पुरुषों के द्वारा अपनी अपनी अभिरुचि के अनुसार कोरे तर्क के आधार पर नये नये रचे जाते हैं, अत एव वे विच्छिन्नमूल होने से प्रवाहनित्य तथा प्रमाण नहीं होते ।

प्रकृत में व्याकरण वेदमूलक स्मृति है, वेद का मुखरूप प्रधान अङ्ग है, अतः सर्वथा प्रमाण होने से साधुशब्द के निर्वचन द्वारा 'धर्म-अपवर्ग' आदि पुरुषार्थों का असाधारण - साधन है, इसमें कोई विप्रतिपत्ति व आँच नहीं है ॥ १३४ ॥

अस्तं यातेषु वादेषु कर्तृष्वन्येष्वसत्स्वपि ।
श्रुतिस्मृतिगतं धर्म्मं लोको न व्यतिवर्तते ॥ १३५ ॥

प्रत्येकार्थप्रकाशिका

उक्तार्थमेव युक्त्यन्तरेणोपपादयति - अस्तमिति । वादेषु = भक्ष्याभक्ष्यादितत्तद्विषयनियमनिबन्धेषु अस्तं यातेषु = विनष्टेषु

आनन्दा

प्रागुक्तदिशा तत्तदाचार्यरचितागमानां श्रुतिमूलकत्वेन प्रवाहनित्यतायाः प्रामाण्यस्य च का कथा, शिष्टाचारपरम्पराप्राप्तभक्ष्याभक्ष्यादिधर्माधर्मनियमानामपि प्रवाहनित्यतां प्रामाण्यं च प्रतिपादयति - 'अस्तं यातेषु' इति ।

अन्वयः - वादेषु अस्तम् यातेषु अन्येषु कर्तृषु असत्सु अपि लोकः श्रुतिस्मृतिगतं धर्मम् न व्यतिवर्तते ।

व्याख्या - वादेषु = आगमानां धर्माधर्मविधिनिषेधवचनेषु अस्तं यातेषु= कालकलनाकवलीकृतेषु अन्येषु = नूतनेषु कर्तृषु = आगमप्रणेतृषु च असत्सु = अप्रादुर्भूतेषु अपि तन्मध्यकालेऽपि लोकः = शिष्टसमाजः, श्रुतिस्मृतिगतम् = श्रौतं स्मार्तं च धर्मम् = भक्ष्याभक्ष्यगम्यागम्यादिविषयकविधिनिषेधनियमम् न व्यतिवर्तते = नोल्लङ्घयति - पालयत्येवेति भावः ।

सूर्यमाया

लोक में सदाचार के रूप में प्रतिष्ठित - श्रुति व स्मृति में प्रतिपादित धर्म की प्रवाहनित्यता तथा प्रामाणिकता का निरूपण करते हैं - 'अस्तम्' इत्यादि ।

अर्थ : - स्मृतियों के आचारविषयक विधि-निषेध-वचनों का विप्लव काल में लोप हो जाने पर तथा अन्य किसी नये स्मृतिकर्ता पुरुष का प्रादुर्भाव न होने पर भी सभ्य समाज शिष्टों की आचारपरम्परा से लोक में प्रचलित - श्रुति और स्मृति के आचार धर्म का अतिक्रमण व उल्लङ्घन नहीं करता है, प्रत्युत अवश्य पालन करता है ।

सत्स्वपि, अन्येषु कर्तृषु = ग्रन्थनिर्म्मायकाचार्येषु असत्स्वपि= अविद्यमानेष्वपि श्रुतिस्मृतिगतम् = तत्प्रतिपाद्यं धर्म्मम् = भक्ष्याभक्ष्यादिनियमं लोकः = साधुजनः न व्यतिवर्तते = न व्यतिक्राम्यतीत्यर्थः । पूर्वाचार्य्यकृतग्रन्था विनष्टाः पुनर्नवीना-

---

विमर्श : - कृतकस्य विनाशित्वध्रौव्याद् यदि कदाचिद् युगान्ते वा, यवनखसकोलादिविप्लवे वा, अद्यत्वे यथा मनुवादविरोधे जागरूके वा कालविपर्य्ययेण स्मृतीनां सहसा क्रमशो वा विलयो जायेत, अथान्यस्य च कस्यापि प्रणेतृपुरुषविशेषस्य पुनरनुद्भवेन स्मृतयो नवा नैव विरचिता भवेयुस्तदात्वेऽपि शिष्टो जनसमवायः पूर्वपूर्वशिष्टाचारपरम्परास्रोतःप्रवर्तितं कुलक्रमागतं स्वस्वशाखासम्प्रदायविदितं व्रतादिनियमनिबन्धं भक्ष्याभक्ष्य-गम्यागम्याद्याहारविहारव्यवहारनियमानुबन्धं चाजागरणशयनान्तं सदाचारं श्रौतं स्मार्तं स्वं धर्मं नियमेन विप्लवकालेऽप्यनुतिष्ठति श्रद्धया, न तु विजहाति । एतावता सुस्पष्टमिदं यत् श्रौताः स्मार्ताः सदाचारा अपि सातत्येन प्रवर्तमानाः प्रवाहनित्याः सन्ति प्रामाणिकाः, श्रुत्यनुगतस्मृतीनां प्रामाणिकत्वे तु कोऽस्ति

आशय : - स्मृतिकारों तथा उनके रचित स्मृतिग्रन्थों का कालविपर्यय से कभी लोप हो जाना स्वाभाविक है, क्योंकि वे कृतक हैं । इतिहास इसका साक्षी है कि - अनार्य बर्बरों ने श्रुति-स्मृति ग्रन्थों को भस्मसात् किया । ऐसी स्थिति में भी वेद और स्मृतियों से प्रतिपादित धर्म शिष्टों की आचारपरम्परा से समाज में सदाचार रूप में प्रतिष्ठित है, उनका विधिवत् पालन श्रद्धालु शिष्टजन करते ही हैं, छोड़ते नहीं । इससे यह स्पष्ट है कि - सदाचार रूप में वर्तमान 'श्रौत-स्मार्त' धर्म भी प्रवाहनित्य तथा प्रमाण है । उदाहरणस्वरूप - ग्रन्थ के प्रारम्भ में मङ्गल करने की प्राचीन आस्तिक परम्परा है, उसका मूल श्रुति वा स्मृति का वचन उपलब्ध नहीं होता, तथापि शिष्टजन ग्रन्थ के आरम्भ में मङ्गल करते हैं, तथा

चार्य्याः निबन्धनग्रन्थान् नाकार्षुः, एतादृशावस्थायामपि साधुजनाः परम्परागतशिष्टाचारं न त्यजन्तीत्यतः श्रुतिस्मृतिकथितधर्म्मस्य कदापि विच्छेदो नास्तीति प्रवाहनित्यतेति भावः ॥ १३५ ॥

संशयलवोऽपि ? अत एव सदाचारमपि धर्मलक्षणमाह भगवान् मनुः –
वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः ।
एतच्चतुर्विधं प्राहुः साक्षाद्धर्मस्य लक्षणम् ॥ इति ॥ (२-२२श्लोक०) ॥१३५॥

इस शिष्टाचार से 'ग्रन्थादौ समाप्तिकामो मङ्गलमाचरेत्' इस विधिवाक्य की कल्पना भी करते हैं । भगवान् पतञ्जलि ने "वृद्धिरादैच्" सूत्र के भाष्य में कहा भी है कि – "माङ्गलिक आचार्यो महतः शास्त्रौघस्य मङ्गलार्थं वृद्धिशब्दमादितः प्रयुङ्क्ते" इत्यादि । अतः सदाचार भी प्रवाहनित्य है, धर्म का लक्षण व प्रमाण है ॥ १३५ ॥

ज्ञाने स्वाभाविके नार्थः शास्त्रैः कश्चन विद्यते ।
धर्मो ज्ञानस्य हेतुश्चेत्तत्राम्नायो निबन्धनम् ॥ १३६ ॥

प्रत्येकार्थप्रकाशिका

नन्वेवं स्मृतिमन्तरापि लोको धर्ममाचरिष्यत्येव किमर्थं स्मृतिप्रणयनेनेत्यत आह - ज्ञान इति । स्वाभाविके =

आनन्दा

प्राक्कृतधर्मजन्यस्वाभाविकज्ञानवतां शुकदेवादीनामिह जन्मनि शास्त्रा-नावश्यकत्वेऽपि तज्ज्ञानस्यापि शास्त्रप्रयोज्यत्वं प्रतिपादयन् अनन्योपायतया पामरान् प्रति धर्मव्यवस्थाहेतुत्वेन शास्त्राणां सार्थक्यं निरूपयति - 'ज्ञाने' इति ।

अन्वयः - स्वाभाविके ज्ञाने शास्त्रैः कश्चन अर्थः न विद्यते, ज्ञानस्य हेतुः धर्मः चेत् तत्र आम्नायः निबन्धनम् ।

व्याख्या - स्वाभाविके ज्ञाने = सनक-सनन्दन-सनत्कुमार-कपिल-कणाद-शुकदेवमुनिप्रभृतीनां नैसर्गिके ज्ञाने शास्त्रैः कश्चन अर्थः = शास्त्रस्य किमपि प्रयोजनम् यद्यपि न विद्यते, तथापि ज्ञानस्य = सनकादिमुनीनां

सूर्यमाया

पूर्वोक्तरीति से शास्त्रों के विना शिष्टों के आचार से भी धर्म का ज्ञान सम्भव है, तो उसके लिए शास्त्र की अनिवार्य आवश्यकता नहीं है, साथ ही कपिल आदि मुनि तो जन्म से ही ज्ञानवान् हुए हैं - उनके लिए भी शास्त्रों की परमावश्यकता नहीं है, इस शङ्का का समाधान करते हुए शास्त्र की सार्थकता सिद्ध करते हैं - 'ज्ञाने' इत्यादि ।

अर्थ : - जन्मकाल से ही जिसको विना शास्त्रोपदेश के स्वत एव स्वाभाविक ज्ञान है, उस पुरुषविशेष के लिए यद्यपि शास्त्रों का कोई प्रयोजन इस जन्म में नहीं है, तथापि उस स्वाभाविक ज्ञान का कारण यदि पूर्वजन्म के धर्मविशेष को माना जाय, तो ज्ञानकारण उस धर्म का उपदेश करनेवाला वेदमूलक शास्त्र ही होगा, शास्त्र से ही धर्म का अनुशासन होता है । अत एव पूर्वकृत धर्मजन्य स्वाभाविकज्ञान में भी वेदमूलकशास्त्र परम्परया कारण सिद्ध होता है, जन-

प्राक्कृतधर्मवशात् शास्त्रमन्तरापि उत्पन्ने ज्ञाने शास्त्रैः कश्चन अर्थः = प्रयोजनं न विद्यते, यदि ज्ञानस्य हेतुः = कारणं धर्मश्चेत्, किन्तु तत्र = धर्मे आम्नायः निबन्धनम् = ज्ञापकः ।

नैसर्गिकस्य स्वतःसिद्धज्ञानस्य हेतुः = निदानम् धर्मः = पूर्वभवीयः श्रौतकर्मजन्यपुण्यातिशयविशेषः चेत् = यदि कल्प्यते, तर्हि तत्र = तेषां धर्मे - पुण्यातिशयविशेषेऽपि आम्नायः = वेदशास्त्रमेव निबन्धनम् = निमित्तम्, वेदोपदेशेनैव पूर्वभवे तेषां धर्मातिशयस्य प्राकट्यजननात् ।

विमर्शः - कपिल-वामदेव-कणाद-जैमिनि-शुकदेवमुनिप्रभृतयो ये केचनेह भवे शास्त्रोपदेशं विनैव स्वतःसिद्धनैसर्गिकज्ञानवन्तः प्रादुर्भवन्ति, तेषां

साधारण के ज्ञान का तो एकमात्र शास्त्र ही उपाय है । अतः सबको शास्त्र का प्रयोजन है ।

आशय : - कपिल, कणाद, जैमिनि आदि मुनिगण जन्मकाल से शास्त्रोपदेश के विना ही स्वभावतः ज्ञानी हुए हैं, उनके लिए स्मृतिशास्त्र के उपदेश की आवश्यकता नहीं है, किन्तु जो स्वतःसिद्ध ज्ञानी नहीं हैं, ऐसे जनसाधारण को तो स्मृतिशास्त्र से ही दृष्ट, अदृष्ट चतुर्वर्ग पुरुषार्थ का ज्ञान होता है । जनसाधारण दृष्ट वा अदृष्ट, हित या अहित अर्थ का निर्णय करने में असमर्थ हैं, उनको अभक्ष्य के भक्षण में, परस्त्री - परस्व के हरण में प्रत्यक्ष सुख का अनुभव होता है, वे अदृष्ट नरकदुःख की सत्ता कहाँ से जानें ? अतः उनके लिए शास्त्र ही एकमात्र इष्ट-अनिष्ट के ज्ञान का साधन हैं ।

वस्तुतः अदृष्ट - 'हित अहित' का ज्ञान यदि आकस्मिक ही हो जाय, तो समानरूप से सभी स्वर्ग-अपवर्ग सुख के भागी हो जायेंगें, कोई अनर्थ - दुःख का भागी न होगा, पर ऐसा नहीं होता, अतः यह मानना होगा कि स्वाभाविक ज्ञान का भी अवश्यमेव कोई कारणविशेष है । वह पूर्वकृत कर्म से जन्य पुण्यातिशय ही हो सकता है, जिसके माहात्म्य से कपिल आदि मुनि जन्मसिद्ध ज्ञानी हुए हैं । उनका पूर्वकृतकर्मजन्य धर्म वेदमूलकशास्त्र से ही सम्भव है, क्योंकि धर्म का उपदेश वेदवाक्य से ही होता है, अपौरुषेय वेद ही अतीन्द्रिय

कस्यचित् पुरुषस्य प्राक्तनधर्मवशात् ज्ञानोत्पत्तौ तत्र शास्त्राणां प्रयोजनविरहेऽपि आपामरं प्रति धर्मव्यवस्थापनेन शास्त्राणां चारितार्थ्यमिति भावः ॥ १३६ ॥

प्रातिभे ज्ञाने को हेतुरित्यन्विष्यमाणे प्राक्तनो धर्मविशेषो भवेद्धेतुरिति नूनमूहनीयम्, अन्यथा अन्येषामपि तथात्वप्रसङ्गात् । स हि तेषां धर्मातिशयविशेषोऽपौरुषेयवेदशास्त्रोपदिष्टतपोयोगमाहात्म्यादिति सिद्धं तेषामपि ज्ञानं प्रति शास्त्रस्य सप्रयोजनत्वम् ।

अपि च स्वतःप्रतिभानवतां तेषां मुनीनामिह भवे शास्त्रस्य प्रयोजनाभावे न तावता शास्त्रानावश्यकत्वं कल्पयितुं शक्यम्, पामराणां स्थूलदृशामस्मादृशां कृते शास्त्राणामस्ति सर्वथा सार्थक्यमिति श्रद्धया हृदाऽनुसन्धीयताम् ॥ १३६ ॥

अदृष्ट धर्म में प्रमाण हैं तथा वेदमूलक स्मृति भी प्रमाण हैं । अतः स्पष्ट है कि साक्षात् या परम्परया सबको समानरूप में शास्त्र की आवश्यकता है । यह अन्तर अवश्य होगा कि - स्वाभाविक ज्ञान का हेतु पूर्वकृत धर्म ही निमित्त है, अतः स्वाभाविक ज्ञानी को आधुनिक स्मृतिशास्त्र की अपेक्षा नहीं, किन्तु मादृश स्थूलबुद्धि जनसाधारण को तो श्रुति, स्मृति उभयविध शास्त्र की आवश्यकता है । शिष्टों का आचार तो शास्त्र का ज्ञापकमात्र है, उससे शास्त्र की सार्थकता ही सिद्ध होती है, अनर्थकता नहीं । सदाचार शास्त्र का पोषक प्रमाण है । सदाचार से अनुपलब्ध मूलभूत शास्त्र का अनुमान होता है ॥ १३६ ॥

वेदशास्त्राविरोधी च तर्कश्चक्षुरपश्यताम् ।
रूपमात्राद्धि वाक्यार्थः केवलान्नावतिष्ठते ॥ १३७ ॥

प्रत्येकार्थप्रकाशिका

आगमस्यैव प्रमाणत्वे तर्कस्य सर्वथा अप्रामाण्यमेव स्यादत आह - वेदशास्त्रेति । अपश्यताम् = साक्षात्कर्तुमसमर्थानां जनानाम् वेदशास्त्राविरोधी = आगमाविरुद्धः तर्कः चक्षुः =

आनन्दा

वेदमूलकागममात्रस्य प्रामाण्ये व्यवस्थापिते तर्कस्याप्रामाण्यशङ्कामुद्भाव्य तां परिहरन् वेदाविरुद्धतर्कस्यापि प्रामाण्यमुपपादयति -'वेद' इति ।

अन्वयः - वेदशास्त्राविरोधी च तर्कः अपश्यताम् चक्षुः, हि केवलात् रूपमात्रात् वाक्यार्थः न अवतिष्ठते ।

व्याख्या - वेदशास्त्राविरोधी = वेदशास्त्रसंमतः च = चकारः त्वर्थः, न तु वेदविरुद्धः, तर्कः = ऊहः प्रकरणादिज्ञानात् तात्पर्यार्थनिर्णयप्रयोजकः अपश्यताम् = धर्मादिकं परोक्षातीन्द्रियमर्थं निश्चेतुमसमर्थानां पामराणाम् चक्षुः = वस्तुस्वरूपनिश्चयसाधनम्, हि = यस्मात् कारणात् केवलात् =

सूर्यमाया

वेदमूलक आगम का प्रामाण्य निरूपण कर अब वेदमूलक तर्क का भी प्रामाण्य निरूपण करते हैं - 'वेद' इत्यादि ।

अर्थ : - वेदशास्त्र का अविरोधी - वेद संमत ही तर्क - वेद का तात्पर्य न समझने वालों का वेदार्थप्रकाशक चक्षुरूप प्रमाण है, क्योंकि केवल वेदवाक्य के स्वरूप मात्र से प्रकरण आदि के ज्ञान विना उसका तात्पर्यविषय वाक्यार्थ निश्चित नहीं होता है ।

आशय : - मीमांसाशास्त्र में परिभाषित - 'श्रुति - लिङ्ग-वाक्य - प्रकरण - स्थान-समाख्या' इन छह प्रमाणों के ज्ञानरूप तर्क के सहारे ही वेदवाक्यों का तात्पर्यविषय अर्थ व्यवस्थित होता है । जिसको प्रकरण आदि का ज्ञान नहीं रहता है, उसको 'वाक्य का कौन अर्थ विवक्षित है - कौन नहीं' इसका निर्णय न हो

अर्थप्रकाशकः हि = यतः केवलात् = प्रकरणादितर्करहितात् रूपमात्रात् = केवलवाक्यस्वरूपात् वाक्यार्थः = निश्चयात्मक-वाक्यार्थः नावतिष्ठते = न व्यवस्थितो भवतीत्यर्थः ।

उपपादकतर्कविरहितात् रूपमात्रात् = वेदवाक्यस्वरूपमात्रात् वाक्यार्थः = वेदवाक्यस्य तात्पर्यविषयोऽलौकिको धर्मादिरर्थः न अवतिष्ठते = न निश्चीयते । तदाह मनुः -

आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना ।
यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः ॥ इति ॥

(मनुस्मृ० १२-१०६)

विमर्शः - "सत्यं ज्ञानमनन्तं ब्रह्म" (तै०उ० २-१-१), "एकमेवाद्वितीयं ब्रह्म" (छान्दो०उ० ६-२-१) इत्यादिश्रुतीनां परस्परं विरुद्धत्वेन प्रतिभासमानानाम्, "आत्मा वा अरे द्रष्टव्यः" (बृह० ४-५) इत्यादीनां च दर्शनक्रियाविधिपरत्वेन सिद्धब्रह्मपरत्वेन वा विप्रतिपद्यमानानां प्रकरणादेरूहं विना तात्पर्यभूतार्थस्य सम्यक्प्रकाशो न भवतीत्यतस्तत्र प्रकरणादिज्ञानरूप-स्तर्को वेदार्थाज्ञानतिमिरे भ्राम्यतां तदर्थप्रकाशकश्चक्षूरूपं प्रमाणम् । इत्थं च वेदशास्त्रानुगृहीत एव तर्को भवति प्रमाणं न तु वेदनिरपेक्षः स्वतन्त्रः, तस्योत्प्रेक्षामात्रसारस्याव्यवस्थितरूपत्वात् । शास्त्रेषु तर्कागम्यमपि वस्तुतत्त्वं

सकने से वाक्यार्थ का निश्चय नहीं हो पाता है । वेद की तो वार्ता ही क्या? लोक में भी प्रकरण, देश, काल, परिस्थिति का तर्क किये विना वाक्य के श्रवण मात्र से अर्थ का नियत ज्ञान नहीं होता । उदाहरणस्वरूप -'गतोऽस्तमर्कः' इत्यादि वाक्यों का अर्थज्ञान प्रकरणज्ञान के अधीन ही होता है। जिस वाक्य में नानार्थक शब्द का प्रयोग हो, उसका अर्थ तो नियमतः प्रकरणादि ज्ञान से ही नियत होता है । जब दृष्टार्थक लौकिक वाक्यों की यह स्थिति है, तो अत्यन्त अदृष्ट-अर्थपरक अलौकिक वेदवाक्य का तो कहना ही क्या ? अत एव यह मानना होगा कि वाक्य के विवक्षित अर्थ को नियन्त्रित व नियत कर प्रकाशित करनेवाला

प्रकरणादिज्ञानपुरःसरं यो वाक्यार्थः स एव निश्चयात्मकः, प्रकरणादिज्ञानं तर्कमन्तरा न भवेदतो वेदवाक्यार्थे सहकारितर्कः प्रमाणम् - न तु शुष्कतर्क इति भावः ॥ १३७ ॥

भवति श्रद्धेयम् । तदाह काठके - ''नैषा मतिस्तर्केणापनेया'' इति । येयमात्मविषया मतिः, एषा तर्केण = स्वबुद्ध्यभ्यूहमात्रेण न आपनेया = न प्रापणीया, न वा अपनेतव्या, इति तदर्थमाह शाङ्करभाष्यम् ।

तस्मात् शुष्कतर्कमात्रागम्ये परमेश्वरे धर्माधर्मादौ वाऽर्थे अपौरुषेयं वेदशास्त्रमेव प्रमाणम्, तदनुगृहीतश्च तर्कोऽपि भवति सहायकं मानम् ।

वेदविरुद्धस्तु तर्को नार्थसाधकः, यथाह ब्रह्मसूत्रम् - ''तर्काप्रतिष्ठानात्'' इति (२-१-११) । नास्ति तर्कस्य स्वोत्प्रेक्षामात्रमूलस्य काचन प्रतिष्ठा- अनवस्थानात्, इत्यर्थः ।। १३७ ।।

प्रकरणादि का ऊहापोहरूप तर्क अवश्य ही नेत्ररूप प्रमाण है । परन्तु तर्क तभी प्रमाण होता है, जबकि वह वेदशास्त्र से संमत तथा वेदार्थ का साधक व पोषक हो, वेदविरुद्ध न हो, क्योंकि वेद में ऐसे भी वस्तु प्रतिपादित हैं, जो कि स्थूल बुद्धि के तर्क की सीमा से अत्यन्त दूर हैं, तर्क वहाँ तक नहीं पहुँच पाता, धर्म अधर्म आदि ऐसे ही अतीन्द्रिय अर्थ हैं । अतः वेद का अनुसारी ही तर्क प्रमाण है, वेद से विरुद्ध स्वतन्त्र नहीं ।। १३७ ।।

यतो विवक्षा पारार्थ्यं व्यक्तिरर्थस्य लैङ्गिकी ।
इति न्यायो बहुविधस्तर्केण प्रविभज्यते ॥ १३८ ॥

प्रत्येकार्थप्रकाशिका

तदेवोपपादयति - यत इति । यतः = यस्मात् विवक्षा = 'पशुना यजेत' इत्यत्रैकत्वस्य विवक्षा, अत एवैकपशुकरणक-

---

आनन्दा

वाक्यार्थव्यवस्थायां तर्कस्य सहकारित्वं यदुक्तम्, तत्र बीजं प्रकाशयति- 'यतो विवक्षा' इति ।

अन्वयः - यतः विवक्षा पारार्थ्यम् अर्थस्य लैङ्गिकी व्यक्तिः, इति बहुविधः न्यायः तर्केण प्रविभज्यते ।

व्याख्या - यतः = यस्मात् कारणात् विवक्षा = कस्यचिदर्थस्य क्वचिद अभिप्रेतत्वम्, क्वचित्तु न, पारार्थ्यम् = कस्यचिदर्थस्य अन्यपरत्वम्, क्वचिच्च अर्थस्य = अर्थविशेषस्य लैङ्गिकी = अर्थप्रकाशनसामर्थ्यजन्या व्यक्तिः = अभिव्यक्तिः - प्रकाश इति यावत्, इति = इत्येवंरूपः बहुविधः= बहुप्रकारः न्यायः = अनुगममार्गः तर्केण = श्रुतिलिङ्गादिप्रमाण-मूलेनोहापोहेन प्रविभज्यते = स्थलविभागेन विविच्य व्यवस्थाप्यते, तस्मात् कारणात् तर्को वाक्यार्थस्यानुगमे सहकारि प्रमाणम् ।

सूर्यमाया

वेदवाक्य के अर्थनिर्णय में तर्क को प्रमाण मानने में बीज प्रकट करते हैं- 'यतो विवक्षा' इत्यादि ।

अर्थ : - वेदवाक्य में किसी शब्द के किसी अर्थविशेष की कहीं विवक्षा कहीं अविवक्षा, या कथित किसी अर्थ से अन्य अर्थपरक होना, तथा सामान्य रूप से कथित अर्थ का किसी विशेष अर्थरूप में परिणत होना, इत्यादि अनेकों वाक्यार्थव्यवस्था के मार्ग हैं, जो कि तर्क के आधार पर ही पृथक् पृथक् व्यवस्थित किये जाते हैं, अतः तर्क भी वेदार्थ के निर्णय में उसका अविरोधी प्रमाण है ।

यागाददृष्टसिद्धिः, न तु अनेकपशुकरणकयागात् । 'ग्रहं संमार्ष्टि' इत्यत्र अविवक्षा, अतो नवसोमरसपात्रसंमार्जनम् । एवं च विधेयगतसंख्या विवक्ष्यते, न तूद्देश्यगतसंख्या-इत्यनुगमः ।

विमर्शः - यतः शब्दबोध्यस्यार्थस्य क्वचिद् विवक्षा, क्वचिद् अविवक्षा, क्वचिद् अर्थान्तरस्योपलक्षकत्वम्, क्वचिच्च सामान्येनाभिहितस्यार्थस्य सन्निहितवाक्यान्तरसामर्थ्यरूपाल्लिङ्गाद् विशेषपरत्वमित्येवं बहुप्रकारो विमर्शः प्रकरणादिज्ञानोपबृंहितेन तर्केण यथास्थलं पृथक् पृथक् व्यवस्थाप्यते, अतस्तर्कोऽपि वाक्यतात्पर्यनिर्णये सहकारि प्रमाणमिति पर्यवस्यति । तथाहि- 'पशुना यजेत' इत्यत्र तृतीयैकवचनविभक्त्यर्थ एकत्वं विवक्ष्यते, तेन नानेकपशुकरणकयागादपूर्वस्य सिद्धिः ।

'अष्टवर्षं ब्राह्मणमुपनयीत' इत्यत्र ब्राह्मणशब्दार्थे पुंस्त्वं विवक्षितम्, अतः स्त्रीनपुंसकयो र्नोपनयनविधेरधिकारः ।

अविवक्षा यथा -'ग्रहं संमार्ष्टि' इत्यत्र ग्रहनामके सोमरसाधानपात्रे द्वितीयैकवचनार्थ एकत्वं नैव विवक्षितम्, अतो नवसंख्याकपात्राणां संमार्जनमिष्टापूर्वजनकं न केवलमेकस्य ।

एवं व्याकरणेऽपि ''कर्तुरीप्सिततमं कर्म'' इति सूत्रे ईप्सिततमपदार्थे

आशय : - कालान्तर में होनेवाले स्वर्ग फल का क्षणविनाशी 'याग आदि' कर्म साक्षात् साधक नहीं हो सकता, अत एव मीमांसक शास्त्रविहित कर्म से अपूर्व-नामक अदृष्ट संस्कार की उत्पत्ति मानते हैं, जो कि स्थिर होने से कालान्तरभावी फल का साधक होता है ।

''पशुना यजेत'' इस विधिवाक्य के 'पशुना' पद में तृतीया एकवचन विभक्ति का एकत्व अर्थ विवक्षित है, अतः एकपशुकरणक याग से अदृष्ट की सिद्धि होती है, अनेक से नहीं । इसके विपरीत ''ग्रहं संमार्ष्टि'' इस अङ्ग के विनियोगविधि में सोमरस के पात्र का नाम 'ग्रह' शब्द से द्वितीया एकवचन विभक्ति का एकत्व अर्थ विवक्षित नहीं है, अतः एक के अतिरिक्त 'ग्रह' नामक नौ सोमरस-पात्रों का संमार्जन किया जाता है । इस व्यवस्था के लिए तर्क द्वारा यह नियम प्रतिष्ठित होता है कि विधेय में संख्या की विवक्षा होती है - उद्देश्य

पारार्थ्यम् = 'नक्षत्रं दृष्ट्वा वाचं विसृजेत्' इत्यादौ नक्षत्रपदस्य तदुदयकाले लक्षणा । अत एव सत्यपि नक्षत्रदर्शने दिवा न वाग्विसर्गः, रात्रौ च असत्यपि दर्शने विसृज्यते वाक् इति ।

नपुंसकत्वम्, एकत्वसंख्या, क्तप्रत्ययार्थवर्तमानत्वं चाविवक्षितम्, तेनाविशेषेण सर्वेषाम् पुंस्त्रीनपुंसकानामेकद्विबहूनामतीतानागतवर्तमानानां कर्मत्वं विधीयते ।

इत्थं च विधेयगता संख्या विवक्ष्यते नोद्देश्यगता, इति तर्केणानुगमः प्रतिफलति ।

पारार्थ्यम् = अर्थान्तरोपलक्षकत्वं यथा - 'नक्षत्रं दृष्ट्वा वाचं विसृजेत्' इत्यत्र नक्षत्रपदं नक्षत्रोदयकालस्योपलक्षकम् । 'काकेभ्यो दधि रक्ष्यताम्' इत्यत्र च काकपदं दध्युपघातकस्य सर्वस्य बिडालादेरुपलक्षकम्, इति काकनक्षत्रादिपदस्य पारार्थ्यम्, अविवक्षास्थले जहल्लक्षणाख्या लक्षणलक्षणा, पारार्थ्यस्थले तु अजहल्लक्षणाख्या उपादानलक्षणेति विवेकः ।

अर्थस्य लैङ्गिकी व्यक्तिर्यथा - 'अक्ताः शर्करा उपदधाति' इति वाक्ये 'अक्ता' इत्यनेन पदेन व्यञ्जनम्रक्षणादिसाधनस्नेहद्रव्यस्य सामान्यतोऽभिधाने तैलादिकरणकाञ्जनस्यापि प्रसङ्गे 'तेजो वै घृतम्' इति

में नहीं । तर्क द्वारा इस नियम की अवधारणा हो जाने से कहीं अव्यवस्था की शङ्का नहीं होती ।

इसी प्रकार शब्द से कोई अर्थ कथित होने पर भी वह किसी अन्य अर्थ का लक्षक हो जाता है, स्वपरक नहीं रहता । जैसे कि "नक्षत्रं दृष्व्वा वाचं विसृजेत्" इस विधिवाक्य में नक्षत्रशब्द स्वपरक न होकर नक्षत्रों के उदय काल- 'रात्रि' का उपलक्षक होता है, अतः कदाचित् सर्वग्रास सूर्यग्रहण आदि कारणों से दिन में नक्षत्र का दर्शन होने पर भी मौनव्रत नहीं तोड़ा जाता, रात में मेघ छाने पर नक्षत्रदर्शन न होने पर भी मौनव्रत का समापन किया जाता है ।

ऐसे ही - "अक्ताः शर्करा उपदधाति" इस अङ्गवाक्य में अञ्जनशब्द से सामान्यरूप में किसी स्नेह द्रव्य से शर्करा का मिश्रण विधान है, किन्तु इसका निकटवर्ती अन्य वाक्य है - 'तेजो वै घृतम्', इस वाक्य में घृत को तेजःस्वरूप कहा है, क्योंकि तेल की अपेक्षा घी डालने से अग्नि की ज्वाला अधिक उठती

लैङ्गिकी अर्थस्य व्यक्तिः = यथा 'अक्ताः शर्कराः' इत्यत्र 'तेजो वै घृतम्' इत्यन्यत्र घृतस्य स्तुतिरूपलिङ्गात् घृतेनाक्ता इत्यर्थस्य प्रकाशः ।

इति बहुविधः न्यायः = अनुगमः तर्केण प्रविभज्यते = विविच्यते । तस्मात् वेदार्थबोधे सहकारितया तर्कस्य प्रामाण्यम्, इति भावः ॥ १३८ ॥

तत्रैव वाक्यान्तरे श्रूयमाणाद् घृतस्तुतिरूपाद् लिङ्गात् तैलादिव्यावर्तनेन घृतद्रव्यविशेषबोधनेन घृतकरणकाञ्जनार्थस्य प्रकाशनं भवति । तेजसोऽनुग्राहकत्वाद् घृते तेजस्त्वमुपचरितम्, तेन घृतस्य प्राशस्त्यं बोध्यते । अतो घृतेनाक्ताः शर्करा नेयाः । लक्ष्यानुरोधेन लक्षणं परिकल्प्य तर्केणैव सर्व एवंविधोऽनुगमः क्रियते । नहि क्वचिद् विभक्त्यर्थैकत्वस्य विवक्षा चेत्तर्हि सर्वत्र तस्य विवक्षा, अविवक्षा चेत्तर्हि सर्वत्रैवाविवक्षा तर्कचक्षुर्निमील्य बोद्धव्या, किन्तु प्रकरणादिज्ञानोपबृंहितेन तर्केण चक्षुषा निरीक्ष्य विषयविभाग-व्यवस्था यथास्थलमास्थीयते, इति हृदयम् ॥ १३८ ॥

है, पवित्र भी है, घृत की इस प्रशंसाबोधक लिङ्गप्रमाण से घृत से ही शर्करा का मिश्रणविधान इष्ट होता है, तेल से नहीं । याग आदि वैदिक कर्मों की प्रक्रिया में इस प्रकार की सभी व्यवस्थाओं का आधार - 'श्रुति-लिङ्ग' आदि प्रमाणमूलक तर्क ही है । इससे सुस्पष्ट है कि वेदवाक्यार्थ के व्यवस्थित स्वरूप की अवधारणा में वेदाविरोधी तर्क सहायक प्रमाण है । वेदमूलक आगम को प्रमाण मानने से तर्क की उपेक्षा नहीं की जा सकती, जबकि वह तर्क वेदमूलक हो । हाँ, वेदविरुद्ध तर्क तो अव्यवस्थितरूप होने से सर्वथा हेय है ॥ १३८ ॥

शब्दानामेव सा शक्तिस्तर्को यः पुरुषाश्रयः ।
स शब्दानुगतो न्यायोऽनागमेष्वनिबन्धनः ॥ १३९ ॥

प्रत्येकार्थप्रकाशिका

ननु यथा वेदवाक्यार्थं तर्को निश्चिनोति, तथा स्वतन्त्रार्थमपि कथं न निश्चिनुयात् ? अत आह - शब्दानामिति । यः पुरुषाश्रयः= पुरुषवृत्तिः तर्कः = उक्तविवक्षादिविषयकः, सा

आनन्दा

"यतो विवक्षा" इत्यनेन वेदार्थनिर्णये तर्कस्य प्रमाणत्वोक्त्या तस्य स्वतन्त्रप्रमाणत्वाशङ्कां परिहरन् "वेदशास्त्राविरोधी च" इत्युक्तदिशा तर्कस्यागमशब्दपरतन्त्रमेव प्रामाण्यं न तु शब्दनिरपेक्षं स्वतन्त्रमित्यन्वय-व्यतिरेकाभ्यां पूर्वोक्तमर्थमेव पल्लवयति - 'शब्दानामेव' इति ।

अन्वयः - पुरुषाश्रयः यः तर्कः सा शब्दानाम् एव शक्तिः, स न्यायः शब्दानुगतः अनागमेषु अनिबन्धनः ।

व्याख्या - पुरुषाश्रयः = पुरुषैः प्रकल्पितः यः = पूर्वोक्तप्रकारः तर्कः= प्रकरणादिज्ञानबलेन क्रियमाणो विवक्षापारार्थ्यादिविषय ऊहः, सा शब्दानामेव शक्तिः = शब्दप्रमाणबलेनैव भवति । स न्यायः = प्रकरणादिज्ञानेन

सूर्यमाया

कहीं भी शब्द के बल पर ही तर्क अर्थ का साधक होता है, स्वतन्त्र नहीं, इस पूर्वोक्त तथ्य को पुनः स्पष्ट करते हैं - 'शब्दानामेव' इत्यादि ।

अर्थ : - पुरुषों का जो अर्थविषयक पूर्वोक्त तर्क है, वह शब्दों के ही बल पर आश्रित है, क्योंकि अर्थ को नियत करने का जो प्रकरण आदि न्यायमार्ग है, वह शब्द से अनुगत है - शब्द के अनुसार प्रवर्तित होता है । आगम के शब्दरहित स्थलों में वह कोरा तर्क किसी अर्थ का साधक नहीं होता है ।

शब्दानामेव शक्तिः = सामर्थ्यम्, स न्यायः = अनुगमः शब्दानुगतः = शब्दसहकृतो भवतीत्यर्थः ।

शब्दानां नियतविषयकशक्तिमत्त्वे सत्येव विवक्षादयो भवन्ति न तु शब्दशक्तिमन्तरापि । अत एव हरिशब्दस्थले

वाक्यार्थस्यानुगममार्गः शब्दानुगतः = शब्दानुसारी एव, प्रामाणिक इति भावः । अनागमेषु = शब्दप्रमाणरहितेषु स्थलेषु अनिबन्धनः = न वाक्यार्थस्यानुगमहेतुः, निर्मूलस्तर्कस्तु न प्रामाणिक इत्यर्थः ।

विमर्शः - शब्दशक्त्या बोधितेष्वर्थेषु संशये तर्केण प्रकरणादिज्ञानबलेन अतात्पर्यविषयमर्थं व्यपोह्य तात्पर्य्यविषयोऽर्थ ऊह्यते, न तु प्रमाणशब्दा-बोधितो यः कश्चनाप्यर्थो यथेच्छं पुरुषोत्प्रेक्षामात्रमूलः प्रामाणिकत्वेन शक्यते विज्ञातुम् । एवं च श्रुतिस्मृतिशब्दप्रमाणतन्त्रो हि तर्कः प्रामाणिको न स्वतन्त्रः ।

आशय : - जिसको प्रकरण आदि का ज्ञान है, वह तदनुसार शब्द से बोधित ही किसी अर्थ की विवक्षा, अविवक्षा या अन्यार्थपरता की कल्पना करके आगमों के तात्पर्यविषय अर्थ का निर्धारण करता है, जो अर्थ शब्द की शक्ति से बोधित नहीं होता उसकी कल्पना तर्क से नहीं की जा सकती । अतः यह मानना होगा कि - शब्द की ही शक्ति है जिसके आधार पर कोई अर्थ तर्क द्वारा व्यवस्थित होता है, अत एव तर्क शब्द का अनुगामी पोषक प्रमाण है, स्वतन्त्र नहीं । शब्द के अनुसार ही किसी अर्थ का तर्क से निश्चय किया जाता है, जैसे 'हरि' शब्द से उसका 'इन्द्र, विष्णु, सूर्य, मेघ' अर्थों में कोई अर्थ तर्क से ग्राह्य है, घट, पट नहीं ।

निष्कर्ष में : - आगमानुसारी तर्क प्रमाण है, परन्तु आगमनिरपेक्ष या आगमविरुद्ध नहीं । दूसरे शब्दों में यह कहा जाय कि - तर्क आगम का अनुचर पोषक प्रमाण है, वह उपजीव्य होने से आगम का विरोधी नहीं हो सकता, किन्तु आगम स्वतन्त्र

प्रकरणादिनापि विष्णवाद्यन्यतमार्थ एव नियम्यते, न तु कदाचिदपि घटादय इति सारः ।

तस्मात् अनागमेषु = अशब्दस्थले शुष्कतर्कः अनिबन्धनः= अनिश्चायक इत्यर्थः ॥ १३९ ॥

तदुक्तं मनुना - 'आर्षं धर्मोपदेशं च' इति (१२-१०६)

तथा च - यदुदुम्बरवर्णानां घटीनां मण्डलं महत् ।

पीतं न गमयेत् स्वर्गं किं तत् क्रतुगतं नयेत् ॥

इत्यादीनामागमविरुद्धानां तर्काणामप्रमाणत्वमेवेति हृदयम् ॥ १३९ ॥

प्रबल प्रमाण होने से तर्क का विरोधी हो सकता है । प्रत्यक्ष वा अनुमान से जिस वस्तु की सिद्धि नहीं होती, उसकी सिद्धि आगम से होती है । अत एव आगम मूर्धन्य प्रमाण है, आगमविरुद्ध तर्क किसी अर्थ का साधक अथवा बाधक नहीं होता, क्योंकि शुष्क तर्क की कोई प्रतिष्ठा या सीमा नहीं । अतः आगमसंमत ही तर्क प्रमाण है, जैसा कि पूर्व में कहा है - ''वेदशास्त्राविरोधी च'' इत्यादि ॥ १३९ ॥

रूपादयो यथा दृष्टाः प्रत्यर्थं यतशक्तयः ।
शब्दास्तथैव दृश्यन्ते विषापहरणादिषु ॥ १४० ॥

प्रत्येकार्थप्रकाशिका

नन्वेवं शब्दस्य सर्वसामर्थ्ये सर्वकार्यप्रसङ्गोऽत आह - रूपेति । यथा रूपादयः = रूपरसगन्धस्पर्शादयः प्रत्यर्थम् = अर्थमर्थं प्रति यतशक्तयः = नियतसामर्थ्यकाः दृष्टाः,

---

आनन्दा

शब्दस्य तर्कादिसर्वमूलत्वोक्त्या सर्वसामर्थ्येऽभिहिते तस्मात् सर्वकार्यप्रसङ्गे लोकवेदसिद्धदृष्टादृष्टफलविशेषजनकत्वव्यवस्थाया अनुपपत्तिशङ्कां परिहरन् रूपादिदृष्टान्तेन शब्दस्य नियतसामर्थ्यं साधयति - 'रूपादय' इति ।

अन्वयः - यथा रूपादयः प्रत्यर्थम् यतशक्तयः दृष्टाः, शब्दाः विषापहरणादिषु तथा एव दृश्यन्ते ।

व्याख्या - यथा रूपादयः = चक्षुरादिज्ञानेन्द्रियविषयाः रूपरसगन्धस्पर्शाः प्रत्यर्थम् = अर्थमर्थं प्रतीति प्रत्यर्थम् - अर्थशब्दो वस्तुपरः प्रयोजनरूप-कार्यपरश्च, एवं च स्वाश्रयवस्तुभेदेन तत्तत्कार्यं प्रति यतशक्तयः = नियतसामर्थ्याः दृष्टाः = लोके वेदे च प्रसिद्धाः, शब्दाः = श्रोत्रविषया मन्त्रादिरूपा नियतवर्णपदानुपूर्वीका अपि विषापहरणादिषु = सर्पवृश्चिकादि-

---

सूर्यमाया

तर्क में भी शब्द की शक्ति को ही मूलकारण मानने पर शब्दशक्ति का कोई नियमन न होने से शब्द से यथेच्छ सभी कार्यों की आपत्ति शङ्का का निराकरण करते हैं - 'रूपादयो' इत्यादि ।

अर्थ : - जैसे रूप-रस आदि गुण प्रत्येक वस्तु में अपने पृथक् पृथक् कार्य के प्रति नियत-सामर्थ्यवाले देखे गये हैं, वैसे ही शब्द भी विषशमन आदि अपने कार्यों के प्रति नियत-सामर्थ्यवाले देखे जाते हैं ।

स्फटिकरूपम् अन्यप्रतिविम्बमादधाति न त्वन्यत्, ओषधिविशेषरसः विषं शमयति नान्यः, चम्पकगन्धो भ्रमरं नाशयति, अयस्कान्तस्पर्शः स्वर्णयति, इत्यादिदृष्टफल-

---

विषशमनप्रभृतिषु दृष्टप्रयोजनेषु प्रत्यवायपरिहारस्वर्गापूर्वाद्यदृष्टप्रयोजनेषु च तथा एव = रूपादिवदेव यतशक्तयः दृश्यन्ते ।

विमर्शः - यथा रूपरसादय आश्रयभेदेन तत्तत्कार्यं प्रति नियतशक्तयो दृश्यन्ते तथा शब्दा अपि वर्णानुपूर्वीभेदेन तत्तत्कार्यं प्रति नियतशक्तयो दृश्यन्ते । अतः शब्दादविशेषेण न सर्वकार्यप्रसङ्गः । तथाहि-शुक्लत्वेनैकमपि शुक्लरूपं क्वचित् प्रतिविम्बमादधाति क्वचिन्न, जलस्फटिकदर्पणादेः शुक्लं रूपं प्रतिविम्बाधाने समर्थम्, न तु हिमपयःशङ्खमृणालकर्पासादेः । आश्रयभेदेन शक्तेर्निग्रहानुग्रहाभ्यां प्रतिनियतत्वात् ।

न केवलमाश्रयभेद एव कार्यशक्तिं नियमयति, परंच स्वरूपभेदोऽपि । तद्यथा - नीलं रूपं हरितं वा दृष्टिशक्तिं पुष्णाति, भास्वरं तु विद्युदादिरूपं प्रतिबध्नाति सत्यपि रूपत्वेन निर्विशेषे । एवं रसत्वेनाविशेषेऽपि सर्पगन्धारसो विषं हरति नेक्षुरसः, प्रत्युत संवर्धयत्येव विषम् । कटुको रसः कफं हन्ति, मधुरस्तु समेधयति । गन्धत्वाविशेषेऽपि पूयशोणितवसादिगन्धोऽपहरति चेतनाम्,

---

आशय : - स्फटिक तथा दर्पण आदि में और हिम तथा दूध आदि में शुक्लरूप एक समान ही है, किन्तु स्फटिक व दर्पण का शुक्लरूप मुख आदि किसी का प्रतिविम्ब ग्रहण कर लेता है, परन्तु हिम या दूध आदि का शुक्लरूप प्रतिविम्बग्रहण नहीं करता । सर्पगन्धा आदि औषधि का रस विषशमन करता है, किन्तु ईंख का रस विष को बढ़ाता ही है, घटाता नहीं । सड़े हुए मांस व शोणित का दुर्गन्ध अथवा विषलता का गन्ध चेतना को नष्ट कर मूर्छित कर देता है, किन्तु इसके विपरीत कमल, गुलाब, चम्पा, चमेली आदि पुष्पों का सुगन्ध

नियमः-शालग्रामरूपतीर्थोदकस्पर्शादिरदृष्टजनक इत्यदृष्टफल-नियमश्चेति भावः ।

फुल्लमल्लिकाकेतकीमाधवीकुमुदिनीकुशेशयपाटलपटलसौरभं स्वान्ते नितान्तमानन्दमाप्लाव्य कामप्यनुपमां प्रतिभामुद्भावयति । वकुलवनसंचारिगन्धो मधुपकुलमन्धीकरोति, रसालमञ्जरीमाल्यगन्धस्तु प्रबोधयति । कान्ताकुन्तल-कुचकुवलयजघनवसनाञ्चलस्पर्शो मनसिजमुज्जृम्भयन् संहरति संबोधम्, हरिहर - गुरु - मातापितृचरणसरोरुहस्पर्शः पुलकावलिं किसलयन् उपहरति कमप्यमन्दानन्दसंबोधसन्दोहम् । इत्येवं दृष्टफलं प्रति रूपादीनां प्रतिनियताः शक्तयः समुपलभ्यन्ते । अदृष्टफलं प्रत्यपि श्रूयन्ते तेषां तास्ता नियताः शक्तयः । तथाहि-यागे वायव्यः शुक्लश्छाग एवालब्धव्यो भवति स्वर्गा-पूर्वसाधको, न तु रक्तः । मद्यस्य गन्धरसस्पर्शा जनयन्ति नरकान्तं पापम्, शालग्रामशिलार्चापाद्यामृतनैवेद्यनिर्माल्यानां तु रसगन्धस्पर्शाः स्वर्गापवर्गानन्त-फलकमपूर्वं पुण्यं प्रतन्वन्ति सद्यः ।

यथा रूपादीनां प्रत्यर्थं दृश्यन्ते दृष्टादृष्टफलं प्रति प्रतिनियताः शक्तय-स्तथा शब्दानामपि प्रत्यर्थं दृष्टादृष्टफलं प्रति दृश्यन्ते प्रतिनियताः शक्तयः ।

प्रमुदित कर चेतना व प्रतिभा को विकसित करता है । पारस मणि का स्पर्श लोहे को सोना बना देता है, किन्तु चुम्बक का स्पर्श आकर्षण मात्र करता है, सोना नहीं बनाता । इस प्रकार प्रतिवस्तु रूप आदि गुणों की प्रत्यक्ष कार्यों के प्रति विचित्र नियत शक्ति पाई जाती है, साथ ही अदृष्ट - परोक्ष कार्यों के प्रति भी शक्ति नियत पाई जाती है । मदिरा का रूप, रस, गन्ध, स्पर्श पाप तथा नरक आदि दुःखों का जनक होता है, तो इसके विपरीत शालग्राम, नर्मदेश्वर लिङ्ग तथा गङ्गा, यमुना, गोदावरी आदि सभी तीर्थजल का दर्शन, स्पर्श व पान आदि जन्म-जन्मान्तरीय दुरितों का नाशक, स्वर्ग-अपवर्ग का साधक - निरतिशय पुण्य का जनक होता है ।

तथैव शब्दाः = तत्तद्ध्वनिवर्णाभिव्यङ्ग्याः विषापहरणादिषु यतशक्तयो दृश्यन्ते । केनचित् शब्देन विषहरणं दृष्टफलम्, कस्यचिन्मन्त्रस्य पारायणेन अदृष्टार्थसिद्धिरिति नियम इति भावः ॥ १४० ॥

केषांचिदथर्वगरुडमन्त्राणां विषवैद्यकर्तृकोच्चारणे विषापहरणं दृष्टं फलम् । केषांचिच्च "आपो हिष्ठामयो भुव" इति मार्जनमन्त्राणाम्, "ऋतं च सत्यं चे"- त्याद्याचमनाद्यघमर्षणमन्त्राणाम् पुरुषसूक्तादीनां च षोडशोपचारार्चाया ऋङ्मन्त्राणां साङ्गवेदानां च पारायणेऽदृष्टं पुण्यफलं प्रति नियताः शक्तयः श्रूयन्ते स्मर्यन्ते च ॥ १४० ॥

ऐसे ही शब्द की शक्ति भी दृष्ट और अदृष्ट उभयविध कार्य व फलों के प्रति नियत पाई जाती है । अथर्ववेद के गरुड़मन्त्र अथवा लोकप्रचलित शाबरमन्त्र उच्चारणमात्र से सर्प के विष का प्रत्यक्ष शमन करते हैं, तथा नित्य सन्ध्योपासना व अर्चा में 'अघमर्षण', 'ऋतं च सत्यं च' इत्यादि आचमन मन्त्र- पुरुषसूक्तमन्त्र तथा नित्य वेदपारायण सकल अज्ञान का हरण कर स्वर्ग और मोक्ष का असाधारण साधक है । "अहरहः सन्ध्यामुपासीत", "स्वाध्यायोऽध्येतव्यः" इत्यादि विधिवाक्य इसमें स्वतः प्रमाण हैं ॥ १४० ॥

यथैषां तत्र सामर्थ्यं धर्मेऽप्येवं प्रतीयते ।
साधूनां साधुभिस्तस्माद् वाच्यमभ्युदयार्थिभिः ॥ १४१ ॥

प्रत्येकार्थप्रकाशिका

यथा तुलस्यादिरसस्य दृष्टफलं रोगनिवृत्तिः, अदृष्टफलं भगवत्प्रसाद इत्युभयफलम्, एवं साधुशब्दानामुभयफलमुपपादयति - यथैषामिति । यथा साधूनाम् एषाम् शब्दानाम् तत्र = विषहरणादिदृष्टफले सामर्थ्यम् = शक्तिः, एवं धर्मेऽपि

आनन्दा

पूर्वत्र रूपादिदृष्टान्तेन शब्दानां विषहरणादिदृष्टफलसामर्थ्यं निरूप्येह दृष्टफलसामर्थ्यवददृष्टफलसामर्थ्यमपि साधयन् तत्फलितार्थं दृष्टादृष्टोभयफलसामर्थ्यं संकलय्य निरूपयति - ''यथैषाम्'' इति ।

अन्वयः - एषाम् साधूनाम् यथा तत्र सामर्थ्यम् एवम् धर्मे अपि प्रतीयते, तस्मात् अभ्युदयार्थिभिः साधुभिः वाच्यम् ।

व्याख्या - एषाम् = पूर्वत्र रूपादिदृष्टान्तस्य दार्ष्टान्तिकतया प्रोक्तानाम् साधूनाम् = व्याकरणेनानुशिष्टानां शब्दानाम् यथा = येन प्रकारेण तत्र = विषापहरणादिषु दृष्टफलेषु सामर्थ्यं दृष्टम्, एवम् = तथैव धर्मे = पुण्याख्येऽदृष्टे फले स्वर्गापवर्गहेतौ अपि सामर्थ्यम् प्रतीयते = ''एकः शब्दः सम्यग् ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके च कामधुग्

सूर्यमाया

पूर्वश्लोक में - साधुशब्दों का दृष्टफलविषयक सामर्थ्य सिद्ध करके यहाँ अदृष्टफलविषयक सामर्थ्य सिद्ध करते हैं, निष्कर्ष में साधुशब्दों का 'दृष्ट और अदृष्ट' द्विविध फल बताए जाते हैं - 'यथैषाम्' इत्यादि ।

अर्थ : - जैसे पूर्व में वर्णित मन्त्रविशेषरूप - साधुशब्दों की विषहरण आदि दृष्टफलों में शक्ति है, ऐसे ही अदृष्टफल - धर्म में भी शक्ति है, यह श्रुति स्मृति प्रमाणों से ज्ञात होता है । इसलिए कल्याणार्थी लोगों को साधुशब्दों से ही व्यवहार करना चाहिए, असाधु व अपभ्रंश से नहीं ।

सामर्थ्यं प्रतीयते = ''एकः शब्दः सम्यग् ज्ञातः'' इत्यादि-श्रुत्या ज्ञायते, इत्यर्थः । तस्माद् अभ्युदयार्थिभिः = इहामुत्र फलकाङ्क्षिभिर्जनैः - कर्तृपदम्, साधुभिः = संस्कृतशब्दैः - करणे तृतीया, वाच्यम् = व्यवहर्तव्यम्, इत्यर्थः ॥ १४१ ॥

भवति'' (६-१-४८) इति भाष्ये श्रुत्याऽवगम्यते । तस्मात् = साधुशब्दानां दृष्टादृष्टोभयफलजनकत्वाद् अभ्युदयार्थिभिः = अभ्युदयनिःश्रेयसकामैः साधुभिः= साधुशब्दैः वाच्यम् = व्यवहारः कर्तव्यः । साधुशब्दा एव प्रयोक्तव्या, नासाधवः - ''नापभाषितवै न म्लेच्छितवै'' इत्यादिश्रुत्या तेषां प्रयोगस्य निषिद्धत्वेनाधर्मजनकत्वात् ।

विमर्शः - यथा तुलस्यास्त्रिदोषशमनं दृष्टं फलम्, विष्णुप्रीतिश्चादृष्टं फलम्, तथा साधुशब्दानां 'विषापहरणं धर्मश्च' दृष्टमदृष्टमुभयं फलम् - 'एकः शब्दः सम्यग् ज्ञातः सुप्रयुक्तः स्वर्गे लोके' इति श्रुतेः । एवं चाभ्युदयनिःश्रेयससाधनत्वात् तदर्थिभिः साधुशब्दा एव प्रयोक्तव्या नासाधवः । तदेतदाह भूषणे- ''नियमः पुण्यपापयोः'' इति ॥ १४१ ॥

आशय : - जैसे अथर्ववेद के कतिपय मन्त्ररूप - साधुशब्द में 'विषशमन-मारण - उच्चाटन - वशीकरण' आदि प्रत्यक्षकार्यों की शक्ति पाई जाती है, ऐसे ही साधुशब्दमात्र में अदृष्टपुण्यरूप धर्म की जनकताशक्ति श्रुति-स्मृति प्रमाणों से सिद्ध होती है, जैसा कि ''एकः शब्दः सुप्रयुक्तः'' इस वाक्य में कहा है । जैसे तत्तत् मन्त्रविशेषों की ही विषशमन - मारण - उच्चाटन आदि करने की अपनी अपनी पृथक् शक्ति है, सबकी नहीं, ऐसे ही साधु शब्दों की ही धर्मजनकता शक्ति है, असाधु (अपभ्रंश) शब्दों की नहीं । अतः धर्ममूलक सभी अभ्युदयों की प्राप्ति के लिए वेदविहित यज्ञ कर्म में तथा लोकव्यवहार में साधुशब्दों का ही प्रयोग करना चाहिए ॥ १४१ ॥

सर्वो दृष्टफलानर्थानागमात् प्रतिपद्यते ।
विपरीतं च सर्वत्र शक्यते वक्तुमागमे ॥ १४२ ॥

प्रत्येकार्थप्रकाशिका

ननु यस्य दृष्टफलजननसामर्थ्यं तस्यादृष्टफलजननसामर्थ्यं कथं न ? यस्य चादृष्टफलं तस्यादृष्टफलदृष्टान्तेन दृष्टफलं

आनन्दा

शब्दानां विषहरणादिदृष्टफलेषु सामर्थ्यं दृष्ट्वा तेन दृष्टान्तबलेन तेषामदृष्टे धर्मेऽपि यदि सामर्थ्यं कल्प्यते, तर्हि तत्प्रतिबन्द्या तेषामधर्मे सामर्थ्यं कुतो न स्यात् ? अस्तु शक्तिविपर्यय एव, किंच दृष्टफलवददृष्टफलेऽपि सामर्थ्यकल्पने तुल्यन्यायेन सर्वत्रोभयफलसामर्थ्यकल्पनायाः प्रसङ्गः स्यादिति शङ्कां परिहरन् ''शब्दानामेव सा शक्तिः'' इत्यत्र प्राक् समाहितदिशा दृष्टादृष्टफलसामर्थ्यनियमस्य स्वतन्त्रतर्कनिरपेक्षागमप्रमाणाधीनत्वमाह - ''सर्वो दृष्टफलान्'' इति ।

अन्वयः - सर्वः दृष्टफलान् अर्थान् आगमात् प्रतिपद्यते, विपरीतम् च सर्वत्र आगमे वक्तुं शक्यते ।

व्याख्या - सर्वः = मन्त्ररूपोऽन्यो वा सर्वविधः साधुशब्दः दृष्टफलान्= दृष्टं फलं येषां तान् - उपलक्षणमिदमदृष्टफलानामपि, एवं च दृष्टफलानदृष्टफलान् वा अर्थान् आगमात् = आगमं प्रमाणीकृत्य; ल्यब्लोपे पञ्चमी निर्धारणे वा, प्रतिपद्यते = बोधयति, विपरीतं च = आगमनिरपेक्षम्-

---

सूर्यमाया

आगम के विपरीत कोरे तर्क से किसी शब्द का दृष्ट या अदृष्ट फल मान लेने में अव्यवस्था की आपत्ति प्रकट करते हुए उसमें आगम को ही मूल प्रमाण बताते हैं - 'सर्वो दृष्टफलान्' इत्यादि ।

अर्थ : - शब्द मन्त्ररूप हों अथवा साधारण साधुशब्द हों, सभी अपने मूलभूत आगम प्रमाण से ही दृष्ट अथवा अदृष्ट फलवाले अर्थों के प्रतिपादन में समर्थ होते हैं । कोरे तर्क से आगम के विपरीत तो सर्वत्र कुछ भी कहा जा सकता है, किन्तु उससे अव्यवस्था का प्रसङ्ग होने से वह प्रमाण नहीं होता ।

कुतो नेत्याशङ्कां परिहरति - सर्व इति । सर्वः = शब्दः आगमात् = आगमप्रामाण्यात् दृष्टफलान् अर्थान् प्रतिपद्यते= कथयति यदि तदा आगमे = वेदे सर्वत्र विपरीतं फलम् = दृष्टफलस्थले अदृष्टफलम् - अदृष्टफलस्थले दृष्टफलम्, वक्तुं शक्यते ।

दृष्टविपर्ययेणादृष्टफलम्, अदृष्टविपर्ययेण दृष्टफलम्, यद्वा धर्मविपर्ययेणा-धर्मफलम्, अधर्मविपर्ययेण धर्मफलं तु सर्वत्र आगमे वक्तुम् = यथेच्छं केवलतर्केण कल्पयितुम् शक्यते । तदा तु क्वापि दृष्टादृष्टफलव्यवस्था न स्यात्, तस्मादागमानुगत एव शब्दो दृष्टमदृष्टं वा फलं बोधयितुं समर्थो न तु सर्व इत्यर्थः ।

विमर्शः - दृष्टमदृष्टमुभयं वा यस्य यावद् यदेव फलसामर्थ्यमुपदिशत्यागम स्तस्य तावदेव तदेव फलसामर्थ्यं प्रमीयते, न तु तर्केण तद्विपरीतमन्यादृशं, सर्वस्यैकविधमेव वा । नहि कस्यचिद् दृष्टफलकत्वेऽदृष्टफलकत्वे वा तुल्यन्यायेनान्यस्यापि तथाविधमेव फलं कल्पयितुं शक्यम्, आगमविरोधात् । आगमविरोधे नास्ति काचन दुर्विदग्धस्य तर्कस्य प्रतिष्ठा निष्ठा । "एकः शब्दः शास्त्रान्वितः सुप्रयुक्तः—" इत्याद्यागमो हि साधूनामेव धर्मजनकत्वं समामनति नासाधूनाम् । प्रत्युत "नापभाषितवै न म्लेच्छितवै" इत्यादिना निषेधवचनेनासाधूनामधर्मजनकत्वस्यैव श्रवणात् । तस्मात् साधूनां धर्मजनकत्वे तत्तुल्यन्यायेनासाधूनामपि धर्मजनकत्वम्, उताहो तत्प्रतिबन्द्या

आशय : - किसी शब्द का दृष्ट फल वा अदृष्ट फल अथवा दोनों फल आगम से ही नियत होता है, केवल तर्क से नहीं । अथर्व के गरुड़मन्त्र का सर्पविष का शमन दृष्ट फल है । वह मन्त्र गरुड़ के सर्पविरोधी गुण और पराक्रम का वर्णन रूप अपने अर्थ के सामर्थ्य से ही सर्पविष का निवारण करता है, अतः यह दृष्ट फल भी आगम से ही नियत होता है । साधुशब्द का जो अदृष्ट - धर्म फल है, वह "एकः शब्दः शास्त्रान्वितः सुप्रयुक्तः" इस आगम से नियत होता है । असाधुशब्द का जो अधर्म फल है, वह "नापभाषितवै" इस निषेधवचन से ही नियत होता है । अत एव दृष्ट वा अदृष्ट सभी फल आगम से ही प्रतिपादित हैं, केवल तर्क से नहीं । यदि केवल तर्क से किसी फल की कल्पना की जाय तो सर्वत्र आगम में विपरीत फल की मनमानी कल्पना की जा सकती है,

अपितु आगमप्रामाण्यं नास्ति यत् सर्वेषामेकरूपमेव फलं कल्पनीयम्, किन्तु कस्यचित् दृष्टमेव फलं, कस्यचित् अदृष्टमेव, कस्यचित् तूभयमेव, इति आगमप्रमाणसहकृतयुक्त्या कल्पनीयमिति सारः ॥ १४२ ॥

साधूनामधर्मजनकत्वम्, असाधूनां च विपर्ययेण धर्मजनकत्वं स्वप्नेऽपि कल्पयितुमशक्यम् ।

"स्वाराज्यकामो राजसूयेन यजेत" इति विधिर्हि राजसूयक्रतोरेव दृष्टफलं स्वाराज्यं बोधयति नान्यस्य, तत्रापि क्षत्रियस्यैवाधिकारो न ब्राह्मणादेः । "कारीरीमिष्टिं निर्वपेद् वृष्टिकामः" इति च विधिः 'कारीरी' क्रतोरेव दृष्टं वृष्टिफलं विधत्ते, न ज्योतिष्टोमादेः । एवम् - "ज्योतिष्टोमेन स्वर्गकामो यजेत", "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत", "सोमेन यजेत" इत्यादिविधयो ज्योतिष्टोमादेरेव यागस्यादृष्टं स्वर्गापूर्वफलं प्रतिपादयन्ति नान्येषामिति, तत्र तर्केण केवलेन विपरीतं फलं साधयितुमशक्यम्, विपर्यस्तं कल्प्येत चेत्तदा सर्वत्रागमेऽनाश्वासे तत्प्रामाण्यं गगननलिनायमानमापद्येत । अत आगमविरोधे कपोलकल्पनामात्रसारस्य दुरन्तानवस्थितस्य तर्कस्य पुंदोषास्कन्दितत्वेन सर्वथा कदर्थनीयमप्रामाण्यमेव निर्गलति । आगमानुगामी तर्कस्तु सुविहितानन्तस्रोतोमूलो निर्वहत्यव्याहतमविच्छिन्नं प्रामाण्यमिति तत्र न विप्रतिपत्तिलवोऽपि, तदेतदसकृदुपपादितम् "वेदशास्त्राविरोधी च" इत्यादिना प्राक् ॥ १४२ ॥

धर्मजनक साधुशब्द को अधर्म का जनक तथा अधर्मजनक असाधुशब्द को धर्म का जनक कहा जा सकता है, तब तो आगम की कहीं कोई आस्था न होने से उसका प्रामाण्य ही समाप्त हो जायगा । अतः यह मानना होगा कि किसी शब्द का दृष्ट वा अदृष्ट फल आगम से ही निर्धारित होता है, जो कि आगम अपौरुषेय वेदमूलक है । आगममूलक तर्क भी आगमार्थ का साधक व पोषक होने से प्रमाण है - इसमें कोई सन्देह नहीं ॥ १४२ ॥

साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिः ।
अविच्छेदेन शिष्टानामिदं स्मृतिनिबन्धनम् ॥ १४३ ॥

प्रत्येकार्थप्रकाशिका

न चैतावता प्रकृते व्याकरणे किमायातमत आह - साधुत्वेति । साधुत्वज्ञानम् = 'इदं साधु' इत्याकारक-

---

आनन्दा

अदृष्टधर्माधर्मव्यवस्थायां निर्मूलतर्कस्य प्रामाण्यनिरासेन श्रुतेस्तन्मूलस्मृतेरेव प्रामाण्ये व्यवस्थापिते साधुशब्दानां धर्मसाधनत्वव्यवस्थायै तद्बोधकपाणिनीयव्याकरणस्याविच्छिन्नशिष्टसमुदाचारानुस्मृतपूर्वस्मृतिमूलत्वेन प्रामाण्यं तस्य प्रतिपाद्यं विषयं च निरूपयति - 'साधुत्व' इति ।

अन्वयः - सा एषा व्याकरणस्मृतिः साधुत्वज्ञानविषया, शिष्टानाम् अविच्छेदेन इदम् स्मृतिनिबन्धनम् ।

व्याख्या - सा एषा = प्रकृता पाणिन्युपज्ञा व्याकरणस्मृतिः = व्याकरणशास्त्रम् साधुत्वज्ञानविषया = शब्दसाधुत्वप्रतिपादिका ।

ननु अस्या अपूर्वत्वे निर्मूलत्वेनाप्रामाण्यमिति चेन्न, शिष्टानाम् = सिद्धशब्दार्थतत्त्वदृशां लक्ष्यैकचक्षुष्काणाम् अविच्छेदेन = पूर्वपूर्वसिद्धसाधुशब्दप्रयोगस्य अनादिप्रवाहनैरन्तर्येण, ततः साधुशब्दान् विज्ञाय इदम् स्मृतिनिबन्धनम् = पाणिनेराचार्यस्य स्मृतिरूपव्याकरणशास्त्रस्य प्रणयनं प्रवृत्तम् ।

सूर्यमाया

शब्दसाधुत्व को व्याकरण का प्रतिपाद्य विषय बताते हुए अविच्छिन्न परम्परामूलक व्याकरण का प्रामाण्य बताते हैं - 'साधुत्व' इत्यादि ।

अर्थ : - पूर्व प्रकृत वही यह व्याकरण स्मृति है, जिसका शब्दों के साधुत्व का ज्ञान कराना विषय है । प्राचीन शिष्ट आचार्यों से प्रवर्तित - अविच्छिन्न व्याकरणों की परम्परा के स्मरण द्वारा इस पाणिनीय व्याकरण स्मृति की रचना है । अतः अविच्छिन्न परम्परामूलक होने से यह व्याकरण सर्वथा प्रमाण है, नवीन कल्पित नहीं ।

साधुत्वप्रकारकज्ञानम् विषयः = प्रतिपाद्यः यस्याः सा - यथा साधुशब्दज्ञानं भवेत्, इति फलितम्, सा एषा व्याकरणस्मृतिः व्याकरणशास्त्रम् ।

शिष्टाचारपरम्पराप्राप्तश्रुतिसिद्धशब्दमूलत्वान्नाप्रामाण्यप्रसङ्ग इत्यर्थः । स्मृतिर्निबन्धनं यस्य तदिदं व्याकरणस्मृते र्निबन्धनम् = प्रणयनमिति बहुव्रीहि-षष्ठीतत्पुरुषसमासद्वयमिह बोध्यम् ।

विमर्शः - शब्दधर्मिकसाधुत्वप्रकारकज्ञानकरणमिदं शब्दानुशासनं नाम व्याकरणस्मृतिः । असाधुभ्यो विविच्य साधुशब्दनिर्वचनमस्याः प्रतिपाद्यो विषयः । सा चैषा प्रवाहनित्या अविच्छिन्नस्वरूपा । पूर्वपूर्वशिष्टानां काले काले विच्छेदेऽपि तेषां व्याकरणानां 'शिष्टानामविच्छिन्नसाधुशब्द-समुदाचारदर्शनेन' स्मरणं कृत्वा यथोत्तरं लक्ष्यैकचक्षुष्कैः प्रतिभानवद्भिरिन्द्र-चन्द्र-स्फोटायन-प्रभृतिभिराचार्यै र्यथाकालं विरच्यमानं तत्तद् व्याकरणं स्मृतिरूपमेवेति व्याकरणस्वरूपस्य न जातु विच्छेदः । तदित्थमिदं पाणिनीयमपि व्याकरणं स्मृतिनिबन्धनं स्मृतिरूपमेव, पूर्वसिद्धशब्दसमुदाचारदर्शनोपजात-पूर्वपूर्वव्याकरणस्मरणेन संकलय्य निबध्यमानं लौकिकवैदिकसकल-लक्ष्यसंग्राहकं भगवतः पाणिनेराचार्यस्य स्मृतिरूमेव नापूर्वं निर्मूलम् । तदाह भगवान् पतञ्जलिः - "सिद्धे शब्दार्थसम्बन्धे" इति पस्पशे । यथा

आशय : - प्रकृति-प्रत्यय के व्युत्पादन द्वारा शब्द के साधुत्व व असाधुत्व का निर्वचन व्याकरण का मुख्य लक्ष्य है । अर्थविशेष में शब्दविशेष के साधुत्व का निरूपण व्याकरण करता है, जो कि लक्षणरूप है । शब्द के साधुत्व का प्रतिपादक यह पाणिनीय व्याकरण ही सर्वप्रथम नहीं हुआ है, किन्तु इसके पूर्व अनादि परम्परा से उपनिबद्ध अन्य व्याकरण भी प्रवर्तित होते रहे हैं । प्रातिशाख्य आदि वैदिक व्याकरण तथा ऐन्द्र, चान्द्र, आपिशल, शाकटायन आदि लौकिक व्याकरण पाणिनीय व्याकरण की आधारशिला रूप में अवगत व अनुस्मृत होते हैं, उनके प्रवक्ता आचार्यों का यथाकाल विच्छेद होने पर भी उनके प्रवर्तित व्याकरण शिष्टों के साधुशब्द प्रयोग रूप आचार के दर्शन से सदा ही स्मरण व अनुगम के विषय रहे हैं । वे भले ही अपने पूर्ण रूप में उपलब्ध न हों, किन्तु सबके मूलरूप में अविच्छिन्न रूप से हैं । शिष्टों के साधुशब्द प्रयोग की

ननु पाणिनेः पूर्वं व्याकरणं नासीत्, इति कथं नित्यरूपेयं स्मृतिरत आह- शिष्टानाम् = आचार्य्याणाम् अविच्छेदेन = सातत्येन इदं स्मृतिनिबन्धनम् = शास्त्रप्रणयनम् । आचार्य्याणां विच्छेदेऽपि व्याकरणस्वरूपस्य विच्छेदाभाव इति भावः ॥ १४३ ॥

भक्ष्याभक्ष्यगम्यागम्यादिविधिनिषेधविषयाः स्मृतयोऽनादिपरम्परातः सन्त्युपनिबद्धास्तथा वाच्यावाच्यसाध्वसाधुशासनविषयेयं व्याकरणस्मृतिरपि । पूर्वपूर्वाचार्यै र्निबध्यमानं यद् व्याकरणं तदपि श्रुतिषु सिद्धान् शिष्टसमुदाचार-प्राप्तान् साधुशब्दानालक्ष्य वेदवेदाङ्गतात्पर्यप्रकाशनाय शब्दतदर्थ-साधुत्वनिर्वचनपरं वेदमूलं स्मरणमेव नापूर्वं कल्पितम् । इति सर्वेषां व्याकरणानां वेदवाक्यान्वाख्यानपरत्वेन तदङ्गेषु षट्सु मुख्यमङ्गं मुखं व्याकरणं प्रमाणं स्मृतम् ।

वस्तुतस्तु पाणिनीयं व्याकरणं तु वर्णसमाम्नायमूलं साक्षात् प्रमाणं प्रमाणानामपि प्रमाणमिति तस्य प्रामाण्ये नास्ति शङ्कागन्धोऽपीति सुधीभिरूहनीयम् ॥ १४३ ॥

अविच्छिन्न परम्परा से पूर्वव्याकरण स्वरूप का अनुगम कर अपूर्व अपनी प्रतिभा से आचार्य पाणिनि ने सकल लक्ष्य का संग्राहक अद्भुत अष्टाध्यायी व्याकरण स्मृति का निबन्धन किया है । जैसे मनु -वशिष्ठ - याज्ञवल्क्य - पराशर प्रभृति महर्षियों ने शिष्टों के आचार व्यवहार से भक्ष्य - अभक्ष्य, गम्या - अगम्या का अनुगम कर स्मृतियों के निबन्धन से धर्म - अधर्म के साधन का निर्णय किया है, ऐसे ही आचार्य पाणिनि ने शिष्टों के साधुशब्दविषयक आचार से उनके प्रतिपादक पूर्ववर्ती व्याकरणों का अनुगम कर अपने अष्टाध्यायी व्याकरण के निबन्धन से साधुशब्द के धर्मजनकत्व का तथा असाधु शब्द के अधर्मजनकत्व का निर्णय किया है, जैसा कि महाभाष्य में कहा है - "लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः" ॥ १४३ ॥

वैखर्य्या मध्यमायाश्च पश्यन्त्याश्चैतदद्भुतम् ।
अनेकतीर्थभेदायास्त्रय्या वाचः परं पदम् ॥ १४४ ॥

प्रत्येकार्थप्रकाशिका

व्याकरणेन वास्तविकशब्दस्वरूपज्ञानात् मोक्षफलं स्तौति- वैखर्या इति । वैखर्य्याः = वैखरीवाचः - श्रोत्रेन्द्रियेण यत्

आनन्दा

निगमागमप्रमितं वाचश्चतुर्विधं स्वरूपं निरूपयन् व्याकरणेन वाचः स्थूलसूक्ष्मसकलस्वरूपस्य सम्यग्ज्ञानात् शब्दपूर्वेण योगेन मोक्षाधिगमं व्याकरणस्य प्रयोजनं प्रतिपादयति - ''वैखर्या'' इति ।

अन्वयः - वैखर्याः मध्यमायाः पश्यन्त्याः च त्रय्याः अनेकतीर्थभेदायाः वाचः पदम् एतद् अद्भुतम् परम् ।

व्याख्या - वैखर्याः = प्राणवृत्त्या कृतवर्णरूपपरिग्रहायाः व्यक्ताया वागिन्द्रियोच्चारणविषयायाः संस्कृतायाः पदादिरूपाया असंस्कृताया भाषारूपाया वा परश्रवणगोचरायाः कण्ठदेशस्थायाः, मध्यमायाः = प्राणवृत्त्या समनुगतायाः सूक्ष्मवर्णपदादिरूपप्रतिभासवत्या अन्तःसंनिविष्टाया उपांशुजपे बुद्धिसंवेद्याया हृदयदेशस्थायाः, पश्यन्त्याः = प्राणवृत्तिमतिक्रान्तायाः प्रतिसंहृतक्रमायाः क्रमशक्तिमत्या वर्णसंस्कारमात्रशेषाया निर्विभागाया असंवेद्याया योगिमात्रसंवेद्याया नाभिदेशस्थायाः, त्रय्याः = एतत्त्रिविधस्वरूपायाः अनेकतीर्थभेदायाः = कण्ठहृदयनाभिदेशोपाधिभेदकृतभेदाया वाचः पदम् = मूलमधिष्ठानम् एतत्=

सूर्यमाया

व्याकरण से वैखरी, मध्यमा और पश्यन्तीवाक् के ज्ञानक्रम से परावाक् रूप शब्दब्रह्म के साक्षात्कार से मोक्ष की प्राप्ति बताते हैं - 'वैखर्याः' इत्यादि ।

अर्थ : - कण्ठ, हृदय और नाभि इन अनेक स्थानों के भेद से क्रमशः परस्पर भिन्न - 'वैखरी, मध्यमा और पश्यन्ती' नामक तीनों वाणी का मूल अधिष्ठान

श्रूयते सा वैखरी, इयमनेकधा - 'घटः' इत्यादि संस्कृता, 'घड़ा' इत्यादि भ्रष्टसंस्कारा भाषा, दुन्दुभिवेणुवीणाऽऽदिजन्य-

---

मूलाधारस्थम् अद्भुतम् = वैखरी-मध्यमा-पश्यन्तीभ्य उक्तरूपाभ्यः सर्वाभ्यो विलक्षणम् - निष्कलं निरञ्जनं विशुद्धं स्वयंज्योतिश्चिद्रूपम् परम् = पराख्यं तुरीयं वचः । यस्य साक्षात्कारेणाज्ञानग्रन्थिभेदे भवति मोक्ष इत्यर्थः । यद्वा त्रय्याः = त्रिविधाया- वैखरी-मध्यमा-पश्यन्तीरूपाया अनेकतीर्थभेदायाः= कण्ठाद्यनेकदेशोपाधिभेदकृतभिन्नाभिधानाया अपि वस्तुत एकस्या वाचः= पराख्यायाः परतत्त्वरूपाया विशुद्धायाः स्वप्रकाशचितः एतत् = प्रकृतं व्याकरणम्-पाणिनीयम् अद्भुतम् = अन्यव्याकरणेभ्यो विलक्षणं सामान्यविशेषोत्सर्गापवादादिषड्विधलक्षणात्मकम् परम् = सर्वश्रेष्ठम् पदम्= व्यक्ताव्यक्तस्थूलसूक्ष्मसकलशब्दस्वरूपप्रमापकं प्रस्थानम् शब्दब्रह्मसाक्षात्कारोपायभूतो व्यवसितो मार्गः, ''पदं व्यवसित-त्राण-स्थान-लक्ष्माङ्घ्रिवस्तुषु'' इति हि कोशः । एवं च वैखर्यादिसोपानक्रमेण व्याकरणेन सकलशब्दस्वरूपस्य सम्यग्ज्ञानेन शब्दपूर्वेण योगेनाज्ञानग्रन्थिसमुच्छेदे भवति मोक्ष इति हृदयम् । तदेतत् प्रागुपक्रमे एवाह - ''इदमाद्यं पदस्थानम्.........अजिह्मा राजपद्धतिः'' इति ।

विमर्शः - वैखर्या मध्यमायाः पश्यन्त्याश्च त्रिविधाया वाचः परमं मूलमास्पदं पराख्यं तुरीयं वचः, यस्य वैखर्यादिस्थूलसूक्ष्मसूक्ष्मतमसोपानक्रमेण व्याकरणेन विवेकज्ञाने सति शब्दपूर्वेण योगेन साक्षात्कारे मोक्ष उपपद्यते, तस्य ब्रह्मरूपस्य पराख्यस्य वचसः प्राप्तेरुपायास्तिस्रो वाच इति स्थितम् । तदाह - ''अनेक-

---

यह सबसे विलक्षण परा नामक श्रेष्ठ वाणी है, जिसके साधुस्वरूप का ज्ञान करानेवाला सर्वश्रेष्ठ यह पाणिनीय व्याकरण है ।

आशय : - प्राणवायु के व्यापार से व्यक्त - श्रवण का विषय कण्ठदेश में स्थित- 'वर्ण-पदरूप' सक्रम वाक् वैखरी है, जो कि संस्कार से युक्त संस्कृत और संस्कार से हीन भाषा रूप भी है ।

ध्वनिमात्ररूपा, इत्यादयः, मध्यमायाः = हृदयस्थवाचः, इयं हि जपादौ बुद्धिनिर्ग्राह्या सूक्ष्मा प्राणवृत्त्यनुगता, पश्यन्त्याः =

तीर्थभेदायाः'' इति । इह तीर्थशब्द उपायपरोऽपि - ''तीर्थं शास्त्राध्वरक्षेत्रोपायोपाध्यायमन्त्रिषु'' इति विश्वकोशात् । एवं च परा-पश्यन्ती-मध्यमा-वैखर्यश्चतस्रो वाच इति हरेः सिद्धान्तो बोध्यः । तदाह -

पर वाङ् मूलचक्रस्था पश्यन्ती नाभिसंस्थिता ।
हृदिस्था मध्यमा ज्ञेया वैखरी कण्ठदेशगा ।। इति ।

इदं तु बोध्यम् - यदीह 'परम्' इत्यनेन तुरीया परावाक् नो विवक्षिता, तर्हि उत्कृष्टमात्रमर्थं बोधयितुं 'वरम्' इत्यसन्दिग्धं पदं किं नोपन्यस्तं हरिणा ? किमभिप्रेत्य सांशयिकम् 'परम्' इत्यनेकार्थकं पदं विन्यस्तम् ? नूनमस्ति तत्प्रयोगे कोऽप्यभिप्रायविशेषः । स तु भवितुमर्हति यदि श्रुतिस्मृतिप्रसिद्धं पराख्यं तुरीयं वच एवेह विवक्ष्यते चेत् तदा सुलभः ।

यस्मान्नास्ति किमपि परं पदम् तत्तु सर्वाधिष्ठानं कूटस्थनित्यं सर्वान्तर्यामि सर्वात्मकं स्वप्रकाशचिद्रूपं पराख्यं शब्दब्रह्मैव भवितुमर्हति, यस्य विवर्त अन्या वाचः ।

अथ वाचस्त्रिविधत्वे पश्यन्त्या एव परापरेति भेदौ, तयोरेका त्वपरा चञ्चला समाविष्टक्रमशक्तिरविशुद्धा अविद्ययाऽऽवृता विक्षिप्ता, अन्या तु परा निःस्पन्दा विलीनक्रमशक्ति र्विशुद्धेत्यभ्युपगम्यते, तदा स्वीकृतमेव वाचश्चतुर्विधत्वम्, नो चेत् पश्यन्तीनामव्यपदेशेन स्वतन्त्रपराया अस्वीकारे कः पुरुषार्थः? तस्माद् वरं निर्व्याजमङ्गीक्रियतां परा वाग्देवी । वाचश्चतुर्विधत्वम् श्रुतिषु सुस्पष्टं श्रुतम्, आगमेषु च विश्रुतम् । प्रथमं तावन्महाभाष्ये व्याकरणप्रयोजननिरूपणावसरे समुदाहृत ऋङ्मन्त्र एव प्रमाणम्- ''चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः ।

कण्ठदेश से नीचे हृदयदेश में स्थित - प्राणवायु से अनुगत सूक्ष्म वर्ण - पद रूप में सक्रम भासमान - दूसरों को संवेद्य न होकर केवल अपनी बुद्धि का विषय - 'मध्यमा' वाक् है । हृदय से नीचे नाभिदेश में स्थित - विवक्षा प्रयत्न

नाभीस्थवाचः, इयं हि नाभिदेशे वायुनाऽभिव्यक्ता मनोगोचरीभूता योगिना समाधौ साक्षात्क्रियमाणा, एतस्याः

गुहायां त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति ।।'' इति । (ऋक् सं० १-१६४-४५)

अयमर्थः - वाचः = शब्दस्य परिमितानि = स्थानभेदेन स्वरूपतो नामतश्च विभक्तानि चत्वारि पदानि = परा-पश्यन्ती-मध्यमा-वैखरीलक्षणानि सन्ति, तानि सर्वाणि ब्राह्मणा वेदाध्ययनप्रवचनशीला मनीषिणो वैयाकरणा विदन्ति । तेषु त्रीणि पदानि गुहायाम् = बुद्धौ अज्ञाने वा निहितानि = अन्तःस्थितानि आवृतानि वा नेङ्गयन्ति = व्याकरणप्रदीपं विना बहिर्न प्रकाशन्ते, वाचः तुरीयम् = चतुर्थं भागं वैखर्याख्यम् - व्यक्तवर्णपदादिरूपं मनुष्या अवैयाकरणा वदन्ति विदन्ति चेति नागेशानुमतं व्याख्यानम् ।

यद्वा वाचः परिमितानि चत्वारि पदानि नामाख्यातोपसर्गनिपाताः प्रत्येकं परा-पश्यन्ती-मध्यमा-वैखरीभेदैश्चतुष्पादाः सन्ति । तानि सर्वाणि मनीषिणः= वैयाकरणा ब्राह्मणा एव विदन्ति । तेषां नामादीनां त्रयो भागाः परादि-मध्यमापर्यन्ता बुद्धिगुहायामज्ञानकुहरे वा स्थिता न प्रकाशन्ते, चतुर्णां नामा-दीनां पदानामेकैकस्य चतुर्थं भागं वैखर्याख्यं मनुष्या अवैयाकरणा विदन्ति, इति कैयटाशयः ।

नामाख्यातोपसर्गनिपाताः प्रत्येकं परापश्यन्त्यादिभेदैश्चतुष्पादाः सर्वतन्त्रप्रसिद्धाः । तस्मात् मन्त्रे 'चत्वारि पदानि' इत्यनेन परापश्यन्त्यादीनि नामाख्यातादीनि चेत्युभयं विवक्षितम् । अत एव महाभाष्ये - ''चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताश्च'' इत्यत्र द्वन्द्वपदोत्तरं समुच्चयार्थश्चकार उपपद्यते । परापश्यन्त्यादीनामसंग्रहे तु 'निपाताश्च' इति द्वन्द्वान्ते चकारप्रयोगोऽनर्थक एवापद्येत, इत्यवधीयतां सुधीभिः । अत एव सायणेन

से प्रेरित वायु से स्पन्दित - चञ्चल - प्राण व्यापार का अत्यन्त अविषय वर्णों का संस्कारबीजमात्र अवशेष - अर्थ की भावना रूप क्रमरहित अत्यन्त असंवेद्य-'पश्यन्ती' वाक् है, जो कि योगियों के ज्ञान का विषय है । देशभेद से विभाजित

त्रय्याः अनेकतीर्थभेदायाः = तत्तत्स्थानभेदप्रयुक्तभिन्नाया वस्तुत एकस्या एवेति फलितम्, वाचः परम् = श्रेष्ठं पदम् = मूलाधारस्थं

माधवेन च प्रमाणभूतेनाचार्येण ऋग्वेदभाष्ये मन्त्रमेनं व्याचक्षाणेन चत्वारि पदानि परा-पश्यन्ती-मध्यमा-वैखरीरूपाणि वर्णितानि ।

शतपथब्राह्मणोऽपि वाचस्तुरीयभागमभ्युपगच्छन्नाह -

"तदेतत्तुरीयं वाचो निरुक्तं यन्मनुष्या वदन्ति" इति ।

(४-१-३-३६)

अत्र वैखर्याश्चतुर्थभागकथनं वाचः परादिभेदैश्चतुर्विधत्वे संगच्छते । सामवेदे उत्तरार्चिके सप्तमप्रपाठके अग्नेः स्तुतिप्रसङ्गे चतुर्धा वागाम्नायते-

"पाहि नो अग्न एकया पाह्युत द्वितीयया ।
पाहि गीर्भिस्तिसृभिरूर्जांपते पाहि चतसृभिर्वसो ॥" इति ।

अथर्वणि तु सप्तमे काण्डे चतुर्विधायाः वाचः स्वरूपं सरहस्यं प्रकाश्यते-

"धीती वा ये अनयन् वाचो अग्रं -
मनसा वा ये वदन्नृतानि ।
तृतीयेन ब्रह्मणा वावृधाना -
स्तुरीयेणामन्वत नाम धेनोः ॥" इति । (७-१-१)

अयमर्थ : - ये विवक्षवः धीती = धीत्या - ध्यानात्मकेन परावाग्रूपेण प्रथमेन शब्दब्रह्मणा वाचो अग्रम् = पश्यन्त्यादिसकलवाचः कारणम् अनयन्= ध्यानविषयत्वं प्रापितवन्तः, ये वा विवक्षवः मनसा = मननात्मकेन पश्यन्त्याख्येन द्वितीयेन शब्दब्रह्मणा ऋतानि = सत्यानि अखण्डपरापेक्षया ईषदाविर्भूतानि देवताविषयकविचारविषयाणि वाक्यानि अवदन् = सामान्य-ज्ञानविषयत्वं प्रापितवन्तः, ते विवक्षवः तृतीयेन = परापश्यन्त्यपेक्षया त्रित्वसंख्यापूरकेण ब्रह्मणा = मध्यमाख्येन हृदयस्थेन स्फोटात्मकशब्दब्रह्मणा

व परिच्छिन्न - इन तीनों वाणी का मूल अधिष्ठान तथा इन तीनों वाणी से अत्यन्त विलक्षण - विशुद्ध - स्वप्रकाश चित् स्वरूप - अचल - कूटस्थ - ध्रुव 'परावाक्' है, जो कि नाभि से नीचे गुप्तेन्द्रिय के अधोभाग मूलाधारचक्र

पराख्यम्, एतद् अद्भुतम् = विलक्षणम् - योगिनामपि समाधौ निर्विकल्पज्ञानविषयः ब्रह्मरूपम्, एतत्साक्षात्कारेणैव मोक्षो

वावृधानाः = शब्दवाच्यत्वेन अर्थं पोषयन्तः तुरीयेण = चतुर्थेन वैखर्यात्मकेन शब्देन ब्रह्मणा धेनोः = अर्थप्रकाशकस्य शब्दस्य नाम = प्रातिपदिकसंज्ञाम् अमन्वत = विदितवन्तः ।

अनेन बुद्धिमनोहृदयप्राणरूपावस्थाचतुष्टयेन वाचश्चतुर्विधत्वं निगदव्याख्यातम् ।

तदिदं वाचश्चतुर्विधत्वं महाभारतेऽपि स्मर्यते -

स्थानेषु विवृते वायौ कृतवर्णपरिग्रहा ।
वैखरीवाक् प्रयोक्तॄणां प्राणवृत्तिनिबन्धना ॥
केवलं बुद्ध्युपादाना क्रमरूपानुपातिनी ।
प्राणवृत्तिमतिक्रम्य मध्यमा वाक् प्रवर्तते ॥
अविभागा तु पश्यन्ती सर्वतः संहृतक्रमा ।
स्वरूपज्योतिरेवान्तः परा वागनपायिनी ॥
तस्यां दृष्टस्वरूपायामधिकारो निवर्तते ॥ इति ।

पराया वाचः स्वरूपे साक्षात्कृते कर्मफलभोगाधिकारक्षये मोक्ष इत्यर्थः । प्राक् वाक्चतुष्टयस्वरूपनिरूपणप्रसङ्गे व्याख्यातमिदम् । इह कैश्चित् 'परा' इति पाठं विहाय 'सूक्ष्मा वाग्' इति पाठः प्रक्षिप्तः, सोऽपार्थकः क्रमविरुद्धश्च । पश्यन्त्याः प्राक् मध्यमा वागेव यदि सूक्ष्मा, तर्हि पश्यन्त्याः का कथा ? सा तु सूक्ष्मतरा । अथानपेक्ष्य तारतम्यं साधारणतया पश्यन्ती 'सूक्ष्मा' इत्युच्यते, तदा मध्यमातस्तस्या अव्यावृत्ते-र्विशेषणकृत्यं न पश्यामः । तर्हि किमिति वाचश्चतुर्विधत्वमपलपितुमेव

में अवस्थित है । उक्त तीनों परिमित वाणी के परस्पर विलक्षण स्वरूप का विवेकज्ञान व्याकरण से प्रक्रियाज्ञानपूर्वक साधुशब्द के प्रयोग से उद्भूत पुण्य से विशुद्ध अन्तःकरण में होता है, जिसके फलस्वरूप क्रमशः श्रद्धापूर्वक योगानुष्ठान से उक्त तीनों वाणी के मूल अधिष्ठान तत्त्व - परावाक् का साक्षात्कार होता है ।

भवतीति ध्वनितम् । अत एव महाभाष्ये - "चत्वारि वाक्परिमिता पदानी" त्यादि प्रयोजननिरूपणे प्रथमाह्निके

सूक्ष्मेति प्रक्षिप्यते ? इत्यहो मात्सर्यम् ! तस्मात् श्रुतिप्रसिद्धं शब्दस्य चतुर्विधं स्वरूपं निरूपयितुं 'परा' इत्येव पाठो गरीयान् ।

यत्तु वाचस्त्रिविधत्वे एव 'मध्यमा' इति नाम युज्यते, इति केनचिदुच्यते, तन्न युक्तियुक्तम्, सर्वाधिष्ठानभूतां सर्वथा निःस्पन्दां परां शुद्धां विहाय देशभेदोपाधिकल्पितासु स्पन्दमानासु तिसृषु मध्ये वर्तमानाया मध्यमात्वव्यपदेशस्य युक्तत्वात् । आदिमध्यान्तत्वव्यवहारस्य ज्येष्ठमध्यमकनिष्ठत्वव्यवहारस्य वा सजातीयापेक्षत्वात् । नहि विजातीयकन्यायाः सत्त्वे पुत्रत्रये ज्येष्ठकनिष्ठयोर्मध्ये जातस्य मध्यमात्वहानिरिति विभाव्यताम् । किंच यथा अध्यक्षपदमलंकुर्वाणे साक्षिणि विद्यमानेऽपि त्रिषु सदस्येषु द्वयोर्मध्ये स्थितस्य मध्यमत्वव्यपदेशस्तथा मूलाधारस्थमूलवाचः सत्त्वेऽपि नाभिकण्ठयोर्मध्ये हृदयदेशेऽवस्थानादपि तस्या मध्यमाभिधानमुपपद्यते ।

यत्तु केचनात्र - "इत्याहुस्ते परं ब्रह्म यदनादि तथाऽक्षरम् ।
तदक्षरं शब्दरूपं सा पश्यन्ती परा हि वाक् ॥"

इति शिवदृष्टिवाक्यं प्रमाणत्वेनोदाहृत्य पश्यन्त्येव परावागित्यभिमन्यन्ते, तदसत्, तत्र शब्दब्रह्मणः परापश्यन्त्यादिसकलस्वरूपत्वप्रतिपादने तात्पर्यम्, न तु पश्यन्त्याः परारूपत्वबोधने । उद्देश्यविधेयभावेनेह परब्रह्मणोऽक्षर-शब्दरूपत्वम्, अक्षरशब्दस्य च कार्यब्रह्मपश्यन्तीरूपत्वम्, कारणब्रह्म - परारूपत्वं विवक्षितम् । तथाहि- 'सा' इत्यावृत्त्या अन्वेति - 'तद् अक्षरं शब्दरूपं सा हि पश्यन्ती सा हि परा वाक्' इत्यन्वयेनाक्षरशब्दस्य परापश्यन्त्युभयरूपत्वप्रतिपादनं सुस्पष्टम्, पश्यन्त्याः परारूपत्वबोधनं तु तात्पर्यानाकलनाद् भ्रम एव ।

नित्य - स्वप्रकाश ज्ञानरूप इस परावाक् का दर्शन होते ही जन्म-जन्मान्तरीय सभी अज्ञान की गाँठ चित् की ज्वाला से छिन्न-भिन्न नष्ट हो जाती हैं, जिससे अज्ञानमूलक कर्मों के फलभोगों का अधिकार समाप्त हो जाता है तथा भोगभूमि

प्रतिपादितम् । किञ्च -

"परा वाङ् मूलचक्रस्था पश्यन्ती नाभिसंस्थिता ।

तस्मान्नायं शिवदृष्टिग्रन्थः पश्यन्त्याः परारूपत्वसाधने प्रतिभूः । प्रत्युत पश्यन्तीतः परायाः पृथग् निर्देशात् स्वतन्त्ररूपत्वमेवानेन प्रमीयते । अन्यथा तयोरैक्ये घटकलशादिपर्यायशब्दवदुभयोः सह प्रयोगस्योद्देश्यविधेयभाव-बोधनस्य च नितरामयुक्तत्वमेव । तयोः परमार्थतोऽभिन्नरूपत्वेऽपि उपहितानुपहितस्वरूपत्वेन व्यवहारे स्वरूपवैलक्षण्यकृतं वाचश्चतुर्विधत्वं स्फुटम्, अन्यथा परमार्थतः सर्वासामेकरूपत्वेन त्रिविधत्वमपि दुर्निरूपं स्यात् । अत एव प्राह प्रमाणभूत आचार्यनन्दिकेश्वरः -

सर्वं परात्मकं पूर्वं ज्ञप्तिमात्रमिदं जगत् ।
ज्ञप्तेर्बभूव पश्यन्ती मध्यमा वाक् ततः परम् ॥
वक्त्रे विशुद्धचक्राख्ये वैखरी सा, मता ततः ।
वृत्तिवृत्तिमतोरत्र भेदलेशो न विद्यते ॥
चन्द्रचन्द्रिकयोर्यद्वद् यथा वागर्थयोरपि ॥ इति ।

अयमर्थः - विवर्तकार्यात् पूर्वं सर्वमिदं जगत् ज्ञप्तिमात्रम् अधिष्ठानचैतन्यं शब्दब्रह्मरूपं परात्मकं वच एवासीत् । तस्मात् पश्यन्ती सर्वार्थदृक्स्वरूपा बभूव, ततो विवक्षावशात् समुद्भूतमारुतेनोर्ध्वं समेधिता सूक्ष्मवर्णक्रमेण प्रतिभासमाना मध्यमा वाग् बभूव, तदनन्तरं सैव मध्यमा प्राणवृत्त्या विशुद्धचक्रे मुखस्थे समीरिता सती वर्णरूपेण विवृत्ता वैखरी बभूव । वृत्तिभेदेन तां तामाख्याभेदं च भजमानमपि परात्मकं वचो वस्तुतश्चन्द्रचन्द्रिकयोरिव वागर्थयोरिव च वृत्तिवृत्तिमतोर्भेदाभावात् परमार्थतोऽभिन्नमेव राजते ।

लोकों में पुनः पुनः गमन, आगमन चक्र से छुटकारा होकर शब्दब्रह्म का साक्षात्कार रूप मोक्ष की प्राप्ति हो जाती है । जैसा कि कहा है -

"तस्यां दृष्टस्वरूपायामधिकारो निवर्तते" ।

हृदिस्था मध्यमा ज्ञेया वैखरी कण्ठदेशगा ॥''
इत्यन्यत्र स्वरूपं निर्धारितम् ॥ १४४ ॥

इत्थं च श्रुतिस्मृतियुक्तिभि र्वाचश्चतुर्विधत्वे सुप्रथिते माधवादिभिः कृतस्य ''चत्वारि वाक्परिमिता'' इति मन्त्रव्याख्यानस्य तन्त्रशास्त्रवासनामूलत्वकथनम्, नागोजिभट्टानां वाचश्चतुर्विधत्वनिरूपणस्य च व्याकरणानवबोधनिबन्धनत्वकथनं निरर्गललपितं दुःसाहसमात्रमिति चिन्तयामः ।

किंच ''तद्द्वारमपवर्गस्य'' इति श्लोकव्याख्याने - ''प्रत्यस्तमितसर्वविकारोल्लेखमात्रां परां प्रकृतिं प्रतिपद्यते'' इति वृत्तिपङ्क्त्यक्षरसन्दर्भेण परावाक् सुस्पष्टं स्वीकृतैव । तत्रापि यदि - 'पराम् = उत्कृष्टां प्रकृतिं ब्रह्म प्रतिपद्यते' इति व्याख्यायते, तर्हि तत् दुराग्रहगृहीतमेव मन्ये । तत्प्रख्यन्यायेन प्रसिद्धा पराख्या वागेव सा मूलरूपा किं न गृह्यते ? नास्ति तस्याः पश्यन्तीरूपत्वम् । सा हि परावाक् चिद्रूपा सर्वविवर्तविकारप्रकृतिरवसीयताम् ।

तदाह प्राक् - ''भेदोद्ग्राहविवर्तेन लब्धाकारपरिग्रहा ।
आम्नाता सर्वविद्यासु वागेव प्रकृतिः परा ॥'' इति ।

अनेन पश्यन्तीतः स्वतन्त्रा परा वाक् सर्वतन्त्रसिद्धा, किमर्थं सा पश्यन्त्यामन्तर्निवेश्यापलप्यते, अस्तु सा सर्वाधिष्ठानमचलमनपलपनीयं वस्तुतत्त्वं शुद्धं दृक्स्वरूपं, तदेव वरमित्यलं पल्लवितेन ॥ १४४ ॥

इस प्रकार निष्कर्ष में व्याकरणशास्त्र वैखरी, मध्यमा, पश्यन्ती वाक् के सोपानक्रम से शब्द के सकल स्वरूप के विवेकज्ञान द्वारा परावाक् के साक्षात्कार से मोक्षप्राप्ति का असाधारण साधन अनुपम राजमार्ग है, जो कि पहले कहा है- 'अजिह्मा राजपद्धतिः' ॥ १४४ ॥

तद्विभागाविभागाभ्यां क्रियमाणमवस्थितम् ।
स्वभावज्ञैश्च भावानां दृश्यन्ते शब्दशक्तयः ॥ १४५ ॥

प्रत्येकार्थप्रकाशिका

ननु 'इदं साधु - इदमसाधु' इति व्यवस्थामस्मदादयः स्वयमेव करिष्यामः, किं व्याकरणेनेति परिहरति-तद्विभागेति । भावानाम् = वस्तूनाम् स्वभावज्ञैः = 'एतावन्तोऽर्थाः - एतावन्तः शब्दाः' इति यथार्थस्वरूपज्ञानिभिः पाणिन्यादिभिः

आनन्दा

"अविच्छेदेन शिष्टानाम्" इत्युक्तिदिशा शिष्टप्रयोगपारम्पर्यादेव सर्वैरेव शब्दानां साधुत्वं ज्ञास्यते, इति तदर्थं व्याकरणप्रणयनं व्यर्थमित्याशङ्कां समाधत्ते- 'तद्विभागाविभागाभ्याम्' इति ।

अन्वयः - भावानाम् स्वभावज्ञैः च शब्दशक्तयः दृश्यन्ते, विभागाविभागाभ्याम् क्रियमाणम् तद् अवस्थितम् ।

व्याख्या - भावानाम् = स्थूलसूक्ष्मातीन्द्रियाणां सर्वेषां पदार्थानाम् स्वभावज्ञैः= धर्माधर्मादितत्तत्कार्यजनकत्वस्वरूपज्ञानसमर्थैः सर्वज्ञकल्पैर्योगिभिः पाणिन्यादिमुनिभिः च = तु शब्दशक्तयः = यावतां शब्दानाम् साधूनामसाधूनां च अर्थबोधकतासामर्थ्यानि धर्माधर्मजनकतासामर्थ्यानि च दृश्यन्ते = योगबलेन साक्षात्क्रियन्ते, न तु मादृक्षै र्लक्षणैकचक्षुष्कैः, अतस्तैरेव लक्ष्यैकचक्षुष्कैः विभागाविभागाभ्याम् = अन्वयव्यतिरेककल्पितप्रकृतिप्रत्ययादे र्विभागेन,

---

सूर्यमाया

पूर्वकथनानुसार शिष्टों के अनवरत प्रयोग से साधुशब्दों का ज्ञान कर यदि व्याकरण का प्रणयन किया है, तो शिष्टप्रयोग से ही सबको साधुशब्दों का ज्ञान हो ही जायगा, व्याकरणशास्त्र की क्या आवश्यकता है? इस आशङ्का के समाधान के साथ व्याकरण की सार्थकता बताते हैं - 'तद्विभागाविभागाभ्याम्' इत्यादि ।

शब्दशक्तयः = शब्दसामर्थ्यानि दृश्यन्ते = योगजधर्मबलात् प्रत्यक्षीक्रियन्ते, यतः - तत इति शेषः, तैः विभागाविभागाभ्याम्= 'भूधातुः - ति प्रत्ययः' इति प्रकृत्यादिविभागेन, 'पङ्क्तिविंशति-

---

अथवा प्रकृतिप्रत्ययविभागं विनैव साक्षात् पदानुशासनेन च क्रियमाणम्= शिष्टाचारस्मृत्या निबध्यमानम् तत् = पूर्ववर्णितमद्भुतं व्याकरणम् अवस्थितम्= शिष्टसमाचारेण सर्वशब्दान् ज्ञातुमसमर्थानां सकलशब्दसाधुत्वज्ञानाय सामान्य-विशेषलक्षणात्मकमनतिप्रसक्तं व्यवस्थितम् ।

विमर्शः - ये हि योगतपोबलेनाप्रतिबद्धज्ञानाः पाणिन्यादयो महर्षय आर्षज्ञानेन सर्वभावानां स्वभावं साक्षात् द्रष्टुं समर्थास्ते तु मुनयः साध्वसाधुशब्दानां धर्माधर्मजनकत्वस्वभावं प्रत्यक्षं जानन्ति, अतस्तैः प्रकृतिप्रत्ययविभागकल्पना-प्रक्रियया 'पचति - पाचक' इत्यादिपदव्युत्पादनेन, यद्वा प्रकृतिप्रत्यय-विभागकल्पनां विनैव पृषोदरादिवत् 'पङ्क्तिविंशति - दाधर्तिदर्धर्ति' इत्यादि-पदस्वरूपस्य साक्षान्निपातनेन विरच्यमानं व्याकरणमव्यभिचारेण सकलशब्द-साधुत्वज्ञानायास्मादृशां स्थूलदृशां कृते नियत उपायः ।

सर्वशब्दतदर्थदर्शनसमर्थानामप्रतिबद्धज्ञानानां युक्तानां लक्ष्यैकचक्षुष्काणां कृते व्याकरणस्यानावश्यकत्वेऽपि करणापाटवादिप्रतिबद्धज्ञानानां लक्षणैक-

---

अर्थ : - आर्षदृष्टि से सभी वस्तुओं के स्वभाव व सामर्थ्य को प्रत्यक्ष जानने-वाले पाणिनि जैसे ऋषिगण ही असंख्य शब्दों तथा उनके साधुत्व, स्वभाव और सूक्ष्म धर्मजनकत्व सामर्थ्य को सम्यक् देखते हैं, अन्य नहीं । अतः उन ऋषियों के द्वारा प्रकृतिप्रत्ययरूप अवयवविभाग की कल्पित प्रक्रिया द्वारा पद के व्युत्पादन से अथवा अवयवविभाग के विना साक्षात् पद का निपातन रूप से निर्माण किया जानेवाला व्याकरण शास्त्र ही लाघव में असंख्य शब्दों के साधुत्वज्ञान का अनुगत तथा व्यवस्थित उपाय है, अनन्त अननुगत शिष्टप्रयोग नहीं ।

आशय : - मलिनबुद्धि अल्पज्ञ अल्पसामर्थ्यवाला जनसाधारण स्वयं ही शिष्टों के प्रयोग से असंख्य शब्दों को न तो जान ही सकता है, न उनके धर्म अधर्म के साधन रूप साधु - असाधु स्वरूप को जान सकता है, किन्तु योग व तपोबल

दाधर्ति-दर्धर्ति-दर्धर्षि' इत्यादिरूपेण अविभागेन साक्षात् पदोपदेशेनेति फलितम्, क्रियमाणम् = निर्मीयमाणम् तद् = व्याकरणम् अवस्थितम् = साधुत्वबोधकतया नियतम् ।

अस्मदादीनां तादृशज्ञानाभावात् साधुत्वज्ञापनार्थं व्याकरणम्, इति भावः ॥ १४५ ॥

चक्षुष्काणां मादृशां तादृशसामर्थ्याभावात् अव्यभिचारेण सकलशब्दसाधुत्व-स्वभावज्ञानार्थमनन्यगतिकं व्याकरणमेव शरणम् । अन्यथा व्याकरणाभावे शब्दसाधुत्त्वज्ञानायाननुगतं शिष्टसमुदाचारमुपाश्रित्य प्रतिपदपाठ एव शरणी-कर्तव्यः स्यात् । तथा च प्रतिपदपाठेन वर्षसहस्रेणाप्यनन्तशब्दराशेः साधुत्वज्ञानं कर्तुमशक्यं स्यात् । तदाह भगवान् पतञ्जलिः - "अनभ्युपाय एष शब्दानां प्रतिपत्तौ प्रतिपदपाठः" इति ॥ १४५ ॥

से जिनका ज्ञान 'दूर -सूक्ष्म - अतीन्द्रिय' किसी विषय में प्रतिबद्ध नहीं होता, सभी वस्तुओं के स्वभाव व सामर्थ्य को करामलक के समान प्रत्यक्ष जानते हैं, वे ही अनन्त शब्दों के साधु या असाधु स्वरूप को जानते हैं तथा उनके धर्म - अधर्म सामर्थ्य को जानते हैं । अतः उनके द्वारा रचित यह व्याकरण शास्त्र ही अपने 'सामान्य-विशेष, विधि - निषेध आदि' सूत्रों से प्रकृति-प्रत्ययों के विभाग की प्रक्रिया द्वारा अथवा प्रत्यक्ष ही पदों के उपदेश द्वारा अनन्त शब्द राशि के साधुत्व व असाधुत्व के अनुगम का सुव्यवस्थित एक मात्र उपाय है, शिष्टप्रयोग नहीं । अतः व्याकरण सार्थक है ॥ १४५ ॥

अनादिमप्यवच्छिन्नां श्रुतिमाहुरकर्तृकाम् ।
शिष्टै र्निबध्यमाना तु न व्यवच्छिद्यते स्मृतिः ॥ १४६ ॥

प्रत्येकार्थप्रकाशिका

श्रुतिस्मृत्यो र्नित्यत्वबोधनद्वारा ताभ्यामेव धर्मो व्यवस्थापनीय इति प्रतिपादयति - अनादीति । अवच्छिन्नामपि = प्रलये तिरोहितभूतामपि अनादिम् = प्रलये तिरोभावे तादृशस्वर-

---

आनन्दा

ननु साधूनां धर्मसाधनत्वमसाधूनां नेति व्यवस्था नोपपद्यते, प्रलये श्रुतिस्मृत्योर्विच्छेदे सर्गान्तरेऽन्यादृश्याः श्रुतेः स्मृतेश्च सर्गसम्भवेन तेषां धर्माधर्मसाधनत्वव्यवस्थाया विपर्य्यासस्यापि सम्भवादित्याशङ्कां परिहरन् श्रुतिस्मृत्योरविच्छेदेन धर्माधर्मव्यवस्थापकत्वमाह - ''अनादिम्'' इति ।

अन्वयः - श्रुतिम् अवच्छिन्नाम् अपि अनादिम् अकर्तृकाम् आहुः, स्मृतिः तु शिष्टैः निबध्यमाना न व्यवच्छिद्यते ।

व्याख्या - श्रुतिम् = गुरूपदेशपरम्परातः श्रवणविषयां प्रत्यक्षशब्दरूपाम् वेदसमाख्याम्, अवच्छिन्नाम् = युगान्तेऽन्तर्हिताम् अपि अनादिम् = उत्पत्तिरहिताम्, अनादिमव्यवच्छिन्नामिति पाठान्तरे तु = उत्पत्तिप्रलयरहिताम् सदा वर्तमानाम्, अत्र हेतुमाह - अकर्तृकाम् = केनाप्यरचिताम् अपौरुषेयाम् आहुः = शब्दप्रमाणका मीमांसकाश्च मन्त्रानुसारिणो निगदन्ति- ''धाता यथापूर्वमकल्पयत्'' (ऋ० १०-२९०) इति श्रुतेः, ''वाचा विरूपनित्यया'' (तै०सं० - २-६-११) इत्यादिश्रुतेश्च ।

सूर्यमाया

किसी को धर्मजनक वा अधर्मजनक मानने में सदा व्यवस्थित एवं प्रवाहनित्य केवल श्रुति और स्मृति का प्रामाण्य बताते हैं - 'अनादि' इत्यादि ।

अर्थ : - कल्पान्त काल में अन्तर्हित होने पर भी किसी कर्ता के द्वारा रचित न होने से अपौरुषेय वेद को आदि और अन्त से रहित सदा विद्यमान नित्य कहा

वर्णानुपूर्वीणां नाशाभावात् युगादौ आविर्भावेऽपि 'पूर्वं नासीत्-अधुना जात' इति व्यवहाररहितामिति भावः, अकर्तृकाम् = कर्तृरहिताम् श्रुतिम् आहुः ।

स्मृतिः = श्रुत्यर्थस्मरणात्मिका शिष्टैः = मन्वादिभिः निबध्यमाना = वेदतात्पर्यप्रकाशनाय युगे युगे विरच्यमानाऽपि न व्यवच्छिद्यते = श्रुतिसिद्धार्थस्यानुवादकत्वात् मूलार्थरूपेणाविच्छेदेन सदा वर्तते ।

विमर्शः - श्रुतिस्मृती उभे नित्ये, किन्तु तयोरयं तु विशेषः - ये हि शाब्दिका जगतः सर्गप्रलयौ मन्वते, तन्मते केनापि कर्तृविशेषेणारचिता नित्यसिद्धा पूर्वपूर्वसर्गसिद्धानुपूर्वीसमानानुपूर्वीकोत्तरसर्गेऽपि तथैव श्रूयमाणा सजातीयोच्चारणसापेक्षोच्चारणविषया हि सजातीयोच्चारणानपेक्षोच्चारण-रूपवक्तृस्वातन्त्र्यरहिता श्रुतिः शब्दतोऽर्थतश्च सर्वतोभावेन व्यवस्थितस्वरूपा वशिष्ठवामदेवादिभि र्महर्षिभि र्दृष्टा ।

ये तु मीमांसका अनाद्यनन्तजगतः सर्गप्रलयौ नाभ्युपगच्छन्ति, तन्मते श्रुतिर्नोत्पद्यते, न विनश्यति, न चाविर्भवति, नापि तिरोभवति, सर्वकालेऽपि व्यवस्थितनित्यवर्णानुपूर्वीका श्रूयमाणा सम्प्रदायाविच्छेदेनोपलभ्यमाना सा वक्तृस्वातन्त्र्यविरहिता पूर्वपूर्वोच्चारणाधीनोच्चारणविषया । सर्वथैव सा अपौरुषेया । स्मृतिस्तु मनु-व्यास-याज्ञवल्क-पराशरप्रभृतिभिः काले काले यथेच्छानुपूर्वीकाऽन्याऽन्या गद्येन पद्येन वा निबध्यमाना सकर्तृकाऽपि श्रुत्यर्थप्रकाशनपरा अर्थतोऽविच्छेदेन सदा वर्तमाना प्रवाहनित्या ।

है । किन्तु स्मृति तो समय समय पर शिष्ट वेदज्ञ आचार्यों के द्वारा बनाये जाते रहने से पौरुषेय होने पर भी कभी उसकी धारा नष्ट नहीं होती, अविच्छिन्न प्रवाह के रूप में सदा बनी रहती है, क्योंकि शाश्वत वेद के अर्थ का स्मारक व प्रकाशक ही स्मृति है, उससे भिन्न कोई नवीन अर्थ नहीं । अतः सदा विद्यमान श्रुति और स्मृति ही साधु या असाधु शब्दों के 'धर्म - अधर्म' स्वभाव के निर्णय में प्रमाण हैं, अन्य नहीं ।

"धाता यथापूर्वमकल्पयत्" इति श्रुतिबलात् हिरण्यगर्भादेः सृष्ट्यादौ प्रचारकर्तृत्वेऽपि स्वातन्त्र्येण रचनाकर्तृत्वाभावात् अपौरुषेयैव श्रुतिरिति भावः ।

स्मृतिस्तु शिष्टैः = आचार्यैः व्यासादिभिः निबध्यमाना = श्रुत्यर्थप्रकाशार्थं विरच्यमाना न व्यवच्छिद्यते = प्रवाहरूपेण न विनश्यति ।

इदं तु बोध्यम् - शब्दप्रमाणकाः शास्त्रमेव धर्माधर्मादिष्वदृष्टार्थेषु प्रमाणं मन्वते । शास्त्रेण यस्य वस्तुनो यादृशं सामर्थ्यमुपदिश्यते, तत्तथैव मन्तव्यं नान्यथेति व्याकरणेन साधूनां धर्मसाधनत्वम्, असाधूनां त्वधर्मसाधनत्वं विधीयते, तस्मात् कदापि तद्विपर्ययो नाशङ्कनीयः ।

अत्र केचिदाहुः - न किंचिदपि वस्तु स्वभावतो धर्माधर्माङ्गं नियतम्, किन्तु शास्त्रोपदेशसामर्थ्यादेव । तस्मात् शास्त्रविहितानुष्ठानाद् धर्मः, शास्त्रातिक्रमात्त्वधर्मः, यथा 'ऋतौ भार्यामुपेयात्' इति शास्त्रविहितः स्वधर्मभार्यासङ्गमो धर्मः, 'परदारान्नोपगच्छेत्' इति शास्त्रनिषिद्धः परस्त्री-सङ्गमोऽधर्मः । तस्मात् शास्त्रस्यैवैष स्वभावो न वस्तुन इत्यायातम् ।

आशय : - "इदं पुण्यमिदं पापम्" इस श्लोक (४०) में पहले यह कहा जा चुका है कि - पुण्य-पाप व धर्म-अधर्म के स्वरूप का शास्त्र ही निर्णायक प्रमाण है ।

शास्त्र वेद और स्मृति उभय रूप है । इनमें अन्तर यह है कि - वेद किसी से रचित नहीं है - अपौरुषेय है, किन्तु स्मृतियाँ समय समय पर मनु, व्यास आदि ऋषियों से रचित - पौरुषेय हैं । किसी काल में वेद के वर्णक्रम का तथा अर्थ-स्वरूप का परिवर्तन नहीं होता । यह अनादि व अनन्त है, सदा एक रूप में अविच्छिन्न रहता है । परन्तु स्मृतियाँ कर्ता की इच्छा अनुसार अन्य अन्य वर्णक्रम स्वरूप से परिवर्तित होते रहने पर भी वेद के ही नित्य सिद्ध अर्थ की स्मृति रूप

स्मृतेः पौरुषेयत्वेऽपि तदुक्तविषयप्रवाहस्य सदा विद्यमानतया नित्यत्वमिति भावः । एवञ्च शास्त्रप्रतिपादितविषयानुष्ठाने धर्मः, तदतिक्रमणे अधर्मः । सामान्यतो यो गोवधोऽधर्मः, स एव गोमेधयागे धर्म इति शास्त्रेणैवोच्यते, इति विना शास्त्रं न धर्मादिज्ञानम्, इति एतेषां शब्दानां प्रयोगे धर्म इति ज्ञापनार्थं व्याकरणशास्त्रमिति तात्पर्य्यम् ॥ १४६ ॥

अन्ये त्वाहुः - यथा चिकित्साशास्त्रं विषौषधादिद्रव्याणां सिद्धं स्वभावमेव प्रतिपादयति, न त्वपूर्वं कमपि स्वभावं जनयति, तथा सर्वं शास्त्रं वस्तुस्वभावस्य बोधकमेव, न तु कारकम् । तस्मात् व्याकरणमपि साधूनां सिद्धं धर्मसाधनत्वस्वभावं बोधयत्येव, नापूर्वमुत्पादयति । परन्त्वदृष्टं धर्माधर्मादिकमर्थं स्मृतिरेव बोधयितुं समर्था, न तु प्रत्यक्षमित्यतः साधुशब्दज्ञानपूर्वके प्रयोगे धर्म इति व्याकरणस्मृतिरेव बोधयितुं समर्थेति तदर्थं व्याकरणप्रणयनं सार्थकम् ॥ १४६ ॥

होने से उसका मूल अर्थ सदा एकरूप में अविच्छिन्न बना रहता है, नष्ट नहीं होता, अतः स्मृतियाँ भी प्रवाहनित्य हैं । वेद और स्मृति दोनों एक रूप में सदा अविच्छिन्न प्रमाण हैं । किसी के धर्म-अधर्म स्वभाव के निर्णय में वेद और स्मृति ही प्रमाण होते हैं, अन्य नहीं ।

प्रकृत में व्याकरण स्मृति ही शब्दों के साधु-असाधु स्वरूप में तथा उनके धर्म-अधर्म फल में प्रमाण है ॥ १४६ ॥

अविघाताद्विवृत्तानामभिख्या स्वप्नवच्छ्रुतौ ।
भावतत्त्वन्तु विज्ञाय लिङ्गेभ्यो विहिता स्मृतिः ॥ १४७ ॥

प्रत्येकार्थप्रकाशिका

प्रकारान्तरमाह - अविघातेति । श्रुतौ = वेदे विवृत्तानाम्= प्रकाशितानां पदार्थानाम् अविघातात् = अविघातं कृत्वा

आनन्दा

स्वप्नदृष्टार्थस्य जाग्रति कथनमिव श्रुतिदृष्टार्थस्य कथनरूपं स्मृतेः पृथक् स्वरूपं श्रुतिमूलं प्रामाण्यं च प्रकारान्तरेणाह - 'अविघातात्' इति ।

अन्वयः - श्रुतौ विवृत्तानाम् अविघातात् भावतत्त्वम् विज्ञाय लिङ्गेभ्यः विहिता स्मृतिः स्वप्नवत् अभिख्या ।

व्याख्या - श्रुतौ = वेदे विवृत्तानाम् = प्रकटितानाम् अर्थानाम् अविघातात् = विघातं विना भावतत्त्वं विज्ञाय = विशेषेण यथार्थतो ज्ञात्वा लिङ्गेभ्यः = साधकहेतुभ्यः विहिता = विप्रतिपत्तिनिरासेन विरचिता स्मृतिः= वेदार्थनिर्णयपरा रचना स्वप्नवत् = स्वप्नदृष्टार्थस्येव अभिख्या = वेदार्थस्याभिज्ञानेन कथनम् । अत एव वेदार्थप्रकाशनपरत्वात् स्मृतिः प्रमाणमिति हृदयम् ।

सूर्यमाया

पूर्वश्लोक में श्रुति और स्मृति का प्रवाहनित्यरूप में समान प्रामाण्य बताकर अब श्रुति के अविरोधी अर्थ के प्रतिपादक रूप में श्रुति के अधीन स्मृति का प्रामाण्य बताते हैं - ''अविघाताद्'' इत्यादि ।

अर्थ : - वेद में प्रतिपादित तत्त्व का बाध या विरोध किये विना वस्तुओं के वास्तविक स्वरूप को सम्यक् जानकर वेद में देखे गये स्पष्ट शब्दसंकेतों से रची गई स्मृति स्वप्न में देखे गये वस्तुओं का जागरण में यथावत् कथन के समान वेदार्थ का प्रकाशक - स्मरणात्मक आख्यान मात्र है ।

याथातथ्येनेति यावत्, भावतत्त्वम् = वस्तुतत्त्वम् विज्ञाय = ज्ञात्वा लिङ्गेभ्यः = नानाहेतुभ्यः विहिता = प्रकाशिता स्मृतिः स्वप्नवत् अभिख्या = संज्ञा ।

इह "अविभागाद् विवृत्तानाम्" इति पाठोऽपि वृत्तिदिशा दृश्यते । तस्यार्थस्तु - अविभागाद् = कार्यकारणविभागरहिताद् ब्रह्मणः विवृत्तानाम्= प्रादुर्भूतानां मन्त्रद्रष्टॄणां महर्षीणां श्रुतौ = वेदविषया स्वप्नवत् = स्वप्ने इव श्रोत्रादिबाह्यकरणनिरपेक्षम् अभिख्या = मानसं ज्ञानम् । सर्गादौ शब्दब्रह्मणो विवर्तमाना वशिष्ठादयो महर्षयः प्रतिभाबलात् पूर्वपूर्वसर्गसिद्धं वेदं स्वप्ने इव बाह्यज्ञानकरणनिरपेक्षं साक्षात्कुर्वन्ति । स्मृतिस्तु मनुव्यासादिभिः ऋषिभिः भावानाम् = स्थूलसूक्ष्मपदार्थानां तत्त्वम् = स्वरूपं स्वभावं च विज्ञाय = योगबलेन ज्ञात्वा लिङ्गेभ्यः = वेददृष्टशब्दसंकेतेभ्यः विहिता = विरचिता समुपलभ्यते ।

एवं च श्रुतिर्यथापूर्वं महर्षिभिर्दृष्टा अपौरुषेया पुरुषदोषसंभावनाशून्या स्वतःप्रमाणम्, स्मृतिस्तु काले काले ऋषिभि र्विरचिता पौरुषेयाऽपि श्रुतिमूलत्वात् प्रमाणमिति विवेकः ।

विमर्शः - अनन्तरपूर्वश्लोके सृष्टिप्रलयावनभ्युपगच्छतां मीमांसकानां मते श्रुतिस्मृत्योः प्रामाण्यं निरूपितम्, इह तु सृष्टिप्रलयवादिनां मते तयोः प्रामाण्यं निरूप्यते, इत्यविभागादिति पाठाभिमानिनामभिमतम् ।

वयं तु विद्मः - उभयोर्नये श्रुतेरकर्तृकत्वेन प्रामाण्यं प्राक् प्रतिपादितम्, स्मृतेश्च सकर्तृकत्वेऽपि श्रुतिवत् सर्वकाले प्रवाहाऽविच्छेदेन विद्यमानत्वात् समं प्रामाण्यं व्यवस्थापितम्, तेन श्रुततः स्मृतेः स्वतन्त्रप्रमाणत्वाशङ्कामपाकर्तुमिह प्रबोधे स्वप्नदृष्टाख्यानस्येव स्मृतेः श्रुतिदृष्टार्थाख्यानरूपत्वेन श्रुतितन्त्रमेव प्रमाणत्वमिह निरूप्यते, तद्वरम् ।

"अविभागाद् विवृत्तानाम्" इस पाठ पक्ष में अर्थ है कि विभागरहित ब्रह्म से प्रादुर्भूत ऋषियों को स्वप्न ज्ञान के समान श्रोत्र आदि करणों के विना ही वेद का मानस ज्ञान हुआ, किन्तु स्मृति वस्तुओं के स्वरूप को भली भाँति समझकर वेद में पाये गये संकेतों से रची गई है ।

यथा स्वप्ने दृष्टानां भावतत्त्वं जाग्रदवस्थायां स्मृत्वा स्मृत्वा वागादिनानाहेतुभ्यः प्रकाश्यते, तथैव वेदे स्थितं वस्तु स्मारं

तदेतदभिप्रेत्य - 'स्मृतिः स्वप्नवत् अभिख्या' इत्यन्वयः 'अविघातात्' इति च पाठः सुश्लिष्टतरः । श्रुतौ दृष्टस्यार्थस्याभिघातमकृत्वा तदविरोधेन अभिख्या = श्रुत्यर्थमभिज्ञाय कथनमेव स्मृति र्नापूर्वा काचिदिति स्मृतेः श्रुत्यधीनं प्रामाण्यं स्फुटम् ।

श्रुति र्हि मन्त्रद्रष्टॄणामृषीणां योगजमलौकिकं बाह्यकरणनिरपेक्षं प्रत्यक्षम्-तपःसमुद्भूतं प्रातिभमपरोक्षं विज्ञानम् । तद्धि न स्वप्नतुल्यं भवितुमर्हति । स्वप्नस्तु जागरे दृष्टस्य श्रुतस्य वा कस्यचिदर्थस्य संस्कारजं ज्ञानम् । वस्तुतस्तन्न करणनिरपेक्षम्, स्वप्नेऽपि किलाज्ञानमोहरूपनिद्रादोषेण यथा प्रातिभासिका अर्थाः सृज्यन्ते, तथा तत्प्रतिभासकरणानीन्द्रियाण्यपि प्रातिभासिकानि सृज्यन्ते, तदाह - "न तत्र रथा न तत्र वाहा अथ रथान् रथयोगान् पथः सृजते" इति । अत एव मधुरभक्षणस्वप्ने रसनातो लालाजलं पतति, भयंकररौद्ररूपस्वप्नदर्शने द्रष्टुः कम्पः क्रन्दनं चीत्कारो जायते, किमधिकं, त्रपाऽस्पदं कियतां चलेन्द्रियाणां प्राणान्तकः स्वप्नदोषः श्रूयते । यद्वा स्वप्ने सप्तदशावयवकसूक्ष्मशरीरस्थेन्द्रियै र्ज्ञानं जायते । तत्र सूक्ष्मशरीरमेव भोगायतनम् । तस्मात् - 'श्रुतौ स्वप्नवत् अभिख्या' इति व्याख्यानं सर्वथा विरुद्धमसङ्गतं च । अत एव विरोधात् - 'वृत्तिर्हर्युपज्ञा'

आशय : - इस पाठान्तर के अनुसार वेद को स्वप्न के समान करणनिरपेक्ष ज्ञान बताया, जो कि असंगत है । वेद तो तपोबल से उद्भूत प्रातिभज्ञानरूप ऋषियों का प्रत्यक्ष मन्त्रदर्शन है, स्वप्न के समान नहीं हो सकता । स्वप्न तो जाग्रत् में ज्ञात वस्तु के संस्कारमूलक निद्रादोष से जन्य प्रातिभासिक मिथ्या ज्ञान है, वेदविज्ञान तो उसके विपरीत योगज प्रत्यक्षरूप यथार्थ ज्ञान है । स्वप्न को करणनिरपेक्ष ज्ञान मानना भी उचित नहीं है, क्योंकि स्वप्न में जाग्रत् संस्कार के परिणामस्वरूप निद्रादोष से जैसे ज्ञानविषयों की प्रातिभासिक सृष्टि होती है, वैसे ही उनके ज्ञानकरण इन्द्रियों की सृष्टि भी होती है । स्वप्न में प्रातिभासिक रूप-रस आदि

स्मारं नानाहेतुभ्यः प्रकाश्यते, सैव स्मृतिरिति भावः ॥ १४७ ॥

इत्यत्र न मम प्रत्ययः । एवं च जागरप्रत्यक्षानुभवसंस्कारजन्यो यथा स्वप्नस्तथा स्मृतिरपि वेदार्थापरोक्षज्ञानसंस्कारेण वेदमूलिङ्गैश्च ऋषिभिरूहिता सा (स्मृतिः) प्रमाणमित्येव व्याख्यानं समधिकं रोचते मह्यम् । संस्कारमूलत्वादेव स्मृतिलक्षणलक्षिता 'स्मृति'रिति संज्ञा सुविदिता स्वीक्रियतां नाम काऽत्र विप्रतिपत्तिः ? स्मृतौ हि श्रुत्यर्थः स्मर्यते, स्मृत्वा च लिङ्गेभ्यो भ्रमसंशयविपर्ययादिनिरासेन पर्यवसितोऽर्थः प्रकाश्यते ॥ १४७ ॥

विषय प्रातिभासिक ही चक्षु - रसना आदि इन्द्रियों से ग्राह्य होते हैं, अथवा स्वप्न में सूक्ष्म शरीर में जीव सुख-दुःखों का भोग करता है । पाँच ज्ञानेन्द्रिय, पाँच कर्मेन्द्रिय, पाँच प्राण, और मन, बुद्धि, इन सत्रह वस्तुओं का समूह सूक्ष्मशरीर है । अतः यह पाठान्तर युक्तिसंगत नहीं है । यहाँ ''अविघातात्'' यह पाठ ही श्लाघनीय है । जिसका निष्कृष्ट अर्थ है कि वेद में प्रकाशित अर्थ के अविरोधी वस्तुस्वरूप के यथार्थज्ञानपूर्वक वेद में दृष्ट प्रमाणों से रचित ग्रन्थ की आख्या स्मृति है । अतः वेदमूलक होने से स्मृति अदृष्ट धर्म-अधर्म के निर्णय में प्रमाण है ।

पूर्वश्लोक में वेद और स्मृति दोनों का प्रामाण्य बताया, यहाँ केवल वेदमूलक स्मृति का प्रामाण्य बताया है, जिसका तात्पर्य है कि वेद के अर्थ का प्रकाशक 'स्मृति' प्रमाण है ॥ १४७ ॥

कायवाग्बुद्धिविषया ये मलाः समवस्थिताः ।
चिकित्सालक्षणाध्यात्मशास्त्रैस्तेषां विशुद्धयः ॥ १४८ ॥

प्रत्येकार्थप्रकाशिका

व्याकरणफलमाह - कायेति । कायवाग्बुद्धिविषयाः ये मलाः= कायगतमलं रोगादि, वाङ्मलम् - अपभ्रंशत्वम्, बुद्धिमलं विषयरागद्वेषादि, एते समवस्थिताः = वर्तमानाः, तेषाम् चिकित्सालक्षणाध्यात्मशास्त्रैः विशुद्धयः = संस्काराः भवन्तीत्यर्थः ।

आनन्दा

वेदमूलकस्मृतीनां प्रामाण्यमुपवर्ण्य प्रयोजनविवेकेन स्मृतेः शाखात्रयं निरूपयन् अन्यस्मृतिदृष्टान्तेन व्याकरणस्मृतेरसाधारणं प्रयोजनमाह - 'काय-वाग्' इति ।

अन्वयः - सरलः ।

व्याख्या - कायवाग्बुद्धिविषयाः = काये वाचि अन्तःकरणे च विकारोत्पादकाः ये मलाः = दोषाः समवस्थिताः = काये वचसि बुद्धौ च तिष्ठन्ति, तेषाम् = दोषाणाम् चिकित्सालक्षणाध्यात्मशास्त्रैः = आयुर्वेदशास्त्रेण, सामान्यविशेषलक्षणरूपव्याकरणशास्त्रेण, वेदान्त-सांख्य-योगाद्यात्मोपदेशशास्त्रेण

सूर्यमाया

दृष्टान्त रूप में चिकित्साशास्त्र और अध्यात्मशास्त्र के साथ व्याकरणशास्त्र का प्रयोजन बताते हैं - ''कायवाग्''- इत्यादि ।

अर्थ : - शरीर, वाणी और अन्तःकरण के विकार के हेतु जो दोष उनमें होते हैं, उनकी निवृत्ति व शान्ति क्रमशः आयुर्वेदशास्त्र, व्याकरणशास्त्र या अध्यात्मशास्त्र वेदान्त आदि से होती है । अर्थात् आयुर्वेद से शरीर की, व्याकरण से वाणी की तथा वेदान्त आदि अध्यात्मशास्त्र से अन्तःकरण की शुद्धि होती है ।

चिकित्साशास्त्रम् - आयुर्वेदः, तेन औषधादिद्वारा रोगनिवृत्तिः, लक्षणेन - व्याकरणशास्त्रेण "इको यणचि" इत्यादिसामान्यविशेषलक्षणादिद्वारा अपभ्रंशनिवृत्तिः, अध्यात्म-

---

च यथासंख्यं विशुद्धयः = निवृत्तयो जायन्ते, तेषां निवृत्त्या कायादयः संस्कृताः विशुद्धा भवन्तीति यावत् ।

विमर्शः - यथा शरीरे वातपित्तकफमलानां वैषम्ये ज्वरादिरोगसामर्थ्यम् औषधादिषु च दोषनिवृत्तिसामर्थ्यं विज्ञाय परेषामुपदेशाय चिकित्साशास्त्रं निबद्धम्, यथा च अन्तःकरणे रागेर्ष्याद्वेषादिदोषाणां कालुष्यक्लेशसामर्थ्यं शमदमोपरतितितिक्षावैराग्यादीनां च दोषोपशमसामर्थ्यं विज्ञाय तदुपदेशाय वेदान्ताद्यध्यात्मशास्त्रं निबद्धम्, तथा वाङ्मलानां भ्रष्टसंस्कारासाधूनां शब्दानाम्

आशय : - जैसे शरीर में वात, पित्त, कफमलों के विकार से उत्पन्न रोगों की निवृत्ति आयुर्वेद आदि चिकित्साशास्त्र के निर्देशित औषधियों से होती है, जैसे अन्तःकरण के राग, द्वेष, ईर्ष्या, कालुष्य दोषों की निवृत्ति वेदान्त-सांख्य-योग आदि अध्यात्मशास्त्रों के स्वाध्याय-चिन्तन से उत्पन्न विषयवैराग्य से होती है, ऐसे ही प्रकृत में शब्द के अपभ्रंश व अशुद्धि दोष की निवृत्ति व्याकरणशास्त्र के प्रतिपादित प्रक्रियाज्ञान से होती है ।

निष्कर्ष में : - जैसे रोगविकारों से रहित शरीर स्वस्थ होना चिकित्साशास्त्र का प्रयोजन है, तथा राग-द्वेष मलावरणों से रहित अन्तःकरण निर्मल व शुद्ध होना वेदान्त आदि अध्यात्मशास्त्रों का प्रयोजन है, ऐसे ही संस्कारहीन अपभ्रंश दोषों से रहित साधुशब्द का ज्ञान व्याकरणशास्त्र का साक्षात् प्रयोजन है ।

अपभ्रंश का स्वरूप निम्न प्रकार आगम में वर्णित है -

शब्दः संस्कारहीनो यो गौरिति प्रयुयुक्षिते ।
तमपभ्रंशमिच्छन्ति विशिष्टार्थनिवेशनम् ॥

अर्थ : - 'सास्नादिमान् - गोत्वजातिविशिष्ट' अर्थ में प्रयोग के योग्य 'गौः' इस विसर्गान्त सिद्धरूप का जहाँ प्रयोग करना चाहिए, वहाँ उस अर्थ में विभक्ति व

शास्त्रेण वेदान्तेन रागद्वेषादिनिवृत्तिर्भवतीत्यतः- 'अपभ्रंश-परिहारः' व्याकरणफलमिति भावः ॥ १४८ ॥

अशुद्धिदोषाणां पापसामर्थ्यम्, साधूनां च पुण्यसामर्थ्यं विज्ञाय साध्वसाधु-विवेकज्ञानार्थम् उत्सर्गापवादलक्षणं व्याकरणशास्त्रं भगवता कारुणिकेन पाणिनिना निबद्धम् ।

एवं च यथा चिकित्साशास्त्रस्य रोगनिवृत्त्या कायशुद्धिः प्रयोजनम्, यथा चाध्यात्मशास्त्रस्य रागद्वेषादिदोषकालुष्यनिवृत्त्या अन्तःकरणशुद्धिः प्रयोजनम्, तथा व्याकरणशास्त्रस्यापभ्रंशदोषनिवृत्त्या शब्दसाधुत्वज्ञानं साक्षात् प्रयोजनमिति पर्यवसितोऽर्थः ॥ १४८ ॥

उसके आदेश ' विसर्ग' आदि संस्कारों से रहित 'गावी-गोणी' इत्यादि विकृत रूपान्तर को प्राप्त जो शब्द का प्रयोग है तथा भिन्न अर्थ में प्रयुक्त जो शब्द है, उसको अपभ्रंश कहते हैं । संस्कारहीन विकृत शब्द के अपभ्रंश होने की कथा ही क्या है, व्याकरण प्रक्रिया से संस्कारयुक्त साधुशब्द भी अपने अर्थ से भिन्न किसी अर्थ में प्रयुक्त होने पर अपभ्रंश माना गया है । स्वजन के स्थान में श्वजन का प्रयोग, सकृत् के स्थान में 'शकृत् भुङ्क्ष्व' का प्रयोग अपभ्रंशरूप में अनर्थकारी है । इसमें यह सूक्ति उदाहरण है -

यद्यपि बहु नाधीषे तथापि पठ पुत्र व्याकरणम् ।
स्वजनः श्वजनो मा भूत् सकलं शकलं सकृच्छकृत् ॥ १४८ ॥

अस्वगोण्यादयः शब्दाः साधवो विषयान्तरे ।
निमित्तभेदात् सर्वत्र साधुत्वन्तु व्यवस्थितम् ॥ १४९ ॥

प्रत्येकार्थप्रकाशिका

अर्थनिमित्तापि साधुत्वासाधुत्वव्यवस्था, न तु शब्दस्वरूप-निमित्तैवेत्युपपादयति - "अस्वे" ति । अस्वगोण्यादयः शब्दाः=

आनन्दा

पूर्वत्र 'कायवाग्बुद्धिविषया' इत्यनेन व्याकरणस्यासाधुत्वमलनिवृत्ति-प्रयोजनवर्णनमुखेन शब्दस्य संस्कारहीनत्वरूपमसाधुत्वमुक्त्वा सम्प्रति साधोरपि शक्याद् भिन्नेऽर्थे प्रयोगहेतुकमसाधुत्वमुपपादयति - 'अस्व' इति ।

अन्वयः - सरलः ।

व्याख्या - अस्वगोण्यादयः = 'अस्व - गोणी' प्रभृतयः ये शब्दाः = स्वशक्यार्थाद् भिन्ने अश्वे गवि चार्थे प्रयुक्ता असाधवो भवन्ति, ते विषयान्तरे = अश्वभिन्ने निर्धनेऽर्थे, गोभिन्ने गोदोहनपात्रविशेषे आवपने स्वशक्यार्थे प्रयुक्ताः साधवः = शुद्धा मन्यन्ते ।

इत्थं च निमित्तभेदात् = निर्धनत्वावपनत्वरूपात् अश्वत्वगोत्वरूपाद्वा प्रवृत्तिनिमित्तविशेषबलात् सर्वत्र = सर्वस्मिन् शब्दे यत्र कुत्रापि साधुत्वम् = स्वशक्यार्थपरत्वे साधुत्वम्, अशक्यार्थपरत्वे तु असाधुत्वं वा व्यवस्थितम्-अर्थभेदानुसारेण मतम्, न तु केवलं स्वरूपत एव नियतम् ।

सूर्यमाया

पूर्व में संस्कार तथा संस्कारभ्रंश के कारण शब्द के साधुत्व व असाधुत्व का उपपादन कर अब अर्थविशेष के कारण भी साधुत्व और असाधुत्व का निरूपण करते हैं - 'अस्व' इत्यादि ।

अर्थ : - अस्व और गोणी आदि शब्द जो कि अश्व तथा गो आदि अर्थ में प्रयुक्त असाधु हो जाते हैं, वे ही उससे भिन्न - 'निर्धन और दोहनपात्र' अर्थ में साधु माने जाते हैं । अतः सर्वत्र शब्द में तत् तत् प्रवृत्तिनिमित्त के अनुसार अपने अर्थ

वाज्यर्थे 'अस्व' शब्दः, गवार्थे 'गोणी'शब्दः इत्यादयः - असाधवोऽपि विषयान्तरे = धनाभावे, आवपने चार्थे साधवः

विमर्शः - व्याकरणप्रक्रियया व्युत्पादितोऽपि 'अस्व'शब्द एकशफत्व-रूपाश्वत्वप्रवृत्तिनिमित्तविशिष्टेऽर्थे प्रयुक्तोऽसाधुः, किन्तु स एव स्वभिन्ने-धनाभावे - निर्धने वा स्वशक्यार्थे प्रयुक्तः साधुर्भवति, एवं 'गोणी'शब्दः सास्नादिमत्त्वरूपगोत्वप्रवृत्तिनिमित्तविशिष्टे स्वशक्यार्थाद् भिन्ने 'गवि' अर्थे प्रयुक्तोऽसाधुर्भवति, परन्तु गोदोहनपात्रत्वरूपावपनत्वविशिष्टे स्वार्थे प्रयुक्तः साधुर्भवति । इत्थं च प्रवृत्तिनिमित्तभेदप्रयुक्तोऽर्थभेदोऽपि शब्दस्य साधुत्वासाधुत्वव्यवस्थायां भवति निमित्तं न तु केवलं शब्दस्वरूपमेव ।

अन्यथा साधुत्वासाधुत्वव्यवस्थायां शब्दस्वरूपमात्रस्य निमित्तत्वे तु अस्वशब्दो गोणीशब्दो वा साधुरेव स्यादसाधुरेव वा, न तूभयम् । तस्मादर्थ-विशेषनिबन्धनमपि शब्दस्य साधुत्वमसाधुत्वं वा विवेचनीयम् । केवल-स्वरवर्णविपर्ययमात्रेणार्थविपर्ययो जायते । तादृशस्थले सर्वत्रार्थविशेषानुसारेणैव साधुत्वासाधुत्वव्यवस्थाऽभ्युपेया । 'अस्व - अश्व, स्वजन - श्वजन, सकल - शकल, निर्वाण - निर्वात' इत्येवंविधानां शतसहस्राणां शब्दानां साधुत्वासाधुत्वविवेकोऽर्थभेदेन प्रयोगभेदकृत एव न स्वरूपमात्रतः ।

में साधुत्व तथा अन्य अर्थ में असाधुत्व माना गया है, केवल संस्कृत या असंस्कृत स्वरूपमात्र से नहीं ।

आशय : - शब्द की शक्ति का ग्राहक व्याकरणशास्त्र है, जिस अर्थविशेष में जिस शब्द का साधुत्वशासन व्याकरण करता है, उससे भिन्न अर्थ में वह शब्द असाधु होता है । एवं स्वर - वर्ण के विपर्यय से अर्थ का विपर्यय हो जाने से अर्थ के अनुसार भी शब्द का साधुत्व वा असाधुत्व माना गया है । दन्त्य-सकारवाला 'अस्व' शब्द स्व से भिन्न अथवा निर्धन अर्थ में शक्ति होने से साधु है, किन्तु अश्वत्वजातिविशिष्ट अश्व अर्थ में तालव्यशकारविशिष्ट - 'अश्व' शब्द की ही शक्ति है, 'अस्व' शब्द की नहीं, अतः अश्व अर्थ में 'अस्व'शब्द-असाधु है । ऐसे ही गो की सास्ना - 'गलकम्बल' अर्थ में 'गावी' शब्द भले

दृश्यन्ते यतः, अत इति शेषः, साधुत्वम् तु शब्दात् - असाधुत्वम् निमित्तभेदात् = अर्थप्रवृत्तिनिमित्तादिविशेषप्रयुक्तम् सर्वत्र व्यवस्थितम् = नियतम्, अनुमेयमिति भावः ॥ १४९ ॥

तदेवमयमिह निर्गलितोऽर्थः - व्याकरणसंस्कारहीनः शब्दस्तु सर्वथैवा-पभ्रंशोऽसाधुरेव, नास्ति तत्र कश्चन विकल्पः । किन्तु व्याकरण-संस्कारविशिष्टोऽपि शब्दोऽर्थविपर्ययेण भवति साधुरसाधुर्वेति व्यवस्था-विकल्पोऽवसेयः । तदेतदाह -

'शब्दः संस्कारहीनो य' इत्युदाहृतं प्राक् ।

तस्यायमर्थः - 'गौः' इति सास्नादिमति स्वशक्यार्थे प्रयोक्तुमिष्टे व्याकरणसंस्कारहीनो यो 'गावी, गोणी' इत्यादिशब्दः प्रमादाद् उच्चारणासामर्थ्याद् वा प्रयुज्यते, तं विशिष्टे सास्नादिमत्यर्थे प्रयुक्तमपभ्रंशमिच्छन्ति, अर्थान्तरे तु गाव्यादयोऽपि भवन्ति साधवः । व्याकरणसंस्कृता अप्यर्थविपर्ययेण प्रयुक्ता असाधवो, यथार्थतः प्रयुक्तास्तु साधव इति संग्रहकारः प्राह, इति द्विधा साधुत्वासाधुत्वव्यवस्था बोध्या ॥ १४९ ॥

ही साधु हो, किन्तु गो अर्थ में प्रयुक्त असाधु है । इससे यह स्पष्ट होता है कि- अश्व - अस्व, गो - गावी - दोनों प्रकार के शब्द स्वरूप से व्याकरणप्रक्रिया के अनुसार भले ही साधु हों, किन्तु एक के अर्थ में अन्य का प्रयोग असाधु है ।

अतः संस्कारभ्रंश और अर्थविपर्यय दोनों प्रकार से शब्द असाधु माना जाता है । जहाँ उच्चारण के वैकल्य से बाल, स्त्री, शूद्रवर्ग - अम्बा के स्थान पर अम्मा, राम के स्थान पर लाम, इत्यादि विकृत शब्द का उच्चारण करता है, वहाँ उन अपभ्रंश शब्दों को स्वरूप से ही असाधु मानना होगा ॥ १४९ ॥

ते साधुष्वनुमानेन प्रत्ययोत्पत्तिहेतवः ।
तादात्म्यमुपगम्येव शब्दार्थस्य प्रकाशकाः ॥ १५० ॥

प्रत्येकार्थप्रकाशिका

साधुशब्दानामेव वाचकत्वात् अपभ्रंशस्थलेऽपि साधुस्मरणद्वारा शाब्दबोध इति नैयायिकमतमनुवदति - 'ते साधु' इति । ते = अपभ्रंशाः अनुमानेन = सादृश्यादिना ज्ञातेषु

आनन्दा

शक्तत्वं साधुत्वं वदतां नैयायिकानां नयेऽपभ्रंशेषु शक्तिस्वीकारे साधुत्वप्रसङ्गभयात्तेषु शक्तेरस्वीकारेण तेषां साक्षाद् वाचकत्वाभावात् साधुस्मरण-द्वारा परम्परया बोधकत्वमाह - 'ते साधुषु' इति ।

अन्वयः - सरलः ।

व्याख्या - ते = गावी - गोणीत्यादयोऽपभ्रंशाः साधुषु - अनुमानेन = सादृश्यात् साधुशब्दान् 'गौः' इत्यादीन् स्मारयित्वा तदुत्तरकालम् प्रत्ययोत्पत्तिहेतवः = अर्थबोधजनका भवन्ति, न साक्षादित्येकः पक्षः ।

उत्तरार्धेन तु पक्षान्तरमुच्यते - 'तादात्म्यम्' इति । तेऽपभ्रंशाः तादात्म्यम्-उपगम्य इव = संस्कारहीनत्वेन वस्तुतः साधुशब्दैः सह तादात्म्याभावेऽपि तत्समत्वेन साधुशब्दाभिन्ना इव प्रतीयमानाः शब्दार्थस्य = साधुशब्दवाच्यार्थस्य प्रकाशकाः = बोधका भवन्ति । पूर्वार्धोक्तं साधुशब्दानुमानं विनैव साधुभिस्तादात्म्यप्रतिपत्त्या रूढिं प्राप्तास्तेऽपभ्रंशाः साक्षादेवार्थबोधका इति द्वितीयः पक्षः । इति केचन पक्षभेदेन व्याचक्षते ।

सूर्यमाया

न्यायमतानुसार - अपभ्रंश स्वयं बोधक न होकर साधु शब्द के स्मरण द्वारा अर्थ का बोधक होता है, यह बताते हैं - ''ते साधुष्वनुमानेन'' इत्यादि ।

अर्थ : - पूर्व प्रकृत अपभ्रंश साधुशब्दों के स्मरण के अनन्तर उनके द्वारा अर्थ बोध की उत्पत्ति का कारण होते हैं, साक्षात् नहीं । यद्यपि संस्कारहीन होने से

इति शेषः । अत एव साधुपदे स्वबोध्यक्रियायाः स्वाधारकालानन्तरकालेन प्रत्ययोत्पत्तिरूपक्रियाव्यवच्छेदकतया ज्ञापकक्रियाश्रयबोधकत्वात् ''यस्य च भावेने'' ति सप्तमी,

---

वस्तुतस्तु तेऽपभ्रंशा अनुमानेन = संस्कारोद्बोधकरूपसादृश्यादिना साधुषु प्रत्ययोत्पत्तिहेतवः = प्रथमं साधून् स्मारयन्ति, ततः स्मृतैस्तैः साधुभिस्तादात्म्यं प्राप्य इव शब्दार्थस्य = साधुशब्दाभिधेयस्य प्रकाशकाः= बोधका न तु वस्तुतस्ते वाचकाः, इत्यर्थः ।

विमर्शः - यथा अनन्यवेद्यतया रहस्यार्थप्रकाशनाय कृता भ्रूविक्षेपाक्षिसंकोचादयः पूर्वसंकेतबलात् संकेतितशब्दविशेषं स्मारयित्वा गोप्यार्थस्य प्रकाशका भवन्ति, तथा अपभ्रंशा अपि साधून् स्मारयित्वा परम्परयाऽर्थस्य बोधका न तु साक्षादित्येक एवाखण्डवाक्यार्थोऽवसेयः । ''ते साधुष्वनुमानेन'' इत्यत आरभ्य ''एवं साधौ प्रयोक्तव्ये'' इत्येतत्पर्यन्तम् अपभ्रंशानां परम्परया बोधकत्वं न साक्षादिति परमतमेव वर्ण्यते, न स्वमतमित्यवधेयम् । स्वमतं तु ''पारम्पर्यादपभ्रंशाः'' इत्यत्राग्रेऽसाधूनामपि साक्षाद्वाचकत्वं वक्ष्यते । इदं तु बोध्यम् - 'साधुषु' इति लक्षणे सप्तमी ग्राह्या, ''यस्य च भावेन भावलक्षणम्'' इत्यनुशासनात् ।

एवं च 'साधुषु' इति ज्ञापकत्वं लक्षकत्वं वा सप्तम्यर्थः । यथा 'गोषु दुह्यमानासु गतः' इति वाक्ये गोदोहनक्रिया स्वाधारभूतकालानन्तरभूतकालेन गमनक्रियां परिच्छिनत्ति, तथेहापि ''ते साधुष्वनुमानेन प्रत्ययोत्पत्तिहेतवः'' इति वाक्ये साधुबोधक्रिया स्वाधारकालानन्तरकालेन शाब्दबोधोत्पत्तिक्रियां परिच्छिनत्ति । यथोदाहृते वाक्ये गोदोहोत्तरकाले गत इत्यर्थः पर्यवस्यति,

---

अपभ्रंश का साधु शब्दों से अत्यन्त भेद है, तथापि तत्सम होने से साधु शब्दों के साथ तादात्म्य सा पाकर वे साधु शब्द के अभिधेय अर्थ का प्रकाशक होते हैं ।

आशय : - जैसे किसी गोपनीय वार्ता के लिए स्पष्ट भाषा का प्रयोग न करके उसके स्थान में किसी सांकेतिक शब्द का प्रयोग किया जाता है, अथवा आँख, भौं, हाथ के संकोच-विकास आदि चेष्टा से संकेत किया जाता है, उससे

साधुषु= संस्कृतेषु प्रत्ययोत्पत्तिहेतवः = शाब्दबोधकारणानि तादात्म्यमुपगम्येव = साधुभिः सह तादात्म्यं प्राप्येव, स्वसादृश्येन साधून् स्मारयित्वा - इति फलितोऽर्थः, शब्दार्थस्य प्रकाशकाः= बोधकाः भवन्तीत्यर्थः ॥ १५० ॥

तथा प्रकृतवाक्येऽपि साधुशब्दबोधोत्तरकालिकार्थप्रत्ययोत्पत्तिक्रिया, तद्धेतवोऽपभ्रंशा इत्यर्थः पर्यवस्यति । तथा च गमनकालज्ञापकदोहनक्रियाश्रयबोधकत्वाद् यथा 'गोषु' इत्यत्र सप्तमी, तथा अर्थप्रत्ययोत्पत्तिज्ञापकज्ञानविषयबोधकत्वात् 'साधुषु' इत्यत्रापि सप्तमी बोध्या ।

नन्वेवं साधूनामेव प्रत्ययोत्पत्तिहेतुत्वं, नापभ्रंशानामिति तेषां प्रत्ययोत्पत्तिहेतुत्वकथनं व्याहतं स्यादिति चेत्तत्राह - 'तादात्म्यमुपगम्येव' इति ।

यथा-अयःपिण्डस्य दाहकत्वाभावेऽपि दहनक्रियाश्रयवह्नितादात्म्याध्यारोपाद् दाहकत्वमध्यवस्य 'अयो दहती'ति व्यपदेशः, तथाऽपभ्रंशानां वाचकत्वाभावेऽपि वाचकत्वाश्रयसाधुशब्दतादात्म्याध्यारोपाद् अर्थप्रत्ययोत्पत्तिहेतुत्वकथनं सुसङ्गतमिति हृदयम् ॥ १५० ॥

वक्तव्य मूल शब्द का ज्ञान कर अर्थ बोध किया जाता है, ऐसे ही अपभ्रंश शब्द भी अपने मूलभूत साधुशब्द के ज्ञान द्वारा ही परम्परया अर्थबोध का जनक होता है, साक्षात् नहीं, क्योंकि न्यायमत में अपभ्रंश में शक्ति नहीं है । अपभ्रंश में शक्ति मानने पर उनके मतानुसार शक्तत्वरूप साधुत्व का प्रसङ्ग हो जायगा ॥ १५० ॥

न शिष्टैरनुगम्यन्ते पर्य्याया इव साधवः ।
न यतः स्मृतिशास्त्रेण तस्मात् साक्षादवाचकाः ॥ १५१ ॥

प्रत्येकार्थप्रकाशिका

ननु 'घट'शब्दादय इव 'घड़ा'शब्दादयोऽपि साक्षात् वाचका भवन्तु, किञ्च कलशादिवत् पर्य्याया अपि भवन्तु, अत आह- 'न शिष्टै' रिति । यतः शिष्टैः = आचार्य्यैः स्मृतिशास्त्रेण = व्याकरण-कोशादिना साधव इव - अपभ्रंशा इति शेषः, न

आनन्दा

अपभ्रंशानां पर्यायशब्दत्वं साक्षाद् वाचकत्वं च युक्त्या निरस्यति - 'न शिष्टै' रिति ।

अन्वयः - शिष्टैः स्मृतिशास्त्रेण साधवः इव न अनुगम्यन्ते तस्मात् न पर्यायाः, यतः न पर्यायाः, तस्मात् साक्षात् अवाचकाः । 'तस्मात्' इति 'पर्यायाः' इति चावर्त्यते ।

व्याख्या - शिष्टैः = पाणिन्यादिभिर्व्याकरणप्रणेतृभिः कोशकारैश्च स्मृतिशास्त्रेण = व्याकरणेन कोशेन वा साधव इव = निर्जरसौ - निर्जरौ, घटः -कलशः, इत्यादय इव अपभ्रंशा गावी-गोण्यादयः नानुगम्यन्ते = लक्षणेन नान्वाख्यायन्ते, गोपर्यायतया वा न पठ्यन्ते, तस्मात् = हेतोरनुमीयते यत् अपभ्रंशा न पर्यायाः । यतः = यस्माद्धेतोः न पर्यायाः, तस्मात् साक्षादवाचकाः = अपभ्रंशाः साक्षाद्वाचका न भवन्ति, किन्तु साधुस्मरणद्वारेण परम्परयैव बोधका इत्युत्प्रेक्ष्यते ।

सूर्यमाया

अपभ्रंश को साक्षात् वाचक तथा साधुशब्द का पर्याय न मानने में हेतु बताते हैं - ''न शिष्टैः'' इत्यादि ।

अर्थ : - व्याकरणकार या कोशकार शिष्ट आचार्यों ने अपने व्याकरणरूप लक्षणशास्त्र से या कोशरूप लक्ष्यशास्त्र से साधुपर्याय के रूप में अपभ्रंशों का अनुगम व अनुशासन नहीं किया है, अत एव अपभ्रंश न तो साधु शब्द का पर्याय माने जाते हैं, ना ही अर्थ का साक्षात् वाचक ही ।

अनुगम्यन्ते, 'अत' इत्यध्याहारः, न पर्य्यायाः । घट-पर्य्याय-कलशादीनां कोशादौ अनुगमादिव घड़ादिशब्दानां तद्विरहात् पर्य्यायताविरह इति भावः । यस्मात् न पर्य्यायाः, तस्मात् साक्षात् अवाचकाः । एकप्रवृत्तिनिमित्तावच्छिन्न- वाचकत्वमेव पर्य्यायत्वमिति भावः ॥ १५१ ॥

अत्र - तृतीयपादे 'ते यतः' इति पाठोऽपि दृश्यते । तत्पक्षे ते = अपभ्रंशाः यतः शिष्टैः स्मृतिशास्त्रेण साधवः पर्याया इव न अनुगम्यन्ते तस्मात् साक्षादवाचकाः, अत एव च नापि ते पर्याया इत्यर्थः ।

विमर्शः - 'गावी-गोणी' इत्यादयोऽपभ्रंशा यदि 'गौः' इत्यादि-साधुशब्दवत् साक्षाद्वाचकाः स्युस्तर्हि तेऽपि शिष्टैः शक्तिग्राहकेण लक्षणशास्त्रेणान्वाख्यायेरन्, कोशेन च पर्यायतया तन्मध्ये पठ्येरन्, न त्वेवं दृश्यते, तेन गम्यते यत् ते न साक्षादर्थवाचकाः । यतो हि अपभ्रंशा न साक्षाद्वाचकास्तत एव न साधवो नापि पर्याया भवितुमर्हन्ति, एकप्रवृत्तिनिमित्तावच्छिन्नार्थवाचकस्यैव साधुत्वेन पर्यायतया कोशे परिगणनात्, व्याकरणशास्त्रे च लक्षणेन साधुत्वान्वाख्यानात् ।

एवं च स्मृतिशास्त्रेण शिष्टैरननुगम्यमानत्वादपभ्रंशानां न साक्षाद् वाचकत्वं नापि साधुत्वं नैव च पर्यायत्वमिति हृदयम् ॥ १५१ ॥

आशय : - पाणिनि आदि आचार्यों ने शक्तिग्राहक अपने व्याकरणशास्त्र से अथवा कोश से 'पाचकः - पक्ता, घटः - कलशः' इत्यादि साधुशब्दों का अनुगम करने के समान ही 'गावी - गोणी, घड़ा - भाँडा' आदि अपभ्रंश शब्दों का भी अनुगम तथा पर्यायशब्दों के रूप में संग्रह यदि किया होता, तो वे भी साक्षात् अर्थ का वाचक तथा पर्याय शब्द माने जाते । किन्तु जब आचार्यों ने उनका अनुगम नहीं किया है, तो इससे यह स्पष्ट सिद्ध होता है कि - अपभ्रंश साक्षात् अर्थ का वाचक नहीं है तथा साधु अथवा पर्याय भी नहीं है । जो साक्षात् ही अर्थ का वाचक 'शक्त्याश्रय' शब्द होता है, वही साधु अथवा पर्याय शब्द कहा जाता है ॥ १५१ ॥

अम्बाऽम्बेति यदा बालः शिक्ष्यमाणोऽपभाषते ।
अव्यक्तन्तद्विदां तेन व्यक्ते भवति निश्चयः ॥ १५२ ॥

प्रत्येकार्थप्रकाशिका

असाधूनां साधुस्मरणद्वारा वाचकत्वे दृष्टान्तमुपपादयति- 'अम्बे' ति । अम्बाऽम्बेति शिक्ष्यमाणः = वृद्धैः "अम्बा अम्बा इति वद" इत्युपदिश्यमानः बालः = द्विहायनो वटुः यदा

आनन्दा

अपभ्रंशानां साधुस्मरणद्वारेण बोधकत्वात् साक्षाद् वाचकत्वाभावे दृष्टान्तमाह- 'अम्बाम्बेति' इति ।

अन्वयः - 'अम्बा - अम्बा' इति शिक्ष्यमाणः बालः यदा अव्यक्तम् अपभाषते, तद्विदाम् तेन व्यक्ते निश्चयः भवति ।

व्याख्या - 'अम्बा - अम्बा' इति = वक्तुं शिक्ष्यमाणः = वृद्धैरनुशिष्यमाणः बालः = द्विदन् व्युत्पित्सुः शिशुः यदा अव्यक्तम् = करणशक्तिवैकल्यात् अस्फुटम् अपभाषते = 'अम्मा - अम्मा' इत्यपभ्रंशं ब्रूते, तदा तद्विदाम् = तत्प्रकृतिसाधुशब्दविदाम् तेन = अव्यक्तेनापभ्रंशेन व्यक्ते = स्फुटे साधुशब्देऽनुमानेन ज्ञाते निश्चयः = अर्थावबोधः भवति ।

सूर्यमाया

अबोध शिशु की तोतली बोली के दृष्टान्त से अपभ्रंश का साधु के अनुमान द्वारा परम्परया अर्थबोधकत्व सिद्ध करते हैं - 'अम्बा' इत्यादि ।

अर्थ : - 'अम्बा - अम्बा' ऐसा बार बार कहकर शब्द बोलना सिखाया जा रहा शिशु स्पष्ट न बोलकर अम्बा के बदले अम्मा इत्यादि अपभ्रंश बोल देता है, तो उसके मूल साधुरूप को जाननेवाले बड़े अभिभावक लोगों को उस अपभ्रंश शब्द से उसके मूलरूप - साधुशब्द का अनुमान से निश्चय होने पर अर्थ का निश्चित ज्ञान होता है ।

आशय : - संस्कृत हो अथवा तद्भव, तत्सम जो भी भाषा हों, संस्कृत ही क्या- सभी प्रादेशिक भाषाएँ जो अपने अपने प्रदेशों में साहित्यिक रूप में परिष्कृत व

अव्यक्तम् = 'अमा अमा' अपभाषते = अशक्त्या अपभ्रंशमुच्चारयति, तदा तद्विदाम् = साधुज्ञानां वृद्धानाम् तेन= अव्यक्तकथनेन व्यक्ते = साधुशब्दे अनुमिते सति निश्चयो भवति । अयमिदं कथयतीति निश्चीयते इत्यर्थः ।

बालेन 'दुधू' इत्युक्ते वृद्धः साधुशब्दानुमानेन - 'दुग्धम्' इत्युच्चारयतीति निश्चिनोतीति भावः ॥ १५२ ॥

विमर्शः - दन्तादिकरणानामपूर्णसामर्थ्याद् बालेनापभ्रंशे प्रयुक्ते तत्प्रकृतिसाधुशब्दज्ञाः श्रोतारः साधुशब्दमनुमानेन प्रत्यभिज्ञाय तेनार्थबोधं कुर्वन्ति, साधुशब्दमेवार्थबोधकं निश्चिन्वन्ति, न तु बालोच्चारितमपभ्रंशशब्दमिति भावः ।

इह 'प्रभाषते' इति त्वपपाठः, 'अव्यक्तम्' इत्यनेन 'प्रभाषते' इत्युक्तेः समन्वयाभावात् । यद्यव्यक्तं तर्हि तत् सम्यग्भाषणं प्रभाषणं कथम्? यथावद् व्यक्तस्याविकलोच्चारणस्यैव प्रकृष्टभाषणत्वात् । तस्मात् प्रकृतत्वाच्चापभ्रंशस्य 'अपभाषते' इति पाठ एव हृद्यः ॥ १५२ ॥

शुद्ध हो चुकी हैं, सभ्य परिवार में अपनी मातृभाषा के पक्षधर अपनी शुद्ध भाषा बोलते हैं - शिशु वर्ग अपने परिवार के श्रेष्ठ जनों की बोल चाल व्यवहार से अपनी भाषा सीख जाते हैं । इसी के बीच जब तक शिशु वर्ग तोतली बोली बोलता है, ऐसी स्थिति में परिवार के बड़े जानकार लोग उसकी अस्पष्ट तोतली वाणी से उसके शुद्ध मूलभाषा को अनुमान से समझकर ही बच्चों के अभिप्राय को उनकी इच्छाओं व आवश्यकताओं को परख कर उनकी पूर्ति करते हैं । आज तो अंग्रेजियत के कुप्रभाव में सारी भाषाएँ खिचड़ी बन रही हैं, उनकी कथा तो छोड़ें ॥ १५२ ॥

एवं साधौ प्रयोक्तव्ये योऽपशब्दः प्रयुज्यते ।
तेन साधुव्यवहितः कश्चिदर्थोऽभिधीयते ॥ १५३ ॥

प्रत्येकार्थप्रकाशिका

प्रकृते निगमयति - 'एवमिति' । एवम् = तथैव जनेन साधौ प्रयोक्तव्ये सति, अशक्त्यादिना - इति शेषः, यः अपशब्दः = अपभ्रंशः प्रयुज्यते, तेन = अपशब्देन साधुव्यवहितः=

आनन्दा

पूर्वोक्तं बालस्यापशब्दप्रयोगविषयकदृष्टान्तं दार्ष्टान्तिके मध्यमवृद्धादेर-पशब्दप्रयोगविषये व्यवहारे संगमयति- "एवम्"- इति ।

अन्वयः - सरलः ।

व्याख्या - एवम् = पूर्वोक्तव्युत्पित्सुबालवत् साधौ = "गौः" इत्यादिसाधुशब्दे प्रयोक्तव्ये = केनापि वक्त्रा उच्चारयितव्ये योऽपशब्दः = 'गावी - गोणी' इत्यादिरपभ्रंशः प्रयुज्यते = असामर्थ्यात् प्रयत्नलाघवादिकारणाद्वा उच्चार्यते, तेन = अपभ्रंशेन गाव्यादिना असाधुशब्देन साधुव्यवहितः = अनुमितो यस्तस्य मूलसाधुशब्दस्तेन व्यवहितः - साधुस्मरणद्वारा कश्चित् = विवक्षितः अर्थः = साधुशब्दाभिधेयः अभिधीयते = प्रतिपाद्यते, न तु साक्षादपशब्देनोच्यते, तत्र शक्तेरभावादित्यर्थः ।

सूर्यमाया

अपभ्रंश साधुशब्द के द्वारा अर्थ का बोधक होता है, यह पूर्व में बालक के दृष्टान्त से जो कहा है, यहाँ उसी का संगमन करते हैं - 'एवम्' इत्यादि ।

अर्थ : - पूर्व में वर्णित तोतली वाणी बोलनेवाले बालक के समान ही अन्यजन भी व्यवहार में जहाँ साधुशब्द का प्रयोग करना चाहिए, वहाँ जो अपभ्रंश भाषा का प्रयोग कर देते हैं, ऐसी स्थिति में उस अपभ्रंश से उसके मूल साधुशब्द का

साधुस्मरणानन्तरम् - इत्यर्थः, कश्चित् अर्थः = स्मृतसाधुसङ्केतितार्थः अभिधीयते = बोध्यते इत्यर्थः । अपभ्रंशेषु शक्तिर्नास्तीति भावः ॥ १५३ ॥

विमर्शः - व्यवहारे श्रोतॄणामर्थबोधाय साधुशब्दे वक्तव्ये करणापाटवादिदोषात् तत्स्थाने पामरजनेनासाधुशब्दे प्रयुक्ते सति शिष्टास्तैरसाधुभिः साधूननुमाय तैरेवार्थबोधं कुर्वन्ति, नासाधुभिः । असाधवस्तु केवलं सादृश्यादिना साधुशब्दाननुमापयन्ति, अनुमिताः साधुशब्दा एवार्थबोधं जनयन्ति, नासाधवः, तेषु शक्तेरस्वीकारादिति, नैयायिकानां मतम् ॥ १५३ ॥

अनुमान करके उस साधुशब्द के माध्यम से ही कोई भी अर्थ सम्यक् जाना जाता है, साक्षात् अपभ्रंश से नहीं । क्योंकि अपभ्रंश में शक्ति है ही नहीं, अतः वह साक्षात् वाचक नहीं हो सकता, ऐसा नैयायिकों का कथन है ॥ १५३ ॥

पारम्पर्य्यादपभ्रंशा निर्गुणेष्वभिधातृषु ।
प्रसिद्धिमागता ये तु तेषां साधुरवाचकः ॥ १५४ ॥

प्रत्येकार्थप्रकाशिका

अन्यमतमुक्त्वा तत्खण्डनपुरस्सरं स्वमतमाह – पारम्पर्य्येति । निर्गुणेषु = स्त्रीशूद्रबालादिषु अभिधातृषु = प्रयोगकर्तृषु विषयेषु पारम्पर्य्यात् = अनादिकालतः प्रसिद्धिमागताः= कम्बुग्रीवादिमति 'गगरी' शब्दः, सास्नादिमति च 'गावी' शब्दः, एवंरूपेण

आनन्दा

परमतेनापभ्रंशानामवाचकत्वमुपन्यस्य तत् खण्डयन् स्वनयेऽपभ्रंशानां वाचकत्वं व्यवस्थापयति – 'पारम्पर्याद्' इति ।

अन्वयः – निर्गुणेषु अभिधातृषु ये तु अपभ्रंशाः पारम्पर्यात् प्रसिद्धिम् आगताः तेषाम् साधुः अवाचकः ।

व्याख्या – निर्गुणेषु = करणपटुत्वोच्चारणसामर्थ्यादिगुणरहितेषु संस्कृतज्ञानरहितेषु वा अभिधातृषु= वक्तृषु सत्सु ये तु अपभ्रंशाः = स्वर-वर्णादिक्रमविपर्य्ययेणोच्चारिता भ्रष्टसंस्काराः शब्दाः पारम्पर्यात् = अनादिपूर्वपूर्व-प्रयोगमूलकोत्तरोत्तरप्रयोगप्रवाहात् प्रसिद्धिम् = लोके मातृभाषारूपेण रूढिम्

सूर्यमाया

पूर्व में न्यायमतानुसार अपभ्रंश का साक्षात् अवाचकत्व बताकर उसके विपरीत यहाँ अपने मत में अपभ्रंश का साक्षात् वाचकत्व बताते हैं – 'पारम्पर्यात्' इत्यादि ।

अर्थ : – साधुशब्दों के सम्यक् उच्चारण में असमर्थ तथा अशिक्षित संस्कृतज्ञान से शून्य वक्ताओं के होने पर जो अपभ्रंश शब्द अनादि प्रयोग की उत्तरोत्तर परम्परा से लोक व्यवहार में रूढ़ि को पा चुके हैं तथा मातृभाषा बन चुके हैं, उनका

व्यवहृताः ये अपभ्रंशाः = भाषाशब्दाः, तेषां तु समुच्चारणे इति शेषः, साधुरवाचकः = स्त्रीशूद्रादीनां साधुस्मरणद्वारा नार्थबोधो भवति, प्रत्युत साधूच्चारणेऽपि भाषाशब्देनैवार्थ-बोधो भवति, इति शक्तिग्राहकव्यवहारस्योभयत्र तौल्यात्

आगताः = प्राप्ताः तेषाम् = अनादिवृद्धव्यवहारात् लोके प्रसिद्धानां मातृभाषाशब्दानाम् साधुः = मूलप्रकृतिरूपः संस्कृतः शब्दः अवाचकः = अज्ञातशक्तिकत्वात् स्मृतेरविषयः सन् नार्थबोधको भवति । भाषारूपेण रूढाः अपभ्रंशाः साक्षादेव स्वयमर्थवाचकाः, शक्तिग्राहकशिरोमणि-वृद्धव्यवहारात्तेषु शक्तिसिद्धेः ।

विमर्शः - अनादिवृद्धव्यवहारात् तत्तद्भाषारूपेण प्रसिद्धा येऽपभ्रंशाः, एतेषां मूलभूतस्य साधुशब्दस्य स्मृतेरावश्यकता नास्ति, वृद्धव्यवहारात्तेषु शक्तिस्वीकारेण स्वयमेव तेऽर्थं बोधयन्तीत्यनुभवः प्रमाणम् । प्रत्युत ये साधुशब्दानभिज्ञास्ते साधुशब्दोच्चारणे भाषामाध्यमेनैवार्थं बोद्धुं समर्था भवन्ति ।

मूलरूप साधुशब्द अर्थ का वाचक नहीं होता है, प्रत्युत अपभ्रंश स्वयं ही साक्षात् वाचक होता है ।

आशय : - यह देखा जाता है कि - जिनको मूलतः संस्कृत साधुशब्दों का सर्वथा ज्ञान नहीं है, उनके बीच साधुशब्द का प्रयोग करने पर अर्थबोध नहीं होता, अपितु उनको भाषा के द्वारा ही अर्थबोध होता है, इससे यह स्पष्ट होता है कि वृद्धव्यवहार से अपभ्रंश में भी शक्ति है, अत एव साधुशब्द के समान असाधुशब्द भी साक्षात् ही वाचक हैं । असाधु से साधुशब्द के अनुमान की अपेक्षा नहीं है ।

व्याकरण - कोश - आप्तवाक्य अथवा वृद्धव्यवहार से शक्तिग्रह होने पर ही अर्थबोध होता है । जो जिस भाषा का भाषी है, उसको उसी भाषा में अन्य भाषा का शक्तिग्रह होता है, एतावता उस भाषा को अन्यभाषा की अनिवार्य

भाषाशब्देष्वपि शक्तिः, केवलं धर्मजनकता साधावेव न त्वसाधाविति भावः ॥ १५४ ॥

तस्मात् यथा साधौ शक्तिस्तथा अपभ्रंशेऽपि शक्तिः समाना । किन्तु धर्मसाधनत्वं तु साधूनामेव नासाधूनामिति विवेकः । एवं च पुण्यजनकतावच्छेदकधर्मविशेषः साधुत्वमिति फलितम् । तदाह भाष्ये - ''समानायामर्थावगतौ शब्दैश्चापशब्दैश्च शास्त्रेण धर्मनियमः क्रियते'' इति ॥ १५४ ॥

अपेक्षा नहीं सिद्ध होती है । अत एव बालक के दृष्टान्त से अपभ्रंश को सर्वत्र साधुस्मरण की अनिवार्य अपेक्षा की कल्पना युक्त नहीं । वृद्धव्यवहार से जैसे साधु में शक्तिग्रह होता है, वैसे असाधु में भी शक्तिग्रह समान रूप में होता है । साधु वा असाधु से शाब्द बोध में शक्तिग्रह असाधारण कारण है ॥ १५४ ॥

दैवी वाग् व्यवकीर्णेयमशक्तैरभिधातृभिः ।
अनित्यदर्शिनां त्वस्मिन् वादे बुद्धिविपर्य्ययः ॥ १५५ ॥

प्रत्येकार्थप्रकाशिका

तदेवाह - "दैवी" ति । अशक्तैः = असमर्थैः अभिधातृभिः = उच्चारकैः इयम् दैवी वाक् = देववाणी व्यवकीर्णा = संकीर्णा, संस्कृतेन व्यवहर्तव्ये भाषयापि व्यवह्रियते, इति तयोः

आनन्दा

'पारम्पर्यादपभ्रंशा' इत्यनेनापभ्रंशे बीजं प्रयोक्तुर्गुणवैकल्यं रूढ्या साक्षाद् वाचकत्वं च यदुक्तम्, तदेव द्रढयन् परमतनिरासपूर्वकमपभ्रंशानां साधुविकृतिरूपत्वमाह - "दैवी वाग्" इति ।

अन्वयः - इयम् दैवी वाक् अशक्तैः अभिधातृभिः व्यवकीर्णा, अनित्यदर्शिनाम् तु अस्मिन् वादे बुद्धिविपर्ययः ।

व्याख्या - इयम् = लौकिकी दैवी वाक् = देवानाम् दिवि द्योतमानानां विग्रहरूपा वाणी, 'मन्त्रविग्रहा देवाः' इत्युक्तेः, यद्वा - मन्त्रविग्रहेन्द्रोपेन्द्रादिदेवद्रष्टॄणां प्रजापतिबृहस्पतिवशिष्ठप्रभृतीनां देवरूपाणामृषीणां मुखात् प्रस्फुटिता गङ्गेव निसर्गशुद्धा लोकेऽवतीर्णेयं साध्वी वाक् या पुरा अपभ्रंशैरसंकीर्णा बभूव, सा अशक्तैः = याथातथ्येनोच्चारणेऽसमर्थैः अभिधातृभिः = वक्तृभिः व्यवकीर्णा = "इयं या परमेष्ठिनी वाग्देवी ब्रह्मशंसिता" (१९-१-१०) इत्यथर्वश्रुतेः, "ब्रह्मा बृहस्पतये प्रोवाच बृहस्पतिरिन्द्राय" इति भाष्याच्च

सूर्यमाया

अपभ्रंश को साधुशब्द की विकृति बताते हुए अपभ्रंश का पूर्वोक्त वाचकत्व प्रकारान्तर से पुनः स्पष्ट करते है - 'दैवी वाक्' इत्यादि ।

अर्थ : - देवताओं की यह शुद्ध संस्कृत वाणी उच्चारण में असमर्थ संस्कारहीन वक्ताओं के द्वारा विकृत कर दी गई है, जो कि कालक्रम से व्यवहार में प्रसिद्ध होकर भाषा के रूप में लोक में अर्थ का बोध कराती है, किन्तु इसके विषय में अनित्यशब्दवादी नैयायिकों का विपरीत मत है कि - अपभ्रंश अर्थवाचक नहीं होता, जो कि प्रसिद्धि के विरुद्ध अनुचित है ।

साङ्कर्यमिति साधुविवेकाभावात् व्यवहारोपपत्त्यै भाषास्वपि शक्तिः कल्पनीयैवेति भावः ।

अस्मिन् वादे अनित्यदर्शिनाम् = नैयायिकादीनां तु बुद्धि-विपर्य्ययः = भाषासु नास्ति शक्तिरिति भ्रम इत्यर्थः ॥ १५५ ॥

देवानामियं दैवी वाक् रजोभिर्गङ्गेव विकृतोच्चारणापभ्रंशदोषैः सङ्कीर्णीकृता, साऽपि पारम्पर्यात् प्रसिद्धिं प्राप्ता लोकेऽर्थबोधिकेति शब्दनित्यत्ववादिनामस्माकं मतम् । अनित्यदर्शिनाम् = शब्दानित्यत्ववादिनां परेषां तार्किकाणां तु अस्मिन् वादे = अपभ्रंशानां साक्षाद्वाचकत्वविषये बुद्धिविपर्ययः = मतवैपरीत्यम्, तन्न शोभनं प्रसिद्धिविरुद्धमेवेति भावः ।

शक्तिग्राहकशिरोमणेर्वृद्धव्यवहारादपभ्रंशानां वाचकत्वे प्रसिद्धे तद्विरुद्ध-मपभ्रंशानामवाचकत्वकथनं परेषामयुक्तमेवेति सर्वं प्रागुपपादितमिति नात्र किमपि विमर्शनीयमवशिष्यते ।। १५५ ।।

आशय : – 'इयं या परमेष्ठिनी वाग् देवी ब्रह्मशंसिता' इस मन्त्र से स्पष्ट सिद्ध होता है कि आदिकाल में ब्रह्मा आदि देवों से बोली गई देववाणी प्रारम्भ में जैसे असत्य – मिथ्यादोषों से मुक्त थी, वैसे ही अपभ्रंश दोषों से मुक्त केवल शुद्ध संस्कृत ही वाणी थी, किन्तु उत्तरोत्तर युग के परिवर्तन से जैसे जैसे लोगों का अन्तःकरण विषयरागदोषों से मलिन होता गया, वैसे उनकी वाणी मिथ्यादोषों से तथा 'संस्कार हीन – विकृतवर्ण' अपभ्रंश दोषों से भी मलिन होती गई । साधु शब्दों के स्थान में असाधु अपभ्रंश का प्रयोग प्रचलित हो गया, जिसके फलस्वरूप अपभ्रंश मातृभाषा के रूप में रूढ होकर प्रसिद्धिबल से अर्थ का साक्षात् वाचक हो गया । नित्यशब्दवादी व्याकरणमत में वृद्धव्यवहार से साधु-असाधु दोनों में शक्ति सिद्ध होती है, दोनों ही समान रूप में वाचक हैं । परन्तु न्याय का मत इसके विपरीत है कि अपभ्रंश में शक्ति न होने से वाचक नहीं होता, वह साधु शब्द के ज्ञान द्वारा ही अर्थ का बोधक होता है, किन्तु यह मत वृद्धव्यवहार व प्रसिद्धि के विरुद्ध होने से ग्राह्य नहीं है ।। १५५ ।।

उभयेषामविच्छेदेऽप्यन्यशब्दविवक्षया ।
योऽन्यः प्रयुज्यते शब्दो न सोऽर्थस्याभिधायकः ॥ १५६ ॥

प्रत्येकार्थप्रकाशिका

तत्रैव युक्त्यन्तरमाह - उभयेषामिति । उभयेषाम् = साध्वसाधूनाम् अविच्छेदे = अविनाशे सत्येव, एवार्थकोऽपिः, अन्यशब्दविवक्षया = गोशब्दप्रयोगेच्छया अन्यः शब्दः = पटः

आनन्दा

इदानीं साध्वसाध्वोरुभयोरप्यविच्छेदेन सद्भावं प्रतिपादयन् तयोः स्वातन्त्र्येण वाचकत्वमुपसंहरति - ''उभयेषाम्'' इति ।

अन्वयः - सरलः ।

व्याख्या - उभयेषाम् = साधूनामसाधूनां च अविच्छेदे अपि = संसारस्यानादित्वेनोभयोः प्रवाहवत् सातत्ये सत्येव अन्यशब्दविवक्षया = घटत्वावच्छिन्नघटबोधाय घटशब्दप्रयोगस्थाने योऽन्यः शब्दः = भिन्नार्थक-पटादिशब्दो यदि प्रयुज्यते = प्रोच्यते चेत्तर्हि सः = पटशब्दः अर्थस्य = विवक्षितस्य घटार्थस्य अभिधायकः = बोधको न भवति, पटशब्दस्य घटेऽर्थे शक्तेरसत्त्वात्, एवमेवापभ्रंशे शक्तेरसत्त्वे 'घड़ा - गगरी'-

---

सूर्यमाया

साधु और असाधु दोनों शब्द का अनादिकाल से सद्भाव बताते हुए समान रूप से दोनों को वाचक मानना आवश्यक बताते हैं - 'उभयेषाम्' इत्यादि ।

अर्थ : - साधु-असाधु दोनों प्रकार के शब्द का कभी विच्छेद नहीं हुआ है, अनादिकाल से दोनों का प्रयोग होता आ रहा है, अतः दोनों को वाचक मानना आवश्यक है । केवल साधुशब्द को वाचक मानने से वह असाधु शब्द के अर्थ का बोधक नहीं हो सकता । घट अर्थ का बोध कराने के लिए घट शब्द का प्रयोग करने के स्थान में यदि कोई उससे भिन्न पट आदि शब्द का प्रयोग करता है तो वह बालक के प्रलाप के समान अर्थ का बोधक नहीं होता है । क्योंकि पटशब्द की घट अर्थ में शक्ति नहीं है ।

प्रयुज्यते = प्रयुक्तो भवति, सः अर्थस्य = गवार्थस्य न अभिधायकः = न बोधको भवतीत्यर्थः ।

बालप्रलापवत् अन्यशब्दविवक्षया अन्यः प्रयुक्तः

इत्यादिरपभ्रंशशब्दः साधुशब्दघटादेरर्थस्य बोधको न भविष्यति । तस्माद् यथा घटे कलशे च पर्यायशब्दे पृथक् शक्तिस्तथा भिन्नानुपूर्वीके 'घड़ा - गगरी' इत्यादावपभ्रंशेऽपि शक्तिर्वृद्धव्यवहारात् सिध्यत्येवेति हृदयम् ।

विमर्शः - द्वयी सृष्टिः - व्यक्तवाचामव्यक्तवाचां च । व्यक्तवाचोऽपि द्विविधाः - साधुसंस्कृतवाचः - असाध्वपभ्रंशवाचः । साधुवाचोऽपि द्विविधाः- स्वतः प्रतिभानवन्तो ब्रह्मबृहस्पतिदेवेन्द्रप्रभृतयो देवाः, वशिष्ठात्रिमनुप्रभृतयो महर्षयश्च तेषां वंशानुवंशगोत्रजा मनुजाश्च । असाधुवाचस्तु प्राकृताः पामरा मनुजाः । एतादृशवैचित्र्ये बीजं तु वासनावैचित्र्यमूलकयोनिवैचित्र्यम् । तदिह भवे स्वभावादेव भवन्ति केचन साधुभाषणप्रकृतयो व्यक्तवाचः, केचिच्च पारम्पर्यादसाधुभाषणप्रकृतयो विकृतवाचः । चित्रा हि स्रष्टुः सृष्टिः । केचन जन्मजातज्ञानिनो वामदेव-कपिल-भृगु-शुकदेवप्रभृतयः, कतिपये च कालिदास-श्रीहर्षप्रभृतयस्तपःसाधनापरिपाकपरितोषितेश्वरानुग्रहाद् भवन्ति महाकवयः । परे तु शिक्षाभ्यासव्युत्पत्तिबलाज्जायन्ते ज्ञानविज्ञानसम्पन्नाः । बहवस्तु भोगरोगकलुषिता जन्ममरणचक्रावर्ते भ्राम्यन्तो नामापि न स्वप्ने शृण्वन्ति साधुशब्दराशिनिगमागमानाम् ।

इदं तु बोध्यम् - अपभ्रंशा एव साधूनां प्रकृतयः, साधवस्तु संस्काराज्जाताः संस्कृता उच्यन्ते, इत्थं चापभ्रंशा एव वाचका इत्यनित्यवादिनां मतं

आशय : - अनादिकाल से प्रवाहरूप में साधु-असाधु दोनों ही शब्द का स्वतन्त्र प्रयोग होता चला आ रहा है । अनादिकाल से विभिन्न प्रकृति के लोग होते आ रहे हैं । कोई देवोपासक ऋषि-मुनि वंशपरम्परा के आर्य लोग साधु संस्कृतभाषा के भाषी होते आ रहे हैं, तो दूसरे प्राकृतजन प्रदेशभेद से अपभ्रंश मातृभाषा के भाषी होते आ रहे हैं । देव-ऋषियों की यह देववाणी अपभ्रंश से असंकीर्ण सदा शुद्ध है, साधु है । न तो साधु से विकृत होकर असाधु बना, न अपभ्रंश - प्राकृतभाषा को व्याकरण से संस्कृत करके साधु बना । साधु-असाधु का परस्पर

साधुरसाधुश्च नार्थवाचको भवतीत्यत उभयत्र शक्तिरिति सिद्धम् ॥ १५६ ॥

इति महावैयाकरण-श्रीहरिवृषभाचार्य्यविरचित-वाक्यपदीयप्रकाशे प्रथमस्य ब्रह्मकाण्डस्य व्याकरण-न्याय-वेदान्त-सांख्याद्यध्यापक - झोपाह्वमैथिलपण्डित - श्रीद्रव्येशशास्त्रि-प्रणीत'प्रत्येकार्थप्रकाशिका' टीका समाप्तिमगात् । शुभम् - भूयात् ।

केचन वर्णयन्ति, तत् प्रकरणविरुद्धम् । शक्तत्वं साधुत्वं स्वीकुर्वतां तार्किकाणां मते साधुत्वापत्तिभिया "ते साधुष्वनुमानेन" इत्यादिना प्राक् अपभ्रंशेषु शक्त्यभावस्य प्रतिपादितत्वात् । आस्तां तावत् । साध्वसाध्वोः प्रकृतिविकृतिभावाग्रहं विहाय साधूनामसाधूनां च तुल्यं वाचकत्वमिति हृदयम् । पुण्यजनकत्वं तु साधूनामेवेति भाष्यानुसारिणः ।

यदि तु मानसचरितादीनामपि पुण्यजनकत्वमिति श्रद्धीयते, तर्हि व्याकरणाभिव्यङ्ग्यजातिविशेषः साधुत्वमित्यभ्युपगमोऽविकलमास्थीयतां श्रद्धालुभिरित्यलम् ॥ १५६ ॥

॥ श्रीविष्णवे प्रतिपत्तिरस्तु ॥

कोई प्रकृतिविकृतिभाव नहीं है । दोनों स्वतन्त्र भाषा हैं, दोनों में पृथक् स्वतन्त्र शक्ति है, दोनों ही समान रूप से साक्षात् ही अर्थ के वाचक हैं । दोनों में अन्तर यह है कि - व्याकरण से अन्वाख्यात तथा पुण्यजनक साधु होता है, इससे विपरीत असाधु होता है । जैसा कि वैयाकरणभूषण में कहा है "वाचकत्वाविशेषे वा नियमः पुण्यपापयोः" । भाष्य में भी कहा है -

"समानायामर्थावगतौ शास्त्रेण धर्मनियमः" ॥ १५६ ॥



पण्डित वेदानन्द झा

राष्ट्रपतिसम्मानिताः
व्याकरणन्यायवेदान्तसांख्ययोगसाहित्याचार्याः,
एम० ए० (संस्कृत)
हिन्दीसाहित्यरत्न, पोष्टाचार्याः